Barcode : 99999990077574
Title - Tarkakutuhalam
Author - Pandey, Srivishveshvar
Language - sanskrit
Pages - 507
Publication Year - 1971
Barcode EAN.UCC-13



DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj)

Students can retain library books only for two weeks at the most

BORROWER S No	DUE DTATE	SIGNATURE

पदवाक्यप्रमाणपारावारीण कवितार्किकचूडामणि-

पर्वतीय-श्रीविश्वेश्वरपाण्डेय-

विरचितम्

तर्ककुतूहलम्

सम्पादक

जनार्दनशास्त्री पाण्डेयः

एम ए, साहित्याचार्यः

प्रकाशिका

श्रीनित्यानन्द-स्मारक-समितिः

वाराणसी

'With the financial assistance from the Ministry
of Education, Government of India"
भारतीयशासनसाहाय्येन कृतमाद्यं मुद्रणम्

प्रथम संस्करणम् ११००

© सं० २०२८ वं०

मूल्यम्

प्रकाशक —
मन्त्री
श्री नित्यानन्द स्मारक समिति
के ३२।४७।४८ दण्डपाणिगली
वाराणसी-१

मुद्रक —
कौस्तुभानन्द पाण्डेय
पर्यंतीय-मुद्रणालय
पञ्चगङ्गा, वाराणसी

Foreword

To the scholars of Sanskrit, the name of Shri Vishweshwar Pandey is not unfamiliar, though it may not be as well known as it deserves to be While some of his writings have seen the light of day, there are still many that have to be unearthed and brought into the open. 'TARKKUTUHAL' is one such gem which Shri Nityanand Smarak Samiti is presenting to the lovers of Sanskrit language and literature

Vishweshwar was a man of amazing genius who flourished towards the close of the eighteenth century. He strode like a colossas in the varied fields of Sanskrit learning. If Mandar Manjari is a monument to his power of creative fiction, TARKKUTUHAL is a gymnastic exercise in Naiyayik reasoning,a fine example of verbal dialectics presenting the Naiyayik point of view in regard to the phenomenal world and holding its own in sheer subtleties of reasoning Of the six facets of orthodox and traditional Hindu metaphysics, Nyaya–Vaisheshik form the backbone of the ancient Hindu thought, attempting to probe into the mysteries of he phenomenal world from a logical point of view. Unlike the Vedantist, the Naiyayik postulates the reality of the material world and proceeds on the basis of the causative functioning of the manifest The effect and cause are a binding universal law, and every atom of matter is conditioned in its operational behaviour by its causative nucleus. In a reasoning of this kind the visible forms of the manifested matter cannot be brushed aside as hallucinations of mind or delusions of thought.

The theory of Maya is thus not acceptable to the student of Nyaya **Vishweshwar** assumes this attitude and dives into the Upanishadic lore, collecting passages bearing on the illusory nature of the world around us and otherwise, and then embarks on a reinterpretation to prove that the Nayayik view is the correct one. It is not only in the views set forth by him but also in the manner of semantic reasoning and interpretative acumen displayed by him that his personality, depth of learning, freshness of thought, are fully revealed, and the real significance of this unique work unfolded He has allowed a fresh breeze to blow into the time-worn and traditional argumentative paraphernalia of earlier metaphysicians, and has given a new dimension to the metaphysics of Nyaya. It is the effectiveness of the argumentative art displayed here that marks him out amongst the giants of late eighteenth century Sanskrit writers; his style of writing, presentation of material, forceful reasoning, and diction take him back to the earliest ages of Sanskrit writers who packed meaningful loads of scholarly thought in the chiselled aphoristic idioms **Vishweshwar** is fresh, original and profound and a master of style. What an amazing fecundity did he possess that he at once shone like an unrivalled star in all spheres of creative writing, fiction, poetry, drama, rhetoric to name only a few. In the list of his works, printed or unpublished, are included all the different kinds of creative or critical writing.

—G. D. Shastri.

प्रकाशकीयम्

ब्रह्मीभूत महामहोपाध्याय पण्डितनित्यानन्दपन्तपर्वतीयमहोदयाना जन्मशताब्दिमहोत्सव पौषकृष्णत्रयोदश्या २०२४ वै० वाराणसेय-सस्कृतविश्वविद्यालयस्य मुख्यभवने महता समारोहेण सम्पन्नोऽभवत्। तत्रैव काशीस्थपर्वतीयैरिद निरणायि यत् काश्या पूज्यपर्वतीयपादाना स्मृतिश्चिरस्थायिनी भवेदेतदर्थमेकस्या स्मारकसमिते सगठन कर्तव्य-मिति। श्री श्री गणेशदत्तशास्त्रिमहोदयानामाध्यक्षये सगठिता समिति राजकीयनियमानुसार पञ्जीकृता च। अस्याश्च समित पर्वतीयस माजस्योत्थापकेषु बहुपूद्देश्येषु अयमप्येक आसीदुद्दश्यो यत् पर्वतीय-विद्वद्भिर्विरचितानामद्यावधिप्रकाशमनुपगताना रचनाविशेषाणा सक लन प्रकाशन च कर्तव्यमिति। स्वल्पेनैव कालेन समित्या बहुशोऽज्ञात-चराणा कृतीना सकलन कृत क्रियते च। समिते कार्यकारिण्या परिषदा निश्चित यत् विद्वन्मूर्धन्यश्रीविश्वेश्वरसूरिविरचिता ग्रन्था सस्कृतवा-ङ्मयेऽतीव लब्धादरा महत्त्वपूर्णा विद्वदुपकारकाश्च। तेषु येऽप्रकाशि-तास्ते त्वप्रकाशिता एव ये प्रकाशमुपगतास्तेऽपि सम्प्रति प्रायो दुर्लभा एव सन्ति, अतस्तेषा समग्रोपलब्धग्रन्थाना क्रमशो मालारूपेण प्रकाशन समित्या कर्तव्यमिति। तमेव निर्णयमनुसृत्य तर्ककुतूहल प्रकाश्य विदुषा पुरत उपस्थाप्यते।

वर्षशतकात्पूर्वमेव विद्वन्मूर्धन्यै स्वर्गीयपण्डितकेशवदत्तशास्त्रिभि स्वय परिश्रम्य बहुव्यय च कृत्वा पर्वतीयविद्वद्भी रचिता भूयासो ग्रन्था सङ्कलिता आसन्। तत एव तत्तनूजन्मभि श्रीगणेशदत्त-शास्त्रिभि एतद्ग्रन्थकृत्प्रणीता मन्दारमञ्जरी कुसुमाभिधटीकासवलिता प्रथमरत्नरूपा प्रकाशिताऽऽसीत्। तस्यामेव ग्रन्थमालाया द्वितीयमिद ग्रन्थरत्नमेतर्हि मुद्रितम्। यदि विद्यानुरागविपुलैर्विद्वद्भिरेतान् ग्रन्थान् समादृत्यास्माकमुत्साहवर्धन पर्वतीयबन्धुभिश्च स्मारकसमितेर्यथासम्भव साहाय्य करिष्यते चेदाशास्महे शीघ्रमेव वय बहूना दुर्लभाना ग्रन्था-नामुपस्थापने समर्था भविष्याम इति।

निवेदक

सुरेशचन्द्रपन्तः

मन्त्री

नित्यानन्दस्मारकसमिते

• श्रीः •

प्रास्ताविकम्

ग्रन्थकर्तुः परिचयः

अस्ति च हिमाद्रेरुपत्यकाया गुरम्या "अलमोडा" भिधाना नगरी, तस्याश्चतुष्क्रोशान्तरं यावत् पाटियाख्यो ग्रामः पाण्डेयाभिजनानां भरद्वाजगोत्रीयब्राह्मणानां वसतिः। तत्र चाभवल्लक्ष्मीधरपाण्डेयो नाम कश्चन सर्वशास्त्रपारङ्गतः पण्डितप्रकाण्डः। श्रूयतेऽनपत्यतातापतप्तेन तेन काशीमागत्य कोटिलिङ्गार्चनं कृतम्। ततस्तुष्टेन च भगवता विश्वेश्वरेण स्वप्ने "मत्सदृशमेव पुत्रमाप्नुहि" इति वरो दत्तः। तद्वरप्रभावादेव सुदीर्घे वयसि लब्धस्य पुत्रस्य नामाप्यनेन 'विश्वेश्वर" इत्येव कृतम्। अयं च विश्वेश्वरो जन्मत एव विचित्रप्रतिभासम्पन्न आसीत्। पञ्चवर्षवयस्क एव कृतोपवीतः षड्ऋत्वालापादिना सर्वानाश्चर्यचकितांश्चक्रे। दशवर्षानन्तरं तु य कमपि शास्त्रमधिजिगाय तस्मिन्नेव ग्रन्थनिर्माणं प्रारेभे। सर्वेष्वपि शास्त्राध्ययनेन स्वपितुः सकाशादेवाधिगतानीति तद्रचितग्रन्थेभ्य. स्फुटमेवावगम्यते[1]।

---

१. यथा—

लोकध्वान्तघनान्धकारपटलप्रध्वंसदीपाङ्कुरा
विद्याकल्पलतामनोजनन बीज निजानङ्गिनाम् ॥
मध्येमौलि ममासतां सुविमला मालायमानाश्चिर
श्रीलक्ष्मीधरविद्वदङ्घ्रिनलिनोदीता परागापवः ॥
(तर्ककुतूहले, अलङ्कारकौस्तुभे च)

सद्विद्वत्पदवाक्यमाननिगमाकूपारपारङ्गम—
श्रीलक्ष्मीधरलब्धयोजनतुषा विश्वेश्वरेणोदिते ।
श्रीसिद्धान्तसुधानिधौ सुविपुलं व्याख्यामयायत
ध्यायध्यायमिहाभिधेयमधुना शोधाय धीधर्मिणाम् ॥
(सिद्धान्तसुधानिधौ)

वाग्देवता द्विरदवक्त्रमपि प्रणम्य लक्ष्मीधरस्य विदुषश्चरणानुनम्य ।
भावानलङ्करणकौस्तुभगुम्फितान् स्वान् विश्वेश्वरो विवरितुं यतते समासात् ॥
(अलङ्कारकौस्तुभटीकायाम्)

स्थितिकालः

अय कदा प्रादुरभवत् कदा च ब्रह्मीभूत इति तिथिस्तु इट नैव वक्तु शक्यते, किन्तु निश्चितमेवेनद् यदय वैक्रमेऽष्टादशशतके विद्यमान आसीत्। यतो हि सिद्धान्तसुधानिधावनेन भट्टोजिदीक्षितमतमालोचितम्, किन्तु तत्पौत्रस्य शब्दरत्नकर्तु हरिदीक्षितस्य सुप्रसिद्ध वैयाकरणास्य नागेशस्य वा नामापि न क्वचिद् गृहीतम्, एतेन प्रतीयतेऽय भट्टोजिदीक्षितादनन्तरवर्ती हरिदीक्षिताच्च पूर्ववर्ती इति। अलकारकौस्तुभेऽप्यनेन अप्पयदीक्षितस्य पण्डितराजजगन्नाथस्य च मत स्पष्टमालोचितम्, अत स्पष्टमेव तयोरनन्तरवर्तीति। श्रूयते च हरिदीक्षितेन काशीमागतेनास्य दर्शन कृतमासीत्। सरस्वतीभवनग्रन्थालयस्थनैषधीयचरितटीकाया भावप्रदीपास्यायामन्ते श्लोको विद्यते—

८ ३ ६ १

अस्मिन् व्याकरणत्रयीरसरसास्वाः समा विभ्रति
श्रीहालस्य शकेऽधिपश्चमि सहोमासस्य पक्षे सिते।
श्रीहर्षोक्तिषु नैषधीयचरिते भावप्रदीप कृति
श्रोतानाङ्घ्रिसरोरुहा प्रथयितु द्राक् पर्युत्सुकोऽलिखत् ॥ १ ॥

एवमेव रसमञ्जरीटीकाया अन्तेऽपि—

श्रीमन्हीमहितनतदनीमधीमन्मूर्धन्यताकलितमङ्गलधन्यताक।
लक्ष्मीधरो यमुदनूत मुद प्रसूता विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥
(रसचन्द्रिकायाम्, दीधितिप्रवेशे, कवीन्द्रदर्पणभरणे च)

नूरीन्द्रमौलिमुकुटामलरत्नदीपलक्ष्मीधराख्यबुधवर्यतनूद्भवेन।
विश्वेश्वरेण हृदयोद्गुदो मदाय रोमावलीशतकमेतदकारि चारु ॥
(रोमावलीशतके)

प्रणम्य सम्यक्प्रतिपत्तिरम्य लक्ष्मीधराख्यं विपणे धरायाः।
विश्वेश्वरेण क्रियते समासात् समञ्जसाख्या रसमञ्जरीयम् ॥
(रसमञ्जरीटीकायाम्)

अन्तर्वाणिकुलावतंसपरिषद्वालाविलासाधित—
श्रीलक्ष्मीधरगोचरप्रतिपदा धाराभिराराधितः।
आधात्तु कविजामुघोदधिसुधाहस्पृक्षामद्भुतं
रसोल्लासनिरमात् स काव्यतिलक विश्वेश्वरः सूक्तिभिः ॥
(काव्यतिलके)

= ३ ६ १

दिग्गुणर्तुशशलाञ्छनयुक्ते शालिवाहनशके जयकृष्णः ।
श्रावणीमसितनन्दनवन्द्यो निर्मिमे मितुरिमा विलिखेत ॥

उपर्युक्तयोरुभयोरपि श्लोकयोरादानि यत् १६३८ शकाब्देऽयं विद्यमान आसीत्, इदमपि श्लोकद्वयेनानेन तस्य महाभागस्य द्वौ पुत्रावास्तां परशुरामजयकृष्णाख्यौ । प्रथमश्लोकस्थेन द्राक् अलिखत् इत्यनेन समन्वये सति द्वयोरुभयोः पुत्रत्वं सिद्धति ।

एतदनन्तरं वंशदीपयशजा नाम्नी विहाय गणातद्वर्तिनि "अनूपशहराख्ये" नगरे स्थितः ।

शून्ये चन्द्रेषुरन्ध्रैर्वयस्क एवास निजमायुरुन्मार्ष ।

पाण्डित्यं रचनापद्धतिश्च

अथ नैयायिकधुरन्धरः, वैयाकरणाग्रणीः, आलङ्कारिकप्रवरः, गद्यपद्यो-भयरचनावतुरोऽयं काव्यकलानिलयो महाविद्वान्सौदित्येतत्प्रणीतग्रन्थैः प्रत्यक्षीभवेत् । परन्तु यदा विद्वद्गणस्य सान्निध्यं तर्यव स्वपक्ष-स्थापनेऽपि । इदं तु निश्चितं यदत्र प्रथमं नैयायिकस्यैवोल्लिखामि, यतो हि समग्रस्य रचनापद्धतिर्नैयायिकपरिपाट्या सर्वतोऽनुस्यूता । कोमल-हृदयग्राह्याणि काव्येष्वपि दार्शनिकान् पदार्थान् कथा चमत्कारिकरीत्या निवेशयतीति मन्दारमञ्जर्यां द्रष्टव्यम्[१] ।

प्रसादगुणपरिपूर्णानि वर्णनानि, लघुतरस्यापि विषयस्य विस्तरेण विवेचनमस्य रोचते । गद्यावसरेष्वप्यस्यैवाभ्यासः प्रकृतिः यत् कस्मिन्नपि विषये यावन्ति कानि मनुष्यावधि राक्षसे तावतीः समुद्धृत्य समादधाति । य कश्चिद् प्राचीनमाचार्यमनुसरति चेत् केवलं सिद्धान्तदृष्ट्या, न कदापि शिष्टतां जहाति ।

अदलि यमजातानां वाग्भानुजनवारिजवधूः ।
श्रीलक्ष्मीवरविबुधावनन्तचरणनूजरेणुकम. ॥

(मन्दारमञ्जर्यां रत्नपञ्चिकायां च)

१. "यत्किल प्रमाणं वाक्यविवेचनम्, प्रमेयमनुद्देशादिपरीक्षणम्, संशयादेर्वा-यादिपञ्चावयवपरिमाणपरिच्छेदस्य, प्रयोजनं तत्त्वार्थादीनाम्, दृष्टान्तो महापरिमाणवत्त्वादिना, सिद्धान्तः स्तुतिकाष्ठादेः, अवयवा स्तुरयोरुन्मत्तः, तर्कस्तनुत्वविषयः कपिकुड्यादेः, निर्णय-स्तोयदेः परलोकादेश्च, वादो महेन्द्रवनस्य, जल्पश्चमत्वसानहेतुरत्नेधाकाशस्य, वितण्डा-

एतन्निर्मिता ग्रन्थाः

पूर्वमुक्तमेवास्माभिर्यदयं दशवर्षादारभ्यैव य कमपि विषयमधीतवान् तस्मिन्नेव ग्रन्थरचना प्रारेभे। सस्कृतवाङ्मयस्य प्राय. सर्वास्वेव शाखास्वनेन रचनाः कृताः, आफ्रेख्टनिर्मिते "कैटलाग्स कैटलागरुम्" इत्याख्ये ग्रन्थसूची-संग्रहे एतन्निर्मिताना त्रयोविंशतिग्रन्थाना नामानि दृश्यन्ते, तेषु येऽस्मद्दृष्टिपथ-मागतास्तेषा सक्षिप्तपरिचयो दीयते—

व्याकरणे—

(१) सिद्धान्तसुधानिधि —अय ग्रन्थः अष्टाध्यायीसूत्रक्रमेण भाष्यवचस्तात्पर्यकुसुमा-मोदविस्तारगर्भं ग्रथितोऽपि नि शेषत सिद्धान्तप्रतिपादनेन क्वचिद्भाष्यवार्ति-कक्रन्मतयोर्लाघवगौरवविचारोट्टङ्कनात्, क्वचिच्च "अत्रेदमवधेय" 'वस्तुतस्तु' इत्यादिना भाष्यवार्तिकादितः स्फुटमनवगम्यमानविषयाणामाञ्जस्येन बोधनाच्च स्वतन्त्रतया प्रकरणग्रन्थता भजते।

स चायमध्यायत्रयमात्रमुपलब्धश्चौखम्भा-सस्कृत-ग्रन्थमालात १५८८ पृष्ठेषु मुद्रित, अष्टाध्यायात्मक सपूर्णो ग्रन्थ उपलभ्येत चेत् कियान् विशाल स्यादिति, सुधीभिरूह्तोऽयम्।

न्याये—

(२) दीधितिप्रवेश'—गङ्गेशोपाध्यायकृतस्य श्रीतत्त्वचिन्तामणे रघुनाथशिरोमणि-कृता अनुमानभागे दीधित्यभिधा या टीका तस्या सारल्येन विपठिषूणा प्रवेशः

त्मक परपुराणा, हेत्वाभासत्वकर स्वोपरोधोपायाना, छलहेतु पाखण्डाना, जातिवा-धकसंग्रहरूपमासुरगर्भस्य, निग्रहस्थान विपक्षाणा चाभूत्"।

"मतान्तरानुगाभिरिव द्रव्याभिन्नगुणाभिमानिनीभि, पृथिवीभिरिव द्रव्यान्तर-संसर्गाधीनस्नेहाभि, जातिभिरिवैकवृत्तित्वरहिताभि"।

" · जातिनिराकरणे सौगतसिद्धान्तेषु, ईश्वरद्वेषो मीमासकेषु, मुहुश्चिपातन पाणिनीयेषु, अदृश्यत्वमाकाशादिषु, मिथ्योत्तिरव्ययेषु, सविकल्पकत्व ज्ञानविशेषेषु, सत्प्रतिपक्षत्व बाधितत्व च हेत्वाभासविशेषेषु, दुरूढ पाधमंबार्ता गुणनिरूपणेषु, आत्मसत्त्वप्रतिपादनं मदागमेषु, द्रव्याभावो बुद्धदर्शनेषु, प्रकृत्यन्यथाभावो निष्क्रियचेतन-पुरुषत्व च साङ्ख्येषु, न्यूनमनस्कत्वं वैशेषिकेषु, स्वत प्रामाण्याभावो नैयायिकेषु, उपनयत्यागपक्षो जैमिनीयानुष्ठानेषु, निरालम्बनता नास्तिकमतविशेषे, उपसर्गयोगो धातुषु, भागहीनत्वं नित्यद्रव्येषु, परार्थहरण समासादिवृत्तौ, दोषोदयो वैद्यकेषु, बहुवचनादर्शन तद्राजप्रत्ययेषु, पदाभावो भगशापा, विकलत्वमङ्गभेदे, अशक्तत्वमुप-सर्गेषु, अङ्गहारो नाटयकलासु, विकरणान्वयो धातुषु·····न जनेषु। (पृष्ठ ४६–६३)

स्यादिति कृत्वा रचितोऽयं ग्रन्थः, इमनाद्यन्तं सुलभमध्ययन दीधितेः । नाम-ग्राह्यधि प्रकाशित ।

(३) तर्कचूडामणि—एतद्हि भवतः करस्थमेव, एतद्विवेचनमत्रैव द्रष्टव्ये ।

अलङ्कारशास्त्रे—

(४) अलङ्कारकौस्तुभ —मामहादारभ्यालङ्कारिकाणां या परम्परा प्रसृता तस्यामन्तिमोऽयं ग्रन्थकारः, नव्यान्यदशीलनमुपजीव्य ग्रन्थेऽलङ्कारमेतेनात्र ग्रन्थे सर्वेषामेव पूर्ववर्तिलक्षणविज्ञानामालोचन कृतं, यत्र यस्य मतमुचित प्रतिभाति तत्र तस्य समर्थन यत्र च मानुकूल्य प्रतीयते तत्र तस्यैव प्रौढ खण्डनमत्र दृश्यते, न कस्मिन्नपि विशेषाग्रहः तथापि काव्यप्रकाशकृता मम्मटस्य प्रायो मतमूरीकरोति, रसरीतिगुण-दोषालङ्कारा सर्वे एवात्र विवेचिता, टीकाप्यस्य ग्रन्थकृता स्वयमेव रचिता किन्तु रूपकालङ्कारपर्यन्तमेवोपलभ्यते ।

स चायं ग्रन्थो बम्बईस्थनिर्णयसागरमुद्रणालयत काव्यमालाया मुद्रितः ।

(५) अलङ्कारमुक्तावली—अलङ्कारकौस्तुभस्या एव कारिका स्वल्पविवृतिसहिता अत्र दत्ता, प्रारम्भ एव ग्रन्थकृता स्वयमिदं प्रकटितो यत् अलङ्कारकौस्तुभाध्ययने काठिन्यमनुभवता भिन्ना सुबोधायेयं मुक्तावली विरच्यत इति । इत्यलमीदृशालङ्कारकौस्तुभाध्ययने भारल्य भवति ।

(६) अलङ्कारप्रदीपः—येऽलङ्कारनिरूपणेऽत्र लघुतामो ग्रन्थ, अत्र सरलैः सक्षिप्तैः नूतनैर्नवैरलङ्कारलक्षणानि तथा प्रतिपादितानि यथा सुकुमारमतयोऽपि बालका विनैवालङ्कारलक्षणबुद्धयेयु, उदाहरणेषु च स्वीयान्येवपद्यानि स्थापितानि, ग्रन्थ शास्त्रीयो विचारो नात्र प्रचारितः ।

(७) रसचन्द्रिका—लघुताऽप्यस्मिन् ग्रन्थे केवल रसविषयकमेव विवेचनमस्ति, नायकादीना परिपूर्णप्रायाणि लक्षणानि नवीनप्रायाणि चोदाहरणानि दत्तानि । (५, ६, ७) एते त्रय ग्रन्था बोम्बई—सस्कृतग्रन्थमालाया मुद्रिताः ।

(८) रसमञ्जरीटीका—भानुदत्तकृतायां सुप्रसिद्धायां रसमञ्जर्यामेकेयं समन्वयाख्या इतराभ्यो बहुभ्यटीकाभ्यो विलक्षणा च, नेयमद्यावधि मुद्रिता । केवलमुपलब्धा, सरस्वतीभवनग्रन्थालये चास्या मातृके वर्तते ।

(९) कवीन्द्रकण्ठाभरणम्—इदं च विद्वद्भूषणकण्ठाभरणादपि ततोऽप्यधिकतरं चमत्कारकारीति विद्वद्भिरवश्यमवलोकनार्हम्, बम्बईस्थनिर्णयसागरमुद्रणालयतः प्रकाशितायां काव्यमालाया अष्टमगुच्छके मुद्रितमिदम् ।

काव्येषु—

(१०) मन्दारमञ्जरी—गद्यकाव्यकथेयमतीव रुचिरा लौकिक शास्त्रीयव्यवहारवर्णनपरा कादम्बरीतोऽतिविलक्षणा वासवदत्तातोऽतिविचित्रा, इद चास्या वैशिष्ट्य यदत्र दार्शनिका पदार्था गहनतमा अपि प्रसङ्गमङ्गत्या सरलतया सरसतया च लौकिकपदार्थवर्णनप्रकारेण कथायामेव सन्निवेशिता मया तेऽजडीतदर्शनानामपि स्फुट हृदयङ्गमा भवेयुरिति ।

अस्याश्च पूर्वभाग काशीस्थपर्वतीय-प्रकाशनमण्डलतो मुद्रित ।, उत्तरार्ध-स्त्वमुद्रित एव ।

(११) नैषधीयचरितटीका—भावप्रदीपाख्येय टीकातिविस्तृता पदार्थबोधिनी च, सरस्वतीभवनग्रन्थालयेऽस्या मातृका वर्तते, अमुद्रितेयम् ।

(१२) आर्यासप्तशती—चतु पञ्चुत्तरसप्तशतसख्यामितैरार्यापद्यै र्घटितेयम्, अत्र च अकारादिक्षकारपर्यन्तमाद्यक्षरक्रमण व्रज्याख्येण गुम्फनम्, नैरन्तर्यया गतार्यता गोवर्धनकृता आर्यासप्तशती, इदमपि चौखम्बा सं० ग्रन्थमालाया मुद्रिता ।

(१३,१४) काव्यतिलक, काव्यरत्न च—१०१,१०३ पद्यै रचितयोरनयो ग्रन्थयोर्मातृके सरस्वतीभवनग्रन्थालय विद्येते, अत्र च स्वरचितानामुत्तमपद्याना सग्रह ।

(१५) रोमावलीशतकम्—नाम्नैव गतार्थमिद काव्यमालाया अष्टमगुच्छके मुद्रितम् ।

(१६,१७) वक्षोजशतकम्, होलिकाशतक च—नाम्नैव गतार्थममुद्रितमिदं शतकद्वयम् ।

(१८) लक्ष्मीविलास.—लक्ष्मीस्तुतिरूपोऽय ग्रन्थ शतश्लोकात्मकोऽमुद्रित ।

(१९) षड्ऋतुवर्णनम्—नाम्नैव गतार्थममुद्रित च ।

नाटके—

(२०) नवमालिका नाटिका—मालवमयूर' सस्कृतपत्रिकाया क्रमश प्रकाशितेय नाटिका सभवत ग्रन्थरूपेण उज्जयिनीतः प्राप्यत ।

(२१) शृङ्गारमञ्जरी-सट्टकम्—शौरसेनी-महाराष्ट्र्यो प्राकृतयोरुत्कृष्टकोटिकनिदर्शनमिदं सट्टकं ग्रन्थकृतो भाषाया कियानधिकार इति स्फुट प्रकटीकरोति ।

धर्मशास्त्रे—

(२२) आशौचोदशश्लोकीविवृति ।

तन्त्रशास्त्रे—

(२३) अभिधार्थचिन्तामणि—नारायणहृदयनामव्याख्याम्पः ।

(२१,२२,२३) एतत्त्रयममुद्रितं नास्मद्दृष्टिपथमुपगतम् ।

नक्षवेमैतन्निनित्र यानानव परिचयो दत्त, तत्र तत्र विषये का चैतत्य पिद्धौरेयत्व पण्डित्यमौद्धित्यमिति तु सुधिय स्वय तानवीत्यावधारयितु शक्नुवन्ति ।

तर्ककुतूहलम्

कन्यापि लौकिकस्यालौकिकस्य वा तत्त्वस्य सम्यगवबोधाय तर्कोऽपेक्ष्यते, "आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो" इति श्रुतिरपि मननमाहात्म्य ख्यापयति, मनन विना नात्मसाक्षात्कार शक्य, आत्मसाक्षात्कार एव दर्शन-शास्त्रस्य चरमो लक्ष्यभूत । बुद्धिबलेन वय जगत पदार्थाना, सूक्ष्मभावनानाम-चिन्त्यस्य परमतत्त्वस्यापि ज्ञान कुर्महे, अस्मिश्च कार्ये तर्कस्यानीव साहाय्यम-पेक्ष्यते, सत्यस्य समर्थनायासत्यस्य खण्डनाय वा वय प्रमाणाना साहाय्य गृह्णीमहे किन्तु व्यवहारे तर्क विना प्रमाणाना प्रामाण्य साधयितु न शक्नुम । यद्यपि तर्क स्वतन्त्ररूपेण नास्ति प्रमाणम्, केवलेन तर्केणैव काऽपि विषयो निर्णेतु न शक्यते, अत एव च "नैषा तर्केण मतिरापनेया[1]" "तर्का-प्रतिष्ठानात्[2]" इत्यादिषु तर्कस्तिरस्कृत । वाक्यपदीये[3] च तर्के निरन्तरपरि-वर्तनस्य सर्वा एव समावना परिगणितास्तथापि ध्रुवमेवैतत् यत्तर्क विना न वय कस्यापि सिद्धान्तस्य निर्णयस्य वा चूडा लप्स्यामहे । प्रमाणाना चरम-सहायकस्तर्क ।[4] अत्यैव तर्कस्य प्राधान्यमुपलक्ष्य जगत पदार्थो विशेषेण यस्मिन् शास्त्रे विवेचितास्तच्छास्त्रम् तर्कशास्त्रम्' 'न्यायशास्त्रम् 'हेतुशास्त्रम्' 'आन्वीक्षिकी' 'प्रमाणशास्त्रम्' 'वादविद्या 'वाक्यावाक्य' वनि विविधनामभि-प्राचीनैरन्यबुद्धिरभिहितम्, अस्यैव तर्कशास्त्रस्य कुतूहलम् (=चमत्कारः) अत्र ग्रन्थे ग्रन्थकृता प्रदर्शित इति स्पष्टमुक्तम्—

अय प्रतिविषयित्वनिनिवशनूलान् बहू-
नपहितुनुपप्लवानविलवन्तुमत्त्वस्थले ।
तिरोहितपरोहितस्थिति[5] कराति विश्वेश्वरो
वरोक्तिनिरकर्कश किमपि तर्ककौतूहलम् ॥
(तर्क० १।३)

यतो ह्यत्र जीवात्मपरमात्मनो. परस्पर न कोऽपि सबन्ध, द्वावेव स्व-स्वक्षेत्रे निरपेक्षौ, जीवात्मा स्वीयानादिकर्मवशाच्छरीरान्तर प्रविशति, सर्व-

---

१ कठोपनिषत् १—२—९ । २ ब्रह्मसूत्र २—१—११ । ३ वाक्यपदीय १—३४ ।
४. प्रमाणानामनुग्राहकस्तर्क. (न्यायभाष्य १—१—१) ।
५. तिरोहिता परे ऽहिता स्थितिर्यस्मिन्निति तर्ककौतूहलस्य विशेषणमिदम् ।

दुःखविनिमुंक्तो च मुक्तो भवति, किन्तु मुक्तावस्थायामपि मनसा तस्य वियोगो नास्ति अत इद शास्त्रम् द्वैतपरकमभिधीयते ।

वेदान्तदर्शन त्वद्वैतपरकम्। तत्र हि अविद्ययाऽनादिकालत आत्मन स्वरूप मेघनवाच्छादितमत एव जिज्ञासवे आत्मस्वरूपज्ञान न भवति, वस्तुतस्तु आत्मा एक एवास्ति, अविद्यान्धत्वे सति स एव जीव इत्याख्यो भूत्वा स्व परमात्मनो भिन्न मनुते, यदा तस्य तदविद्यावरण विनश्यति तदा स स्वीय परमात्मस्वरूप ज्ञात्वाऽऽनन्दो भवति। इद च स्वस्वरूपदर्शन दर्पणे स्वमुखप्रतिबिम्बदर्शनमिव न भवति, यतो ह्यत्र द्रष्टृदृश्ययोर्मध्ये दर्पणस्थानीय किमपि नास्ति, अत द्रष्टा तावद् दृश्य न द्रक्ष्यति यावत् तदपि द्रष्टैव न स्यात्। उभयोरपि द्रष्टृत्वे न कश्चिदपि भेदस्तयोरत क' क पश्येत्, यदाह याज्ञवल्क्य – विज्ञातारमरे केन विजानीयात्"। यदि तौ द्वौ न स्तस्नदा एकस्यापि भान न भवत्, यतो हि एक द्वे इत्यादि तु सापेक्षे सदृश्ये। अनादिकालादाच्छन्नस्यावरणस्य विनाशे तस्य यदानन्दस्वरूप भवति तदनिर्वचनीयमवाङ्मनसगोचर वा, इयमेव सक्षेपेण द्वैताद्वैतयो कथा।

तत्र द्वैतपरा नैयायिकादयाऽद्वैतपराणा वेदान्तिना, ते चाद्वैतपरास्तेषा नैयायिकादीना सिद्धान्तान् खण्डयन्त स्वपक्षस्थापने घीवैभव वाग्विलास च दर्शयन्त शतशो महत्त्वपूर्णान् ग्रन्थान् विरचयामासु । तेषु भेदप्रकाशे शङ्करमिश्रेण खण्डनोद्धार चामिनववाचस्पतिना अन्यैश्चाद्वैतनैयायिकैर्यन्नुत्थाप्याद्वैतखण्डन कृत तत् प्रायश उपर्युक्तस्यानिर्वचनीयतावादस्यैव। किन्त्वस्मिन् तत्कुतूहलनाम्नि विद्वद्धौरयेणाद्वैतवादिना मूल एव कुठाराघात कृत। तद्यथा– वेदान्तशास्त्र तच्छास्त्र वर्तते यस्य उपनिषद एव प्रमाणानि, अन्य शास्त्रस्य त एव सिद्धान्ता मान्या भवन्ति यथा साधकान्युपनिषद्वाक्यानि, एतान्याकृत्यैव बादरायणमुनिब्रह्मसूत्र विरचयाचकार। तर्ककुतूहलकृता स्वकीया ग्रन्थ परिच्छेदद्वय विभक्त तत्र प्रथमपरिच्छेदेऽद्वैतस्य श्रुतिगम्यत्व निराकृतम् प्रतिज्ञात च प्रारम्भ एव—

मिथ्यात्वसाधकतयोपनिषत्ता परैर्या
वाचः श्रुतिस्मृतिपुराणसमीर्यमाणाः।
प्रामाणिकं मनसिधाय तदीयमर्थं
सर्वस्वमौपनिषदस्य निराकरोमि ॥

(तर्ककुतूहल १।४)

अस्य सर्वथा नवीनो मौलिक. स्तुत्यर्हश्चायं प्रयासो यत् श्रुतिवाक्यानाम-द्वैतपराणा वेदान्तिभिः कृतस्यार्थस्य युक्तियुक्तं खण्डन विधाय तेषामेव वाक्याना नैयायिकदृष्ट्या द्वैतपरकोऽर्थोऽनेन प्रदर्शितः। अस्मिंश्च प्रयासेऽपूर्वं साफल्यमनेनावाप्तमिति सुधीभिरुहनीयमहो विलक्षणचमत्कारकारिपाण्डित्य-मस्य। न केवल द्वित्रिचतुर्णां पञ्चानां वा वाक्यानामपि तु यस्यां कस्यामप्युपनिषदि यत्र कुत्राप्यद्वैतपराणि वाक्यान्यासन् ततोऽन्विष्यान्विष्य विवेचितानि. एतावन्मात्रेणास्य सन्तोषो नाभवदतो ब्रह्मसूत्रे, गीताया, स्मृत्यादिषु, पुराणेतिहासेषु च विकीर्णानामपि तादृशस्थलाना स्फुटमालोचनमनेन कृतम्। एतदालोचने प्रसङ्गादागतानां व्याकरणमीमासादिविषयाणामपि विस्तरेण विवेचन विहितम्। द्वितीये च परिच्छेदे प्रमाणान्तरेणाद्वैतसिद्धौ क्रियमाणायां सर्वप्रमाणश्रेष्ठेन प्रत्यक्षेणैव विरोध. स्यादिति प्रतिपादयता मानान्तरसिद्धिरपि निराकृता तत्राप्युक्तं प्रारम्भ एव—

अध्यक्षादिविमानतः पदगतेर्मध्यादिया च श्रुते—
रद्वैतावगमे ऽन्तरिक्षसुमन.सब्रह्मचारीकृते।
तच्छायामुपजीव्य लब्धपदतामासेदुषामद्वये
मानाना प्रमितिं प्रति प्रवणता तन्नौरसीरसभूत्॥ (तर्क० ७।२)

अद्वैतवेदान्ते यावन्त. प्रमुखा ग्रन्थकाराः सिद्धान्तप्रवर्तकाश्चासन् तेषा सर्वेषामेव ग्रन्थेभ्यस्तन्मत यथावदुद्वृत्य तद्दृष्टि सम्यक् प्रतिपाद्य सयुक्तिकं तत्खण्डन च विधाय तत स्वमतमुपन्यस्तमनेन। तत्र भगवत्पादश्रीशङ्कराचार्यस्य, सत्तेवशारीरकप्रणेतु. सर्वज्ञात्ममुने., भामतीकर्तुः प्रथमवाचस्पतिमिश्रस्य, विवरणकारस्य प्रकाशात्मनः, ब्रह्मविद्याभरणकारस्याद्वैतानन्दस्य, तत्त्वदीपिकाकारस्य चित्सुखाचार्यस्य, कल्पतरुकारस्यामलानन्दस्य, तत्त्वदीपनकारस्यात्मज्ञानन्दस्य, दृष्टिसृष्टिवादप्रचारकस्य प्रकाशानन्दस्य, अद्वैतसिद्धयादिविविधग्रन्थप्रणेतु श्रीमधुसूदनसरस्वतीमहाभागस्य, खण्डनखण्डखाद्यकर्तु श्रीहर्षस्य, अन्येषा च प्रायः सर्वेषामेवाद्वैतसिद्धान्तपरिपोषकाणा प्रमुखसिद्धान्तकाराणा सिद्धान्तान् सम्यक् प्रदर्श्य तेषा सयुक्तिकं च खण्डनं विधाय नैयायिकदृष्ट्या तत्समाहितम्। न कोऽपि सिद्धान्तकारोऽवशेषितः। यच्च स्वपक्षमुपस्थापितं तस्यापि गङ्गेशोपाध्याय-रघुनाथशिरोमणि-वाचस्पति-पक्षधर-शशधरमिश्रोदयनाचार्यप्रभृतीना नैयायिकधुरन्धराणामुक्तिभिः परा पुष्टिः कृता,। यावतां ग्रन्थाना ग्रन्थकाराणां चोद्धरणान्यनेनात्रोद्धृङ्कितानि तावतां नामापि स्मर्तुमस्माकमसुलभम्।

श्रुतोना परोक्षार्थप्रातिकूल्यावधारणे यावदेव ग्रन्थोऽयमुपलब्ध, चतुर्विंशेऽशे दृष्टिसृष्टिनिरास प्रारब्धो ग्रन्थकृता किन्तु पक्तिचतुष्टयमेव तस्यास्मत्सग्रहालयीयग्रन्थे सरस्वतीभवनस्थग्रन्थे च लिखित वर्तते। अग्रे च पत्रमपि न पूरित न च कश्चिद् विरामसूचक सकेतो दत्त, मन्ये कस्याश्चिदेकस्या एव मातृकाया प्रतिलिपीकृते द्वे इमे पुस्तके। सप्रति यावदुपलब्धस्तावदेव ग्रन्थोऽय प्रकाशीक्रियते प्रयासश्च क्रियतेऽस्माभिरग्रिमाशस्योपलब्धये, लब्धश्चेदग्रिमे सस्करणे तदशोऽपि प्रकाशयिष्यते। मध्येऽप्युक्त ग्रन्थकृता 'एतत्तु दृष्टिसृष्टिनिरासे वक्ष्याम" इति, एतेन प्रतीयते प्रकरणमिदमवश्य रचित स्यात्, इतोऽग्रेऽपि के के सिद्धान्ता निराकृता अद्धा तस्य इत्यपि न वक्तु शक्नुम।

नैतदपिवक्तु शक्नुमो वय यदपूर्ण एवाय ग्रन्थ. स्यादिति, यतो ह्येतदनन्तरम् सिद्धान्तसुधानिध रचना ग्रन्थकृता विहिता, तत्र च बहुत्र तर्ककुतूहलस्य नामोल्लेखो दृश्यते।

एतावन्महत्त्वमुपदधतोऽप्यस्य ग्रन्थस्याद्यावधि मुद्रण नाभूदिति महदाश्चर्यस्य विषय। अतो विश्वेश्वरकृतसमस्तग्रन्थाना प्रकाशनस्य निर्णयावसरे श्रीनित्यानन्दस्मारकसमितिसदस्यै प्रथममस्यैव प्रकाशन स्वीकृतम्। अस्य च ग्रन्थस्य प्रथम द्वितीयपरिच्छेदयो पृथक्-पृथक् मातृकाद्वय सरस्वतीभवन-ग्रन्थालयत उपलब्धम्। अपरा चैका मातृका एशियाटिकसोसाइटी-कलकत्तात आमा विन्त्वपूर्णा। अस्मा च भूयानेव पाठभेदो दृष्टिपथमुपायात, स च टिप्पण्या ख् सज्ञया व्यवहृत। यद्यपि हस्तलेखस्याशुद्धिबहुलतया विषयस्यातीव जटिलतया चास्य सपादने काठिन्यमन्वभावय तथापि—

मज्जलरान्द्रविपुलेऽम्बुनिधावगाधे
किं नैव चापलपरा शफरा स्फुरन्ति॥

इत्युक्ति स्मार-स्मार विदुषा साहाय्येन कथचित्साहसमकरवम्। तत्र सपादने यैर्विद्वद्भिरुपबृंहितोऽहं तेषु सरस्वतीभवनग्रन्थालयाध्यक्षवर्याणा न्यायाचार्य प० श्रीविभूतिभूषणभट्टाचार्याणा (सप्रति वाराणसेय सस्कृत-विश्वविद्यालयस्य प्रस्तोतृमहोदयाना) तथास्मदग्रजकल्पाना न्याय-साहित्याचार्य-प० श्रीनन्दिनाथमिश्रमहोदयाना प्रत्यक्षरसाहाय्य न लभेय चेदेतद्ग्रन्थस्येदृक्षतायां सशीतिरेव स्यात्। तदनयोर्महानुभावयोरुपबृंहितिभरेणानतोऽहं

वाचामात्रेण कृतज्ञताज्ञापनं मदीयं धार्ष्ट्यमेवेति मन्ये। साङ्गवेदविद्यालयाध्यापक-होशमनेश्रीरामचन्द्रशास्त्रिभि-, गोयनकाविद्यालयीयविश्वनाथपुस्तकालयाध्यक्षैः प०श्रीकृष्णपन्तमहोदयैश्च महत् साहाय्यमकारि तदर्थं मुहुर्मुहुर्धन्यवादानर्पये। श्रीनित्यानन्दस्मारकसमितेरध्यक्षाणां प्रो० गणेशदत्तशास्त्रिणां विषये किमत्र वक्तुं शक्यते यदेतेषा निर्देश एवास्माक पथप्रदर्शकः। प्राचीनप्रणालीपरिलिखितानां पाण्डुलिपीनां प्रथममुद्रणावसरे कियत्काठिन्यमनुभूयते (विशेषतो यत्रैकमेवादर्शपुस्तकमुपलभ्येत) इति तु न तिरोहित विदुषाम्। यथामति सशोधने प्रयतितेऽपि मदीयव्यस्तताविशादज्ञानाद् दृष्टिदोषाद्वा यदि कांश्चन विप्रतिपत्तयो दृष्टिगोचरा. स्युस्ताः शोधनीया इति साञ्जलिबन्धं याचे कृपाघनान् विपश्चितः। भूयो निवेदये च—

यदत्र सौष्ठवं ग्रन्थे प्रणेतुस्तद्धि मन्यताम्।
यदत्रासौष्ठवं किञ्चित्तन्ममास्तीति मृष्यताम्॥ इति

वैशाखशुक्ल-पूर्णिमाया
सं० २०२८ वै०

विदुषा वशंवदः
जनार्दनशास्त्री पाण्डेयः।

विषय-सूची

प्रथमपरिच्छेदे

सं०	विषय	पृष्ठाङ्क
प्रथमे	मङ्गलम्, उपोद्घात, अद्वैतस्योपनिषदादिमतेन श्रुत्यादिगम्यत्वकथन न्यायमतेन तन्निरासप्रस्तावश्च	१-२
	सर्वप्रमाणमूलप्रत्यक्षविरोधेनाद्वैतश्रुतीना यथाश्रुतार्थे तात्पर्यस्य न्यायमतेन दुर्वचत्वप्रतिपादनम्—	२-५०
द्वितीये	भेदाभेदबोधकश्रुतीना परस्पर प्रतिबध्य-प्रतिबन्धकभावकथनेन प्रमाणसहकारितर्कबलेन चाद्वैतार्थखण्डनम्—	५१-६४
तृतीये	विश्वमत्याद्वैतश्रुत्योर्बलाबलभावकथनेन श्रुतेर्विद्यायामद्वये च तात्पर्यखण्डनम्—	६५-९०
चतुर्थे	शाब्दमर्थादापि श्रुतिवाक्येभ्योऽद्वैतार्थो न भातीति इत्येतदर्थं वाचारम्भेत्यादि तत्त्वमस्यन्तश्रुतिनिरूपणम्—	९१-१४६
पञ्चमे	बृहदारण्यकोक्तश्रुतीनामद्वयार्थप्रतिपादकत्वेन मिथ्यात्ववादिसम्मताना द्वैतपक्षाभिमतार्थसाधनम्—	१४७ २१५
षष्ठे	मिथ्यात्ववादिमते शब्दशक्त्याप्यद्वैतश्रुतिवाक्येभ्योऽद्वयार्थसिद्ध्यभावोपसंहार, न्यायमतेन द्वैतार्थप्रतिपादनञ्च—	२१६-२३०

द्वितीयपरिच्छेदे

सप्तमे	प्रत्यक्षप्रमाणस्य मिथ्यात्वसाधकत्वाभावकथनेनाद्वयार्थस्यासिद्धत्वप्रतिपादनम्—	२३४-२३८
अष्टमे	वेदान्तभिमतमिथ्यात्वस्याप्रत्यक्षगम्यत्वे विरोधप्रदर्शनम्—	२३९-२४२
नवमे	सत्ताबुद्धेर्विषयानुगमप्रदर्शनम्, व्यावहारिकप्रातिभासिकपारमार्थिकत्वकथनम्, परानुमिति प्रति व्याप्तिसंस्कारस्य लिङ्गज्ञानस्योद्बुद्धसंस्कारसाहित्यस्य वा जातिविशेषेण शक्तिविशेषेण	

	वा कारणत्वम्, तमसो भावान्तरत्वम्, वायो पृथिवीविशेषत्वम्, भेदाभेदवादस्य प्रमाणविषयत्वम्–इत्यादि परोक्तार्थखण्डनम्—	३४४-३८५
दशमे	वेदान्त्यभिमतमिथ्यात्वानुमानप्रदर्शन तत्खण्डनञ्च	३८५-३९५
एकादशे	वेदान्तिमतेन आत्मन स्वप्रकाशत्वसाधन तत्खण्डनञ्च—	३९६-४२२
द्वादशे	चित्सुखाचार्याभिमतमिथ्यात्वानुमानप्रदर्शन तत्खण्डन च—	४२३-४२४
त्रयोदशे	आनन्दबोधाचार्याभिमतमिथ्यात्वानुमानप्रदर्शन तत्खण्डनञ्च—	४२४
चतुर्दशे	कौमुद्यभिमतमिथ्यात्वानुमानप्रदर्शन तत्खण्डनञ्च—	४२५
पञ्चदशे	अन्यमतेन मिथ्यात्वानुमानप्रदर्शन तत्खण्डनञ्च—	४२६-४३१
षोडशे	विश्वसत्त्वानुमानस्य निर्बाधप्रवृत्तिप्रदर्शनम्—	४३२-४३८
सप्तदशे	मिथ्यात्वानुमानसाधकहेतुषु दृश्यत्वहेतुविचारस्तन्निरासश्च—	४३९-४५२
अष्टादशे	जडत्वस्य मिथ्यात्वानुमानसाधकत्वनिरास —	४५३-४५६
ऊनविंशे	परिच्छिन्नत्वस्यापि मिथ्यात्वानुमानसाधकत्वनिरास.—	४५७-४६४
विंशे	मिथ्यात्वानुमाने शुक्तिरूप्यादिदृष्टान्तस्य प्रतिषेध —	४६५-४७२
एकविंशे	अनाद्यज्ञानरूपाया अविद्याया भावरूपत्वे परोक्षप्रमाणाभावकथन च—	४७२-४७८
द्वाविंशे	अज्ञानानुमाने दोषादिनिर्देशपुरस्सर प्रमाणाभावकथनम्—	४७९ ४८४
त्रयोविंशे	भावरूपेऽज्ञाने छान्दोग्यादिश्रुतिवाक्याना प्रमाणत्वेन कथन तत्खण्डनम्, न्यायमते मायापदस्यादृष्टपरत्वञ्च—	४८५-४८८
चतुर्विंशे	दृष्टिसृष्टिवादविचार·—	४८८

प्रथमः परिच्छेदः

॥ श्रीगणेशाय नमः ॥

तर्ककुतूहलम्

प्रथमोंऽशः

फलमाकलयत्यपञ्चलीकं विषये स्याद्धियमेऽपि यः प्रयासः ।
[1]पतितश्चरणारविन्दरेणुस्वसरेणुर्यदि सर्वमङ्गलायाः ॥ १ ॥

लोकस्वान्तघनान्धकारपटलप्रध्वंसदीपाङ्कुरः[2]
विद्याकल्पलताप्रतानजनने बीजं निजाभिज्ञिनाम् ।
मय्येमालि ममास्तां सुविमला मातायमानाश्चिरं
श्रीलक्ष्मीधरविद्वदङ्घ्रिनलिनोदीताः परागाणवः ॥ २ ॥

अथ प्रतिविपश्चितामभिनिवेशमूलान् बहू-
नपोहितुमुपप्लवानखिलवस्तुसत्त्वस्थले ।
तिरोहितपरोहितस्थिति करोति विश्वम्भरो
वरोक्तिभिरकर्कशं किमपि तर्ककौतूहलम् ॥ ३ ॥

मिथ्यात्वसाधकतयाभिमताः परैर्यां
वाचः श्रुतिस्मृतिपुराणसमीर्यमाणाः ।
प्रामाणिकं समभिधाय तदीयमर्थं
सर्वस्वमोपनिषदस्य निराकरोमि ॥ ४ ॥

सामर्थ्यमल्पमपि कल्पयितुं न नाम
पद्यप्यवद्यमपि न प्रगुणे गुणे वा ।
अस्मादृशस्य तदपि प्रतिपद्य कांचित्
सद्यः श्रमोऽद्य नयितायम[3]मोघभावम् ॥ ५ ॥

---

१. पतित —क । २ ध्वसप्रदीपाङ्कुरा —क ।
३. मम—ख । पञ्चमपद्यस्यान्तिम पाद इत्थ प्रतिभाति—
नात्र श्रमोऽयमधिता मम मोघभावम् ।

तत्राद्ये श्रुतिगम्यत्वमद्वैतस्य निरस्यते ।
परिच्छेदान्तरे मानमन्यच्च न्यक्करिष्यते ॥ ६ ॥

तत्रादौ प्रतिवादिनामभिमतस्यार्थस्य तत्तत्पदै-
र्लभ्यत्वेऽपि परप्रमाणविहते[1]स्तात्पर्यमुत्सार्यते ।
तादृक्षार्थसमर्पणं प्रति पुनस्तेषां पदानां मना-
गप्यास्ते न समर्थतेति परतः कारिष्यते पल्लवः ॥ ७ ॥

इह खलु प्रपञ्चस्य सत्त्वमाससार सर्वानुभवसिद्ध दुरपह्नवम् । यदनुरोधादौपनिषदैरपि व्यावहारिक सत्त्वमुपगम्यते । परन्तु—

स्वपरप्रतिघाततो विभङ्ग चलयद्भिर्व्यवहारभूमिकायाम् ।
परमार्थदशेति काचिदन्या विगतन्यायमुपेयतेऽद्वयस्य ॥

नन्वनेकप्रमाणसिद्धमद्वैत कथमन्याय्यमिति चेन्न; परीक्षितप्रामाण्यकप्रत्यक्षविरोधेनाद्वैतश्रुतीना तावद्यथाश्रुतार्थे तात्पर्यस्य दुर्वचत्वात् । तथा चोक्त चतुर्थे तात्पर्यटीकायाम्—"प्रत्यक्षविरोधादनुपपन्नार्थाः श्रुतय. 'एकमेवाद्वितीयम्' इत्याद्या प्रथमा वृत्तिमुल्लङ्घ्य जघन्यामालम्बन्ते" इति । लीलावत्यामपि—"अद्वैतश्रुतेश्च द्वैताबभासिप्रत्यक्षविरोधाद् ग्रावप्लवन[2]श्रुतिवदुपचरितार्थत्वात्" इति । अत एव "आदित्यो यूप." इत्यादौ गौण्यैवार्थसिद्धि । तथा च प्रथमचतुर्थे जैमिनिना[3] सूत्रितम्—"सतिसद्धि-जाति-सारूप्य-प्रशसा-भूम-लिङ्ग-समवाया इति गुणाश्रयाः" इति । यजमान प्रस्तर, अग्निर्वै ब्राह्मण, आदित्यो यूपः, अपशवो वा अन्ये गोअश्वेभ्य पशवो गोअश्वा', सृष्टीरुपदधाति, प्राणभृत उपदधाति, इति पण्णामुदाहरणानि । आद्यचतुष्टये प्रत्यक्षविरोधात् कुशमुष्टिरूपप्रस्तरस्य यजमानाभेदानुपपत्त्या यजमानपदस्य स्रुग्धारणादिरूपयजमानकार्यकारित्वे "मुखादग्निरजायत", "ब्राह्मणोऽस्य मुखमासीद्" इति च श्रुतौ सृष्टिकालेऽग्निब्राह्मणयोरेकस्थलादुत्पत्तिश्रवणादग्निपदस्याग्निजननस्थलोत्पन्नत्वे, घृताञ्जनजन्यदीप्तिमत्त्वेन[4] यूपपदस्यादित्यसदृशतेजस्वित्वे, गवाश्वभिन्नानामजादीना पशुत्वस्य प्रत्यक्षत्वात्[5] "पशुना यजेत" इत्यादौ पशुकार्ये विधानाच्चापशुपदस्य गवाश्वगतप्राशस्त्याभावे तात्पर्यमित्यादेस्तत्राभिहितत्वात् ।

---

१ °विहते—क । २ °प्लावन°—ख । ३ भगवज्जै°—ख ।
४. अत परम्—आदित्यपदस्य आदित्यसदृशस्थलोत्पन्नत्वे—इत्यधिक पाठ—ख ।
५. प्रत्यक्षमिदत्वात्—ख ।

स्यादेतत्, निश्चितप्रामाण्यकमेव प्रत्यक्षं प्रबलम्, प्रकृते सत्त्वप्रत्यक्षं तु न तथा, आगमादिविरोधात्। न च प्रत्यक्षाप्रामाण्यसिद्धौ तद्विरोधाभावादागमादेः प्रामाण्यम्, तत्प्रामाण्ये च तद्विरोधात्प्रत्यक्षस्याप्रामाण्यमित्योन्याश्रय, प्रत्यक्षप्रामाण्ये तु नैवम्, 'तस्यानपेक्षत्वादिति वाच्यम्', चन्द्रतारकादीनामल्पपरिमाणप्रत्यक्षस्याप्यागमाद्विरोधादप्रामाण्य'दर्शनात्प्रत्यक्षेणापि स्वप्रामाण्यसिद्धयर्थमन्याविरोधस्यावश्यमपेक्षणीयत्वात्। एवं चान्योन्याश्रयस्य तुल्यत्वान्परस्परविरोधेन द्वयोरप्रामाण्यसन्देहे [1]श्रुतावाप्तप्रणीतत्वादिना भ्रमजनकत्व[2]प्राप्ते वेदे प्रामाण्यनिश्चये जाते तेन स्वत सम्भाविनदोषस्य प्रत्यक्षस्य बाधानान्योन्याश्रय इति चेत्, मैवम्, बाधितार्थेऽपि वेदतात्पर्यस्वीकारेऽतिप्रसङ्गस्य दर्शितत्वात्। निर्दोषत्व त्वस्मदभिमतार्थपरत्वेनाप्युपपन्नमित्यग्रे निरूपयिष्यमाणत्वात्। न चोभयोरन्यापेक्षत्वेनाम्य प्रत्यक्षेण स्वप्रामाण्यसिद्धयर्थमेवान्याविरोधस्यापेक्षणात्, चन्द्रतारकादे शास्त्रतो महत्त्व जाननामपि न्यूनपरिमाणप्रत्यक्षस्य जायमानत्वात्, शास्त्रेण तु स्वोत्पत्त्यर्थमेव तदपेक्षणात्, भेदप्रत्यक्षे यजमानप्रस्तरादीनामभेदान्वयबोधानुदयादिति वैषम्यात्। एव म्यिते विरोधिनि प्रत्यक्षे सत्यदं तवाक्येभ्य शाब्दधीरेव दुर्लभा, कुतस्त्य[3]प्रामाण्यनिश्चयस्याऽवसर'। सति हि धर्मिणि धर्मचिन्ते'ति न्यायात्।

न च प्रत्यक्षविरोधाननुसन्धानदशाया भवत्येव तच्छाब्दमिति वाच्यम्, तस्याकिञ्चित्करत्वात्। यदा यस्य बाधधीर्नास्ति तदातन तस्य बोधमादाय तत्र शास्त्रतात्पर्यस्य व्यवस्थापयितु[4]मशक्यत्वाद् अतिप्रसङ्गाद् बाधधीतदभावकालयो शास्त्रार्थभेदप्रसङ्गाच्च[5]पूर्वजातस्यापि बोधस्य विचारदशायामवैदिकत्वव्यवस्थापनात्।

स्यादेतत्, एव सति चन्द्रादिमहत्त्वशाब्दबोधो[6]ऽपि न स्यात्, प्रत्यक्षबाधितत्वात्, जातोऽपि वा पश्चादप्रमात्वेन व्यवस्थाप्येतेति चेत्, न, तथाहि—

प्रत्यक्षविषयार्थस्य विरुद्धप्रतिपादकम्।
तदनवादि यन्मान तन्मान नार्हति ध्रुवम्॥

१–१ नास्ति–ख। २ अप्रमाणत्व–ख। ३–३ सन्देहे अभाजनक'चेन–ख। ४ तत्र–ख। ५ °वत्ते ति–ख। ६ व्याख्यातु–ख। ७ °प्रसङ्गात्–क। ८ महत्त्वबोधो–ख।

प्रत्यक्षग्राह्यार्थविपरीतप्रतिपादक प्रत्यक्षसवादहीन च प्रमाण प्रत्यक्षापेक्षया दुर्बलमिति हि वस्तुस्थिति । धर्माधर्मादिप्रतिपादकशास्त्रस्यातीन्द्रियविषयकानुमानादेश्च प्रत्यक्षसवादित्वाभावादप्रामाण्यवारणाय आद्य विशेषणम्, भ्रमात्मकप्रत्यक्षविपरीतार्थप्रतिपादकस्य पीतत्वाभावव्याप्यशङ्खत्वादिमत्ताज्ञानादेस्तद्वारणाय द्वितीयम्, तस्य दोषाभावकालीनप्रत्यक्षसवादित्वमेव । वस्तुतस्त्वतीन्द्रियविषयकशाब्दादे प्रत्यक्षविषयाभावतद्व्याप्यान्यतरानवगाहितया आद्येनैव तद्वारणम्। तदसवादीत्यस्य तु प्रत्यक्षग्राह्यस्यापि यद्विषयस्य प्रत्यक्षाविषयत्व प्रत्यक्षजातीये कुत्रचित् क्लृप्तदोषेण व्यवस्थापयितुमशक्य तदित्यर्थ । चन्द्रादिमहत्त्वस्य तु प्रत्यक्षाविषयत्व दूरस्थवृक्षपरिमाणविशेषप्रत्यक्षप्रतिबन्धकत्वन क्लृप्तदोषत्वेन दूरत्वेन व्यवस्थापयितु शक्यत एवेति न दोष ।

यत्तु प्रत्यक्षस्याप्यनुमानशब्दाभ्या बाधो दृश्यते—इद रजतमिति प्रत्यक्षस्यानुमानाप्तवाक्याभ्याम्, नभो नीलमित्यस्य नीरूपत्वग्राहकानुमानेन, गौरोऽहमहमिहैवास्मि सदने जानान इत्यनयोश्चन्द्रप्रादेशिकत्वप्रत्यक्षस्य चानुमानागमाभ्याम् पीत शङ्ख गुडस्तिक्त इत्यादेश्चानुमानाप्तवचनाभ्या[1] बाधदर्शनादिति । तदेतन[2] निरस्तम् प्रत्यक्षान्तरसवादेनैव तत्र बाधप्रामाण्यव्यवस्थापनात् । विशेषदर्शन सति रजतत्वाभावप्रयुक्ताद् भ्रमपूर्वमपि तत्सत्त्वाद्वा[3] ।

यदप्युक्त रजताभेदज्ञानस्य शरीराभेदज्ञानस्य च प्रतिबन्धकत्वसामर्थ्ये युक्त्या विघटिते सत्यव तत्र रजतभेदादिप्रत्ययो[4] न त्वन्यथा । न चाभेद प्रत्यक्षे सति[5] युक्तिरपि नोत्पद्यत इति वाच्यम्, रजतत्वाभावव्याप्यकालपृथक्त्वादिमत्ताज्ञानरूपाया युक्ते प्रत्यक्षग्राह्याभावव्याप्यावगाहित्वेऽपि साक्षात्तद्ग्राह्याभावानवगाहितया प्रत्यक्षस्य तदविरोधित्वात् । पश्चात्तदभावव्याप्यवह्निशष्यक[6]तत्प्रकारकत्वेन हेतुना तत्र भ्रमत्वानुमानप्रामाण्यज्ञानाभाव[7]वैशिष्ट्यस्याभेदज्ञान विघटनात्प्रतिबन्धकाभावेन पश्चादेव रजतभेदादिप्रत्ययोदयादिति । तनास्माक प्रतिकूलम्, नहि वय मानान्तरेण प्रत्यक्षबाध एव नास्तीति ब्रूम, किन्तु यदश प्रत्यक्षस्य मानान्तरेण

---

१ वाक्याभ्या—ख । २ तदेतन्निरस्तम्—ख । ३ सत्त्वाच्च—ख ।
४ रजतभेदप्रत्यय—ख । ५ नास्ति—ख । ६ व्याप्यवह्निशे°—ख ।
७ भावे—ख ।

बाधस्तदंशस्य सप्रतिपन्नप्रत्यक्षान्तरविषयत्वनियममेव। प्रत्यक्षजातीये दोषत्व यस्य कल्पते तन्निर्वाह्य तत्प्रत्यक्षाविषयत्वमिति यावत्। तेन किञ्चिद्भ्रमविशेषस्य[1] जन्यप्रत्यक्षप्रमित्यनुदयेऽपि न क्षति। तच्च बाध्यप्रत्यक्षस्य तदविषयकत्व[2] यत्र समतदोषेण निर्वाहयितु शक्य तत्रैव नान्यत्रेति। बाधो हि अप्रामाण्यग्रहाभावविशिष्टभ्रमत्वनिर्णय एव, तत्र विशेषणांश उक्तरीत्यैव निर्वहति न त्वन्यथा, अन्यथा सकलव्यवहारोच्छेदापत्ते। भ्रमात्मकविशेषदर्शनेनापि प्रमाया बाधदर्शनेन बाध्यमानस्याकिञ्चित्करत्वात्। तस्माद्यदि भ्रमत्वनिर्णयमात्र युक्तिमात्रेणापि भवतीति ब्रूषे, तदा ओमिति ब्रूम[3]। न तु तावता त्वदिष्टसिद्धि। यदि तूक्तविशेषणविशिष्टम्, तत्तु प्रत्यक्षविरुद्धमानान्तरप्रतिपाद्यार्थस्य प्रत्यक्षाविषयत्वसम्पादकसम्प्रतिपन्नदोषव्यतिरेकेण ब्रह्मणापि दुःसाध्यमिति। गौरोऽहमित्यत्रापि मम शरीरमिति प्रत्यक्षसत्त्वात्, नभसि च सन्निधौ नैल्यप्रत्यक्षविरहात्। न च तत्र सन्निधानस्यैव दोषत्वकल्पनाशङ्का, आकाशस्यैकव्यक्तितया दूरत्वावच्छिन्नस्य नैल्यस्वीकारे समीपेऽपि तन्नीलव्यक्तेरेव रूपान्तरविरहस्यावश्यकत्वादवयवभेदाभावाच्च तथा वक्तुमशक्यत्वात्। वस्तुतो यावत्सन्निधाने द्रव्यान्तरस्य न दर्शन यथा चक्षुर्संयुक्तसंयुक्तादेः, तदधिकदूरेऽप्याकाशे नैल्यचाक्षुषानुदयात्सन्निधिप्रतिबद्धप्रत्यक्षविषयताकरूपाश्रयद्रव्यप्रत्यक्षस्यापि तत्प्रतिबध्यत्वात्, रूपाविषयकद्रव्यचाक्षुषस्याऽप्रसिद्धया सन्निधौ केवलनभश्चाक्षुषस्य वक्तुमशक्यत्वात्। अहमिहैवास्मिं[4] मदने जानान इत्यत्र तु ज्ञाने समवायेनात्मन इवावच्छेदकतया शरीरस्यापि हेतुत्वाज्ज्ञानमात्रेऽपि शरीरस्यावश्यमपेक्षितत्वाज्ज्ञानानुत्तरशानच्प्रत्ययस्याऽवच्छेदकत्वरूपाश्रयत्वार्थकतया तदभिलप्यमानप्रत्यक्षस्यापि तादृशाश्रयत्वविषयकत्वमाश्रित्य शरीरविषयकत्वेनैवोपपत्त्या प्रमात्वेन न बाध्यत्वम्। न च शरीरस्याहंमति नोल्लेख इति वाचस्पत्याद्युक्तं शङ्क्यम्। तथापि शरीरावच्छिन्नसमवायेन ज्ञानाश्रयत्वमादायात्मविषयकस्यापि तस्य प्रमात्वानपायात्।

ननु[5] ज्ञान प्रत्येव शरीरमवच्छेदक न तु तत्समवाय इत्यपीति वाच्यम्; मानाभावात्। अत एव च शब्दस्येव शब्दसमवायस्यापि कर्णावच्छिन्नत्वमुक्तं सन्निकर्षवादे मिश्रैः।

---

१ °विशेष्यक-ख। २ विषयत्व-ख। ३ प्रनिब्रूम-ख। ४ एवास्मि-ख। ५ न च-ख।

यत्त्वात्मन आकाशवत्सर्वगतत्वेन[1] इहेति व्यवच्छेदस्याप्रामाणिकत्वादिति, तच्चिन्त्यम्, एतद्देशवर्त्तित्वस्यैव तत्राप्रामाणिकत्वात्। सर्वमूर्त्तसंयोगित्वमेव हि सर्वगतत्वं न तु सर्ववृत्तित्वम्। प्रत्युतैतदन्यन्नास्मीति व्यवच्छेदाश एव प्रामाणिकः। इहेत्यनेनैतद्देशसंयुक्तत्वमेव विषयीक्रियत इति चेत्, तथाप्युक्तरीत्या दोषाभावात्। शरीरावच्छिन्नज्ञानसमवायविशिष्टस्यान्यदेशसंयुक्तत्वे मानाभावात्। वस्तुतस्त्वात्मप्रत्यक्षे अहमिति देहावच्छिन्न आत्मैव भासतेऽतो नानुपपत्तिः। आगमेन केवलात्मन एव व्यापकत्वबोधात्। अत एव स्वप्रकाशत्वनिरासप्रस्तावे जिज्ञासानपेक्षप्रत्यक्षविषयत्वाभावे हतौ प्रत्यक्षपदं सर्वांशप्रमाम्नपप्रत्यक्षपरं सर्वमेवाधुनिकमात्मप्रत्यक्षं [2]देहसंभेदावगाहितया भ्रमरूपमेवेति मिश्रव्याख्यातृभिरुक्तम्। अत एवाहंप्रत्ययमात्रेणात्मतत्त्वावगमाभावोऽपि मन्मते न व्याहतः, आगमाभावे उक्तप्रत्ययस्य देहप्रादेशिकत्वभानविषयकत्वानवधारणात्। नहि शिखी नष्ट इत्यादिवाक्यमप्रमाणं[3], देहसंभेदानवगाहिकादाचित्कमहं सुखीत्यादितत्त्वज्ञानमित्यादिबौद्धाधिकारदीधितिपर्यालोचनेऽपि प्रकृतज्ञानस्य[4] देहसंभेदावगाहित्वबोध्यात्। किञ्च आगमबोध्यस्य सर्वमूर्त्तसंयोगित्वादिरूपव्यापकत्वस्य योग्यायोग्यार्थसंघटितत्वेन प्रत्यक्षविषयत्वमेव नास्ति, [5]तत्रागमप्रवृत्तावपि कथं पूर्वोक्तनियमे व्यभिचार[5]। नहि सर्वमूर्त्तसंयोगित्वं ज्ञानान्तरस्यापि विषयः, सामग्रीविरहात्, येन तदुपनीतमपि कथञ्चन्मानमविषयः स्यात्। न चोक्तरूपविभुत्वस्य प्रत्यक्षाभावेऽपि महत्त्वं जातिविशेषप्रकारकप्रत्यक्षविषय एवेति वाच्यम्; तावन्मात्रस्योक्तप्रतीतावविरोधित्वात्, आत्ममहत्त्वस्य प्रत्यक्षानङ्गीकाराच्च। अत एव आत्मनः एकत्वं[6] च न मनोयोग्यमिति दीधितिकृतः।

आत्मा व्यापक इति लौकिकशब्दस्तु स्वप्रामाण्यार्थमागममेवोपजीवतीति तत्समानकक्ष एव। एवमेतादृशानुमानमपि तथेति। तथा च मानान्तरबोध्यप्रत्यक्षविरुद्धार्थस्य वक्तृदोषानुपपाद्य[7]तत्रागमप्रवृत्तावपि कथं पूर्वोक्तनियमे व्यभिचार[7]? तदविषयताकप्रत्यक्षयोग्यतायामेव मानान्तरस्याप्रवृत्तिरिति तदर्थात्। अत्र च विशेष्यस्याप्यभावात्, पीतः शङ्खस्तिक्तो गुड इत्यत्रापि न परोक्षज्ञानमात्रं बाधकम्, तत्प्रत्यक्षे परोक्षज्ञानरूपबाधस्य कारणीभूताभाव-

---

१. यत्त्वात्मन आकाशवत्सर्व—ख। २ शरीर°—ख। ३ बाधकप्रमाण—ख।
४. नास्ति—ख। ५-५ नास्ति—क। ६ परिमाण—ख। ७-७ नास्ति—ख।

प्रतियोगित्वरूपबाधवत्त्वाभावात्। शङ्खो न पीत इत्यादिपरोक्षज्ञानसत्त्वेऽपि पित्तादिदोषात् शङ्खगुणादौ पीतत्वतिक्तत्वादिभ्रमस्य जायमानत्वेन तादृशबाधाभावस्य तदहेतुत्वात्, भ्रमत्वेन गृह्यमाणस्वरूपबाधस्य च प्रमा प्रत्यपि क्षमत्वेनाकिञ्चित्करत्वस्योक्तत्वाद्, भ्रमाद्योऽप्रामाण्यग्रहाभावस्य चोक्तरीत्या कालान्तरीयप्रत्यक्षमवादाधीनत्वात्।

यत्तु सर्वदा पित्तदूषितनेत्रस्य परोक्षज्ञानादेव तद्बाध इति, तन्न, मानाभावात्। तस्यापि[1] पुरुषान्तरप्रत्यक्ष[2]संवादेनैव प्रामाण्यव्यवस्थानाच्च। अत्र मिथ्यात्वस्य पुरुषान्तरप्रत्यक्षविषयत्वासिद्धेः, परोक्षज्ञानग्राह्यपीतत्वाभावस्यान्यत्र कल्पितदोषत्वेन पित्तेन तत्प्रत्यक्षविषयत्वाभावस्य साधयितुं शक्यतया पूर्वोक्तनियमे व्यभिचारप्रसक्तिविरहाच्च। एतेन दूरस्थितालपरिमाणज्ञान दूरत्वदोषनिबन्धनमभ्रमा, शैलाग्न्यविटपिह्रस्वपरिमाणज्ञानवदिदमपि तथेति युक्तिवशादेव च चन्द्रप्रादेशिकत्वप्रत्यक्षस्य बाध इत्युक्त्वा युक्त्या प्रत्यक्षस्य न बाध इति वचन व्याहतम्। एवं पीतः शङ्ख इति प्रत्यक्षेऽपि प्राचीन पीतत्वाभावप्रत्यक्ष न बाधकम्, तस्य तदानीमभावात्। न च तत्स्मृतिरनुभव[3]दुर्बलत्वात्, किन्तु युक्त्युत्थान एव तस्योपयोगः बाधिका तु युक्तिरेवेत्यपि परास्तम्। उक्तनियमे व्यभिचारानवकाशात्, प्रत्यक्षानुपजीवकयुक्त्या तद्बाधस्य तावताप्यनानयनादिति[4] दिक्।

एतेन नहि चन्द्रप्रादेशिकत्वप्रत्यक्षेऽपि प्रागेव दुष्टकरणत्वनिश्चयः, नैकट्यस्यापि क्वचिद्दोषत्वेन सर्वत्र परिमाणज्ञानाविश्वासप्रसङ्गात्, किन्त्वागमादिना बाधानन्तरमेव। तद्बलकृतेऽपि मिथ्यात्वसिद्ध्यनन्तरमेवाविद्याद्यदोषनिश्चय इति परास्तम्।

प्रतियन्ति हि शास्त्रकथानभिज्ञा अपि प्रत्यक्षविषयीभूतमहत्त्वादिविकमपि महत्त्व चन्द्रादौ दूरत्ववशान्न भासत इति, क्रोशभोजनादिपरिमाणविशेष एव पर तत्र शास्त्रगम्यः, नहि प्रत्यक्षेऽपि घटादौ हस्तवितस्त्यादिपरिच्छेदस्तन्मात्रसाध्यः। तत्र प्रकारान्तरेणापि तत्परिच्छेदो भवति, चन्द्रादौ पुनः शास्त्रेणैवेति विशेषः। नैकट्यस्येत्यादिक तु नाशङ्कयम्, सर्वावच्छेदेनानवच्छुरसयोगे सति तदनवकाशात्। अविद्याया अद्वैतप्रत्यक्ष प्रति दोषत्वकल्पन तु दूरापास्तम्, प्रतिबध्यप्रतिबन्धकयो. द्वयोरप्यप्रसिद्धेः। दूरत्वं हि प्रत्यक्षजातीये दोषत्वेन कल्पितम्, अविद्या तु न कुत्रापि, तस्या एवेदानी प्रमाणपथानवतारात्।

---

१. तच्छब्दस्यापि—ख। २. 'प्रत्यक्ष' इति नास्ति—ख।
३. °नुभवा—ख। ४. °नाच्चेति—ख।

यत्तु "न त विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता", "अज्ञानेनावृत ज्ञान तेन मुह्यन्ति जन्तव:", "आवृत ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा", "विविदिषन्ति यज्ञेनेति" "ज्ञानमुत्पद्यते पुसा क्षयात्पापस्य कर्मण:" "जनै: स्वकर्मस्तिमितात्म-निश्चये" इति श्रुतिस्मृतिपुराणप्रसिद्धमेवाविद्यारागपापविशेषाणा दोषत्व-मिति। तन्न; मिथ्यात्वप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालि-त्वस्य ततोऽप्यसिद्धे। आत्मतत्त्वज्ञाननिष्ठप्रतिबध्यतानिरूपितप्रतिबन्ध-कत्वस्य त्वस्माकमपीष्टत्वादित्यलं तावत्। तस्माद्यत्रान्यत्र बलवृत्तदोषेण प्रत्यक्षस्य प्रमाणान्तरगम्यार्थानवगाहित्वं बल्पयितु शक्यम्, तत्रैव तत्प्रमाण-प्रसरो न तु तत्प्रमाणबत्त्वेनैव दोष कल्पयित्वा प्रत्यक्षबाध:। एतेन मिथ्या-त्वानुमानस्यापि प्रत्यक्षे बाधकत्वमपास्तम्। शशशृङ्गादावपि तया वक्तु शक्यत्वात्। पशुत्वादिलिङ्गकानुमानादेस्तत्रापि सम्भवात्। व्यभिचारस्थले च त्वदुक्तरीत्या तेनैव प्रत्यक्षबाधापत्ते। एतेनाऽयोग्यशृङ्गादि[1]साधने प्रत्यक्षबाधस्यासम्भवेन तत्र व्याप्तिग्राहकतर्कोऽप्याभासत्वस्य त्वयापि[2] वक्तव्य-त्वेनोभयसमाधेयत्वान्न दोष, नहि तर्काभाससमीचीनमनुमान प्रमाणमिति केनाप्यभ्युपेयते इति परास्तम्।

मन्मते शृङ्गस्य योग्यव्यक्तिसम्बन्धिनो योग्यत्वनियमात्। तत्र शृङ्गस्यायोग्यत्वे मानाभावात्, त्वा प्रत्युक्तरीत्योक्तदोषोद्भावस्य निर्दोष-त्वात्, पशुत्वादेरयोग्यशृङ्गासाधकत्वात्। एव च शशादौ शृङ्गस्य प्रत्यक्ष-बाधेन पशुत्वशृङ्गयोर्व्याप्तिरेवापसार्यते। न चायोग्यशृङ्गकल्पनासम्भव:, तदयोग्यताकल्पकदोषस्यान्यत्राकल्पितत्वात्, दूरत्वाद्यभावेऽपि तदप्रत्यक्षाच्च। त्वद्रीत्यान्यत्राकल्पितत्वेऽपि शशादि[3]पुरस्कारेणैव शृङ्गप्रत्यक्षविरोधिदोषस्य कस्यचित्कल्पयितु शक्यत्वात्। व्यभिचारग्रहाभावेन व्याप्तिग्रहे बाधका-भावान्मिथ्यात्वानुमानेऽप्यनुकूलतर्काभावाच्च। श्रुतेस्तदर्थतात्पर्यत्वासिद्धे: पञ्चमस्य पुरस्तात् प्रकाशयिष्यमाणत्वात्। "आदित्यो यूप." इत्यादावपि तदभेदप्रत्यक्षप्रतिबन्धकदोषकल्पनापत्तेश्च वेदतात्पर्यविषयत्वतदभावाभ्या वैषम्यमिति चेन्न, तस्यैवेदानी निरूप्यमाणत्वात्। यत्तु—

"उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥"

---

१ शृ गो हि—ख। २. तथापि—ख। ३ शशादिपु—ख।

इति उपक्रमादितात्पर्यग्राहकलिङ्गबलाद्ब्रह्मैक्यबोधकत्वात्तद्विरुद्धविषयकत्वादिति चेन्न तात्पर्यग्राहकत्वात्। अत्रापि प्रकरणत्वमप्रयोजनत्वं चेति मतभेदेन प्रकरणविचारोऽस्ति। ज्ञाते बाधिते निष्फले च प्रमाणानां तात्पर्याभावात्। अबाधितार्थज्ञानमेव फलवत्। ततश्च तात्पर्यानवच्छेदकधर्मावच्छिन्नबोधकत्वेनैव तात्पर्यानुमेयत्वं सिद्धम्। उपक्रमोपसंहारैकवाक्यत्वं, अभ्यासोऽर्थवादश्चेति तु शब्दनिष्ठप्रकरणम्। यद्धि पूर्वोक्तलिङ्गेन द्वयोरर्थयोरुक्तिः, अभ्यासादिकमन्यतरस्यैवार्थस्य तात्पर्यग्राहकं नाद्यस्यैवेत्यभ्यासादिविरहिण्यर्थे तात्पर्यग्रहकादिरहितं वाक्यं यदतदर्थतात्पर्यकं न स्यात्तदेतदर्थमभ्यासादि युक्तं न स्यादिति वाक्यं व्यतिरेकनिश्चयो विधाय तत्र तात्पर्यनिश्चयोऽस्तु। अस्ति च छान्दोग्योपनिषदि उद्दालकस्य श्वेतकेतवे 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रमस्य 'एतदात्म्यमिदं सर्वं तत्सत्यम्' इत्युपसंहारस्य चाद्वैतात्मत्वादैकरूप्यम्। अभ्यासोऽनन्यार्थपुनःश्रवणं यथोक्तवाक्यस्य नवकृत्वः श्रुतिः, अर्थवादो 'येनाश्रुतं श्रुतं भवति' इत्यादि प्रकृतबोधकवाक्यम्। तच्चाद्वैतब्रह्मप्राप्तिसाधने श्रवणादौ प्रवर्तकत्वादद्वैतब्रह्मतात्पर्यग्राहकम्। उक्तं च यदनुपपन्नमन्यसाधारणम्। अद्वैतब्रह्मतत्त्वस्य मानान्तराप्रसिद्धत्वात् चाज्ञातस्वरूपमुपदेश्यत्वं च "तमादेशमप्राक्ष्यः" इति वाक्ये आदेशोऽज्ञातत्वेनोपदेशार्हं इत्यर्थात् तज्ज्ञानस्य परमपुरुषार्थहेतुत्वात् च फलवत्त्वमिति। तच्चिन्त्यम्, उपक्रमादीनां यादृशार्थबोधकत्वं फलवति तदर्थे तात्पर्यमित्यत्र विवादाभावात्। नह्युपक्रमादौ मानान्तरविरोधे नापेक्षणमिति वेदवाक्यमस्ति।

न्वेवं तस्यैव तात्पर्यनिर्णायकत्वे उक्तलिङ्गवैयर्थ्यमिति चेत्, न किं शमदमाद्यविषयबोधकमादिलिङ्गमहकृतवाक्यान्तरस्यापि प्रामाण्यमस्तु। न च तत्र मानान्तरविरोधोऽप्यपेक्ष्य इति वाच्यम्, अत्रैव तदनपेक्षणात् बीजनिरूपणे। तस्माद्यत्रार्थद्वय मानान्तरविरोधादिना सम्भावितात्पर्यविषयनाक तत्रोपक्रमोपसंहारयोरन्यतरार्थतात्पर्यनिर्णायकत्वम्। किंच अबाधितत्वरूपा उपपत्तिरत्रैव षड्विधलिङ्गमध्ये निविष्टा, तत्कथं प्रमाणान्तरबाधितेऽपि तात्पर्यमित्युच्यते, अद्वैतस्याबाधितत्वप्रसिद्धौ तत्र तात्पर्यग्रहः, तत्सिद्धौ च प्रत्यक्षप्रामाण्यद्वाराबाधितत्वसिद्धिरित्यन्योन्या-

---

१. °वदे—ख। २. °त्रयेऽस्या°—ख।

श्रयात्। एतेन प्रकारान्तरेणाबाधितस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य यथागमेन बाध, तथा प्रकारान्तरेणाबाधितस्य सन् घट इत्यादिप्रत्यक्षस्य मिथ्यात्वबोधकागमेन बाध इति भावि[1]बाधनिश्चयात् प्रत्यक्षमप्रमाणमित्यपि परास्तम्, वैषम्यस्य दर्शितत्वात्। प्रत्यक्षेण मिथ्यात्वागमस्यैव मुखनिरोधात्, प्रत्यक्षं प्रति तद्बाधकत्वस्य दूरापास्तत्वात्।

यत्पुनरत्र परै. प्रकारान्तरेण प्रत्यक्षप्राबल्यमाशङ्क्य निराकृत तेन नास्माक चर्ति, उक्तरीत्या प्राबल्यस्य निर्दोषत्वात्। तथाप्यवान्तरचमत्कारार्थं किञ्चित्तदुपदर्श्यते। तथाहि औष्ण्यप्रत्यक्षेण वह्निशैत्यानुमितिप्रतिबन्धदर्शनात् प्रत्यक्षस्य जात्या प्राबल्यमिति न शङ्क्यम्, तत्रोपजीव्यत्वेनैव तद्बाधसम्भवात्। न च वह्नेः चक्षुषापि ग्रहात्तत्त्वाच्चप्रत्यक्ष[2]मुपजीव्यम्, अत एव "न च खलु चक्षुषाग्निधर्मिकबुद्धौ तत्रानुष्णत्वानुमानमनुमितेः प्रागनन्तर वा स्पार्शनौष्ण्यप्रत्यक्षेण न बाध्यते" इत्युद्धारदुद्धिरचनमिति वाच्यम्; साध्यप्रसिद्धेस्तवगवीनत्वाच्छैत्यस्य चक्षुरयोग्यत्वादित्युक्तम्। तन्न, अनुद्भूतशैत्यमादायानुमितेरबाध्यत्वापत्ते[3], रसनेन्द्रियादौ तत्प्रसिद्धे, तत्र त्वचोऽप्यनपेक्षितत्वात्। महत्त्वोद्भूतरूपसमानाधिकरणस्पर्शस्योद्भूतत्वनियमस्य च त्वाचप्रत्यक्षत्वनियमात्। वह्निर्यदि शीतस्पर्शवान् स्यात्तदा तत्त्वेनोपलभ्येतेत्यापादनसम्भवेन योग्यानुपलब्ध्यैव तत्र शैत्यानुमितिबाध इति चेत्तर्हि विमुपजीव्यत्वोद्भावनेन, अस्मदुक्तार्थ एव पर्यवसानात्। नाप्युपजीव्यत्वेनैव तत्र बाधसम्भवः, यस्य पुरुषस्य शैत्यज्ञान शाब्दमेव, तदपि वा जात तस्यौष्ण्यस्पार्शनेन शैत्यानुमितेन बाधापत्ते.। उभयविधशैत्यज्ञानसत्त्वे स्पार्शनमेव तदनुमित्युपजीव्य न तु शाब्दमपीति विनिगन्तुमशक्यत्वात्। शाब्दादिरूपसाध्यप्रसिद्धेनाप्यनुमित्युपयोगित्वोपगमात्। तदेतदुक्त खण्डनोद्धारकृद्भिः "न ह्युपजीव्यत्वमेव बाधकनाया तन्त्रम्, ईदृशी अपि ज्वालाबुद्धेरबाधकत्वात्प्रत्युत बाध्यत्वात् तस्मादनन्यथासिद्धिरेव तत्रोपयुज्यते, सा च प्रस्तुतेऽपि तुल्यैव" इति। अत एव न्यायभास्करकारैः उक्त "प्रत्यक्षानुमानोपस्थितौ प्रत्यक्षस्यानन्यथासिद्धत्वनवधारणेऽपि स्वार्थसंशयविरुद्धत्वान सत्प्रतिपक्षता, विषयाव्यवस्थितिस्तु प्रामाण्यग्राहकानुमानमनिरोधात्तत्सन्देहमनाहृतात्मसन्देहात्। तदवधारणे तु किं बराकमनुमान तदन्यथासिद्धेरप्रतीक्षणात्। अनुमान तु प्रत्यक्षादेर्विरोधिनोऽन्यथासिद्धिमुपजीव्यैव स्वार्थप्रत्यायकमिति विशेषात्।"

---

१. भवति—क। २. न त्वाचप्रत्यक्षस्य—ख। ३. शाब्दादिक°—ख।

न चैव ज्वालैकत्वग्राहिप्रत्यक्षविरोधान् परिमाणभेदलिङ्गभेदानुमानानुत्पत्तिरेव दूरे बाधकत्वमिति वाच्यम्, तत्रापि सादृश्यादप्यभेदप्रत्ययोत्पत्तिरिति प्रत्यक्षमुखपिण्डमुपजीव्यैवानुमानप्रवृत्तेरिति। यदप्यनुमानाद्यगृहीतरेखोपरेखादिग्राहित्वेन प्रत्यक्षस्य प्राबल्यमाशङ्क्य,[1]नोक्तं प्रत्यक्षागृहीतधर्मादिग्राहकत्वेन परोक्षप्रमाणस्यैव प्राबल्यापत्तेरिति, तदपि न, 'धर्मादेरपीश्वरप्रत्यक्षगृहीतत्वात्'[2]।

यत्तु शाब्दत्वादिजातिविशिष्टागृहीतविशेषोऽप्रसिद्धः, केनचित्पुरुषेण तदादिशब्दैर्बुद्धिविशेषविषयत्वादिरूपेण विशेषमात्रे गृहीतसङ्केतैः स्वरूपत एव सर्वविशेषाणा ग्रहणसम्भवादिति, तच्चिन्त्यम्, एकपुरुषस्य स्वरूपतो यावद्विशेषोपस्थितेरसम्भवात् [3]प्रमाविभाजकमदुपाध्यवच्छिन्नागृहीतग्राहिणी या प्रमा सा तज्जातीयप्रमापेक्षया प्रबलेत्यस्य विवक्षितत्वात्। साक्षात्कारत्वस्य प्रमाणफलविभाजकत्वाभावेऽपि प्रमाविभाजकत्वात्[4]। स्ववृत्त्यसाधारणधर्मांशे निरवच्छिन्नप्रकारतावगाहोपस्थितेश्चागृहीतपदवाच्याभावप्रतियोगिविषयत्वविशेषणज्ञानपदार्थत्वेन विवक्षितत्वात्। यद्यप्यनुमानाद्यनिवर्त्तितदङ्मोहादिनिवर्त्तकत्वेन प्रत्यक्षप्राबल्यमाशङ्क्य,[5]नोक्तम्, अस्य वैधर्म्यमात्रत्वेऽपि प्राबल्ये प्रयोजकत्वम्, अन्यथा यद्यदनिवर्त्तितभ्रमनिवर्त्तकं तत्तत. प्रबलमित्युक्तौ काठिन्यविशेषादिविषयकवशस्पार्शनस्यापि मण्डूकवसाञ्जनरूपचक्षुर्दोषसत्त्वे चाक्षुपवशोरगभ्रमनिवर्त्तकत्वात्, त्वगपेक्षयाऽपि चक्षुष. प्राबल्य स्यात्। ततश्च चित्रनिम्नोन्नतत्वज्ञानस्य तद्विरोधित्वाच्च ज्ञानाद्भावो न स्यात्। एव प्रत्यक्षानिवर्त्तितस्य यागादावधर्मत्वभ्रमस्य श्रुत्या निवृत्तिदर्शनात्, साऽपि प्रत्यक्षात् प्रबला स्यात्।

न च निवर्त्तके प्रत्यक्षत्व[6] विशेषण, शाब्दत्वस्यापि विनिगमकाभावेन दुर्वारत्वादिति, तदपि न; यद्यदनिवर्त्तितधर्मिविषयविषयकभ्रमानिवर्त्तकम्, तत्तत: प्रबलमिति वाच्यत्वात्। चाक्षुपवशोरगभ्रमस्य त्वगनिवर्त्तितत्वेऽपि तस्य त्वग्विषयविषयकत्वाभावात्। न हि मण्डूकवसाञ्जननिबन्धनत्वाच[7]वशोरगभ्रमः सम्भवति। तदुक्त मणिकृता—"मण्डूकवसाञ्जन नयन एव दोषो न त्वचि" इति। दोषान्तरनिबन्धनस्तु[8] चाक्षुपवशोरगभ्रमः काठिन्यविशेषादिविषयकवशस्पार्शनेन निवर्त्तत एव। एव च न द्वितीयोऽ-

---

१—१. नास्ति—ख। २—२ नास्ति—ख। ३ प्रत्यक्षं—ख।
४ गमकत्वा°—ख। ५. निवर्तितविषय—ख। ६. स्वग्—क।
७ दोषान्तरपरिवर्तितस्तु—ख।

व्यतिप्रसङ्ग, अवर्मस्य प्रत्यक्षविषयत्वाभावात्। न चेश्वरप्रत्यक्षमादायाति-प्रसङ्ग, फलरूपस्यैव प्रत्यक्षस्यात्र विवक्षितत्वात्। भ्रमसमानाधिकरणस्यैव प्रत्यक्षस्यावरय वाच्यत्वात्।

यत्तु तत्प्रत्यक्षत्वजातेर्युष्मन्मते[1]ऽलीकत्वादिति, तन्न, प्रमाणषाड्-विध्यम्य[2]वेदान्तिभिरप्यभ्युपगमात्, भ्रमविभाजकोपाधिरूपस्य प्रत्यक्षत्व-रूपस्य कस्यचिद् धर्मस्य नैरवश्य मन्तव्यत्वात्, तत्त्वावेदकत्वरूपप्रामाण्य-सदसद्भावस्येदानीमनुपयुक्तत्वात्। इद च तान् प्रति सर्वत्र वक्तव्यम्—

यद्वस्तु सर्वव्यवहारसिद्ध तवापि तत्सम्प्रतिपन्नमेव।
अतात्त्विकत्वप्रतिवादनेऽस्य परन्तु बन्ध्यो भवत प्रयास॰॥

प्रत्यक्ष जात्यैव प्रबलमिति प्रवादस्याऽप्युक्तार्थ एव तात्पर्यम्। एतेन जात्या[3] प्राबल्यमित्यस्य प्रत्यक्षत्वेनैव प्राबल्यमित्यर्थ। स च दुष्ट एवेत्यपास्तम्।

प्रत्यक्षमनुमानञ्च शास्त्र च विविधागमम्।
त्रय सुविदित कार्य धर्मशुद्धिमभीप्सता॥
प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्॥

इति स्मृतावपि हि वेदत्वमात्रेण प्राबल्यमिति नार्थ, अतिप्रसङ्गस्य स्पष्टत्वात्। "क्व च प्रत्यक्षत आप्तमनुमानागमबाधितम्" इत्यस्याप्युक्तमेव तात्पर्यम्। एतेनागमापेक्षया प्रत्यक्षे श्रद्धालुत्व चार्वाकसख्यमात्रविजृम्भित-मित्यप्यपास्तम्। बाधितेऽप्यर्थे[4] श्रद्दधा शून्यवादिसख्यविजृम्भितमिति प्रतिवन्दिमम्भवात्।

यत्तु सर्वशून्यतावादोऽपि हि शून्यवाद., स चास्माक नास्ति, अधिष्ठानसत्यत्वोपगमात्। तदुक्त खण्डने—"सौगतब्रह्मवादिनोऽय विशेष. यदादिम सर्वमनिर्वाच्य व्यनक्ति[5] इतरस्त्वात्मान्यदिति", तच्चिन्त्यम्; अस्माकमपि प्रत्यक्षमात्रप्रामाण्यानभ्युपगमेन चार्वाकसख्योक्तेरसगतत्वात्। उक्तविशेषोऽप्यनुपपन्न, शून्यवादिभिरप्यधिष्ठानसत्यत्वोपगमात्। उक्त हि—'अथातो ब्रह्मजिज्ञासा" इति सूत्रे वाचस्पतिमिश्रैः—'वस्तुमात्रस्य सत्यत्वाभावे निरधिष्ठानस्याऽनृतस्याप्यनुपपत्त्या व्यवहारविरोधापत्ते। शून्यवादेऽपि शून्यताया एव सत्यत्वात्" इति। न्यायवार्तिकतात्पर्यटीकाया—

१ रूपस्य—ख। २ षाड्गुण्यस्य—ग। ३ तात्पर्यं—क।
४ वक्ति—ग।

मपि तैरुक्तं शून्यवादसिद्धान्तमुपसंहरद्भिः—'तस्माद्भावाना शून्यतैव पारमार्थिकी, कल्पनया त्ववस्तुतया सत्य इव भासते' इति। अत एव—

"द्वौ सत्यौ समुपाश्रित्य बुद्धानां धर्मदेशना।
लौकिकं तत्त्वसत्यं च सत्यं च परमार्थतः॥

इति बौद्धोक्तिः संगच्छते। शून्यताया अपि पारमार्थिकत्वे तेषामसिद्धान्तात्, तस्या पारमार्थिकत्वाभावे च पारमार्थिकसत्यत्वाश्रयोक्तिव्याघाताच्च। यद्यपि बौद्धाधिकारे शून्यतायां परत- सिद्धावनवस्थादिदोषमुक्त्वा 'स्वत - सिद्धत्वेन, आयातोऽसि मार्गेण, स्वतःसिद्धतया तदनुभवरूप शून्यत्वादेव न तस्य कालावच्छेद इति नित्यत्व एव न देशावच्छेद इति व्यापकत्व' इत्यादिना वेदान्तिमतप्रक्रियया शून्यवादित्वहानिरुक्ता। अधिष्ठानसामान्यसत्यतायां शून्यवादस्य मन्दताविशेषः स्यादिति। तदपि न, तस्याचार्यवचनादिनैवापि तत्त्वतत्वाभावात्। यद्युक्त्या परमत दूष्यते तस्यास्तादृक्त्वाभावात्। तस्मात् शून्यत्व सत्यम्, स्वस्मात् तु ब्रह्मेति विशेषात्च'।

यत्तु साक्षिणो वाच्यत्वे बाध्यत्व नि साक्षिक स्यादिति, तन्न, साक्षी हि स्वस्मादपि बाध्य एव, अज्ञानवृत्युपहितचैतन्यस्य साक्षित्वात्। उक्तञ्च-विद्यारण्यैरद्वैतसिद्धौ "केवलचिन्मात्र न साक्षि किन्त्वविद्यावृत्युपहितम्, तथा चाभियुक्तविद्यावृत्युपहितस्य साक्षिणोऽभ्युपगमेनादि"। अविद्योपहितत्वाच्चिदंशेऽपि अविद्याया अपि ब्रह्मज्ञानोच्छेद्यत्वाभ्युपगमेन साक्षिणो बाध्यत्वाभ्युपगमात्। न च अज्ञानोपहितस्य साक्षित्वेऽप्यज्ञान न साक्षिकोटौ प्रविशति जडत्वात्, किन्तु साक्षकोटावेवेति वाच्यम् तथापि तादृशस्यैव मिथ्यात्वज्ञानादवश्यात्[2] अवाग्य च शुद्ध ब्रह्म न साक्षीति दिक्।

यत्तु क्व वा प्रत्यक्षत्व स्वस्य परोक्षितप्रमाणकप्रत्यक्षपरत्वेनेति, तत्र वदन्ति—नन्वहं घट इत्यादेरपि फलपर्यन्त परोक्षितत्वादिति। यत्तु स्वाप्रियागम[3]विज्ञानादे फलपर्यन्त परोक्षितत्वेऽपि दुर्बलत्वमिति, तन्न, बाधकाभावव्यापि विवक्षितत्वात्। न च पाश्चात्यबाधादिकमत्रापि तुल्यमिति वाच्यम्, बाधस्यैव खण्डनमतत्वात् तद्बाधायैव बाधत्वस्योद्भावयितुमशक्यत्वात्।

प्रकृतमनुसरामः, प्रथमप्रवृत्तत्वादपि प्रत्यक्ष प्रबलम्। न चायं न्याय. पूर्वमीमांसायां तृतीये प्रसिद्ध। तथाहि—"अनेकार्थत्वेऽपि वाक्यैर्यजुर्वेद

१ विशेष—क। २ मिथ्यात्वावश्यकत्वात्—क। ३. मगमादे—ख।

आदित्यात्सामवेद" इत्युपक्रम्य ज्योतिष्टोमे श्रूयते "तस्मादुच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेति" तत्र ऋगादिपदार्थोद्देशेन विहिते उच्चैष्ट्वादौ किम् ऋगादिपदमुख्यार्थो मन्त्रविशेष एवोद्देश्यम्, उत ऋग्वेदादिविहितकर्माङ्ग-मन्त्रमात्रमिति संशय। तत्र विधिस्थऋगादिपदमुख्यार्थत्वानुरोधेनार्थ-वादस्थ ऋग्वेदादिपदानाम् ऋगादिमात्रे लक्षणा। न च विनिगमकाभाव, गुणानुरोधेन प्रधाने लक्षणानौचित्यादिति पूर्वपक्ष।

सिद्धान्तस्तु ऋग्वेदादेरुद्देश्यत्वविधेयत्वान्यतरप्रकारेणापि वाक्या-र्थप्रवेशे श्रुतेरप्यनुपपत्ते, प्रधानस्यापि विधिवाक्यस्य ऋगादिपदाना वेदलक्षकत्व विना निर्वाहाभावात्। अङ्गगुणविरोधन्यायानवतारात्। एकवाक्यत्वाभावेनापच्छेदन्यायस्याप्यप्रवृत्ते, विधेश्च पूर्वमनुत्पन्नस्य पूर्वोत्प-न्नेषु लक्षणारूपोपमर्दसामर्थ्याभावात्। विधिवाक्यान्तर्गतानामृगादिपदानाम प्युद्देश्यसमर्पकत्वेन लक्षणाया अदोषत्वाच्च। प्रथमोपस्थितवेदादिपदानुरोधेन ऋगादिपदाना तत्तद्वेदविहितकर्माङ्गमन्त्रमात्रपरत्वमिति। तदुक्तम्—

'असजातविरोधित्वादर्थवादो यथाश्रुत।
आस्थेयस्तद्विरुद्धस्य विध्युद्देश्यस्य लक्षणा॥"

तद्वदत्रापि असजातविरोधित्वेन प्रत्यक्षप्रामाण्यम्, श्रुतेस्तु तदविरोधे-नान्यथैव व्याख्या युक्ता।

यत्तु तत्रैकवाक्यस्थपरस्परसापेक्षपदत्वेनोभयोस्साम्यात्तथा, अत्र तु गृहीतप्रमाणभावश्रुत्यपेक्षया भ्रमविलक्षणत्वेनानिश्चितस्य प्रत्यक्षस्य न्यूनबलत्वानेति[1]। तदसत्, प्रत्यक्षविरोधेन श्रुतेस्तदर्थे तात्पर्य नेति विचार-दशाया श्रुतेर्गृहीतप्रमाणभावेति विशेषणासिद्धे। तदर्थे गृहीतप्रामाण्य-त्व हि तद्बलवत्त्वे प्रयोजकम्, तच्च नास्तीत्युक्तत्वात्। अत एव शब्दखण्डे मिश्रव्याख्यादूषितम्—"न हि वेदार्थत्वेनैवाबाधितत्वनिश्चय। श्रावाण प्लवन्ते इत्यादौ व्यभिचाराद् इति।" अत एव "तस्माद् धूम एवाग्ने-र्दिवा दृष्टो नार्चिरर्चिरेवाग्नेर्नक्त दृष्टो न धूम" इत्यस्य दृश्यविरोधा-दप्रामाण्यमिति पूर्वपक्षे 'दूरभूयस्त्वाद्" इति जैमिनीयसिद्धान्तसूत्रम्। अस्यार्थ—दर्शिरत्र गौणो, दूरभूयस्त्व च गुण। तथा च दूरस्थस्य यद्भूय-स्त्वेन दर्शन तद्दर्शिना लक्षयित्वा नक्ता तद्विपरत्वाभावो अग्न्यादौ बोध्यते,

---

१ पूर्वोपपन्नस्य—ख। २ त्वेति—ख।

आदित्यस्तुत्यर्थम्। दिवा हि दूरस्थंभूयस्त्वेन धूम एव दृश्यते नार्चिः। नक्तं च तंभूयस्त्वेनार्चिरेव दृश्यते न धूम इति। तथा च "सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोति अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोति" इति मिश्रलिङ्गकमन्त्रविधेः शेषः। तस्माद्दिवाग्निरादित्यो रात्रावादित्यस्तमिति वाक्यं तस्याप्युपपादकम्, धूम एवेत्यादिकं उभयोर्देवतयोरेकत्र मन्त्रत्वादुभयदेवत्यहोमस्तुतिः। यद्वा केवललिङ्गकमन्त्रविधिलभ्यं पठितमप्युक्तवाक्यम् 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योति सूर्यः स्वाहेति प्रातर्जुहोति' इति केवललिङ्गकमन्त्रविधेरेव शेषः। मिश्रलिङ्गकमन्त्रविध्यपेक्षितस्य "उमाभ्यां नाय हूये उमाभ्यां प्रानयं देवताभ्यः समदं दधामि" इति समवेतार्थकार्यवादान्तरस्य श्रूयमाणत्वात्। यस्माद्दिवाग्नेरदर्शनादादित्यान्तर्गतिर्लभ्यते तस्मादादित्यस्यैव ज्योतिष्ट्वम्, एव रात्रावप्यग्नेः। अतः केवलदेवत्यावेव युक्ताविति तत्प्राशस्त्यसिद्धिरिति। एवञ्च "यजमानः प्रस्तरो यजमान एककपाल" इत्यत्र प्रस्तरैककपालयोरचेतनतया स्वातन्त्र्येण यागकर्तृत्वासम्भवेऽपि यागप्रयोगवर्तिस्वव्यापार प्रति स्वात्यादिवत्कर्तृत्वसम्भवाद्[1] वचनबलेन यजमानपद प्रस्तरैककपालयोर्नामधेय सोमादिपदवद् रूढत्वात्, प्रयोजन तु "स्रुव यजमानोऽन्वारभते" इत्यादौ प्रस्तरैककपालयोरपि ग्रहणसिद्धिरित्येकः पूर्वपक्षः। अन्यस्तु स्वव्यापारे आश्रयत्वरूपकर्तृत्वस्योक्तरीत्या सम्भवेऽपि कर्तृगामिक्रियाफलविहितात्मनेपदसञ्ज्ञकशानचप्रत्ययान्तयजमानपदस्य स्वर्गादिफलानर्हान् तेन प्रस्तरादियोगानुपपत्त्या भिन्नार्थकयोः प्रस्तरयजमानपदयोः सामानाधिकरण्यमानेण नामत्वमनुपपन्नम्। अतो यो होतासावध्वर्युरितिवदेकपदस्य कार्यलक्षणामङ्गीकृत्यापरपदार्थो विधीयते। तत्र च यजमानकार्ये त्यागादावचेतनस्य प्रस्तरादेः कर्तृत्वासम्भवात् प्रस्तरादिपद एव कार्यलक्षणया प्रस्तरकार्ये स्रुग्धारणादौ यजमानो विधीयते।

न च स्रुग्धारणादौ विनियुक्तस्य स्वपदार्थकरणविरोधः। अन्यत्र कथञ्चिदविरोधे वा "दक्षिणतो ब्रह्मयजमानावासाते कर्मणः क्रियमाणस्य" इति वाक्यविहितदक्षिणदेशावस्थानरूपस्वप्रयोजनीभूतपदार्थकरणविरोधो दुर्परिहर एवेति वाच्यम्, दक्षिणदेशावस्थितस्यैव स्रुग्धारणादिसाधनत्वोपपत्तेः। वेदिदेशकत्वरूपप्रस्तरत्वसम्बन्धेऽपि चाविरोधात्, प्रस्तरपक्षे

---

१ मन्त्रे—क। २. विधि—ख।

तत्सार्थक्याच्च । यद्वा सामान्यविहित दक्षिणदेशावस्थान स्रुग्धारणरूपप्रस्तरकार्यपूर्वोत्तरकालेऽनुष्ठेयम् ।

न च तथाप्येककपालसाध्यत्यागस्य स्वात्मनि क्रियाविरोधाद् यजमानसाध्यत्वानुपपत्तरेककपालकार्ये यजमानविधि कथमिति वाच्यम्, गुरौ स्वात्मानमपयेत्सख्यमात्मनिवेदनमि यादिवत् स्वशरीरे स्वात्माभिमाननिवृत्त्युपपत्त ।

न चवमपि[1] सूक्तवाकेन प्रस्तर परिहरति इति प्रस्तरत्वापत्त्या यजमानस्य प्रहरणाख्यप्रतिपत्त्यापत्त एककपाल सवहुत करोति" इति एक कपालवत्सवहोमापत्तश्च सवलोपप्रसङ्ग । अन्यार्थस्यैव यजमानस्य पुराडाशकपालवत्स्रुग्धारणादौ विनियोगऽपि तावन्मात्रेण कृतार्थत्व विरहात्प्रतिपत्त्यनर्हत्वादिति । सिद्धान्तस्तु नैतदेवम्, दक्षिणदेश उदङ्मुखासीन यजमानऽध्वर्युणा स्रुचो धारयितुमशक्यत्वात् ।

न चोक्तसङ्कोचेन निर्वाह कल्प्यविधिना वलृप्तविधिबाधानुपपत्ते । एवमककपालसाध्य स्वत्वत्यागेऽपि न विधि । स्वस्य स्वस्मिन् स्वत्वाभावेन निवृत्तरशक्यत्वात् । किञ्च कार्यापत्त्या प्रहरणसर्वहोमापत्ति । न चाकृतार्थत्वान प्रतिपत्ति, [2]प्रयोगानुरोधेन सवयाजमानपदार्थकरणोत्तरकाल प्रतिपत्तदुर्वारत्वात् । न चेष्टापत्ति, क्रमनिबद्धसोमयागाद्यन्तरङ्गतन्नलापापत्त । प्रस्तरपक्षविषयकत्वकल्पने च कल्प्यविध्यनुरोधेन पाक्षिकत्वकल्पनानुपपत्ति तद्रमथवादत्वमेवास्तु ।

न च यजमानपदेन प्रस्तरादे स्तुत्यनुपपत्ति, गौण्या तत्सम्भवात् । तथाहि स्वशक्यगुणवत्ता गौणीवृत्ति । गुणवत्ता च क्वचित्समानजातीय गुणवत्तासम्बन्धेन क्वचित्त्वारोपेण वाक्षादेव । आद्या यथा सिंहो देवदत्त इति सिंहपदशक्य सिंहे विद्यमाना ये क्रमहृद्यकारित्वादिगुणास्तत्समानजातीया गुणा देवदत्त इतीति सिंहपद तत्र गौणम् । तथा च सिंहपदात् सिंहप्रतीतौ एवसम्बन्धिज्ञानानन्तरमस्यविस्मरणन्यायेन तद्वृत्तिगुणानामुपस्थिता उक्तन्यायेनच तत्समजातीयगुणानामप्युपस्थितिरस्ततस्तत्प्रकारका बोध । अतश्च सिंहवृत्तिगुणसमानजातीयगुणप्रकारकदेवदत्तविशेष्यकज्ञानत्व सिंहपदशक्यवृत्तिगुणसजातीयगुणवत्ताज्ञानस्य कार्यतावच्छेदकम् । द्वितीया तु भेदघटितत्वऽपि सिंहनिष्ठसिंहत्वक्रूरत्वादिक देवदतादावारोप्य शब्दप्रयोग तत्रानुभवसिद्धारोपस्य दुरपह्नवत्वात् वाक्षादेव । स्वशक्यवृत्तिगुणवत्ता गौणी ।

१ चंवम्—ख । २ प्रयोजना—क ।

सा च "सौन्दर्यस्य तरङ्गिणी तन्वङ्गिमोत्कर्षस्य हर्षोद्गम" इत्यादिकाव्ये रूपकस्थले प्रसिद्धा, वेदेऽपि "योषा वाव गौतमाग्नि" इत्यादौ। तस्माद्यजमानप्रस्तरयोर्गुणजन्यत्वसाम्येन यागाख्यकार्यनिरूपितत्वाख्यमेकं धर्ममादाय यजमानप्रस्तरधर्मनिष्ठयो कारणत्वयो लाजात्वाद् गौणी युक्तेति।

"अग्निर्वै ब्राह्मणो" इत्यादावपि पूर्ववद्विधित्वे प्राप्ते उच्यते—'आग्नेयमष्टाकपालं निर्वपेद् ब्राह्मणो वह्निवर्चसकाम" इत्येतद्वाक्यशेषे "प्रजापतिरकामयत प्रजा सृजेयमिति, स मुखतस्त्रिवृत निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छन्दो रथन्तर साम ब्राह्मणो मनुष्याणामज पशूनाम्" इत्येवप्रजापतिमुखोत्पन्नत्वमुक्तम्[1]। अतस्तदेव परम्परया गौणीवृत्तिनिमित्तम्। "आदित्यो यूप यजमानो यूप" इत्यादावपि पूर्ववदेव पूर्वपक्ष। यूपकार्ये पशुनियोजनादावनपक्रमसाधनत्वेनादित्यविधिरशक्य। दारुमयादित्यप्रतिकृतिरूपे[2] विधौ गुणवृत्त्यापत्तिः। एव तत्र यजमानविधिरप्यनुपपन्न कार्यापत्त्योत्तर वेदिप्रागुदेशखननापत्तेः। यजमानपदार्थेन दक्षिणदेशावस्थानेन तद्भावकल्पने च बाधस्यैव दोषत्वात्। अतो गुणवृत्त्या यूपस्तुतिरेवेयम्, सारूप्यञ्च तन्निमित्तम्। यद्यपि च सारूप्य सादृश्यम्, तच्च तद्धर्मत्वे सति तद्गततेजस्वित्वादिजातीयगुणवत्त्वम्। एवञ्च तत्सिद्धयादिस्थलेऽपि समानजातीयत्वाद्यसारूप्यस्य सत्त्वात्कथमुभयत्र निमित्तभेद, तथापि यत्र सारूप्यसम्बन्धेन मुख्यनिष्ठा गुणा एव प्रकारत्वेन भान्ति तत्र तत्सिद्धयादीनि पञ्चनिमित्तानि। यत्र तु सादृश्यमपि प्रकारीभवति तत्र सारूप्यमिति केचित्। चक्षुर्ग्राह्यसारूप्यमत्र भाति, अन्यत्र तदन्यदित्यन्ये, उभयमपीदं चिन्त्यम्, यजमानकार्यकारित्वादेरपि चक्षुर्ग्राह्यत्वसम्भवात् सम्बन्धविधयादित्यतेजस्वितासदृशतेजस्विता प्रकारत्वेन भाति।

"अग्निर्वै ब्राह्मण" इत्यादौ तु सादृश्यसम्बन्धेन अग्निजननस्तम्बन्विजनन भानेऽन्यत्र विनिगमकाभावात्। अग्निजननस्थानजातत्वेनादित्यवृत्तिताबच्छेदकवैलक्षण्यविशिष्टतेजस्विनात्वेन च भानादुभयत्रापि गुणघटकसादृश्यभाने मानाभावाच्च। अतोऽत्र भेदाग्न्यादिकस्य भानम्, अत्रापि चाभेदाग्न्यस्य भानेऽपि जात्याद्यघटितगुणभानमिति विशेष इत्यपरे।

"अशवो वा अन्ये गोअश्वेभ्य पशवो गोअश्वा अयज्ञो वा एष यदसामा अयज्ञ वा एतद्यदछन्दोगम्" इत्यादौ अश्वत्वादिशब्दो नामधेयमिति

---

१ कर्षिन्—क। २ °परत्वे—क।

सम्भवमानेऽपि पूर्वपक्ष । अजादीना पशुशब्दवाच्यत्वादेवापशुसञ्ज्ञक त्वानुपपत्त्या घ्रादीनाञ्च प्रमाणान्तरेणवापशुत्वसिद्ध सञ्ज्ञाविधान वय्यर्थात् । समासान्तगतपशुशब्दस्य पशुकार्ये लक्षणया नञा गवाश्व निभानां[1]मजादीना पशुकार्ये पयदास क्रियते । गवाश्वव्यतिरिक्ताजादि भेदेन[2] पशुकार्याप्रापणीयादि कुर्यादिति । अथवाजादीना विहितत्वेन विकल्पस्यापरिहार्यत्वाद् दूरस्थाग्नीषोमीयादिवाक्यवाक्यतासकल्पनक्लेशाप नश्च प्रतिषेध एवायमिति प्राप्ते अजादीना विहितत्वेन नियमकल्पनमनु पपन्नम् । कल्पेन नियमेन कल्पितस्य विधे पाक्षिकत्वापादनस्याशक्यत्वात् । नापि अयनिया व मापा इतिवत्प्रतिनिधित्वेन प्राप्त तन्निषेधकत्वम् पुरस्तात्प्राचीनमश्वस्योपदधाति पश्चात्प्राचानमृषभस्य इति प्रकृतविध्येक वाक्यताभङ्गापत्ते । अतो गवाश्वगतप्राशस्त्याभावस्यापशुशब्दार्थतया अजा दीना निन्दावगति । सा च नहि निन्दा यायेन गवाश्वस्तुल्यार्था अपशुशब्दस्य च पशुभिन्नघ्रादिवचनस्य स्वशक्यनिष्ठगवाश्वगतप्राशस्त्याभावरूपगुण योगादजादौ गौणत्वम् अतश्च प्रशसाभावस्य गुणत्वे प्रतियोगिविधया[3] प्रशसाया अपि प्रकारताया प्रविष्टत्वानिमित्तत्वोपपत्ति । एवमयज्ञ इ यादावप्यूह्यम् । एतच्चतुष्टय च प्रत्यक्षविरोधात् श्रुतेरयथानयन पूर्वपक्षे सिद्धान्ते च स्पष्टम् ।

प्रमङ्गाद्धमन्निङ्गमम्बायावप्युच्येते । मृष्टीरुपदधाति इत्यत्र मृष्टिपद मृष्टिनिङ्गकमन्त्रमात्रपर मृष्टमृष्टिघटितसमुदायपर वेति सशय । मृष्टिनिङ्गाश्च तिसृभिरस्तुवत ब्रह्माऽसृज्यत इत्यादय मृजिधातुयुक्ता । एकयास्तुवत प्रजागनी (?) अधीयन्त इत्याद्यास्तु तद्धीना । तत्र न तावदयमर्थवादो विध्यन्तरकवाक्यत्वविरहात् । येन गुणवृत्यापि नीयेत । किन्तु विधिरात्यातश्रुत विधेय च नोपधान इष्टकाभिर्धिनुत इति विध्ययथानुपपत्त्यव स्वरूपणेष्टकासम्बन्धित्वेन चोपधानस्य प्राप्तत्वात् । अनुपधीयमानाभिरिष्टकाभिश्चयनस्य वस्तुमशक्यत्वात् । किन्तूपधानानुवादेन मृष्टिपदाय एव विधेय । यद्यपि तद्धानामामुपधानो मन्त्र इनीष्टकासु नुक च मता इति पाणिनायस्य स्मृत्या मृष्टिनिङ्गकमन्त्रोपधेयेष्टकाना गम्यत्वे मनुषो नापविधानात् तत्सनियोगेन चकारेण यत्प्रत्ययविधानाच्च कृत्व्या उपदधाति इतिवत् मृष्ट्वा इत्यापत्त्या नात्र तदय सम्भवति तथापि केवलमृष्टिपदेनैव मृष्टिमन्त्रोपधेयेष्टकाविशेषलक्षणया तदयसिद्धि ।

---

१ भिन्नानां—ख । २ भिन्ने—ख । ३ प्रतियोगितया—ख ।

अत इष्टकाविशेषाणां मृष्टिपदार्थत्वेऽपि काम्यमिष्टकाना मृष्टिमन्त्रैरुपधानमिति विशेषानवगमादिष्टकाविधिप्राप्तेष्टकानामान्यविधिनैव निर्विशेषपरिणामान्यमिति न्यायेनेष्टकाविशेषाणामप्युपधानप्राप्तेश्च विधिरयुक्त । एवमिष्टकाविशेषाद्देशेन उपधानविधिरप्ययुक्तो विशेषानवगमात् । अत परिशेषान्मन्त्रविधानमेव युक्तम्। मृष्टिपदस्य विधायकत्वे च तत्र गौण्या वृत्त्याऽमृष्टिमन्त्रप्रतिपादकत्व विधौ गौण्यलक्षणा चायुक्तम् ।

न चैवमेकानुवाकगतमन्त्राणा मध्ये मृष्टिलिङ्गानमुक्तविधिना विनियोगेऽप्यमृष्टिलिङ्गकाना मानर्थक्यापत्तिरिति वाच्यम्, प्रमाणाभावेन तेषा चरितार्थत्वाभावेऽपि वाचस्तोमादौ सर्वयजुर्मन्त्रादीना विनियोगेन तत्र मानर्थक्यादिति प्राप्ते । उच्यते, उभयो मन्त्रयत्रानिकत्वे भावार्थन्यायेन बाल्यस्यैवाश्रयेण तत पूर्वप्रवृत्त्या विधेयत्व युक्तम् ।

न चासौ गादेव तत्प्राप्ति चयनभावनतानिर्वाह्यभावान्तरव्यापारतोपधानाच्चेऽपि तस्येष्टकासाध्यत्वमेव स्यात्, इष्टकासरकारसिद्ध्यर्थं विधिरार्थक्यात् । तत्फल तु प्रतिप्रधान गुणवत्तिरिति प्रतीष्टकमुपधानसिद्धि । अन्यथा सप्तदशेष्टका उपदधाति इष्टकाश्चिनुते इत्यत्र सप्तदशसंख्यायाश्चयनभिनकर्तृकत्वञ्च स्यात् । अर्थात्तिस्य वृत्त्याविवक्षितव्यक्तिकत्वेन विधिगर्भाङ्गत्वायोगेनाङ्गप्रधानयोरेककर्तृकत्वयुक्तिमूलकस्यैककर्तृकत्वानुपपत्ते । सम्भूरणादिव्यापारस्यान्यकर्तृकत्वेऽपि देवदत्तेन पाक कृत इति व्यवहारेणावान्तरव्यापारस्य कार्येण समसमानकर्तृकत्वनियमाभावात् । सृष्टिपदेन च सन्निधिमहकृतलिङ्गबलेन प्राप्ता एव मन्त्रा अनूद्यन्ते सृष्टिलिङ्गकमन्त्रवत्, सन्निधानावगताङ्गत्वन्यायसृष्टिमन्त्रेष्वपि बाधायोगात्सृष्टिपदमुभयपरम्। अत एव "सृष्टीरुपदधाति" इदुवनम्य 'एकयास्तुवत" इत्यारभ्य सप्तदशभिर्मन्त्रैस्तस्कार्याणामिष्टकानामुक्तिं कृत्वा 'यत्सप्तदशेष्टका उपदधाति"इत्यर्थवादेनापि सृष्टिपदस्य गौण्या सप्तदशपरत्व लभ्यते ।

न चोपक्रमन्यायसन्दिग्धविध्युद्देशेन चरमस्यायंवादानुरोधेन जघन्यवृत्त्याश्रयणान्नेष्टत्वम्, दामहारस्थेष्वप्यर्थवादेषु बहुष्वानर्थक्यगौण्यादिकल्पनापेक्षयैकस्मिन् विध्युद्देश एव तथात्वौचित्यात् । तस्मादजहत्स्वार्थवृत्त्या सृष्टिबाहुल्यसमानाधिकरणसमुदायाश्रयत्वरूपगुणयोगेन सृष्टिपद सृष्ट्यसृष्ट्युभयमन्त्रपरम्। अस्ति हि सृष्टिषु बाहुल्य सृष्ट्यसृष्टिघटितसमुदाय-

१ °नार्थक्य°-ख ।

स्यैव[1], यत्सप्तदशेष्टका इत्येकाभिधानगम्य साहित्यारयो धर्मस्तादृशसमुदायाश्रयत्वेन सृष्टिपदस्य सप्तदशसु गौणत्वमिति दिक् ।

'प्राणभृत उपदधाति' इत्यत्र प्राणभृत्पदघटितमन्त्रस्य तदघटितमन्त्रापेक्षया स्वल्पत्वेन प्राणभृदल्पत्वसमानाधिकरणसमुदायाश्रयत्वगुणयोगेन प्राणभृत्पद प्राणभृदप्राणभृन्मन्त्रपरम्। पूर्वत्र बाहुल्यस्य निमित्तत्वमत्र स्वल्पत्वस्येति विशेष । अल्पादश्च तदपेक्षया बहुत्वाभावपर तेन साम्येऽपि गौरी । 'श्याल स्वस्रोरथाग्रहीद्" इत्यत्र स्वसृपद स्वसृतत्पत्योर्गौणमिति श्रीधरोक्तेरित्यपास्तम्[2] ।

एव वेदान्तिभिरपि मानान्तरानुरोधेन तत्त्वपदयोरखण्डार्थे लक्षणाभ्युपगम्यते । यदि तु[3] प्रत्यक्षादिक्रमबधमपि श्रुतेर्यथाश्रुतार्थे एव तात्पर्य तर्हि तत्सर्वमनुपपन्न स्यात्, प्रत्यक्षमप्रमाणमित्येव वक्तव्यत्वापत्ते ।

यत्तु प्रत्यक्षत्वादे'व्यावहारिकप्रामाण्यमात्र परीक्षया सिद्ध तच्चाद्वैतश्रुत्या न बाध्यते, किन्तु तात्त्विकप्रमाणत्वमेव बाध्यते, तच्च न परीक्षया सिद्धम्, अतो न विरोध । क्रम एवेत्यादेस्तु मुख्यार्थत्वे प्रत्यक्षस्य व्यावहारिक प्रामाण्य व्याहन्येत, अनन्तदनुरोधात्तत्र श्रुतेरमुख्यार्थत्वमिति, तदसत्, व्यावहारिकप्रामाण्ये तत्रोत्तरन्यायच्छेदन्यायसाम्यमग्रे वक्ष्यमाणत्वात् । किञ्च यथाद्वैतश्रुतिविरोधेन प्रत्यक्षादेर्व्यावहारिकमेव प्रामाण्यमभ्युपेत्य तात्त्विक[4] तदपह्नुपे तथा घूम एवेत्यादेरागमस्याविरोधेन तत्तत्प्रत्यक्षस्य व्यावहारिकमपि प्रामाण्यमपलप्यताम् । तात्त्विकत्व परित्यज्य प्रामाण्यनिष्ठव्यावहारिकत्वरक्षाया निबन्धत्वे निबन्धनविरहात् । तात्त्विकप्रमाणभूताद्वैतश्रुत्यपेक्षया तद्विरुद्धस्य व्यावहारिकप्रामाण्यवत व्यावहारिकप्रमाणभूतयजमानप्रस्तरादिश्रुतिविरुद्धप्रत्यक्षस्य तदपेक्षयापकृष्टप्रामाण्यस्याप्यवर्जनीयत्वात् । यत्र तु व्यावहारिकप्रामाण्यवतोरुक्तागमप्रत्यक्षयोर्विरोधस्य प्रबलबलवत्त्व त्वयाभ्युपगत, तत्र को नाम पक्षपात, स च प्रत्यक्षापेक्षयाद्वैतागमस्य बलवत्त्वे तात्त्विकप्रामाण्यवत्त्वादिति चेत्, तत्प्रामाण्यस्यैव तात्त्विकत्व नवदोषशपथातिरिक्तस्य बीजस्याभावात् । तत्प्रामाण्यतात्त्विकत्वे सिद्धे प्रत्यक्षस्य तद्विरोधादप्रामाण्यम्, तत्सिद्धौ च तत्प्रामाण्यस्य तात्त्विकत्वमित्यादिदोषावतारात्च्च ।

---

१ समुदायश्च—ग । २ रित्यस्तम्—ङ । ३ यत्—ग । ४ प्रत्यक्षादे—ग ।
५ 'तात्त्विक' नास्ति—ग ।

यदप्युक्तम्—षड्विधलिङ्गैर्गतिसामान्येन वा अखण्ड एवावयार्थमाणस्य तात्पर्यान्यानुपपत्ते जीवेशगतसर्वज्ञत्वकिञ्चिज्ज्ञत्वादीनामैक्यान्वयानुपपत्तेश्च तात्पर्यविषयीभूताखण्डप्रतीतिनिर्वाहाय तत्त्वपदयोर्लक्षणा। तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणाया सर्वसम्मतत्वात्।

न चैवमुख्यार्थत्वम्, तद्धि प्रतातार्थपरित्यागेनान्यार्थत्व वा शक्यार्थपरत्व वा[1] नाद्य, नानाधिकरण्येन प्रतीतस्यैकस्य रक्षणात्। नान्त्य, जहदजहत्स्वार्थलक्षणाया शक्यैकदेशत्यागेऽपि साम्य देवदत्तत्वादौ एकशक्यकदेशेऽप्यैवान्वयागमात् विरुद्धांशबाधेन विशेष्यमात्रान्वयनियमेन लक्षणा इति व्यपदेशात्। तथा चाह वाचस्पतिमिश्रैः "प्रत्यगादिवाक्यमन्यशेषत्वादमुख्यार्थमद्वैतवाक्य तेनन्यशेषत्वान्मुख्यार्थमेव। उक्त हि शारीरभाष्ये न त्रिषौ पर शब्दार्थ इति" इति तदप्यसत्, भिन्नाभ्याधर्मभ्यामेकधर्मिबोधनस्यैव सामानाधिकरण्यशब्दमुख्यार्थत्वात। नान्य च तद्रीत्या परित्यागात्। जहदित्यादिकमपि नावद्यत्, शक्यैकदेशत्याग एव बीजत्वे तार्किकैरप्युपगन्तव्यत्वात्। विशेष्यान्वयरक्षणमात्रस्यानुपयुक्तत्वात्, भोजनमित्यादौ च पूर्वापरीभावावच्छिन्नैक्यान्वयानर्हतया परैरपि प्रत्यक्षादिविरोधेनैव विशेष्यमात्रपरत्वकल्पनात्। एवमखण्डार्थनान्यर्थेत्यादिकमप्ययुक्तम्, अखण्डार्थे तात्पर्यस्यैव श्रुतीनुमतत्वात्। पञ्चविधलिङ्गेत्यत्र योक्तत्वोक्तत्वात् 'तत्त्वमसि' इत्यादिश्रुतिविरुद्धत्वाच्च। एवच्च सत्यखण्डार्थनान्यर्थग्रहे तत्त्वमस्योत्थनापि एकदेशत्यागेनाखण्डार्थपरत्व, तद्ग्रहे[2] च तद्विरोधाभावेनाखण्डार्थनान्यर्थग्रह इत्यन्योन्याश्रयात्। अहो खिन्नम्—मानान्तरानुरोधेनैव तत्त्वमस्यादौ विशेष्यमात्रपरता कल्पयित्वान्यत्र मानान्तर नापेक्षत इति व्यवस्थापन्नम्। एतेन न्यायाधीनस्य श्रुतितात्पर्यनिर्णयस्य दर्बलमानान्तराविरोधनिरपेक्षत्वादित्यपि परास्तम्। मानान्तरानादरे न्यायाधीनवोक्तिविरोधात्[3]। मानान्तरदौर्बल्यस्य च पूर्वमसिद्धत्वात्। एतेन श्रुतितात्पर्यनिर्णायकोपक्रमादीनामपि प्राबल्यप्रयोजक निरुक्तकात्स्न्यादिरप्यस्तीत्यपि निरस्तम्। विस्तरस्तु पुरस्तात्। एवच्च निर्गलितान्यार्थानुरोधेन तत्त्वमादिपदानामखण्डलक्षणाभ्युपगमात्, सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरोधगयो सोमेन यजेतेत्यादौ सोमयागाद्रोश्चाभेदे निर्गलितश्रुतितात्पर्यनिर्णयेन तदङ्गे प्रत्यक्षाद्यविरोधस्यापेक्षणीयत्वात्, तात्पर्यविषये हि श्रुति प्रबलेत्याद्युक्तमित्यपि निरस्तम्। मानान्तरविरोधस्य साम्येऽप्यद्वैतश्रुतितात्पर्यम्, न तु सोम-

१ अखण्डार्थत्व तत्त्वे—ख। २ ग्राहात्—क।

यागाद्योरभेद इति वैषम्ये बीजाभावात्। उपक्रमादिबलादिति चेन्न, तत्रापि मानान्तरविरोधानादरे हेत्वभावेन त्वदभिमतार्थविषयकत्वस्य दुर्बलत्वात्। उपक्रमादिश्रुतय एव ह्येकमेवाद्वितीयमित्याद्या अद्वैतश्रुतय, तथैव परग्रन्थदर्शनात्, अन्यथास्यानुपपत्तेश्च। ततश्च तात्पर्यग्राहकत्व ग्राह्यतात्पर्यवत्त्व च तासामेव कथ स्यात्, तदेतदापन्नमसिद्धमसिद्धेति। तावन्मात्रञ्च सोमयागाद्यभेदान्वयेऽप्यस्त्येव। उपसंहाराद्याधिक्यादिति चेन्न, शतमप्यन्धाना न पश्यतीति न्यायात्। [1]अत एवोपक्रमोपसंहारादेरन्योन्यतात्पर्यनिर्णायकत्वमप्यनुपपन्नम्, प्रत्यक्षादिविरोधेनैकस्यापि तादृशार्थनिर्णयविरहात्[1] यस्माद्वाक्यादापाततो योऽर्थ प्रतीयते तस्य तत्रैव तात्पर्यमित्येव हि भवदुक्तार्थपर्यवसानम्। तच्च केवलोपक्रमादावप्यस्ति तात्पर्यस्याऽद्वैतविषयकत्वेन तच्छ्रुतीनाप्राबल्यमित्येतदन्यस्य प्राबल्यबीजस्य त्वया मूपन्यासात्। इत्यान्ता तावत्।

तस्मान्मानान्तरविरोधे शब्दस्य तदविरुद्धार्थबलेन लक्षणादिनाप्यावश्यकम्। अत एव सोमेन यजेत' इत्यत्र सामानाधिकरण्येनाऽन्वये प्रत्यक्षविरोधान्मत्वर्थलक्षणाश्रीयते। एवम् 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे 'तद्विजिज्ञासस्व इति श्रुतौ च ज्ञानेच्छाया कृत्यसाधकत्वप्राट्कमानानुरोधेन जिज्ञासापद विचारलक्षकम्। अतश्च प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थमिति वाचस्पत्योक्तिरयुक्ता। तथाहि—अमुख्यार्थकत्व लाक्षणिकार्थगर्भमन्यवाक्यार्थतात्पर्यक वा। नाद्य, लक्षणायामन्यशेषत्वस्याप्रयोजकत्वात् प्राथमिकबाध तन्न प्रत्यक्षविरोधस्यैव लक्षणाकत्वकत्वात्। "वायुर्वै क्षेपिष्ठा दवता इत्यादौ भूतार्थवादे व्यभिचाराच्च। नान्त्य, हेतो साध्याविशेषात् अन्यार्थतात्पर्यकत्वस्यैवान्यशेषत्वात्। एतेन स्वकीयमुख्यतात्पर्यविषयाभूतार्थप्रतिपादकत्व मुख्यार्थत्वम्। अर्थवादप्रतिपाद्य प्राशस्त्यद्योतद्वारीभूता वाक्यार्थोऽवान्तरस्यैव तात्पर्यस्य विषयीभूता न तु मुख्यस्य। प्राशस्त्य मुख्यतात्पर्यविषयाऽपि न वाक्यार्थ। वाचस्पतिमते तु मुख्येति न देय, प्राशस्त्यद्योतद्वारीभूत वाक्यार्थे तात्पर्यानङ्गीकारात्। अन्यार्थतात्पर्यकत्व त्वमुख्यार्थत्व, न तु लाक्षणिकत्वमात्र, तथाचाद्वैतागमस्य तात्पर्यविषयीभूतार्थवादनिर्वाहाय लक्षणाश्रयणेऽपि मुख्यार्थत्वमव्याहतम्।

न चैवमवान्तरवाक्यार्थभूतार्थवादेन गम्यमान देवताविग्रहादौ तस्य प्रामाण्य न स्यादिति वाच्यम्, यद्वाक्य यदर्थविषयकतात्पर्याभाववत्तन न

[1-1] अयमश 'त्वयामूपन्यासात्' इत्यनन्तरम् "इत्यास्ताम्', इत्यत पूर्वं दर्शन—ख।

प्रमाणमिति नियमाभावात्। अन्यथा विशिष्टविधेर्विशिष्टपरत्व न स्यात्। नागृहीतविशेषणत्वन्यायेन विशयगोऽपि तन्त्रामाण्यस्य वाक्यभेदापत्त्या विशेषणविधिकल्पनद्वारा विशेषणतात्पर्यमित्यस्य च विशेषणविधिना विशेषणे प्रमित विशिष्टविधिविशिष्टविधौ च सति तदन्यथानुपपत्त्या विशेषणविधिकल्पनमित्यन्योन्याश्रयग्रस्तत्वेनानुद्धासाद्। एतस्यैव 'रेवतीयु वारवन्तीयमग्निष्टोमस्य साम कृत्वा पशुकामो ह्युत्तन यजेत" इत्यादौ रेवत्यधिकरणन्यायवन्तीस्वरूपबोधयन्मानगम्यावशेषगु तात्पर्यविषयोऽपि विशिष्टविधे प्रामाण्यापपत्त। सामस्य लौकिकमानगम्यत्वेन सामप्रमितविशिष्टविधेनापन्नत्वेन प्रागुक्तन्यायाश्रयविरह मत्वयलक्षणायामपि न्यायापरित्यागात्तात्पर्यार्थत्वम्। यद्यपि पदमानस्य स्वार्थपरित्यागेऽपि तात्पर्यविषयीभूतवाक्यार्थबोधकत्वात्तात्पर्यार्थत्वम्, तथापि पदस्यामुख्यायत्वाद्वावयस्यापि तदिति कुचोद्यपरिहारायेदमुक्तम्। असुख्यायपदघटितत्वेन वाक्यस्यामुख्यार्थत्व पदमानस्य समर्गलाक्षणिकत्व वावयमाय मनान्तरेऽपि मोऽयमित्याद्यखण्डाथवाक्यमसुख्यार्थं स्यादत शक्याघटितार्थकपदघटितत्वमवामुख्यान्वि वाक्यस्य परेणापि वाच्यमिति तदप्यपि न दोष इत्यपि निरस्तम्। मुख्यार्थत्वादरवविधत्वेऽपि मानान्तरविरुद्धाय पद लक्षणाया अनिवारितत्वात् लक्षणान्यशेषत्वाभावात् पदवाक्यमारमुख्यार्थत्वव्यवहारात्। मुख्यतात्पर्यविषयीभूतायवाधकत्वस्य सत्येऽप्यर्द्धतन्नह्यव मुख्यतात्पर्यविषय इत्यस्य प्रथम दुग्रहत्वात्। यद्यपि इत्यादिकमपि सदाय भट्टमते ससर्गान्यामुख्यार्थपदघटितस्यवामुख्यार्थत्वस्य सम्भवात्। अशक्यमात्रतात्पर्यके पदघटितत्वस्य तथात्वाद्वा। अन्वय लक्षणायामपि स्वशक्यप्रतियोगिक एव तत्र तात्पर्यात्, अन्यपदार्थतात्पर्यकपदघटितत्वस्य चातथात्वात्, ससर्गस्य च पदद्वयार्थप्रतियोगिकत्वेनान्यपदार्थत्वाभावात्, समर्गादिपदवाच्यत्वस्य चाविच्छिकरत्वात्। यस्मिन् समर्गे प्रतियोग्यविषयकज्ञानाविषयत्व तस्य विवक्षितत्वात्। शक्याद्यघटितार्थकपदघटितत्व तु न तथा। पद हि तद्वाक्यघटक[1] यत्किञ्चित् समर्गं वा? नाद्य, प्रस्तरादिवाक्यमसुख्यार्थमित्यस्यानुपपत्ते, गौणत्वेऽपि शक्यघटितार्थकत्वात्। नान्त्य, असिद्धे। तद्धन महार्णवे 'न समर्गलाक्षणिकपदगर्भं वाक्यमिति गङ्गाया द्विरेफ इत्यादावपि विभक्तेरव मुख्यार्थत्वात्।"

किञ्च 'न विशो पग शन्दार्थं' इति शबरस्वामिवाक्यस्य मुख्यतात्पर्य-

१. °घटित-व।

विषयो वाक्यार्थो नान्यवाक्यार्थविशेष इति भवदुक्तार्थोऽनुपयुक्त[1]। अनाशङ्कितनिषेधत्वापत्ते, सर्वग्रन्थविरोधाच्च। तथाहि—

वाच्यस्यार्थस्य वाक्यार्थसम्बन्धानुपपत्तित ।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥

इति मणिकृदुदाहृतकारिकाव्याख्याया "वाक्यार्थेऽन्वयानुपपत्ति-विधेयार्थान्वयानुपपत्ति, एतेन 'न विधौ पर शब्दार्थ इति सूचितम्' इति शब्दालोकः। तत्खण्डकोद्धारे व्याख्यातम्—' विधेयान्वयानुरोधेनान्यत्र लक्षणा-स्वीकारात्, अन्यत्र लक्षणोपपत्तेर्नविधेयपदे लक्षणेत्यर्थ । एतेन 'श्येनेन यजेत' इत्यादौ लिङि घटो नील' इत्यादौ च पदे विधायके लक्षणा न विरुद्धा" इति। एव मीमांसाचार्त्तिकेऽपि "वाक्यशेषो हि भवन् पारतन्त्र्याद् गौण्यापि प्रति-पद्यत" इत्युक्तम् ' अर्थस्तु विधिविशेषाद्" इति सूत्रे। यत्तु "प्रजापतिर्वरुणाया-श्वमनयत् स स्वा देवतामार्च्छत् स पर्यदीव्यत स एत वारुण चतुष्कपाल-मपश्यत निरवपत्ततो वरुणपाशादमुच्यत वरुणो वा एन गृह्णाति योऽश्व प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाश्चतुष्कपालान्नि-र्वपेत्" इति श्रूयते। अनयदत्तवान् देवता वरुणरूपा जलोदराख्यरोगरूपेण परिणतामार्च्छत् प्राप्तवान्। वरुणपाशान् जलोदरान् गृह्णाति जलोदर-रूपेण प्राप्नोति, इत्यर्थ । इयमिष्टिर्दातु प्रतिग्रहीतुर्वेति सशय, यद्यप्युप-क्रमानुरोधेन दातुरेव सम्भवति तथापि मैत्रायणीयशाखायां "अर्थैषोऽश्व प्रति-गृह्यते स वा उभयतोदन् प्रतिगृह्णतो निर्बिभस्त्यस्येन्द्रियञ्च पशूश्च वरुणो वाश्वो वरुणदेवत्यो योऽश्व प्रतिगृह्णाति तदश्वहविषा यष्टव्य निर्वरुणत्वाय, चतुष्कपाला भवन्ति चतुष्पाद्वाश्व कपालैरेवैनमाप्नोति यावन्तोऽश्वा-स्तावन्त पुराडाशा भवन्ति। सर्वत एवैन मुञ्चन्ति" इति वाक्ये प्रतिग्रहोप-क्रमाया एवंतदिष्टेराम्नानात्तदनुरोधेन पूर्वोक्तशाखान्तरीयवाक्येऽपि अनय-दित्यादिपदे प्रतिग्रहे लक्षणाया प्रतिगृहातुरेवेयम्। एवञ्च यावन्तोऽश्वान् प्रति-गृह्णीयादिति विधौ यथाश्रुतार्थ सघटिष्यत इति प्राप्ते, उच्यते, मैत्रायणीय-वाक्ये तथात्वेऽपि उक्तवाक्ये प्रवलोपक्रमे लक्षणानौचित्यात्। एतद्वा-क्यबलेन दातुरिष्टिरित्यत्र बाधवाभाव । मैत्रायणोक्तदूरस्थकर्मानुवादेना-श्वदानरूपादेश्यसम्बन्धबोधनानुपपत्तेरेतद्वाक्यस्य कर्मान्तरविधायकत्व-सम्भवात्। नामादीनामुपस्थापकानामभावेन शाखान्तराधिकरणन्याया-

१ न युज्यते—ख।

सम्भवात्। एतद्वाक्यानुरोधेन मैत्रायणीयवाक्योपक्रमस्थापि[1] प्रयोजककर्तृ-परत्वेन व्याख्यानात् तत्कर्मण एवात्रापि विधिसम्भवात्। तदुपक्रमस्यापि दातुरिष्टिपरत्वाच्च। तस्मादुपक्रमानुरोधेन विधिस्थे प्रतिगृह्णतो प्रतिग्राहक-प्रयोजकव्यापारे दाने लक्षणेति तृतीयचतुर्थे चिन्तितम्। तथा चार्थवादानु-रोधेन विधौ न लक्षणेति यदुक्तार्थोऽमगत एवेति, तदसत्, निरनुयोज्यानु-योगत्वात्। न ह्यर्थवादानुरोधेन विधौ न लक्षणेति नियमो मयोक्त। अन्यत्र लक्षणयोपपत्ताविति स्पष्टमेव मिश्रव्याख्यातृभिरुक्तत्वात्। अत्र च नार्थवादे लक्षणयोपपत्तिरप्रकरणाधिकरणन्यायेन तदसम्भवात्। अत एव 'मृत्प्रिण्प-दवाति" इत्यत्रार्थवादे बहुकृत्प्रिण्पनापत्तया विध्युद्देशान्तर्गतेऽपि सृप्रिशब्दे गौणी स्वीकृता। एव 'श्येनेन यजेत" इत्यत्रापि वक्तव्ये।

यत्तु अत्रार्थवादानुसारेण विधौ न लक्षणा किन्तूपक्रमबलादिति न युक्तम्, अर्थवादानुसारेण विधौ यत्र लक्षणाप्रसक्तिरेव तया तस्या निषेध्यत्वात्तत्र तच्चार्थवादस्योपक्रमाद्यनुरोधेनैव गम्भवात्, अत्रत्रत्र निषेधोऽगत्या एव तदभावे तन्निषेधस्तून्मत्तप्रलाप इति, तदसत्, उपसंहार-स्यार्थवादानुरोधेनाविरोधेनापि विधौ लक्षणाया प्रसक्तिसम्भवात्, श्येनपदादौ तथाभ्युपगमाच्च। फलोपधानप्रसक्तेर्निषेधानुपयोगित्वादनन्यशे[2]षवाक्या-र्थस्य केनचिदनाशङ्कितरूपत्वेन तत्र एवाप्रसक्तनिषेध इत्युक्तत्वाच्च[3]। [4]तस्माद्यत्किञ्चिदेतत्[4], भ्रान्तिमत्पुरुषाभिप्रायेण तदर्थवत्त्वस्य च वैयर्थ्य एव पर्यवसानात्। एतेन—

प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्।
शीघ्रमन्यरगामित्वात्तथैव श्रुतिलिङ्गयो॥

श्रुतेर्लिङ्गापेक्षयैव प्रत्यक्षस्य लिङ्गा[5]न्तरापेक्षया शीघ्रगामित्वात्प्राब-ल्यमित्याशङ्क्य परास्तिनस्य मन्थरगामिनोऽपि प्राबल्यादित्युक्तमप्यपास्तम्, परास्तित्वन्त्वैवानिष्टे। युक्त्यन्तरेण बाधकोपमर्दो हि परास्तः, न तु स्वेनैव। अन्यथा परास्तानुद्भावयारव्यवस्थितत्वापत्तेः, प्रत्यक्षस्यापि श्रुत्यपबा-दापत्तेश्च। अवच्छेदकावच्छेदेन बाधाभावस्योभयत्राप्यभावात्, प्रत्यक्षत्व-सामानाधिकरण्यमात्रेणैव वेदशाब्दत्वसामानाधिकरण्यमात्रेणापि प्रमाणान्त-रानुरोधस्य कल्पितत्वात्। अत एव 'नहि बाधितमर्थमागमोऽपि बोधयति'इति

१. वा क्योपन्यासस्या०—ख। २—२ नास्ति—क। ३—३ नास्ति—ख।
४ प्रमाणं—क।

अभियुक्तानामुद्घोष सङ्गच्छते । एतेन "यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया बाधनिश्चयस्तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वनिश्चय" इति विवरणोक्तेर्गृहीतप्रामाण्यकशब्दतदुपजीव्यनुमानातिरिक्तयुक्तिमात्रविषयकत्वकल्पनेन प्रकृते वैषम्यकथनमप्यपास्तम् । प्रकृतशब्दस्य गृहीतप्रामाण्यकत्व एव विवादेन विशेषणासिद्धेरुक्तत्वात् । किञ्च लिङ्गस्य श्रुत्यपेक्षयापि दुर्बलस्य प्रत्यक्षापेक्षया सुतरामेव दौर्बल्यम् । तथा हि 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति तृतीये जैमिनिसूत्रम् । श्रुत्यादीनि षट् प्रमाणान्यङ्गत्वबोधकानि, तेषां परस्परमविरोधे तावन्न सन्देह । विरोधे तु तेषां समवाये एकत्रोपनिपाते सूत्रपाठक्रमेण परस्य पूर्वविरोधे दौर्बल्यम् । तन्न हेतुरर्थविप्रकर्षादिति पूर्वसापेक्षस्यैव परस्यार्थबोधकत्वात्, तच्चाग्र स्फुटीभविष्यति । उक्तञ्च—

श्रुतिर्द्वितीया क्षमता च लिङ्ग वाक्य पदान्यव तु सङ्गतानि ।
सा प्रक्रिया या क्रियमित्यपेक्षा स्थान क्रमा योगबल समाख्या ॥

इति । तत्र श्रुतेर्बाधकत्वमेव समाख्यायास्तु बाध्यत्वमेव । मध्यानान्त्वपेक्षाभेदादुभयमपि । तदुक्तम्—

बाधिकैव श्रुतिर्नित्य समाख्या बाध्यते सदा ।
मध्यमाना तु बाध्यत्व बाधकत्व व्यपेक्षया ॥ इति ।

श्रुति पदान्तरनिरपेक्ष शब्द । तदुक्तम्—

अभिघातु पदञ्यस्मिन्निरपेक्षा रव श्रुति ।' इति ।

रव शब्द । न च निरपेक्षत्वमसिद्ध केवलद्वितीयादिना बाधानुदयादिति वाच्यम्, प्रकृतस्याङ्गघातजन्यफलाश्रयत्वरूपस्यार्थान्वयबोधे पदार्थान्तरानपेक्षस्य विवक्षितत्वात् । तावतैव व्रीहीणामवघातयोग्यत्वसिद्धे । ततश्चाङ्गत्वघटकीभूतपराङ्गेश्यकत्वकृतिकारकत्वयोरन्यतरस्य प्राधान्येन बोधक शब्द श्रुति । अस्याय —पराङ्गेशप्रवृत्तकृतिकारकत्वेन विध्यन्वयित्व ह्यङ्गत्वम् । स्वर्गाङ्गेशप्रवृत्तपुरोडाशयागानुकूलकृतौ करणत्वेन यागस्य विध्यन्वय इति याग स्वर्गाङ्ग । प्रयाजादीनामपि प्रकरणबलादपूर्वहेतुयागाङ्गेशप्रवृत्तपुरोडाशकृतौ प्रयाजानुकूलाया यागानुकूलाया वा कारकत्वेन विधानाङ्गाश्रयत्व, नतु स्वर्गाङ्गत्वम्, तदुङ्गेन दर्शादीनामव विधानात्प्रयाजादीना

१ पदान्तर-ख ।

तदभावात्। द्रव्यस्य क्रियानिर्वर्तकत्वेनारुण्यादिगुणस्य द्रव्यपरिच्छेदकत्वेन निमोज्यस्य कर्तृत्वेन कालदेशयोरधिकरणत्वेन यागानुकूलकृतिकारकत्वविध्यन्वयायो सत्त्वात्। एवस्थितेऽङ्गत्वस्य द्वय घटकम्—परोद्देश्यत्व कृतिकारकत्वञ्च। तदन्यतरस्य प्राधान्येन वाचको द्वितीयातृतीयादिकारकविभक्तिरूप शब्द श्रुति। "व्रीहीन् प्रोक्षति" इत्यत्रेप्सितत्वार्थया द्वितीयया व्रीहीणामुद्देश्यत्वलाभात् प्रोक्षणादेस्तदङ्गत्वधी। तथाहि—व्रीहीन्प्रोक्षतीत्यादौ व्रीह्यादिसंस्कारार्थत्वेन प्रोक्षणादेर्विधानाद् गुणकर्मत्वम्, उत व्रीह्यादिसाधनकर्म्य स्वनन्वाहृष्टार्थकस्य प्रधानकर्मत्वमिति संशय। तत्र व्रीह्यादेः प्रोक्षणाद्यजन्यत्वेन भाव्यत्वायोगादवघातवद् दृष्टोपकारकत्वाभावेन विकार्यकर्मत्वव्याप्यत्वभावात्। व्रीह्यादिविशिष्टप्रोक्षणादिकमेव स्वानन्त्येण[1] विधीयते। क्रतूपकारश्च तत्फल प्रयाजादिवत्।

न च द्वितीयया व्रीह्यादीना प्राधान्यावगमात्, अर्थात् प्रोक्षणादीना तदङ्गत्वावगमाद्, दृष्टोपकारत्वावेन द्रव्यनिष्पत्तिसंस्कारस्यातिशयकल्पनाच्च गुणकर्मत्वमेवेति वाच्यम्, मानाभावात्। द्वितीयाया प्राधान्यवाचित्व प्रयोगाद्वानुशासनाद्वा प्रयोजनाद्वा? नाद्य, "बल्वजान् शिखण्डकान् कृत्वा सक्तून् जुहोति' इत्यादौ करणत्व एव द्वितीयाप्रयोगदर्शनात्। करोतिद्विकर्मकत्वाभावेन एककर्मविरुद्धे द्वितीयकर्मान्वयानुपपत्ते। जुहोतेश्च देवतोद्देशप्रक्षेपद्रव्यत्यागसमुदायशक्तत्या तत्समुदाये सक्तूना कर्मत्वायोगात्। न च तदेकदेश प्रत्येव कर्मत्वम्, ईप्सितत्वाभावात्, "प्रयाजशेषेण हविष्यभिघारयति[2]" इत्यत्र विनापि द्वितीया प्रयाजशेषस्य प्राधान्यदर्शनेन व्यतिरेकव्यभिचाराच्च। न द्वितीय, उक्तप्रयोग[3]विरोधेनानुशासनस्य तदतात्पर्यकत्वात्। नान्त्य, "पुरोडाशकपालेन तुषानुपवपति" इत्यादौ पुरोडाशकपालादीना सप्रयोजनत्वेऽपि तुषोपवापसंस्कारत्वानङ्गीकाराद्। अत उक्तरीत्या प्रधानकर्मवेदमिति प्राप्ते उच्यते, गुणकर्मवेदम्, द्वितीयाया प्राधान्यवाचित्वात्। न च तत्र मानाभाव, कर्मणि द्वितीयेति सूत्रस्यैव मानत्वात्। न च तस्य निर्मूलत्व घट करोतीत्यादिप्रयोगस्यैव मूलत्वात्। न चात्रापि धात्वर्थविषयतासम्बन्धेन कृतिकरणत्वात्तदेव द्वितीयार्थं, कर्मत्वञ्चेति सर्वानुभवसिद्धत्वात्। अतश्च शास्त्रान्तरेण विनियुक्तानां व्रीहीणा व्रीहीन्प्रोक्षतीति द्वितीयया जन्यत्वावगमात् संस्कारविशिष्टत्वेनैव जन्यत्व कल्प्यत इति द्वितीयप्रयत्ने चिन्तितम्। इत्यास्तामप्रासङ्गिकम्।

---

१ प्राधान्यन—क। २ क्षारयति—ख। ३ °प्रत्यय°—ख।

अन्यथानुपपत्तिविनाभावनियमलक्षणं सामर्थ्यं लिङ्गम्। तदभावाद्धि घस्मरया पुरोडाशभक्षणक्रियायाम्यं एकवाचकपदकल्पनानङ्गीकृत्य पुरोडाशनिष्ठयाग्यत्वं लिङ्गमित्यर्थः। यथा स्रुवेणोपघ्नतीत्यत्र द्रवमित्युद्देश्यवाचिपदकल्पनानङ्गीकृत्य स्रुवनिष्ठं याग्यत्वम् द्रवद्रव्यावदानस्यैव स्रुवसाध्यत्वात्। एवं कृप्तयोरपि स्वप्रतिपाद्यार्थनिष्ठमुद्देश्यप्रतिपादकपदकल्पनानङ्गीकृत्य याग्यत्वं लिङ्गमवेत्यर्थः।

तर्ह्यदनदं कथमिति चेत् सत्यम् तत्तत्पदरूपशब्दनिकल्पनद्वारैव लिङ्गस्य कृप्तकल्प्यपदार्थया शब्दप्रतिपत्त्वबाधकत्वात्। उदाहरणम्- निवेशनं सङ्गमनं वसूनामित्यद्वयं गार्हपत्यमुपतिष्ठत इति भाष्यकारः। नव्यास्तु कदाचनस्तोमशस्त्रमित्यद्वयं गार्हपत्यमुपतिष्ठत इत्यग्नौ श्रुतमग्न्यादानाङ्गम्—

निवेशनं सङ्गमनं वसूनां विश्वाभिमं पाभिचष्टे शचीभिः।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम्॥

इत्यत्र नक्षत्रेष्ट्यामायवादिद्रव्यवापमानापमत्वानुपपत्तिबलेन पाकक्रियाम्नायमूलत्वं वसुप्राप्तिवाक्यादपि तथाभिधानाच्चाग्निपरत्वानुमानादिति वाच्यम्।

अत एव द्रव्यापायविवरणानौ कदाचनस्तोमवादाहृतम्। एवं प्रत्यक्षानुमानवाक्यसिद्धिप्रकरणे अद्वैतसिद्धिकृतोरप्ययमेवाशयः। तत्र गार्हपत्यमिति विधिगतद्वितीयाश्रुत्या उपस्थानं प्रति गार्हपत्यस्य प्राधान्यं तृतीयाश्रुत्या च तदद्वारा करणत्वं बाध्यत इति श्रौतार्थे विनियोगः। मन्त्रगतादिदशब्दात् स्तुत्या इदम्त्वरूपमानयागादिद्रव्यनिष्ठमुद्देश्यनिरूपितं प्राधान्यस्य मन्त्रनिष्ठकरणत्वस्य च कृप्तविलम्बनवगमात्मकस्य द्रव्यापेक्ष्या नाङ्गत्वं विना चन्द्रप्रकाशवाक्यानुपपत्तिपदयाचनयैव तन्मन्त्रद्रव्यापेक्ष्यानाङ्गत्वकल्पनमिति वदन्ति।

न च द्रव्यापेक्षया प्रयाजादीनामङ्गत्वमश्रुत्या गम्यत इति वाच्यम् निरपेक्षम् न चैवं वाक्यमेव मिथ्येति। तत्र श्रुतिमात्रगम्यस्यैवाङ्गत्वस्य विरोधविरहाद् गार्हपत्यनिष्ठापि वनिरूपितोद्देश्यनिरूपकत्वस्य च विलम्बविरुद्धस्य वाक्यगम्यादिलम्बवाक्ययोरेव विरोधात् न तु श्रुतिविलम्बयोरिति वाच्यम्, श्रुत्यनादरे वाक्यस्याप्यविरोधात्। गार्हपत्यद्वितीयाशब्दादिलम्बस्यान्यथानुपपत्तिरूपाया विरोधाभावात्। अत श्रुतिवाक्यमूलकत्वाद्यक्त श्रुतिविरोध।

न चायं विरोध श्रुतेरेव कथं व्यवह्रियते उभयीयत्वादिति वाच्यम्, प्रमेयस्य शेषशेषिभावस्य श्रुत्यैवोक्ते । श्रुत्युक्तयोस्तु शेषशेषित्वयो परस्परापेक्षित प्रत्यिोगिन एव वाक्येन समर्प्यत इति प्रधानेनैव व्यपदेशौचित्यात् । किञ्च लिङ्गनिर्ग्राह्यकतानिरूपितबाध्यताश्रालित्वनव तद्विरोधकप्रयोजक यथा 'म्यान ते सदन कृणोमि' इत्यत्र वक्ष्यमाणे उत्तरार्धैकवाक्यतारहितस्यापि पूर्वार्धस्यार्थप्रतिपादिकतया तन वाक्यस्य लिङ्गविरोध । अत्र तु लिङ्गस्य बलवत्त्वे वाक्यबाधोऽनुपपन्न । श्रुतित पृथगव वाक्यबाधाभ्युपगमे पदमात्रस्याप्रमाणतया गार्हपत्यैन्द्रीपदयोरर्थानवबोधकत्वादिति श्रुतेरेवान्न बाध स्यादत श्रुतिलिङ्गयोरेवात्र विरोध । ननैकन श्रुत्या गार्हपदार्थत्वम्, अपरन तु सामान्यार्थपर्यालोचनया इन्द्रार्थत्वमित्युभयोस्तुल्य एव विनियोगकाल इति तुल्यबलत्वाद्विकल्पेन द्वयोरुपन्यासम्।

यद्वा उभयत्रापि प्रमाणद्वयेन मन्त्रस्य समुच्चय, प्रधानभूतोपन्यासानुरोधेन तदङ्गमन्त्रावृत्तेर्न्याय्यत्वात्। कथञ्चिच्छ्रुतेर्बलवत्त्वेऽपि समुच्चयेनोपपत्तौ विरोधाभावान्न बाध्यबाधकभाव । अथवा शब्दप्रवृत्तेर्वस्तुशक्त्यनुसारित्वात् श्रुत्यपेक्षया लिङ्गस्यैव बलवत्त्वमिति प्राप्तेऽभिधीयते। "इदि" परमैश्वर्ये इति धात्वर्थानुसारेण गौणवृत्त्या सामर्थ्यस्य च वह्नावपि सत्त्वात् न तावल्लिङ्गस्य बलवत्त्वम्, नापि तुल्यबलत्वम्, यावद्धि मन्त्रतो मन्त्रार्थं प्रतीत्य तत सामर्थ्यमुपगम्य तदाकाङ्क्षावशादनेन मन्त्रेणेन्द्र उपस्थेय इति श्रुति कल्प्यते, तावत्प्रत्यक्षश्रुत्या मन्त्रस्य गार्हपत्याङ्गत्वे बोधिते मन्त्राकाङ्क्षोपशान्ति, आकाङ्क्षामूलकश्रुतिकल्पनानवकाशाद्, अत शीघ्रप्रवृत्तश्रुत्या मन्त्रप्रवर्तिनो लिङ्गस्य बाध एव ।

यत्तु विरोधाभावान्न बाध इत्युक्तम्, तत्र मन्त्राकाङ्क्षानिवर्तिकायाश्रुतेराकाङ्क्षामूलकप्रमाप्येन लिङ्गेन विरोधावश्यकत्वादिति । ततोऽनेकपदसामर्थ्यं वाक्य दुर्बल यथा—

"म्यान ते सदन कृणोमि घृतस्य धारया सुपेव कल्पयामि ।
तस्मिन् मादामृते प्रतितिष्ठ व्रीहीणा मेध सुमत्स्यमान ॥"

इति मन्त्र सर्वोऽपि सदनकरण पुरोडाशप्रतिष्ठापने च प्रयोक्तव्य, उत स्वेच्छया सकला विभक्तो वा। अथवा कल्पयामीत्यत्र सदनकरणे तस्मिंस्तित्यादि प्रतिष्ठापने प्रयोक्तव्य इति मशय । तत्र वाक्यस्य बलवत्त्वे पूर्व,

---

१ 'भेदा'-ख ।

लिङ्गवाक्ययोस्तुल्यबलवत्त्वे मध्य, लिङ्गप्राबल्ये तूत्तर पक्ष । तत्र सम्भव-स्येकवाक्यत्वे वाक्यभेदायोगात्तस्मिन् सोदेति तच्छब्देन पूर्वार्धार्थस्य स्वार्थैकवाक्यता गमितत्वादुभयत्रापि सर्वस्यैव मन्त्रस्य प्रयोग । यद्वा लिङ्गस्य श्रुतिकल्पकतया[1] तस्य प्रत्यक्षश्रुत्यपेक्षया दुर्बलत्व मुक्तम् । लिङ्गवाक्ययोस्तु श्रुतिकल्पकत्वमविशिष्ट[2]मेवेति तुल्यबलत्वात्-मकलस्य विभक्तस्य वा[3] विकल्पेन प्रयोग इति प्राप्ते , उच्यते, यद्यप्युभयो श्रुतिकल्पकत्व समान तथापि वाक्येन लिङ्ग कल्पयित्वा श्रुति कल्प्यते, लिङ्गेन त्वव्यवधानेनैवेति लिङ्गस्यैव प्राबल्यम् । "स्योन ते सदन कृणोमि" इत्यस्य हि सदनकरणसामर्थ्यमन्यानपेक्षमेव प्रतीयते । ततश्च श्रुतिमनुमाय सदनकरण एवास्य विनियोग । पुरोडाशप्रतिष्ठापने तु तद्भागस्य स्वरूपत सामर्थ्याभावात् । प्रतिष्ठापनसामर्थ्यता तरिमन् सोदेत्यनेन सहैकवाक्यत्व-पर्यालोचनया पूर्वार्धस्यापि स्वार्थविशिष्टपुरोडाशप्रतिष्ठापने सामर्थ्य[4] कल्पि-मिति तत्रैव तस्य विनियोगो न त्वेकवाक्यत्वानुरोधेन[4] सामर्थ्य कल्पयित्वा सदनकरणेऽपीति, अर्थभेदानैकवाक्यत्वमिति विभज्यैव विनियोग इति । तनोऽप्यन्यतरस्यान्योन्यस्य वाऽऽकाङ्क्षया वाक्यद्वयसामर्थ्यमारभ्याधीतविषय प्रकरण दुर्बलम् । इदञ्च श्रुतिलिङ्गवाक्यैर्यदविनियुक्त तद्विनियोगे प्रमाणम् । यत्तयुक्तन्तु प्रकरणादिति न्यायात्तद्विरोधेऽस्य दुर्बलत्वादिति वक्ष्यत एव । अन्यतराकाङ्क्षया यथा राजसूये पञ्चविधसोमयागा सर्वे फलवन्त समप्रधाना श्रूयन्ते, तत्राभिषेचनीयाख्यसोमयागसन्निधौ विदेवनादय समाम्नाता । तत्रेष्टिपशुसोमाना विकृतत्वात्प्राकृतेनेतिकर्त्तव्यताजातेन कथमित्याकाङ्क्षा-पूरणात् प्रातिस्विकरूपेण निराकाङ्क्षत्वेऽपि राजसूयात्मना पुनराकाङ्क्षो-त्थान श्रुत्यादिविहितानुक्रसन्दशवशात्तदाकाङ्क्षानिवृत्तये प्रधानस्याकाङ्क्षा-परिकल्पनात् । पवित्रसञ्ज्ञसोमयागविशेषादारभ्य तत्रस्य धृतिसञ्ज्ञमिष्टि-विशेष यावदङ्गविधिषु "राजसूयाय ह्येना उत्पुनाति राजसूयेनेजान सर्व-मायुरेति" इति राजसूयपरामर्शात् तावत्पर्यन्तानुवर्त्तिना राजसूयकथभावेन मध्यपतिताना विदेवनादीना तदङ्गत्वेन ग्रहणात् । उभयस्य यथा "स्वर्ग-कामा यजेत" इत्यत्र यागेन स्वर्गं भावयेदिति बुद्धे, केन प्रकारेण यागेन स्वर्ग कर्तव्य इति कथभावापन्नाया समिधो यजतीत्यादावपि पुनश्रुत्यभावेन प्रयोजनाकाङ्क्षाया सत्या विश्वजिन्न्यायेन स्वर्गकल्पनाया गौरवात्तदपेक्षया द्वयारप्येकवाक्यता कल्पयित्वा क्रत्वपेक्षितव्यापारविशेषगमर्पकत्वमेव समिधो

---

१ °कल्पनया—क । २ मपि विशुनमव—क । ३ च—क । ४–४ नास्ति—ख ।

यजतीत्यादेः कल्पने नमित्यादिमन्त्रशेषद्वारा अवघानावाहनादिनिरूढ द्रव्यदेवता मन्त्रद्वारा द्रव्यदेवताभ्यश्च स्वरूपसम्पादनेन यागे व्याप्रियेत्। अनेन यागस्य फलाभिमुखत्व महकारिसम्पादेरेवोपकारत्वादिति तेषा क्रतूपकार फलमिति। प्रकृतोदाहरणे यथा दर्शपौर्णमासप्रकरणे 'अग्नीषोमाविद हविरजुषेतामवीवृधेता महोज्यायोऽक्रताम्' इति। एव "इन्द्राग्नी इद हविरजुषेताम्" इत्यादिमन्त्र सूक्तवाकनिगदे समाम्नात। सुष्ठु वक्तीति व्युत्पत्त्या एकप्रयोगवत्तियावदिष्टदेवताप्रकाशक मन्त्रविशेषे सूक्तवाकशब्दो रूढ। निगदस्तु मन्त्रव्याप्यधर्म इति द्वितीयप्रथमे स्थितम्। पौर्णमास्या-मिन्द्राग्नीयसाद्धान्याया चाग्नीषोमयोर्देवतात्वाभावादसमवेतार्थक पद विहाय समवेतार्थकेन इद पदेनैकवाक्यमिति लिङ्गप्राबल्यादेव स्थिते देवतापदेन सहैकवाक्य-तापन्नानि इद हविरजुषेतामित्यादिपदानि प्रकरणाविशेषादन्यत्रापि प्रयुज्येरन्, उत देवतापदैकवाक्यत्वानुरोधेन तद्वदेव व्यवस्थितानीति सशये वाक्यप्रकरण-योस्तुल्यप्रमाणत्वात् श्रुतिकल्पकत्वसाम्यात्तुल्यबलत्वम्। अद्धा प्रधानाकाङ्क्षा प्रकरणम्, प्रधानार्थं च सर्वमिति प्रकरणस्य प्राबल्यात्तन्मूलकविनियोगेनोभयत्र तेषा प्रयोग इति प्राप्ते, उच्यते, नहिप्रकरण विनियोज्यमनपेक्ष विनियोजकम्, अन्यथा, "पूष्णोऽह देवयज्यया" इति पूषानुमन्त्रणमर्थस्य तद्देवनारहित-योरपि दर्शपूर्णमासयो प्रकरणेन विनियोगापत्तौ तस्य प्रकरणादुत्कर्ष इति सिद्धान्तभङ्गापत्ते। ततश्च भवति प्रवर्तमानं श्रुतिलिङ्गवाक्यैर्यावानर्थो बाध्यते तदतिरिक्तमेव प्रकरणेन विनियुज्यते। विरुद्धश्रुत्याद्यभावे पुन प्रकर-णस्य स्वातन्त्र्येण विनियोजकत्वम्। अत्र तु लिङ्गेन देवतापदस्यैकवाक्येन तद्देवतावाक्यतापन्नशेषभागस्यापि प्रथममेवावलम्बनात् प्रकरण तद्विनियोजनाय पर्याप्तम्। तथाहि अग्नीषोमपदस्येद हविरित्यादेश्चैकवाक्यत्व कल्पितम्, तेन येद हविरित्यादेरग्नीषोमप्रकाशनसामर्थ्य कल्प्यते, तत श्रुतिस्तयाविनियोग इति तृतीयो विनियोगकल्पनाकाल। अग्नीषोमपदैकवाक्यतापन्नस्य त्विद हविरित्यादेरिन्द्राग्निपदैकवाक्यत्व न प्रत्यक्षसिद्धम्, किन्तु प्रकरणादिद हविरित्यादेर्दर्शपूर्णमासाम्यामेकवाक्यता, अनेन मन्त्रेण दर्शपूर्णमासयो-रुपकुर्वन्निति। तत उपकारविशेषाकाङ्क्षया देवतापदैकवाक्यतया देवता-प्रकाशनसामर्थ्य कल्प्यम्, तत श्रुति, ततो विनियोग इति चतुर्थस्तत्काल इति विप्रकर्षात्प्रकरणस्य दौर्बल्यमिति सिद्धान्त।

देशसाम्य क्रम। स च द्विधा—पाठसादेश्यमनुष्ठान[1]सादेश्यञ्च। पाठ-

१ ताम्या च—ख। २ अनुमान°—क।

लिङ्गाना त्वनन्यशेपतया स्वार्थं एव तात्पर्यम्, 'तुल्य च साम्प्रदायिकम्" इति न्यायेन नैरर्थक्यानुपपत्ते, विध्यन्तरशेपताया च प्रमाणाभावात्। अत प्रत्यक्षाद्यपमर्देनैव तेपा प्रवृत्ति। अत एव क्वचिल्लिङ्गस्य स्वार्थकल्पकत्व क्वचित्त्यपि पूर्वमीमासकानामुद्धोप। तथाहि 'द्विरैन्द्रवायवस्य भक्षयतीति द्विर्ह्येतस्य वषट् करोतीति"। हि शब्दोपनिबन्धेन सन्निधिना च वषट्कार-भेदस्य भक्षणावृत्ति प्रति हेतुत्व गम्यते। तत्श्च श्रुतहेतुत्वान्यथाऽनुपपत्त्या [1]यत्र कर्मभेद तत्रैकस्मिन् शेपे शेपिकर्मावृत्तिरिति व्याप्ति कल्प्यते। ततश्च 'इन्द्राय रथन्तराय निर्वपति, इन्द्राय वा हन्तवे" इत्यादि[1] वषट्कर्मात्मिकाया सवपृष्ठायामिष्टौ यथादैवत निर्वाप कृत्वा प्रकृतिवदवघातपेषणे सहैव कृत्वा प्राप्तमपि विभाग वचनबलादकृत्वा सर्वैरेकमेव पुरोडाश कृत्वा तत सम तदुपर्यवदान कृत्वा पट् प्रधानकर्माणि क्रियन्ते। तत्र प्रधानभेदादतिदेशप्राप्तस्यावदानादिशेषकर्मण पृथगेवानुष्ठानम्। सर्वपुरोडाशस्य सर्वार्थत्वे त्वेकस्य पुनस्त्यागायोगात्तत्तदवयवस्यैव तत्तद्यागसाधनत्वात् तादृशावयवोत्तरार्द्धादिवदीयमानस्य तच्छेपादेवावद्यत्वमिति भेदस्यैव न्याय्यत्वादिति प्राप्ते उच्यते,

सर्वसाधारण शेप, तस्मात्सकृदवद्यते।
तावतैव हि सर्वेषा कृत स्यादविशेषत ॥

होमदेशाना वचनबलाद्यवस्थितत्वेऽप्यवदानोत्तरमवशिष्टस्य पुरोडाशभागस्य विशेषाभावात् प्रमाणाभावाच्च शेषकार्यं तन्त्रेण सकृदेव कार्यम्। ऐन्द्रवायवे तु वचनबलात्प्रतिकर्मभक्षभेदो न प्रधानभेदात्। प्रथमापस्थितविध्युद्देशवदैन्द्रवायवपदवैयर्थ्यापत्तेर्विधेर्हेत्वनपेक्षत्वात् हेतुत्वस्य च स्तुति प्रत्येवोपयोगात् द्विपदस्य लक्षणापत्तेश्च। अन्यथा सवपृष्ठाया भक्षणभेदालाभात्। न विधौ पर शब्दार्थ इति न्यायेन विधौ लक्षणाया अयुक्तत्वादिति स्थित तृतीये। यत्र तु हेतुविधावपि न लक्षणा तत्र सोऽप्यङ्गीक्रियत एव। यथा आतिथ्यायामिष्टौ तु चतुर्गृहीताज्यानि भवन्ति। न ह्यत्रानुयाजान् यजेयन् भवतीत्यत्रानुयाजाभावश्चतुर्गृहीतत्वविधिपक्षीभूतायामप्यगृहीतग्रहणश्चतुष्पनिवृत्तौ हेतुरेव। अतो यत्रानुयाजाभावस्तत्र चतुर्गृहीतत्वमिति विधि कल्प्यते। अत आतिथ्याव्यतिरिक्तायामपि खण्डेष्टौ अनुयाजाभावाच्चतुर्गृहीतत्वमेव बहुवचनबलादनुयाजत्वाव-

---

१-१ नास्ति-क।

च्छिन्नप्रतियोगिताकाभावस्य हेतुत्वलाभादवभृथे "अदीक्षितोऽनुयाजान् यजति" इति वचनेन बहिरनुयाजमात्राभिवेऽपि न तथेति दिक् ।

अत्रेदं वक्तव्यम्—मानान्तरविरुद्धार्थतात्पर्याभाववत्त्वन्य साध्यतया तादृश्यैवोपाधित्वानुपपत्ति । साध्य हि नोपाधि, साधनव्यापकत्वात् । उपाधिव्यभिचारेण साध्यव्यभिचारे साधनीये साध्याविशेषापत्तेरनुमानमानोच्छेदापत्तेश्चेति सिद्धान्तात् । यथाश्रुतनात्पर्याभाववत्त्व चोक्तसाध्ये नोपाधि । तात्पर्यवन्त्यर्थे मानान्तरविरुद्धत्वाभावप्रयुक्तयथोक्तविशिष्टाभावसत्त्वेन साध्याव्यापकत्वात् । इत्थ एव तल्लिङ्गेषु प्रतिपिपादयिषितत्वेनाद्वैतागे[1] तात्पर्यन्य लद्धत्वादेव वक्तुमशक्यत्वात् । अनुल्लिखितार्थविशेषतात्पर्याभावस्य साध्यव्यभिचारायनुन्नायकत्वात् । मतात्पर्यकेऽपि वाक्येऽर्थान्तरविषयकतात्पर्याभावगत्वात् तन्य सर्वसाधारण्यात् । अत एव शब्दालोकेऽप्युक्तम्—"न तावदनुल्लिखितार्थविशेष मदर्थक सभवितार्थ न वेतिसशयज्ञानमुत्पत्तुमर्हति । क्वचिदर्थे वाक्यजाता वावेन क्वचिच्चावावेन द्वयो कोटिरविरोधिन्येवेति सन्देहानुपपत्ते" इति । एवच्च प्रकृतेऽपि तात्पर्याभावाभाववद्वृत्तित्वरूपेण यथोक्तोपाधिव्यभिचारेण हेतौ साध्यव्यभिचारो नोन्नेतु शक्य, किन्तितात्पर्यविशिष्टाभावत्वेनासिद्धेरित्यास्ता विस्तर ।

ननु अवच्छेदन्यायेन वेदस्य प्राबल्यम्, तथाहि[2] पशुपञ्चमे विभागश्रुते प्रायश्चित्त गौणपक्षेण विद्यत इत्यधिकरणे विचारितम्[2], ज्योतिष्टोमेऽध्वर्यादिरमिन्नाप्रस्तोतादीना बहिष्पवमानस्तोत्रार्थं गमनमुक्तम् "अध्वर्यू निष्क्रामत प्रस्तोता नमनुव्रान्त प्रतिहर्ता तमुद्गाता त यजमान" इति । तत्र च विच्छेदे सति प्रायश्चित्त श्रूयते । "यदि प्रस्तातापच्छिद्याद् ब्रह्मणे वर दद्याद्यदि प्रतिहर्ता सर्ववेद वर दद्याद्यदि उद्गाताऽदक्षिण न यज्ञमिया तेन पुनरेत्य । तत्र नद्याद्यत् पूर्वस्मिन्दाम्यन् स्याद्" इति । तत्रोत्तरस्मिन्याजन्ये वच्छेदे प्रायश्चित्तमस्ति न वेति सशय उभाभ्या क्रियमाणस्य विच्छेदस्यानतरकर्तृकत्वेन व्यवदेशानर्हत्वादन्यतरकर्तृव्यवच्छेदरूपनिमित्ताभावात्तन्नैमित्तिक प्रायश्चित्त नास्तीति प्राप्ते—

स्यादेवम् यदि कर्तृ च सापेक्षमुभयोर्गवेत् ।
एकैकस्य तु यत्नेन निरपेक्षेण जायते ॥

---

१ अद्वैतनात्पर्यांगे—ख । २–२ नास्ति—क ।

विच्छेदस्तेन कर्तृत्व द्वयो प्रत्येकमस्ति न ।
कालमात्र तु तत्रैक प्रायश्चित्तमतो भवेत् ॥ इति सिद्धान्त ।

तदुत्तरञ्च "तत्र विप्रतिषेधाद्विकल्प स्यात्" इत्यधिकरणे निरूपितम् । प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदे पूर्वोक्तरीत्या प्रायश्चित्तद्वयमापतति, तयोस्समुच्चयो विकल्पो वेति सशय, विकल्पस्याष्टदोषदुष्टतया द्वयो समुच्चय । न चादाक्षिण्यसर्वस्वदानयोर्विरोध, पुन प्रयोगे सर्वस्वदानस्य शक्यत्वादिति पूर्वपक्ष । सिद्धान्तस्तु, यत्र प्रयोगे निमित्तोत्पत्तिस्तत्रैव नैमित्तिक प्रायश्चित्तमङ्गम्, प्रयोगान्तरे च क्रियमाणेन प्रायश्चित्तेन निमित्तवत. प्रयोगस्य सादगुण्यमनुपपन्नम् । अत एकत्रैव प्रयोगे द्वयो प्रसङ्गात्तादाक्षिण्यसर्वस्वदानयोर्विरोधेन समुच्चयाभवाद्विकल्प एवेति "तदनन्तरञ्च पौर्वापर्ये पूर्वदौर्बल्य प्रकृतिवद्" इति सूत्रे स्थितम् । यत्रानुपूर्व्येणोद्गातृप्रतिहर्त्रोरपच्छेदो भवति तदा कि पूर्वोत्पन्नावच्छेदनिमित्तक प्रायश्चित्त कार्यमुतोत्तरोत्पन्ननिमित्तकमिति सशय, तत्रासजातविरोधतया पूर्वनिमित्तस्य बलवत्त्वात्तदेव कार्यम्, उत्तरस्य तद्विरोधेनावगन्तुमशक्यत्वादिति पूर्वपक्ष । सिद्धान्तस्तु, न ह्यत्र पूर्वज्ञानेनोत्तरज्ञानस्योत्पत्तिनिरोध, प्रत्यक्षवाक्येन स्वशाब्दबोधस्यावश्यमुत्पादनात् । तत्रोत्तरज्ञान जायमान पूर्वज्ञानमनुपमृद्य नोत्पत्तुमीष्टे, पूर्वज्ञानबाधश्च नानुत्पत्तिस्वरूप तस्योत्पन्नत्वात् । किन्तु तत्राप्रामाण्यज्ञानासञ्जननरूप । पूर्वज्ञानकाले तु तद्विरोधिन उत्तरज्ञानस्यानुपस्थित्या न तस्योत्तरज्ञाने भ्रमत्वज्ञापनरूपोपमर्दक्षमत्वमिति वैषम्यम् ।

तदुक्तम्—

पूर्वं परमजातत्वादबाधित्वैव जायते ।
पूर्वाबाधेन नोत्पत्तिरुत्तरस्य तु सेत्स्यति ॥ इति ।

नैमित्तिकशास्त्रस्य वायमर्थं प्रागन्यथावर्तव्योऽपि क्रतुनिमित्तसत्त्वेऽन्यथावर्त्तव्य इति । ततश्च यथा ज्योतिष्टोमदक्षिणाया नित्यद्वादशशतज्ञानमुत्पद्य पश्चात्येन न नैमित्तिकसर्ववेदमदानादिज्ञानेन बाध्यते । एव पूर्वनैमित्तिकमप्युत्तरनैमित्तिकेन बाध्यत इति । एवमत्रापि श्रौतेन चरमोत्पत्तेनाद्वैतज्ञानेन । अत एवेद रजतमिति ज्ञान बाधित्वा नेद रजतमित्यादिरुत्पति । यत्र तूत्तरज्ञानोत्पत्तौ पूर्वज्ञानापेक्षा तत्र पूर्वमेव बलीय । तदुक्तम्—

पूर्वापरबलीयस्त्व तत्र नाम प्रतीयताम् ।
अन्योन्यनिरपेक्षाणा यत्र जन्मधिया भवेत् ॥

इति पूर्वोत्पन्नप्रत्यक्षात्मकाद्वैतज्ञानस्य बाधो द्रष्टव्य इति। तदपि चिन्त्यम्, तन्न पूर्वोत्पन्नैमित्तिकस्य यन्न स्वोत्तर विरुद्धनैमित्तिकप्रयोजकनिमित्तस्य नोत्पत्तिम्प्रति सावकाशत्वात्, अत्र च द्वैतप्रत्यक्षस्य विषयान्तराभावेन बैफल्यात्। न हि प्रमाणप्राप्तस्यात्यन्त बाधो युक्त । यत्तु व्यावहारिकप्रामाण्ये प्रत्यक्षस्य सावकाशत्वमिति, तदसत्, व्यावहारिकपारमार्थिकत्वरूपप्रामाण्यभेदस्याद्यापि सिद्धतया लक्षिपदे सावकाशत्वायोगात्। न हि प्रकृते वेदस्य प्रत्यक्षापेक्षया प्राबल्यसिद्धे पूर्वं प्रत्यक्षस्यान्यस्य वा व्यावहारिक प्रामाण्य कुत्रचित्कृण्मस्ति। अत एवोक्त प्रामाण्यमानस्य तात्त्विकस्य स्वीकारादिति। यत्तु श्रुतिस्मृतयो तात्त्विकप्रामाण्यविरोधे श्रुतेरतात्त्विकप्रामाण्यस्यानन्यथा प्रयोजकत्वेनातितात्त्विक प्रामाण्यमित्युक्तत्वात्, तत्र प्रतिकूलतर्कमप्रदर्श्य तदस्वीकारमात्रस्याप्रयोजकत्वादिति, तदप्यत एव परास्तम्, उत्तरग्रन्थोक्तत्वात्।

एतेन 'प्रत्यक्षस्यापजीव्यत्वेन प्राबल्यमाशङ्क्य यदुपजीव्यते व्यावहारिक सत्व तदद्वैतश्रुत्या न बाध्यते, यच्च बाध्यते पारमार्थिक सत्व तदुपजीव्यम्" इति बाधस्यापास्तमाधानमप्यपास्तम्। अत एव वर्णपदवाक्यतदर्थभेदोपजीवनानामद्वैतश्रुतीनामुपजीव्यानिर्भेदबुद्धिभिर्बाध स्यात्। एकमेवेत्यवधारणव्यवच्छेद्येनाद्वितीयमिति द्वितीयेन नानेति नानार्थेन किञ्चनेत्यनेन बहुना विनानुपलभ्यमानेन व्याघात इत्याशङ्क्य—

पारमार्थिकमद्वैत प्रविश्य शरण श्रुति ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥

इति खण्डनमपि परास्तम्। प्रमाणान्तरसिद्धे हि विषये सावकाशत्व हीनबलतया प्रयोजक न तु बाधकत्वेन स्वकल्पितप्रामाण्यानुरोधमात्रेण बाध्यस्य विषयान्तर कल्पयित्वा तद्बाधनु शक्यम्, अतिप्रसङ्गात्। ततश्च व्यावहारिकप्रामाण्यनिर्णौ तन चरितार्थस्य प्रत्यक्षस्याद्वैतश्रुत्यपेक्षया दौर्बल्यम्, तत्सिद्धौ च व्यावहारिकप्रामाण्यसिद्धिरिति परस्पराश्रय दुर्वारम्, अन्यथा तुल्यत्वानुमितेरप्यबाध्यत्वापत्त ।

यत्तु, अनौपन्य तात्त्विक न्यादिति कोऽर्थ, यदि तत्त्वत औपन्य नास्तीति, तदा अद्वैतपर्यवसानादिष्टापत्ति । अथ व्यवहारतोऽपि नास्तीति तदा व्यवहाराविसंवादिन्यपरीक्षाविशिष्टमौपन्याप्रत्यक्ष बाधकमिति, तदसत्; [1]उपजीव्यावस्तात्त्विक स्यादित्यस्यापत्त्यर्थत्वात्[1]। अत एव—

१-१ नास्ति-ख।

तात्त्विकादित्यता यूपस्याश्रित्य शरण श्रुति ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥

इति प्रतिबन्दिरप्यनवद्यैव । एतेन—

"तत्परत्वात्परत्वाच्च निर्दोषत्वात्त्ववेदिकम् ।
पूर्वस्य बाधक नाय सर्प इत्यादिवाक्यवत् ॥"

इत्यानन्दबोधोक्तमपि निरस्तम् । तदाहु —

तत्परत्वमसिद्धत्वात्परत्व व्यभिचारत ।
निर्दोषतान्यथासिद्धे प्राबल्य नैव साधयेत् ॥ इति ।

प्रत्यक्षबाधिते तात्पर्यस्यैव दुर्ग्रहत्वात् तत्परत्वच्च प्रमान्तरभ्रमे व्यभिचारि, मानान्तराबाधितत्वविशिष्ट परत्वच्च प्रकृते नास्त्येव प्रत्यक्षबाधस्योत्कटत्वात् । निर्दोषत्व तु अबाधितार्थप्रामाण्येनान्यथासिद्धम्, नहि प्रत्यक्षादिविरुद्धार्थतात्पर्यकत्वव्याप्य निर्दोषत्वमिति भाव ।

यत्तु नेतद्युक्त प्रत्यक्षस्यानिश्चिततात्त्विकप्रामाण्यकत्वेन व्यावहारिकप्रामाण्य सावकाशत्वेन च तात्त्विकप्रामाण्य विना निरवकाशत्वादिना श्रुत्यबाधकत्वाद् अन्यथा अन्यतरस्यैव तात्त्विकप्रामाण्यनिश्चयेन बाधकनिश्चये तत्परत्वरूपावच्छेदन्यायानुसरणस्य वैफल्यात्, तस्मात्परत्वे यान्यतरस्यापि तदनिश्चयान्मद्रीत्या श्रुतेस्तनिश्चयेऽपि प्रकारान्तरेणापि श्रुतौ तन्निश्चयाय तदनुसरणादिति, तदपि चिन्त्यम्, व्यावहारिकप्रामाण्यस्य मानान्तरासिद्धतया तन सावकाशत्वस्य निरस्तत्वात् । नापि तात्त्विकप्रामाण्यव्यतिरेकेण श्रुतेर्निरवकाशत्वम्, श्रुतित्वावच्छेदेन तथात्वस्य बयाप्यनभ्युपगमात् । 'प्राक् च तथाभूतात्मज्ञानात्प्रवर्तमान शास्त्रमविद्यावद्विषयकत्व नातिवर्तते" इति भगवद्बाप्यदर्शनेन स्वर्गकामादिश्रुतीना व्यावहारिकस्यैव प्रामाण्यस्य स्वीकृतत्वात् अद्वैतश्रुतीनामेव तात्त्विक प्रामाण्यमित्यस्य वाद्वैतश्रुतिबलमानेन कल्पयितुमशक्यत्वात् । एतेन निर्दोषत्वमपि नान्यथासिद्धम्, तात्पर्यविषय एव प्रामाण्यस्याभ्युपेयत्वादित्यपि परास्तम्, प्रत्यक्षविरोधेन तात्पर्यविषयत्वस्यैवाद्वैते दुर्ग्रहत्वात् । अपि च श्रुतीनामविरुद्धार्थपरत्वेऽपि तात्त्विकमेव प्रामाण्यम्, प्रत्यक्षस्य तु अर्थान्तरपरत्वेन प्रामाण्यमत्यन्तमेवानुपपन्नम् । तस्याश्चिन्त्यमानार्थातिरिक्तार्थविषयत्वोपपादयितुमशक्यत्वात् । अत उभयोस्तात्त्विकप्रामाण्यरक्षणार्थं श्रुतीना गौण्यादिनार्थव्याख्यानेऽपि न कोऽपि

दोष । अन्यतरस्याप्रामाण्यापरपर्यायव्यावहारिकप्रामाण्यकल्पनानुपपत्ते, विनिगमकस्य चोक्तत्वात् ।

वस्ततस्तु परत्व व्यभिचारत इत्यस्य परत्वस्याव्यवस्थितत्वादित्यर्थं । दृष्टान्ते हि प्रनिहतपच्छेदानन्तर तत्प्रयोगव्यक्तौ नोद्गातुरपच्छेद सम्भवतीति निरस्त पूर्ववर्त्युद्गात्रपच्छेदनिमित्तकस्य तेन बाध । दार्ष्टान्तिके तु श्रौतशाब्दबोधानन्तरमपि सत्त्वप्रत्यक्षस्योत्पत्तिसम्भवादनियतपौर्वापर्यकत्वेन कथ प्रत्यक्षस्यैव बाध ? अत एवेद रजतमित्यादेर्नेद रजतमित्यादेश्च ज्ञानव्यक्तेरव्यवस्थित एव बाध्यबाधकभाव, परन्तु विषयसत्त्वासत्त्वाभ्यामानान्तरेण बाधबुद्धे प्रमात्वभ्रमत्वग्रह इत्येव विशेष ।

न चाऽद्वैते वेदतात्पर्यविषयत्वबादिभिरपि तद्दोषोत्तर सत्त्वप्रत्यक्ष स्वरूपेणापि न जायत इति वक्तु शक्यम्, पञ्चादिभिश्चाविशेषादिति भगवत्पादादिभिरेव तत्त्वज्ञानानामपि व्यवहारे लौकिकेभ्यो विशेषविरहस्योक्तत्वात् । न त्वद्वैतज्ञानस्य सत्त्वप्रत्यक्ष प्रति कारणीभूताभावप्रतियोगित्वरूप बाधकत्व नोपगम्यते, किन्तु शङ्ख पीत इत्यादेरिव भ्रमत्वज्ञापकत्वरूपमेवेति चेत्, न, पूर्वमेव निरस्तत्वात् । अतोऽद्वैतशाब्दाद्वैतप्रत्यक्षयो बाध्यबाधकभावसाम्ये प्रमाणान्तरेण तत्र प्रमात्वादिनिर्णये कल्पनीये उक्तरीत्या द्वयारेव तात्त्विकप्रामाण्यकल्पन युक्तम् । न त्वनाऽपच्छेदन्यायावकाश, व्यवस्थितपौर्वापर्यस्थल एव तत्प्रवृत्ते । [1]'अत एव स्वरूपमात्रेण परत्वमप्रयोजकम्, आर्थिकस्यैव तस्य नियामकत्वात्, इत्याशयेन "मृडमृदगुधकुपविलशवदवस क्त्वा' इति पूर्वेणापि न क्त्वा सेट्' इति परस्य बाध इति दृष्टान्त । स्वभावसिद्धकित्वस्य निषेध विना तत्प्रतिप्रसवार्थं मृडेत्यादे प्रवृत्युपयोगादित्यल बहुना[1] । वस्तुत पूर्वनिपेक्षे सत्येवोत्तरस्य बलवत्त्वम्, अन्योऽन्यनिरपेक्षाणामिति स्वदृष्टमुक्तत्वात्, श्रुतेस्तु प्रत्यक्षसापेक्षत्वमेवेति न प्रावल्यम् तस्मादपच्छेद[2] न्यायोद्भाव प्रतारणमात्र वैषम्यस्य दुरपह्नवत्वात् ।

न चैव प्रतियोगिज्ञानस्योपजीव्यत्वापादनात् प्रत्यक्षस्य दौर्बल्यापत्तेरिति वाच्यम्, तज्ज्ञानविषयस्य रजतादेर्देशान्तरे सत्त्वेन तस्यात्यन्तमनपवादादित्यल बहुना[2] । एतेनाद्वैतश्रुतेर्लक्षणयार्थान्तरपरत्वेऽपि सावकाशत्व नतु प्रत्यक्षस्य, अत सावकाशनिरवकाशयोर्निरवकाश बलवदिति न्यायेन प्रत्यक्षस्य बलवत्त्वमित्यनूद्य यद्दूषणमुक्त, सावकाशत्व हि विशेषविषया-

---

१—१. नास्ति—क । २—२ नास्ति—ख ।

दन्यत्र स्वारसिका प्रवृत्तिर्न तु लक्षणादिरूपोपमर्दप्रयुक्ता। वस्तुत श्रुतेरप्यनवकाशत्वमेवानन्यपरत्वात्। किंच "नेह नानास्ति किंचन" "नात्र काचन भिदा" "इद सर्वं यदयमात्मा" इत्यादौ किमादिसर्वनाम्ना विशेषरूपेण बोधकत्वात्।

न पुण्यपापे मम नास्ति नाशो, न जन्मदेहेन्द्रियबुद्धिरस्ति।
न भूमिरापो मम वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरञ्च॥

"अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवायु "
'अशब्दमस्पर्शमरूपमव्यय तथारस नित्यमगन्धवच्च यद्"

इत्यादिश्रुतौ विशेषवाचकपदयोगात् पृथिवी मिथ्येत्यादिविशेषानुमानाच्च श्रुत्यादीनामपि विशेषरूपेण मिथ्यात्वविषयत्वाद्विशेषरूपेणैव सत्यताविषयकप्रत्यक्षबाध्यत्वशङ्कानुपपत्तेति, तत्परास्तम्। यथाश्रुतार्थं मादाय विशेषविषयकत्वसाम्येऽपि लक्षणागम्यार्थं मादाय श्रुते सावकाशत्वानपायात्। अनन्यपरत्वस्य चासिद्धत्वात् प्रमाणतावच्छेदकशब्दत्वसामानाधिकरण्येन कृतस्य लक्षणाश्रयस्यापेक्षयाकल्पस्य व्यावहारिकादिप्रामाण्यभेदस्य कल्पनया प्रत्यक्षस्य सावकाशीकरणमित्युक्तेरनुपपत्ते। उक्तञ्च भगवत्पादैर्गीताभाष्ये—"न हि श्रुतिशतमपि शीतोऽग्निरप्रकाशो वेति ब्रुवत्प्रामाण्यमुपेयात्, यदि ब्रूयात् शीतोऽग्निरप्रकाशो वेति, तथाप्यर्थान्तरे श्रुतेर्विवक्षित कल्प्य प्रामाण्यान्यथानुपपत्ते" इति। अत एव नेह नानेत्यादेर्विशेषरूपेण मिथ्यात्वबोधकत्वमित्यपास्तम्।

अपुण्यमित्यादेश्चात्मनि पुण्यादौ सम्बन्धनिषेधपरत्वान्ममेति षष्ठ्या सप्तम्यर्थत्व मानाभावात्। पुण्यादिमिथ्यात्वबोधने तात्पर्याभावात्। यदपि प्रत्यक्षायाग्यस्यैव भूम्यादिनिषधोऽत प्रत्यक्षश्रुत्याभिन्नविषयत्वमित्याशङ्क्याह—'अदृष्टमव्यवहार्य्यमनीन्द्रियम्' इति। नृसिंहतापनीयश्रुतौ "अशरीरे शरीरेषु" "अपाणिपादोऽहमचिन्त्यशक्ति पश्याम्यचक्षु स शृणोम्यकर्ण" "अप्राणा ह्यमना" इत्यादिश्रुतिषु प्रत्यक्षविषयत्वादिरूपदृष्टत्वादिना निषेधस्याफुटत्वात्।

न चादृष्टमित्यादिक तत्पुरुष इति वाच्यम्, अन्त प्रज्ञमित्यादिबहुव्रीहिप्रायपाठादबहुव्रीहित्वस्यावश्यनिगम्यत्वाच्चेति, तदप्यसत्, अदृष्टमित्यादेर्वाक्यतया दृष्टत्वरूपप्रत्यक्षविषयत्वस्य निषेधप्रतियोगितावच्छेदकत्व-

स्वीकारे तद्विषयस्य भूम्यादेर्मिथ्यात्वानिद्धिप्रसगात्। प्राय पाठस्य च निर्णायकान्तरे सत्यप्रयोजकत्वात्। अन्यपदार्थप्रधानबहुव्रीह्यपेक्षया पूर्व-वर्त्तिपदार्थप्राधान्येन तत्पुरुषस्यान्तरङ्गत्वात्। उभयथाप्यतिरिक्तशक्ति-स्वीकारपक्षेऽपि लाघवस्यादरणीयत्वात्। अन्यथा निषादस्थपत्यधि-करणन्यायविरोधात्। तथा च वैयाकरणैरुक्तम्—

पदंवस्यच्छान्दबोधाविद्रप्रावक्षणास्थिते।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्॥

यद्यप्यौत्सर्गिकप्रामाण्यस्य प्रत्यक्षेऽपि निश्चयविषयकत्वात् सामान्य-विशेषन्यायेन प्रत्यक्षस्य प्रामाण्यबाधो न युक्त इति पक्षमनूद्य दूषणमुक्तम्, औत्सर्गिकत्वादेव दोषसत्त्वेऽपवादादन्यथौत्सर्गिकत्वहानेरिति, तदपि चिन्त्यम्, न ह्यौत्सर्गिकस्य हानिस्तादवस्थ्यात्, न ह्यत्रनेवानवकाशमुत्सर्गत्वमप्यनु-भवितुमर्हतीत्याग्रहमपहाय विभावनीयम्। अत एव वाच्यतावच्छेदकरूपा-वच्छिन्नस्यापि क्वचिल्लापवादेन बाधो यत्र बाधकतावच्छेदकस्यान्यथासिद्धम्, यथा "तुह्योस्तातङाशिष्यन्यतरस्याम्" इति तातङादेशान्न "ङिच्च" इति सूत्रेणान्तादेशत्वप्राप्तापि अनन्यार्थ[1] ङित्यकेषु अनटादिषु ङिच्चेत्य-पवादस्य चरितार्थत्वाद् गुणप्रतिषेधार्थतया सम्भव टित्यके तातङि मन्त्र प्रवृत्तत्वाद् 'अनेकालशित्सर्वस्य' इति सूत्रेण सर्वादेशत्वमेव। उत्सर्गापि-वादयो गमकत्वादिति सिद्धान्त। एतावान्तु विशेषो यत्तत्र बाधकत्वाभि-मतस्य सम्भवत्कार्यान्तरनिमित्तकत्वादन्यथासिद्धत्वम्, प्रकृते त्वर्थान्तर-तात्पर्यकल्पनादिति। अत एव ऐतरेयब्राह्मणम्—"तस्माद्वीक्षितेन सत्यमेव वदितव्यमथो खल्वाहु। कोऽर्हति मनुष्य सर्व सत्य वदितु सर्वं सत्यमहिना वै देवा अनृतनहिता मनुष्या इति विचक्षणवती वाच वदेच्चक्षुर्वै विचक्षण विद्धयेतेन पश्यतीयेतद्धि वै मनुष्येषु सत्य निहित यच्चक्षुस्मादाचक्षाण-माहुरद्राक्षमिति नपद्यदर्शमित्याहायाम्म श्रद्दधानि यद्धि वै खलु पश्यति न बहूना च नान्येषा श्रद्दधानि तस्माद्विचक्षाणवती वाच वदेत्सत्योत्तरा हास्य वागुदिता भवति" इति।

यत्तु यदि चक्षुरेव मानान्तराद् बलवत्तदा त्वगाद्यपेक्षयाऽपि बलवत्स्यात्। यदि चक्षुषवादिवदनमेव स्यात तदा त्वगादित्वादि सत्य न स्यात्। चक्षुषश्च प्रत्यक्षापरत्वेऽप्यनौन्द्रियादिविषये निर्दोषानुमानादित्वादि-

१ अन्यूनार्थं ङिचै—ख।

वदनमेव सत्य न स्यादिति, तन्न, अन्यथासिद्धप्रत्यक्षस्य तद्विषयकविपरीतार्थकमानान्तराद् बलवत्त्वे श्रुतेस्तात्पर्यात्। एतेन व्यावहारिकसत्यत्वपरतया सत्यपदव्याख्यानमप्यपास्तम्, तदसिद्धेरुक्ततत्वाच्च। तस्मादयमर्थं सत्य प्रमाजनकमेव वाक्य वक्तव्यम्।

नन्वेतदयुक्त भ्रममूलकवाक्यस्यापि प्रयुज्यमानत्वात्। वाक्यप्रयोगहेतुभूतज्ञानस्य प्रमात्वनियमाभावात्, इत्याशङ्क्य—अथो खल्वाहुरित्यादि। स्वयमन्यथागृहीत्वा प्रतारणार्थंवाक्य न प्रयोक्तव्यमित्यभिप्रायेण समाधत्ते—विचक्षणवतीमित्यादि। प्रत्यक्षसवादिनीमित्यर्थं। तत्र भ्रम प्रमा वास्त्वित्यन नादर। परस्यान्यथाबोधो भवत्वितीदृशेच्छापूर्वकवाक्यप्रयोक्तुरेव प्रतारकत्वात्।

ननु तथापि सत्यवचनानिर्वाहतादवस्थ्यमत आह—चक्षुर्वा इत्यादि। तथा च प्रत्यक्षस्यैवविध प्रामाण्य येन तदनुसारिणोऽसत्यवाक्यस्यापि न दोषजनकत्वमत सर्वप्रमाणापेक्षय। उक्तविषये तस्य बलवत्त्वमिति भाव.। अत एव च बृहदारण्यकेऽपि श्रूयते—"तस्माद्यदिदानी द्वौ विवदमानावेयातामहमद्राक्षमहमश्रौषमिति। य एव ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्धध्याम" इति। अत्र शब्दापेक्षयाऽपि प्रत्यक्षस्य प्राबल्य स्पष्टमेवोक्तम्। अत परप्रकृतमनुमराम।

यत्तु मिथ्यात्वा[1]नुमानमधिकृत्यानुमानापेक्षिताशेषार्थग्राहकत्वेन प्रत्यक्षस्योपजीव्यत्वात्प्राबल्यम्, तच्च पक्षादेरैन्द्रियकत्वे, साक्षादतीन्द्रियत्वे तु परम्परयेत्येतावान् भेद। दृष्टं चापेक्षितैकदेशग्राहिणामप्युपजीव्यत्व सद्विरुद्धग्राहिणस्तस्य बाधश्च पश्चाद् घटविभुत्वानुमाने पक्षग्राहिणैन्द्रियेण, नरशिर शुचित्वानुमाने साध्यग्राहिणागमेन, मनोवैभवानुमाने ज्ञानासमवायिकारणसयोगाश्रयत्वरूपहेतुग्राहकेणानुमानेन। प्रकृते त्वनुमानापेक्षितसर्वार्थग्राहकप्रत्यक्षेण तद्बाधस्यात्यन्त सुलभत्वात्।

न चैव श्रुत्यपेक्षया प्राबल्य चक्षुरादेर्न स्यादिति वाच्यम्, शब्दतज्जन्यज्ञानतत्प्रामाण्यादेश्चक्षुराद्यग्राह्यत्वेऽपि तद्ग्राहकस्योत्र[2]साजात्येन चक्षुरादेरपि प्राबल्यसम्भवात्। अत एव नरशिर शुचि[3]त्वानुमानोपजीव्यव्याप्तिग्रहायुक्तघटनिष्ठशुचित्व[3]प्रतिपादकागमसजातीयस्य 'नार स्मृष्ट्वास्थि सस्नेह सवासा जलमाविशेद्" इत्यागमस्य तदनुमानापेक्षया प्राबल्यमिति पक्षमनूद्य

१ स्वदनु°-क। २ श्रोत्रादि-क। ३ शुचिता-क।

दूषणमुक्तम्—"स्वरूपमानमुपजीव्यम्, तच्च न बाध्यते। बाध्यत्व बाधितार्थ-विषयकत्व नोपजीव्यम्, तस्य कारणत्वे प्रवेशाद्' इति, तदपि पूर्वोक्तरीत्या परास्त वेदितव्यम्।

यदप्याहु अनुमितित्वावच्छेदेन न प्रत्यक्षोपजीवकत्वम्, अतीन्द्रियपक्ष-साध्यहेतुकानुमितिविशेषस्य प्रत्यक्षानपेक्षोत्पत्तिकत्वात्। शब्दानुमानादिनैव तत्र व्याप्त्यादिधीसम्भवात्।

ननु किञ्चिद्विषयकप्रत्यक्ष-त्वावच्छेदेनापि नानुमित्युपजीवकत्वम्। न चानुमित्यात्मकविशेषणज्ञानजन्यप्रत्यक्षे तदिति वाच्यम्, विशेषणज्ञानहेतु-ताया अनङ्गीकारात्। किञ्चिद्विषयकानुमितित्वावच्छेदेन तु प्रत्यक्षोपजीव-कत्वमस्त्येव, ऐन्द्रियविषयकानुमित्यादौ तदसम्भवात्। तथा च किञ्चिद्विषयक-यज्जातीयप्रमासामान्य यज्जातीयप्रमोपजीवक तज्जातीय तज्जातीयापेक्षया दुर्बलमिति नियम। न च "दीपदृश्चक्षुराप्नोति" इत्यादिवाक्यात् स्वेष्टसाधन-त्वाद्यनुमिते परम्परया चक्षुरादिप्रयोजकत्वात्प्रत्यक्षस्यैवानुमित्युपजीवक वा-दौर्बल्यापत्ति, अदृष्टद्वारकस्योपजीव्यत्वस्य निवेशादिति चेन्मैवम्, चक्षुर्वर्ण-णादिपक्षकेष्टसाधनत्वानुमितिप्रयोज्यचक्षुर्वर्ण मद्द्रव्यत्तिविशेषस्य प्रत्यक्ष जात, न तु पुरुषान्तरीयचक्षुषा, ततद्विषयकप्रत्यक्ष-त्वावच्छेदेनानुमित्युपजीवकत्व-सम्भवात्। न च सविषयकान्यमद्वारीकृत्येत्यपि विशेषण वाच्यम्, विशुद्धमातृपितृजन्यत्वविषयपरोक्षज्ञानसापेक्षब्राह्मणत्वादिप्रत्यक्षस्य तथाप्य-कारणादिति।

तच्चिन्त्यम्, अतीन्द्रियविषयकानुमानेऽपि उपनयजन्यमानसव्याप्ति-प्रत्यक्षस्यावश्यमपेक्षितत्वात्। शाब्दादिपरामर्शेऽपि गदप्रत्यक्षस्यापेक्षणीय-त्वात्। तदुक्त दीधितिकृता— 'अनुमितयस्तु सर्वा साक्षात्परम्परया वाच्या यदि प्रत्यक्षोपजीवका" इति। वस्तुतो मानसपरामर्शादेव सर्वत्रानुमित्यङ्गी-कारादनुमितित्वावच्छेदेन प्रत्यक्षोपजीवकत्व मूलभमिति विभावनीयम्। यद्वा यत्प्रमाविभाजकोपाधिर्यत्प्रमाविभाजकोपाधिमद्व्यक्तिनिष्ठस्वप्रमाणता-वच्छेदकधर्मावच्छिन्नकारणताप्रतियोगिककार्यतावच्छालिव्यक्तिवृत्ति तज्जातीय तज्जातीयापेक्षया दुर्बलम्। अस्ति च व्याप्तिज्ञानाख्यप्रमाणफलविभाजकोपा-धिरनुमितित्वम्। इन्द्रियाख्यप्रमाणफलविभाजकोपाधिभूतजन्यसाक्षात्कार-त्वाश्रयचाक्षुषात्मकपरामर्शनिष्ठव्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिक कार्यतावच्छालितदनुमितिव्यक्तिवृत्ति। अतोऽनुमितिजातीय प्रत्यक्षापेक्षया दुर्ब-लम्। साक्षात्कारत्व तु न तथा, अनुमितित्वाश्रयव्यक्तिनिष्ठाया इन्द्रियत्वा-

वच्छिन्नकारणतायां अप्रसिद्धे । तदवृत्तिधर्मस्य तदवृत्तिकारणतानवच्छेदकत्वात् । तथा च यत्प्रमाकारणतावच्छेदक यत्प्रमाविभाजकोपाधिमद्व्यक्त्यवृत्ति तज्जातीय तज्जातीयापेक्षया बलवत् । अस्ति चेन्द्रियत्वमनुमितित्ववद्व्यक्तिवृत्ति, व्याप्तिज्ञानत्व तु साक्षात्कारत्वव्यप्रमाविभाजकोपाधिमच्चाक्षुषादिव्याप्तिज्ञानवृत्येवेति, न तयेति व्यभिचार । यत्प्रमोपजीवकवृत्तित्वमप्युपाधिविशेषण प्रकृतगमकतये देयमिति, तिष्ठतु तावत्, एतेन तात्त्विकत्वं कारणतायां न निविशते । तथा च खण्डनकृद्भिरुक्तम्—

पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥ इति ।

अस्यायमर्थ —अनन्यथासिद्धत्वे सति कार्यव्यवहितप्राक्कालावच्छेदेन कार्यव्यापकत्वमेव कारणत्वम्, अन्यथासिद्धव्यभिचारिणोस्तावतैव वारणात् । सत्त्वांशस्य तु न तत्र निवेशो वैयर्थ्यादिति परास्तम् । कारणतायां तदप्रवेशेऽपि असत्त्वस्य बोधयितुमशक्यत्वमित्यस्यैवेदानीमुक्तत्वात् । पल्लव पुरस्तात् ।

एवमुपजीव्यत्वमूलकसन्निपातलक्षणो विधिरनिमित्त तद्विघातस्येति महाभाष्योदाहृतन्यायविरोधोद्भावनमपि साध्वेवेति बोध्यम् । तथाहि सन्निपात सम्बन्धो लक्षण निमित्त यस्य तादृशो विधि स्वप्रवृत्तिनिमित्तस्यार्थस्य विघाते निमित्त न भवतीत्यर्थ । यथा शतानि महस्राणीत्यत्र "प्रणान्ता षट्" इति सूत्रे उपदेशपदानुपादानपक्षे षान्ता नान्ता च मत्या षट्संज्ञा स्यादित्यर्थे शतसहस्रशब्दाभ्या परस्पर "जश्शसो शि" इति शिभावे "शिसर्वनामस्थानम्" इति तस्य सर्वनामस्थानसज्ञाया च सत्या मत्वन्तस्याजन्तस्य च नपुसकस्याङ्गस्य नुमागम स्यात् सर्वनामस्थाने परे, इत्यर्थेन नपुसकम्, "नपुसकस्य झलच." इति सूत्रेण प्रकृत्यशे च अकारानन्तरनुमागमे शतन् सहस्रन् इति स्थिते, नकारान्तत्वे सति मध्यावाचकत्वरूपषट्संज्ञासम्पत्त्या "षड्भ्यो लुग्" इति सूत्रेण जश्शसोर्लोप प्राप्नोति, स चोक्तन्यायेन वार्यते । शिसन्निपातकृतनुमागमेन नान्तत्वमिद्धा हि षट्संज्ञा प्रवृत्ता नुमागमनिमित्तस्य शिभावस्य लोप न प्रवर्तयति, न ह्यत्र "प्रत्ययलोपे प्रत्ययलक्षणम्" इति न्यायेन शिलोपेऽपि स्थानिवद्भावेन निमित्त तिष्ठ येवेति कल्पयितु शक्यम् । 'न लुमताङ्गस्य" इति सूत्रेण लुमताशब्देन लुक् लुप्ते प्रत्ययलक्षणनिषेधात्, अग्निचिदित्यादौ तु क्विपो लुक् लुप्तत्वाभावेन प्रत्ययलक्षणप्रवृत्त्या "हरवरय पिनि कृति तुक्" इति नुगागमो भवत्येवेति वैषम्यम् । एव घुसज्ञासूत्रे उपादास्तेत्यत्र भाष्यकारमते एजिवये वर्तमानमात्व सिचोऽङ्कित्वमुपजीवति । आत्वप्रयुक्तघुसज्ञामादाय

तत्र "स्थाघ्वोरिच्च" इति इत्व प्राप्त न भवति, सिच किस्वावत्ते । तत्र च गुणप्रतिषेधेन एजिविषयाभावेनात्वस्य निमित्तव्याघातात् । अत आत्वस्योपजीव्य यदेजिविषयत्व तस्योपजीव्य यदकित्व तद्विघातक यदिदन्तस्य निमित्तभूता घुमज्ञामादायात्व न प्रवर्त्तयतीति स्थितम् । एव प्रकृतेऽपि मिथ्यात्वधर्मिघटादिग्राह्यप्रत्यक्षादिप्रामाण्यसन्निपात निमित्तीकृत्य तत प्रवर्त्तमाना विश्वमिथ्यात्वबोधकश्रुतनोक्तसन्निपातविघातस्य निमित्तमिति ।

यत्तु, नैतद्युक्तम्, प्रत्यक्षादेर्व्यावहारिकप्रामाण्यसम्बन्धस्योपजीव्यस्य श्रुत्या बाधाभावात् तात्त्विकप्रामाण्यसम्बन्धस्य श्रुत्या विघातेऽपि तस्याऽनुपजीव्यत्वादिति, तच्चिन्त्यम्, प्रामाण्यद्वैविध्ये मानाभावेन व्यावहारिकप्रामाण्यसम्बन्धस्योपजीव्यत्वासिद्धे प्रपञ्चितत्वात् । यदप्युपजीव्यक नोपजीव्यविघातकमित्येव सन्निपातन्यायार्थं ।तस्य चवाव स्फुट एव लोके उपजीवकेन वह्वचादिना तृणादेर्विघाताद् । अत एव 'अचि ह्रस्वश्च वा इत्यकृत्वा 'डिति ह्रस्वश्च' इति सूत्रद्वयकरण सन्निपातपरिभाषाया ज्ञापकमिति कौस्तुभेउक्तम्। तन्न्यायस्य व्यभिचारित्वेऽपि यदनिष्पत्त्यर्थं क्वचिदादर इति तन्न भाष्योऽन्ययाज्ञापकानुसरणवैयर्थ्यात् । तस्मात्कल्प्यमानेऽर्थे उपजीव्यविरोधो दोष । उपजीव्याविरोधेनैव कल्पनाया प्रवृत्तेर्यथानुभवादिकारणत्वमुपजीव्यसंस्कारस्य कारणत्वेन कल्पन तत्र विहितम् । यत्र तूपजीव्यविघातकत्व मानान्तरे क्लृप्त यथा वह्वचादेस्तृणादिविघातकत्वम्, प्रत्यक्षेणाद्वैतश्रुते प्रत्यक्षविघातकत्वमुक्तमानेन क्लृप्त तत्र तन दोष । यथा न तौ पशाविति शास्त्रस्य पशावाज्यभागप्रापकत्वेनोपजीव्यातिदेश प्रति विघातकत्वेऽपि यथा सर्वथा न तत्र विघातकत्व तथा प्रत्यक्षादे सत्यत्वविघातिकाप्यद्वैतश्रुतिर्व्यावहारिकसत्यत्वा न विहन्तीति, तदपि चिन्त्यमेव, वह्वचादेस्तृणादिविघातकप्रत्यक्षस्येवाद्वैतश्रुते प्रत्यक्षविघातकत्वकल्पकस्य मानस्यानिरुक्ते । न हि श्रुतिरेव तत्र मान तस्यास्तद्विघातकत्वस्य श्रुतेर्विवादग्रस्तत्वात् । नाप्यनुमान श्रुतेरद्वैततात्पर्यकत्वाभिश्चयदशाया तस्य प्रत्यक्षापेक्षया हीनबलत्वान्न तौ पशाविति दृष्टान्तश्च विषम , न तौ पशाविति वाक्य प्रकृतिवत्कुर्यादाज्यभागवर्जमित्यतिदेशवाक्यस्य तत्र कल्पनात्, अतिदेशस्याज्यभागातिरिक्ताङ्गमात्रविषयकत्वसिद्धे । आज्यभागस्य पर्युदासप्रतियोगिनोऽतिदेशविषयीभूताना चाङ्गान्तराणा मानान्तरसिद्धत्वात् । अतिदेशस्य प्रत्यङ्गव्यापारभेदाभावादेकव्यापारेणैव सर्वाङ्गप्रापकत्वाद्विशिष्याज्यभागप्रापकत्वाभावात् । यदि ह्येतद्वाक्यं तस्मात्तदातिदेशेनाज्यभागयोरपि तत्र व्याप्ति स्यात्, सति त्वेतस्मिन्नतिदेशे ह्येतद्विघ्नविषयकत्वावधारणात् । प्रकृते तु तदविकरणपुरस्कारेणैव तत्सत्त्वप्रतिपादकप्रमाणस्य विषयान्तर-

परत्वे व्यवस्थापयितुमशक्यत्वात् साधकप्रामाण्याभावसिद्धव्यावृत्तिवैय्य वाधकप्रमाणविषयस्य वार्थस्य वैषम्य नास्तीति ब्रह्मणापि दुर्वचत्वात्। प्रकृते तु वाध्यस्य तात्त्विकत्वस्योपजीव्यस्य च व्यावहारिकत्वस्य सत्यत्वनिष्ठस्य पूर्वमवलृप्तत्वात्। ज्ञापकानुसरणस्य च लौकिकन्यायस्य व्याकरणे व्याश्रयग्र-मित्यतदर्थत्वात्। यदागमास्तदुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इत्यादौ णरनिटि" इत्यादे तथैव ज्ञापकत्वाश्रयणात्, कष्टाय क्रमणे' इत्यादि-निर्देशान्यथानुपपत्त्या तु लक्ष्यानुरोधेन क्वचिन्न्यायोऽनादियत इति नोभयत्रापि ज्ञापकानुसरणवैयर्थ्यमिति बोध्यम्। इदमप्यत्रानुसन्धेयम्—द्वैतग्राहिप्रत्यक्ष-तदुपजीवकानुमानकर्मकाण्डसगुणोपासनावाक्यादिरूपबहुप्रमाणाना बाधाय-द्वैतवाक्यस्यैव प्रतीतावाधो युक्त। भूयसामनुग्रहो न्याय्य' इति न्यायात्।

यत्तु वदन्ति विप्रतिपिद्धधर्मसमवाये भूयसा स्यात्सधर्मत्वम्' इति न्यायस्य नाय विषय। भूयोविषयकप्रमाणानुरोधेन स्वल्पविषयकप्रमा णबाध इत्येवंतन्न्यायशरीरम्। न त्वेकस्मिन्नेव विषये भूयसा प्रमाणानामनु-रोधन स्वल्पप्रमाणबाध इति। सर्वत्रैव शब्दानुमानाभासाना भूयसा सम्भवात्। भूयोविषयैकप्रमाणेन स्वल्पविषयबहुप्रमाणानामबाधापत्तेश्च। तथाहि—पञ्चदशरात्रे पञ्चदशसुत्याके सत्रविशेषेऽग्निष्टुनामकेऽन्या-ग्नेयी सुब्रह्मण्या प्राप्ता। तस्य नामसाम्यादाग्नेयादग्निष्टुद्विकृतित्वात्त दुन्नाहे तु ज्यातिरायुरिति नामसाम्यादेवाहकाण्डोक्तज्योतिरादियागविकृति-त्वादैन्द्री सुब्रह्मण्या प्राप्ता। अन्येष्वेकादशस्वहस्सु द्वादशाहविकृतित्वात्त-दीया ऐन्द्री प्राप्ता। सुब्रह्मण्या च इन्द्र मायाहि इत्यादिनिगदविशेष। तत्र सुत्याकालीनसुब्रह्मण्यापाठस्य दिनभेदेनानुष्ठेयत्वान सन्देह। आतिथ्यान्ते उपगत्काले च सुब्रह्मण्यापाठस्य तन्त्रेण सर्वार्थत्वस्यैकादशे स्थापितत्वा-द्विरावप्रसक्तावग्निष्टुनामकस्य मुख्यत्वात् तदीयैवाग्नेयी सुब्रह्मण्या कार्या" इति प्रापय्यभाष्ये सिद्धान्तितम्। भूयोऽनुग्रहायैव कार्येत्याग्नेयीप्रापकाति-दशम्यैकाहविषयकत्वादैन्द्रीप्रापकस्य तु चतुर्दशाहविषयकत्वादिति। अत बहुविषयकत्वादेवात्र बाधो न तु बाधकबहुत्वादिति वैषम्यात्। प्रकृते तदुप-न्यासो न युक्त इति तन्नेद चिन्त्यम्, बहुविषयकत्वेन बाधेऽपि बहुबाधापेक्ष यैकबाधो न्याय्य, इत्यव न्यायार्थो न तु विषयस्यैव च बहुत्वमिति[१]। विषय-बाहुल्यऽपि बहुत्वस्यैव बाधनियामकत्वात्। तच्च विषयगत बाधक-गत वा इत्यन्यदेतत्। अत एवाधयवन्ध्ये स्थानस्थानिनोरुभयोरप्येकार्थ-

१ त्यपि—ब

शक्तावन्यायश्चानेकार्थत्वमिति न्यायविरोध इति मिश्रैरुक्तम्। व्याख्यात टीकाकृद्भिः—"यद्यप्येकस्य नानेकोऽर्थ इति न्यायार्थं इति, नानेकस्यैकार्थकत्वप्रतिक्षेपकत्वमिति न प्रकृतोपयुक्तम् तथापि न्यायमूल गौरवमित्युभयत्रापि तुल्यमित्यनेकस्य नैकोऽर्थं इत्यपि न्यायार्थं इति भवति। प्रकृतोपयुक्तम्' इति। कल्पतरुकारैरप्युक्तम्—"यथानेकार्थत्वमेकशब्दस्यान्याय्यमेवमेकार्थस्यान्याय्यमनेकशब्दत्वमित्यपि न्याय, ततो ज्योतिष्टोमे ज्योतिश्शब्दो नैकस्य कर्मणो वाचक इत्यर्थं"। अत एव बाधकबाहुल्यस्थलेऽपि विप्रतिषिद्धेत्यादिन्यायो बहुग्रन्थे लिख्यते। इति स्पष्टमेव स्मार्त्तादितत्तदनेकनिबन्धपरिशीलिनाम्। तथा चोत्तरमीमासाद्वितीयग्रथमाधिकरण दृष्टान्तयन्माधव आह—"प्रत्यक्षश्रुतिभिर्बह्वीभिरनुगृहीता बह्वयो मन्वादिस्मृतयो श्रुत्या कारणतामाचक्षते, गाङ्ग्यस्मृतिस्त्वेकाहीनबला वेति दुर्बलत्वात् सैव बाध्या" इति। मदप्याह—विप्रतिषिद्धेत्यधिकरणोत्तर मुख्य वा पूर्वचोदनालोकवदित्यधिकरणे चिन्तितम्। अध्वरकल्पासञ्ज्ञायामिष्टौ "आग्नावैष्णवमेकादशकपाल निर्वपेद्" "अपराह्णे सारस्वतीमाज्यस्य यजेत्" इति श्रूयते, तत्राद्य औपबद्धव्यकत्वाद् द्विदैवत्यत्वाच्चैन्द्राग्नविकार, ऐन्द्राग्नस्यापि वैकल्पिकद्वादशकपालवत्त्वाच्च, अतस्तस्य दार्शिक तन्त्रम्। द्वितीयस्त्वाज्यद्रव्यकत्वादुपांशुयाजविकार इति, आद्यस्य पौर्णमासिक तन्त्रम्। अत आज्यभागमन्त्रहविरभिमर्शनमन्त्राणा विरोध प्राप्त। "चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्याम्" इति वाक्येन द्वितीयाया सम्भ्यर्थवादो न 'पृथिवी होता द्यौरध्वर्युरन्तरिक्षमुद्गाता वृहस्पतिरुपवक्ता" इति चतुर्होतृमन्त्रस्य पौर्णमासीहविरभिमर्शने "अग्निर्होता अश्विनावध्वर्यू त्वष्टानग्नीत् मित्र उपवक्ता" इति पञ्चहोतृमन्त्रस्यामावास्याहविरभिमंशने विहिततया तद्विकारेऽपि तथा प्राप्तत्वात्। तत्र मुख्यत्वादाधाय दार्शिकाज्यभागादिमन्त्रा कार्या, मुख्यत्वन्यायापवादकस्यामुख्यभूयस्त्वादेरभावादिति सिद्धान्तयित्वा वार्तिकादौ मतान्तरमुक्तम्। विप्रतिषिद्धत्यादिसूत्रेणामुख्यभूयस्त्व मुख्यत्वापवादकमिति पूर्वपक्ष। मुख्य वेत्यनेन तु सिद्धान्त। मुख्यत्वमेवामुख्यभूयस्त्वापवादकम्, लोके बहुभिरमुख्यैर्मध्यस्यावाधनात्प्रत्युत तद्विपरीतदर्शनादिति युक्तश्चैतद्दुर्बलाना भूयस्त्वस्याकिञ्चित्करत्वात्। उक्तञ्च—मप्रतिपत्तस्थले न्यायभाष्यादौ "व्यापिपक्षधर्मते बल न तु भूयस्त्वमिति। दुर्बलता तु द्वैतसत्त्वप्रत्यक्षादेरनिश्चितप्रामाण्यकत्वादिना श्रुतैनिर्यनिर्दोषत्वादनन्यसरत्वाच्च प्राबल्यमिति भूयोऽनुग्रहन्यायोपन्यासो निरालम्ब एव" इति। तदपि चिन्त्यम्, अद्वैतविषयकतात्पर्यवत्त्वेन निश्चितश्रुतिविरोधे

हि प्रत्यक्षादेर्द्वैताशेऽनिश्चितप्रामाण्यकत्व स्यादिदानी तु तत्रैव विप्रतिपत्ति-रिति कथ प्रत्यक्षस्यैव तथात्व श्रुतेरप्यद्वैते प्रामाण्यानवधारणात्। अत उभयो प्रामाण्यसन्देहे किं भूयसामनुग्रह क्रियताम्, उत एकस्येति वीक्षायामुक्तन्यायेन द्वैतप्रत्यक्षादे प्रामाण्य श्रुतेरप्यन्यत्र तात्पर्यमिति कल्पनमेव युक्त विनिगमकस्योक्तत्वात्। नित्यनिर्दोषत्वादित्यादिक तु दत्तोत्तरत्वात्पुनरनुद्धाव्यमेव। मुख्यत्वमेवामुख्यभूयस्त्वबाधकमिति तु न मुख्य पक्ष, जघन्यानामपि भूयसामनुग्रहो न्याय्यो मुख्यानुग्रहश्च समसख्य-विषय इत्येव सिद्धान्तस्य मीमासकैरनुमतत्वात्। 'श्येनेन यजेत" इत्यत्र गुण-विधित्वपक्षे यथा वै श्येनो निपत्यादत्ते एव द्विषन्त भ्रातृव्य निपत्यादत्ते यमभिचरति श्यनेन इत्यस्यानुपपत्ति, श्येनद्रव्यस्यैव विधेयतया तस्यैव स्तोतव्यत्वात् स्वस्यैव स्वोपमानत्वानुपपत्ते।

न च रामरावणयोर्युद्ध रामरावणयोरिव" इतिवदौपचारिकभेद-मादाय तदुपपत्ति, उपनमस्थविध्युद्देशवर्त्तिश्येनपदस्य गौणत्वकल्पनापेक्षयोप-सहारस्यार्थवादेन तदङ्गीकरणस्य न्याय्यत्वादितिवाच्यम्, एकस्या एव व्यक्ते कालभेदेनोपमानोपमेयत्वकल्पने यथानया पूर्वं निपत्यादान कृतम्, तथा वैरिणाप्यादान क्रियत इत्यर्थापत्तरादत्त इति लट्प्रत्ययस्य भूतकालत्वलक्षणा, तथैवशब्दाभ्या समभिव्याहृतयोश्च श्येनपदसर्वनाम्नोभिन्नार्थकत्वेन प्रतीय-मानयोरेकार्थकत्वकल्पनरूपगौणदोषापत्ते, तदपेक्षयोपक्रमस्थेऽपि श्येनपदे गौणीमङ्गीकृत्य फलाद्देशेन श्येनाख्ययागविधिरेव स्वीकार्य। अन्योद्देश्येन शुद्धयास्वर्थकरणकभावनाविधिरिति द्वितीयविधिप्रकारस्य पूर्वपक्षाभिमतफलो-द्देशेन गुणविशिष्टकर्मविधानमिति प्रकारापेक्षयालघुत्वादिति कौस्तुभादाव ङ्गीकारात्। अत एव 'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि-ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्त आकाश प्रत्यस्त यन्त्याकाशोह्ये-तेभ्यो ज्यायानाकाश परायणम्" इति वाक्ये आकाशशब्दार्थो भूताकाश उत परब्रह्मति वीक्षायाम्—

प्रथमत्वात्प्रधानत्वादाकाश मुख्यमेव न।
तदानुगुण्यनान्यानि व्याख्येयानीति निश्चय॥

अस्य लोकस्य का गतिरिति शालावत्यप्रश्नस्योत्तर जैवलिमन्नो राजा आह—आकाश इति गतित्वेन प्रतिपाद्यमानस्याकाशस्य प्राधान्यात्तदनुरो-धेन 'सर्वाणीह वा इमानि" इत्यादिविशेषणानि नेयानि, तत्र यतश्च भाष्ये स्पष्ट बहूनामप्यप्रधाना प्रधानानुरोधेन नेयत्वात् नवमे हि पूर्वतन्त्रे चिन्तितम्। 'विप्रतिपत्तौ विकल्प स्यात् समत्वाद् गुणे त्वन्यायकल्पना एवदेशत्वाद्" इति

सूत्रम्, अग्नीषोमीये पशावेकपाशके द्वौ मन्त्रौ श्रूयेते, "अदिति पाशान् प्रमुमोक्ष्वेतान्" इत्येक, "अदिति पाशम्प्रमुमोक्ष्वेनम्" इति चान्य, तत्र प्रकृतावेकपाशिकाया बहुवचनन्यासमवेक्षार्थत्वाद्बहुपाशकेषु विकृतिभूतेषु पशुगणेष्वुत्कर्ष इति प्राप्ते, विशेष्यभूतस्य प्रातिपदिकस्याग्नीषोमीये समवेतार्थकत्वाद्विशेषणीभूतबहुत्वबोधि बहुवचन गुणवादस्याध्वर्या लक्षणाम्पथा कल्पनया तदवयवेषु वर्तिष्यत इति। सूत्रार्थस्तु उक्तविप्रतिपत्तौ एकवचनान्तबहुवचनान्तमन्त्रयोर्विकल्प स्यात्, समत्वात्पाशप्रातिपदिकस्योभयत्र तुल्यत्वात्। गुणे प्रत्ययार्थे तु अन्याश्यकल्पना लक्षणादिरूपा न तु तद्धलाम्मन्त्रोत्कर्षं प्रत्ययस्य पदैकदेशत्वात्प्रातिपदिकपारतन्त्र्येणोत्कर्षत्वायोगादिति पूर्वपक्षे भामत्यां सिद्धान्तितम्।

सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययो ।
पौर्वापर्यपरामर्शान्प्रधानत्वेऽपि गौणता ॥

प्रपञ्चमानस्य कारणे पृष्टे भूताकाशस्य तद्वचनमयुक्तम्, तस्यापि लोकमध्यपातित्वात्।

न च प्रश्नोऽपि भूतकार्यमानपर इति वाच्यम्, समञ्जातविरोधित्वेन लोकसामान्यविषयस्य प्रश्नस्योपसञ्जातविरोधिनोत्तरेण चरमप्रवृत्तेन सङ्कोचानुपपत्ते। किञ्चाकाशपदस्य मुख्यार्थत्वे सर्वशब्द कथञ्चिदल्पविषयो व्याख्येय, एवकारस्याप्यसामञ्जस्यम्, न ह्याकाशमात्र जलस्य कारणम्, किन्तु तेजोऽपि, अनभ्यापि नाकाशमेव कारण किन्तु तेजोजले अपि, ब्रह्मणि तु सर्वमुपपन्नम्। तयोऽपि तत्रैव मगच्छते ततश्चोपसहृत सर्वेषा लोकानामिति प्रश्नेनोपक्रमात्, उत्तरे च तत्तदसाधारणब्रह्मगुणपरामर्शात् पृष्टायाश्च गते परमयनमित्यसाधारणब्रह्मगुणोपसहारात्। भूयसीना श्रुतीना अनुग्रहाय, "त्र्येजदेक कुलस्यार्थे" इतिवद्धरमाकाशपदमात्रमनमञ्जसमस्तु एतावता हि बहुसमञ्जस स्यादिति, स्यादेतत्।

ननु सान्ये विरोधिना भूयसा न्याय इह तु प्रधानमाकाशब्दार्थो नाप्रधानैर्बहुभि[1]रपि बाध्येत। यदाह कश्चित्—

त्र्येजदेक कुलस्यार्थे इति राद्धान्तयन्ति ये।
शेषिबाधेन तैर्दृष्टमाकाशार्थे पृथिवीमिति ॥

तथाहेति कल्पतरकृद्भिरवधारितन्य न चाकाशस्य प्राबल्यमुत्तरे, किंतु पृष्टार्थत्वादुत्तरस्य लोकसामान्यगतेश्च पृष्टत्वात्परायणमिति च तस्यैवोप-

१ भूयोभि-ख।

सहाराद् ब्रह्मैव प्रधानम्। तथा च तदर्थं तदाकाशपद प्रधानार्थं भवतीति वाचकस्यान्यवान्वयस्य पर्यालोचनया तत्रापि प्रधानानुरोधेनैव गुणाना व्याख्यान प्रतीयत इति। अत्रोच्यते, तत्रोत्तरलिङ्गानुरोधेनाकाशपदोपमर्दे कृते सत्येव तस्य ब्रह्मरूपप्रधानार्थत्वमम्पत्ते उद्देश्यत्वेन प्राधान्यस्य ब्रह्मनिष्ठत्वेऽपि शब्दार्थत्वेन प्राधान्यस्याकाशेऽपि सत्त्वात्तत्रोक्तरीतेरावश्यकत्वात्। परमार्थतस्तु आत्मार्थे पृथिवी त्यजेदित्यस्यादरेऽपि नेहेत्यादिश्रुते स्वप्रामाण्यापवादप्रपञ्चमित्यात्वे तात्पर्यं दुर्घटमेवेत्यवधेयम्। तस्मिद्ध बाधकप्रमाणाना बहुत्वमपि नियामकत्वमिति। अत एवोपाधेर्दूषकताबीजविचारे सत्प्रतिपक्षेऽपि सत्प्रतिपक्षान्तरमुद्भाव्यत एव अन्यतरबाधप्राप्तौ बहुबाधकल्पनापेक्षया एकबाधककल्पनाया एव लघुत्वमिति विनिगमकप्रवृत्त्यर्थं तथोपन्यासात्। अत एव प्रमाणनिबन्धेऽस्माक सम्यक्चो बहवश्चत्युक्तमितीति मिश्रैरुक्तम्। दीधितावपि तत्रैवोक्तम्—यच्च प्रमाणत्वबोधादौ बहुत्वमपि बलमुक्त न तत्सत्प्रतिपक्षतायाम् किन्त्वेकबाधभङ्गप्रसक्तौ बहुपु तत्कल्पने गौरवमेकत्र लाघवमिति उक्तकल्पतरुवाक्येऽपि स्फुट एवाथ। अद्वैतसिद्धिकृद्भिरप्युक्तम्—

हेतवोऽभीष्टसिध्यर्थं सम्बन्धा बहवश्च ते।
स्वल्पा परस्य दुष्टाश्चेत्यत्र स्पष्टमुदीरितम्॥

लीलावत्युपायेऽपि—ईश्वरो नास्ति दुःखात्यन्ताभाववत्त्वाद् घटवत्।

न चेश्वरात्मत्वसाधकाना ज्ञानवत्त्वादीना भूयस्त्वाद् बलवत्त्वमिति वाच्यम्, व्याप्तिज्ञानमते हि बल न तु भूयस्त्वमिति, त च तुल्ये एवेत्येकेनैव भूयसामपि प्रतिरोधात्। किञ्चानात्मत्वसाधकानामेव भूयस्त्व ज्ञानादित्रयमानस्यैवात्मत्वसाधकत्व सुखादिपटकाभावस्यानात्मत्वसाधकत्वादित्युक्तम्। तस्मादन्यथोपपादयितुमशक्ताना भूयसा प्रमाणानामनुरोधेनान्यथोपपत्स्यापीयस प्रमाणस्यान्यथाकरणमिति न्याय प्रकृते सगत एवेति स्थितम्।

वेदाविरुद्धयुक्तीनामवँ तर्ककुतूहले।
अद्वैतार्थं चमध्यक्षविरोधाद्विक्षत श्रुते॥ २॥

*

१ °मद्वत°—क।

द्वितीयोंऽशः *

यत्पुनरत्र खण्डनादौ भेदप्रत्यक्षस्य श्रुतिजन्याभेदबोधप्रतिबन्धकत्वमाशङ्क्यात्तम्—"यत्तावदुक्तं भेदप्रत्यक्षेण श्रुतेर्बाध इति, तत्र युगपदेकपुरुषस्यानन्तभेदप्रतियोग्यनुयोगितावच्छेदकधर्मानुपस्थित्या सर्वपदार्थभेदज्ञानाभ्युपगमाद्यत्किञ्चित्पदार्थभेदज्ञानं वाच्यम्, ततश्च पदार्थान्तरभेदज्ञानं प्रति पदार्थान्तरीयभेदज्ञानस्य प्रतिबन्धकत्वाभावात्तत्रैव श्रुतेरवकाशात्। तथा च प्रतिबन्धप्रतिबन्धकत्वाभिमतयोर्नैदाभेदबुद्धयोरेवाभेदं श्रुत्या बोध्यं। तन्न प्रत्यक्षभेदबुद्धया स्वसत्तायां नाशे वा न श्रौताभेदधीप्रतिबन्धस्य स्वबोधकत्वानुपपत्तेः। बुद्धेः स्वप्रकाशत्वेऽपि स्वमात्रग्राहकतया घटपटौ भिन्नाविति बुद्धया स्वप्रतियोगिकभेदवत्तया स्वातिरिक्तव्यक्तेस्तत्प्रतियोगिकभेदवत्तया च स्वस्य ग्रहे सामर्थ्याभावात्।

न च स्वस्य विषयस्य च बुद्ध्या ग्रहात् स्वरूपात्मको भेदो गृहीत एवेति-वाच्यम्, इदं रजतमित्यादौ भ्रमस्थले पुरोवर्तिनो रजतस्य ग्रहेण भेदग्रहापत्तावभेदभ्रमोच्छेदप्रसङ्गात्। न च स्वरूपमेव न भेदः, किन्तु धर्मविशेषान्तर्निवेश एव, घटत्वादिज्ञानाद्भेदत्वप्रकारकज्ञानस्यैव वैलक्षण्यादिति वाच्यम्, बुद्धिविषययो स्वरूपग्रहेऽपि तुल्यत्वाद्। बुद्धे पूर्वं तन्निष्ठधर्मसन्निकर्षाभावात्। न च यथा बुद्धे स्वग्रहे सन्निकर्षानपेक्षत्वं तथा स्वधर्मभेदग्रहेऽपीति वाच्यम्, स्मृतित्वभ्रमादावपि तदापत्तेः। तत्रैव रजतमित्यादाविदमाद्यांशे ग्रहणत्वस्मरणत्वविवादो न स्यात्। ततश्च बुद्धिविषययोरभेद एव श्रुत्या निर्बाधो बोध्य। एवञ्च प्रत्यक्षविषयादन्यत्र लब्धपदाभ्रमद्वैतश्रुतौ परम्परया बाधकत्वाभिमतबुद्धेरप्रामाण्यनिश्चयात् तद्विषयेऽप्यभेदबोध श्रुत्येति सर्वभेदबुद्धिः। न च प्रमाणद्वयबलाद्भेदाभेदसिद्धिरेवास्त्विति वाच्यम्, एकमेवेत्येवकारविरोधात्तस्य भेदविनाशमात्रतात्पर्यकत्वादिति।

अत्राहुः—अतथा सर्वभेद क्रमेण बोध्यते किं वा युगपत्? नाद्य, श्रुतेर्विरम्य व्यापारायोगात्। तदाहुः "जन्मैव बुद्धेर्व्यापारो नार्थग्रहणरूपाया" इति। ततश्चार्थग्रहणे बुद्ध्यर्थव्यापारान्तरानपेक्षत्वात्पर्यायेण प्रवृत्त्यनुपपत्तेः। न द्वितीय, अशनो भेदग्राहिप्रत्यक्षविरोधात्। किञ्च चैत्रेण घटमठयोर्मैत्रेण

* समग्रोऽध्ययनशो नास्त्येव 'ख' पुस्तके।

दण्डपीठयोर्भेदग्रहे सति चैत्र प्रति घटमठान्येषा मत्र प्रति दण्डपीठान्येषाम भेदस्य श्रुत्या बोधन प्रतिपुरुषप्रतिनियतानेकवाक्यार्थप्रसङ्ग ।

यत्तु युगपदेव श्रुत्या सर्वपदार्थानामभेदो बुद्धयते ज्योतिष्टोमेन यजेत इत्यादावशत्रयविशिष्टभावनाया युगपद्बोधेऽपि धात्वर्थादीना करणत्वादि विषयकज्ञानाना क्रमेण विचारानुसारादुत्पत्तिवत्प्रकृतेऽपि सर्वाभेदज्ञान जाते प्रत्यक्षादिविरोधेन तद्विशेष्यकमप्रामाण्यज्ञान यदापतेत् तदा जायत तन्निरास कानामुपपादकज्ञानानामेव पश्चादुत्पत्त्या तत्पूर्वोपनतश्रौतसर्वाभेदज्ञान प्रामाण्य ग्रहसिद्धरिति तच्चिन्त्यम्, सर्वाभेदबुद्धित्वस्यैव प्रत्यक्षिकभेदबुद्धिप्रतिबध्यता वच्छेदकत्वेन प्रथम तदुत्पत्तेरसम्भवदुक्तिकत्वात् । भेदज्ञानाभावकालीनज्ञानस्य चाकिञ्चित्करत्वात् । पश्चाद् बाधकानुसन्धानवेलाया तस्याप्रमात्वकल्पनात् । एवञ्च बाधकज्ञानान्तरसत्त्वासत्त्वाभ्यामशत्रयविशिष्टभावनाबाधाद्वैषम्यस्य स्फुटतरत्वात् ।

यत्तु शाब्दबाधऽयोग्यतानिश्चयो न प्रतिबन्धक तथा च खण्डनम्—

अत्यन्तासदपि ज्ञानमर्थे शब्द करोति हि ।
अबाधात्तु प्रमामत्र स्वत प्रामाण्यनिश्चलाम् ॥ इति ।

अयमर्थ —अत्यन्तासति विपरीततया निश्चित कलहादिस्थल इति शेष । अबाधादिति कलहादिस्थलऽनाप्तोक्तत्वादिना वाक्यार्थज्ञानस्य भ्रमत्वेऽपि श्रौतज्ञानस्योक्तरीत्या भ्रमत्वज्ञानरूपबाधासम्भवादित्यर्थ । स्वत प्रामाण्यनिश्चला स्वत सिद्धप्रमात्वानि श्चयप्रामाण्याम् । विपरीतज्ञान रूपस्यायोग्यताज्ञानस्य प्रतिबध्यत्व न परोक्षापरोक्षसाधारणरूपेण प्रत्यक्ष स्थले इच्छाविषयस्याप्रतिबध्यतया तद्व्यावृत्तरूपेणैव प्रतिबध्यत्वात् । अत एवोक्त मणिकृता— प्रत्यक्षादावुत्पन्न ज्ञानेऽप्रामाण्यमासज्यत बाधेना नुमितौ तूत्पत्तिरेव प्रतिबध्यते इति । एवञ्च परोक्षस्यानुमितित्वनैव प्रति बध्यत्व विपरीतधीसत्त्वे उद्बोधकसत्त्वे मानाभावेन तदभावादेव स्मृत्यभावाप-त्तरननुगताद्बोधके मानाभावात् । भावे वा परोक्षत्वजातौ मानाभावना क्लृप्तत्वात् । इच्छाघटितस्मृत्यादिसामग्राप्रतिबध्यतावच्छेदकजात्या सङ्करात् । परोक्षत्वतज्जात्यो प्रत्यक्षस्मृतौ च परस्परात्यन्ताभावसमानाधिकरणया रनुमित्यादौ समावशात् ।

न च प्रत्यक्षान्यज्ञानत्वरूपमेव परोक्ष प्रतिबध्यतावच्छेदकम् प्रत्यक्षत्वतदन्यत्वादीनर विशेषणविशेष्यभाव निर्नियमकाभावेन गौरवात् । बाधस्थल शाब्दबाधस्य निश्चितत्वात् । अन्यथा कलहादिस्थल शब्दाय-

विशिष्टबुद्धित्वसामग्रीकल्पने गौरवात्। शाब्दव्यावृत्तरूपेणैव प्रतिबध्यत्व तदुत्पत्तिज्ञानहेतुत्वे च न मानम्, इतरकारणत्वे तद्विलम्बेन शाब्दधी-विलम्बप्रसङ्गत्वादिति। तदप वक्तव्यम्—विपरीतज्ञानत्वे शाब्दबोधोत्पत्तौ मानाभाव। वह्निना सिच्चेदादितत्तदनुवयस्य व्याप्यत्वे सर्वानुभव-सिद्धत्वात्। अत एव तत्प्रतियोगिकत्वे दोषितावृक्तम्—"दोष्याभावव्याप्य-त्वनिश्चयेन शाब्दादिबुद्धिप्रतिरोधाच्च' इति। तदभावव्याप्यवत्ताज्ञानस्यापि विरोधित्वे तदभावत्वज्ञानस्य विरोधित्वात्। एवच्च प्रत्यक्षान्यज्ञानत्वम-नुमितित्वशाब्दत्वोभय वा प्रतिबध्यतावच्छेदकीकृत्य विपरीतज्ञानस्य विरोधित्वकल्पनागौरवम्। अनुभवापह्नवेऽनुमितित्वस्यापि प्रतिबध्यता-वच्छेदकत्वकल्पनस्यैवानुभवते। एतेन तत्र शाब्दान्यविशिष्टबुद्धित्वसामग्रीकल्पने गौरव परास्तम्। निरनुयोज्यानुयोगत्वात्। यद्वा परोक्षत्वमेव प्रतिबध्यता-वच्छेदकम्। तथा च लिङ्गजन्ये दोषितावृक्तम्—"दोष्याभावनिश्चयमात्र-मनुमितिरनोविगमि, तत्र प्रतिबध्यतावच्छेदक परोक्षज्ञानत्वमेव लाघ-वाद्" इति। तत्तदनुमितिप्रतिबध्यतावच्छेदकस्य परोक्षस्मृतिव्यावृत्तत्वेनेच्छायटित-स्मृतिसामग्रीप्रतिबध्यतावच्छेदकजात्या सम साङ्कर्यानुपपत्ते।

न चैव बाधवोमत्वे स्मृतिप्रसङ्ग, इष्टत्वात्, कदाचिदनुभव प्रत्येव विशेषदर्शनविरोधादिति वनियुक्तोक्ते। अत एव विशेषणतावच्छेदकप्रकारक-निश्चयजन्यतावच्छेदकेनानुभवत्वेनापि न सङ्कर, तद्व्याप्यापरोक्षत्वजाते: जन्यप्रत्यक्षमानवृत्तिजातेरव तज्जन्यतावच्छेदकत्वाभ्युपगमे तु तद्विरुद्धत्वेनैव तत्तज्ज्ञानकारणात्। न च तथाप्यनुमित्यादिविशिष्टानुमितिसामग्रीप्रतिबध्यता-वच्छेदकत्वेन सिद्धानुमितित्वज्ञानवृत्तिजात्या सङ्कर, तनानुमित्यन्यज्ञानत्व-स्यैव प्रतिबध्यतावच्छेदकत्वस्यागतया कल्पनात्, अन्यथा प्रत्यक्षेच्छाविशिष्ट-प्रत्यक्षसामग्रीप्रतिबध्यतावच्छेदकत्वादिना सिद्धजात्या साङ्कर्यस्य दुर्वारत्वात्। प्रत्यक्षत्वजातस्य प्रतिबध्यतावच्छेदकत्वेऽपि तु गौरवम्, विशेष्यविशेषण-भावे विपर्यये ऽन्यवच्छेदकतायां व्यानव्यवृत्तित्वपक्षेऽवच्छेदकैक्येन कारण-तासिद्धानावात्। महानसीयवह्नयभावीयवह्निवृत्तिप्रतियोगितायां महान-सीयवह्नित्वोभयसामानाधिकरण्यस्य ग्रन्थेषु दर्शनात्। अनुद्भूतत्वभेद-कूटभेदेनानुभवत्वेन बहिरिन्द्रियजन्यज्ञानत्वेनालौकिकप्रत्यक्षत्वावच्छिन्ने हेतुत्वस्य मणिकारादिभिरभिधानात्।

अथ प्रत्यक्षभेदनिरुक्तावच्छेदकत्वं भेदत्वावच्छिन्नम्, जात्यनिरुक्त-पदार्थनिष्ठावच्छेदकत्वस्य किञ्चिद्धर्मावच्छिन्नत्वनियमात्। ज्ञानत्वनिरु तन्नि-

स्वच्छिन्नम् एव ज्ञानत्वनिष्ठमवच्छेदकत्व समवायावच्छिन्न भेदनिष्ठ तु विशेषणतावच्छिन्नमि यवच्छिन्नत्वानवच्छिन्नत्वभेदे चावच्छेदकावच्छेदकसम्बन्धभेदेनोक्तावच्छेदकत्वस्य न व्यासज्यवृत्तित्वमुपपद्यते। यत्तु स्वावच्छिन्नप्रतियोगिताकभेदसमवायोभयघटितसामानाधिकरण्येन प्रत्यक्षत्व-विशिष्टज्ञानत्वमेव प्रतिबध्यतावच्छेदकमस्तु। अन समवायोऽवच्छेदकता-घटक उक्तसामानाधिकरण्य त्ववच्छेदकतावच्छेदकघटकसम्बन्ध। न चात्रापि विनिगमनाविरह, उक्तगुरुसम्बन्धस्यावच्छेदकत्वापत्ति। अवच्छेदकतावच्छेदकसम्बन्धस्तु तत्रापि समवायत्वावच्छिन्नप्रतियोगिताक-भेदघटितसामानाधिकरण्यमेवेत्युभयत्र तत्साम्यम्।

न च प्रत्यक्षत्वावच्छिन्नभेदस्य विशेषणतावशेषसमवायघटितसामाना-धिकरण्येन निवेशमादाय विनिगमकाभाव इति वाच्यम्, अवच्छिन्नत्वांशे प्रत्यक्षत्वप्रतियोगिकत्वस्य भेदांशे विशेषणतावशेषस्य चाधिकस्य निवेशा-दिति तन विषयितासम्बन्धन प्रत्यक्षत्वावच्छिन्नभेदस्यातिप्रसक्तितया समवायावच्छिन्नस्ववृत्तिप्रतियोगितावच्छेदकतावभेदसमवायाघटितसामाना-धिकरण्येनैव ज्ञानत्वांशे प्रत्यक्षत्वस्य निवेशनीयतया गौरवस्य दुर्वारत्वात्, इति चेन्मैवम्, प्रकृते व्यासज्यवृत्त्यच्छेदकत्वे बाधकाभावात्।

न चावच्छिन्नत्वानवच्छिन्नत्वभेदेन तद्भेद, न हि तदवच्छेदकत्वैक्ये तन्त्रम्, दण्डचक्रत्वादावप्यवच्छेदकत्वस्य व्यासज्यवृत्तित्वापत्ते, समवायस्यैव तनोभयावच्छेदकतावच्छेदकसम्बन्धत्वात्, जाति वन तदङ्गत्वस्य निरवच्छि-न्नत्वाच्च। किन्त्ववच्छेद्याधिकरणेऽवच्छेदकतापर्याप्त्यधिकरणद्वयस्य विद्य-मानत्वमेव कारणताधिकरणे दण्डादौ तदवच्छेदकत्वापत्त्याप्त्यधिकरणस्य चक्रत्वादेरवृत्त्या उक्तदोषाभावात्। प्रकृत त्वनुमित्यादौ प्रतिबध्यताधिकरण प्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणस्य प्रत्यक्षान्यत्वज्ञानत्वाभयस्य विशेष-णतासमवायाभ्या वृत्त्यावच्छेदकत्वस्य व्यासज्यवृत्तित्वमुपपन्नमेव। अत एवाक्षप्रामाणिकग्रन्था सङ्गच्छन्ते। अत एव घटपटौ न स्त इत्यत्र घटत्व पटत्व द्वित्वच्चति त्रितयपर्याप्तमवच्छेदकत्वम्, घटौ न स्त इत्यत्र तु घटत्व द्वित्व चेत्युभयपर्याप्तमिति पक्षमुपन्यस्य प्रतियोगिताधिकरणेऽवच्छेदक्ता-पर्याप्त्यधिकरणस्यावृत्ते कथ प्रतियोगितावच्छेदकत्वमिति दूषण दीधिति-टीकाकारैरुपन्यस्तम्। तस्मादवच्छेदकसम्बन्धभेदादिनावच्छेदकत्वभेदकल्पन निर्मूलम्, अवच्छेदकत्वस्य क्वापि व्यासज्यवृत्तित्वानभ्युपगमन सम्बन्धैक्या-भावादस्तद्भेदापादकत्वसिद्धे। तदभेदेऽप्यवच्छेदकत्वैक्याभावस्योक्तत्वात्।

एतेन वह्निप्रकारकशाब्दत्वादीना तदभावव्याप्यवत्तानिर्णयप्रतिबध्यतया शाब्दत्वादिकमवच्छेदकम्, वह्निप्रकारकत्वत्ववच्छेदकतावच्छेदकम्। न च वह्निप्रकारकत्वस्यातिप्रसक्ततया कथ तथात्वमिति वाच्यम्, अनुमितित्वादिनिष्ठसामानाधिकरण्येन तथात्वऽपि शाब्दत्वादिनिष्ठसामानाधिकरण्यसम्बन्धन तस्यानतिप्रसक्तत्वादवच्छेदकत्वावच्छेदकत्वोपपत्तरित्यादिकमपि निरस्तम्, सामानाधिकरण्यादृश्यवच्छेदकत्वाधिकरणनिष्ठत्वनिवेशे गौरवात्। अभ्युपेत्य तु ब्रूम—आदित्यो यूप इत्यादावपि कथ न यथाश्रुतार्थविरोध. तत्त्वमसि इत्यादावपि तन्मते भागत्यागलक्षणानुपपत्तिश्च। अद्वैतवाक्यजन्यशाब्दबुद्धावेवायो यतानिश्चयो न प्रतिबन्धक इत्यस्य ब्रह्मणापि दुर्घटत्वात्। एतदन्यशाब्दबोधत्वस्य प्रतिबध्यतावच्छेदकत्वे गौरवाच्च भवत्येव तत्र शाब्दबोध। पर तु प्रत्यक्षेण बाधनिर्णयात्तत्राप्रामाण्य गृह्यत इति चेत्, अत्र कथमबाधो निर्णीत, स्वेनैव स्वस्मिन्नबाधनिर्णये उभयत्रापि साम्यात्। वैदिकवाक्योत्थस्यापि बोधयोरविशेषात्। वेदतात्पर्यविषयत्वस्य च विचार्यमाणत्वात्, इत्यास्ता तावत्। किञ्च सर्वत्वस्यैकस्याभावात् कथ तदवच्छिन्ने तदवच्छिन्नमिव बोधनम्, सर्वपद हि बुद्धिविषयतावच्छेदकत्व यावत्सु धर्मेषु गृहीत तद्धर्मांशे निरवच्छिन्नप्रकारताकबोधजनकम्। एकपुरुषस्य च घटत्वाद्यनन्तधर्मांशे निरवच्छिन्नप्रकारताकोपस्थितेर्जन्मसहस्रेणाप्यसम्भवात्। यस्य यावतामुपस्थितिस्त प्रति तावतामेव परस्परावच्छिन्नादभेदबोधने तु वाक्यार्थस्याव्यवस्थितत्व त्वदिष्टासिद्धिश्च। अहो महदाश्चर्य यद्भेदप्रतियोगितानुयोगितावच्छेदकानन्तधर्माणामेकपुरुषस्य युगपदनुपस्थिति पर प्रत्युद्घाव्या, भेदबोधे तदप्रतिसन्धान प्रातिस्विकरूपेणोपस्थितेर्विना भेदस्यापि ग्रहानुपपत्ते।

यदप्यन्यदुक्तम् "न च तद्बुद्धया स्वस्य स्वविषयस्य च भेदाग्रहेऽपि बुद्धयन्तरेण तयोर्भेदग्रहसम्भवात्तत्रापि नाद्वैतश्रुतेरवकाश इति वाच्यम्, तद्बुद्धिविषययोर्भेदग्राहिबुद्धचन्तरेणापि स्वस्य स्वविषयेण भेदानवगाहनात्तत्रैव श्रुते सावकाशत्वात्। न च तद्बुद्धितद्विषयबोधोऽपि बुद्धयन्तरेण ग्राह्य, एव तद्बुद्धितद्बुद्धिविषयभेदोऽपि बुद्धयन्तरेणेति वाच्यम्, विषयान्तरसञ्चारानुरोधात्सुषुप्त्यनुरोधाद्वा कुत्रचिद् भेदज्ञानविच्छेदकस्यावश्य वाच्यतया तद्बुद्धितद्विषययोरभेद बोधयन्त्या एव श्रुते. यथोक्तप्रकारेण सर्वभेदे पर्यवसानात्। तदेतदुक्तम्—

सुदूरधावनभ्रान्ता बाधबुद्धिपरम्परा।
विनिवृत्ताद्वयाम्नायै पाणिग्राह्यैर्विजीयते॥ इति।

अयमर्थः—चरमधीमिनज्ञानरूपे मुद्गरदेशे भेदावगाहनरूप धावन कृतवत्यपि सुषुप्तिलोपाद्यापत्तिरूपभ्रान्त्या चरमधीरूपदेशे भेदावगाहनरूप धावन कर्तुमशक्ता बाधबुद्धिर्ज्ञानस्य परम्परा श्रेणी निवृत्तौ तस्या अद्वयश्रुति-बाधकत्वायोग्यत्वप्राप्तौ पाणिग्राहैर्बाधबुद्धिपरम्परा विरोधिविषयकत्वरूप-बाधनावच्छेदकयुक्तरद्वयाम्नायैर्विजीयते बाध्यते, इति ।

न चैकपुरुषेण तद्भेदानवबोधेऽपि पुरुषान्तरेण तद्भेदग्रहसम्भवात् तत्रापि श्रुतेरवकाश इति वाच्यम् परकीयबुद्धेस्वप्रत्यक्षत्वात् । न च बुद्धित्व स्वाश्रयवृत्तिद्वित्वभेदग्राहकप्रमाणव्याप्यमिति चरमबुद्धेरपि बुद्ध्यन्तरेण भेद-सिद्धिरिति वाच्यम , व्याप्तिग्रहाभावेन चरमबुद्धौ भेदग्रहानुपपत्ते । अन्यथा सामान्योपाधिप्रवृत्तव्याप्तिज्ञानेनैव पक्षे साध्यविशेषसिद्धावनुमानमानविलया-पत्ते । न च तज्जन्यानुमित्यैव भेदसिद्धिरिति वाच्यम् अनुमिते स्वान्यज्ञान-विषत्विकाया स्वस्य विषयभेदानवगाहित्वात्तत्रैवाद्वैतश्रुतिप्रवृत्तिसम्भवात् । न च तदनुमितिमपि पक्षेऽन्तर्भावानुमितिस्तु विवादपदम्, सर्वा बुद्धय स्वविषयाद्भिन्ना, बुद्धित्वात् घटपटबुद्धिवदिति वाच्यम्, विधिविषययोरेवाऽ-भेदस्य श्रुत्या बोधयितुं शक्यत्वात् ।

न च सर्वा बुद्धि सर्वतो भिन्ना बुद्धित्वाद्, बुद्ध्यन्तरवदिति वाच्यम्; स्वभेदस्यापि सिद्धौ बाधात्, दृष्टान्ते स्वभिन्नत्वाभावेन साध्यवैकल्यात् । स्वभिन्नसर्वभेदस्य साध्यत्वे त्वद्वैतवादिन प्रति विशेषणासिद्धि । यत्किञ्चित् प्रतियोगिकभेदसाधन त्वनुगमस्य भेदाप्रतियोगिन्येवाद्वैतश्रुतेरवकाशात् । उक्तञ्च—

हेत्वाद्यभावसार्वज्ञे सर्व पक्षतया स्थिते ।
किञ्चित्तु त्यजता दत्ता सैव द्वारद्वयश्रुते ॥ इति ।

अयमर्थः—सर्वस्य पक्षत्वे हेतोरभाव , हेतोरपि पक्षत्वेन, तस्मिंस्तत्त्व-सिद्धत्वात्, अद्वैतमेव साध्यहेत्वोरविशेषेण साध्याविशेषश्च, साध्यस्य पक्षतयाद्वाध , हेतुपक्षयोरैक्यात्स्वरूपासिद्धि ,. हेतुसाध्ययोरैक्यादाश्रयासि-द्धिश्च । किञ्च सर्वस्य भेदप्रतियोगित्वानुयोगित्वेऽपि तत्र प्रत्येकधर्मावच्छिन्न एव साध्ये निवेश्ये, अन्यथा किञ्चिद्धर्मावच्छिन्नप्रतियोगित्वानुयोगिक-भेदमादाय सिद्धसाधनायोन्तरयोरापत्ते । तथा च तत्तदसाधारणधर्म-प्रकारकोपस्थित्यङ्गीकारे सर्वज्ञत्वापत्ति । पूर्वं सर्वं पक्षयितुं प्रवर्त्तमानेन त्वयोक्तरीत्याद्वैतवादिना दोष आपादिते सति किञ्चिद्धस्तु त्यजता पक्षाद्बहिष्कुर्वता किञ्चिद्धर्मावच्छिन्नप्रतियोगित्वानुयोगित्व एकभेद साध्यः ।

तथा च यत्र तद्भेदो न सिद्धस्तत्रैवाद्वैतश्रुतेरवकाशात् । पूर्वोक्तरीत्या पुनः सर्वभेदपर्यवसानमिति ।

नन्वन्त्यार्थापत्तिर्भेदग्राहिका, तथाहि—घटपटौ भिन्नाविति प्रत्यक्षं भेदविषयकमित्यतिवादम्, यदि च तदद्वैतज्ञानात् स्वविषयाच्च भिन्नं न स्यात्तदाभेदविषयकं न स्यात्, भेदप्रतियोग्यनुयोगिनोर्घटपटयो प्रत्यक्षाभिन्नत्वाभावे तयोर्भेदानुपपत्तेः । न हि तन्मादृत्यन्ताभिन्नयोरर्थयो परस्परभेदोपपत्तिरिति सिद्धो बुद्धिविषययोर्भेद । एवञ्चाद्वैतज्ञानभिन्नत्वाभावे उक्तप्रत्यक्षस्यापि घटपटभेदविषयकत्वापत्त्या तद्भेदविषयकत्वं न स्यात्, इति वाच्यवाचकत्वाभिमतभेदाभेदबुद्धयोरभेदबोधन श्रुत्या न सम्भवतीति चेन्नैवम् ; अद्वैतज्ञानयथोक्तप्रत्यक्षयोर्भेदव्यतिरेकेणोक्तप्रत्यक्षस्य घटपटभेदविषयकत्वानुपपत्तिज्ञानेन तयोर्भेदग्रहेऽप्यनुपपत्तिज्ञानाद्वैतज्ञानयोर्भेद विना क्वचिदर्थस्यानुपपत्तिज्ञानाभावादुक्तार्थापत्त्यद्वैतज्ञानयोर्भेदानवगमे तयोरेवाभेदस्य श्रुत्या बोधनसम्भवात् । न च तत्राप्यनुपपत्त्यन्तरेण भेदग्रह इति वाच्यम् ; सुषुप्तमनुरोधेन क्वचिद्भिथ्यात्वावश्यकत्वे चरमार्थापत्त्यद्वैतज्ञानयोरभेदबोधने श्रुतेर्निर्बाधकत्वात् । तदुक्तम्—

आद्यधीवेद्यभेदीयाप्यन्यथानुपपन्नता ।
स्यज्ञानापेक्षणादन्ते बाधते नाद्वयश्रुतिम् ॥ इति ।

आद्या घटपटयोर्भिन्ना इति धी, तद्वेद्यभेदस्यान्यथानुपपत्तिरद्वैतज्ञानात् । घटपटाभ्याञ्च तत्प्रत्यक्षस्य भेदाभावे तत्प्रत्यक्षस्य भेदविषयकत्वमनुपपन्नमित्येवरूपा अद्वैतश्रुति न बाधते, तान्ता तत्प्रत्यक्षाद्वैतबुद्धयोरभेदानवगमप्रयुक्तार्थापत्त्यद्वैतज्ञानयोगेनेतरभेदस्योक्तरीत्या बोधयितुं शक्यत्वात्, अर्थापत्त्यन्तरेण तद्भेदज्ञानानुसारेण चरमार्थापत्तावेव श्रुतेरवकाश इति दिक् ।

अत्रेद वक्तव्यम्—एकपुरुषस्य बाधधीविच्छेदेऽपि चरमबुद्धितद्विषयोरभेदेति श्रुतेः प्रवृत्तिर्न युक्ता, तावन्मात्रस्याकिञ्चित्करत्वात्तद्बोधाप्रामाण्यस्य पुरुषान्तरीयभेदज्ञानेनैव सुसाध्यत्वात् । न च तत्र पुरुषान्तरस्यापि भेदबुद्धिर्न भवतीति वाच्यम्, परात्मतद्गुणाना परायोग्यतया तदभावस्यापि त्वया प्रत्यक्षेणावगन्तुमशक्यत्वात् । नाप्यनुमानमनिरुक्तेः । एतदन्यपुरुषबुद्धिश्चरमबुद्धितद्विषयभेदग्राहकत्वरहिता, बुद्धित्वात्, एतद्बुद्धिवदिति चेन्न; सामानाधिकरण्यमात्रेण साध्येन घटादिबुद्धौ सिद्धसाधनात् । अवच्छेदकावच्छेदेन तथात्वे तु वक्ष्यमाणरीत्या स्वबुद्धावेव बाधात् । किञ्चात्र पूर्वाचार्यै-

रुक्तम्—"स्वकीयबुद्धिद्वाराविश्रान्तौ पुरुषान्तरेण भेदग्रहसम्भावनयैव श्रुतेर-प्रवृत्ति । न च सम्भावनया सहस्रघटाद्यभेदश्रुतेरवकाश । तत्रापि पुरुषान्तर-भेदग्रहसम्भावने त्वनवस्थातद्विरहावप्यावयोस्तुल्यावेवेति ।

यत्तु भेदप्रमाणसद्भावसम्भावनाया अद्वैतश्रुत्यैव निवृत्तिरिति तदसत्, तस्या अद्य यावदभिमतार्थसिद्ध्या तदंशे वैकल्यात् । किञ्च—

सत्या भिद प्रतिपदि प्रतिरोधबुद्ध्या भेदग्रहे पुनरसत्युपजीव्यहान्या ।
अद्वैतवानुभयथापि वदर्थ्यतेऽस्या सामर्थ्यमस्तु निजवस्तुनि कुत्र वस्तुम् ॥

तथा हि यस्या बुद्धे स्वविषयेण सममभेद श्रुत्या बोध्यते तस्या स्वविषयेण भेदग्रहस्तवास्ति वा न वा ? नाद्य, तस्यैव प्रतिबन्धकत्वात् । नान्त्य, अनुपस्थितस्य भेदस्य निषेधानर्हत्वात् ।

यत्त्वप्रसक्तप्रतिषेध इति, किं प्रतियोग्यप्रसिद्धि, किं वा निष्प्रयोज-नत्वम् ? नाद्य, अन्यत्र प्रसिद्धस्यैव भेदस्य भेदत्वेनोपस्थितस्य परस्परप्रति-योग्यनुयोगिभावेनान्यत्र निषेधसम्भवात् । न हि तत्रैव प्रसिद्धिस्तत्र निषेध-मात्रोच्छेदप्रसङ्गात् । न द्वितीय, अनर्थनिवृत्तरेव प्रयोजनत्वात् । "नान्तरिक्षे अग्निश्चेतव्य" इत्यादौ स्तुतिमात्रप्रयोजनेनाप्यप्रसक्तप्रतिषेधदर्शनाच्चेति, तद-सत्, अन्यत्र भेदप्रसिद्धिमात्रेणाप्यद्वैतश्रुतितादवस्थ्यात् । तदुक्तमाकरे "क्वचिदपि भेदासिद्धावनिर्वचनीयख्यातेरप्युत्पत्तुमयोग्यत्वात्, अभेदज्ञानस्य तावेव शानोनित्यनेव सामान्यधर्मग्राहकतयाऽपि पिण्टनाभमम्भवात्, भेद-प्रत्यये तु तल्लाभासम्भवात् । न च भेदधीमात्रस्य भ्रमत्वेनापपत्ति, भ्रान्तेरनु-भूतिपूर्वकत्वनियमाद्' इति । किञ्च भेदज्ञाने प्रतियोग्यनुयोगिनोरुपस्थितौ च सत्यां भेदविशिष्टज्ञानसामग्र्या सम्पूर्णत्वात्सिद्धा प्रतिबन्धकसम्पत्ति । आरा-पस्प तज्ज्ञानमिति चेन्न, भेदाभावस्य तज्ज्ञानान्तरासिद्धतया भ्रमत्वकल्पन मानाभावात् । न चैव निषेधमात्रोच्छेदापत्ति वह्नवादीनामितरमाकाङ्क्षत्वा-भावात्, भेदस्य चोपस्थितस्य प्रतियोग्यनुयोगिमाकाङ्क्षत्वेन बाधकाभा-वेन च वैषम्यात् । अत एवान्योन्याभावगर्भाया व्याप्तेरुपस्थित्यधी लघुत्वाभ्यु-पगम, तत्तदसाधारणधर्मप्रकारकोपस्थितिरेव भेदविषयकत्वनियमकल्पनाच्च तथैवानुभवात् । अत एवेद रजतमित्यादावभेदभ्रमोच्छेदापत्तिरिति निरस्तम् । अत एव श्रुतित्वेन पुरोवर्तिन उपस्थितौ तादृशभ्रमानुदयनियम इति न किञ्चिदेतत् ।

यत्त्वनर्थनिवृत्तेरेव प्रयोजनत्वादिति, तन्न, कारणम्यैवानुपपत्तौ प्रयो-जनपर्यवसाने प्रमाणाभावात् । यत्तु नान्तरिक्ष इत्यादि, तन्न, "न पृथिव्यामग्नि-

श्येतव्यो नान्तरिक्षे न दिवि" इति वाक्ये यथान्तरिक्षे दिवि च चयनमप्रसिद्धं तथा हिरण्यरहितायां भुवीति बोधनद्वारा "हिरण्य निधाय चेतव्यम्" इति विहित-हिरण्यस्तुतौ तात्पर्येण निषेधे तदभावात्, प्राथमिकवाक्यार्थबोधमात्रस्य स्वत्वा-प्युदये स्मृतिविरहादकिञ्चित्करत्वात्। अन्यथा दर्शपूर्णमासप्रकरणे 'आज्य-भागावग्नीषोमाभ्या यजति" इति विधाय "न तौ पशौ करोति न सोमे" इति श्रूयमाणे वाक्ये न सोम इत्यंशो न प्रतिषेध, सोमे तयो प्राप्त्यभावात्। नापि सोमाङ्गदीक्षणीयादिद्वारेण प्रसक्ति, सोमाङ्गेऽग्नीषोमीयपशौ पश्वन्तरे च तत एव निषेधसिद्धया न पशाविति निषेधान्तरवैयर्थ्यात्। तस्मान्नित्यानुवादो नान्तरिक्ष इतिवत् यथा सोमे आज्यभागौ न स्त तथा पशावपि न कार्या-विति दशमाष्टमाधिकरणविरोधात्' तत्राप्यप्रसक्तस्यैव निषेधोपपत्ते। अत एव वैदिकनिषेधे तदधिकरणान्तर्भावेनैव निषेध्यप्रसक्तिरपेक्षिता। अन्यथा विकल्पापत्तिभयेन नानुयाजेष्वित्यादौ पर्युदासलक्षणानामङ्गीकारा-पत्तेः। निषेधमात्रस्य ह्रदे वह्निर्नास्तीत्यादिलौकिकवाक्ये उपपत्तावपि वैदि-कस्य नित्यानुवादमात्रत्वे वैयर्थ्यापत्ते।

न च वैदिकेऽपि वैदिकप्रसक्त्यैव यत्र निषेधोपपत्तिस्तत्रैव विकल्पापत्ति', प्रसञ्जकनिषेधयोस्तुल्यबलत्वात्, लौकिकप्रसक्तौ तु वेदेन दुर्बलस्य प्रसञ्ज-कस्य बाधाद्विकल्पनापत्त्या निषेध एव "न कलञ्जं भक्षयेद्" इतिवदिति वाच्यम्; तत्रापि तृप्तिसाधनत्वेन लोकत प्रसक्तस्य कलञ्जभक्षणस्य निषेधेन बलवद-निष्टाननुबन्धित्वमात्रबोधनात्। अत एवेष्टसाधनत्वमात्रस्य विध्यर्थत्वे निषेधानुपपत्त्या बलवदनिष्टाननुबन्धित्वमपि विध्यर्थं इति सिद्धान्त.। अत्र तु तत्रैव प्राप्तस्याभेदस्य तत्रैव निषेधे प्रापकस्यात्यन्तबाधापत्तेरित्यल पल्लवेन।

किञ्च चरमबुद्धितद्विषयको पुरुषान्तरेण भेदग्रहे मानाभाव इत्य-युक्तम्, सर्वं सर्वस्माद् भिन्नमिति वाक्यस्य तत्तत्पदार्थानां स्वस्माद् भेदमात्रे तात्पर्यम्, न तु परस्पराभेदेऽपि इति मयोच्यमाने तदौत्तराभावात्। विशेष्य-तावच्छेदकावच्छेदेन विधेयान्वयस्य चरमबुद्धिविषये श्रुतिप्रवृत्ति वदता त्वया-प्यनुपपादितत्वात्। विशेष्यतावच्छेदकसामानाधिकरण्यमात्रेणाभेदान्वयस्यो-क्तरीत्यापि सम्भवात्, 'घटत्वावच्छिन्नस्य घटत्वावच्छिन्नेनाभेद इत्यादिरीत्या-वच्छेदकावच्छेदेनाप्यन्वयस्य वक्तव्यत्वाच्च। अथ यमोर्भेदो लोकसिद्धस्तयो-रेवाभेदे तात्पर्यम्, अन्यथा ज्ञातज्ञापकत्वेन वैयर्थ्यापत्तिरिति चेत्तर्हि यत्र त्वयाद्यं तत्रैवकाश उच्यते, तयोर्भेदो लोकसिद्धोऽस्ति न वा, नान्त्य.; उक्तदो-षात्। अथाद्यपक्षमङ्गीकुरुते तर्हि चरमबुद्धितद्विषययोर्भेदः परकीयबुद्धिग्राह्यो

इत्यत्र त्वद्वाक्यस्यैवाऽस्माभि: प्रमाणत्वेनाऽऽदितत्वात्सिद्धमस्मदिष्टमिति चिन्तय तत्र प्रत्यक्षानुमानयो प्रमाणत्वनिर्वासनदुर्व्यसनेन। न च मद्वाक्य त्वा प्रति वादिवाक्यत्वात्कथ प्रमाणमिति वाच्यम्, बाधकाभावे वादिवाक्यस्यापि प्रमाणत्वात्। एव श्रुतिविषयत्वेन तदनिमतेऽन्यत्रापि बाध्यम्। तस्मात्—

सिद्धसाधनबाधाय वाचोयुक्त्या प्रवृत्तया।
मूलबाध समानेत इति जानीत न प्रियम्॥

तथा हि—

यस्तु स्वप्रतियोगिकस्वगतभिद्धर्मावच्छिन्नबोधत्वाभिमतापि गौरिति मयि त्वा प्रत्यवस्थायुते।
भिनत्त्येव निदा निषेधविषय तद्भावमुद्भावय-
स्तान् स्वोक्तादवकाशलोऽपि न भवान् रक्षेत् निराचष्टे किम्॥

एव स्वनिननर्वनेदस्य साध्यत्वेऽद्वैतवादिन प्रति विशेषणासिद्धि, इत्यपि निरस्तम्। उक्तञ्चात्र बृद्धै—'अनिच्छाहेतोरभेदप्रामाण्यस्य श्रुतेरेवाद्य यावद्विकल्प्यत्वात्" इति। न च स्वत्वाननुगमो दोष। प्राचीनमते तस्यानुगतत्वात्। स्वावच्छेदकवदवृत्तित्वसम्बन्धेन प्रतियोगितावशिष्टो य सर्वभेदस्तस्य वा साध्यत्वात्।

वस्तुतो यत्र त्वयाद्वैतश्रुतेरवकाश उच्यते तामेव बुद्धि पक्षीकृत्य स्वविषयाद्भेदसाधनमेव तत्र श्रुतिप्रवृत्तिप्रतिबन्धसिद्धि। पूर्वप्रवृत्तीना विषयादगृहीतभेदाना बुद्धीना दृष्टान्तत्वसम्भवात्। न हीदानी बुद्धिमात्रस्य स्वविषयनिन्तत्वे विवाद, चरमबुद्धिरेवाद्वैतश्रुतिविषया इति पक्षस्यैव प्रक्रान्तत्वादिति। तथा च सर्वबुद्धीना सर्वभेदसिद्धौ दोषाभिधान निरनुयोज्यानुयोग। यत्तु व्याप्तिग्रहमात्रेणेत्यादि, तत्राप्याहु—धूमवान् वह्निमानिति बुद्धया पर्वतो धूमवानिति बुद्धया च वह्निमत्पर्वतसाध्यकपर्वतव्यवहाराभावेनानुमितेरननुमन्तव्यत्वात्। अथ व्याप्तिबोधात्सामान्यमात्रे जिज्ञासादिच्छित्तिरस्तु, विशेषे तु सास्त्येवेत्युच्यते, तर्हि जिज्ञासावशादेव सिद्धसाधनताविरहादि यादि। तदेतत्सर्वमभिसन्धाय बृद्धैरुक्तम्—"चरमबुद्धौ न श्रुतेरवकाश तदुत्पत्तौ चरमत्वव्याघातात्। अनुत्पत्तौ तु तत्राद्वैतश्रुतेः प्रवृत्त्यनवबोधात्" इति। एतेन तव भेदत्वेनानुपपत्तिरत्वस्यैव चरमशब्दार्थत्वादिति। तदुपरि दूषणोपन्यासो निरस्त। उक्तरीत्याभिमतत्वादित्यास्ता विस्तर।

अर्थापत्तिस्थलेऽप्येव वदन्ति । यावदुपपादक तत्सर्वमर्थापत्तेर्विषयो न तु यत्किञ्चिदुपपादकमेव । तथा चार्थापत्तेरद्वैतज्ञानापन्नभेदाभावे तत्रैव श्रुते सावकाशत्वात्, घटपटभेदासिद्धिप्रसङ्गादर्थापत्तिभेदस्यापि पटघटभेदोपपादकत्वादर्थापत्तिविषयकत्वमावश्यकम् अन्यथा स्वप्ने दृग्दृश्यसम्बन्धानुपपत्ति प्रपञ्चस्य सत्त्वेन ज्ञाननिर्वर्त्यत्वानुपपत्तिश्च स्वप्नेन मिथ्यात्व न विपयीकुर्यात् । "सर्वं खल्विद ब्रह्म" इति श्रुतिर्नेह नानास्तीतिनिषेधानुपपत्तिश्च ब्रह्मणि स्वभेद न गोचरयेत् । तथा च श्रुत्यभेदे स्वबाधनार्थं श्रुत्यन्तरस्य, अर्थापत्त्यभेदबोधनार्थमर्थापत्यन्तरस्य चापेक्षायामनवस्था स्यादिति ।

यत्तु तनोपादकदृग्वादेर्मिथ्यात्वबोधकश्रुत्यादिसाधारण्यादेकधर्मावच्छिन्नत्वान्मिथ्यात्वबोधक श्रुत्यादि स्वस्यापि मिथ्यात्व विषयीकरोति, प्रकृते तु विषयितया घटपटभिन्नत्वमुपपाद्य तदुपपादक च न सर्वभिन्नत्वम्, स्वतोऽपि भेदापत्ते । नापि स्वनिरूपितावच्छिन्नत्वम्, विशेषणासिद्धे स्वत्वाननुगमाच्च । तथा च प्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकभेदवत्ताज्ञानमेवोपपादकमिति, तन्नानात्वादर्थापत्त्यद्वैतज्ञानयोर्जीवस्य घटपटभेदोपपादकत्वेऽपि नार्थापत्तिविषयत्वम् । नहि वस्तुत उपपादकत्वमर्थापत्तिविषयकत्वे तन्त्रम्, भ्रमरूपार्थापत्तेरुच्छेदापत्ते । किन्तूपपादकत्वेन ज्ञानमेव, तच्चान नोभयसाधारणमिति, तन्न, विशेषणासिद्धयादे पूर्वमेव निरस्तत्वात् । स्वसमानाधिकरणानवच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगिस्वरूपमिथ्यात्वस्य स्वावच्छिन्नचैतन्याभिन्नचैतन्यप्रतियोगिकतादात्म्यरूपस्य वृत्तिव्याप्यत्वरूपदृश्यत्वस्य चाननुगतत्वसाम्याच्च तादात्म्यस्य समवायन्यायेन तेरपि नानात्वोपगमात् । इदञ्च सम्भवेनोक्तम्, वस्तुतस्तु मत्र त्वयाद्वैतश्रुतेरवकाश उच्यते, नत्वेवार्थापत्त्या भेद साधनीय । अन्यत्र श्रुतिप्रवृत्ते प्रकारान्तरेणैव निरोधोपपत्ते. । अन्यथा चरमार्थापत्तिपर्यन्त त्वदनुधावनवैयर्थ्यात् ।

न च त्वदुक्तायां तस्यामेवार्थापत्तौ श्रुतेरवकाशो मया वाच्य इति वाच्यम्, तथापि मयार्थापत्त्यन्तरेण भेदस्य साध्यत्वात् ।

नन्वेवमनवस्था स्यादिति चेत्तत्रापि तुल्यत्वात् । उक्तञ्चात्र वृद्धैः—"यदा च बाधबुद्धिपरम्परया विषय परित्यज्यान्यत्र विषये श्रुतिपदारोपणमेकेन त्वया कर्तव्यमकरणे श्रुतिजाभेदज्ञानोपपादनायोगात्, तदा तवैवायमतीव श्रम, बाधबुद्धिपरम्परायाश्च पुत्यभेदेनापि सम्भवेनास्माक श्रमलाघवम् । न च श्रमगौरवेणापि भेदशून्यविषयलाभ इति कुत श्रुतेरवकाश. स्यादिति । तस्मात्—

जैगीषव्यतपस्विने च रहित भेदावगाहस्पृशा
ज्ञानेन स्थनमेकमानयितु भूयोऽनुभूतश्रमः।
आनैश्वर्यमुपावहन्नुपहिना वतुं फलेन स्पृहाम्
अद्वैती नपयैव देवर इवानिच्छन्परावर्तते ॥

किञ्चाद्वैतवादिनो यथोक्तावपि अद्वैतज्ञानयोर्भेदनिर्णयोऽस्ति न वा, नाद्यः, तवाद्वैतश्रुतेरवकाशोक्त्ययोगात्। नान्त्यः, तत एव द्वैतव्यवहार-व्याघाताच्च।

यत्तु बाधकाद्वैतज्ञानसत्त्वेऽपि द्वैतसम्बारार्थानप्रतिभासस्य प्रारब्ध-कर्मकृतप्रतिबन्धेनानुच्छेदाद् द्वैतवादिकृतमापादनमद्वैतवादिन प्रति व्यर्थ-मेव। नहि तस्य भ्रमत्वेन निर्णीयमानाद्वैतवो मन्यवति। न चापाद्या-पादकभेदश्रद्धास्ति, येन तत्परावृत्ति स्यात्। तदुक्तं खण्डने—

नानात्वमवतम्भ्यापि वदत्यद्वैतवादिनि।
असिद्धभेदाद् व्याघात पतेदापादकाकुत ॥ इति।

तदसत्, अद्वैतज्ञानस्य तव भ्रमात्मकम्, अद्वैते श्रुतितात्पर्याभावात्। द्वैतज्ञान च भ्रमत्वेन ज्ञान तदभाववद्विशेष्यकतत्प्रकारकत्वाभाववति तद्विशेष्यक तत्प्रकारकत्वप्रकारकत्वेन भ्रम एवेति। द्वैतवादिप्रत्यवस्थाने स्वानुभवशपथप्रदर्शनस्याप्रयोजकत्वादिति। नहि तव तादृशज्ञान नास्तीत्यत्र विवाद। किन्तु श्रुतस्तदर्थाभावे तत्र स्वानुभवमेव प्रमाणमुपदर्शयन् सर्वथा नमस्य एव, अवश्यत्वात्। एतेन श्रौतसर्वभेदज्ञानस्य द्वैतमानोच्छेदकत्वेन प्रत्यक्षादिस्वम्पोच्छेदकत्वस्यापि सत्त्वात् श्रुति प्रवदा। तथा च खण्डनम्—

प्रवृत्तेनाप्यनौचित्यमूह्य येन न मूयते।
तत्रानौचित्यमाज्ञाय वैपरीत्यान नाम तत् ॥ इति।

इत्यपि निरस्तम्, सर्वभेदस्य श्रुतितात्पर्यविषयत्वविषयकविप्रपत्ति-वेलायामभेदज्ञानस्य प्रत्यक्षानुच्छेदकत्वमिच्छुत्ते। महदमानागप्रवृत्ते। सर्वभेदे प्रमाणानुपन्यासे तदसिद्धौ तज्ज्ञानस्य द्वैतोच्छेदकताया शशविषा-णायमानत्वात्। तदुक्तं—

सर्वभेदानुभूतीना प्रमाणत्वविपर्यये।
स्वानुभूतेश्च मानत्वे शपथः सत्पथ कथम् ॥

अपि च,

अद्वैतानुभवे त्वदीयशपथानैवापर साधक
द्वैतस्यानुभवा द्विपत्सुहृदुदासीनेषु साधारण ।
अप्रामाण्यकलङ्कमङ्कुरयितु त्वद्बोधविरोधे क्षमे
स्वीयत्वेऽपि समे तवोत्तरमनो द्वेषे विशेषात्कुत ॥

अपरे पुनराहु —"आपो वा इद सर्वम्" इति श्रुति . विमत जलाभिन्न-प्रतीयमानत्वाज्जलवदित्यनुमान वा स्वबाधकस्य जलभेदज्ञानस्य जलाभेद गृहीत्वा निर्बाध मत् वेदान्तरीत्या सर्वस्य जलाभेद बोधयेदिति। यत्त्वत्र दूषणमुक्तम्—जलाभेदबोधनेऽपि बाध्यबाधकयोराप सर्वमिति ज्ञानपृथिव्या-द्योरभेदबोधे भेदाधीनस्य बाध्यबाधकभावस्य दूरीकृतत्वान्न तथेति वैषम्यम्। अतो न बाध्यबाधकैक्यज्ञानस्य जलाद्यभेदज्ञानसाम्यमिति, तच्चिन्त्यम्, तत्रापि हि बाध्यबाधकयोरभेदज्ञानेन तयोर्बाध्यबाधकभावो न निराक्रियते। अद्वैतज्ञानस्यापीति भेदज्ञानविरोधित्वानुपपत्ते । न चेष्टापत्ति, त्वया तदभ्युपगमादिति। अतो बाध्यबाधकत्वाभिमतयोरैक्यज्ञान बाधकत्वा-भाव प्रत्यप्रयोजकमेवेति किं पृथिव्यादिविशेष्यकजलभेदतदभाव-ज्ञानयोरैक्यज्ञानाभावेन। तथाहि—अद्वैतज्ञानभेदज्ञानयोरैक्ये च द्वैतज्ञानस्य भेदज्ञानबाधकत्व न स्यादित्याशङ्क्य औपनिषदैरेवोक्तम्—"व्यावहारिक-भेदमानस्य बाधकत्वाप्रयोजकत्वात्। परीक्षितप्रामाण्यकत्व बलवत्त्वाद्बाधक सन्दिग्धप्रामाण्यक तु दुर्बलत्वाद्बाध्यमिति व्यवस्थाया एव तत्प्रयोजकत्वा-दिति शब्दप्रत्यक्षबलाबलविचारे दर्शितत्वात्" इति। तथा च बाध्यबाध-कयोरैक्यज्ञानाभावऽपि भेदज्ञानस्य लौकिकत्वेन दुर्बलत्वाद्वैदिकजलाभेदज्ञाने विरोधित्वाभावेन जलाभेदज्ञानस्य जलभेदज्ञानप्रतिबन्धकताया स्वदुक्तरीत्यै-वानुपपत्तेरभावात्। तथा चोक्तश्रुतिवन्दिरनिन्दितैव। एतादृशशब्दस्य प्रत्यक्षापेक्षया बलवत्त्व पूर्वमेव निराकृतमिति त्वयत्। एतेन सर्वं सर्वस्मा-द्भिन्नमिति वाक्यमपि व्याख्यातम्।

यत्तु बाध्यबाधकयोरभेदेऽपि बाधकत्व न स्यादित्यत्र हेत्वभावात्तद-युक्त पूर्वोक्तदोषाच्च। तथाहि अद्वैतज्ञानिन प्रति तादृशवाक्यस्याप्रामाण्य-ग्रहाभावविशिष्टभेदज्ञानाजनकत्वात्तदुपन्यासो व्यर्थ । भेदज्ञानस्य स्वस्मि-न्नपि भेदसिद्धया बाधकत्वाभावापत्त्या स्वातिरिक्तसर्वभेदविषयकत्व वाच्यम्। तथा च स्वान्यस्मिन् सर्वस्मिन्सर्वभेदरूपे वाक्यार्थे द्वैतज्ञानिन प्रति

पदार्थासिद्धिश्चेति, तदसत्, भेदाभेदयोर्बाध्यबाधकभावे तदभावे वाकिञ्चित्करत्वस्योक्तत्वात्। अद्वैतवाक्यतज्ज्ञानविषयाणां तेभ्यो भेदग्रहे सत्यसति वा प्रकृतानुपयुक्तत्वात्। शब्दत्वेनैव तस्य प्राबल्यसम्भवात्। पूर्वोक्तदोषाणां पूर्वमेव निरस्तत्वात्।

यत्तु आपो वा" इत्यादिनारायणीयोपनिषद्वाक्यस्य स्तुतिपरत्वाद्भेदपरत्वाभावाद्भेदप्रत्यक्षापेक्षया दुर्बलत्वं न तु वाक्यस्य त्वनाप्तोक्तत्वेन घटो न घट इतिवदप्रामाण्येन तथेति। तदप्यसत् त्वदभिमतवाक्यस्यापि सर्वात्मकत्वेन ब्रह्मस्तुतावेव तात्पर्यात्। सर्वं सर्वाभिन्नमिति वाक्यस्यापि घटोऽघट इतिवदनाकाङ्क्षत्वात्, अनाप्तोक्तत्वाविशेषाच्च। नहि तादृशं वाक्यं श्रौतत्वेन क्वचिल्लिखितमस्ति किन्त्वद्वैतश्रुते स्वाभिमतपर्यवसितार्थपरत्वेन त्वदीयैरेवात्पत्तिवद्धमिति दिक्।

वेदाविरुद्धयुक्तीनामकें[1] तर्ककुतूहले।
सर्वैश्वर्यवतोऽखण्डे तर्केण शतपर्वणा ॥ २ ॥ *

*

१ अद्वैतपर्वतो इति भाति। * ख पुस्तकेऽस्यमशो नास्तीति प्रारम्भे सूचितम्।

तृतीयोंऽशः

एवं विश्वसत्त्वश्रुतिविरोधादपि "नेह नाना" इत्यादिश्रुतेर्नाद्वैत-परत्वम्। न चाद्वैतश्रुतिविरोधात्तच्छ्रुतेरेव न विश्वसत्त्वे तात्पर्यमिति-वाच्यम्; मानान्तरबाधितत्वेनाद्वैतश्रुतेर्दुर्बलत्वात्। अत एव "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति "अपाम सोममभृता अभूम" इत्यादि श्रुत्यपेक्षया "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र कर्मचितो लोकः क्षीयते" इति श्रुतेर्बलवत्त्वं कृतकत्वलिङ्गकविनाशित्वानुमानसह-कृतत्वादिति वाचस्पतिमिश्रादयः।

यत्तु विश्वसत्त्वश्रुतेरिन्द्रादिश्रुताविव तात्पर्यान्न स्वार्थे प्रामाण्यमिति, तन्न; अवान्तरतात्पर्येण विश्वसत्त्वेऽपि प्रामाण्यस्य देवताधिकरणन्यायेन दुर्वारत्वात्। एतेनाप्यद्वैतश्रुतिप्रामाण्यस्य तथैवाभ्युपगमात्। उक्तञ्च खण्डन-कारैः—"सिद्धार्थानां श्रुतीनामन्यपरत्वमपि यदि स्यात्तथापि [1]पदसमन्वय-बलेन तासु प्रतीयमानमर्थमबाधितमादायैव तासामन्यपरिभवनाद्[1]" इति। व्याख्यातञ्च टीकाकारैः—"मानान्तरप्राप्तिविरोधयोरसतोरन्यपरस्य स्वार्थे प्रामाण्यादित्यद्वैतसिद्धिः"। यदपि मानान्तरबाधिते ज्ञाते चार्थे शब्दस्य प्रामाण्यं न तत्र व्यवस्थापितं किन्त्वज्ञातेऽबाधिते च "इन्द्रो वृत्राय वज्र-मुदयच्छद्" इत्यादेरिव देवताविग्रहादौ विश्वसत्त्व तु मानान्तरप्राप्तं बाधितं चेति न तत्रावान्तरतात्पर्येण प्रामाण्यं सुवचमिति, तदपि न; मिथ्यात्वविरोधिसत्त्वस्य प्रत्यक्षगोचरतायास्त्वया तावदनङ्गीकारात्, बाधक-प्रमाणस्य दुर्वचत्वात्। अद्वैते श्रुतितात्पर्यस्याद्यापावदसिद्धेः।

वस्तुतस्तु प्रत्यक्षप्राप्तेऽपि वादिविप्रतिपत्त्या सन्दिग्धेऽज्ञातत्वानपाया-त्तत्र तात्पर्यं सम्भवत्येव, अज्ञातत्व ह्यप्रामाण्यज्ञानानास्कन्दितज्ञानविषयत्वा-भावः। स च तत्र विशेषणाभावात्सुलभ एव। यथाकथञ्चिज्ज्ञानत्वस्यैव प्रामाण्यविरोधित्वे त्वन्मतेऽपि घटः सन्नित्यादौ ज्ञानमात्रे ब्रह्मणो निर्विशेष स्फुरणस्वीकाराद् ब्रह्मणापि वेदान्तानां तात्पर्यं न स्यात्। निर्गुणत्वाद्युप-

---

१–१. तथापि पदसमन्वयवेदरतासु" अन्वयपरीभवनाद्—ख।

लक्षितत्वेन शुद्धब्रह्मणो ज्ञान तावता न सिद्धमिति चेत्तुल्यम्, उद्देश्यासिद्धेरविशेषात्। ब्रह्म निर्गुणम्, वस्तुत्वात्, गुणवदित्यनुमानाभासादिभिस्तस्यापि सिद्धत्वाच्च। परमार्थतस्तु सत्त्वविषयकत्वे सत्यपि प्रत्यक्षस्य तत्र प्रामाण्यनिश्चयार्थं बाधकाभावनिश्चायकत्वेन विश्वसत्त्वश्रुतेर्नानुवादकत्वम्, अनुग्राह्यानुग्राहकयोरनुवाद्यानुवादकभावाभावात्। अन्यथा याग स्वर्गजनको यागत्वादित्याद्यनुमानसमानविषयकत्वेन "स्वर्गकामो यजेत" इत्यादि श्रुतिरप्यनुवादिका स्यात्। न च तत्रानुमानप्रामाण्यार्थं श्रुतिरपेक्ष्या, अत एव शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्व वेदत्वमिति लक्षणे प्रामाण्यार्थंस्वजन्यप्रमाजननार्थं यावत्प्रमाण शब्दमुपजीवति तदन्यत्वमतिरिक्त तस्यार्थं इति वदन्तोति वाच्यम्, अत्रापि तदविशेषात्।

ननु तादृशसत्त्वनिर्णयस्य व्यर्थतया तथापि न सप्रयोजनकत्वसिद्धि, प्रवृत्तिनिवृत्त्योरेव शास्त्रप्रयोजनत्वादिति चेत्, प्रपञ्चसत्त्वनिश्चये कर्मानुष्ठानाद्विप्रतिपत्तिनिरासस्य "स्वर्गकामो यजेत" इत्यादिविधिवाक्यापेक्षितत्वान्मन्त्रार्थमत्वस्यात्यन्ताविप्रकृष्टाद्वैतवाक्यशेषत्वकल्पनापेक्षया सन्निहितविधिवाक्यशेषत्वकल्पनौचित्याच्च। "विधिपु श्राद्ध (श्रद्धावान् [1]) एवाधिकारी" इति वाचस्पत्युक्ते।

यत्तु मिथ्यात्वनिश्चयाभावस्यैव कर्मानुष्ठानेऽपेक्षा तत्रोक्ता, न तु सत्त्वनिश्चयस्येति, तच्चिन्त्यम्, "यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेववीर्यवत्तर भवति" इत्यत्र तरप्प्रयोगाच्छ्रद्धारहितकर्मणोऽपि फलवत्त्वाद्ब्रह्मविद कथ कर्मस्वनधिकार इत्याशङ्क्यम्। सा श्रद्धा भक्तिरूपा, इय तु प्रमाणद्वारा विश्वासात्मिकैव, तदभावेऽनधिकार एवेति कल्पतद्व्यापारस्येन सत्त्वनिश्चयस्यैव तत्रापेक्षोक्ते। सत्त्वनिश्चयापेक्षया मिथ्यात्वनिश्चयाभावहेतुत्वे गौरवाच्च।

यत्तु दृष्टेऽप्यर्थे प्रत्यक्षस्य स्वप्रामाण्यनिश्चयार्थं श्रुत्यपेक्षाया श्रुतिसवादविरहिणि दृष्टे कुत्रापि निःशेषप्रवृत्तिर्न स्यादिति, तदयुक्तम्; अप्रामाण्यशङ्कायामेव प्रमाणान्तरस्य गवेष्यमाणत्वात्, शङ्कायाश्च नियमाभावेनानवस्थाविरहात्, श्रुतिरेवापेक्ष्येति नियमस्तु मया न स्वीक्रियते, यत्र श्रुतिसवादविरहिणीति त्वदुक्तदोषावकाश स्यात्। अन्यया मिथ्यात्वानुमाने

१ श्राद्धएवाधिकारे तु त—ख।

विषयत्वाधरविषया श्रुतीना त्वदाप्युपन्यासात्तद्विरहिणीति त्वदुक्तदोषाद्वृद्धलिङ्गकानुमितिवादौ प्रामाण्यनिश्चयो न स्यादित्यस्य मयापि वक्तुशक्यत्वात्। अनुमानादिप्राप्ते मिथ्यात्वेऽखण्डब्रह्मपराणामपि श्रुतीनाम् वास्तवात्पर्येण प्रामाण्यस्य तैरप्यङ्गीकाराच्च। किञ्च वा शेषानुमिनिसाध्यनङ्गप्रकरणे प्रवृत्तिं विनापि निषेधस्वीकारे 'न तौ पशौ करोति न सोमे' इति वाक्ये न सोमे इति न प्रतिषेधस्तत्राज्यभागयोरप्रवृत्तेरित्यशविरेचमाशङ्क्य तै स्वयमेवोक्तम्—"मानान्तरप्राप्तिप्रयोजनानावानावाभ्यां प्रतिषेधस्य तत्र तात्पर्यविषयत्वेन विध्यपेक्षितस्तुतौ न सोम इत्यादेस्तात्पर्येऽपि प्रपञ्चे तात्त्विकत्वानावस्य वादिविप्रतिपत्त्या सन्दिग्धत्वेनाप्रसिद्धत्वात्तत्र श्रुतेस्तात्पर्यं युक्तमेव" इति। अद्वैतस्य मानान्तरेणाप्रसक्तौ वादिविप्रतिपत्तेरप्यनुपपत्तेः, अन्यथाज्ञानस्यापि बहुभि प्रत्यक्षानुमानार्थापत्तिशब्दैर्विधिनैवोच्यमानानुपपन्ना स्यात्। तदत्र "निन्दामि च पिबामि च" इति न्याय परेषां दुर्वार एव।

यत्तु भावरूपत्वेन ज्ञानस्य[1] प्रत्यक्ष नास्तीति, तत्र, अहमज्ञ इत्यादिज्ञानस्य ज्ञानाभावविषयकत्व निरस्यद्भिरेव तद्विषयस्य भावरूपत्व नास्तीति वक्तुमशक्यत्वात्। तथाहि हि तत्र तदेवमहमज्ञ इति ज्ञानस्य अभावज्ञानसामग्रीविलक्षणसामग्रीजन्य वादभावविलक्षणविषयत्व सिद्धमित्यादि। भावत्वप्रकारकस्य तस्योक्तस्य तु "अनृतेन हि प्रत्यूढा नीहारेण च प्रावृता" इत्यादिनोऽनुवादात् पदादनुपस्थितस्य शाब्दबोधे प्रकारत्वेनाप्यन्वयबोधानुपपत्तेः। तदनुभवस्यानावभिन्नत्वविशेषणाना सत्त्वाच्च।

यद्यपि श्रुते मृष्टिपूर्वकालीनत्वेनाज्ञानग्राहकत्वात्सृष्टिकालसम्बन्धित्वेन तद्ग्राहकप्रत्यक्षाद्विरविषयत्वेनैव प्रामाण्यमिति, तदप्यसत्, सदसद्विलक्षणकार्यत्वादिलिङ्गकानुमानादिना प्रपञ्चे सदसद्विलक्षणकारणपूर्वकत्वग्रहणात्सृष्टिपूर्वकालीनत्वेनाप्यज्ञान गृहीतम्, तयापि विपरीतानुमानादिना तज्ज्ञानुमितेऽप्रामाण्यशङ्कावनामनिपुणपुरुषाणामननुवादिकैवोक्तश्रुतिरित्यस्य स्वयमेवोक्तत्वात्।

यत्त्वेतावन्त काल ब्रह्म नावेदिषमित्यनुभवेन ब्रह्मधीपूर्वकालमात्रत्वेनाज्ञानग्रहणादनुवादकत्व श्रुते स्यादिति पक्षमुद्भाव्य प्रलयकालत्वेन सर्वज्ञत्वग्राहकत्व वम्, प्रत्यक्षस्य तु ब्रह्मधीकालवृत्तित्वेनेति प्रकारभेदानानुवा-

१ ज्ञानस्य—स।

दकतोति, तन 'वायुर्वै क्षेपिष्ठा देवता इत्यत्रापि दवतात्वविशिष्टवायुत्व धर्मितावच्छदकीकृत्य क्षेपिष्ठत्व प्रत्यक्षेण न सिद्धमित्यनुवादकत्वप्रसङ्गात्।

न च धर्मितावच्छेदकत्वेन या प्रकारता तदन्यप्रकारताशे भेदो विवक्षणीय अप्रयोजकत्वात् भ्रमकालवृत्तित्वस्य 'तम आसीत्तमसा गूढमग्रे" इत्यत शाब्दबोधाभावाच्च 'अग्निर्हिमस्य भेषजम्" इत्यादावपि हिमनाशकत्वस्य लोकत सिद्धार्थपि भेषजत्वेन तद्बोधासिद्धवानुवादत्वभङ्गप्रसङ्गात्। अत एवोक्तसाध्यनुभवस्य श्रुतिग्राह्यसदसद्विलक्षणत्वाग्राहकत्वाद् भ्रमप्रमासाधारणत्वेन भ्रमत्वशङ्कास्पदत्वेनोक्तश्रुतिसापेक्षत्वाच्च नोक्तश्रुत्यनुवादकताप्रयोजकत्वमिति स्वयमेवोक्तम्।

यत्तु सत्त्वप्रत्यक्षप्रामाण्येनैव मिथ्यात्वश्रुत्यनुमानादिवाध। यदि च तत्प्रत्यक्षमप्रमाण तर्हि कथ सत्त्वश्रुतिरनुवादिका, प्रमाणाप्राप्तार्थविषयत्वेन प्रामाण्यस्यैव सम्भवादिति पक्षमनूद्य दूषणमुक्त प्रत्यक्षाप्रामाण्येऽपि तत्सिद्धबोधकस्यानुवादकत्वसम्भवात्। न हि प्रमितिप्रमापकत्वमनुवादकत्वम्, किन्तु पश्चाद्बादकत्वमात्रम्। पश्चात्त्व च प्रमाणावधिकमप्रमाणावधिक वेति न कश्चिद्विशेष इति, तदत्यन्तमसत् लिङ्गाभासादिभि सर्वस्याप्यलौकिकार्थस्य बोधयितु शक्यतया पुरोवादस्थलस्य दुर्लभत्वापत्ते। अपि चैव सत्य ज्ञानमित्यादीनामनुवादत्वापत्ति। ब्रह्मत्वस्य लोकतो निरधिष्ठानभ्रमाङ्गीकारे शून्यवादापत्त्या च त्वद्रीत्यासिद्धत्वात्।

यत्तु ब्रह्मत्वसामानाधिकरण्येन सत्त्वस्य श्रुतिबोधकत्वम्, तच्च न प्रत्यक्षसिद्धम्, घट सन्नित्यादेर्ब्रह्मविषयकत्वानिश्चयादिति, तन्न, ब्रह्म सत्, वस्तुत्वात्, घटवदित्यादिना ब्रह्मत्वसामानाधिकरण्येनापि सत्त्वावगमात्। प्रमितप्रमापकत्वस्य चानुवादत्वप्रयोजकतायास्त्वयानभ्युपगमात्। अत एव येषामनुमानाकौशलेन विरुद्धतर्काभासेन चानुमाने भ्रमत्वशङ्का तेषा[1] न ब्रह्मसत्त्वबोधकश्रुत्यैवेति तैरेवोक्त सगच्छते[1]।

यत्तु घट सन्नित्यादौ घटाद्युपहितसद्रूपस्यैव भानेन शुद्धब्रह्माभावात्तत्सत्यमित्यननुवादत्वशङ्कैव मन्देति, तच्चिन्त्यम्, उपहितविषयकस्य शुद्धविषयतायास्तैरभ्युपेयत्वात्, अन्यथा तदुत्तर शुद्धसशयाद्यापत्ते। "तमेव भान्तमनुभाति सर्वम्" इत्यादिश्रुतीना "अनुवृतेस्तस्य च" इति सूत्रस्य चानुपपत्ते शुद्धस्य श्रुत्याप्युपस्थितिविरहाच्च शब्दजन्यवृत्तेरप्युपाधिविशेषान्।

१-१ तेषा तच्छ्रुत्य ब्रह्म—क।

यत्तु बृहदारण्यकभाष्ये "देहभिन्नात्मबोधिका या अस्तीत्येवोपलब्धव्या" इति श्रुते प्रत्यक्षप्रामाण्यानुवादित्वमाशङ्क्य "वादिविप्रतिपत्तिदर्शनाद्" इत्यादिना तत्परिहृतम्। तथा च प्रत्यक्षसिद्धसत्त्वग्राहकत्वेऽपि वादिविप्रतिपत्तिनिर्णयार्थकेन विश्वसत्त्वश्रुतेरपि नानुवादकत्वमिति पक्षमनूद्य दूषणमुक्तम्, तन्न वादिविप्रतिपत्तिदर्शनेन भिन्नत्वेनात्मन प्रत्यक्षमेव नास्ति, अन्यथा प्रत्यक्षप्रामाण्यवादिनश्चार्वाकादेस्तत्र विप्रतिपत्तिर्न स्यादित्युक्तम्, न तु वादिविप्रतिपत्तिनिरासेनास्तीत्यादे सार्थकत्वमनुवादकत्व वा। तथा चोक्त तत्रैव "तस्माच्चन्मान्तरसम्बन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारविशेषे च शास्त्र वर्त्तते" इति, तत्रेद वाच्यम्, आत्ममात्रस्य प्रत्यक्ष सर्वसिद्धम्, तच्च देहादिविषयक न वेत्यत्र पर विवाद। तत्र यदि विशेषणाशानुरोधेन शास्त्रादेः सार्थक्य तदात्रापि स्यात्। तत्पर देहभिन्नत्वमप्रामाण्यज्ञानाभावो वेत्यन्यदेतत्। किवानेन निरस्तेन भवति, मिथ्यात्वस्य वादिविप्रतिपत्त्या सन्दिग्धत्वाद्वेदसार्थक्यस्य तैरप्यङ्गीकारेण तस्यैव बहुशो दृष्टान्तितत्वात्। यदपि विज्ञानघनादिनापि मिथ्यात्वप्राप्त्या तेनानुवादत्वमाशङ्क्य निराकृत तस्यापौरुषेयश्रुत्यधिकपूर्वत्वाभावादिति, तच्चिन्त्यम्, "असदेवेदमग्र आसीद्" इत्यादौ नास्तिकमतस्याप्यनुवाददर्शनात्। किञ्च अग्र आसीदिति पदाना शून्यवादनिषेधार्थत्वम्। "अविनाशी वारेऽयमात्मा न विच्छित्तिधर्मा" इत्यनाद्येन नास्तिकमतस्य द्वितीयेन च वैशेषिकमतस्य निरास इति च स्वयमेवोक्तम्। बृहदारण्यकेऽपि "अय हैनमुषस्तश्चाक्रायण पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्त मे व्याचक्ष्व" इत्यादिकमुपरतब्राह्मणम्, एव देहभिन्न आत्मा नास्तीत्युषस्तस्य पूर्वपक्ष। तद्विज्ञातमन्यवस्थापनेन च याज्ञवल्क्यस्य सिद्धान्त इत्येव परतया व्याख्यातम्। प्रवाहानादित्वस्य सर्वत्राप्यविशिष्टत्वात्, निषेधप्रतियोगित्वेनैवानुवादो नत्वन्यथेति विशेषस्यानिश्चितत्वादिति।

यत्तु सत्त्वप्रत्यक्षे भ्रमत्वशङ्काविरहान्न दार्ढ्यार्थं श्रुतिमपेक्षतेति, तच्चिन्त्यम्, मिथ्यात्वानुमानादिना भ्रमत्वशङ्काया. सुलभत्वात्, शङ्कोपधायकविशेष्यस्याप्रयोजकत्वादिति। किञ्च प्रकारभेदस्यावश्यकत्वे घटत्वादिना प्रातिस्विकरूपेण सत्त्वग्रहेऽपि विश्वत्वादिनासत्त्व श्रुत्या बोध्यत इति वक्तव्यम्। अत एव घटत्वादिनेतरभेदनिश्चयेऽपि पृथिवीत्वाद्यवच्छेदेनेतरभेदानुमानप्रवृत्ति.।

यत्तु विश्वत्व नाम नैकोऽनुगतो धर्मो विश्वशब्दार्थ, किन्तु सर्वनाम-

त्वाद्घटत्वादिकमेवेति कथ प्रकारभेदोऽपीति, तत्र, "नेह नानास्ति किञ्चन", "ब्रह्मैवेद सर्वम्' 'यत्र त्वस्य सर्वमात्मैवाभूद्" इत्यादावपि किञ्चित्त्वसर्वत्वादेरेकस्याभावात्कथ प्रपञ्चमात्रस्य मिथ्यात्वग्रह, घटत्वाद्यवान्तरानकधर्माणा युगपदुपादानोपस्थित्यारसम्भवात्। अथात्र शाब्दबाधाविषयोपात्तभिन्नत्वादिस्तथति चेत्, किमन स दण्डवारित। नन्वेवमात्मन सत्व न सिध्यति, इति चेत्, काऽय ? विश्वसत्त्वश्रुत्या न सिध्यदिति वा प्रमाणान्तरेणापि न सिध्यदिति वा। नाद्य, निरनुयाज्यानुयोगात्। नान्त्य, बाधकाभावात्। यत्तु "अग्निर्हिमस्य भेषजम्" इत्यादेरपि विप्रतिपत्तिनिरासार्थत्वेन सार्थक्य स्यादिति, तन्न, वह्निसयोगहिमनिवृत्त्योर्नियमे कस्यापि वादिनो विप्रतिपत्तेरभावात्। यत्तु अग्नेर्हिमनिवृत्तिजनकरूप वाक्यार्थे स्वभावयदृच्छावादयोर्विवाद, "अस्यामोषधयोऽजायन्त" इति वाक्यार्थे चावमन्थनाङ्गीकारमत ओषधिरूपस्थूलद्रव्योत्पत्तिरूपऽर्थे विवाद एवेति, तच्चिन्त्यम्, एतत्पुरस्कारेणैव च विवादस्य तावताप्यदर्शनात्। किञ्च अग्निर्हिमनिवृत्त्यो पौर्वापर्यमात्र ह्येतद्वाक्यार्थो न जनयत्वपर्यन्तम्, तत्र च न कस्यापि विवाद। नहि कारणत्वेनाभिमताना पदार्थाना कार्यात्पूर्व नियमत स्वत्वमपि स्वभाववादादौ नाभ्युपेयते, प्रत्यक्षविरोधात्, किन्त्वन्यथासिद्धत्वसतामपि तेषा कार्येणापेक्षा न क्रियत इति, इक्षुसमाञ्जल्यादा तथैव दर्शनात्। एवञ्चौषधीना स्थूलद्रव्यरूपत्वेनोत्पत्तिर्न तद्वाक्यार्थोऽपि त्वोषधीपदार्थत्वेनैव। स च परमाणुसमूहो वा तदतिरिक्त वेत्यन्यदेतत्। अन्यथौषध्यादिपदात्तेषामन्येषाञ्च बोधसाधारण्य न स्यादिति बोध्यम्।

ननु का तावद्विश्वसत्त्वश्रुतिरिति चेत् ? उच्यते, 'विश्व सत्य मघवाना युवयोरिदापश्च न प्रमिणन्ति व्रत वाम्। अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन युजेव वाजिना जिगातम्" इति ऋङ्मन्त्रः। अस्यार्थ —इन्द्राब्रह्मणस्पती इति सम्बोधनम्,"देवताद्वन्द्वे च" इत्यनङ्, मघवाना इति मघवानावित्यर्थ "सुपासुलुक्" इति छान्दससूत्रेण ओकारस्याजादेश। साहचर्यादन्यस्यापीति मघवत्पदेन निर्देश। योगिकार्थमादाय वा। सत्य सत्त्वविशिष्ट विश्व जन्यजात युवयोरेव सम्बन्धि युष्मत्कार्यत्वादागो व्यापनशीला देवता अपि वा युवयोर्व्रत सकल्प न प्रमिणन्ति न हिसन्ति। नान्यथयन्तीति यावत्। अप्रतिहतेच्छत्वात्, नोऽस्माक हविर्हव्याद्यन्न पुरोडाशादिक चाच्छ अभिलक्ष्य वाजिना वेगवता च श्वाविव युजायुक्तौ सन्तौ जिगात यज्ञदेशमागच्छत, "अच्छ गत्यर्थवादेषु" इतिसूत्रेणाच्छशब्दस्य जिगातमिति गच्छत्यर्थकच्छान्दसधातुयोगे गतिसज्ञा, "व्यवहिताश्च" इति छान्दस व्यवधानम्।

यत्तु विश्व सर्वं सत्य कर्म सद्भूतत्वात्फलस्यावश्यम्भावित्याद्वा । "यो वै धर्म सत्य तदिति, तस्माद् धर्मं वदन्तमाहु सत्य वदति" इति च श्रुतौ धर्मशब्दस्य सत्यार्थकत्वोक्ते । "ऋत पिबन्तौ सुकृतस्य लोके" इति मन्त्रे सत्यपर्यायेण ऋतशब्देन कर्मफलमानोक्तेश्च सत्यशब्देन ऋत धर्मन्च कर्मोक्तम्, सतो ब्रह्मणो भव इति व्युत्पत्ते । तथा च युवामेवोद्दिश्य सर्वाणि कर्माण्यनुष्ठेयानीत्यर्थ इति, तन्न, उक्तव्युत्पत्तौ मानाभावात्, ब्रह्मभिन्नस्य सत्यमित्यस्य पूर्वंमसिद्धेश्च, धर्मस्यैवासाधारणब्रह्मजन्यत्वाभावाच्च । सत्यधर्मत्वमित्यत्रैव तत्तात्पर्येण तयो. पर्यायत्वाभावात्, ऋतशब्देन कर्मफलोक्तावपि कर्मवाचकत्वलाभाविरहाच्च । अर्थानुरोधेन क्वचित्कथंचिद्व्याख्यानेऽपि तावताऽसिद्धे.। यदपि सत्य सत्यत्वेन परिदृश्यमान जगत् युवाभ्यामेव सृष्टमिति, तदप्यसत्, सत्यत्वान्वय बाधकाभावेन तत्त्वेन परिदृश्यमानमित्यध्याहारेण व्याख्यान मानाभावात् ।

न चाद्वैतश्रुतिविरोध एव बाधक, तस्या अद्याप्यद्वैततात्पर्यकत्वासिद्ध, वैपरीत्य विनिगमकस्य चोक्तत्वात् । एतन युवयोरेव विश्व सर्वं स्तोत्र यथार्थं यद्यद्गुरुजात स्तुत्वा प्रतिपाद्यते तत्सव युवयोर्विद्यमानमेव न त्वारोपितमित्यपि परास्तम् । स्तोत्रपदाध्याहारे मानाभावात्, न त्वारोपितमित्यर्थेऽपि गुणगुणिना सम्बन्धस्य तात्त्विकत्वलाभाच्चेति ।

न च प्रातिभासिकवैपरीत्यमात्र तदय इति वाच्यम्, पारमार्थिकपर्यवसानस्य तथापि दुर्वारत्वात्, सत्तामेदस्याद्याप्यसिद्धत्वाच्च । तथा च "शावमना शाका अरुण सुपर्ण. आमोमह. शूर. सनादनील., यश्चिकेत सत्यमोच वसुस्याहमुत जेतात दाता" शावमना बलेन, बाहुलकाद्दीर्घ । यत्तु शवस एव शावमेति, तन, स्वार्थिकाणप्रत्ययान्तत्वविवक्षया टिलोपेऽकारान्तत्वापत्ते.। शाक. समर्थ , अन्यानपक्ष इति यावत् । अरुणो वर्णेन सुपर्ण. शोभन. पक्ष. आगच्छतीत्यध्याहार , आ इत्युपसर्गस्य श्रूयमाणतया आख्यातान्तवातोरिवाक्षेपयोग्यत्वात् । महो महान् शूरो विक्रान्त सनात्पुराण अनील. नीलरहित. अग्निवत्कुत्रापि यज्ञे इन्द्रेण स्थितेरकरणात्, पक्षिरूपकेणेन्द्रस्तुतिरियम् । यद्वस्तु चिकेत जानाति तत्सत्यमेव न तु मोघम्, तत्प्रकारकज्ञानविशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वरहित सर्वाशेऽमातिरिक्तज्ञानविषयत्वशून्यमिति यावत् । यद्वा यदिति क्रियाविशेषणम्, यज्ज्ञानाश्रय. तज्ज्ञान सत्य यथार्थमेव, न तु कदापि भ्रम इति भाव । एतेन विषयसत्यत्व विना ज्ञानप्रामाण्यानुप-

१ ज्ञाना°—ख ।

पत्तेस्तज्ज्ञानविषयाणा सत्यत्वाक्षेप , इदमिदानी कर्त्तव्यमिति । यज्ञानातीति व्याख्यान त्वपदार्थत्वादुपेक्ष्यम् । स्पार्हं स्पृहणीयम्, स्पृहाया इदमित्यण्, विषयत्व सम्बन्ध वसु द्रव्य जेता शत्रुसकाशात् उतापि दाता धनस्यैव कर्मत्व तृनन्तत्वात्तद्योगे वसुश दे "न लोकाव्ययनिष्ठा-"इति षष्ठीनिषेध । "उताप्यर्थे विकल्प्यो " इत्यमर । एवमीशानास्योपनिषदि मन्त्रवर्णोत्तरार्द्धं "कविर्मनीषी परिभू स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्य समाभ्य " शाखान्तरे यथानथार्थानिति पाठ इति वदन्ति, याथातथ्यत इति सत्यार्थकयथातथशब्दात्स्वार्थिकष्यञ्प्रत्ययान्तात्तसिप्रत्ययान्तम्, न्था च सत्यानर्थान् व्यदधात्सृष्टवान् । यत्तु तथ्यशब्दस्यापि सत्यार्थकत्वेन यथार्थेत्यस्य वैयर्थ्यमिति तन्न; "यथार्थं तु यथातथम्" इत्यमरव्याख्यात्रादिवाक्यपर्यालोचनया यथातथशब्दस्य सत्यत्वानतिक्रमार्थतया तस्य स्वार्थे तद्धिते कृते घटघटत्वशब्दवच्छब्दान्तरत्वात् । तत्र च वैयर्थ्योद्भावनस्य दुराग्रहमात्रत्वात् । यदपि त्वन्मते कविरित्यादिविशेषणाना वाक्यार्थानुपयोग , मन्मते तु यत क्रान्तमतीत सर्वं दृष्टवान् । यतश्च मनीषी मनसा इष्ट ऊहापोहकुशल । यतश्च पूर्वसृष्टिविरुद्धमिच्छतामसुराणा परिभवसमर्थो यतश्च स्वयमन्यनैरपेक्ष्येण पूर्वसृष्टप्रकारेण जगद्भावनसमर्थस्ततो हेतोर्याथातथ्येन पूर्वं तथा व्यदधात् पूर्वसृष्टिप्रकारेणेति यावत् । "यथापूर्वमकल्पयत्" इति श्रुतेरिति, तदपि न, पूर्वपदस्यार्थघटणात् आन्तदर्शित्वेनातीन्द्रियसाक्षात्कारवत्त्वलाभेन तादृशपरमाण्वादिसाक्षात्कारवान् मनीषी कार्यकारणभावव्यवस्थाभिज्ञ , आशयानुरूपैरिति वैशेषिकभाष्योक्ते । धर्मिप्रत्यक्षमात्रेण तदसिद्धे । परिसमन्ताद्भवतीति परिभूरिति मनीषिविशेषणम्, । तथाचार्थज्ञानस्य कालिकव्याप्यवृत्तित्वलाभ । अतो यागिवैलक्षण्य स्वयम्भूरिति कार्यमात्रापेक्षया पूर्वकालवृत्तिस्वाधिकरणकालात्पत्तिकयावज्जन्यजनक इति यावत् । अन्यथा जन्यमात्रकर्तृत्वानुपपत्ते । यद्वा परि समताद्भवतीत्यत्र दैशिकव्यापकत्वस्यापि धर्मिविशेषणद्वारा धर्मे ज्ञान लाभाद विषयतासम्बन्धस्य च व्यापकताघटकत्वात् । ज्ञानस्य च सर्वविषयकत्वसिद्धि । तथा च सर्वविषयक प्रमात्मकनित्यज्ञानवत्त्वलाभ । उक्तञ्चोदयनाचार्यैः—

' साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ ।
भूतार्थानुभवे निविष्टनिखिलप्रस्तारिवस्तुक्रमे" ॥ इति ।

स्वयम्-भूरित्यस्य स्वयम्भावनसमर्थ इति णिजर्थान्तर्भावेन व्याख्याने च बीजाभावात् । मनसा इष्ट इति व्याख्यानस्यापि मनस ईषिणो मनीषिण

इति, "तानि विदुब्राह्मणा ये मनीषिण " इति मन्त्रव्याख्यानरूपशागतमहाभाष्यविरुद्धत्वात् । यदपि यथानथार्थानिति पाठे यथाशब्दवैयर्थ्यं तथाशब्दस्यापि सत्यार्थत्वात् । "धर्मराजस्त्वयागत" इत्यत्र तथेति सत्याथ विनथवदिति क्षीरस्वाम्युक्तेरिति, तदपि न, उक्तरीत्या यथागतशब्द व्याख्याय तथाशब्देन सहैकपद्येनैव व्याख्येयत्वात् । भिन्नपदत्वनिर्बन्धेऽपि यथानथा इत्यत्र छान्दसेन शसोऽडादेशेन सिद्धे । यद्वा यथेति हेतौ यस्मात्कविर्मनीषीत्यादिगुणयुक्त "यथा रन्ध्र व्योम्नश्चलजलदघ्नम स्यगयति"[1] इत्यादौ तथा दर्शनात् । तस्मात्तथा सत्यानर्थान् व्यदधादित्यर्थं । यद्प्युक्त याथातथ्यत पाठेऽपि तथ्यशब्दस्यानतिक्रमार्थकयथाशब्देन समासे तादात्म्येन तथ्यानतिक्रमविवक्षाया तथ्यतोऽर्थानित्येव निर्वाहे यथाशब्दवैयर्थ्यापत्तिः । तस्मादुपादानतया तथ्यानतिक्रमोक्त्या सत्योपादानकाले सर्वानर्थान् व्यदधादित्यर्थ. । तेनोपादानसत्यत्वाज्जगत्सत्य भाति न तु वस्तुत सत्यमिति श्रुतितात्पर्यलाभादस्मन्मतानुगुणमेवेद वाक्यम् ।

न चात्रापि यथाशब्दवैयर्थ्यनादरण्यम्, निमित्तहेतुत्वमात्रेणापि तन्निर्वाहात् । शब्दाधिक्येन कार्यतादात्म्याश्रयरूपोपादानहेतुलाभार्थत्वादिति, तदपि न, सत्यार्थकयाथातथ्यशब्दस्यैव प्यञ्प्रत्ययान्तत्वेन व्याख्यातत्वात् तथ्यशब्दस्य यथाशब्देनान्वयीभावमादाय दोषस्यानुत्तोपालम्भत्वात् । तथ्यशब्दयथाशब्दयोरव्ययीभावे यथाशब्द आदिवृद्धयभावाच्च यथातथ्यशब्दादेव प्यञ्प्रत्ययनिर्णयात् । उपादानत्वलाभाय यथाशब्द इति त्वयुक्तम् स्वोत्प्रेक्षितार्थलाभार्थतया पदनार्थक्योक्तावस्मन्मतेऽपि तथ्यानतिक्रमस्यैवोपादानसन्यत्वमात्रेणापि निर्वाहात्तादात्म्येन तथ्यानतिक्रमलाभार्थतया तत्साधकत्वमित्यस्य वक्तु शक्यत्वादिति दिक् ।

तथा "विश्वमा प्रा अन्तरिक्ष महित्वा सत्यमद्धा नकिरन्यस्त्वावान् जहि प्रतिचोऽनूच पराचो विश्व सत्य कृणुहि विष्टमस्तु" । यत्तु व्याचक्षते विश्वमन्तरिक्षचापरिच्छिन्नेन स्वस्वरूपमहिम्ना त्वमाप्रा., अतोऽन्य सर्वोऽपि त्वावान् त्वत्सम्बन्धी सन् सत्यमद्धा साक्षात्त्वत्सम्बन्ध विना तु न किमपि न सत्यमित्यर्थ" । नकि माकिर्नकिरिति त्रयोऽपि वर्जने इति शाब्दिका । तथाविघ्नभूतानसुरान् हत्वा अस्मदनुकूल विश्व कुरु । तद्यद्यपि मिथ्या, तथापि त्वयोपादानेन सत्येन विष्णु व्याप्त सत्यमस्त्वित्यर्थः । कृतधीर्गम्यत इति, तच्चिन्त्यम् ; समचरणद्वयार्थस्य पौनरुक्त्यापत्ते. । त्वावानिति पुल्लिङ्गस्य

१ यथाधूमो व्योम्नश्चलत्व जलदधूमस्यगयति—क, यथा धूरग्र व्योम्नश्च जलदधूम स्यगयति—ख ।

सत्यमिति वलीवेन सामानाधिकरण्यायोगात्, सत्यपदार्थेपु[1]तद्धति वाच्यवदिति विश्वादिकोषदर्शनात्। सत्यमित्यव्ययस्य चाद्धाङ्गीकारार्थकत्वात् अद्धेत्यस्य च साक्षादिन्यर्थकत्वे प्रमाणाभावात्। अद्धेति स्फुटावधारणयोः, तत्त्वातिशयनो इत्येके इत्यव्ययवर्गे[2] दर्शनात्। फलितार्थपरत्वोक्तावपि साक्षादेव सत्यं त्वत्सम्बन्धेन तु नेति सन्निहितपदार्थलभ्यव्याख्यानेन वेदान्तिमतप्रतिकूलतयैव व्याख्यानसम्भवाच्च। तस्मादयमर्थः—प्रथमचरणस्य तद्वदेव व्याख्यानं त्वावान् त्वत्सदृशः "युष्मदस्मदोः सादृश्ये वतुच्वाच्यः" इति वार्त्तिकोक्तेः। "त्वावतः पुरुषस. न त्वावामन्यः यज्ञ विप्रस्य मावत" इत्यादिश्च तत्रोदाहृतत्वात् "स्वमात्रैकवचने" इत्यत्र "प्रत्ययोत्तरपदयोश्च" इत्युक्तेस्त्वादेशः। "आमर्वनाम्नः" इत्यात्वम्, एतेन त्वत्सम्बन्धीति। निर्मूलव्याख्यानमपास्तम्। अन्योऽतिशयेन त्वत्सदृशो नास्ति नित्यत्वादिलोकाग्रादीना तत्साम्येऽपि नित्यज्ञानवत्त्वादिना तदभावात्। अनृचोऽनुगतान् वराचः पराङ्नुवांश्च प्रतीचः प्रतिकूलान् जहि। द्विविधा हि द्विषन्तः, केचित्प्रवेशेन प्राग् प्रदर्श्यान्तस्तदपकारचिन्तकाः, अपरे च प्रत्यक्षमेव तादृशाः। विश्व जन्यजात सत्यं कृणुहि करोपि, विष्टं व्याप्तमस्तु। उभयत्र छान्दसोऽव्ययः। त्वयापि तथैव वाच्यत्वात्, अर्थान्तरतात्पर्यस्यापि तुल्यत्वात्। सत्यत्वमेव व्याख्यातं व्याप्तमिति विष्टव्याप्तावित्यनुशासनात्। तथा च यस्य यदधिकरणं तन्निष्ठात्यन्ताभावप्रतियोगित्वशून्यत्वमेवात्र व्याप्तत्वमिति पराभिमतमिथ्यात्वविरोध्यर्थः शब्दमर्यादयैव लब्ध इति सूक्ष्म समीक्षणीयम्। स्मृतिरपि—

"अनृचमप्रतिष्ठन्ते जगदाहुरनीश्वरम्"।
"एता दृष्टिमवष्टभ्य नष्टात्मानोऽल्पचेतसः"॥

अनीश्वरं ब्रह्मभिन्नं जगदसत्यं स्वतः सत्यत्वरहितम् अल्पत्वस्य नश्वरत्वात् तद्योपादानसम्बन्धापेक्षया न्यूनसत्ताकत्वमेव। अप्रतिष्ठं बाध्यं च ये वदन्ति तन्निन्दया उत्तरार्द्धे प्रतीयमानत्वात्। यत्तु अनीश्वरमीश्वरानुपादानकमतोऽस्य सत्योपादानशून्यमनश्च बाधाधिष्ठप्रतिष्ठाशून्यं जगदिति ये माध्यमिकाद्यो वदन्ति, तन्निन्दया सत्येश्वरोपादानकं सत्यत्वमाबाधि सहितमिति प्रतिपादितम्। तथा च तदुपादानत्वाद्बाध्यत्वाच्च सदन्यद्विलक्षणमिति वेदान्तिमतानुकूलमेवेद वाक्यमिति, तदसत्; तत्पुरुषापेक्षया बहुव्रीहौ गौरवादुपादानत्वस्यानुपस्थितत्वाच्च। सत्योपादानशून्यमीश्वरानुपादानकमित्यन्यान्यतरस्य व्यर्थत्वात्। माध्यमिकमते वेदान्तिमतवैपरीत्यानुवादस्य नावतैव सिद्धेर्नत्वीश्वरमिन्नमित्यर्थः। स्वन्मतेऽपि न सम्भवति

---

१. °शब्दार्थेषु—ख। २. अवर्गे—ग।

तदुत्पन्नस्य विशेष्यलिङ्गत्वाभावात्। बहुत्वे तु पलीवत्व विशेषणत्वादुपपन्नमिति चेत्, मैवम्, तथापि न विद्यत ईश्वरा यत्रेति सद्व्यवहारप्रयोजकस्वाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्व स्वीकृत्य त्व प्रातिकूल्येनैव व्याख्यानसम्भवात्।

इदमप्यवधेयम्—यत्तु यदत्रि नेह नानेति निषेधार्थो विश्वसत्त्वानुवादः। न च किञ्चनेत्यादिनैव सर्वनाम्ना निषेध्यसमर्पणादेम्नदनुवादस्य वैयर्थ्यमिति वाच्यम्, विश्वमत्यत्वादिप्रत्येकरूपेण विश्व सत्यमित्यादिवाक्य 'यस्मिन्द्यौ पृथिवी चाधिश्रिते" इत्यादिवाक्ये द्यौरादिना तदैव सर्वनाम्ना परामृश्य तन्निषिध्यत इति सर्वनाम्ना परामर्शात् पूर्वं विश्वसत्त्वादिक श्रुत्यानूद्यत इति दोषाभावाद्, अथवा किञ्चनेत्यनेन निषेधाधिकरणानन्तरभावेन निषेधसमर्पणेऽपि विशिष्य तत्तदधिकरणानन्तरभावेन निषेध प्रति तत्तदधिकरणे प्रतियोगिप्रसक्तेरुचितत्वान्निषेधाधिकरणविशेषप्रतियोगिप्रसक्तयोग्यनवाक्यानामुपयोगाद्विशिष्याक्रान्तबोधकसर्वनाम्नो विशेषरूपबोधकवाक्यानपेक्षत्वादिति, तदप्यसत्, प्रत्यक्षादिनैव निषेध्यसमर्पणसम्भवात्। यदि च प्रत्यक्षप्राप्तिसत्त्वादेव निकालाबाध्यत्वादिरूप सत्त्व विश्वसत्त्वश्रुतिप्रतिपाद्य तदेव नेह नानत्वादिना निषेध्यते इति मूले, तदा मानान्तरानधिगतार्थज्ञापकत्वात्तेन[1] श्रुतेस्तात्पर्यमिति दुर्वारम्। विश्व सत्यमित्यादेर्नेहेत्यादेश्चैकप्रमाणगतत्वाभावाच्च श्रौतनिषेधमात्रस्य श्रौतप्रवृत्तिसापेक्षत्वेन 'न कलञ्ज भक्षयेद्" इत्यादावतिप्रसङ्गात्। कल्पने च विकल्पापत्तेः। अधिकरणविशेषान्तर्भावेन तत्र प्रतियोगिसमर्पण तत्प्रयोजनमिति तु मुखमन्तीत्युक्तम्। प्रतियोगिनो तदधिकरणाना चानन्त्येन विशेषरूपपुरस्कारेण तदभिधानस्य विश्व सत्यमित्यादौ चम्मिन् पञ्चेत्यादौ च शक्तुमप्यशक्यत्वात्। 'प्राणस्य प्राणमुत चक्षुषश्चक्षुत श्रोत्रस्य श्रोत्रमन्नस्यान्न मनसो ये मनो विदुः" इत्यस्य माध्यन्दिनाना तदुत्तरपाठात् प्राणादय एव पञ्चजनशब्दार्थाः इत्यस्य प्राणादयो वाक्यशेषादित्यधिकरणे व्यवस्थितत्वात्। "ज्योतिषैकेषामसत्यन्ने" इति सूत्रे एकेषा काण्वाना प्राणश्चेत्युक्तवाक्येऽन्नस्यानमित्यशस्य व्यवस्थितत्वात् प्रागमादेऽपि "तद्देवा ज्योतिषा ज्योतिरात्मुर्वोपासते अमृतम्" इति पाठेन ज्योतिषैव पञ्चसख्यापूरणसम्भवादित्यभिहितत्वात्। "नातिरात्रे षोडशिन गृह्णाति"इत्यादौ तु षोडशिग्रहणस्य प्रमाणान्तरेणाप्राप्तत्वाद्

१ तत्र च—क। २ प्रकरण—क।

"अतिरात्रे षोडशिन गृह्णाति"इति वाक्य प्रतियोगिसमर्पकमिति वक्तव्यम्, वस्तुतस्तत्रापि प्रतियोगिसमर्पणमात्रार्थतया न तद्वाक्यसाध्यम्, किन्त्वतिरात्राङ्गत्वेन षोडशिग्रहणविध्यर्थमेव तद्वाक्यम्। निषेधवाक्य प्रतियोगिसमर्पणमपि तेन क्रियत इत्यन्यदेतत्। न तु तावन्मात्रार्थं वाक्यारम्भो युक्त। पुनरान्तु प्रत्यक्षादिप्रमाणान्तरप्राप्ते इति विभावनीयम्।

एतेन सर्वत्र निषेध्यसमर्पकवाक्यान्तरापेक्षावनियमाभावेऽपि प्रकृते सति सम्भवे त्यागायोग इत्यपास्तम्, अन्यथा सिद्धार्थपरत्वेन वैदिकवाक्यानामव्यवस्थापनायोगात्। अन्यथानुद्येयार्थस्मरणस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानवैयर्थ्यं स्यादतो मन्त्रपाठसामर्थ्यान्मन्त्रद्वारकमेवानुद्येयार्थस्मरणमभ्युदयकारीत्यभ्युदयशिरस्कत्वकल्पन स्यात्। एवमर्थवादसत्त्वे तदवगतमेव प्राशस्त्य तथेत्यादिकमपि न स्यात्। यत्त्वत्र वाक्यप्राप्तनिषेधेऽपि न षोडशिग्रहणवद्विकल्पापत्ति, वस्तुनि विकल्पायोगात्।

न च दृश्यत्वावच्छेदेन सत्यत्वासत्यत्वयोर्विरुद्धत्वेऽपि वाक्यद्वयप्रामाण्यात् क्वचिद्दृश्ये सत्त्व क्वचिच्चासत्त्वमिति व्यवस्थैवास्त्विति वाच्यम्, षोडशिग्रहणाग्रहणवाक्ययोरुभयोरपि मानान्तराप्राप्तविषयत्वेन तुल्यबलत्वेन वैदिके सत्त्वश्रुत मानान्तराप्तविषयत्वेन निषेधश्रुतेश्चाप्राप्तविषयत्वेन[1] तुल्यबलत्वाभावात्। अत एव निषेधवाक्यप्राबल्यात्तदनुरोधेनैतद्वाक्यमीयत इति, तदप्यसत्, निषेधश्रुतेरपि मिथ्यात्वानुमानादिप्राप्तविषयत्वात्। तदनुमानादिकमप्रामाण्यशङ्काकलङ्कितमिति चेत्, सत्त्वप्रत्यक्षमपि तथैवेति तुल्यम्। तस्मादन्यतरस्याप्यन्यतरापेक्षया विशेषानवधारणे किमनुरोधेन विनियन्तामियाद्भाक्षाया सत्त्वश्रुतेरर्थान्तरकल्पन सत्त्वप्रत्यक्षस्यार्थान्तरविषयकत्वेन ननुमशक्यत्वात् परिशेषादसत्त्वश्रुतेरेव बाध्ययानयन युक्तम्।

नन्वत्रापि मिथ्यात्वानुमितिविषयान्तरपरत्वेनैव कल्पयितु शक्यमिति चेत्, सत्यम्, सत्त्वप्रत्यक्ष सर्वलोकस्वरसवाहि शास्त्रवासनामूलकत्वाभावात्। मिथ्यात्वानुमान तद्वासनामूलक वादिमात्रस्यैवेति तदुपमर्दन्यैव युक्तत्वात्[2]। अत एव निषेधवाक्यप्राबल्यादिति निरस्तम्। नहि निषेधप्रतियोगिसमर्पकवाक्य स्वार्थेनान्वयशून्यमेव तन्मात्रार्थकमिति वक्तु शक्यम्, षोडशिग्रहणविधेरुच्छेदापत्ते, अपि तु स्तु प्रतिषेध स्यादिति दाण्डिकन्यायविरोधात्। 'यजनिषु वैयजामह करोति नानुयाजेषु' इत्यादावनुयाजेषु वैयजामहप्रतिषेधस्वीकारे प्रतियोगिप्रमाणे प्रमाणान्तरेणाभावात्तत्प्रसञ्जनार्थं श्रुतिरभ्युपे

१-१ नास्ति—क। २ °मत्ता°—क। ३ वक्तव्यत्वात्—ग।

तत्रामाभ्यन विकल्पावत्तिरतस्तत्परिहारार्थं तादृशभ्यने पर्युदासलक्षणेवेति सिद्धान्तभ्य विलयापत्तेश्च । यदपि नति निषेधार्थानुवादभ्य यत्तदिति यांल्लङ्ग तदभावाभ्र विश्वमत्वश्रुतेरनुवादेनेति पक्षमनूद्य दूषणमुक्तम् । "न कलञ्ज भक्षयेद्" इत्यादौ निषेधार्थेऽपि प्रतियाग्यनुवादे यत्तदिति लिङ्गाभावान तन्मात्रमनुवादलिङ्ग रजतमिद ज्ञानन्तु पर नेद रजतमित्यादाविव ज्ञानार्थलिङ्गभ्य त्वत्रापि सत्त्वादिनि, तदपि न निषेधमात्रार्थानुवादभ्य नञ्समभिव्याहृतो नार्थघटितवाक्ये पृथक्प्रतियोग्युपादानवैयर्थ्यस्यात्करत्वात् । ज्ञानार्थवन्पानुवादलिङ्गभ्य नेह नानवादावपि तुल्यतावा उक्तत्वात, एवेन सत्त्वानुवादभ्याप्राप्तप्रतिषेधप्राप्त्यर्थवादिनि निरस्तम् अनुमानादिज्ञानत्वभ्यापि प्राप्तेर्दुर्वारत्वात् । एवञ्च "नह नानास्ति किञ्चन" इत्यत्र किञ्चिदभ्य नेतीत्यादौ चेतिशब्दभ्य यत्पदार्थपरामर्शकत्वेन तच्छब्दतोल्य यत्तदादिसमभिव्याहृतेन यच्छब्दवादेव तच्छब्दकल्पनसम्भवाच्च ।

वस्तुतस्तु यत्तदोरेकतरेणोत्तरवाक्यभ्येनान्यतरभ्य पूर्ववाक्यभ्यभ्य तत्समभिव्याहारो नापेक्ष्यते । अत एव—

सा तु चन्द्रसि पुष्करे कृत मौलित यदभिरामताधिके ।
उदयता जयिनि कामिनीमुखे तन साहसमनुष्ठित पुन ॥

इत्यादौ तया इयत इति काव्यप्रकाशोक्तेष्वच्छब्दसमानार्थकमिमितिशब्दयारप्युत्तरवाक्यभ्ययोर्यच्छब्दसमभिव्याहारानपेक्षत्वात्प्रकृत यच्छब्दावश्यकत्वगन्धा मौर्ख्यादेवेति यदुक्तम्, तदप्यागात्त वेदितव्यम्, किञ्चिदित्यादिशब्दवात्यच्छब्दसमानार्थकत्वे बीजाभावात् । नहि यो धूमवान् स वह्निमानितिवत् को वह्निमानिति प्रयोगस्तात्पर्यप्रत्ययो वा क्वाप्यनुभवसिद्ध । इदन्तु शब्दयात्मु—

यो विकल्पमिदमर्थमण्डल परयतीश निखिल मयद्वपु ।
आत्मपक्षपरिपूरिते जात्यस्य नित्यसुखिन कुतो भयम् ॥

इत्यादौ यच्छब्दनिर्दिष्टस्यार्थस्येदंशब्देन प्रतिनिर्देशदर्शनात् तच्छब्दतुल्यार्थत्वमेकाक्षरकारादिभि स्वीकृतमिति वेदितव्यम् । उत्तरवाक्यस्थतच्छब्दस्य यच्छब्दानपेक्षत्वमपि निर्मूलम् । उत्तरवाक्यस्थयच्छब्दस्यैव पूर्ववाक्येन तच्छब्दोपादानसाकाङ्क्षत्वनियमो नास्तीत्यस्यैव तत्रावहितत्वात्, उदाहरणे तथैव दर्शनत् । यच्छब्दस्तूत्तरवाक्यात एव सर्वत्र तच्छब्दाकाङ्क्षमर्थ इति काव्यप्रदीपविवेकादिगलाम । इदञ्च वस्तुगत्योक्तम्, प्रकृते तु मतद्व्युतीना

निषेधायानुवादत्वमिद्धावेवानुवादस्य पूर्ववृत्तित्वनियमादेहेत्यादि श्रुतीनामुत्तरवाक्यत्वमिति वक्तुशयेन। यदा त्वद्दृष्टयश्रुतीनामेवानुवादत्व विनिगमकाभावादिति वादिन प्रत्यवस्थान तदोक्तव्युत्पत्त्या निर्वाहोक्तिरत्यन्तमेवानुपपन्नेत्यलमनेन।

यदप्युक्तम्—सत्वप्रत्यक्षानपेक्षतया सत्वश्रुतिर्नसापेक्षानुवादत्वम्। निरपेक्षानुवाद व तु नाप्रामाण्यहेतु, धारावाहिकबुद्धीना प्रामाण्यस्य सर्वसिद्धत्वात्। उक्त हि नयविवेके "सापेक्षानुवादेन प्रमितिर्दोष्यानुवादे धारावहनवदित्यनूद्य दूषणमुक्तम्—अनुवादत्वमात्र प्रामाण्ये प्रयोजकम्, न तु सापेक्षानुवादत्व गौरवादनधिगतार्थबोधकत्वमप्रामाण्यशरीरस्य तावतैव गतत्वाच्च। धारावाहिकबुद्धीना तु वर्त्तमानार्थग्राहकत्वेन तत्तत्क्षणविशिष्टग्राहकत्वेन क्षणांशेनाधिगतार्थविषयकत्वान्नाप्रामाण्यम्" इति, तदप्यसत्,

अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वकम्।
यथार्थानुभवो माननपेदनयेष्यते॥

इत्याचार्योक्तरीत्यानधिगतार्थबोधकस्य प्रामाण्यशरीरत्वानभ्युपगमात्। क्षणस्य चातीन्द्रियत्वमिति मणिकारादिभिरुक्तत्वात्। स्मृतोपादानायैव तदविषयतया प्रत्यक्षाश्च उपनीतमानात्मकज्ञान, क्षणस्य त्वाशुविनाशित्वेनोपनयपर्यन्तमनवस्थित्या तदुपनयासम्भवादनीतान्यैव क्षणस्य कथञ्चिद्वर्त्तमानत्वेन ग्रहे चाप्रमात्वापत्तेरित्यस्य मिथ्यैरपपादितत्वात्।

यत् मयुक्तादिविशेषणतया स्मृतकालस्यैव क्षणानामपि योग्यत्वम्, विषयनाप्रत्यये तादात्म्येन क्षणाना प्रतिबन्धकत्वकल्पने मानाभावात्, घटोऽयं दृष्टो न वेति प्रश्ने सन्निहितक्षणे मया दृष्ट इत्युत्तरदर्शनात्। अस्तु वा तद्बुद्धयुत्पत्तिद्वितीयक्षणविनाशिस्मृतकालविशिष्टग्राहकत्वेन धारावाहिकबुद्धीनामननुवादकत्वमिति, तदप्यसत्, स्मृतकालस्यापि योग्यत्वानभ्युपगमेन दृष्टान्तासिद्धेः। उक्त हि प्रत्यक्षालोके "यद्यपि ग्रहणादीनामप्यतीन्द्रियत्वमेव मूर्तिमत्त्वात्, उपनीतेन च क्षणस्यापि सुलभा" इत्यादि। सन्निहितक्षणे इत्यादेर्ग्रहणे पक्षे दृश्यत इत्यादिवाक्यवदविकरणस्य प्रत्यक्षाविषयत्वानुपपादकत्वात्। एतेन द्वितीयक्षणे त्वादिकमपि निरस्तम्। तस्याप्यतीन्द्रियत्वेन क्षणेन सह समानयोगक्षेमत्वात्।

यदपि—"न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते" इति सिद्धान्ते स्वोत्पत्तिक्षणग्राहित्व सर्वप्रत्ययाना न सन्निकर्षादिप्रयुक्तम्, किन्तु

---

१. पूर्ववर्तित्व—क।

ज्ञानसामान्यज्ञानोत्पत्तिरनियतविषयकमेव ज्ञानं जनयतीति नियमयुक्तम्। अत एव उच्चादिभेदशादिविषयत्वं न कारणनियम्यमिति प्रत्यक्षलक्षणादयः।

एवञ्च वैदग्धबुद्धयनुमित्यादिं प्रामाण्यानुगमेऽपि न द्वितीयादिबुद्धेरनुमितित्वमिति स्वपक्षे विवक्षे मानाभावात्। किं चैवं प्रामाण्यज्ञानानाश्रयत्वापत्तिः, संशयविशिष्टयकालीनत्वं[1] कालिकमेव वाच्यम्। न चानीतानीतयोः कालिकसम्बन्धः स्वीकार्यः। किं च कश्चन कालो ज्ञानमात्रे भासत इत्येव नियमः प्रामाणिको न तु ज्ञानमात्रे वर्तमानकाल एवेति। अनीतानीतकालावगाहिज्ञानसामान्यं वा स्वाल्पेनैव वर्तमानकालग्राहकतयेति अन्यथाख्यातिवादोपन्यिष्टिप्रत्यादिदर्शनात्। तस्मात् ज्ञानोत्पत्तिक्षणेत्यादिनियमवर्गेण मगच्छतात्। अल्पेन्यनुक्तम्—ज्ञानत्वावच्छिन्ने व्यक्तिभानानुगमभावेनानुवादत्वाभावो सत्वश्रुतेरप्यनुवादकत्वोद्भावनमनुकूलम्, तच्चत्वयोरपि लक्षितयोगात्। नहि धारावाहिकद्वितीयादिबोधव्यक्तेरेव तेनानुवादत्वं न त्वेकज्ञानव्यक्तेरपि तदेति वैषम्यं ब्रह्मणापि सूचितम्।

अथ त्वन्मते किमनाप्रामाण्यप्रयोजकं स्मृतिसाधारणं धारावाहिकबोधावृत्तं नेति चेत्, यत्तज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाधिकरणसमानाकारनिश्चयोत्तरत्वं तज्जातीय[2]विशिष्टज्ञानं च प्रमा। अस्ति च स्मृतित्वावच्छेदेन तादृशनिश्चयोत्तरत्वं न तु धारावाहिकबुद्धीनां तदाद्यबुद्धावेव व्यभिचारादित्यस्य स्थूलत्वादिति दिक्।

यदप्याहुः सत्वश्रुतिरपि नापेक्षानुवादिकैव, सत्वप्रत्यक्षमपेक्षत्वात्, नहि सत्वप्रत्यक्षं विना शक्त्यादि[3]ग्रहमूलकशब्दप्रवृत्तिसम्भवः। अत एवोक्तं देवतायिकरणे वाक्यरत्ने 'यत्र तु प्रामाण्यान्यथात्वशङ्कादिबाधवादादपि लौकिकं प्रमित्यति। द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरेकार्थप्रवृत्तेः। प्रमात्वपेक्षया त्वनुवादकत्वम्, प्रमाणा ह्यन्यलब्धं प्रथमं प्रत्यक्षादिभ्यो यथार्थमवगच्छति न तथाम्नातम्। तत्र व्युत्पत्त्यपेक्षत्वान्न तु प्रामाण्यापेक्षया द्वयोः स्वार्थेऽनपेक्षत्वादिति। आम्नायस्य व्युत्पत्त्यपेक्षत्वेन प्रत्यक्षस्यापेक्षत्वव्यवहारेणोक्तत्वादिति। तदप्यसत्, उक्तवाक्ये हि कल्पतरुकारैरुक्तत्वात्—"न स्मृतित्वस्यापेक्षत्वं किन्तु प्रत्यक्षादिभिन्नत्वमिति विषयत्वम्। न चैतावता भवत्प्रमाणता, प्रत्यक्षानुमानयोरप्येकविषय-

---

१–१ नास्ति–क। २. तज्जातीयान्य–क। ३ विना तन्मूलकशक्त्यादि–ख।

त्वात्। तर्हि कथमनुवादकत्वप्रसिद्धिरत आह—प्रमानपेक्ष इति। प्रमातरि चरमप्रत्ययाधायक वादाम्नायस्यानुवादकत्वप्रसिद्धिरित्यर्थ इति। अतश्च प्रत्येकपदशक्त्यादिज्ञानस्योपजीव्यत्वेऽप्युद्दश्यविधेयभावस्वरूपवाक्यार्थज्ञानस्य मानान्तरकविशिष्टज्ञानस्यानुपजीव्यत्वान प्रत्यक्षसापेक्षत्वम्।

ननु क्वचित्तसमानाकारकमपि प्रत्यक्ष भवत्येवेति चेत् किन्तत, नह्यस्तीत्येव तदुपजीव्यम् अन्यथासिद्धसाधारण्यात्। अन्यथा विशिष्टप्रत्यक्षा भावस्थले प्रत्येकपदशक्तिज्ञानाच्छाब्द न स्यात्। यदि च शक्त्यादिज्ञान विधयाप्युपजीव्यत्वमनुवादकत्वप्रयोजक स्यात्तदा द्वयो स्वार्थेऽनपेक्षत्वमिति मूलग्रन्थो न स्मृतिवत्सापेक्षत्वमित्यादिश्च टीकाग्रन्थोऽसगत एव स्यात्। न च तात्पर्यज्ञानहेतुतया तदथ पूव विशिष्टोपस्थितिरवश्यमपेक्ष्येति वाच्यम् विशकलितयारेव पदार्थतत्ससर्गयोस्तात्पर्यग्रहस्य स्वीकारात्। वैशेषिकपक्षेऽपि तात्पर्यविषयत्वस्य ससर्गविशेषणत्वे हेतुज्ञानदशायामेव वाक्यार्थबोधापत्त्या शाब्दरूपानुमितिन स्यादित्याशङ्क्यापि तथैव शब्दा लोकादा व्यवस्थापितत्वात्। किञ्च—अत एव प्राण इत्यधिकरणे प्रस्तो-तर्यादेवता प्रस्तावमवा यत्ता ता चेदविद्वन्प्रस्तोष्यसि मूर्द्धा ते निपतिष्यति इति चानायणोक्ते कतमा सा देवतेति प्रस्तोत्रा पृष्टे प्राण इति होवाच सवाणि ह वा इमानि भूतानि प्राणमेवाभिसविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमवायत्ता इति छान्दोग्योपनिषदि श्रूयते। प्रस्ताव साम्नो भक्तिविशष तमवायत्तानुगता अत्र प्राणशब्दार्थो वायुविकारो वा ब्रह्म वेति सशये पूवपक्ष।

अर्थं श्रुत्यैकगम्ये हि श्रुतिमेवाद्रियामहे।
मानान्तरावगम्ये तु तद्वशात्तद्व्यवस्थिति॥

ब्रह्मण सवभूतकारणत्वे आकाशादीना च वाय्वादिकारणत्वे मानान्तराणामप्रमरात्। यथाम्नायमेव साऽर्थो गृह्यते। इह तु यदा वै पुरुष स्वपिति प्राणे तर्हि वागप्येति इत्यादिकाया श्रुते सवभूतसोरेन्द्रिय सवेशनादगमनप्रतिपादनद्वारा सवभूतसवेशनोद्गमनप्रतिपदिकाया मानान्तरानुग्रहत्वमाम्नायाया वात्सवेशनोद्गमने वायुविकारस्यैव प्राणस्य न तु ब्रह्मण उद्गीथप्रतिहारान्वयो सामभक्त्योरादित्यान्नयस्तदभिमानि-योश्शरारिण्योर्देवतयोब्रह्मदेवतयोब्रह्मणिनयोरभिहितत्वात्तत्साहचर्यात्प्रति-हारान्वयमामभक्तावपि ब्रह्मभिन्नस्यैव प्रमाणस्य देवतात्वौचित्याच्चेति। सिद्धान्तस्तु—

पुंवाक्यस्य बलीयस्त्व मानान्तरमागमात् ।
अपौरुषेये वाक्ये तत्सङ्गति किं करिष्यति ॥

नो खलु स्वत सिद्धप्रमाणभावमपौरुषेय वच स्वविषयज्ञानोत्पादे वा तद्व्यवहारे वा मानान्तरमपेक्षते, तस्यापौरुषेयत्व निरस्तसमस्तदोषाशङ्कस्य स्वत एव निश्चायकत्वात् । निश्चयपूर्वकत्वाद् व्यवहारप्रवृत्ते , इन्द्रियसंवेशनोद्गमनयोर्वायुविकारे प्राणे सम्भवेऽपि सर्वभूतलयोत्पत्त्योस्तस्मिन्नसम्भवात्। "यदा सुप्तः स्वप्न न कञ्चन पश्यति अथास्मिन्प्राण एवैकधा भवति" इत्येतद्-वाक्यवदत्रापि प्राणशब्दो ब्रह्म एवेति । व्याख्यात च कल्पतरुकृद्भिः "स्वत एव निश्चायकत्वात् स्वविषयज्ञानोत्पादे मानान्तर नापेक्षते निश्चयपूर्वकत्वाद् व्यवहारस्य स्वविषयव्यवहारे नापेक्षते" इति ।

यत्तु शतत्वादिग्रहविषया तदुपजीवकत्व प्रयोजक तदा शब्दमात्रस्यैव तदनुवादकत्व स्यादिति शब्दप्रामाण्यमेवोच्छिद्येत स्यात् । किञ्चैव सत्य ज्ञानमित्यादिवाक्यस्यापि शतत्वसम्बन्धस्वरूपलक्षणाज्ञानापेक्षिनशतत्वज्ञानापेक्षणीयेन घटोऽहमित्यादिप्रत्यक्षेणानुवाद. स्यादिति गत तस्यापि प्रामाण्यप्रत्याशया ।

यत्तु ब्रह्मत्वसामानाधिकरण्येन सत्त्वग्राहक न तत्प्रत्यक्षमिति, तत्र; सर्वावच्छेदेन सत्त्वस्यापि प्रत्यक्षत' प्राप्तत्वात् । अशनः सिद्धभावनस्य शब्दानुमितेरदोषत्वादुपहितब्रह्मणि सत्त्वस्य प्रत्यक्षेणापि गृह्यमाण-त्वात् । शुद्धे तु शब्देनापि तद्ग्रहात् । अत एव शब्दाजन्यवृत्तिविषयत्वमेव द्वयन्तमित्यादि: परेषामुद्दोष. । उपाधिविशेषव्याप्तिनिश्चितत्वाद् घटाद्युपहिते शब्दजन्य-वृत्त्युपहिते वा सत्त्वग्रहेऽपि शुद्धाविषयत्वमाम्यादिति दिक् ।

यदपि व्यावहारिकसत्त्वपरेयं विवरणग्रन्थस्तु, न च व्यावहारिकसत्त्वे सर्वविप्रतिपत्तेस्तन्निर्वादनवैयर्थ्यम्, परमोपनङ्गीकर्तुंयाना विप्रतिपत्त्या स्वर्गादौ सत्त्वसन्देहदशायां स्वर्गनरकादिसत्यत्वनिर्णादनेन तत्प्राप्तिपरिहारार्थं प्रवृत्तिनिवृत्तीरिव प्रयोजनत्वात् । व्यावहारिकत्वञ्च ब्रह्मज्ञानेतराबाध्यत्वम्, न त्वबाध्यत्वम्, मिथ्यात्ववादेऽतिव्याप्तिदोषात् । व्यावहारिकसत्यस्य प्रत्य-क्षादिसिद्धत्वानुवादद्वारोक्तप्रवृत्त्यादितरत्वे गन्धर्वनगरस्वप्नेषु बाध्यत्वज्ञानात्-मानेन्द्र विवादतरत्वे गौरवादिति ।

न चैव दृश्यत्वेजनस्वादप्रामाण्यापत्ति , श्रुतिजन्यधीरोमनिष्ठान्तर-वोधितार्थविषयकत्वेन गंगादाद् श्रमरघण्टानादस्वादिनि साध्यम्, "शुद्धः स्वको मूत्रमेव लोकमनुगच्छति" इत्यादे शुद्धत्वादर्थप्रतिपादनार्थकशाया:,

"यदा वाममु वाम्येषु स्त्रिय स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयाद्" इत्यादि स्वप्नदर्शनफलप्रतिपादनार्थानुवादरूपाया वा श्रुतेर्यथाप्रामाण्य तद्वदेव सभवात् ।

एतावानेव विशेष —तत्प्रातिभासिकम्, प्रकृत तु व्यावहारिकमिति । तदपि चिन्त्यम्, व्यावहारिकसत्त्वस्य ब्रह्मज्ञानेनाबाध्यत्वरूपस्य पूर्वमसिद्धतया तत्परत्वेन श्रुते सावकाशत्वस्य निरस्तत्वात् । श्रुतेर्मिथ्यात्वबोधकत्वस्य[1] प्रत्यक्षसिद्धतया तदनुवादेन सत्त्वश्रुते[2]र्नेहेत्यादि मिथ्यात्वबोधकत्वनास्तीत्यस्यैव साम्प्रत निरूप्यमाणत्वात् । व्यावहारिकसत्त्वस्य प्रत्यक्षसिद्धतया तदनुवादेन सत्त्वश्रुते प्रवृत्त्यादिपरत्वस्य च शङ्कितुमप्यशक्यत्वात् । सत्त्वमात्र हि प्रत्यक्षसिद्धम्, तत्रापि मिथ्यात्वस्य श्रौनतात्पर्यविषयत्वे सिद्धे प्रत्यक्षागम्यसत्त्वे व्यावहारिकत्व त्वया स्थापयिष्यते न तु तदपि प्रत्यक्षसिद्धम्, अन्यथा हि सत्त्व इव व्यावहारिकत्वांशेऽपि वादिविप्रतिपत्तिर्न स्यात् । यावत्तु सत्त्वश्रुतिविरोधेन मिथ्यात्वस्य तात्पर्यविषयत्व एव सन्देहस्तावदेव मिथ्यात्वश्रुतिविरोधेन व्यावहारिकसत्त्वानुवादत्वेन च सत्त्वश्रुतिकदर्थनमनोरथो व्यर्थ एवेति दिक् ।

यदपि प्रत्यक्षप्रामाण्यत्वेन सत्त्वश्रुतेरिव तद्विरुद्धार्थत्वेन मिथ्यात्वश्रुतेरपि स्वार्थपरत्व न स्यात्, मानान्तरप्राप्तेरिव तद्विरोधस्यापि तात्पर्याभावव्याप्यत्वादिति पक्षमुद्भाव्य दूषणमुक्तम्—प्रत्यक्षापेक्षया चन्द्रादेरधिकपरिमाणप्रतिपादकागमस्यैव मिथ्यात्वबोधकागमस्य बलवत्त्वेन प्रत्यक्षप्रामाण्यानुवादिश्रुत्यपेक्षयापि बलवत्त्वात् प्रामाण्याप्रामाण्ययोर्विरोधे प्रामाण्यस्याप्रामाण्यव्यर्थत्वेनान्यशेषत्वानियमादप्रामाण्यस्यैवान्यशेषत्वेन बलवत्त्वादन्ययोरप्यप्रामाण्यापत्ते । तदुक्त सांक्षेपशारीरके—

"अतस्परा तत्परवेदवाक्यैर्विरुध्यमाना गुणवाद एव" इति । तदप्यसत्, सत्त्वश्रुत्यनुगृहीतनञ्त्वेनरसत्त्वप्रत्यक्षस्यैव बलवत्त्वात् । अत एव "राजा राजसूयेन यजेत" इत्यत्रार्थावर्त्तनिवासिना ब्राह्मणादावपि पानके राजपदप्रयोगात्, द्रविडाना क्षत्रियमात्रे प्रयोगेऽपि प्रत्यन्तदेशवासित्वेन तत्प्रसिद्धय-

---

१—१ चाद्यपर्यन्तमसिद्धत्वादिति विरोधेन—ख । २ मिथ्यात्वं—क ।

* अत परं ८४ पृष्ठस्थ * चिह्नितात्र यावत् पाठ क पुस्तके लिपिकमादासो-न्निक्षिप्त इति प्रतीयते । ख पुस्तकेऽपि पत्रकोणे 'अशोघ पृष्ठ'···'यावत्' इति लिखितमस्ति ।

पत्न्यायार्यावर्त्तंप्रसिद्ध प्राबल्यान्न क्षत्रियमानवर्तृक्व राजसूयन्येति पूर्वपक्षे स्वरूपतो दुर्बलस्यापि द्रविडव्यवहारस्य राज्ञ कर्मेत्यर्थे ब्राह्मणादित्वात् तन्यनप्रत्यय पुरोहितादित्वात् यक्-वाचित्वाद्यगमात्। 'राजानमभिषेचयेद्" इति श्रुतावपि अभिषेकानन्तर पालकत्वाभावेन तन्याद्देशत्वानुपपत्त्या जातिविशेषस्यैव नयात्वाद्यगमात्। श्रुतिस्मृतिरूपबलवत्प्रमाणानुगृहीतत्वेन तस्या आर्यावर्त्तंप्रसिद्धयपेक्षयापि बलवत्त्वमिति ग्रवेष्टव्याधिकरणे सिद्धान्तितम्। चन्द्रादिपरिमाणपरयो श्रयङ्गागमयोरपेक्षया प्रकृत वैधर्म्यस्य च पूर्वमेव प्रपञ्चितत्वात्। प्रामार्थंत्वन्याप्युभयत्राविशेष इत्युक्तत्वात्। तत्परत्वस्य च प्रमाणान्तरविरोधादेवापसार्यमाणत्वात् प्रामार्थंत्वापेक्षया विरुद्धार्थंत्वस्य सुतरा तात्पर्यविघटकत्वात्।

एतेन षड्विधतात्पर्यलिङ्गोपेतत्वेन मिथ्यात्वश्रुतेरनन्यपरतया प्राबल्य वैदिकतात्पर्यविषयस्य चातात्त्विकत्वनियमेन तात्पर्यज्ञापकानामपि लिङ्गानामर्थं तथात्व एव पर्यवसानत्वात् सत्त्वश्रुतिवाक्यस्थपदाना चान्यपरत्वान सत्त्वे तात्पर्यलिङ्गसङ्केत्यपि परास्तम्। मानान्तरविरुद्धे मानान्तरस्य तात्पर्यानवधानियमात् षड्विधलिङ्गसत्त्वेऽपि तत्पदाना पौर्वापर्यप्रमाणान्तरादिपर्यालोचनया यादृशार्थो युक्तस्तत्रैव तात्पर्यस्य नेर्ग्राह्यित् शक्यत्वात्, अन्ययानिप्रसङ्गस्य दर्शितत्वात् अबाधितत्वरूपलिङ्गस्यापि तन्मध्ये पठितन्यावश्यमपेक्षणीयत्वात् बाधविप्रतिपत्तिविषयीभूतार्थे सिद्धवत्तात्पर्यमङ्गीकृत्य तेनैव बाधकप्रमाणबाधस्य वक्तुमशक्यत्वादित्यादे प्रागेवाभिहितत्वात्। न ह्यद्वैतस्य वेदतात्पर्यविषयत्वमङ्गीकृत्य वादिनस्तान प्रत्यवस्थान सभवति, आस्तिकेन तस्य प्रामाण्याभ्युपगमात्।

इद चान वक्तव्यम्—मिथ्यात्वे तात्पर्यं वेदस्य न वेति वादसमयेऽपि तत्तात्पर्यस्यैव प्राबल्ये हेतुनेनि गीर्वेद्या। अपि च निरवकाशत्वतात्पर्यवत्त्वादिना वाद्वैतश्रुतेः प्राबल्य निषेधवाच्यत्वेन वा? नाद्य, निरवकाशत्वस्य च सत्त्वश्रुतिसाधारण्याद् व्यावहारिकसत्त्वविषयत्वस्य च बहुशो निराकृतत्वान्मिथ्यात्वसिद्धे पूर्वमुद्भावयितुमयोग्यत्वात्। तात्पर्यवत्त्वेऽपि मिथ्यात्वविषयत्वस्य तात्पर्ये प्रमाणान्तरेणानवधारितत्वात्। नान्त्य, 'नितिच''इति कित्तद्धिते वृद्धिविधायकसूत्रात् "बिडिति च"इति निषेधसूत्रस्य, 'अग्नीषोमीय पशुमालभेत" इयत "न हिस्यात् सर्वा भूतानि" इत्यस्य, 'सत्य ज्ञानम्' इत्यादिवाक्याद् "असद्वा इदम्" इत्यादिवाक्यस्य च प्राबल्यापत्तेरुक्तत्वात्।

यत्त क्ङिति च इति निषध इग्लक्षणयोरव गुणवृद्धयो क्ङिति च इति वृद्धिस्तु नेग्लक्षणा। अनिर्दिष्टस्थानिकस्थले हि इका गुणवृद्धि इति परिभाषया इक इति पदोपस्थिति । अत्र त्वचनादेव स्थानिसमभिव्याहृतम्। अत एव नद्भवायनमित्यादौ क्ङिति च इति निषधो न प्रवर्तत इति सिद्धान्त । अनस्तदुदाहरणमत्र आर्त्यवेति तत्सत्यमेव परन्तु क्ङिति च इत्यस्य सामान्यतो गुणवृद्धिनिषधकत्वेऽप्यत्र चरितार्थतया क्ङिति च इत्यनेन निरवकाशेन बाधसंभवात्तदशे इग्लक्षणत्व प्रायशोऽनुपयुक्तमेवेति तदुदाहृतीनामाशय कल्प्य । क्ङिति च इति सूत्रव्याख्याने रुदशोऽपि गुण इत्यादिशास्त्रमवोदाहृतव्य ततश्च वचनद्वयप्रामाण्यान्निषधस्थलेऽपि विकल्प एव स्यान् बाधस्यान्याय्यत्वात् । अत्र निरवकाशत्वाद्यनुसरणत्व तु क्ङि निषधवाक्यत्वादभावेन यत्किञ्चित्प्राचीनमग्नीषोमीयादे इत्यस्य मन्त्रस्य प्रायणीयायाम् इत्यनेन बाधदर्शनेन विधिस्थलेऽपि तस्य निर्णायकत्वादित्यास्तां तावत्।

यदपि देवताधिकरणे वाचस्पत्ये उक्तम् नाकानुसारता द्विविधा हि विषय शब्दाना द्वारतश्च तात्पर्यतश्च यथैकस्मिन् वाक्य पदाना पदाय द्वारता वाक्यार्थस्य तात्पर्यता विषय । एव वाक्यद्वयेऽपि वाक्यतायामपि यथा देवदत्तीया गा क्रतव्यत्वेन वाक्यम् एषा बहुक्षीरत्वपरम्। दस्य बहुक्षीरत्वप्रतिपादन द्वारम् तात्पर्य तु क्रतव्यति । वाक्यान्तराय तत्र यद्द्वार तत्प्रमाणान्तरविरोधेऽपि न्याय्यत । यथा विष भक्षयेत वाक्य मास्मद्गृहे भुङ्क्ष्वेति वाक्यान्तरार्थपरम्। यत्र तु तात्पर्य तत्र मानान्तरविरोध पर्यालोच्य तत्प्रमाणमेव भवति वेदान्तास्तु पौरुषेयपदार्थालोचनया निरस्तसमस्त भेदप्रपञ्चत्वप्रतिपादनपरा अपौरुषेया स्वत सिद्धतात्त्विकप्रमाणभावा तात्त्विकप्रमाणभावात् प्रत्यक्षादाद् विप्रकृष्टाव्यसाध्यव्यवहारेषु तस्मिन् व्यवस्थापयन्ति इति तदपि चिन्त्यम् प्रमाणतात्पर्यविषयत्वस्य मानान्तराविरुद्ध व्याप्यत्वात् व्यापकीभूतमानान्तराविरुद्धव्यावृत्ताद्वैत व्याप्यस्य प्रमाणतात्पर्य विषयत्वस्यापि* व्यावृत्त । अपौरुषेयत्वस्य मानान्तरसाधारण्येन वेदान्त वाक्यानामेव स्वत सिद्धतात्त्विकप्रामाण्यकत्व वाजाभावात् पौरुषेयस्यैव मानान्तरविरोधविरहस्यापि पर्यालोचन मानाभावात् व्यावहारिकप्रामाण्य भेदस्यासिद्धतया तस्मिन् प्रत्यक्षादेरव्यवस्थापयितुमशक्यत्वाच्चेत्यादि सर्व सवारणीयम्।

यत्तु अद्वैतश्रुतिस्तात्त्विका प्रमाणत्वे सत्यनाप्तप्रयोजनाबोधकश्रुति त्वात् तात्त्विकप्रमाणत्वेन पराभ्युपगतश्रुतिवत् अप्रामाण्यानुपपत्तिरनु

कूलतर्कः । न च विरोधपरिहाराय विश्वमत्वश्रुतिर्न तात्त्विकप्रमाणं तात्त्विक-निषेधप्रतियोगिविषयकत्वादिनानुमानमवश्यमपेक्षणीयम् यया चान्योन्याश्रयात् पूर्वानुमानव्यतिरेकेण निषेधतात्त्विकत्वमिति वाच्यम्, विश्वमत्वश्रुतेस्तात्त्विकप्रामाण्यनिश्चयाभावादेव पूर्वानुमान विश्वमत्वश्रुतिविरोधानुत्थानात् । विश्वमत्वश्रुतौ च तात्त्विकप्रामाण्यनिश्चयो नास्त्येव अद्वैतश्रुताविव तस्यामपि प्रामाण्यव्यावहारिकत्वाभावनिश्चयाभावेन तत्पूर्वं पूर्वोक्तहेत्वभावात् । अद्वैतश्रुतौ तात्त्विकप्रामाण्यनिश्चयाभावस्तु पूर्वानुमाने साध्यसंशयमात्रको न विरोधी, प्रत्युतानुकूलपक्षसाधकत्वात् पूर्वानुमानेऽप्रामाण्यसंशये सूक्तवर्त्ममूलकविशेषदर्शनादिना निरसनीय इति नान्योन्याश्रय, इति । तदप्यसत्, अज्ञानेतरादिविशेष्यासिद्धया हेतौ स्वरूपासिद्धत्वात्, विश्वमत्वश्रुतावप्युक्तहेतुमत्त्वाच्च । न च तत्र व्यावहारिकप्रामाण्यविरहनिश्चय, अनुपपन्नत्वादेकविरोधिसंशये तदन्यविरोधिनिश्चयानुदयाच्च ।

यत्तु अद्वैते यदि प्रातीतिक व्यावहारिक वा स्यात्तदादृष्टव्यवहार्यं वा न स्यादित्युक्तम्, तदपि न, तस्यानुकूलत्वानङ्गीकारात् । एतेन तर्कान्तरमपि परास्तमित्यादि स्वयमूहनीयम् ।

यदपि यथा प्रत्यक्षादिप्राप्तहिंसाविषये सावकाश "न हिंस्याद्" इति वाक्यं निषेध्यसमर्पणायाग्नीषोमीयवाक्यं नापेक्षते, तस्याधर्मापत्तेर्लाघवाच्च, तया घटादिसम्बन्ध्यं प्रत्यक्षतया तन्निषेधेन चरितार्था नेहेत्यादिश्रुति प्रत्यक्षानुगतधर्मादिसत्त्वबोधिका विश्वमत्वश्रुतिं न बाधेत तत्प्राप्तप्रतियोगिकनिषेधतात्पर्यकत्वाभावादित्याशङ्क्योक्तम्, अग्नीषोमीयवाक्यस्य निषेधविषयन्यूनविषयत्वेनान्यशेषतया स्वार्थतात्पर्यरहितत्वेन च निषेध्यसमर्पणद्वारेण निषेधवाक्यशेषता । विश्व सत्यमित्यादेस्तु निषेधविषयसमानविषयत्वेन तात्पर्यरहितत्वेन च निषेध्यसमर्पणद्वारेण निषेधवाक्यशेषतोचितैव । अत एव प्रत्यक्षाप्राप्तघटादिधर्मादिसत्त्वोपन्यासेन न वाक्यभेदापत्त्यर्मपि, स्वार्थतात्पर्यरहितेन च नाग्नीषोमीयवाक्यतुल्यत्वमिति, तदपि चिन्त्यम्, निषेध्यतावच्छेदकस्वरूपावच्छिन्नविषयकत्वेन निषेधविषयसमानविषयस्यापि "पोडशिनं गृह्णाति" इत्यादेरिच्छेयमानत्वाभावात् । स्वार्थतात्पर्यरहितत्वं तु न कथञ्चित्, अवान्तरतात्पर्ये बाधकाभावात्तत्परमतात्पर्यरहितत्वमिति चेन्न, अद्वैतश्रुतीनामप्यवान्तरतात्पर्येणैवाद्वैते प्रामाण्यस्यैवाभ्युपगमात् । [1]अहो महदाश्चर्यम्[1] मानान्तरबाधितं नावान्तरतात्पर्यं तद्विरुद्धे स्वस्यैवंतन्निधानमित्यास्तामनुपयुक्तमेतत्[2] ।

१-१ ग्रहो—क । २-२ नाग्नि—ख ।

केचित्तु विश्वं सत्यमित्यादिवाक्यमपि धर्मादिमात्रनत्यत्वविषयकत्वान्नेतीत्यादिश्रुतिनिषेध्यसर्वसाद्दश्यसत्यत्वाबोधकत्वेन निषेधन्यूनविषयमेवेति वदन्ति। यत्तु नैतद् युक्तम्, नेतीत्यादिश्रुतिर्हि इतिशब्दोपात्तनानाधर्मावच्छिन्नप्रतियोगिताकान् नानानिषेधान्बोधयति इति, विश्वसत्ववाक्यं यदि धर्मादेव सत्त्वं बोधयेत्तथापि धर्मादौ सत्यतावच्छिन्नाभाववोधकत्वांशे नेतीत्यादिश्रुतिसमानविषयकमेव, निषेध्यतावच्छेदकरूपावच्छिन्नविषयताकत्वस्यैव समानविषयकत्वस्यापेक्षणीयत्वात्, तावतैव प्रतियोगितावच्छेदकविशिष्टप्रसक्तेर्निर्वाहात्, न हिंस्यादिति वाक्यस्य तु भूतहिंसात्वावच्छेदेन बलवदनिष्टाजनकत्वाभाववोधकत्वेन हिंसात्वावच्छेदेनोक्ताजनकत्वरूपप्रतियोगिप्रसक्तिसापेक्षत्वादग्नीषोमीयवाक्यं तादृशप्रसक्त्यजनकमनपेक्षणीयमेवेति, तच्चिन्त्यम्, हिंसात्वावच्छेदेनोक्ताजनकत्वस्य लोकतोऽपि प्रसक्त्यभावान्न हिंस्यादित्यस्याप्रसक्तप्रतिषेधत्वापत्तेः। अन्तत स्वहिंसायामेव तस्य दुर्ग्रहत्वात्, "नह नानास्ति किञ्चन" इति श्रुत्येकवाक्यतया नेतीत्यादावपि आत्मभिन्नस्यैव निषधप्रतियोगितावच्छेदकतायां वेदान्तिभिरभिधेयत्वात्। तत्तद्वस्यासाधारणनानाधर्माणामेकदोपस्थित्यसम्भवेन तदवच्छिन्नप्रतियोगिताकानां नानानिषधानां बोधयितुमशक्यत्वात्। तथा च निषेध्यतावच्छेदकरूपावच्छिन्नविषयताकत्वमपि कुत। तथाचात्मभिन्नत्वावच्छेदेन विश्वसत्वश्रुते सत्त्वाबोधकत्वाद्वैतश्रुत्यपेक्षितात्मभिन्नत्वावच्छिन्नविशेष्यताकसत्यनात्वरूपप्रतियोगितावच्छेदकविशिष्टप्रसक्त्यनुपपादकत्वात् कथमग्नीषोमीयवाक्यवैयर्थ्यमित्यास्तां तावत्। ब्रह्ममीमांसाद्वितीयाध्यायसूत्रद्वयेन जगत पारमार्थिकसत्त्वबोधनाद्वैतमते तद्विरोधः।

न चास्य शून्यवादनिरासार्थत्वादसद्वैलक्षण्यमात्रबोधकत्वान्न दोष इति वाच्यम्, असद्वैलक्षण्यं ह्यर्थक्रियाकारित्वरूपमुक्तमूत्रबोध्यं निषेधाप्रतियोगित्वरूपं वा? नाद्यः, शून्यवादिसाधारण्यात्। न द्वितीयः, त्वयाऽपि तदनभ्युपगमात्। सूत्रे स्वप्नवैलक्षण्योक्त्ययोगाद्व्यावहारिकत्वमात्रेण स्वप्नवैलक्षण्यस्य त्वन्मतेऽपि सत्त्वाच्च। तदुक्तं बौद्धैः—

द्वे सत्त्वे समुपाश्रित्य बौद्धानां[1] धर्मदेशना। इति

अत्र वेदान्तिनः सूत्रार्थानवबोधमूलकमिदं परवाक्यम्, तथा हि "सदूपाद्वैलक्षण्यं जगत् सर्वमसद्" इत्यस्य प्रथमाध्यायोक्तत्वात् तत्र सर्वम-

१ बुद्धानां—ब।

सदिति पक्षतावच्छेदकावच्छेदेनानुमित्या ब्रह्मसाधारण्यनिरस्ततायां श्रामाया विरोधप्रसङ्ग । तदुक्तम्—

न सनासन्न सदसन्न चानुभयतत्त्वकम् ।
विमत तर्कपीडत्वान्मरीचिषु यथोदकम् ॥ इति ।

तथा च न सद्बाधयोग्यत्वात्, नासत्कालादिसम्बन्धात्, न सदसद्विरोधात्, न चानुभयतत्त्वक सदसद्भयारभावयत्सदसद्भिन्नत्वाभ्या निर्वक्तुमशक्यत्वात् । विमतपदेन सत्त्वेन प्रतीयमानत्वरूप पक्षतावच्छेदक विवक्षितम्, अन्यथा तुच्छे बाधासिद्धयो प्रसङ्गात् । अन्यसाध्यद्वय तु धीविषयत्वमव पक्षतावच्छदकम्, हेतुसाध्यद्वययोस्तु साधारण्यात् । एव प्राप्ते परिहारमूने "नाभाव उपलब्धे" इति न शून्यवत्, उपलब्धे सत्त्वेन प्रमाणात्प्रतीत । ततश्च ब्रह्म न बाध्य बाधायाग्यत्वादिति हतौ तात्पर्यम् । शून्यवादिनापि किञ्चित्परमार्थसदवश्य स्वीकार्यं बाधस्य बाध्याधिकसत्ताकत्वनियमात् । सर्वस्य बाध्यत्व च बाधस्य निरवधित्वप्रसङ्गात् । तदुक्तम्—

बाधितोपह्नवो मानै व्यावहारिकमानता ।
मानाना तात्त्विक किञ्चिद्वस्त्वनास्तित्व दुर्नया ॥ इति ।

मानानामबाधितविषयकत्वरूपप्रामाण्यस्यौत्सर्गिकत्वाद्वस्तुनामपह्नवो बाधो वोचिता न सम्भवति ।

ननु बाधकप्रमाणादौत्सर्गिकस्य बाधोऽस्तु ? तत्राह—व्यावहारिकेति । बाधितविषयकेऽर्थे । अनाश्रित्य बाधविषयत्वेनास्वीकृत्य बाधकज्ञानस्य बाध्यज्ञानापेक्षयाधिकसत्ताकविषयत्वनियमात् । समसत्ताकविषयकत्वे शून्यवत्वन बाध्यबाधकत्वानुपपत्तेरतस्तात्त्विकविषयघीरेव व्यावहारिकमानबाधकत्वेन वाच्या । अतस्तात्त्विक किञ्चदवश्य वाच्यमिति न सर्वशून्यत्वसिद्धि । अथवानाश्रित्य साक्षित्वेनास्वीकृत्य साक्षिणोऽपि बाधस्वीकारे तत्साधक साक्षान्तरमत्र वाच्यम् । एव तद्बाधसाधकमपि साक्षान्तरमवतिरीत्या पूर्वपूर्वसाक्षिबाधार्थमुत्तरोत्तरसाक्षिधारास्वीकाराद्दुर्वारतस्या स्यात् । स्फुरण नास्तीति बाधानुपलम्भेश्च साक्षिरूप ब्रह्म तात्त्विकमेव वाच्यमिति भाव । नापि स्वप्नवैधर्म्योक्त्यनुपपत्ति, उक्तानुमाने बाधित्व प्रामाण्यगम्यत्व दोषजन्यत्व वोपाधिरित्येतदर्थत्वात् । बाध्यत्वादे स्वप्नधर्मस्य ब्रह्मण्यभावदर्शनेन स्वप्नादौ निश्चितसाध्यव्यापकत्वस्य साधनाधिकरणे ब्रह्मणि तदभावेन साधनाव्यापकत्वस्य च दर्शितत्वात् ।

एतादृशश्च सूत्रार्थो न प्रपञ्चमिथ्यात्वविरोधी, ब्रह्मणस्तात्त्विकसत्त्वस्यापनेऽपि प्रपञ्चस्य व्यावहारिकसत्त्वाशे तन्मताद्वैपम्याभावादिति ।

अथापि विज्ञानवादनिराकरणपरं तत्सूत्रम् । तथाहि—रूपादिरहितब्रह्मणो जगदुपादानत्वप्रतिपादकस्य प्रथमाध्यायस्य नीलाद्याकारविज्ञानसाधकेनानुमानेन न विरोधसन्देह प्राप्त । नीलाद्यनुभवरूपा धीर्नानुभवत्वशून्यविषयिणी स्वस्वरूपसमानसत्ताकनीलादितादात्म्ययुक्ता वा, अनुभवत्वात्, अनुभवविषयकस्वप्नधीवत् । आस्तिकमते नीलादेरनुभवत्वशून्यत्वादौपनिषदमतेऽप्यनुभवनिष्ठव्यावहारिकनीलादितादात्म्यस्य पारमार्थिकानुभवस्वरूपसमसत्ताकत्वाभावान्न सिद्धसाधनम्, स्वाप्नस्यावच्छिन्नानुभवस्य शुद्धानुभवविषयतादात्म्याच्च न दृष्टान्तस्य साध्यवैकल्यम् ।

न च जडस्यापि तादृशानुभवविषयत्वादनुभवत्वशून्यत्वाच्च तद्दोषतादवस्थ्यम्, अनुभवविषयकत्वावच्छेदेनानुभवत्वशून्याविषयकत्वस्य साध्यत्वात् जडस्य चानुभवत्वशून्यत्वेऽपि यदवच्छेदेन तज्ज्ञानेऽनुभवविषयत्व तदवच्छेदेन तद्विषयकत्वविरहात् । यद्वा वेदान्तिन प्रत्यनुभवत्वाश्रय[1]विषयकत्वमेव साध्यम्, [2]चाक्षुपादिरूपस्य विषयत्वात्सिद्धसाधनम् । चाक्षुपानुभव पर व्यवसायोऽनुव्यवसायो वेत्यन्यदेवेति वाच्यम्, पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् । व्यवसायस्यापि पक्षतावच्छेदकावच्छिन्नतया तत्रानुभवत्वाश्रयस्य विषयत्वाभावात् । स्वप्रकाशपक्षेऽपि स्वविषयिण्या एव बुद्धे स्वविषय[1]व्यापारजनकत्वमेव स्वप्रकाशत्वमित्यर्वाचीनमते अनुभवस्याविषयत्वापत्ते[1] । [2]नीलाद्यनुभवत्वावच्छेदेनानुभवत्वशून्यविषयकत्वाभावस्याग्निवैरनङ्गीकारात् न सिद्धसाधनम्, योगाचारेण तु एकस्या एव व्यक्तेरनुभवत्वनीलत्वादिस्वीकारेण यदवच्छेदेन नीलत्वाद्याश्रयविषयकत्व तदवच्छेदेनानुभवविषयकत्व तद्धर्मे स्वीक्री ति न वाच[2] (?) एव नीलाद्यनुभव स्वसत्ताकनीलत्वादिससर्गयुक्तोऽनुभवत्वाद्, यो यद्विषयकानुभवस्स तद्वृत्त्यसाधारणधर्मस्य स्वसमानसत्ताकससर्गवान्, यथाऽनुभवविषयको ऽनुभवोऽनुभववृत्तेरनुभवत्वस्य स्वसमानसत्ताकससर्गवानिति समान्यतो व्याप्तिर्विज्ञानवादिनोऽभिमता ।

न चेदमप्रयोजकम्, बुद्धिविषययो सहोपलम्भनियमात् । नह्यत्यन्तभिन्नयोर्महोपलम्भो नियत, गवाश्वादौ व्यभिचारात् । न च तुच्छानुभवे व्यभिचार ज्ञानत्वशून्यस्यापि तस्य ज्ञानविषयत्वादिति वाच्यम्; तुच्छ-

---

१ °श्रयत्वमेव—ख । २–२ नास्ति—ख । ३–३. नास्ति—क ।

विषयकवृत्तेर्विकल्परूपत्वेनानुभवाभावात् नुरुविलक्षणविषयकज्ञानस्यैवानुभवत्वादिति प्राप्ते, उच्यते, नीलाद्य इत्यादि। बाह्यानां नीलादीनां ज्ञानव्यतिरेकेणाभाव इत्यनुमानं न ज्ञानाद्वैतत्वेन प्रत्यक्षेणैव गृह्यमाणत्वात्। नीलाद्यर्थो न तद्विज्ञानमिनो विज्ञानान्तरानुगतत्वाद्, यो यदन्यत्वानुगत स ततोऽन्यो, यथा जातिर्व्यक्तेरिति प्रतिरोधाच्च। किन्तु व्यवहारदशायामर्थक्रियाकारित्वसत्त्वेपिताऽप्यद्वैतश्रुतिबलात् ब्रह्मणि कल्पितो न परमार्थ सन्निनिश्चितश्च नुगतमताद्वैद इति। तदय पलितार्थ —

बाधेन सोपाधिकानुमाने उपायभावेन सहोपलम्भ ।
सारप्यतो बुद्धिनदर्यभेद न्यूनार्थ नङ्गे भवतोऽपि तुल्य ॥ इति ।

बाध्यत्वाद्युपाधियुक्तमनुमानमिति व्याख्यानप्रायम्। सहोपलम्भनियमस्तु विषयस्य ज्ञानजाने उपायत्वात्। प्रमाया विषयनिरूपकत्वेन स्वग्रहेतुत्वेऽपि यया न स्वतादात्म्य न तया विषयोपरागेणैव ज्ञानग्रहान्विषयोऽपि ज्ञानविशेषणति। विषयनिरूप्य हि ज्ञानमिति न्यायात्। तथा च सौत्रान्तिकेन पृथिव्यादिचतुष्टयान्यगुणाना स्थूलावयविनश्चानङ्गीकारेऽपि परमाणुसङ्घातरूप एवार्थोऽङ्गीकृत, अन्यथा ज्ञाने विषयस्य प्रतिबिम्बरूपमादाप्यानुपपत्ते। एव च स्थूलबाह्यार्थानङ्गीकारेण विज्ञानवादिनाप्यवश्य स्वीकार्यम्, बाह्यशब्दानिर्वेद्यस्य विषयज्ञानया साहित्यस्य त्वयाप्युपगमात्। तस्य भेद विनानुपपत्तत्वात्। न च स्वसमानसत्ताक विषयतादात्म्यमेव मन्यते ज्ञाने साप्यनिर्वाच्यम्, तादात्म्यस्वीकारेऽपि तस्य ज्ञानसमानसत्ताकत्वे मानाभावात्। एकस्मिन् ज्ञानस्वरूपे तात्त्विके सर्वविषयाणा तादात्म्यस्वीकारेण वदान्तिमते निर्वाहात्तन्मतेऽनन्तज्ञानोत्पत्तिकल्पन गौरवात्। न च तन्मतेऽपि विषयाणामनन्तानामुत्पत्ते साम्यमिति वाच्यम्, अनन्तविषयकज्ञानस्यैव तद्विषयाणामुत्पत्तेरनुपपन्नादिति दिक्।

एवमपि न सूत्रविरोध । व्यावहारिकसत्यत्वेनाभ्युपगमात्तस्य च मिथ्यात्वविरोधित्वात्। नापि प्रमाणसिद्धानामेव पदार्थाना मिथ्यात्वस्य बोध्यतया धर्मिग्राहकमानविरोध, तात्त्विकत्वस्य धर्मिग्राहकमाननिष्ठत्वानुपजीव्यत्वात्। व्यावहारिकप्रामाण्यस्य च मिथ्यात्वबोधकेनाप्यनपसारणादिति। तस्मादुक्तसूत्रविरोधशङ्का मन्दैव परेषामिति स्थितमिति ।

अत्रापाद वक्तव्यम्—किं प्रथमपक्ष सादितात्त्विक वप्रतिपादनेन शून्य वादनिरास ग्राह्याम्वेद व्यावहारिक वप्रतिपादनेन 'नाद्य साक्षिरास्ता त्विक्नायाम्दवाप्यनभ्युपगमात्। शब्दस्तुराश्चाग्राह्यत्वेन त्वदभिमतस्य साक्षित्वाभावादिति य पूर्वमवानिहित्वात्। स्वप्नान्तरेण तात्त्विकत्वस्य चार्किञ्चित्कराज्ञानपदायस्य तरपि तात्त्विक वानभ्युपगमाच्च। नाप्य शून्यवादिनापि तदभ्युपगमात्। वदन हि मिथ्यात्व वक्षण तरव लघुचन्द्रिका याम् अवश्यकृप्तन यनियादरित्वनालाक्य वृत्तेन सनु घट इत्यादिप्रत्ययाप पत्तरवाच्य च शून्यभावनानिवत्यत्वरूप माध्यमिक न स्वाक्रियत इति। अत पारमार्थिकसत्वाभिप्रायेणव तन्न प्रवृत्तमिति वश्यमङ्गीकरणीयम्। अतश्च तद्विरोधतिरोधानमहतवात् दुष्कमद। एव विज्ञानवादिनिराकरणायत्व पक्ष पि तरपि व्यावहारिकसत्वाभ्युपगमात्। तदुक्त खण्डनगीकारै— मायेन सत्वमसत्वादभिर्वचनीयमेव यदिति। ग्राह्यायासत्व यागचारादसमानम् इति च। तन्मतनिरासायमयक्रियाकारित्वरूपसत्व मदयप्रामाणिक दोष दत्वा मूलायक्षतस्य दुराग्रहमात्रवात्। प्रत्युत याह्य सत्व विज्ञानवादिभिरभ्युपाग्यत तादृशसत्वप्रतिपादन एव शून्यस्य नापयत्। नाभाव उपलब्धरित्वनन प्रपञ्चसत्ताप्रतिपादनेव परमतस्य निराकृतवात्। नाप्तनाप्तिक वस्य मूल तन्मतदूषणवनानुपपत्तेश्च। परमतदूषणपरस्य मूलस्य स्वमत पतिपादकत्वमानप्रतिपादकत्वन व्याख्यानस्यायन्तमनुचितवाच्च। एतेन मन्त्रनि वाक्यप्रयक्रियाकारि त्वादिविशेषा निरस्ता। सन्तव्यसमाधानक्षमवात्। धर्मिग्राहकमान विरोधपरिहारापायस्य पूर्वरायव सुरक्षाया इतिदिक्।

वन्दे विन्ध्येश्वरीनामकं तर्कामृतम्।
श्रुतिन्यायनार्थं श्रुतितात्पर्यमद्वय ॥ २ ॥

चतुर्थोऽशः

एवं तावच्छ्रुतिरभिमता याद्दशार्थी परेषा
दृष्ट्वा तस्यांभ्युपगममिद रीतिमन्विस्तम्[1] ॥
सम्प्रत्यर्थं कथमिव तथा शाब्दमर्थद्वयानां,
तद्वाक्येभ्य. स्वयमस इति स्फायतेऽय विचार ॥

सम्युपेत्य ह्यद तवोवनानुगुण्य यथोक्तश्रुतीना प्रत्यक्षादिविरोधेन तन्
तात्पर्य नान्वीक्षितुम्—

तमर्थ्यमाने शब्दार्थे सन्त्यर्थं. कदर्थने ।
मनोरथोऽय मिथ्यात्ववादिना परमार्थत ॥

तथा हि—छान्दोग्योपनिषदि षष्ठप्रपाठके श्रूयते—"श्वेतकेतुर्हारुणेय
आस त ह पितोवाच श्वेतकेतो वस ब्रह्मचर्य न वै सोम्यास्मत्कुलीनो नानूच्य
ब्रह्मबन्धुरिव भवतीति ॥ स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षं सर्वान्
वेदान्धीत्य महामना अनूचानमानी स्तब्ध एयाय त ह पितोवाच ॥ श्वेतकेतो
यन्नु सोम्येद महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्य येनाश्रुत
श्रुत मतमविज्ञात विज्ञातमिति कथमु भगव स आदेशो भवतीति ॥
यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मय विज्ञात स्याद्वाचारम्भण विकारो नाम-
धेय मृत्तिकेत्येव सत्यम् ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमय विज्ञात
स्याद्वाचारम्भण विकारो नामधेय लोहमित्येव सत्यम् ॥ यथा सोम्यैकेन नखनि-
कृन्तनेन सर्वं काष्णायस विज्ञात स्याद्वाचारम्भण विकारो नामधेय कृष्णाय-
समित्येव सत्य सोम्य स आदेशो भवतीति ॥ न वै नूनं भगवन्तस्त एतद-
वेदिषुर्यद्ध्येतदवेदिष्यन् कथ मे नावक्ष्यन्निति भगवान्त्वेवमेनद् ब्रवीत्विति
तथा सोम्येति होवाच ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय तद्धैक
आहुरसदेवेदमग्र आसीदेकमेवाद्वितीय तस्मादसत सदजायत ॥ कुतस्तु खलु
सोम्यैव स्यादिति होवाच कथमसत सज्जायेतेति सत्वेव सोम्येदमग्र आसी-
देकमेवाद्वितीयम् ॥ तदैक्षत बहु स्यामप्रजायेयेति ततेजोऽसृजत ततेज ऐक्षत
बहुस्यामप्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्वच शोचति म्वदते वा पुरुष-

१. तस्या कृत्वा—क ।

स्तेजस एव तद्धयापो जायन्ते ॥ ता आप ऐक्षन्त बह्व्य स्या प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्न भवत्यद्भ्य एव तद्ध्यन्नाद्य जायते । तेषा खल्वेषा भूताना त्रीण्येव बीजानि सम्भवन्त्याण्डज जीवज मुद्भिज्जमिति ॥ सोऽय देवदत्तैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥ सेय देवतैमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ॥ तासा त्रिवृत त्रिवृतमेकैकामकरोद् यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति यद्वै रोहित रूपमित्यादि ।" अस्यार्थं—अनूचानमानी साङ्गवेदाध्येतारमात्मानम्मन्यमान 'अनूचान प्रवचने साङ्गेऽधीती गुरोस्तु य" इत्यमरः । आदेशमुपदेशार्हं तन्मात्रगम्यमिति यावत् । 'तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणि श्रोत्रिय ब्रह्मनिष्ठम्" इति श्रवणात् । "आचार्यवान्पुरुषा वेद" इति वक्ष्यमाणेन समानार्थं चेदम् । अप्राक्ष स्वगुरु प्रति त्व पृष्टवान् । छान्दसत्वाद् अस्मिसिचोऽपृक्ते" इतीडागमाभाव । एतेनोत्तरजन्यज्ञानस्य शाब्दत्वनियमाच्छब्दादेव ब्रह्मापरोक्षमिति निरस्तम्। विस्तर पुरस्तात् । तज्ज्ञानस्य वैकल्यात्प्रश्नाभावमाशङ्क्याह–येनेति । येन श्रुतेन मतेन विज्ञातेन च अश्रुतममतमविज्ञात वस्तु । शब्दानुमानप्रत्यक्षैर्विशिष्यानवगतमपीति यावत् । श्रुत मा विज्ञातश्च भवति तत्फलनिष्पत्ते । ईश्वरज्ञानस्य सर्वज्ञत्वे हेतुत्वात् । तथा च **योगसूत्रम्**–'तत प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" इति । तत ईश्वरप्रणिधानात्प्रत्यगात्माधिगम । अन्तरायस्य रागादेरप्यभाव इति तदर्थं । **तद्भाष्यकाराश्च** "भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञान वैराग्यादिना 'इति । अत एव **भगवत्पादैरुक्तम्**–' यत्प्रसादाद्धि योगिनामप्यतीतानागतविषय प्रत्यक्ष ज्ञानमिच्छन्ति योगशास्त्रविद " इति । एतेन 'कस्मिनु भगवेति विज्ञाने सर्वमिद विज्ञातम्भवति" इत्याथर्वणश्रुतिरपि व्याख्याता । अत एव बृहदारण्यकेऽपि– आ मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेद सर्व विदितम्" इति । व्याख्यातश्च टीकाकारै.–"आत्मनो वै आत्मन एव अरे मैत्रेयि दर्शनेन श्रवणेन मत्या विज्ञानेन साक्षात्कारेण वाक्यार्थज्ञानेन युक्त्यनुचिन्तनेन निदिध्यासनेद सर्वं यत्किञ्चित्साक्षात्करणीय वाक्यादवगन्तव्य युक्त्या चिन्तनीय निदिध्यासितव्य निखिल विदित साक्षात्कृत श्रुत मत निदिध्यासितं च[1] स्यादिति शेष" इति । अत्र बाधाया सामानाधिकरण्यमित्यादेश्च

---

१ वा—क ।

निराकरिष्यमाणत्वात्तथा चात्मतत्त्वज्ञानन तु नत्तत्पदार्थवृत्त्यसाधारण-धर्माश्रे निरवच्छिन्नप्रकारताकतावच्छिन्नविशेष्यकबोध सम्भवतीति भाव । एक ज्ञानेन कथमन्यज्ञानमतो दृष्टान्तमाह—यथा सोम्यति । एकेन मृत्पिण्डेन विज्ञा-तेन यथा मृदन्तरमपि ज्ञायत । परमाण्वादेरप्रत्यक्षत्वात्पृथिवीपद स्थलपृथिव्य-र्थकम्, मृत्पदञ्च पृथिवीपरम् । एकपदञ्च येन धर्मेण तदव्यक्तिप्रत्यक्ष तद्धर्म-प्रकारक एव तद्धर्मावच्छिन्नव्यक्तिभानबाधो भवतीति सूचनार्थनिधारणाय-कत्वपर्यवसानेन तस्य च सजातीयविषयकत्वेन तथा लाभात् । तेन चक्षु संयुक्तघटस्य वस्तुत पृथिवीत्वेऽपि यदा पृथिवीत्वप्रकारक चाक्षुप तदा पृथिवीत्वेन सकलपृथिवीग्रहणम्, यदा तु घटत्वेन तत् तदा घटत्वेन यावद्-घटग्रहणमिति घटत्वप्रकारकचाक्षुपकाले घटाख्यपृथिवीज्ञानस्य यावत्पृथिव्य-विषयकत्वेऽपि न क्षति । मृण्मयमित्यत्र पृथिवीपर मृत्पद पृथिवीत्वतात्पर्य-ग्राहकम्, मयट् प्राचुर्ये, ततश्च पृथिवीत्वजातेरेकयेन सजातीयव्यक्त्यन्तरसव-लितत्वरूपप्राचुर्यबोधेन समवेतत्वरूपतदर्थकतया समवायेन यत्र पृथिवीत्व वर्त्तते तेषामेव प्रत्यक्ष न तु कालिकेन पृथिवीत्ववतो जलादेरिति भाव । चक्षु-संयुक्तत्वौ येन सम्बन्धेन यत्सामान्य गृह्यते तेनैव सम्बन्धेन तत्सामान्यस्य तदाश्रयविशेष्यकस्वप्रकारकप्रत्यक्षहेतुत्वात् ।

ननु तत्प्रत्यक्षस्य यावत्तद्व्यक्तिविषयत्वे किं प्रमाणमत आह—वाचा-रम्भण विकार इति । वाचा घटमानयेत्यादिवाक्येनारम्भण प्रयत्नस्तद्-रूपो विकारो भवतीति । दृश्यते ह्येकघटे शक्तिज्ञाने देशान्तरीयघट विशिष्य-शक्तिग्रहशून्यस्यापि घटमानयेत्यादिवाक्यात् तदानयने चेष्टा, तया च तत्र प्रवृत्ति, तया च तदानयनेच्छेति । तया च तदनुकूलज्ञानमाक्षिप्यते तच्च शाब्दमेव मानान्तरस्य तदानीमनुपस्थितत्वात् न च तच्छक्तिग्रह विना । स च तदानी तदुपायाभावेन कालान्तरीयघटान्तरविषयकशक्तिग्रहकालीन एवेति । अत एव विकारेति यत्नविशेषण कार्येण स्वाकाङ्क्षितकारणपर-म्परयोपलाभाय सगच्छते । न तु तत्र शक्तिभ्रमादेव शाब्दबोध स्यादत आह—नामधेय मृत्तिकैव सत्यम् इति । मृत्तिकेत्येव नामधेय सत्य क्व पुनस्तद्विषयकशक्तिग्रह प्रमेत्यत्र विवाद । तथा च घटत्वादेरविशेषाच्छक्ति-ग्रहविषयीभूतव्यक्तिविषयकशाब्दस्यापि प्रमात्वे बाधकाभावाच्छक्तिग्रहस्यैत-द्विषयकत्व सिद्धम् । तथा चैतद्घटविषयकशाब्दबोध स्वविषयविषयक-शक्तिग्रहमूलक घटविषयकशाब्दबोधत्वात्तद्घटशाब्दबोधवदिति पूर्वोक्ता-नुमानेन शक्तिग्रहसिद्धावौत्सर्गिकत्वाल्लाघवाच्च प्रमात्वमेव तस्येति । तथा -

च यथा सामान्यलक्षणप्रत्यासत्त्या एकघटादिज्ञानात्सर्वघटादिज्ञान तथात्मतत्त्वज्ञानात्सार्वज्ञम्, लौकिकप्रत्यासत्तिमात्रस्य ज्ञाने नापेक्षितत्वात्। क्वचिदलौकिकप्रत्यासत्त्यापि ज्ञानसम्भवादिति हृदयम्। सामान्यलक्षणानङ्गीकारपक्षेऽप्येकघटज्ञानेन सर्वघटज्ञानमस्त्येव। समानप्रकारकत्वस्य नियामकत्वेनैकघटविषयकज्ञानस्य यावद्घटविषयकत्वस्य तत्रानभ्युपगमेऽपि तच्छक्तिग्रहादेवान्यघटशाब्दादौ हेतुत्वोपगमात्, फलस्योभयसाधारणत्वात्। एतत्पक्षे तु मृत्तिकेति नामधेयमन्यव्यक्तेरिति सत्यमेव। अत उभयोरेकधर्मावच्छिन्नतयैकघटशक्तिग्रहादपि तत्प्रकारीभूतघटत्वप्रकारकघटान्तरशाब्द उपपन्न। एवमन्यत्रापीति योज्यम्। एवमुत्तरवाक्यद्वयेऽपि। लोहमणिपद सुवर्णार्थिकम्। नखनि कृन्तनपदञ्चाय सामान्यपरमिति परेषामिवास्माकमपि समानमिति विभावनीयम्। तस्माद् ब्रह्मज्ञानसिद्धौ कृतार्थतया पदार्थान्तराणा श्रवणाद्यभावेऽपि तस्य सत्यनाधायकतया—

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत"।

इति न्यायेनाकिञ्चित्करत्वात्। अत एव राजदर्शने सत्यमात्यादिदर्शन सिद्धमिति व्यवहार। तत्पक्षेऽपि गौणत्वावश्यकत्वादिति पुरस्ताद्विस्तर।

किञ्च परेषामुपादानज्ञानादुपादेयज्ञानमिति प्रतिज्ञानुरोधे नखनिकृन्तनपदस्य लोहपरत्व लक्षणयावश्यकम्, अन्यथा नखनिकृन्तनस्यान्त्यावयवित्वेनानुपादानतया दृष्टान्तत्वानुपपत्ते। तार्किकाणा तु तन्मानासाधारणरूपेणैव स्वावच्छिन्नव्यक्तिबोधस्य व्याख्यानसम्भवात्तस्य लोहसामान्यपरत्वमनावश्यकमेव। तदुक्तार्थदृष्टान्ततायास्तावतैव निर्वाहादिति रहस्यम्।

यत्तु भाष्यानुसारि व्याख्यान 'येनाश्रुत श्रुतमित्यादि" सामानाधिकरण्यबाधायामश्रुतमन्यत्सर्वं यदभिन्नश्रुतस्वरूप व्यतिरेकेण नास्तीत्यर्थ। तथा चैक सर्वस्याधिष्ठानमित्यर्थं प्रतिज्ञात। तन मृत्पिण्डव्यतिरेकेण तद्विकारो यथा नास्तीत्यादिदृष्टान्ता यथा सोम्येत्यादिना प्रतिपाद्यन्ते। मृत्पिण्डपदञ्च [1]मुख्यार्थैकपदयोगाद् भूमिरूपपिण्डायकम्, पिण्डपद च स्थौल्यबोधक मृण्मयपात्रोपादानत्वयोग्यतालाभाय[1] मृण्मयपद च भूमिविकारमात्रार्थकम्। तथा च भूमिविकार सर्वं यथा भूमि विना नास्तीत्यर्थ। भूमिविकारगस्त्व च मात्रादेव वृत्तादावत्तनमिति भूमेर्विभक्तपिण्डस्य नानाविकारानुपादानत्वेऽपि न क्षति। यद्यपि भूमेर्नोपादानत्व वेदान्तिनाम्, ब्रह्मण एवोपादानत्वात्, तथाप्यधिष्ठानतावच्छेदकशुक्त्यादिव्यतिरेकेण रूप्यादि

१-१ नास्ति—क।

नास्तीति व्यवहारवद् भूमिविकारादिस्वरूपदशासामान्याधारतावच्छेदकभूम्यादिव्यतिरेकेण तद्विकारो नास्तीति श्रुत्या तथोक्तम। एव च सर्वं मृण्मयमेकमृत्पिण्डभिन्नविज्ञानस्वरूपमित्यपि वाधाया सामानाधिकरण्यम्। तत्र हेतुर्मृत्तिकेत्येव सत्यमिति। मृत्तिका भूरिति गृह्यमाण यत्तदेव सत्यम्, मृत्तिकात्वरूपस्य मन्यत्वाभावात्। तदवच्छिन्नचिद्रूपस्य दृष्टान्तत्वदीदशाया मृदा विविच्याज्ञानाद् भूमिवत् ज्ञायमानत्वेन च प्रकारेण मद्रूपलाभार्थमिनिशब्द। मनो ब्रह्मेत्यादौ ज्ञायमानत्वस्येतिशब्दार्थत्वात्। आद्यर्थको वतिशब्द, 'इति हेतु प्रकरणप्रकारादिसमाप्तिषु इत्यमरात्। तथा च भूमिविकारस्य विचारदशाया तत्स्वरूपमिव भूमिस्वरूपविचारदशायामपि मिथ्या तत्कारणरूपचिद्भूम्यान्यत्र सत्यानि। तेषामपि स्वरूपविचारदशाया तान्यपि मिथ्या, तत्कारणमेव सत्यमित्याद्यर्थलाभ। नन्वनिर्वचनीयत्वं चाग्र सामान्यपरम। नाद्मणिपदमपि सुवर्णार्थकम्। तयोर्विगपरणमेकपदत्वैकजातीयकम्। नन्वुपादान चैकजातीयत्वे सर्वपदोपादानत्वमभवलाभाय, इतिशब्दस्तु तथाप्युक्तरीत्या व्याख्येय। मृत्तिकेत्येव सत्यमित्यादौ हेतुर्वाचारम्भण विकारो नामधेयमिति। आरम्भणमत्र समवायिकारणजन्यत्वमुत्पत्तिर्वाचा वाङ्मात्र विचारासहमिति यावत्। तथा चोत्पत्ति मनाङ्मनो वेति निरूपयितुमशक्यत्वादुत्पन्नमामान्यविचार[1]सहमिति भाव। तावताप्यनाद्यविद्यासाधारण्येन हेत्वलाभादाह—विकारो नामधेयमिति। नाशादिविकृतियुक्त नाममात्र विचारासहमिति यावत्। अर्थं नामाभेदासम्भवादसत्व इत्यादाविव मात्रार्थान्तरभावेन विचारसहत्वलाभ। तथा चोत्पत्त्यादिविकृतेस्तद्युक्तस्य समग्रदुर्निरूपकत्वादिना विचारासहत्वान्मिथ्यात्वमिति निर्विकार ब्रह्मैव सत्यमिति दृष्टान्तोपपादकत्वेनोक्तमपि दार्ष्टान्तिकस्याप्युपपादकमिति दिक्।

अत्रेद वक्तव्यम्—येनाश्रुत श्रुतमित्यादौ बाधाया सामानाधिकरण्यमित्यत्र मानाभाव। तथाहि भवता मिथ्याकाङ्क्षममानविभक्तिकपदत्वरूपचतुर्द्धा सामानाधिकरण्यम्। अत्राद्य मिथ्यत्वाक्यो तादात्म्यबोधकाकाङ्क्षाघटित यथेद रजतमित्यादाविदमशस्य व्यावहारिकी सत्ता रजतस्य तु प्रातिभासिकीति भिन्नसत्ताकत्वम्। बाधाया बाध्यमानतादात्म्यापन्नचिन्नाधिष्ठानस्य बोधकाकाङ्क्षाघटित यथा स्थाणु पुमानित्यादौ स्थाणु पुरुषत्वेन ज्ञात इति स्थाणौ पुरुषतादात्म्यस्य बाधविषयत्वात्, बाध्यमानपुरुषतादात्म्यो-

[1] विचारासह—ख।

पलक्षितस्थाणुरूपाधिष्ठानस्य प्रतीतेः। स्थाणुव्यतिरेकेण पुमानास्तीति पुंसो मिथ्यात्वप्रत्ययात्। विशेषणविशेष्यभावे समानसत्ताकयोस्तादात्म्यबोधकवाक्यघटित यथा नीलमुत्पलमित्यादौ गुणगुणिनोर्द्वयोरपि व्यावहारिकसत्तावत्त्वात् समानसत्ताकत्वम्। अभेदेऽखण्डार्थबोधकवाक्यघटित यथा तत्त्वमसीत्यादौ। एवञ्च स्थाणौ पुरुषतादात्म्याभावस्य प्रमाणान्तरसिद्धत्वेन स्थाणु पुमानित्यादौ बाधाया सामानाधिकरण्याङ्गीकारेऽपि प्रकृते ब्रह्मस्वरूपव्यतिरेकेण प्रपञ्चाभावस्य प्रमाणान्तरादसिद्धतया तदभ्युपगमे किं बीजम्? श्रुतिशब्दादेव मिथ्यात्व हि सम्प्रति प्रतिपिपादयिषितम्।

न च प्रकारान्तरेण सम्भवद्बाधाका अश्रुतादिशब्दा उक्तसामानाधिकरण्ये पर्यवसाययितु शक्यन्ते। परिशेषप्रामाण्यानवतारात् सामानाधिकरण्यान्तरापेक्षया गौरवाच्च। अत सर्वस्यैकमधिष्ठानमिति स्थित वच। एव मृत्पिण्डव्यतिरेकेण तद्विकारो यथा नास्तीत्यादिदृष्टान्तपरत्वेन यथा सोम्येत्यादेर्व्याख्यानमप्ययुक्तम्। उभयमप्रतिपन्नस्यैव दृष्टान्तत्वात्। भवदुक्तार्थस्य च श्वेतकेतु प्रत्यसिद्धत्वादन्यथोपदेशवैयर्थ्यात्। दृष्टान्तस्यैव पितृवचनप्रामाण्येन प्रतिज्ञाया एव तेनानुमन्तु शक्यत्वात्। शङ्काकलङ्कस्य तावन्मात्रेण निवृत्त्यसम्भवात्। दृष्टान्तानुसारेणैव प्रतिज्ञाया नेयत्वात्। तदुक्त पार्थसारथिमिश्रैः—"सर्वत्र हि दृष्टान्तोपादान साध्यप्रतिपादकस्य वाक्यस्य तात्पर्याभिव्यक्त्यर्थम्" इति। मृत्पिण्डदृष्टान्तव्याख्यानमप्ययुक्तम्—भूमिर्हि महापृथिवी वा तज्जातीयमात्र वा? नाद्य, अन्त्यावयवित्वेन तद्विकारस्याप्रसिद्धे। नान्त्य, एकदेशस्य मुख्यार्थत्वायोगात्। घटोपादानपृथिव्यपेक्षया पटोपादानपृथिव्या मुख्यत्वे मानाभावात्। मृण्मयमात्रोपादानत्वयोग्यत्वमपि पिण्डपदव्यतिरेकेणापि सिद्धमेव। पृथिवीत्वस्य तद्योग्यतावच्छेदकत्वेऽस्थूलपृथिव्यामपि तत्त्वात्। कपालत्वादेस्तथात्वे तु स्थूलपृथिवीत्वावच्छेदेनापि तदभावान्मृण्मयपदस्य भूमिविकारार्थत्वमप्यसाधीय.। 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयो" इत्यत्र भाषायामित्युपादानसामर्थ्येन छन्दसि विकारे मयटो दुर्लभत्वात्।

नन्वेवमानन्दमयाधिकरणे आनन्दमयशब्दे 'विकारे मयड्" इति भगवत्पादव्याख्यानमसङ्गत स्यात्। अन्नमयप्राणमयमनोमयेषु "द्वयचश्छन्दसि" इति सूत्रेण विकारार्थे मयट् सम्भवेऽप्यानन्दमयेत्यत्र तदसम्भवात्। अत एव विकारशब्दाप्रयोग इति चेन्न, "प्राचुर्यात्" इतिसूत्रयतो वेदव्यासस्यापि तथैवाशय। उभयसम्भव एव प्रायपाठस्य निर्णायकत्वादिति चेत्, अत्र मनोरमाकृतः

ननु प्रकृतेऽपि तथैव व्यारत्ययमिति चेत्, आस्ता कथञ्चित्। प्रकृतमनुगराम। भूमिविकार सर्वो यथा भूमि विना नास्तीत्यस्य दृष्टान्तार्थत्व सर्वस्यैकमधिष्ठानमिति प्रतिज्ञाया कथमुत्पत्ति ? जलादिविकारेषु जलादेरेवाधिष्ठानत्वपर्यवसानाद् भूमिविकारे भूमेरधिष्ठानत्वाक्त, ब्रह्मैव सर्वाधिष्ठानमिति प्रतिज्ञाविरुद्धत्वाच्च। न च भूम्यवच्छिन्नचैतन्यस्यैवाधिष्ठानत्वाद् भूमेर्नाधिष्ठानत्वमपि तु तदवच्छेदकत्वमिति वाच्यम्, अधिष्ठानज्ञानन तत्कार्यज्ञानप्रतिज्ञाविलयापत्तो। एतेन यद्यपि भूमिर्नाधिष्ठानमित्यादिकमपि निरस्तम्। अधिष्ठानतावच्छेदकशुक्त्यादिव्यतिरेकेण रूप्यादिविरहस्य क्वचित् प्रसिद्धावप्यधिष्ठानतावच्छेदकभूम्यादिव्यतिरेकेण तद्विकारो नास्तीत्यस्य प्रथममनिश्चयादवच्छिन्नत्वापादानत्वसिद्धवनन्तरमेव भूम्यादेरधिष्ठानतावच्छेदकत्वस्य नवद्धि कल्पत्वात्। शब्दस्वारस्येन स्वाभिमतार्थानियनस्यैवेदानामुपक्रान्तत्वात्। अत एव सर्वं मृण्मयमेक मृत्पिण्डाभिनविज्ञातस्वरूपमित्यपि बाधाया सामानाधिकरण्यमित्ययुक्तम्।

यत्तु मृत्तिका भूमिरिति गृह्यमाण यत्तदेव सत्यमित्यादि तदसत्, मृत्तिकात्वेन गृह्यमाणत्वस्य मृत्तिकायामव सभवेन मृत्तिकास्वरूपस्य सत्यत्वानापेक्षात्। मृत्तिकास्वरूपस्य सत्यत्वाभावादेव न तथेति चेन्न, तदसत्यत्वसिद्धे। अत एव दृष्टान्तत्वबोधदशाया मृदवच्छिन्नचिद्रूपस्य मृद्विवर्त्तत्वेनाज्ञानाद भूमित्वप्रकारकज्ञानविशेष्यत्वरूपेण चिद्रूपलाभार्थमिति शब्द इति सावद्यम्। तथापि मृत्तिकात्वप्रकारकज्ञानविषयत्व यस्य बोद्धा गृहीत तत्रिष्ठस्यैव सत्यत्वस्य शाब्दबोधविषयत्वात् तादृशरूपेण चिद्रूप भासत इति तु भवतामेव कल्पन नात्तश्रुत्यर्थं प्रमाणान्तराभावात्पदार्थत्वाभावाच्च। इति शब्दो ज्ञायमानत्वार्थक इत्यप्ययुक्तम्। 'मना ब्रह्मेत्युपासीत" इत्यादौ ज्ञानार्थकयज्ञान्तरसमभिव्याहारवशेव तथात्वात्। 'तमादमु नारद इत्यवावि स" इत्यादौ तथैव दर्शनात्। नानाकारपरामर्शकत्वेतिशब्दस्य परामर्शनीयज्ञानस्वरूपवृत्तिपदजन्यबोधप्रकारकत्वग्राहकत्वात्। आद्यर्थकेतिशब्दाश्रयमूलकव्याख्यानमपि पूर्वोक्तव्याख्यानवदेव सदोषम्। यदपि मृत्तिकेत्येव सत्यमित्यादौ हेतुवाचारम्भणमित्यादीति, तन्न, हेतुपूर्वमेव साध्यनिर्देशस्यौत्सर्गिकत्वात् प्रथम हेतुनिर्देशस्यानावश्यकाभिधानत्वात्। 'वाङ्मात्रविचारमात्रमित्यर्थोऽपयुक्त सनोऽमना बोधवृत्तिरिति पक्षद्वयेऽन्यतरदापाणामवश्य मानाश्रयस्य पुरस्याप्यत्वात्'।

१–१ नास्ति –क।

तत्त्वनादिनाधारणेन मिथ्यात्वलाभार्थं विकारो नामधेयमितीति, तच्चिन्त्यम् तेनैव भावनादिना इच्छे मिथ्यात्वसिद्धौ वाचारम्भणमित्यस्यो-न्मत्तप्रलपितवैयर्थ्यापत्तेः । गोवलीवर्दन्याये न द्वितीयभागादिमानार्थ इति चेत्, सत्यम्, सकोचप्रागतिकगति-त्वात् । मद्व्याख्याने च क्वचित्पदस्य वैयर्थ्यमङ्गोचादेरभावाद् । वाचस्पत्य—

'वृष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपञ्चैव हलन्ताना यथा वाचा निशा दिशः ॥"

इति दामनभवेऽप्याकारागम्य प्रयोजनाभावात् । मद्रीया तु तृतीयान्त-त्वेनाविकारार्थत्वेन प्रयोजनत्वाद् वैयर्थ्याभावमात्रापेक्षया च तस्याभ्य-र्हितत्वात्, बाधकाभावात्तार्थान्तरभावेऽपि गौरवस्य दुर्वारितत्वात्, अमत्त इत्यादिस्मानार्थनिर्भावेऽप्येकमानान्तरविरहाच्च । एतेन "यो विचारः न वाचारम्भणं वागवलम्बनमुच्यते पर नामधेय नाममात्र सार्थं" इति कल्पतरूक्तमपि निरस्तम्, उद्देश्यविधेयभावविपरीत्याच्चेति दिक् ।

यत्तु भामत्यामुक्तं "शुक्तौ ज्ञानाया रूप्य ज्ञात भवति सा हि तस्य तत्त्वम्, एव ब्रह्मज्ञानात्सर्वं ज्ञात तद्धि तस्य तत्त्वमिति", तदपि चिन्त्यम्, शुक्तिज्ञान हि इदन्त्वेन शुक्तित्वेन वा ? नाद्य अधिष्ठानत्वप्रयोजकतादृशब्रह्म-ज्ञानस्यैदानीमपि सत्त्वेन सर्वज्ञानापत्तेरिष्टापत्तौ चानुभवविरोधात् । नान्त्यः; तस्य भ्रमत्वेनाशेषज्ञानाननुगुणत्वात् । शुक्तित्व धर्मितावच्छेदकीकृत्य रजतागेऽपि भाने[1] । ब्रह्मसर्वाधिष्ठानमित्यस्य मिथ्यामिथ्यात्वसिद्धयधीनत्वाच्च । रत्नमनुनराम । यत्तु विष्णुपुराणे—

वा भवानिनि निर्देशो वाचारम्भो ह्यनर्थकः,
शिविका दारुसङ्घातो रचना स्थितिमस्थिति ।
अन्विष्यता नृपश्रेष्ठ तद्भेदे शिविका त्वया,
एव ह्यवयवाना पृथग्भावे विमृश्यताम् ।
क्व यात चन्द्रमित्येव न्यायस्त्वयि, तथा मयि ॥

इति वाक्ये वाचारम्भणपदमस्मद्व्याख्यान एव समञ्जसम् ।

"यदग्ने रोहित रूप तेजसस्तद्रूप यच्छुक्ल तदपा यत्कृष्ण तदन्ना-पाना'दग्नेरग्नित्व वाचारम्भण विकारो नामधेय त्रीणि रूपाणीत्येव सत्यम्"

---

१ रूप्यज्ञानानुवृत्ते —क । २ अन्यादि°—क ।

इत्यादिवाक्येषु निवृत्ततान्यादिस्वरूपस्यानिवृत्ततेजोरूपस्वरूपव्यतिरेकेण विचारामहत्वमुक्त वाचारम्भणमित्यादिशब्दैः, तदप्यस्मद्रीत्यैव सगच्छत इति, तच्चिन्त्यम्, सर्वत्र तच्छब्दानामेकार्थकत्वाभावेऽपि दोषाभावात्, भवद्व्याख्यातार्थस्यापि तत्रानुपपत्तेश्च वाचारम्भणशब्दमात्रेणैव नैरर्थक्यलाभे निरर्थकपदस्य निरर्थकत्वापत्तेः।

न च तत्तात्पर्यस्फुटीकरणार्थमेव तदिति वाच्यम्; तथापि त्वद्रीत्या भवत्पदार्थस्यैव तव मिथ्यात्वस्य वाच्यतया निर्देशस्य तत्प्रतिपादनानर्हत्वात् निर्देशमिथ्यात्व प्रतिज्ञाय शिविकादेर्मिथ्यात्वप्रतिपादनस्याभ्युक्तवन्तत्वापत्तेश्च। किञ्चानर्थकपदे तत्पुरुषो बहुव्रीहिर्वा, नाद्यः; नञ्शब्दस्याधिकत्वापत्ते। नान्त्यः, तदर्थस्येव मिथ्यात्वप्रतिपादनापत्त्या युक्तनिर्देशस्य तदसिद्धेः। ततश्च वाचारम्भणपदतात्पर्यप्रकाशनार्थत्वस्य भङ्गप्रसङ्गात् यथास्थानञ्च विस्तरस्य वक्ष्यमाणत्वात्।

वाचारम्भणश्रुत्यर्थः॥ अपि च "एकमेवाद्वितीयम्" इति श्रुतेः कथं तत्र तात्पर्यम्। ईश्वरस्य ब्रह्मैकमेव न द्वितीयमित्यर्थकत्वेन वर्द्धमानोपाध्यायैर्व्याख्यानात्। यत्त्वेकपदेन सजातीयजीवादिभेदनिषेध तस्य स्वान्यशून्यत्वरूपकैवल्यार्थकत्वेऽपि भेदनिषेधबोधयान्तरोपादानाद् गोवलीवर्दन्यायेन स्वान्येत्यस्य जीवेश्वरादिरूपस्वान्यपरत्वावधारणादेवकारस्यापि ब्रह्मते पृथिव्यादिस्वान्यतादात्म्यशून्यबोधकत्वेन विशेषणीभूतस्वगतभेदनिषेधबोधकत्वम्। अद्वितीयपदे तु तत्पुरुषोपगमे द्वितीयभिन्नत्वेन बोधः स्यात्, स चायोग्य किञ्चिदपेक्षाद्वितीयपदस्य तत्रापि सत्त्वात्। तेन न विद्यते द्वितीयं यत्रेति बहुव्रीहिरेवेति द्वितीयपदस्य विजातीयद्वितीयपरतया विजातीयद्वितीयत्वावच्छिन्नप्रतियोगिताकनिषेधेऽर्थात्तादृशद्वितीयस्य भेदनिषेधः। तदुक्तम्—

"वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।
वृक्षान्तरात्सजातीयो विजातीयश्शिलादिकः॥
तथा सद्वस्तुनो भेदत्रय प्राप्त निवार्यते।
एवावधारणाद्वैतप्रतिषेधैस्त्रिभिः क्रमाद्॥" इति।

द्वितीयपदस्य सजातीयद्वितीयपरत्वे त्वद्वितीयपदस्यैव मत्सजातीयभेदप्रतिषेधकत्वम्, इतरद्भेदद्वयं तु एकपदैवकाग्र्यादेव प्रतिपेद्यम्। यद्वा द्वितीयपदस्यैव भेदत्रयनिषेधकत्व भेदभेद्य (?) मात्रस्य द्वितीयत्वात्तेनैव द्वयमात्रस्य निषेधसम्भवादेवकारादिपदद्वयमद्वैतबोधशङ्कापरिहारायेति।

अनेद वक्तव्यम्—भेदत्रयमेव कुतो निर्णीतं सजातीयविजातीयभेदवत् तद्गतधर्मप्रतियोगिभेदान्तराणामपि सत्त्वात्। अथ तद्भेदो भेदत्रय एव कथञ्चिदन्तर्भवति चेन्नहि भेदत्रये क पक्षपात। भेदनिषेध इत्येवोच्यताम्, अहो पदत्रयनार्थक्याय भेदत्रयमेवोद्भावयत सत्यमेव मायावादिन्व "सदेव सोम्येदमग्र आसीद्" इत्यत्रैवैक भेदान्तर कुतो न कल्पय। किञ्च एवकारेण भेदनिषेधो वक्तुमशक्य। समभिव्याहृतपदार्थस्यैवकारार्थैकदेशत्वान्यायात् प्रतियोगितयान्वयस्तदन्यपदार्थ एव तत्तादात्म्यादिसम्बन्धेन विशेष्यतया चान्वयात्। एकशब्दस्य समभिव्याहृतैवकारस्य ब्रह्मैवेत्यन्वयकल्पने गौरवात्। भेदैक्यस्य सच्छब्दान्तरैवकारान्तरस्य श्रूयमाणत्वाच्च।

किञ्च स्वान्यगुण्य ब्रह्मेत्युक्त्वा कथ तद्भेदनिषेध? न च विशेषणांऽपि निषेत्तव्यमिति वाच्यम्, विशेष्यबाध एव तथात्वात्। सविशेषणे हीति न्यायस्य बाधघटितत्वात्। एव स्वभेदनिषेधस्य स्वस्मिन् सिद्धतया तद्धर्मस्यैक्यस्यापि सत्यत्वाक्षतिश्च। जीवादे ब्रह्मानाश्रितत्वलाभेऽस्माकमेवेष्टसिद्धिश्च। ब्रह्मप्रतियोगिकभेदवत्त्वेनोपस्थितानां ब्रह्मनिष्ठभेदप्रतियोगित्वबोधस्य बाधितत्वाच्च। ब्रह्मनिष्ठभेदप्रतियोगित्वस्यापि पूर्वज्ञानेन विषयीकृतत्वात् तत्प्रतियोगिकभेदवत्त्वनिष्ठभेदप्रतियोगित्वनियमात्।

न च तत्प्रपञ्चस्य व्यावहारिकभेदविषयकत्वात् पारमार्थिकभेदनिषेधबोधितत्व नेति वाच्यम्, तात्त्विकत्वातिरिक्तव्यावहारिकत्वस्याद्याप्यसिद्धत्वात्। भेदप्रपञ्चस्य व्यावहारिकभेदविषयकत्वे सिद्धे सूत्रा पारमार्थिकतदभावबोधन तत्त्वे च भेदप्रपञ्चस्य व्यावहारिकभेदविषयकत्वनिरूपितव्याप्यत्वात् पारमार्थिकभेदस्य स्वस्मिन्नेवाप्रसिद्धया तदभावो बोधन इति वक्तुमशक्यत्वात्। न च पारमार्थिकत्वेन[1] व्यधिकरणधर्मेणावच्छिन्नप्रतियोगिक एव भेदनिषेधो बोधत इति वाच्यम्, पारमार्थिकत्वस्याप्रतियोगिताव्यधिकरणधर्मत्वेनाप्रसिद्धत्वात्। अत एव भेदे पारमार्थिकत्वनिषेधोऽप्यनाश्रय। शब्दादनुपस्थितस्य पारमार्थिकत्वस्य शाब्दे निषेधप्रतियोगितया चान्वयवारणस्यावश्यत्वेन शब्दोपस्थित्यैकादिपदज्ञानजन्यतावच्छेदकतया क्वाप्यकल्पनत्वात्।

वस्तुतस्तु एकपदेनैवेष्टसिद्धौ पदान्तरवैयर्थ्यापादक त्वदुक्त व्याख्यान न युक्तम्, गौरवलोपदौर्बल्याभ्यां सकोचौ ह्यगतिकगति, नह्यौचित्यावावदिशेष-

---

१ °मर्मि—क। २–२. नास्ति—क।

इत्यादि सर्वपदैकादिपदानां पदान्तरैकवाक्यतानिराकरणमेव युक्तत्वात्। एवे मुख्यान्वयेवल' इत्यनयोरेकपदत्व मुख्यार्थक वात्। विनैव परानन्दमेवारभ्य 'अथेतरान्यदुःखमेवापियन्ति मुख्यानन्दनिधारिणः। विनैवानन्दमेवारभ्य व्यक्तिमानवृत्तिदेवेति चानिष्टत्वात्। न हि विनैव परानन्दमेवारभ्य' विनैवानन्दमेवारभ्य विनैवानन्दमेवारभ्य बोधकत्वे निष्प्रपञ्चब्रह्मविनिगुप्तत्वतीना वाक्यानामेव। गौणे गौणत्वेवेत्यादौ तदभावात्। मुख्यत्वं च लक्षणाविरहेण, तच्च जीवभावारभ्य मिथ्यैवकार। जीवानाञ्च सुषुप्तिप्रलयादौ ज्ञानाभावात्। एतच्चार्थान्तरन्यायसिद्धवत्तिकि। अद्वितीयमसहायमद्वैतपरत्वाच्चैकानामपि तदन्यव्यावृत्तिरेकानुविधायिलानादिसत्वात्। असिद्धविरोधानुसारं पश्यत्वम्" इत्यत्र द्वितीयपद सहायबोधनेन महानाप्यदर्शनात्, अनुपपन्नमेवेति केवलेन व्याख्यानाच्च। अत एव "एकमेवाद्वितीयम्' इत्यादौ यथाश्रुतार्थत्व नास्तीत्यभिप्रायेण 'तथापि विप्रतिपिद्धार्थौ भवन्ति। एक एव रुद्रोऽवतस्थे न द्वितीय" इति निरुक्तकारैरुक्तम्। 'ब्रह्मैवैक निर्गुण निष्क्रियम्" इत्युक्त्वा "एको रुद्रो न द्वितीयायतस्थे" इति कालोत्तरखण्डे उक्तत्वाच्च तथोक्तमानार्थकत्वात्। "एक एवाद्वितीयो भगवान्सत्यदेव परो नास्ति"इति श्रुत्यन्तरे एवंकारादिपदानां तात्पर्यस्य व्याख्यानाच्च। अन्यथा तत्सदृशस्य निषेधप्रतियोगितावच्छेदकत्वेनाभिधानवयर्थ्यापत्ते। अत एव छान्दोग्ये परादनीयाः पठन्ति—"ब्रह्मज्येष्ठा वीर्याणि सम्भृतानि ब्रह्मान्नज्येष्ठ विश्वमानतान ब्रह्म भूतानां प्रथम तु मम तन हति ब्रह्मरात्स्थितव्य" इति। वीर्याणि सृष्टयादिरूपाणि, अनन्यसाधारणतया तथा परात्मत्वोक्ति। ब्रह्मैव ज्येष्ठ कारण येषा तादृशानि सकृतानि सम्पन्नानि ज्येष्ठ नित्य विश्व मानम्, सोऽन्तेऽपि मनर्थ कः। आततानत्याश्रयत्वपरम्, भूतपद जन्यमात्रोपलक्षणं भूयतोरत्यन्तयकत्वन्यापि स्वीकारात्। घटादावपीश्वरस्य कर्तृत्वनेनार्थ वदन्। तस्माद् ब्रह्मसदृश विश्वमि नास्तीति चतुर्थचरणस्यार्थः। अत एव ज्ञानान्तरे मन्त्र। 'न तस्य कार्य कारण च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" इति। अत एव च "मयि चानन्ययोगेन भक्तिरव्यभिचारिणी" इति गीताक्यव्याख्याने "नान्यो भगवता वासुदेवात्परोऽस्ति, अतः स एव सो यति" इत्यादि भगवत्पादैरुक्तम्। अन्यथा पौनरुक्त्यापत्ते। अत एव "सदमद्वा सक्रिन्दस्वावानिति" श्रुत्यन्तरेऽपि तत्सदृशोऽन्यो नास्तीति स्पष्टमुक्तम्। अत एव सनन्तुजातवाक्यम्—

१-१ नास्ति—क।

न साम्प्रते निष्ठति स्पन्दते न चलत्या पतति कश्चिदेतत्।
मनीषिणो मनसा हृदा च य एन विदुरमृतास्ते भवन्ति ॥

भगवद्गीतासु—

"तिमिं नोऽन्द चराचरन्द स्वमन्द पुरुषन्द पुरुषोत्तमन्।
न त्वं मनोऽन्यन्मनिस कृताञ्जो नोनवेद्यप्रतिमप्रभाव' ॥ ५॥

किञ्च सदेव सोम्येदमग्र आसीदित्यत्र सोमादिकमवादिनाम्, इत्यनर्थमिति स्वप्रत्यक्षविषयस्य जगतः सदित्येन निर्देशः।

न च वक्तव्यं सत्त्वस्य साधारण्यात्कथं तत्पदेन ब्रह्मैव ग्राह्यामति वाच्यम्, "यद्यन्नु भगवः न ब्राह्मणो भवति" इति तस्यैव शब्दकर्तृना पृष्टत्वात्, अग्रे प्रत्यक्षतया दृश्यमानमोदितत्वस्य स्फुटत्वात्। "असदवदन्" इत्यादिनासत्त्वेन कारणस्येव क्रियमाणत्वेन सिद्धान्तेऽपि सत्त्वेन तस्यैव कथनस्य युक्तत्वात्। तत्र त्वन्मतेऽप्यन्यसत्त्वनिषेधो दुर्वचः।

जीवो ब्रह्म विशुद्धा चिद्विभागश्च तयोर्द्वयोः।
अविद्यानश्चितौयोग पञ्चम्याश्चमलादय ॥

इति भवदभ्युपगमात्। मन्मते त्वाकाशादीनां नित्यानां तदा सत्त्वस्वीकारात्। अतश्च जन्यद्रव्यसत्त्वनिषेधकारस्यावतरम। अत एव "आत्मा वा इदमेक आसीन्नान्यत्किञ्चन मिषदिति" श्रुत्यन्तरे एवकारार्थप्रदर्शनपरोत्तरवाक्ये मिषदिति "नाशप्रतियोगिरूपवृत्तिप्रतियोगिदर्शन मिषदित्यभ्याख्यामोद्" इति व्याख्यान तु भाष्यादिदृष्टं चिन्त्यम्, प्रमाणाभावेऽपि स्वपक्षसाधनतात्पर्यविजृम्भितत्वात्। द्वितीयस्यामोदितत्वस्य प्रयोजनमादाय।

यत्त्वेऽव्याकृतनामरूपावस्थायामिद सदन्दरूपण नामीदिति "सदेवेदमग्र आसीद्" इत्यन्यार्थ., अत एव प्रागुत्पत्ते. कारणात्मनैव कार्यस्य सत्त्वम्। "सदेवेदमग्र आसीद्" इत्यादावविरुद्धगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यादित्यादि भाष्यादावुक्तम्। न चैव सदन्यत्वेनासत्त्वोक्तावपि सदभिन्नत्वेन सत्त्व स्यादेवेति वाच्यम्, उक्तयुक्त्या सदन्यत्वेनैव रूपेण मिथ्यात्वबोधः। सदभिन्नत्वरूपेण मिथ्यात्वबोधस्तु श्रुत्यन्तरेणानुमानादिना च सम्भवति। इदमवश्य केनचिद्रूपेण मिथ्यात्वस्योक्तयुक्त्या सिद्धयैवास्माकं कृतार्थत्वादिति, तच्चिन्त्यम्, सदन्यसमवेतत्वाभावस्य जीवादिरूपेण बोधयितुमशक्यत्वात्तेन सदन्यत्व नेयुक्तो वाऽर्थस्य सुतरामेव व्यर्थतात्। न च कार्यस्यैव सदन्यत्वादवाधितत्व वाच्यम इति वाच्यम्; अविद्योच्छेदजन्यो-

च्छेदप्रतियोगित्वरूपस्याविद्याकार्यत्वस्यानादिष्वपि भवताभ्युपगमात्, कार्यपदस्याप्राभावात्, दृश्यमात्रेऽपि मिथ्यात्वासिद्धिप्रसङ्गाच्च। वस्तुत कार्यमात्रेऽग्रकालासत्त्वस्य प्रतिपत्तावपि न मिथ्यात्वसिद्धि.। ध्वसप्रागभावकाले प्रतियोग्यसत्त्वस्य मयाप्यभ्युपगमात्। प्रतियोगिकालावच्छेदेन निरवच्छिन्नविशेषणतया वा स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वस्यैव मिथ्यात्वेन तस्यैतावताप्यनिष्पत्ते ।

यत्तूक्तमग्रकालीनासत्त्व तत्कालीननिषेधप्रतियोगित्व वा नोक्तशाब्दधीविषय, किन्त्विदमभिन्नमग्रे यदासीत्तत्सदेकमेवाद्वितीयमित्युद्देश्यविधेयभाव । अग्रे सदनुवादेनाखण्डसद्वितीयादिविधानेनाग्रे सत्त्वेनानूद्यमानस्याखण्डसद्वितीयस्यैव विधेयत्वम्। तथा चावान्तरतात्पर्येणाद्वितीयादिपदं सदन्यसामान्यमिथ्यात्वबोध । न चैवमग्रकालावच्छेदेनैव मदन्यसामान्यनिषेध स्यादिति वाच्यम्, यदग्र इदमभिन्नमासीदित्यत्रैव तदन्वयेऽद्वितीयादिपदबोध्ये सदन्यनिषेधेऽग्रकालानन्वयात्। न चैवमग्र आसीदिदमित्तिपदाना निषेधवैयर्थ्यम्, सदेकमेवाद्वितीयमित्यत्र एवाभिमतमिथ्यात्वसिद्धेरिति वाच्यम्, अग्रेऽसदेव कार्यस्य स्वरूपगिलि शून्यवादनिषेधार्थत्वात्, सदेकमेवाद्वितीयमित्युक्तेर्घटादे सत्त्वभ्रमवता विरोधभ्रमनिरासार्थं तात्पर्यविषयस्याप्यग्रह इत्यादेरुक्तत्वात्। न चैवमप्यद्वितीयाभावस्य[1] कालिकव्याप्यवृत्तित्वलाभान्न मिथ्यात्वसिद्धि । पूर्वोत्तरकालीनाभावसिद्धयैव तत्पर्यवसानादिति वाच्यम्, सद्रूपे प्रतीतस्य द्वितीयाभावस्य परिच्छेदकाकाङ्क्षाया सङ्कोचकमानाभावेन सर्वकालस्यैव परिच्छेदकत्वकल्पनात्, एवकारावृत्त्याद्वितीयाभाववदेवेत्यन्वये यत्र विशेष्यनावच्छेदक तत्र विशेषणायोगव्यवच्छेद इति दैशिकव्यापकत्वधिय प्रकृतेविशेष्यनावच्छेदकविशिष्टव्यक्तेरेकमात्रताया वैयर्थ्यात्। यदा सद्रूप तदासद्रूप तदाद्वितीयाभाव इति कालिकव्याप्तिमाश्रित्य वा व्याप्यवृत्तित्वलाभादिति तदपि चिन्त्यम्, आसीदित्यस्यानुवादवाक्यान्तर्भावेऽपि तदन्तर्भूतस्य सत्पदस्य विधेयसमर्पकवाक्यान्तर्भावस्य कल्पयितुमशक्यत्वात्। यत्तत्पदाध्याहारेण वाक्यद्वयकल्पनस्यापि निर्मूलत्वात्सङ्कोचकमानाभावेनेत्यस्य च प्रत्यक्षश्रुत्यादिसत्पसत्त्वग्राह्यनेकप्रमाणसत्त्वेनायुक्तत्वात्। श्रुतावपि प्रवृत्तिप्रतिबन्धकाना तेषा कल्पना प्रति मुतरा प्रतिबन्धकत्वात्। एवकारस्यावृत्तावपि मानाभावात्, कालिकव्यापकत्वज्ञानस्यैवकारशक्तिज्ञानकार्यतावच्छेदकत्वस्यावश्यकत्वाच्च। विशेष्यतावच्छेदकस्यैकमात्रव्यक्तिकत्वेऽपि गोत्व गोवृत्त्यैवेत्यादिवाक्याना दैशिकव्यापकत्वबोधजनकत्वाच्च। अन्यथैकराश्यैक-

---

१ द्वितीयाभावस्य—ख ।

हेतुकानुमितौना सकल्पनङ्गनानानुच्छेदालत्तेः। 'विशेष्यतावच्छेदकसामानाधिकरण्येनाविशेषणायोगव्यवच्छेदबोधकस्य यथाश्रुतैकार्थस्य विशेष्यतावच्छेदकविशिष्टसामानाधिकरण्येन तद्बोधकत्वानुपपत्तेश्च'। शब्दो घटत्ववानेकत्वादिरपि योग्यत्वापत्तेश्च। यदा शब्दस्तदा घटत्वायोगव्यवच्छेदस्यानाधिनत्वात्। शुद्धत्वयन्तन्दने कालान्वयित्वात्, उपहिते च तस्यासाक्षात्तरूपनङ्गीकारात्। यदपि 'तदैक्षत' 'आसीद्' इति पैतरेयवाक्यस्थ साध्यादौ व्याख्यानादिदमिति सामानाधिकरण्य बाधायात्, अग आसीदिति च न विवक्षितम्, अतो न द्वितीयाभावे कालसम्बन्धान्वया चाक्षुषत्वादेव तदैक्षतादेरर्थं इति, तदपि चिन्त्यम्, स्वातन्त्र्यानुरोधेनाविवक्षायामतिप्रसङ्गात्, अद्वितीयादिपद न विवक्षितमित्यादेर्नयापि वक्तु शक्यत्वात्। इदमिति जातिरूपम्, अस्य बाधाया सामानाधिकरण्यमपेक्ष सदित्यनेनाभेदान्वय इव लाघवात्च, अद्वैतसिद्धे पूर्व क्वचिदप्रसिद्धत्वाच्च। प्रकृते तदसिद्धेश्च श्रुतौ शब्दस्यैकार्थ इत्यस्यैव साम्प्रत विचार्यमाणत्वात्। एतेनाद्वैतवाक्यस्य षड्विधतात्पर्यनिर्णयलिङ्गतया बलवत्त्वेन सृष्ट्यादिवाक्यानामाविद्यकद्वैतपरत्वनियामकत्वम्। अद्वैतवाक्याना मोक्षरूपफलोपयोगितया फलवत्त्वनियामकत्वेन तदङ्गमिति न्यायेन द्वैतवाक्यानामद्वैतवाक्यशेषत्वादित्यादिक परास्तम्। अद्वैतैकार्थकत्वस्यैव निगमेन मुख्यत्वात् ब्रह्मसाक्षात्कारस्यैव फलत्वाद्वैतादे कारणतावच्छेदकत्वे लाघवादिति।

एकमेवाद्वितीयमिति श्रुत्यर्थं ॥ निरूपितस्य हेतुत्वमापादयितुमुपन्यस्यति—तद्धैक आहुरिति अनेनेति। असावेव सोम्येदमिति। तथा च तन्नानुवाक व्याख्यातम्— असावाद्यावत्सृष्टिर्नानुपसृज्य प्रादुर्भवात्' इति। अनुपसृज्य कारणविलय विना कार्यस्य प्रादुर्भावो नास्ति। यत्तन्नाप्रादुर्भावादिति यावत्। अत्र प्रादुर्भवन्नासावेवेत्यत्र कृत्वा तस्य पञ्चम्यर्थं हेतुत्वान्वय इति मन्यदाम।

नन्वत्र प्रादुर्भवदोत्तरपञ्चम्यर्थे नञर्थाभावस्य नान्वय, किन्तु तदुत्पत्तेरारूपञ्चम्यर्थ एव। न च तदुत्तर पञ्चम्याश्रवणापत्ति। 'अन्यथादाप्तुः' इतिलोपसम्भवात्। न च प्रादुर्भवदोत्तरपञ्चम्या नान्वयापत्ति, प्रतियोगित्वस्य तदर्थत्वात्, सत्यम्, प्रतियोगित्वस्य तत्सर्गतयैव लाभात्। अभेदातिरिक्तसम्बन्धेन सामार्थप्रकारतानिरूपितविशेष्यतयान्वयबोधे विशेष्यतया विभक्त्यर्थोपस्थिति-कारणमित्यत्र निपातातिरिक्तत्वेन नाम्नोऽवश्य विशेष्य-

१-१ नास्ति—क।

त्वादन्यथा घटो नेत्यादावनुपपत्ते.। न च साधुत्वार्थकत्वेन निर्वाह, अव्ययोत्तरविभक्तेरेव तथा वौचित्यात्। अथमेववचनमेदाव्ययेभ्य उत्पद्यन्त इति पक्षस्यैव महाभाष्यसम्मतत्वेन नञुत्तरपञ्चम्युत्पत्तौ प्रमाणाभावाच्च। एतेन[1] "तेषा माह पापीयान्, नामूभ्येतरोत्पत्ते." इति सूत्रमपि व्याख्यातमित्यादिक विभावनीयम्।

न च 'पनृच प्रादुभवतीति प्रयोगानुपपत्ति, अतीतानागतयोरपि वारकशब्दप्रयोगाद्यथोपमर्दमपि मंदकचोरानन्तर्य तथैवानयोरपीत्यन्य च गोरातानिमित्तत्वादिनि शून्यवादिनः। तद्दूषयति—कुतो न्विति। युक्तिमाह—नयमिनि। अय भाव—नूपचारेण प्रयोगसमर्थनमात्र न स्वभावात्कार्योत्पत्तिसम्भव.। यथा भविष्यन्नङ्कुर सम्प्रत्यसन्न बीजमुपमृद्नाति एव बीजानादोऽप्यसन् कथमङ्कुर कुर्यात्।

न च बीजविनाशादङ्कुरोत्पादयो पौर्वापर्यादस्य बीजविनाशे कार्यत्वमेवेति वाच्यम्, अनन्यप्रयुक्तस्यैव पौर्वापर्यस्य कारणत्वगमकत्वात्। बीजाविनाशस्य पूर्वत्व तु व्यूहान्तरानन्तर्यप्रयुक्तमिति, तदगमकत्वात्। तथा च न्यायसूत्रम्—'व्याहतव्यूहाना पूर्वव्यूहानवृत्तौ व्यूहान्तराद्द्रव्यनिष्पत्तिर्नाभावाद्' इति। न च व्यूहान्तरकार्योऽङ्कुरो विनापि पूर्वव्यूहविनाश स्यादिति वाच्यम्, तादृशव्यूहस्य बीजविनाशानन्तरमेव सम्पत्ते। न च बीजावयवव्यूहान्तरस्याङ्कुरोत्पत्तिहेतुत्वेऽङ्कुरार्थिना बीजोपादानानुपपत्तिरिति वाच्यम्, बीजमनुपादाय तादृशबीजावयवव्यूहस्योपादातुमशक्यत्वात्। शून्यतैव निवर्तत इति त्वयुक्तम्, सर्वशून्यत्वे ज्ञातुरभावात्, नीलादिविशेषप्रतिभानानुपपत्तेश्च। यदि नीलाद्यशून्यतया, वृथा तर्हि विवर्तोपकल्पनाप्यव.। अथ तेऽप्यसन्त एवेति चेत्, वाढ्यं। यदि शून्या एवेति चेत्तर्हि स एव व्यवहारविशेषविलोपप्रसङ्ग। अथ कालदेशविशेषनियतस्तथाप्यसन्व्यावृत्तः। येन रूपेण विवर्तते ततोऽन्यरूपेणासन्त इतिचेत्तेन रूपेण सत्त्वापत्ते। तद्रूपेणैवासन्त, इतिचेत्, न, अन्येन सत्त्वापत्ते। सर्वथैवासन्न इतिचेत्, न; उक्तविशेषविलयापत्ते। अत शून्यतोपादानस्तद्विवर्तो वा न विश्वप्रपञ्च इति सिद्धम्। तस्मात्पूर्वोक्तमेव साधीय इत्याह—सत्त्वे वेति। तु शब्दः पूर्वव्यवच्छेदार्थं।

ननु श्रुत्युक्तस्य वय पूर्वपक्षत्वम्, युक्तिशास्त्र एव तथात्वात्, श्रुतेरचामोक्षत्वेन नित्यत्वेन वा सामान्यत. प्रामाण्यनिश्चयादितिचेत्, न, अजोदयना-

१ अत एव—ख।

चार्यः—' यत्र श्रुतौ ग्रन्थान्तरस्थया युक्तितदाभासविवेकेनार्थप्रतिपादन तत्र पूर्वपक्षदिकमाक्षिपकम्। अन्यथा कथन्ना गन्थस्य सर्वथैवाप्रमाण्यात्। तेन यथा लोके पूर्वापदार्थौ हित्वा सिद्धान्तार्थवचोपादेयत इति हानोपादानयोरिव तनोत्पत्तौ तथा वेदेऽपि" इति तात्पर्यपरिशुद्धावाहु ।

यत्त वेदान्तिनः ' सदेव सोम्यदमग्र आसीद् ' इति पूर्ववाक्येन वेदान्तिमते ब्रह्मणोऽसत्त्वे तथा तत्प्रतिपादकस्य 'असदेवेदमग्र आसीद्' इत्यनेन दूषणार्थमनूद्यते, इति। तन्न, तस्य नञ्समभिव्याहारेण सदेवेदमग्रे नासीदिति प्रतिषेधपरत्वात्। यदुक्तम्—'असतोऽप्रतिषेधवचनात्' इति शाब्दिकोक्तेः 'अकारस्य सम्बोधनादिविषयेषु" इति व्याख्यानाच्च स्वतन्त्र एवायमकारो न तु तद्विकारः। अत "समासावयवगतस्य क्रियान्वये प्रतिषेधोपपत्तिस्तदभावो नञा प्रतिपाद्यते" इति ग्रन्थस्यायमेव तात्पर्यमिति, तदप्यसत्, असदसन्नसदेवेति नञो द्वैविध्यमित्यस्यैव तात्पर्यादिकान्यस्य स्वातन्त्र्येण निषेधार्थकत्वे प्रमाणाभावात्। उक्तञ्च मणिकारैः "असतोऽसत इत्यत्र नञादेव निषेधवाचकम्, समासवावयभेदेन नञो द्वैविध्याद्वा तथाभियानम्' इति। अन्यथा—

आनन्दसिन्धुरुचिचापलशालि चित्त.
सन्दानमेव मदनक्षणमप्यमुक्ता ।
या त्वद्वैव भवना तदुदन्तचिन्ता,
भ्रान्ति तनोति तव सम्प्रति विग्रहिगस्मान् ॥

इत्यत्र मुक्ता मेति मुक्त्वा निषेध्य युक्तम्, तदभावाद् विधेयाविमर्शे इति वदद्भि काव्यप्रकाशादिभिर्विरोधापत्त । अत एव "यज्ञकर्मण्यजपन्यूङ्खसामसु" सूत्रे जपादिपर्युदासान्यत्वेऽपि वैकश्रुतिविधानम्, अन्यथा प्रसज्यप्रतिषेधत्वेऽपि तत्र जपादावप्येकश्रुति स्यात्। नचेष्टापत्ति, "इन्द्रशत्रुर्विवर्धस्व" इत्यत्रेन्द्रशत्रुशब्दस्यानुकार्यस्याहितस्यापि तदापत्तौ तत्पुरुषमनुसृत्यान्तोदात्त वक्तव्ये प्रमादादाद्युदात्तत्वेन बहुव्रीह्यर्थलाभादिन्द्र एव वृत्रस्य हिन्त. सम्पन्न इत्यर्थकमहाभाष्यादिग्रन्थविरोधात् 'यथेन्द्रशत्रु स्वरतोऽपराधाद्' इति श्रुतिविरोधाच्च। अत एवात्र प्रसज्यप्रतिषेधवादिभिरपि समर्थ्यमानमाश्रित्याध्यवसाय निषेधो व्याख्येय, इत्युक्तम्। अत एव अद्वैतसिद्धावपि ब्रह्मणो निर्गुणत्वोपपत्तौ "असद्वा इदम्" इत्यत्र नञ्तत्वेऽपि नासदसमभिव्याहृतत्वेन निषेधकत्वाभावादित्युक्तम्। अन्यथा व्यस्तत्वेनैवोपस्थितिप्रसङ्गात्। किञ्चैव 'न नञ्पूर्वात्तत्पुरुषादचतुरसगतलवरावद्युवतिसलेखेभ्य" इति सूत्रेण चतुरादिभिन्नशब्दस्य कृतनञ्समासस्य प्रसज्यत्वे-

यादिनिषेधेऽप्यकारेण समास कृत्वा चतुरादीनामपि भावे प्यञादीनामापत्ति, ततश्च तत्पर्युदासवैयर्थ्यं स्यात्। अपि चैव समासे नञो नकारलोपविधानमेव व्यर्थं स्यात्। अकारेणैव समासे अघट इत्यादिसिद्धे। नचाजादावुत्तरपदे नुडागमविधानार्थं तदिति वाच्यम्, अकारादेव तद्विधानसभवात्। एव नकारस्याप्यननुबन्धस्य पृथगाम्नान व्यर्थं स्यात्। अघटोऽनश्च इत्यादीनामुक्तरीत्याकारेणैव सिद्धे। नैकेत्यादेश्च नञैव सिद्धे, अजाद्युत्तरपदे केवलाकारश्रवणस्य कदाचिदपेक्षितत्वेऽपि "आद्धा नुडचि" इति व्यासेनोपपत्ते। 'न भ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुसकनक्षत्रनक्रनाकेषु प्रकृत्या" इत्यत्र नाका सञ्ज्ञायामिति निपातसम्भवात्। किञ्च "मुट् स्त्रीपुसयो" इतिवक्तव्ये "सुडनपुसकस्य" इतिवचनसामर्थ्येऽपि निषेधार्थकनञ्समासाना 'साधुत्वार्थज्ञापनमिति शाब्दिकैरुक्तम्, भवद्रीत्या तु तत्राप्यकारस्य भिन्नपदत्वेनैव प्रसज्यप्रतिषेधसभवात् समास एव प्रमाणाभावेन ज्ञापन दूरापास्त स्यात्'। अदण्डेत्यादिबहुव्रीहौ पूर्वपदप्रकृतिस्वरेणोभयथाप्याद्युदात्तत्वात्। तत्पुरुषादावपि स्वरविशेषस्याकारपुरस्कारेणैव विधातु शक्यत्वात्। तस्मात्समासव्यतिरेकेणाकारमात्रस्य निषेधार्थे न प्रयोग। समासे च नञो न प्रयोग इत्यत्र तात्पर्य्यम्। "तृज्वत्क्रोष्टु" इत्यस्य विभक्तिविशेषावच्छेदेन तृजन्ततुनन्तक्रोष्टुक्रोष्टु शब्दप्रयोगनियमार्थत्ववदिति सर्वैकवाक्यतया कल्प्यम्। यत्तु अकस्मादेव भवतीति वाक्यस्याभवननिषेधार्थकत्वपक्षव्यावर्त्याय समस्यमानेनापि नञा भवतीत्यस्यान्वयादसामर्थ्येऽप्यसूर्यंपश्या इतिवत्समास अशब्दस्य वाय समास विना प्रयोग "अमानोनाप्रतिषेधवचना' -ति कोशादिति कुसुमाञ्जलिवर्द्धमाने उक्तम्। तनापि प्रथमएव तात्पयम् द्वितीये वायवस्योक्तत्वात्। एतेनायोगव्यवच्छेदार्थेऽस्त्यन्नाभावस्य योग प्रतियोगित्वरूप इत्यादि साध्याभाववदवृत्तित्वमित्यन्नापदार्थाभावस्य साध्याभाववदर्थविशेष्यत्व चेत्यादिकञ्च यथा श्रुत चिन्त्यम्, इत्यादिक वह्वनुसन्धेयम्।

सृष्टिप्रकारमाह—तदैक्षतेति। तद् ब्रह्म ऐक्षत इच्छा चकार। इच्छास्वरूपमाह—बहु स्यामिति। बहुत्वविशिष्ट स्यामित्यर्थ। ननु नित्यद्रव्यवृत्तिबहुत्वमादाय प्रलयकालेऽपीश्वरस्य बहुत्वाश्रयत्वमस्त्येवेत्यत आह—प्रजायेयेति। उत्पादितकार्यद्रव्यस्याजन्यद्रव्यवृत्तिबहुत्वाश्रयत्वप्रकारकेच्छा कृतेति तात्पर्यम्। उक्तन स्यामित्यस्य बाधितत्वाद्देवमनुष्यादि-

---

१-१ साधुत्वापादान दूरापास्त स्यात्—क।

प्रजाभ्यः स्यादिति 'एकेनापि स्यादात्मनात्, जाया मे स्यादथ प्रजायेयेत्यन प्रजोत्पत्तीच्छाकरणेन व्याप्तत्वात्च। इच्छाशब्देनेच्छापरत्वं तु बहुस्वादिनोच्छार्थैकनिष्ठत्वेन। एवञ्च "न च सकृदीक्षणेनैव निर्वृत्ति पुनरीक्षण व्यर्थमिति वाच्यम् लोकाकाशेन क्रमेण सृष्टौ तादृशेच्छाना लोके दृष्टत्वात्। आकाशादिसर्गानन्तरं पूर्वजातेक्षणपरिमाणस्य मायाविशेषस्य पुनर्ईक्षण विना तज्जन्यकार्यनिर्माणादावशक्तेरादान्यत्वद्विशिष्टब्रह्मरूपविषयमादाय पूर्वक्षणीयाना सिद्धत्वात इति। इयान्तु विशेष तेषामीक्षणे मायावृत्तिविशेष, अस्माकं त्वीश्वरगुणा इति न च न महाकल्पान्तरवर्तिनि तत्तदिच्छात्वेन व्यवहियते। अन्यथा सर्वदैव सृष्टिप्रलयसम्पत्तापत्त्या मूक्तलाभ स्यात्। अत एव निश्चयः तत्तत्कालीनाहित्वमेव हि तत्तद्विषया सिद्धादिवत् सिद्धमित्याहुः' इति। अत एव तदिच्छाया अनीतत्वादन्यथाऽपि तादृशवैशिष्ट्यमक्षत रूपा अनीतत्वात्। तदुक्त सिद्धान्तबिन्दौ—'यद्यपि समवत इच्छा सर्वदा वर्तमानत्वादेकैव, तथाप्युपाधिभेदात्तज्जिहीर्षाभेदादिकमुच्यते। इत्तिरप्युपाधिभेदात्तिरेति सङ्गच्छते कार्यानन्तरमीक्षणान्वयः' इति दाक्षिकृतः।

यत्तु वेदान्तिन 'प्रजायेयेत्यनन्तरं तदाकाशमसृजत्तदा तदाकाशमैक्षत बहुस्या प्रजायेयेति शेष, विषयविकरणन्यायात्। तत्र हि आकाशस्य नोत्पत्तिरिति पूर्वपक्षं कृत्वा "एतस्माद्वा आत्मन आकाश सम्भूत" इति श्रुत्वा तस्याप्युत्पत्तिरिति सिद्धान्तितम्' इति, तन्न वक्ष्याम, यदप्युक्तमाकाशादिक सद्रूप ब्रह्मैक्षदित्यर्थ एवमपेक्षति। ता आप इति तु "स्त्रैण्य हि यत् ना प्रकृतिर्बलिष्ठ" इतिवत्तत्तदन्व विधेयलिङ्गाद्दित्वादिति। दृष्टान्ते हि स्त्रैत्यानुवादेन अन्नप्रकृतित्वस्य विधेयत्वात्तत्वेन क्लीबलिङ्गोपादानम्, सकृत्तु ना आप ऐक्षतेत्यत्र स्त्रैण्यस्यैव विधेयत्वादपा विधेयत्वाभावात्तस्य तल्लिङ्गग्रहः स्यात्। यत्तु वाचस्पत्यादौ "यद्यपि ब्रह्मस्वभावचैतन्य न क्रियारूपं तथापि तस्यानवच्छिन्नस्य तद्विषयोपयानभेदावच्छेदेन कल्पितभेदस्यानितत्वं कार्यन्वं चोपपद्यत इति साध्यवहारिकेण ज्ञानत्वम्' इत्युक्तम्, तदपि न; न्यायमते द्वैविध्यमेवैकस्य मुख्यमेव सम्भवात्, तत्तद्भेदस्य च व्यवस्थापितत्वात्।

यत्तु—नन्वीक्षणवारणन्यायविद्यादेरनादित्वाद्वस्तुगत्या सत्त्व सर्गे ईक्षण मानं तत्पूर्वक्षणोत्पन्नाविद्यानिवर्तितत्वेन ईक्षणाश्रयस्य तत्पूर्वक्षणे-

---

१—१ नास्ति—ब'

वा मन्मतेक्षणस्य कस्यचिदप्रसिद्धे । ईक्षणोत्पत्त्यनन्तरमेव क्षणादिव्यवहारात् । न चैव स्वाधिकरणसमयध्वसानधिकरणसमयसम्बन्धरूपोत्पत्तिरीक्षणस्य कथमितिवाच्यम्, यदीयसमय-सम्बन्धरूपावच्छेदेन यत्समयवृत्तिध्वसप्रतियोगित्व नास्ति तस्य तत्समयसम्बन्धरूपाया उत्पत्ते सम्भवात्, महाप्रलयोत्पत्तिवत् । सामग्रीमत्क्षणोत्तरक्षणत्व तु कार्यमात्रस्य न व्याप्यम्, किन्त्वीक्षणान्यस्यैव कार्यस्येति ।

तदपि चिन्त्यम् ईक्षणान्यत्वनिवेशे बीजाभावात् । अविद्यायास्तत्र हेतुत्वासम्भवाच्च । कार्यान्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणवृत्त्यभावप्रतियोगिनावच्छेदकधर्मवत्त्वस्यैव कारणत्वात् । एवमीक्षणस्यापि द्वितीयक्षणे कार्यजनकत्व न स्यात् । अथ कारणत्वादिकमतिरिक्तमेवेत्युद्भाव्यते तथापीक्षणकार्यस्यापीक्षणान्यकार्यत्वात् तदधिकरणक्षणस्य सामग्रीमत्क्षणोत्तरक्षणत्व न स्यात् । ईक्षणतत्कार्यान्यकार्यस्य तद्व्याप्यमितिचेन्न ईक्षणकार्यान्यकार्यस्य भवतामप्रसिद्ध ।

किञ्चैवमीक्षणान्तराधिकरणक्षणस्यापि सामग्रीमत्क्षणोत्तरक्षणत्व न स्यात् । आद्ये क्षणान्यकार्यस्येतिचेन्न आद्यक्षणस्याप्यप्रसिद्धे । किञ्च कार्यत्वकारणत्वयोरतिरिक्तत्वेऽपि सामग्रीपदार्थ प्रागभावेतरत्वादाचित्व यावत्कारणप्रागभावानधिकरणकार्यभावाधिकरणक्षणरूप एव । न च तदनुत्तरसमयस्य कार्याधिकरणत्वसम्भव, अपि चेक्षणस्य द्वितीयक्षणवृत्तिध्वसप्रतियोगि वरूपक्षणिकत्वापत्ति, तदुत्पत्तिसमयस्य क्षणत्वाभावात् । स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्व स्वाधिकरणक्षणवृत्तिध्वसप्रतियोग्यवृत्तित्व वा क्षणिकत्वमित्यत्र सुतरामेव तथात्वात् । अथोत्पत्तिसमयानन्तरक्षणद्वये तदवस्थान तत्समयम्, तृतीयक्षण एवेक्षणनाश इतिचेन् तर्हीक्षणस्य हेतुत्वे मानाभावात् । इतीक्षणान्तराणा वैयर्थ्यम् । एव द्वितीयक्षणे तनाशोपगमपक्षेऽपि द्वितीयक्षणस्य वैयर्थ्यमेव ।

नन्वाकाशमादाय पूर्वेक्षणविषयस्य सिद्धत्वम्, इच्छाविषयत्वावच्छेदकरूपेण सिद्धेरेवेच्छानिरासाधिकारात् । यद्धु स्यामित्यस्याकाशादिनानाकार्यात्मक स्याम्, प्रजायेयेत्यस्य देवमनुष्यादिप्रजारूप स्यामित्यर्थकत्वेन तैरेव व्याख्यातत्वात् । मया चेक्षणान्तरागामीश्वरेच्छाभिन्नपरत्वेन व्याख्येयत्वात् । एवमीक्षणो यत्समनन्तरक्षणसम्बन्धस्यापीक्षणोत्पत्तित्वापत्ति तदीयद्वितीयादिक्षणसम्बन्ध यावच्छेदेनेक्षणाद्यसमयसम्बन्धानन्तरक्षणवृत्तिध्वसप्रतियोगि-

---

१ किञ्चैवमीक्षणान्तराधिकरणत्वयो—क ।

स्वाभावस्त्वात्। न चोत्पत्तिसमयसम्बन्ध द्वितीयक्षणे नाशान्नैव-मिति वाच्यम् तस्य मूलक्रियाकालत्वेन ध्वंसमिलनया नाशान्भवात्, तदुपायेन्द्र क्षणस्य तदानीमनुत्पादात् द्वयणुकस्यापि तदा नाशाभावाच्च। प्रलयौ तु क्षणत्वेन प्रवेशविरहेऽपि वस्तुतो घटोत्पत्तिक्षणोत्पत्तिसमयसम्बन्धस्य द्वितीयक्षणवृत्तित्वप्रतियोगित्वसम्बन्धेन द्वितीयक्षणसम्बन्धेऽतिव्याप्तिरिति वैषम्यम्। महाप्रलयेऽपि चरमध्वंसध्वंसलोपाविच्छेदस्वीकारात्। तदनन्तर च कालादेरपि क्वचिदनन्युपगमात्। चरमध्वंसस्तत्समयावच्छिन्नसमय-सम्बन्धेनन्युपगन्तव्य एव।

अथ साङ्ख्यपातञ्जलमते बुद्ध्यादिपरिणामा नैयायिक-वैशेषिकमते च परमाणुक्रिया. प्रलये यथा स्वीक्रियन्ते एवमस्मन्मतेऽपि सूक्ष्मा अविद्यावृत्तयः सुप्ताविव प्रलयेऽपि स्वीक्रियन्ते। प्रलयकालीनेषु मूलकारण-गताश्चिरकार्येषु वादिनामविवादात्। एव च प्रलयोत्तरपूर्वहेतुकाविद्या-चरमवृत्तिरेवेक्षणहेतु, सैव च क्षणोत्पत्तिरिति चेत् सत्यम्; ग्राम्याम-ग्रामन्त्रिवमेतत्, प्रकृतमनुसराम। अथ वैशेषिकभाष्यम्—"ततः पुनः प्राणिनां भोगसूनये महेश्वरस्य भिनृक्षातल्लर सर्वात्ममनसेनलब्धवत्यदृष्ट्व-दात्मसयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषा परस्परसयोगेभ्यो द्वयणु-कादिक्रमेण महान्वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति. तदनन्तरं तस्मिन्नेव वायवीयेभ्य परमाणुभ्यस्तेनैव क्रमेण महान्सलिलनिधिः समु-त्पद्य पोप्लूयमानस्तिष्ठते। तदनन्तर तस्मिन्नेव पार्थिवेभ्य परमाणुभ्य-स्तेनैव क्रमेणोत्पन्ना महापृथिवी महतावतिष्ठते। ततस्तस्मिन्नेव महोदधौ तेज-सेभ्यः परमाणुभ्यः द्वयणुकादिक्रमेणोत्पन्नो महातेजोराशिर्दैदीप्यमानस्ति-ष्ठति। एव समुत्पन्नेषु चतुर्ष्वपि महाभूतेषु महेश्वराभिध्यानमात्रानैजसेभ्यो द्वयणुकेभ्यः पार्थिवाणुमहितेभ्यो मनोऽभिमारभ्यते। तस्मिन् चतुर्वदनकमलं लोकपितामहं ब्रह्माण सकलभुवनसन्निधानुत्पाद्य प्रजासर्गे नियुङ्क्ते। स च महेश्वरेण नियुक्तो ब्रह्मा निर्व्यतिशयज्ञानवैराग्यैश्वर्यसम्पन्न प्राणिनां कर्म-विपाक विदित्वा कर्मानुरूपभोगान् सुनान् प्रजापतिसनन्दनदेवर्षिगणान् सर्वानपि तनो मुखबाहूरुपादेभ्यश्चतुरो वर्णान्तानपि चौषधयानि भूतानि मृग्यशवा-नुष्टपर्यन्तानवराग्यैश्वर्यं समाजयति' इति। तदनुसारेण तत्तेजोऽम्बुजने-त्रसम्भूतं वायुसृष्टिर्वोध्या। परेरपि आकाशाद्वायुरत्यनन्तरमेव तेजस उत्पत्तिरभ्युपगम्यते। 'एतस्माद्वा आत्मन आकाश सम्भूत आकाशाद्वायुर्वा-

१. पूर्व°—क।

योरग्निरग्नेरापोऽद्भ्यः पृथिवी" इति तैत्तिरीयश्रुत्योपमहारेण मध्ये तादृश-वाक्यकल्पनात्। [1]छान्दोग्ये हि तेजस प्राथम्य न श्रौत किन्तु प्रथमश्रवणा-त्स्थानाख्यप्रमाणगम्य वायोरग्निरिति श्रुत्यपेक्षया च तस्य दौर्बल्यम्। तेज-प्राथम्यस्य श्रौतत्वेऽपि सक्रमाया आकाशोत्पत्तेर्बोधापेक्षया तेजःप्राथम्यस्य धर्मस्यैव बाधौचित्यादित्यस्य तैर्निरूपितत्वात्[1]। अन्नपदञ्चात्र पृथिवीपरम्, निरूपित हि ब्रह्ममीमांसायां द्वितीय-तृतीये "ता अन्नमसृजन्त" इति। अद्भ्य. पृथिवीति श्रुत्यो पृथिव्या ओषध्य ओषधीभ्योऽन्नमिति श्रुत्या विरोधऽन्नपद व्रीहियवादिपरम् "यत्र क्वचिद्वर्षति तदेव भूयिष्ठमन्न भवतीति" वाक्यशेषगतलिङ्गात्, न तु भूतप्रकरणात्पृथिवीपरम्, तस्य लिङ्गापेक्षया दौर्बल्यात्, इति पूर्वपक्षे सूत्रम्। पृथिव्यधिकारस्थशब्दान्तरेभ्य इत्यन्न-पद पृथिवीपरमेव, भूताधिकारात्। यत्कृष्णं यदन्नस्येति[2] तद्यौगप्राथम्याभ्या व्याप्तिलाभे कृष्णरूपवत्त्वावच्छेदेन पृथिवीत्वस्य विवक्षितत्वात्। व्रीह्यादि-मात्रपरत्व त्वनुपपन्नम्, तद्भिन्नयवादिरूपपृथिव्यामपि कृष्णरूपदर्शनात्। अद्भ्य पृथिवी, तच्च अपा रस, सा पृथिवीत्यभ्यासरूपाच्छब्दान्तराच्च लिङ्गस्य च पृथिवी साधारण्यात्, व्रीह्यादेरपि पृथिवीत्वात्। तथा च पृथिवी-परिग्रहेऽन्नश्रुतिलिङ्गयोर्नात्यन्त[3] बाध[4]। तत्तत्प्याथपरित्यागेन तादृश-पृथिवीपरत्वात्। व्रीह्यादिमात्रपरिग्रहे तु पृथिवीलिङ्गप्रकरणस्थानानामत्यन्तं बाध, पृथिव्यैकदशस्य घटादे. परित्यागादितिपृथिव्येव प्रवृत्तेऽन्न-पदार्थ इति।

अथ तु विशेष। यदस्मन्मते वायुतेजोजलपृथिवीपदानि जन्यतत्पराणि, परमाणुना नित्यत्वाभ्युपगमादिति। तथा हि पृथिवीत्वादिक नित्यवृत्ति, द्रव्यसाक्षाद्विभाजकोपाधित्वादात्मत्ववत्। न चाप्रयोजकम्, आकाशत्वादिक-मनित्यवृत्ति, उक्तहेतोरित्यादेरव्याप्तेरितिवाच्यम्, आगमस्यानुकूलतर्क-त्वात्। मोक्षधर्मे हि नारदासितसंवादे स्मर्यते—

येभ्य सृजति भूतानि कालो भावप्रचोदित.।
महाभूतानि पञ्चेति तान्याहुर्भूतचिन्तका ॥
तेभ्य सृजति भूतानि कात आत्मप्रचोदित।
एतेभ्यो य. पर ब्रूयादमद्ब्रूयादमशयम् ॥
विद्धि नारद पञ्चैतान् शाश्वतानचलान् ध्रुवान्।
महतस्तेजसोराशीन् कालपक्वान् स्वभावत ॥

१-१. नास्ति-ख। २ यदन्नेस्ये-क। ३. यद्योग°-क। ४. नात्यन्ताभाव-ख।

आसप्तेवान्तरीक्ष च पृथिवी वायुपावकौ
नासीच्चापरमेतेभ्यो भूतेभ्यो मुक्तमशयम् ।
नोपपत्या न चायुक्त्या त्वमद्ब्रूयादसशयम् ।

पृथिवीजलतेजोवायुसम्बन्धिना परमाणना त्रुटीना वाकाशस्य चान नित्यत्व प्रतिपाद्यम् । पावकपद चैतद्वृत्ति तेजस्त्वजातिमत्परम् । परमाणुषु सतान्यद्रव्यत्वसाक्षाद्व्याप्यजातेरेव स्वीकारेण सिद्धान्ते वह्नित्वादेरनभ्युपगमात् । न चाकाशस्य द्रव्यानारम्भकत्वात्पञ्चाना कथमुपादानत्वमिति वाच्यम्, न ह्यपादानत्व पञ्चम्यर्थ, अग्रे निराकरिष्यमाणत्वात् । अर्थतो योग्यहेतुत्वपर्यवसानात् । न च "तान्याहुर्भूतचिन्तका." इत्यभिधानाच्चैद स्वमतमिति वाच्यम्, "विद्धि नारद पञ्चैतान्" इत्यादि विशेषात् । भूतपदस्य यथार्थवाचकतया तत्त्वचिन्तका इत्यर्थकत्वात् । कालपदमीश्वरपरम् । "आत्मप्रचोदितो जीवो दृष्टोद्वोधसहकृत" । एतेभ्य परमेतत्प्रागभावाधिकरणकालवृत्तिपदार्थं यो ब्रूयात्सोऽभद्ब्रूयात् । एतत्प्रागभावाधिकरणकालस्यैवाग्रसिद्धिरिति भाव । नासीच्चापरमित्युपादानान्तरव्यवच्छेद, भूतानि प्रजस्योक्तत्वात् । शाश्वतमिति प्रागभावप्रतियोगित्वस्याचलानिति ध्वसप्रतियोगित्वस्य च निषेध । ध्रुवानिति तदर्थसिद्धिनित्यत्वोक्ति । अस्य रचनास्तुत्यादौ तात्पर्यशङ्कापि तत्त्वाख्यानार्थव प्रवृत्तत्वात् । असदिति मूलप्रकृतेर्ग्रहणम्, शाश्वत ध्रुवपदाभ्या प्रवाहरूपेणानित्यत्व स्वभावतो मूलप्रकृतेर्जातम् विद्धीति तद्व्याख्यानस्य च पदस्वरसविरुद्धत्वात् ।

न चैव जलादीना सृष्टिश्रवणविरोधापत्ति, जन्यजलादिपरत्वेन तु तदुपपत्ते । न च तथाप्याकाशस्य जन्याजन्यभेदेन द्वैविध्याभावात् सृष्टिश्रुतिविरोधो दुर्वार इति वाच्यम्, ब्रह्ममीमांसाद्वितीयाध्यायतृतीयपादारम्भगतपूर्वपक्षसूत्रीतयैव समाधानसम्भवात् । गौण्यसम्भवादिति सूत्रस्थ हि "आत्मन आकाश. सभूतः" इति श्रुतिर्गौणी । आकाशमुत्पत्तिहीन नित्यत्वादित्यनुमानविरोधेन मुख्यत्वासम्भवादित्यर्थ । नन्वप्रयोजकमेतत्, अनुमानमात्रेण श्रुतिबाधाभावादित्याशङ्क्य मूत्रान्तर "शब्दाच्च" इति । "अन्तरिक्ष चैतदमृतम्" इति "यथानन्तोऽयमाकाश एवमनन्त आत्मा" इति । "आकाशवत्सर्वगतश्च नित्य" इत्यादि श्रुतिसत्त्वान प्रयोजनत्वम् । चकाराद्वुत्पत्त्यादिकल्पने गौरवात् । वस्तुत उक्तस्मृतिरेव चकारसमुच्चया ।

नन्वेव सभूतपदस्याकाशांशे गौणार्थत्व वाय्वाद्यशे च मुख्यत्व कथम् ? अतस्तृतीयसूत्रम् "स्याच्चैकस्य ब्रह्मशब्दवदिति" । यथा चैत्तिरीयकशाखाया-

मेव "अन्न ब्रह्म इत्यादौ ब्रह्मशब्दो गौण "आनन्दो ब्रह्म" इत्यादौ च मुख्य तथा प्रकृतेऽपीत्यर्थं ।

न च तन भिन्नवाक्यत्वात्तथेति वाच्यम्, अत्रापि सभूतपदानुषङ्गेण भिन्नवाक्यत्वस्योभयसिद्धत्वात् । इद चाभ्युपगम्योक्तम्-वाय्वादिपदानामपि नित्यलदर्थकत्वमादाय मभूतशब्दस्य सर्वत्रैव गौणत्वसभवात् । आकाशपदस्याप्यवच्छिन्नाकाशपरत्वमाश्रित्य विशेषणाशस्य जन्यतामादाय सर्वत्रैव मुख्यत्वरक्षणाद्वा, 'आनर्थक्यप्रतिहताना विपरीतबलाबलम्" इति न्यायेन स्मृत्यनुरोधेनापि श्रुतेरन्यथानपनयनस्य सर्वसम्मतत्वात् । प्रकृते च श्रुतीनामपि सकोचकल्पिकाना सत्त्वात् । अस्पष्टार्थकैकप्रमाणानुरोधेन स्पष्टार्थकैक[1]प्रमाणोपमर्दस्य वक्तुमशक्यत्वात् । नचातोऽन्यदार्त्तमिति श्रुतिविरोध, तस्याविशिष्यमिद्धनित्यताकभिन्नपरत्वात् । सामान्यस्य विरुद्धार्थविरुद्धविशेषपरताया सर्वसिद्धत्वात् । श्रुत्यन्तराणामत्यन्तभेदापेक्षया[2] न सङ्कोचरूपबाधस्येहाभ्यर्हितत्वात् । अन्यथैव तदर्थस्य व्यवस्थापयिष्यमाणत्वाच्च । अत एव भारद्वाजेनोपपत्त्येत्यनेन यावद्विकार विभागो लोकवदिति न्यायेनाविद्यादिपडन्यत्व ब्रह्मकार्यतावच्छेदक मित्यस्य निरास । न वा युक्त्येत्यनेन तु निश्चयायकवेशब्दस्य 'एचोऽयवायाव" इत्यायादेशे कृते लोप शाकल्यस्येति लोपस्य वैकल्पिकतया यकारलोपाभावे च उक्त्येति पदच्छेदात् "आकाश सम्भूत" इत्यादिवचनाना यथाश्रुतार्थमात्र पुरस्कृत्याकाशादेरुत्पत्त्यादिक नाङ्गीकर्त्तव्यम् । एषा नित्यत्वस्यानेकप्रमाणसिद्धत्वादिति स्पष्टमुक्तम् ।

न च वायु मभूत इत्यनेन वायुत्वावच्छेदेनोत्पत्तिबोधान्न तन्नित्यत्वमपीति वाच्यम् वट उत्पन्न इत्यादौ घटत्वावच्छेदेनोत्पत्त्यनवबोधात्, सम्भवनियमयो मानान्तरानुरोधमूलकत्वाच्च । अत एव "वायुश्चान्तरिक्ष चैतदमृत सैषानस्तमिता देवता वायु" इत्यादिक सङ्गच्छते । ईक्षणञ्च भूतानां कार्योन्मुखत्वमेव मुख्ये वायस्य स्पष्टत्वात् । यत् तेज आद्यात्मक सद्रूप ब्रह्मोक्षतेत्यर्थ इति, तन्न ब्रह्मणस्तेज आदि तादात्म्यासिद्धे, बाधायामध्यास वा सामानाधिकरण्यकल्पने गौरवात् । 'ता आप ऐक्षन्त" इत्यत्र तथाप्यनिर्वाहाच्च कार्यतादात्म्यापन्ने ब्रह्मण्यपीक्षणस्य गौणत्वाच्च । अत एवानन्दमयाधिकरणे भामत्याम्—

'गौणप्रवाहपातेऽपि युज्यते मुख्यमीक्षणम् ।
मुख्यत्वे तूभयोस्तुल्य प्रायदृष्टिर्विशेषिका" ॥ इति ।

---

१ °कानेक°—क । २ बाधापेक्षया—ख ।

"अवादिगौणेक्षणप्रवाहपातेऽपि जगत्कारणे मुख्यमीक्षणमिति युज्यते। मुख्यसम्भवे गौणस्यानवकाशाद्" इति कल्पतरुकृतश्चेति दिक्।

सेय ब्रह्मरूपा देवता [ईश्वर एव] नैयायिकगते ईश्वरस्य ब्रह्मपदार्थत्वात्। तदुक्तमाचार्यैः—"परब्रह्मणि चेश्वरादन्यस्मिन्मानाभावाद्" इति। तिन्तस्तेजोजलपृथिवीरूपा देवता सामर्थ्यविशेषवत्त्वात्। अनेन जीवेनात्मना हिरण्यगर्भदेहेनानुप्रवेशस्तत्कार्योत्पत्त्यनुकूलोपादानप्रत्यक्षादिसद्विषयाकृत्यतमनुप्रविष्टहृदयेयमित्यादिवन्मुख्यप्रवेशस्य सर्वैरपि परित्यागात्। "येऽसत्कल्पितफलकर्मकर्तारं साकारोपासनापरिवासितचेतसो यतयस्ते हिरण्यगर्भपदवीमनुप्राप्यापवृज्यन्ते इत्यागम। यद्वा ईश्वर एव कार्यवशाद्गृहीतदेहो ब्रह्माद्यवस्थामापद्यत" इति पक्षद्वय प्रसिद्ध किरणावल्यादौ। श्रुतिरपि—

यो ब्रह्माण विदधाति पूर्वं यो वै वेदाश्च ग्रहिणोति तस्मै।
त देवमात्मबुद्धिप्रकाश मुमुक्षुर्वै शरणमह प्रपद्ये॥

एतेनात्मनेत्युक्त्या जीवब्रह्मणोरभेद इति निरस्तम्। जीवस्याप्यात्मत्वजातिमत्तया तन्निर्देशोपपत्ते। नहि जीवात्मना घटो ज्ञात इत्युक्ते घटस्य जीवाभेदलाभ। न चानुप्रविश्य व्याकरवाणीत्यनुप्रवेशव्याकरणयो समानकर्तृकत्वाभावात् क्त्वाप्रत्ययानुपपत्ति, तृतीयाया करणार्थत्वसम्भवात्।

"द्वाभ्या द्वाभ्या भुजाभ्या मृगभुवि युगपन्मत्तदिग्दन्तिदन्तान्
रुध्वा दोर्भिश्चतुर्भि सरभसपतितान् दिक्षपतीनप्यरोत्सम्"॥

इत्यादिवत्। नहि जीवस्य कर्तृत्व वक्तु शक्यम्, व्याकरवाणीति कर्तृलकारेण कर्तुरभिहितत्वादनभिहिताधिकारीयतृतीयानुपपत्ते। न च तेन व्याकरणक्रियानिरूपितमेव तदभिहित नत्वनुप्रवेशक्रियानिरूपितमिदन तन्निरूप्य कर्तरि तृतीयेति वाच्यम्, प्रधानक्रियाकर्मभिधाने गुणीभूतक्रियाकस्तुरप्यधीनत्वनियमात्। उक्त हि हरिणा—

प्रधानतरयोर्यत्न द्रव्यस्य क्रिययो पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥
प्रधानविषया शक्ति प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते॥

इति गुणे क्त्वाप्रत्ययप्रकृत्यर्थक्रिया या अनुक्तापि कर्तृप्रत्ययस्य स्वप्रकृत्यर्थक्रियानिरूपितकारकशक्तिमात्रप्रतिपादकत्वेनान्यधात्वर्थक्रियाकारकशक्यानभिधायिवादनुक्तापि—'तद्वदुक्तवत्'। प्रधानविरोधेन पृथक् स्वाभिधानप्रयुक्तार्थप्रवर्तकत्वादिवर्थे। अत एव चैत्रेण भुक्त्वा चैत्रो गच्छतीति

न प्रयोग । किन्तु चैत्रो भुक्त्वा गच्छतीत्येव । यत्त्वेव सत्योदन भुक्त्वा शास्त्र पठ्यते 'श्रुत्याप्यर्थं नानुमतस्तेन सोऽर्थंकबुद्धिना" इत्यादिप्रयोगानुपपत्तिरिति, तन्न, तत्र धर्मिभेदादेकधर्मिनिष्ठशक्तेरेवोभयत्राप्येकेनाभिधानात् । अर्थमित्यत्रापि नानुपपत्ति स्थितेनेत्यध्याहारात् । यद्वा यत्पदोपस्थाप्यकारकनिष्ठक्रियान्तरसाधनशक्तेरेवाभिधानम् । अत्र च पदभेदान्न दोष । अत एव क्त्वाप्रत्ययस्य भावार्थत्वे पक्त्वौदन भुङ्क्ते देवदत्त. । पक्त्वौदन भुज्यते देवदत्तेनेति प्रत्ययेन कर्तृकर्मणोरनभिधानात् पाकापेक्षया तृतीयाद्वितीयापत्तिमुद्भाव्य तृतीये कैयटेनोक्तम्—"आख्यातादिपदवाच्या क्रिया विशेष्यत्वात्प्रधान विशेषणभूता त्वप्रधानम् । तत्क्रियासाधनीभूतयोरपि शक्त्योस्तद्द्वारको गुणप्रधानभाव । तत्र प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितवत्प्रकाशते । प्रधानानुरोधाद्गुणानाम् । तन्मुखप्रेक्षित्वात्पृथक्तद्विरुद्धस्वकार्यारम्भाभावात्" इति ।

न चात्रापि व्याकरवाणीत्युत्तमपुरुषाख्याहपदस्य जीवेनेति पदस्य च भेदाज्जीवेनेत्यत्र तृतीयोपपत्तिरिति वाच्यम्, समानकर्तृकत्वाभावेन क्त्वाप्रत्ययस्यैवानुपपत्ते । तथा च "वृद्धिमिच्छतो मूलनाश" इति न्यायापात । यत्तु जीवस्यैव प्रवेशान्वयो नामरूपव्याकर्तृत्वान्वयस्तु निर्वृत्कुर्वत ईशस्यैव । अयोग्यत्वेन तत्र जीवस्यानन्वयात् । जीवानुप्रवेशकथनफल तु व्याकरणस्य जीवभोगार्थत्वप्रदर्शनमेव । तयोरभेदाच्च समानकर्तृकत्वार्थं-क्त्वाप्रत्यय इति, तदसत्, कर्तृत्वावच्छेदकरूपैक्यस्यैव तन्त्रत्वात्, वास्तवाभेदस्याप्रयोजकत्वात् । व्याकरवाणीत्यत्र यो व्यापार प्रतीयते तस्यैवानुप्रवेशसमानकर्तृकत्वप्रत्ययाच्च । अत एव "तस्मादुदवसाय पृष्टसवनीयेन ज्योतिष्टोमेन यजेत" इत्यत्र यजेरनित्ये तद्विधेयव्यापारस्यैवोदवसानसमानकर्तृत्वावगमादार्त्विज्यस्य तदभावात् पृष्ठसवनीये ज्योतिष्टोमेऽपि च ऋत्विक्त्वम् न तु सत्र इव यजमानानामेवेति सिद्धान्त ।

वस्तुतस्तु क्त्वाप्रत्ययप्रकृतिभूतधात्वर्थक्रियानिरूप्यस्य कर्तृवाचक शब्द पृथक् न प्रयुज्यत एव, समानकर्तृकत्वस्य तादृशस्थले व्यभिचारविरहेण तदुपादाने बीजाभावात्, प्रयोगादर्शनाच्च । कर्मैक्यस्य तु तत्रानावश्यकत्वात् क्वचित् स्पष्टार्थं कर्मंग पृथक् प्रयोगेऽप्युक्तरीत्या क्षतिविरहात् । अत एव समानकर्तृकत्वस्य क्त्वाप्रत्ययार्थपक्षेऽपि कर्तृत्वस्य तेनाभिधानान्न कर्तृवाचकपदस्य तृतीयान्तत्वम्, कर्मणस्तु तेनाभिधानात्तस्य पृथक्प्रयोगे द्वितीयाप्यविरुद्धा । इत्यास्ता विस्तर ।

प्रकृतमनुसराम —नामरूपपद शब्दार्थरूपप्रपञ्चपर व्याकरण जनन ज्ञापन च यथासभव योज्यम्। त्रिभि सह इति त्रिवृत् परस्परसयुक्तत्वमर्थ । तया च वायवीयतेजसाप्यपार्थिवदेहाना तदवयवैरारम्भ । शरीरमात्रे तदवयवाना यथायोग निमित्तत्वोपादानत्वाभयस्वीकारात्। एव मुवर्णादावन्यत्रापि यथायथमूहनीयम्। नित्यञ्च निर्देशापेक्ष, परैरपि तथैव वाच्यत्वात्। नेयाकरण तु त्रिवृत्पदस्य नार्य योगस्य रूढेर्वा विरहात्। "त्रिवृद्रसना त्रिवृद्रज्जु र्वापीतमुपवीत स्याद्विघ्रस्योर्ध्वधत त्रिवृत्" इत्यादौ नैगुण्यार्थस्यैव प्रसिद्धे। न च यथा लौकिकप्रसिद्धिमुल्लङ्घ्यापि त्रिवृद्वहि पवमानमिचादौ स्तौत्रीयानवकवाचित्वमपि त्रिवृच्छदस्याङ्गीकृत तथैव नवाकरणार्थत्वमप्यङ्गीन्द्रियनामनि वाच्यम्, तत्र "उपास्मै गायता नर" इत्यादिवृचत्रयानुक्रमणात्। "नवभि स्तुवन्ति' इति श्रुत्यन्तरदर्शनाच्च। तयात्वेऽप्यत्र कल्पकप्रमाणाभावेन वैषम्यात्।

न च "यदग्न रोहित रूपम्" इत्यादेरत्रापि प्रमाणत्वमिति वाच्यम्, अनुपदमेव निरस्यमानत्वात्। तथा हि "यदग्ने रोहित रूप तेजसस्तद्रूप यच्छुक्ल तदपा यत्कृष्ण तदन्नस्यापागादग्नेरग्नित्व वाचारम्भण विकारो नामधेय त्रीणि रूपाणीत्येव सत्यम्॥ यदादित्यस्य रोहित रूप तेजसस्तद्रूप यच्छुक्ल तदपा यत्कृष्ण तदन्नस्यापागादादित्यस्यादित्यत्व वाचारम्भण विकारोनामधेय त्रीणि रूपाणीत्येव सत्यम्॥ यच्चन्द्रमसो रोहित रूप तेजसस्तद्रूप यच्छुक्ल तदपा यत्कृष्ण तदन्नस्यापागाच्चन्द्राच्चन्द्रत्व वाचारम्भण विकारो नामधेय त्रीणि रूपाणीत्येव सत्यम्॥ यद् विद्युतो रोहित रूप तेजसस्तद्रूप यच्छुक्ल तदपा यत्कृष्ण तदन्नस्यापागाद्विद्युतो विद्युत्व वाचारम्भण विकारो नामधेय त्रीणि रूपाणीत्येव सत्यम्॥ इदगतर् ह स्म वै तद्विद्वास आहु पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुर्यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रु यच्छुक्लमिवाभूदित्यपा रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य तद्रूपमिति तद्विदाञ्चक्रु॥ यदविज्ञातमिवाभूदित्येतासामेव देवताना समास इति तद्विदाञ्चक्रुर्यथा नु खलु सोम्येमास्तिस्रो देवता पुरुष प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति॥ अन्नमशितमित्यादि"।

अस्यार्थ —रोहितपद शुक्लभास्वरार्थकम्। न च रोहितपदस्य कोशप्रयोगादौ रक्तार्थकत्वप्रसिद्धे कथमेवमिति वाच्यम्, तेजसो रक्तरूपवत्त्वानुपपत्ते। अत एव "तस्य हैतस्य पुरुषस्य रूप यथा महारजन वासो

यया पाण्डुविक यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीक यथा विद्युत्तम्" इत्यादि बृहदारण्यकवाक्ये "अग्न्यर्चिरहर्देवा अह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति एष देवपथो ब्रह्मपथः" इति तद्व्याख्यातृभिर्व्याख्यातम्। "एवमतद्वै तदक्षर गार्गि ब्राह्मणाभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमि यनाप्यस्थूलादिचतुष्टयेन परिमाणमात्रनिषेधेऽपि तद्रहितानां रूपादिगुणानामात्मस्वरूपत्वशङ्काव्यावर्तनार्थत्वेनालोहितम्" इत्याद्यवतार्य तेरेवोक्तम्-' अनेन पार्थिवगुणमात्रस्य निषेध.। यद्यपि रोहितस्य मन्नेस्तथापि तदिन्धनसम्पर्क एवोपलभ्यते स्वभावतस्तु सितभास्वरम्। अतो रोहित रूपमग्नेरविरुद्ध गैरिकादीना पार्थिवत्वाल्लोहितत्व न विरुद्धम्" इति। उदयनाचार्यैरप्युक्तम्—"पच्यमानेन्धनरूपसन्निधिवृतस्तु लोहिताद्युपलम्भस्तद्विरह चन्द्रतारकादिमहसि शुक्लस्यैवोपलम्भात्" इति।

न च बृहदारण्यकव्याख्यातृभिरार्षपक्ष परमताभिप्रायेणैवोक्त, गैरिकादीना वति द्वितीयस्तु स्वाभिप्रायेणेति वाच्यम्, पूर्वोक्तवाक्य तथान्यनिस्तारात्। अन्यथा चन्द्रेऽपि लोहित्यप्रत्ययापत्तेः। न च जलरूपेण तदभिभवस्तस्य रूपान्तरानभिभावकत्वात्, अन्यथा जलादंपटादिरूपग्रहानुपपत्ते। न च रोहितरूपस्य श्रुत्यनूदितस्य प्रत्यक्षग्राह्यस्य च कथ युक्तिमात्रेण तेजोगुणत्वनिरास इति वाच्यम्, न हि बाधितमर्थमित्यादे। अन्यथा यदादित्यस्य रोहित रूप यच्चन्द्रमसो रोहित रूपञ्च विद्युतो लोहित रूप मित्यादेरनुपपत्ते। चन्द्रादौ रक्तरूपस्य केनाप्यग्रहात्। न च मन्मते स्थूलभूतमात्रस्य सूक्ष्मभूततयावयवसमारब्धत्वनियमाच्चन्द्रादितेजस्यपि जलावयवत्वात्तद्रूपस्यैव शुक्लस्य ग्रह, शुक्लस्यापि तेजोगुणत्वादिति वाच्यम्, इद तेज इद पृथिवीत्यादिव्यवहारानुरोधन चन्द्रादौ तेजोवयवबाहुल्यस्य त्वयापि स्वीकारेण तत्र रक्तरूपग्रहस्य दुर्वारत्वात्। अन्यथाऽग्नेरपि त्वन्मते भूतनपारमकत्वेन शैत्यग्रहापत्ते। नचैव पृथिव्या इव तेजसोऽप्यनियतरूपत्व शङ्क्यम्, नियतसम्मते तस्यानुपादेयत्वात्। अन्यथा वह्नावादित्यादौ च लोहित रूपमित्यादिप्रकृतश्रुतिविरोधाच्च।

प्रकृतमनुसराम.। यच्छुक्ल तदपाम्, विजातीयशुक्लरूपस्य जलमात्रवृत्तित्वात्। यत्कृष्ण तदनस्य, कृष्णरूपस्य पृथिवीमात्रवृत्तित्वेन निश्चितत्वात्कालिन्दीजलेऽपि वियति विदिक्ते श्वैत्यस्यैवोपलम्भादिति। न त्वेतदुभयतात्पर्येऽग्नेरित्यस्यान्वये मानाभावात्, अनुपन्न विनैवोपपत्तेश्च। न च त्वद्रीत्या यच्छुक्लमित्यादि पुनरुपादानवैयर्थ्यमितिवाच्यम्, तात्पर्यग्राहकत्वेन तदभ्यासस्योपयोगात्। अत एव "अन्धकारस्य परमार्थतो रूपवत्वे श्यामत्वेन

पृथिवीत्वापत्तिः। यदेतच्छ्यामं रूपं तत्पृथिव्या इति श्रुते" इति **नयप्रकाशकारैः**-रुक्तम्। अत एव च "यदेतच्छ्यामं तद्भस्मेत्यागमनुपन्यस्यानुमवेन मृदोऽभिधानात्" इति **तात्पर्यटीकायाम्**।

न च तर्हि यदग्नेरित्यत्र तेजस्त्वव्याप्यधर्मावच्छिन्नसम्बन्धित्वेन रूपविशेषे निर्देश्य यथा तत्र तेजोमात्रसम्बन्धित्वविवक्षा तथा जलपृथिव्योरपि स्यात्। न तु निम्नप्रियोगिकत्वेन रूपविशेषे निर्देश्य तत्र द्रव्यमात्रावृत्तिमानजलत्वपृथिवीत्वावच्छिन्नसम्बन्धित्वविवक्षणमितिवाच्यम्, अप्रयोजकत्वात्। तेजसो दिव्यौदनेदेन द्वैविध्यदर्शनायाग्निद्रव्यमूर्त्यवृत्तिरूपेण पृथग् विधानाच्च। अत एव भास्वरशुक्लरूपवत्त्वेऽग्नित्वमनवच्छेदकत्वादाह विवक्षितमिति स्वयमेवाह—अग्नागादग्नेरग्नित्वमिति। एवमादित्यादावपि व्याख्येयम्। वाचारम्भणमित्यादिस्तु पूर्वोक्त एवार्थः। यद्वा विकारस्ततत्तेजोरूपेण वाचारम्भणं मिश्रधर्मावच्छिन्नतया पदान्तरप्रयोगविषय। नीलं रूपाणीत्येव सत्यम्, तत्तद्धर्मावच्छिन्नभावद्रव्यवृत्तिव्यापकीभूतजातिमत्त्वेनानुभवत्वात्। परमते तु नीलं रूपाणीत्येव सत्यमित्यनुपपन्नम्, अनिवृत्ततन्तूनामेव निवृत्ततन्तूपेक्षया सत्यत्वस्य वक्तव्यत्वात्। रूपाणां सत्यत्वाभिधानानर्हत्वात्।

न च रूपवति लक्षणा, तस्या एव दोषत्वात्। रूपवत्त्वमित्यादिलक्षणाया अनङ्गीकाराच्च। "कश्चिन्नैवाभियोगत" इति भट्टोक्तेः। न च गुणगुणिनोरभेदात्तथा त्वत्सिद्धान्ते भेदाभेदवादानभ्युपगमात् तत्रापि गुणिपरत्वे लक्षणाभ्युपगमाच्च रूपवत्त्वस्य निवृत्तकार्यतावच्छेदकत्वात् तेजस्त्वादेरेव निवृत्तकार्यतावच्छेदकत्वेन तद्वीत्वापि प्रतीयमानत्वादग्न्याद्यधिष्ठानतावच्छेदकत्वाच्चाधिष्ठानतावच्छेदकरूपस्वीकारेण सत्यत्वोक्तेरनुपपत्तेरादित्यादिकं विभावनीयम्। अत एवाग्नेरग्नित्वादिकमपहायैवाभिप्राय स्फुटयति—यद्वै रोहितमिवाभूदिति तेजस्त्वद्रूपमिति विद्वांसश्चक्षुरित्वादि। द्रवगन्धस्नेहान्तरजाति[1]पुरस्कारेण साहश्याभिप्राय। नित्यात्वेऽस्य तात्पर्यमिति तु भ्रान्तिः। "यथा खलु सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं[2] हि"—इत्युपक्रम्य यदग्नेरित्यादेरभिहितत्वात्। प्रतिज्ञातातिरिक्तार्थपरत्वेन तद्व्याख्यानस्य निर्युक्तिकत्वात्।

न च तद्व्याख्यानेऽपि तथैव दोषः, इतरेतरनयोगेन कार्यजनकत्वस्य यदग्नेरित्यादिनानभिधानादिति वाच्यम्; अग्नेः पार्थिवेन्धनत्वेन तेजोऽवय-

---

१- कश्चिन्नैवाप्रयोजकः—क। २- वैजात्य—क।

वाना समवायित्वेन पृथिव्याश्च निमित्तत्वस्यादित्यादेश्चाविग्धनत्वेन तत्र जलावयवाना निमित्तत्वस्य तेजोऽवयवाना समवायित्वस्य च स्पष्टतर प्रत्यायितत्वात्। एव तेजोमात्रोत्पतौ पवनो निमित्तमित्यस्याचार्योक्तिरीत्या तेजस्त्वस्य वायुकार्यतावच्छेदकत्वे वायोर्निमित्तत्व विद्युदन्तेषु बोध्यम्। नित्यसाधारणतया तेजस्त्व न वायुकार्यतावच्छेदकमपितु वह्नित्वमेवेति पक्षे त्वग्न्यश एव तस्य सौलभ्यम्। अत एव तेजस पूर्वं वायूत्पत्तेराक्षेप इति प्राग्व्याख्यात सगच्छते। तस्मात्पृथिव्यादीनामनेकभूतात्मकत्वमप्रमाणम्। अत एव विजातीयारम्भकत्व किरणावल्यादौ निरस्तमित्यास्ता तावत्।

ननु एतदुत्तरमेव "अन्नमशित त्रेधा विधीयते तस्य य स्थविष्ठो धातुस्तत्पुरीष भवति यो मध्यमस्तन्मास योऽणिष्ठुस्तन्मन ॥ आप पीतास्त्रेधा विधीयन्ते तासा य स्थविष्ठो धातुस्तन्मूत्र भवति यो मध्यमस्तल्लोहित योऽणिष्ठ स प्राण ॥ तेजोऽशित त्रेधा विधीयते तस्य य स्थविष्ठो धातुस्तदस्थि भवति यो मध्यम स मज्जा योऽणिष्ठ स वाक् ॥ अन्नमय हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच" ॥ इत्यत्र भागकरणस्यैव त्रिवृत्करणपदार्थत्वात्पूर्वत्रापि तथैवेति चेत् त्रेधा विधीयत इति शब्दानुराधादत्र तथात्वेऽपि पूर्वत्र मानाभावात्। लाकऽर्थान्तरे निरूढत्वेनात्र शक्तिकल्पनानुपपत्ते, "निरूढन्तु न स्वार्थादपनीयते इति न्यायात्। प्राणादीनामन्नादिमयत्व तु पानाशनव्यतिरेकेण प्राणादीना स्वस्वकार्यशक्तिहानेरौपचारिकतया ज्ञेयम्।

न च तत्र मानाभाव श्रुत्यैव तथा नीतत्वात्, उक्तवाक्यानन्तरमेव हि छान्दोग्ये पठ्यत—'दध्न सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्व. समुदीषति तत्सर्पिर्भवत्येवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्व समुदीषति स प्राणो भवति। तेजस सोम्याश्यमानस्य योऽणिमा स ऊर्ध्व समुदीषति स वाग्भवति ॥ अन्नमय हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति। तथा सोम्येति होवाच ॥ षोडशकल सोम्य पुरुष पञ्चदशाहानि माशी काममप पिबापोमय प्राणो न पिबतो विच्छेत्स्यत इति ॥ स ह पञ्चदशाहानि नाशाय हैनमुपसमादकिं ब्रवीमि भो इत्यृच सोम्य यजू पि सामानीति स होवाच नवै मा प्रतिभान्ति भो इति ॥ त होवाच यथा सोम्य महतोऽभ्याहितस्यैकाङ्गार खद्योतमात्र परिशिष्ट स्यात्तेन ततोऽपि न बहु दहेदेव सोम्य ते षोडशाना कलानामेकाकलातिशिष्टा स्यात्तयैतर्हि वेदाननुभवस्यशानाय मे विज्ञास्यसीति ॥ स हाशाय हैनमुपससाद त ह यत्किञ्च पप्रच्छ सर्वं ह प्रतिपेदे ॥ त हो वाच

यथा सोम्य महतोऽभ्याहितस्यैकमङ्गार खद्योतमात्र परिशिष्ट त तृणैरुप-समाधाय प्राज्वलयेत्ततोऽपि बहु दहेत् ॥ एव सोम्य ते षोडशाना कलानामेका कलातिशिष्टाभूत्साऽन्नेनोपसमाहिता प्राज्वालीत्सयैतर्हि वेदाननुभवस्यन्नमय हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विज-ज्ञाविति ।" अत्र ह्यशनव्यतिरेकेण वेदप्रतिभानव्यतिरेकस्य तदन्वये च तदन्वयस्याभिधानेन तादृशमेव तन्मयत्व न तु तज्जन्यत्वमिति स्पष्टमेव शङ्कोत्तराभ्या प्रतिपादितम् । अत एवाङ्गारस्य विशिष्टदाहसामर्थ्यं ज्वलद-ग्नेस्तु तदिति दृष्टान्तोऽपि सगच्छते, सर्वांशसाम्यस्य केनाप्यनङ्गीकार्यत्वात् । अत एव तत्रैव पूर्व दाल्भ्यशालवत्यसवादे 'का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्न-मिति होवाचान्नस्य का गतिरिति आप इति होवाच" इत्यादि पठ्यते । सनि कारणे गानरूपस्य साम्न स्वरसाध्यत्वात् प्राणव्यापारेण स्वरोत्पत्ते । अन्नव्यतिरेकेण प्राणव्यापाराव्यतिरेकादन्नस्य तद्गतित्वमिति तत्र स्पष्टत्वात् ।

न च श्रुत्यैव विवृतेऽर्थे तर्का प्रसरन्ति । उक्त हि बृद्धै —

गौण लाक्षणिक वापि वाक्यभेदेन वा स्वयम् ।
वेदो यमाश्रयत्यर्थं को नु त प्रतिकूलयेत् ॥

गौण श्येनादिशब्दस्य यागविशेषादिरूप "यथा वै श्येनो निपत्यादत्ते एवमय द्विषन्त भ्रातृव्यम्" इत्यादावर्थवादोक्तम् । लाक्षणिक "पुरोडाशानल कुर्" इत्यादौ पुरोडाशशब्दस्य धाना करम्भ पुरोडाश परिवाप पयस्ये'-तिमन्त्रविहवि'पञ्चकरूप वाक्यभेदेन "आश्ववाल प्रस्तर" इत्यादौ काशा-नामश्ववालशब्दवाच्यत्व प्रस्तरकार्ये विधानञ्चेति दिक् ।

यदग्नेरितिश्रुत्यर्थं ॥ तदुत्तर च तत्रैव समामनन्ति 'उद्दालको हारुणिः श्वेतकेतु पुत्रमुवाच स्वप्नान्त मे सोम्य विजानीहीति यत्रैतत्पुरुष स्वपिति नाम मता सोम्य तदा पन्नो भवति स्वमपीतो भवति तस्मादेन स्वपिती-त्याचक्षते स्व ह्यपीतो भवति ।' स यथा शकुनि सूत्रेण प्रबद्धो दिश दिश पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिश दिश पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धन हि सोम्य मन इति ॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतदूर्ध्वोऽशिशिषति नामैष एव तदशित नयन्ते तद्यथा गोनायोऽश्वनाय पूरुषनाय इत्येव तदप आचक्षतेऽशनायेति तन्नेदग्रे स्रोत्समुत्पतित सोम्य विजानीहि नेदममूल भविष्य-

---

१. पयस्येति—स ।

तीति ॥ तस्य वव मूल स्याद यन्नादेवमेव खलु सोम्यानेन शुङ्गेनापोमूल-मन्विच्छद्भि सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूल-मन्विच्छ सन्मूला सोम्येमा सर्वा प्रजा सदायतना सत्प्रतिष्ठा ॥ अथ यदैतत्पुरुष मिषतीति नाम तेज एव तदाह तदा गौनामोऽश्वनाम पुरुषनाम इत्यव तत्तेज आचष्ट उदन्येति तनं तदेव पुङ्गमुत्पनिन सोम्य विजानीहि तदमूल भविष्यतीति ॥ तस्य वव मूल स्यादन्यत्रान्नाद्भोऽद्भि सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूला सोम्येमा सर्वा प्रजा सदायतना सत्प्रतिष्ठा, यथा नु खलु सोम्येमास्तिस्रो देवता पुरुष प्राप्य त्रिवृत्त्रिवृदेका भवति तदुक्तम् पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मन प्राणे प्राणस्तेजसि तेज परस्या देवताया ॥ स य एषोऽणिमैतदात्म्यमिद सर्व तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ यथा सोम्य मधुकृतो निस्तिष्ठन्ति नानात्यानो वृक्षाणा रसान्समवहारमेकता रस गमयन्ति ॥ ते यथा तत्र न विवेक लभन्तऽमुष्याह वृक्षस्य रसोऽस्म्यमु-ष्याह वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्यमा सर्वा प्रजा सति सम्पद्य न विदु सति सम्पद्यामह इति ॥ त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीट वा पतङ्गो वा दशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ स य एषोऽणिमैतदात्म्यमिद सर्वं तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ इमा सोम्य नद्य पुरस्तात्प्राच्य स्यन्दन्ते पश्चात्प्रतीच्यस्तास्समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमन्नाम्यनहमस्मीति । एवमेव खलु सोम्यमा प्रजा सत्र आगम्य न विदु सत आगच्छामह इति त इह व्याघ्रा वासिंहा वा वृका वा वाराहा वा कीटो वा पतङ्गा वा दशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ स य एषोऽणिमैतदात्म्यमिद सर्वं तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽ-भ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत् स एष जीवेनानुप्रभूत पेपीय-मानो मोदमानस्तिष्ठति ॥ अन्य यदेका शाखा जीवो जहात्यथ सा शुष्यति द्वितीया जहात्यथ सा शुष्यति तृतीया जहात्यथ सा शुष्यति सर्वं जहाति सर्व शुष्यति । एवमेव खलु सोम्य विद्धीति होवाच ॥ जीवापेत वाव किलेद म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिद सर्वं तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति

होवाच ॥ न्यग्रोधफलमत आहरेतीद भगव इति भिन्दीति भिन्न भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैका भिन्दीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति ॥ त होवाच य वै सोम्यैतमणिमान न निभालयस एतस्य वै सोम्यैषोऽणिम्न एव महान्न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ॥ स य एषोऽणिमैतदात्म्यमिद सर्व तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार त होवाच मद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ यथा विलीनमेवाङ्गस्या तदाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथोपसीदथा इति तद्ध तथा चकार तच्छश्वत् संवर्तते त होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥ स य एषोऽणिमैतदात्म्यमिद सर्व तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ यथा सोम्य पुरुष गन्धारेभ्योऽभिनद्धाक्षमानीय त ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ् वा प्रत्यङ् वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्ट ॥ तस्य यथाभिनहन प्रमुच्य प्रब्रूयादेतां दिश गन्धारा एतां दिश व्रजेति स ग्रामाद् ग्राम पृच्छन् पण्डितो मेधावी गन्धारानेवोपसपद्यतैवमेवाहाचार्यवान् पुरुषो वेद तस्य तावदेव चिर यावन्न विमोक्ष्येऽथ सम्पत्स्य इति ॥ स य एषोऽणिमैतदात्म्यमिद सर्वं तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ पुरुष सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मान कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशु तप्त प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मान कुरुते स सत्याभिसन्ध सत्येनात्मानमन्तर्धाय परशु तप्त प्रतिगृह्णाति न न दह्यतेऽथमुच्यते ॥ स यथा तत्र नादाह्यैतदात्म्यमिद

सर्वं तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विज-ज्ञाविति ॥ षष्ठ प्रपाठक समाप्त ॥

इह तावत्स्वपिति वाक्ये परेषामेव व्याख्यान, तथाच "स्वाप्ययात्इतिसूत्रा-वतारिकाया भामत्या- 'यदि स्वशब्द आत्मवचनस्तथापि चेतनस्य पुरुषस्य चेतनप्रधानस्वत्वानुपपत्ति । अथात्मीयवचनस्तथाप्यचेतने पुरुषार्थतयात्मीयेऽपि चेतनस्य प्रलयानुपपत्ति । नहि मृदात्मा घट आत्मीयेऽपि पाथसि प्रलीयते, किन्त्वात्मभूताया मृद्येव । नच रजतमनात्मभूते हस्तिनि प्रलीयते किन्त्वात्म-भूताया शुक्तावेव" इति । तथा **भगवत्पादभाष्यम्**—' एषा श्रुति स्वपिती-त्येतत्पुरुषस्य लोकप्रसिद्ध नाम निर्वक्ति प्रभवाप्ययाविदयुत्पत्तिप्रलययो प्रयोगदर्शनात् । मन प्रचारोपाधिविशेषसम्बन्धादिन्द्रियार्थान् गृह्णन्तद्विशे-षापन्नो जीवो जागर्ति, तद्वासनाविशिष्टस्वप्नान्पश्यन्मन शब्दवाच्यो भवति । स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति स्व ह्यपीतो भवति' इत्युच्यते । यथा हृदयशब्दनिरुक्तेन श्रुत्या दर्शित 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्त हृद्ययमिति तस्माद्धृदय-मिति' इति । यया वाशनायोदन्याशब्दप्रवृत्तिमूल दर्शयति श्रुति 'आप एव तदशित नयन्ते, तेज एव तत्पीत नयते' इति च । एव स्वमात्मान सच्छ-ब्दवाच्यमपीतो भवतीतीममर्थं स्वपिति नाम निर्वचनेन दर्शयति । तथा च श्रुत्यन्तर 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्य किञ्चन वेद नान्तरम्' इति सुषुप्तावस्थाया चेतनेऽप्यय दर्शयति" इत्यादि । तत्कल्पतरुरपि "मन शब्द-वाच्यो भवति लक्ष्यो भवति । एवमेव खलु सौम्य तन्मन इति स्वप्नोपन्यास-वाक्येऽर्थवादस्यापि स्वपितिनामनिर्वचनस्य यथार्थत्वाय हृदयान्निरुक्त्यु-दाहरणे तस्य हृदयशब्दस्यैतन्निरुक्त निर्वचनम्, अशनायापिपासे सौम्य विजा-नीहीत्युपक्रम्याशितस्यान्नस्य द्रवीकरणेन नयनाद्द्रवीकरणादापोऽशनाया एकवचनछान्दस द्रावकोदकापनयनाच्छोषणादुदन्य तेज । आकारश्छान्दस" इति । अत्रेद वक्तव्यम्—स्वपदस्य सुषुप्त्यस्वरूपपरत्वेऽपि तत्प्रथमान्त द्वितीयान्त वा ? नाद्य, अनुपयोगादनन्वयापत्तेश्च । नान्त्य, अप्ययशब्दस्य नाशार्थकत्वे कर्मणोऽनन्वितत्वापत्ते । नाशार्थकधातूनामकर्मकत्वात् । स च त्वन्मते सस्का-रावस्थाप्राप्तिरित्येव विशेष । घटो नश्यतीत्यादेरकर्मकत्वस्य च सर्वाभिम-तत्वात् कर्तुरनभिहितत्वेन तृतीयापत्तेश्च । एतेन तन्नस्थोपाधिकलयरूप-स्याप्ययस्य कथनादित्यपास्तम् । द्वितीयाया सप्तम्यर्थत्वानुपपत्ते छान्दसत्वा-श्रये च गौरवात्प्रमाणाभावाच्च । एतेन स्वमपीतो भवतीत्येकवाक्यतया सति सम्पद्यामह इत्यस्य "स्वाभिन्ने सति सम्पद्यामहे इत्यर्थ" इत्यप्यपा-

स्तम्। 'नाप्यपिशब्दपूर्वकस्य इणो नाशार्थकत्वनियम 'देवो भूत्वा देवान्येति" इति बृहदारण्यकवाक्ये अप्येति अपि गच्छतीति विवृतत्वात् स देवानपि गच्छति स ऊर्जमुपजीवतीति वाक्ये अपि गच्छति सम्प्राप्नोतीति तद्व्याख्यानाच्च। यथा 'वितर पुराणा मा स्पृष्टो नु चित्तो मयैव तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गलोकमितो विमुक्ता" इति वाक्येन ब्रह्मात्मनो ज्ञानमार्गेऽपि धीरा कृतसन्यासा अपियन्ति ययाह जन तथा तेऽपियन्ति' इत्यादि तत्रीत्यातम्। इत्यलमनेन।

यत्तु उपसर्गप्रकृतिप्रत्ययपर्यालोचनया लब्धस्वरूपप्राप्तिस्वरूपार्थंभेदे पर्यवसानमिति, तच्चिन्त्यम्, "स्वज्ञातावात्मनि स्व त्रिष्वात्मीये स्वाखिया धने" इत्यमरादिपर्यालोचनया, आत्मान्यस्वरूपस्य स्वशब्दार्थत्वे मानाभावात्, आत्मीयपरत्वे तु तस्य सम्प्रतियोग्यनुयोगित्वेन तत्साकाङ्क्षतया तदनिर्देशेनागङ्गत्वापत्तेश्च। स्वमात्मान प्राप्तो भवतीत्यर्थस्त्वन्मताकमविरुद्ध। स्वतादात्म्यस्य स्वस्मिन् सर्वदैव सत्त्वादर्थवशात्प्रतिपक्षविशेषगुणव्यावृत्ति, अर्जीत इत्यत्र 'गत्यर्थकर्मक" इतिसूत्रेण कर्तरि क्त। इदञ्चवस्तुगत्योक्त लीन इव भवतीत्यर्थेऽपि तान्येवानुविनश्यतीति वाक्ये वक्ष्यमाणरीत्या प्रपञ्चविलयाभावेऽपि तत्सम्बन्धाभावस्य सम्भवात्तथोक्त। लयो हि जीवस्य क्वौन, म चौपाधिक एवेत्युभय प्रतिपन्नम्। उपरि पद तन्मते प्रपञ्चोऽस्मन्मत तु तत्सम्बन्ध इति विशेष। विस्तर पुरस्तात्। प्राज्ञेनात्मनेत्यादि श्रुतिस्तु व्याख्यास्यते। अत एव बृहदारण्यक एव श्रूयते— "तौ ह पुरुष सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयाञ्चक्र बृहत्पाण्डरवास सोम राजन्निति स नोत्तस्थौ त पाणिनापेग वावयाञ्चकार, स होत्तस्थौ॥ स हो वाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमय पुरुषस्तदेषा प्राणाना विज्ञानन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैनत्पुरुष स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीतो वाग्गृहीत चक्षुर्गृहीत श्रोत्र गृहीत मन" इति। अयमर्थ—करणव्युत्पत्त्या विज्ञानेन मनसा सहैषा प्राणानामिन्द्रियाणा विज्ञान ज्ञानसामर्थ्यं फलापधानरूपमादाय तेभ्यो निर्वर्त्य य एष हृदयाभ्यन्तरे प्रसिद्ध आकाश पुरीतदवच्छिन्नस्तस्मिञ्छेते मनस इन्द्रियत्वेऽपि प्राधान्याद्बहिरभिधानम्। यद्वा इन्द्रियाणा ज्ञानशक्तिमादाय विज्ञानेन मनसा सह पुरीतति शेते तदानी मनस पुरीतत्सम्बन्धा-

---

१—१ नास्ति क

नान् त्वङ्मनायोगाभावेन ज्ञानसामान्यानुदयाच्छ्वयनोपचारस्तदेव स्पष्टयति-तानीन्द्रियाणि यदा गृह्णाति स्वाधीनानि करोति ज्ञानरहितानि करोतीति यावत्' तदा स्वपिति नाम भवतीति सुषुप्त्यवस्थाविशिष्ट इत्युच्यते। छान्दोग्य-निर्वचनेन समानार्थतानीत्यनेनोक्तार्थग्रहणग्राहिकया प्राह—तद् गृहीत एव प्राणो भवतीत्यादि। प्राणपद घ्राणपरम्' इन्द्रियान्तराणामप्येतदुपलक्षणम्' तंरपि तथैव व्याख्यास्यमानत्वात्। परैरपि हि व्याख्यानम्—एषामिन्द्रियाणा प्राणाना प्राणशब्दाभिधेयाना विज्ञानेनान्त करणेन वृत्तिमता सह विज्ञानपर्या-लोचनादिन्द्रियव्यापारमात्र सविषय कर्मभूतमादाय स्वप्नजागरणाद्युपरमे शरीरप्राणव्यतिरिक्त कार्यकारणजातमविद्यामात्मावरणरूपाया मस्कार-शेषमवतिष्ठते। यावत्स्वप्नजागरणयोरन्तराद्यागमनमज्ञश्चाप्तस्य कर्तृ अनस्तस्य कर्तृत्व मान्त करणानामिन्द्रियाणा सव्यापाराणा कर्मत्वमादायावि-द्याप्रधान च कर्तृत्व यतस्तत करणत्वञ्चाविद्याया मनुक्तमपि द्रष्टव्यम्। तेन विज्ञानमयोऽप्यविद्यावृत्तिप्रधानोऽविद्याकार्य मान्त करण गृहीत्वा य. प्रसिद्ध-श्रुत्यन्तरे एषोऽन्त वक्ष्यमाणो ब्रह्मविद्भि साक्षात्क्रियमाणश्चान्तर्हृदये हृद-यस्य मध्ये हृदयोपलक्षिताया बुद्धौ साक्षित्वेन वर्त्तमान प्रत्यग्भूत आकाश-नामरूपकर्मभ्याऽन्यश्चिदानन्दैकरस सर्वानुस्यूत आकाशवदाकाशशब्दा-भिधेयस्तस्मिंश्चिदानन्दैकरस आकाशे ब्रह्मज्ञानात्प्रागविद्यासस्कारैर्विभिन्न इव तद्रूपस्तस्मिन्नाधार इव स्वयमाधेय इव स्थित। विक्षेप विस्मृत्यावरण चाविद्य-मानसम कृत्वा सच्चिदानन्दैकरस उपसम्पन्नो भवति। इदानी नामनिर्वक्त्यापि स्वात्मसम्पत्ति सुषुप्तौ भवतीत्याह—तान्युक्तानीन्द्रियाणि यदा गृह्णाति। स्पष्टमेव तदाह—प्रसिद्धो विज्ञानमय एतत्पुरुष स्वपिति नामयुक्त पुरुष एतन्नामा एतद्दभिधान प्रतिपद्यत इति शेष। किं स्वपिति स्वात्मान चिदेक-रस बुद्धिमात्रिणमप्येत्यायिगच्छति यदा स्वपिति नाम प्रतिपद्यते तदा गृहीत एव प्राणो भवति। जनेनाविद्यावृत्त्या प्राणो घ्राण गृहीत एवावि-द्यया स्थापित एव भवति। यया प्राणस्तथा गृहीता वाग्गृहीत श्रोत्र गृहीत मन मनोऽन्न करण शेष सुगमम्। त्वगग्रपाणिपादपायूपस्थान्यनुक्तान्यपि गृहीतानीत्यवगन्तव्यमिति। अत्रेद विभावयम्—विज्ञानेनेति सहार्थे तृतीया, प्राणा इन्द्रियाणि शेरत गौणत्व-हेत्युभयमत्रापि तुल्य परन्तु हृदयशब्दस्य बुद्धौ, आकाशपदस्य च ब्रह्मणि विवक्षणा तेषामनिरिता। न च "सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते" इत्यादावाकाशपदस्य ब्रह्मण्यपि शक्तिरिति शङ्कयम्, तदधिकरणे वाचस्पत्यादावेव निराकृतत्वात्। स्वविषयमिति शेषस्य च स्वेच्छामात्रकल्पितत्वात्, सुषुप्तौ विषयनाश

प्रमाणाभावस्य प्रपञ्चयिष्यमाणत्वात्, एवमन्यत्रापि सुधीभिरूह्यमीयम्। तत्सिद्ध सुषुप्तौ प्रपञ्चलयो न श्रुत्यर्थ इति।

प्रकृतमनुसराम । तत्त्वमसीति वाक्यार्थोपयुक्त-वेन जीवेश्वरौ व्यवस्थापयिष्यन् प्रथम विप्रतिपन्न प्रति जीवात्मानमेव निर्णयनाह—स्वप्नान्तमिति। स्वप्नपदमत्र सुषुप्तिस्वप्नोभयपरम्, जाग्रदवस्थाया प्रत्यक्षसिद्धत्वादनुपन्यास, अन्यथा स यथा शकुनिरिति स्वप्नस्वरूपोपन्यासविरोधात्। प्रथम सुषुप्त्युपन्यासस्तु विज्ञानमेवात्मेति मतनिरासार्थम्, तदा ज्ञानाभावेन नैरात्म्यापत्ते। ज्ञानस्य सविषयकत्वनियमेन तदानी निर्विषयकज्ञानाभ्युपगमानुपपत्तेरिति युक्तेरभिमतत्वात्। मता निरुपधीच्छाविषयत्वस्वप्रकाशस्वयवता दुःखाभावेन सम्पन्नो भवति। एषास्य परमा सम्पदिति, वक्ष्यमाणबृहदारण्यकवाक्यस्वारस्यात्। एकीभावेऽपि सम्पद्यते शक्त्यभावात् स्वमपीत इत्यादिक व्याख्यानम्। जीवस्याशनायापिपासावत्त्वात् परमात्मनश्च तदभावात् भेद इति हृदि निधायाह—अशनायेत्यादि। यद्यप्यशनायापदार्थ आप उदन्यपदार्थश्च तेज इत्येवान प्रतिपाद्य तथाप्यशिशिषति-पिपासतीत्यनयोर्भावदुक्तत्वात्साङ्गति। पदार्थेनन पररीत्यैव व्याख्येय। अन्नपद चान व्रीह्यादिपरमेव, शुङ्गकार्यमपा वृष्टिद्वारा यज्ञजन्यत्वात्, यज्ञस्य च व्रीह्यादिसाध्यत्वात्, एवमनकारणत्वेनापामनुमानम्, यन क्वचिद् वर्षति तदेवमन्न भूयिष्ठमन्न भवतीति पूर्वोक्तलिङ्गात्। न च प्रत्यक्षसिद्धत्वादनुमानवैयर्थ्यम्, कार्येण कारणानुमानप्रकारस्य परमात्मानुमाननात्पर्यकत्वात्। अनुमित्युत्पत्तिपर्यन्त तात्पर्यभावात्। अद्भि सोम्य शुङ्गेन कार्येण तेजोरूप मूलमन्विच्छ "आदित्याज्जायते वृष्टि" इति स्मृते। तेजसा आदित्यादिरूपेण कार्येण सन्मूलमीश्वररूप हेतुमनुमाहि। आदित्यादेश्च सोत्पत्तिनिमित्तत्वेन व्यापारनिमित्तत्वेन चेश्वरमावकत्व "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इति श्रुते, "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इति बृहदारण्यकाच्च। उक्तञ्च तद्व्याख्यानम्—यदीद सूर्यादिक स्वतन्त्र स्यात्तदानिमना प्रवृत्ति विपरीता प्रवृत्तेरपरम वा कुर्याद्राजादिवत्। न करोति तदस्मादिदमस्वतन्त्र भृत्यादिवदिति। जलादिमूलत्वेनान्नादेरभिधानच्च सूर्यादिर्मूलत्वेन साध्यमान ईश्वरोपादानकारणत्वेन शङ्काविषयो यथा न स्यात्किन्तु निमित्तकारणत्वेनैव यथा निश्चित स्यादित्येवमर्थ। एतेन हि द्वितीयपर्यायोऽपि व्याख्यात। तत्र जलमारभ्यानुमानमिति विशेष। सूर्यादिपद नोपलक्षण कार्यजातस्येत्याह—'सन्मूला सोम्येमा

सर्वा प्रजा '' इति । प्रजायन्त इति व्युत्पत्त्या प्रजापद कार्यमात्रपर न केवल जन्यजालस्योत्पत्तावेवेश्वरापेक्षा किन्तु स्थितौ सहारेऽपि चेत्याह–"सदायतनाः सत्प्रतिष्ठा '' इति । अत एव—

कार्ययोजनधृत्यादे पदात् प्रत्ययत श्रुते' ।
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वजिदव्यय ।।"

इति कुसुमाञ्जलावाचार्या । धृति गुरुत्ववता पतनाभाव । पतनप्रतिबन्धकसयोगो वा । ब्रह्माण्डादि प्रयत्नप्रतिबद्धपतनक, धृतिमत्त्वात्, वियति विहङ्गमशरीरवत् । आदिपदान्नाशसग्रह । ब्रह्माण्डनाश प्रयत्नजन्य नाशत्वात् पाट्यमानपटनाशवत् । एव जीवस्यान्याधीनज्ञानत्वमपीत्याह–"यथा नु खलु सोम्य ' इत्यादि । तच्च प्रागव व्याख्यातम् । अस्य सोम्य पुरुषस्य प्रयतो म्रियमाणस्य वाङ् मनसि सपद्यते इच्छामानविषयीभवति वक्तुमशक्यत्वात् । मन प्राणे सपद्यते प्राणस्थाने हृदय एवावतिष्ठते व्यापारराहित्यात् । "स एतास्तेजोमयान् समभ्याददानो हृदयमेवान्ववक्रामति" इत्यादि बृहदारण्यकदर्शनात् । अङ्गान्तरेभ्यो निष्क्रम्य प्राणादीना हृदयमात्रे स्थितानां तदोपलम्भात् । प्राणस्तेजस्यद्दष्ट सम्पद्यते । जीवनादृष्ट विलयकाले जीवनयोनियत्नस्य नाशे सति श्वासोच्छ्वासराहित्यात् तेजस्तदृष्टं च परस्यां देवतायां जीवात्मनि सपद्यते नश्यतीति यावत् । परेषामप्यत्र यथाश्रुतपदाना सामञ्जस्यात् । न ह्यय देवताभिप्रायेण लय । "यत्रास्य पुरुषस्य मृतस्याग्निर्वागप्येति वात प्राणश्चक्षुरादित्य मनश्चन्द्र दिश श्रोत्र पृथिवी शरीरम्" इत्यादावात्मभागग्रहणेऽन्यथा तदभिधानात् । नाप्युपादानाभिप्रायेण ।

जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्यापिप्याप प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ।।

इत्यादि स्मृत्यापादयस्योपादाने क्रमेण लय इत्यस्य 'विपर्ययेण तु क्रमोऽत उपपद्यते च इति सूत्रे तेषा व्यवस्थितत्वाद् 'वाङ्मनसि दर्शनाच्छब्दाच्च" इति सूत्रे उत्क्रान्तिसमये वागिन्द्रिय मनसि वर्तते न तु लीयते, स्वप्रवृत्तावेव वस्तुना लयदर्शनात् । अत वृत्तिरहितसर्गस्येव सम्पद्यमानत्वादिति व्यवस्थापितत्वाच्चेत्यादिस्वयमूह्यनीयम् । एव परमात्मान जीवात्मानञ्च भिन्नतयाव्यवस्थाप्य मोक्षहेतुज्ञानार्थं प्रकृतमनुसरन् मिथ्यात्वमेव निरस्यति—स य एषोऽणिमेति । अणोर्भावोऽणिमा सूक्ष्मो दुर्विज्ञेय इति यावत् । 'भावभविन्नोरभेदोपचार " इति कल्पतरोरुक्तत्वात् । इद सर्वं प्रपञ्चमात्रमेतदात्म्य

एतस्यात्मनः कर्मजीवभोगार्थं परमात्मना सृष्टिनिर्माणात्। कर्मधारयव्युत्पत्त्या एतदात्मशब्दात् कर्मणि प्यञ्। यत्तु एतदात्मना यस्य तदेतदात्म तस्य भाव ऐतदात्म्यम्। सामानाधिकरण्यञ्च स्वार्थकत्वात् भावभवित्रोरभेदोपचाराद्वा 'यो वै भूमा तत्सुखम्' इतिवदिति, तन्न, कर्मधारयापेक्षया बहुव्रीहौ गौरवात्। स्वार्थकत्वे प्रत्ययवैयर्थ्यपर्यवसानाच्च। सोम्यमित्यादौ स्वार्थकत्वोपगमेऽप्यत्र पक्षद्वयतारतम्यविचारे स्वार्थकत्वस्य जघन्यत्वात्। अभेदोपचारेऽपि तस्यैव दोषत्वात्। क्वचिदगत्या तदुपगमेऽपि प्रकृते तस्य दोषत्वादन्यथा बहुविप्लवप्रसङ्गात्। अत एव—

संद्रष्टा चैव संहर्ता नियन्ता रक्षिता हरिः।
तेन व्याप्तमिदं सर्वमेतदात्मविदो[1] विदुः॥ इति स्मृतिः।

यत्त्वेकविज्ञानेन सर्वविज्ञान प्रतिज्ञाविरोधान्नेयं स्मृतिर्युक्तेति, तन्न, स्मृत्युक्तव्याख्यानापेक्षया तदुक्तव्याख्यानस्य दौर्बल्यात्। स्मार्तव्याख्यानानुसारेणैव येनाश्रुतमित्यादेर्व्याख्यातुमुचितत्वात्। न च स्मृतिरियं निर्मूलेति वाच्यम्; इद सर्वमिति बृहदारण्यकवाक्यव्याख्यानोदाहर्तव्यभारतादिसमानार्थकत्वात्। भवतु। आत्मजन्य जगत्तदापि मिथ्येति भ्रान्तिनिरासार्थमाह—तत्सत्यमिति। तत्सत्य न तु मिथ्या, तेन केषाञ्चिद् विनाशेऽपि न क्षतिः।

यत्तु तत्त्वमसीति वाक्ये तत्सत्यमित्यत्र नपुसकशब्दनिर्दिष्टब्रह्मण एव नपुसकतत्पदेन निर्देश। नहि तत्सत्यमित्यत्र सर्वं सत्यमित्यर्थः। असत्कारणनिरासाय सत्येव सोम्येत्यादिनोक्तस्य कारणसत्यस्य तत्र परामर्शात्स आत्मेति कारणवाचितत्पदसमभिव्याहाराच्चेति। तच्चिन्त्यम्; ऐतदात्म्यपदोपात्तजन्यपरित्यागेन दूरस्थब्रह्मग्रहे प्रमाणाभावात्। स आत्मेत्यस्य च पाश्चात्यत्वात्, सर्वनाम्नश्च तच्छब्दस्य पूर्वोक्तपरामर्शकत्वात्, नपुसकत्वानुपपत्तेश्च। नपुसकपदोपात्तसन्निहितैव तादात्म्यस्यैव तच्छब्देन गृहीतुमुक्तत्वात्। स पूर्वोक्त आत्मा। तथा चात्मा निमित्तं, प्रपञ्चश्च कार्यं, न तु तयोरुपादानोपादेयभाव इति भावः। तदात्मरूपस्त्वमसि मुखचन्द्र इत्यादिवत् तत्पदस्य तत्सदृशे लक्षणया तत्तुल्यश्च त्वमसीत्यर्थः, इति नैयायिकाः। न च स एव दोषः, बाधकस्योक्तत्वात् परेषामपि तत्पदस्य सर्वज्ञत्वादिविशिष्टपरतया त्वम्पदस्य च किञ्चिज्ज्ञत्वादिविशिष्टपरतया विरुद्धांशस्य त्यागेन लक्षणाद्वयस्यावश्यकत्वात्। विशिष्टयोरैक्यमात्रेणालक्षयता-

---

१. °मतो—ख।

वच्छेदकमन्तरेणैव तत्र लक्षणा निर्विकल्पकरूपा। निर्विकल्पकरूपाया एव पदार्थोपस्थिते तादृशशब्दानुकूलत्वात्। भिन्नरूपेण स्वार्थस्मृतिद्वारैकमात्रप्रातिपदिकार्थानुभावकनानात्वस्यानपेक्षितत्वादित्यादेस्तैरभ्युपगमात्।

यत्त्वभेदतात्पर्यविधारणे तन्निर्वाहकलक्षणाबाहुल्य न दोष, न हि लक्षणैक्यानुरोधेन तात्पर्यपरित्याग, तदुक्त न्यायचिन्तामणौ "तात्पर्याद्धि वृत्तिर्नतु वृत्तेस्तात्पर्यम्" इति, तदसत्, अभेदे तात्पर्यविधारकप्रमाणपदस्य वक्तव्यत्वापत्ते। तस्य च दुर्बलत्वात्तत्त्वमसीत्यभ्यासस्याभेदतात्पर्यग्राहकत्वेनैव तदभिमतत्वात्। वेदतात्पर्यस्य न्यायानुसारित्वनियमाच्च।

वस्तुतस्तु तत्पदस्य क्लीवत्व नोद्देश्यलिङ्गोपादानेन, स आत्मेति पुस्त्वेनैव तदुपक्रमात्। नापि विधेयलिङ्गोपादानेन, त्वशब्दस्य लिङ्गत्रयेऽप्येकरूपेण तस्य क्लीवत्वाभावात्, अन्यथा दशमस्त्वमसीत्यादौ पुस्त्वस्यानुपपत्तेः।

न च तादात्म्यस्वरूपमित्यादि कल्प्यम्, मानाभावात्। तदयमर्थ —तस्मादीश्वरात्त्वमन्योऽसि, इति। यदि भिन्नपदत्वे आग्रहस्तदा तदिति हेतावव्ययम्। यत्तदिति हेताचित्यव्ययप्रकरणे पाठात्। तस्मादुक्तरीत्या ब्रह्मजगतोरुपादानोपादेयत्व प्रमाणशून्यम्, तस्मादसीति त्वमर्थकमव्ययम्। वेत्स्यतीति। 'पदमङ्गाद्" इति स्वसूत्रे वामनेन 'वेत्सि असि त्व वेन्सीत्ययं' व्याख्याम स्पष्टमेव तथोक्तत्वात्। त्वच्छब्दोऽन्यपर्याय सर्वादिगणे प्रसिद्ध।

उत त्व पश्यन्न ददर्श वाचम् उत त्व पश्यन्न शृणोत्येनाम्।
उतो त्वस्मै तन्व विसस्रे जायेव पत्ये उशती सुवासा॥

इत्यत्र वेदभाष्यादौ सर्वत्र व्याख्यात। अव्ययविशेषणत्वाच्च क्लीवत्वम्। असीत्यौत्सर्गिकोऽध्याहार। ब्रह्मजगतोर्भेद पूर्वमुक्त ब्रह्मजीवयोस्त्वत्रेति विवेक।

न च भेदस्य लोकप्रसिद्धत्वान्न तत्र वेदतात्पर्यमिति वाच्यम्; जीवब्रह्मभेदस्य प्रत्यक्षसिद्धत्वाभावात्। प्रतियोगियोग्यत्वस्य भेदप्रत्यक्षानपेक्षितत्वेऽपि प्रसिद्धेरपेक्षितत्वात्, अन्यथा तद्विरोधेनाप्यभेदधीबाधापत्ते। भवदीयानुमानादिना तदभावस्यापि तथात्वादप्रामाण्यशङ्कानिरासार्थत्वस्याप्युभयत्र साम्यादित्यादे पूर्वमेव निरूपितत्वाच्च। परमार्थतस्तु तत्पदमाचारक्विबन्तात्तच्छब्दात्तरि क्विबन्तम्। स इवाचरतीति तद्, इदमादिभ्योऽप्याचारक्विप उदाहृतत्वात् अस्यान्वयसञ्ज्ञाकरणेन सर्वनामसञ्ज्ञाविरहात्, सञ्ज्ञाकार्यमन्तर्गणकार्यं च न भवतीति "तदो स" इति सत्व सत्पदाद्यत्व च न भवतीति तत्साद्दश्यमेवात्र तच्छब्दार्थ इति सूक्ष्ममीक्षणीयम्।

न चात्रापि क्विबनुसन्धानादावेव गौरवमिति वाच्यम्; तथापि शब्दत्व'-रक्षणाल्लक्षणापेक्षादस्याभ्यर्हितत्वात्। अन्यथा सलिल एको द्रष्टेत्यत्र सलिलपदस्य पुरुषनिर्वाह्य कल्पप्रकारारण्या विलयापत्ते ।

भेदवाचन्तरप्रोक्ता अर्था साङ्गेपदूषणा ।
विचार्यन्ते चमत्कारप्राचुर्याय विपश्चिताम् ॥

तथाहि तच्छब्दोत्तरतृतीयादे "सुपा सुलुग्" इत्यादिना प्रथमैक-वचनादे लोर्लुग्वा। तथा च तेन त्व तिष्ठतीत्यर्थ । "अनेन जीवेनानुप्रभूत. पेपीयमानो मोदमानस्तिष्ठति" इति वाक्यशेषात् ।

ननु तिष्ठतीत्यस्य सत्तादर्थकतया कल्पप्रयुक्तसत्ताकत्वलाभादव्यस्त-त्वमेव जीवस्य स्यात्, अधिष्ठानसत्ताप्रयुक्तसत्ताकत्वस्याव्यस्तत्वव्याप्यत्वा-दिति चेत्, तर्हि, ततः सञ्जात इत्यर्थोऽस्तु। "सन्मूला सोम्येमा सर्वा. प्रजा." इति वाक्यशेषात्। अय जीवस्य नित्यत्वादौपाधिकस्यैव जन्यत्वस्य वाच्यत्वा-ज्जीवस्वरूपानिर्णय.। तथा च तज्ज्ञानान्मोक्षो न स्यादिति शङ्क्यते, तर्हि, तस्य त्वमिति षष्ठी व्याख्येया। यद्यनापि सम्बन्धविशेषानवधारणमुद्भाव्यते तर्हि तस्मिन्त्वमित्यस्तु ।

नन्वेव लक्षणेति चेत्, न, प्रातिपदिकद्वये लक्षणाद्वयमपेक्ष्य विभक्ता-वेकस्या लक्षणाया न्याय्यत्वात्। अत एव "उत यत्सुन्वन्ति सामिधेनीस्त-दन्वाहु:" इत्यत्र श्रयमाण्यतच्छब्दयोः सप्तम्यर्थत्वमङ्गीकृतम्। हविर्धाना-स्यग्रहे दक्षिणोत्तरदेशयो सोमाख्यहविर्वारणार्थं हविर्धानाख्य शकटद्वय स्थाप्यते। तयोर्मध्ये यत्र दक्षिणहविर्धानि सोमाभिषवः क्रियते तत्समीपे सामिधेनीरनुब्रूयादित्यर्थात्।

यत्तु "प्रैतु होतुश्चमस प्रब्रह्मण प्रयजमानस्य प्रोद्गातृणाम्" इत्यत्र चमसाध्वर्यूणत्यध्वर्युप्रैषे उद्गातृशब्दस्योद्गीथाख्यद्वितीयसामभक्ति-वाचकत्वात्तद्गातुश्चैकत्वात्सामानित्यनेव बहुत्व नेयम्। यद्वा पात्रबहुत्वस्य प्रकरणे कथमन्यसम्भवादस्तु तद्भाव, उद्गातृशब्दस्य त्वजहत्स्वार्थलक्षणयो-द्गात्रप्रवचनसम्बन्धरूपावान्तरसामान्येनोद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्यपर -त्वाच्चानुर्गामुद्गातृचमसभक्षकत्वमिति प्राप्ते सदोमण्डपसन्निधानसयैकस्तोत्र-सम्बन्धस्य च पूर्वोक्तसामान्यादप्यवान्तरसामान्यत्वात्तद्रूपेणैव लक्षणौचित्या-

---

१. शब्दार्थ व—क

त्तस्य च सुब्ब्रह्मण्यव्यावृत्तत्वात् सुब्ब्रह्मण्यभिन्नाना त्रयाणामेव तदिति तृतीयपञ्चमे स्थितम्। तथा च विभक्त्यपेक्षया प्रातिपदिक एव लक्षणाश्रितेति कथमत्र प्रातिपदिकस्वारस्यरक्षणाय विभक्तौ लक्षणाग्रह इति, तच्चिन्त्यम्, "त्यजेदेक कुलस्यार्थे" इति न्यायेन प्रातिपदिकद्वये लक्षणात एकविभक्ता वेव तदौचित्यात्। प्रातिपदिकलक्षणापेक्षया विभक्तिलक्षणायाश्चानुशासनिकत्वात् सख्याप्रतिपादकत्वेन च विभक्ते सावकाशत्वाच्च।

न च विशेष्याशमादाय प्रातिपदिकस्यापि सावकाशत्वमिति वाच्यम्, शक्यत्वपर्याप्त्यधिकरणपरत्वनिर्वाहतदभावाभ्या विशेषस्य दुरपह्नवत्वात्। एकवचनत्वावच्छिन्नाया शक्तताया मेकत्वस्यैव शक्यत्वपर्याप्त्यधिकरणत्वात्। प्रातिपदिकाशे तु विशिष्टस्यैव तथात्वेन विशेष्याशमात्रमादाय सावकाशत्वस्य जघन्यत्वाद्विभक्त्यर्थैकत्वस्य प्रातिपदिकार्थविशेषणत्वेन विशेष्यवाचकत्वेन प्रातिपदिकस्य प्राधान्याच्च। अत एव पाशाधिकरणे विशेष्यभूतप्रातिपदिकार्थस्याग्नीषोमीयेऽपि सत्त्वाद्विशेषणीभूतबहुत्ववाचिबहुवचनस्य गुणत्वाल्लक्षणया तदवयवपरत्व सिद्धान्तितम्। तदुक्तम्—गुणत्वे त्वन्याय्यकल्पनेति।

यत्तु प्रकृतिप्रत्ययौ स्वार्थं सह ब्रूतस्तयो प्रत्ययार्थं प्राधान्येनेति कात्यायनोक्त्या प्रत्ययार्थस्यैव प्राधान्यात्प्रत्ययस्यैव प्रकृत्यपेक्षया प्राबल्य मिति, तच्चिन्त्यम्, प्रत्ययार्थत्वावच्छेदेन प्रकृत्यर्थापेक्षया प्राधान्यस्यैतदर्थत्वाभावात्। अन्यथा घटादित्यादौ द्वित्वादे नामार्थविशेषणत्वानापत्ते, शाब्दिकमते तिङन्तस्थले धात्वर्थभावनाया एव विशेष्यत्वाच्च। अत एव भगवान् पाणिनिरसूत्रयत् 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वाद" इति। अस्यार्थं—अशिष्यमिति पूर्वसूत्रादनुवर्त्तते। प्रधानप्रत्ययार्थवचन प्रत्ययार्थ प्रधानमित्येव रूपम्। अशिष्यमनारम्भणीय तत्र हेतुरर्थस्यान्य प्रमाणत्वादिति विशेष्यविशेषणभावस्य लोकानुभव[1]मूलकत्वात्। प्रकृति प्रत्ययार्थयोश्च विशेष्यविशेषणभावनियमस्यानुभवविरोधाद्वचनेन व्यवस्थापयितुमशक्यत्वात्। क्वचित्प्रत्ययार्थप्रकारकप्रकृत्यर्थविशेष्यकस्य क्वचिच्च प्रकृत्यर्थप्रकारकप्रत्ययार्थविशेष्यकस्य बोधस्य सर्वानुभवसिद्धत्वादिति।

ननु तथापि द्वितीयाद्यर्थसख्याया नामार्थविशेषणत्वेऽपि नामार्थस्य द्वितीयाद्यकर्मत्वादिविशेषणत्वात् कथ प्रातिपदिकस्यैव प्राधान्यमिति चेत्, सत्यम्, प्रथमाया सख्यातिरिक्तार्थाभावेन तदर्थस्य प्रकृत्यर्थनिष्ठविशेषणत्वप्रतियोगिकविशेष्यत्वविरहात्, प्रकृतसङ्गतिरापत्ते।

---

१ °नुबोधस्य—क।

ननु प्रथमाया कर्मादिकारकवाचित्वात्तत्र च नामार्थस्य विशेषण-त्वात्तस्या एव प्राधान्य युक्तमिति चेत्, न, प्रातिपदिकार्थसूत्रेण नियतोपस्थिति-कायं एव तद्विधानात् प्रथमायास्तात्पर्यमानयाहकत्वात् । चैत्र पचतीत्या-दावाख्यातेनैव कर्मादिरभिहितत्वादनन्यलभ्यस्य च शब्दार्थत्वात् ।

न चैवमनभिहिताधिकारवैयर्थ्यं बहुपटव इत्यादौ बहुनोक्तार्थत्वात् कल्पबादीनामिवाख्यातादिना कर्माद्यभिधाने द्वितीयादीनामुक्तार्थानामप्रयोग इति न्यायेनैव वारणसम्भवादितिवाच्यम्, सख्याया विभक्त्यर्थत्वपक्षे "कर्मणि द्वितीया" 'द्व्येकयोर्द्विवचनैकवचने" इत्यादेरेकवाक्यतया कर्मणि यदेकत्व तत्र द्वितीयैकवचनमित्याद्यर्थस्य वाच्यतया कट कृत इत्यादौ कर्मादिरभिधानेऽपि कृत्प्रत्ययेनैकत्वानभिधानात्तेन द्वितीयाप्रसक्तौ तद्वा रणार्थत्वात् ।

न च "विप्रषेधात्प्रथमाभाव" इति वार्तिकरीत्या परत्वात्प्रथमैव भविष्यतीति वाच्यम्, कर्त्तव्य कट इत्यत्र "कृत्यानां कर्मणो. कृति" इति षष्ठी-प्रसङ्गात् तस्या प्रथमातोऽपि परत्वात् । कर्मादीना विभक्त्यर्थत्वपक्षे तु तदविकारो व्यर्थ एव । तदुक्त महाभाष्ये "कृत्यानां तु परत्वात्षष्ठी प्राप्नोति तत्प्रतिषेधार्थमनभिहिताधिकार कर्त्तव्य —कर्त्तव्य कट इति । सः कथ कर्त्तव्यो यत्नकरणादयो विभक्तयर्थाः । अथ हि कर्मादयो विभक्तयर्था नार्थोऽनभिहिताधिकारेण" इति ।

ननु "निङ्समानाधिकरणे प्रथमा" इति वार्तिकवचनात्प्रथमाया कर्मादौ शक्तिः । आख्यातादिना प्रातिपदिकसमानाधिकरणोक्तार्थे प्रथमेति तद-र्थात् । न च कर्त्तव्यो घट इत्यत्र परत्वात्कृद्योगलक्षणषष्ठीप्रसङ्ग, प्रकरणा-नेञ्योस्तप्रथमेति सूत्रणीयमित्याशयात् । अत एव प्रथमाया एव कारकवि-भक्तित्वात्तदन्तादेकशब्दाच्छस्प्रत्यये एकश इतिसूत्रस्य प्रयोग. ।

न च वस्तुगत्या कारकात् शसादिविधानमिति वाच्यम्, नटस्य श्वरण मानु म्वरणमित्यादौ "गतिकारकोपपदानाम्" इति नित्यसमासस्य गतिकार-कोपपदात् कृदिति प्रकृतिस्वरस्य चापत्तेरिति, तच्चिन्त्यम्, देवदत्तः पचतीत्यादौ पचादिसमानाधिकरणे देवदत्तादिशब्दे प्रथमेत्येव वार्तिकार्थात् । निङ्-र्थ एव कर्मादौ प्रथमेति व्याख्याने बीजाभावात् । तिङ्सामानाधिकरण्यस्य तत्प्र-तिपाद्यार्थप्रतिपादकत्वव्यस्य देवदत्तादिरूपनामन्येव सत्त्वात् । प्रतिपादन च तिङा कर्तृत्वादिसामान्यरूपेण नाम्ना च देवदत्तत्वादिविशेषरूपेणेति

विशेष । अत एव कैयट "प्रासाद आस्त इत्यादौ वैयधिकरण्यात्प्रथमाया अभाव" इति। आस्त इत्याख्यातोक्तकर्तृविशेषप्रतिपादकत्वविरहात् प्रासादशब्देन प्रथमेति तस्यार्थ । अपि च तिङ्समानाधिकरणे प्रथमेति न्यासारम्भे देवदत्त पच् लडिति स्थिते यावत्तिङुत्पत्तिर्नास्ति तावत्तिङ्समानाधिकरणत्वाभावेन प्रथमैवेति नियमस्याभावाद् देवदत्तशब्दादविशेषविहिता सर्वे स्वादय स्थिता इत्यप्रथमासामानाधिकरण्यसत्त्वाच्छतृशानचावेव स्याताम्। नचेष्टापत्ति, देवदत्त पचतीति वाक्यविलोपापत्ते । न च कर्मण्येव द्वितीयेत्यादिविभक्तिनियमाश्रयणान्न द्वितीयादिरपीति वाच्यम्, कर्मणि द्वितीयैवेत्यर्थनियमपक्षे तदापत्ते, शेषत्वेन षष्ठ्या सम्भवाच्च ।

न च तिङ्विधिसामर्थ्यात्तिबादयो भविष्यन्तीति वाच्यम्, लडादौ तिङ्विधे सावकाशात्। अत एव प्रथमाविधेरपि न सामर्थ्यम्, लङ्भिन्नलकारस्थल एव सावकाशत्वात्। न च प्रथमासामानाधिकरण्ये शतृशानचोर्निषिद्धत्वादत्र च तस्यापि सत्वान्न शतृशानचोरापत्तिरिति वाच्यम्, असमर्थसमासस्य वाक्यभेदस्य चाश्रये गौरवात्। विभक्तिनियमपक्ष प्रसज्यप्रतिषेध चाश्रित्य समाधानस्योक्तावप्युक्तरीत्या तिङ्समानाधिकरणे प्रथमेत्यस्य प्रत्याख्यान एव भाष्यतात्पर्यावधारणात् ।

यत्तु तथा सति "लट शतृशानचौ" इत्येतावतैव निर्वाहेऽप्रथमासमानाधिकरण इत्यस्य व्यर्थतापत्त्या तत्सामर्थ्येन प्रथमाया अपि लट्प्रयोगेऽनुमानात्तस्याश्च स्वप्रयोजकतिङ्सामानाधिकरण्य विनानुपपत्ते, तादृशस्थले तिबादयो भविष्यन्तीति, तत्तुच्छम्, तिङ्सामाधिकरण्यस्य प्रथमाप्रयोजकत्व एवोक्तदोषापन्यासे प्रथमान्यथानुपपत्त्या तिङुत्पत्तेर्दुर्वचत्वात्तदतिरिक्तस्यैव प्रथमाप्रयोजकस्य कल्पयितु युक्तत्वात् ।

यत्तु कर्त्तव्यो घट इत्यादौ परत्वात्षष्ठीप्रसङ्गमाशङ्क्योक्त प्रकरणान्तेऽन्योक्ते प्रथमेति सूत्रणीयमिति, तदपि चिन्त्यम्, तिङ्समानाधिकरणे प्रथमेति वचन यथास्थानमेव कृत्वा तद्वचन कार्यम्, उत तत्रैव ? नाद्य, वचनद्वयारम्भगौरवात्। नान्त्य, अभिहितानभिहिते प्रथमाभाव इत्यादिना प्रासाद आस्त इत्यत्र सदिति क्रियाद्वयसाधनाधिकरणशक्तिद्वयसमानाधिकरणशक्तिद्वयसद्भावादेकस्या शक्तेरभिहितत्वात्प्रथमा स्यादित्याकर एव तल्लक्षणस्य दूषितत्वात् ।

यत्तु कर्त्तव्यो घट इत्यादौ परत्वात्षष्ठीप्रसङ्गमाशङ्क्योक्त प्रकरणान्तेऽन्योक्ते प्रथमेति सूत्रणीयमिति, तदपि चिन्त्यम्, तिङ्समानाधिकरणे प्रथमेति वचन यथास्थानमेव कृत्वा तद्वचन कार्यम्, उत तत्रैव ? नाद्य, वचनद्वयारम्भगौरवात्। नान्त्य, अभिहितानभिहिते प्रथमाभाव इत्यादिना प्रासाद आस्त इत्यत्र सदिति क्रियाद्वयसाधनाधिकरणशक्तिद्वयसमानाधिकरणशक्तिद्वयसद्भावादेकस्या शक्तेरभिहितत्वात्प्रथमा स्यादित्याकर एव तल्लक्षणस्य दूषितत्वात् ।

यत्तु तिङ्निपाताभिहितकर्तृत्वकर्मत्वयोरेव प्रथमार्थत्वम्, प्रासाद इत्यत्र तु घञाधिकरणत्वाभिधानान्न तदापत्ति । एव पक्व भुक्तमित्यादावपीति

कैश्चिदुत्प्रेक्षितम्, तदसत्, चैत्र पाचको मुड्क्ते इत्यादौ कृत्प्रत्ययस्थले-ऽतिप्रसङ्गात्। न चानभिहित इत्यस्य स्वान्वयिभि कृदादिभिरनभिहित इत्यर्थकत्वादत्र च कृदादिना कर्तृत्वादेरभिधानान्न तृतीयाद्यापत्तिरिति-वाच्यम्, कर्मादीना विभक्त्यर्थत्वपक्षेऽनभिहिताधिकारप्रत्याख्यानात्तस्या-याश्च कृद्भिरभिधानात्। गोदोहनी स्थालीत्यादौ समभ्यनुत्पत्तेर्दुर्वारत्वा-च्चेति दिङ्मात्रम्।

'यत्तु एकश इत्यादि, तन्न, सर्व्यैकवचनाच्च वीप्सायामित्यनेनैव तन शस्प्रत्ययोत्पत्ते। अत एव वीप्साया प्रत्ययेनोक्तत्वात् तन द्विवचनाभाव। न च तनापि पूर्वसूनात्कारकादित्यनुवर्तते, अत एव द्व्योर्द्व्यो स्वामीत्यत्र-तदभाव इति वाच्यम्, एकश एकवचनादिसज्ञानि स्युरिति व्याख्यानादे-कैशशब्दार्थस्यारितक्रिया प्रति कर्तृत्वादेव तदुपपत्त्या कारकवाचिविभक्त्यन्त-त्वस्यानुपयुक्तत्वात्, यत्तिङु कर्तृत्वाद्या'श्रयत्प्रतिपाद्य तदर्थैकत्वस्यैवात्र पदार्थ-त्वात्, कर्त्रादिवाचकप्रत्ययान्तत्वस्य तत्त्वे पचतीत्यादावास्यातान्तेऽपि कारक-व्यवहारप्रसङ्गात्। न चेष्टापत्ति, "स्वतन्त्र कर्ता" इत्यादि विशेषलक्षणा-क्रान्तत्वेन तद्विशेषत्वाभावात्, व्याप्यधर्माभावे व्यापकधर्माभावस्याप्यार्थि-कत्वात् क्रियानिमित्तत्वाभावेन कारकशब्दस्य तत्रानन्वयात्। नापि कारका-धिकारविहितविभक्तिमत्त्वम्, तदप्रसिद्धे। किन्तु कारकाधिकारीयसज्ञानि-मित्तविभक्तिमत्त्वमेव कारकशब्दत्व तच्च प्रथमाया कर्तृवाचकत्व विनाप्यु-पपन्नमेवेति दिक्।

नटस्येत्यादिक तु सावद्यम्। न हि "गतिकारकोपपदानाम्" इति समासविधायक "कुगतिप्रादय" "कर्तृकरणे कृता बहुलम्" "उपपदमतिङ्" इत्यादेरेव तथात्वात्, किन्तु गत्यादीना सुबन्तादीना सुबुत्पत्ते पूर्वमेव कृदन्तेन सह समास इत्येव तस्यार्थ। तेन व्याघ्रीत्यत्र वि आघ्र इति अशब्दोत्तर विभक्तावनुत्पन्नायामेव सुबन्तयोगेति शब्दया समासे "जानेर-ङीविषयाद्" इति ङीप् सिद्ध, अन्यथा "स्वार्थद्रव्यलिङ्गसख्याकारकाणा समाहोध" इति प्रक्रियामाश्रित्य सुबुत्पत्ते पूर्वमेव स्त्रीत्वसामान्यप्रयुक्ते टापि कृते तदन्ताद् अशब्दात् सुपि तत। गतिसमासे च कृतेऽदन्तत्वाभावेन ङीप् न स्यात्। एवम् अश्वजीतीत्यत्राश्वशब्देन तृतीयान्तेन समासेऽपि क्रीतशब्दात्सुबनुत्पत्तावेव। अन्यथा तस्मात्पूर्वमेव क्रीतशब्दात्सुबुत्पत्तौ

१—१ नास्ति—क।

तत समासे "क्रीतात्करणपूर्वात्" इति ङीप् न स्यात्। एव कच्छपीत्यत्र तृतीयान्तस्य सप्तम्यन्तस्य वा कच्छशब्दस्य "सुपि स्थ" इति योगविभागेन विहितकप्रत्ययान्तस्थशब्देन समासे ततो 'जातेरिति विमू इद च अतिड' इत्यस्य 'कुगतिप्रादय" उपपदमित्युभयशेषत्वेन व्याख्यानाद्बहुलग्रहणाच्च सिद्धम्। प्रकृते तु मातु स्मरणमित्यत्र किं कृद्योगलक्षणषष्ठ्यन्तत्वेन समास आपद्यते उत शेषषष्ठ्यन्तत्वेन ? नाद्य, इष्टापत्ते। हरिस्मरणमित्यादौ सर्वसमतत्वात्। नान्त्य, 'प्रतिपदविधाना षष्ठी न समस्यते" इति वार्त्तिकात् शो विदर्थस्येत्यादिसूत्र्या शेषत्वेन विवक्षिते कर्मादौ सामान्यवचनादेव षष्ठीसिद्धौ समासनिवृत्ति[1]तात्पर्यकत्वाच्च। तदुक्त हरिणा—

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुन।
प्रोक्ता प्रतिपद षष्ठी समासस्य निवृत्तये॥

इति कर्मषष्ठ्या समासे कारकपूर्वपदत्वात्कृदुत्तरपदप्रकृतिस्वर। 'शेषषष्ठ्या समासे त्वन्तोदात्तत्वप्रतिपत्तिरिति च तत्र विशेष। एतेन गति कारकोपपदादिति स्वरापादानमपि परास्तम्[2]। शेषषष्ठ्या समासस्यैवात्राभावात्।

वस्तुत कारकत्वस्याकिञ्चित्करत्वात्समास एव तत्स्वरविधानात् "तत्पुरुषे शालाया नपुसकम्' इति सूत्रात्तत्पुरुषग्रहणस्य तत्रानुवृत्ते। कर्मषष्ठीसमासे तु तत्स्वरस्यैवेष्टत्वाद्। अपि च 'प्रातिपदिकान्यतिरिक्तविषयाणि प्राह प्रथमाशब्दितविभक्त्या भगवान् पाणिनिरत सकलतर्कसमुपन्नो वष्टिवाचोरन्यतिरिक्तविषयत्वम्।

एव तावदखण्डवस्तुविषये शब्दान्वयो दर्शित,
लोके दृष्टनयेन पाणिनिवचोऽप्यस्यैव ससूचकम्।
येनास्ति प्रकृत्यभिहिते वृत्तादिके केवले,
तन्मात्रे प्रथमेति सूत्रवचसैवाद्या विभक्ति विदु॥

अखण्डार्थवादे लिखद्भिरोपनिषदं प्रथमाया कारणवाचकत्वस्य सुतरामेव वक्तुमनर्हत्वादिति दिक्[1]।

इदञ्च वस्तुगतिमनुरुद्ध्योक्तम्। प्रथमाया कारकवाचित्वेऽपि तत्त्वमसीत्यत्र मध्यमपुरुषप्रयोगेण युष्मदर्थस्यैव तच्छब्दार्थविशेष्यत्वाद्विशेषणी-

---

१—१ नास्ति—क। २—२ नास्ति—ब।

भूतार्थपरत्वच्छन्दोत्तरप्रथमाया कर्तृवाचित्वे मान नास्त्येव। एतेन सख्यावाचकत्वमपि व्याख्यातम्। अतो विभक्तावेव लक्षणा युक्ता। यदपि प्रातिपदिकानेकत्व न स्वारस्ये तन्नम्, गभीराया नद्या घोष इत्यादौ तदनेकत्वेऽप्यस्वारस्यदर्शनात्तात्पर्यानुरोधस्यात्रापि तुल्यत्वादिति, तन, अत्र तात्पर्यग्राहकान्तराभावेन वंपम्याभावात् स्वस्यैव स्वतात्पर्यग्राहकत्वानुपपत्ते. उपक्रमादेरप्यन्वयैव व्याख्यातत्वात्, सर्वशब्देवकारानुरोधेन "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते" इति वाक्ये आकाशशब्दस्यैव गौणार्थकत्वमित्यस्योपनिषदैरेव स्वीकाराच्च। "रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति" इत्यत्र समाहारद्वन्द्वे पदद्वयस्यापि लाक्षणिकत्वापत्त्या पूर्वपदमात्रलाक्षणिकषष्ठीसमासस्यैवाश्रितत्वाच्च। "चरसमया सवनीया पुरोडाशा" इत्यत्र पुरोडाशशब्दलक्षितपुरोडाशकार्योद्देशेन मासविधि सवनीयपदं च सृष्टिन्यायेन सवनीयासवनीयपुरोडाशपरमनुवाद इति प्राप्ते पदद्वयस्यापि लाक्षणिकत्वापेक्षया सवनीयपदमुख्यार्थयागविशेषोद्देशेन तदीयघानादिहवि पञ्चकबाधेन मास विधीयते। पुरोडाशपद तु पुरोडाशधानादिहवि सम्बन्धित्वेन रूपेण सवनीयलक्षकमनुवाद इत्यभ्युपगमाच्च।

यदप्युक्त "प्रयाजशेषेण हवींष्यभिघारयति" इत्यत्र प्रयाजशेष हवि प्रक्षिपतीति तृतीयाया "सक्तून् जुहोति" इत्यादौ च सक्तुभिरिति द्वितीयाया अस्वारस्यमाश्रितम् तदगत्या। आद्ये, उपयुक्तसस्कारव्यतिरेकेण गत्यन्तराभावात्। शेषशब्दश्रवणेन प्रतिपत्तेरवकाङ्क्षितत्वात् प्रयाजशेषस्य प्रतिपत्तिरूपप्रयुक्तसस्कारो विवक्षित। हविषामुपयोद्यमाणसस्कारे त्वदृष्टकल्पनापत्तेर्विभक्तिलक्षणाया एवाश्रितत्वात्। सक्तूनाञ्च भूतभाव्युपयोगाभावेन सस्कार्यत्वयोगात्। तदुक्तम्—

भूतभाव्युपयोगे हि द्रव्य सस्कार्यमिष्यते।
सक्तवो नोपयाद्यन्ते नोपयुक्ताश्च ते क्वचित्॥ इति।

तदपि न, विभक्तिस्वारस्यावश्यकत्वे सस्कारविध्यन्यथानुपपत्त्या सक्तूनामुपयोग[1]कल्पनस्यापि सम्भवे तदभावात्। अथ विनियोगभङ्गे[2]नैवोपपत्तौ गौरवाद्विनियोगान्तर[3] न कल्प्यत इति चेत्, सत्यम्, इहापि विभक्तिलक्षणयैवोपपत्तौ नामद्वये लक्षणा न कल्पते, इत्यस्य तुल्यत्वात्। एतेन तस्य त्व तत्त्वमिति समस्त पदमिति पक्षमुद्भाव्य यदुक्तम्—असमासे-

---

१. विपरियोग°—क। २. विनियागनैवाप°—क। ३ उपयोगान्तर—ख।

नैव पप्वर्थलक्षणादिगौरवरहितेनोपपत्तौ षष्ठीसमासो न न्याय्योऽन्यथा स्थपत्यधिकरणविरोधादिति, तत् परास्तम्। लक्षणाद्वयकल्पने गौरवस्य प्रथमोपस्थितत्वेन तद्वैषम्यात्। अपूर्वविद्याकल्पनगौरवस्य तत्र पश्चादुत्थाने फलमुखत्वात्।

यत्तु प्रथमाविभक्त्योर्नामोत्तरस्थयोस्तदर्थाभेदबोधानुकूलत्वमेव स्वारस्यमिति, तन्न, पदोपात्तधर्मावच्छिन्नयोरभेदबोधानुकूलत्वस्यैवान्यत्र स्वारस्यत्वेन कल्पितत्वात् तस्य च तन्मतेऽप्यरक्षणात्।

यत्तु तात्पर्याद्धि वृत्तिरित्यस्य प्रकृतस्वमताभिप्रायेण व्याख्यातम्—तात्पर्यादुपक्रमोपसंहारादिनिर्णीतात्पर्यात् वृत्तेर्वृत्तिलाघवात्, उपक्रमादिबहूनामवाधाय (भैवयाय ?) वृत्तिलाघव त्यज्यतेऽन्ययार्थवादादावपि लक्षणा न स्यात्। उपक्रमोपसंहारादिप्रतीतैकवाक्यता त्यक्त्वार्थवादस्य नानापदमुख्यत्वायोपासीतेत्यादिपदाध्याहारापत्ते। अत एवोपक्रममात्रानुरोधेन ऋगादिपदे "उच्चै ऋचा क्रियते" इत्यादिविधिस्थलेऽपि लक्षणाश्रिता। यत्र तूपक्रमादिकमपि निर्णायक तत्र तात्पर्यनिर्णायकत्वेन वृत्तिलाघवमप्याद्रियते यथा निषादस्थपत्यधिकरणे इति, तदपि चिन्त्यम्, उपक्रमादीनां तादृशार्थपरत्वे बाधकतदभावाभ्यां वैषम्यात्, उपक्रमादेरद्वैतपरत्वस्यापि निराकृतत्वात्। 'एतदात्म्यमिद सर्वं तत्सत्य स आत्मा तत्त्वमसि" इत्युपसंहार, तस्यैव नवकृत्वोवचनमभ्यास इति परैरभ्युपगमात्। उपसंहारानुरोधेन तत्त्वमसीत्यत्राप्यभेदे तात्पर्यमित्युक्तेरसंगतत्वात्। एतेन "स आत्मा तत्त्वमसि" इत्यत्र तच्छब्दात् पूर्वमकारप्रश्लेषात्तद्भिन्नस्त्वमसीत्यादिकमपि व्याख्यातमिति दिक्।

अत एव स्पष्टमेवमुक्तौ जीवस्य परमात्मना सादृश्य श्रूयते—

"यदा पश्यति रुक्मवर्णं कर्तारमीदृशमभूत ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विहाय निरञ्जन परम साम्यमेति"॥ इति।

परमपदेन भेदगर्भसादृश्यस्यैवोक्तत्वात् भेदनिर्मुक्तसादृश्यस्य परमसादृश्यपदार्थत्वानुपपत्ते भेदाऽगर्भसादृश्यपरत्वभ्रमनिरासार्थतया च तदुपादानात्। अत एव भगवद्गीतायाम्—

बहवो ज्ञानतपसा पूता मद्भावमागता।
इद ज्ञानमुपाश्रित्य मम साधर्म्यमागता॥ इति।

तथा—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मान संसिद्धिं परमां गता॰ ॥

तथा—

भोक्तार यज्ञतपसा सर्व एव महेश्वरः।
सुहृद सर्वभूताना ज्ञात्वा मा शान्तिमृच्छति ॥

मद्भावपदस्य तादात्म्यपरत्वभ्रमनिरासार्थं साधर्म्यप्राप्तेः स्पष्टतयाभिहितत्वात्। एतेन मत्स्वरूपता प्राप्ता न तु समानधर्मताम्, पूर्वकालावच्छिन्नचेतनेश्वरयोर्भेदानभ्युपगमादिति निरस्तम्। अनभ्युपगमे बीजाभावात्।

"यो देवाना प्रत्यबुद्धयत स एव तदभवत्तथर्षीणा तथा मनुष्याणाम्" इति बृहदारण्यकश्रुतावपि तदभवदित्यस्य च्विप्रत्ययान्तत्वेन तद्भिन्नस्य तदभावप्राप्तेः सादृश्य एव पर्यवसानाच्च। न च शुक्लीभवति घट इत्यादौ समवायावच्छिन्नप्रतियोगिताकशुक्लाभाव पूर्वकालावच्छिन्नविशेषणतया धर्मितावच्छेदकीकृत्य समवायेन शुक्लत्वस्य विधेयत्वप्रतीत्या धर्मितावच्छेदकीभूताभावप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिमत्त्वबोधत्वस्य च्विप्रत्ययशक्तिज्ञानकार्यतावच्छेदकत्वकल्पनात्तादात्म्यावच्छिन्नप्रतियोगिताकाभावस्य भेदत्वेन ब्रह्मैवान्यधर्मितावच्छेदकतादात्म्यसंसर्गकब्रह्मप्रकारकबोध एव स्यादिति वाच्यम्, अत्यन्ताभावस्य धर्मितावच्छेदकत्व एव तथा बोधात्। भेदस्य तथात्वे तु तत्सादृश्यस्यैव विधेयत्वेनावगमात्।

"यत्रैकयालोकनलोकृतालीकण्ठे मृषा भीमभवीभवत्या।
तादृक्पथे दौहृदिकोपनीता शालीनमाधायि मधूकमाला" ॥

इत्यादौ तथैव बोधस्य सर्वानुभवसिद्धत्वात्। अलोकमुपापदे पुनस्तन भ्रमस्याहार्यत्वद्योतनार्थं' इत्यन्यदेतत्। तादृशभेदबोधस्य भ्रमत्वनियमाच्च। भेदप्रतियोगितायास्तादात्म्यावच्छिन्नत्वस्य नव्यैरनङ्गीकाराच्च। अथापि तदभवदिति पदद्वयमेवेत्याग्रहः, तर्हि पूर्वोक्तरीत्यैव तस्य साम्यपरत्वम्। एव "यथोदकं शुद्धे शुद्धमासिक्त तादृगेव भवति, एव मुनेर्विजानत आत्मा भवति" इति कठवल्लीवाक्येऽपि स्पष्टमेवायमर्थः। एतेन जलक्षिप्तजलदृष्टान्तेन ब्रह्मात्म्यैक्यज्ञानेनात्मनो ब्रह्मत्वोक्तिरिति परास्तम्। ईश्वरज्ञानेन जीवस्येश्वरसाम्यप्राप्तेरेव शब्दार्थत्वात्। एवं च—

"सद्यो ह वै तत्परम ब्रह्म वेद ब्रह्मैव भवति" इति मुण्डकोपनिषद्वाक्येऽपि ब्रह्मसादृश्यमेवार्थः। अभेदपरत्वे साम्यश्रुतीनां कथञ्चिदपि नेतुमशक्यत्वात्। तत्र सादृश्ये लक्षणाया आवश्यकत्वात्। वस्तुतः एवकारस्तत्रोपमार्थ एव। "एवौपम्येऽवधारणे" इति विश्वोक्तेः। एवञ्च स एव तदभवदित्यत्रापि भिन्नक्रमत्वेन तदेवाभवदित्यन्वयः। एवकारस्तु सादृश्यार्थ एव। ब्रह्मैव भवतीत्येकवाक्यतया तदेवेत्यन्वयस्य त्वयापि वाच्यत्वात्। यत्तु तद्व्याख्यातारः अन्येऽपि "यद्यपि ब्रह्मैव तथापि तेषामविद्याबलाज्ज्ञानवतश्चाविद्याया नाशितत्वात्। अतः स एव ज्ञानवानेव तद् ब्रह्म अभवत्स्पष्टम्। अभवदेवेति वा योजना" इति। तत्राद्ये एवकारवैयर्थ्यं ब्रह्मज्ञानवतो[1] ब्रह्मभावप्राप्तिरित्यस्यैव प्रकृतत्वात्। द्वितीये भिन्नक्रमत्वमेवेति स्पष्टम्। अस्मदुक्तान्वयेऽन्वयप्रतियोगिनोरव्यवहितोपस्थितत्वात्तदुक्तान्वये च तच्छब्देन व्यवहितत्वाच्च। यद्योगादिनैव व्याप्तिलाभादेवकारवैयर्थ्याच्चोक्तरीत्या आथर्वणश्रुत्येकवाक्यतया त्वस्यैव न्याय्यत्वात्। एवञ्च ब्रह्मविद् ब्रह्मैव भवतीति सिद्धवदर्थवादावगतस्य ब्रह्मभवनस्य नियोज्य विशेषाकाङ्क्षाया ब्रह्मवुभूषे[षा] नियोज्यविशेषस्य रात्रिसत्रन्यायेन प्रतिलम्भ इत्यादि वाचस्पत्योक्तं परास्तम्, ब्रह्मसादृश्यप्राप्तेरेवार्थवादार्थत्वात्[2]। अत एव मुण्डके एवं मन्त्रवर्णाः—

यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः परम सामेति॥ इति।

मन्त्रान्तरमपि—

समाने वृक्षे पुरुषो निमग्नोऽनीपया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥

"न कस्यचित्समर्थोऽह दीन इति सम्भावना अनीषा" इति कल्पतरुकृतः। शोचति जन्ममरणाद्यनेकविधक्लेशाननुभवति, जुष्टं श्रवणादिना सेवितं, अन्यं जीवाद्भिन्नम् ईश परमात्मानं यदा पश्यति तदा वीतशोकः सर्वदुःखहीनः सन् अस्य ईशस्य महिमानमिति प्राप्नोति। छान्दसत्वाद्गुणाभावः। स्वपितिवाक्ये स्वमप्येतिव्याख्यानस्य सर्वसम्मतत्वात्। तत्र गुणं कृत्वा छान्दसत्वात्पूर्वरूपकल्पनापेक्षया विनैव गुण तत्कल्पनौचित्यात्।

यत्तु जुष्टमनेकैर्योगमार्गैः सेवितमन्यं प्रपञ्चविलक्षणमीश यदा पश्यति प्रपञ्चमहिमान विभूति मायामयीमस्यैवेति यदा पश्यति तदा

---

१. ज्ञानभीवतो—ख। २. वाक्यार्थत्वात्—क।

वीतशोको भवतीति। यदापि देहेन्द्रियादिदुष्टं संसारिणं सेव्यमानमस्वेनान्यं महिमानमेनदविदुषानत्वेन एतत्सत्तया लब्धसत्ताकत्वादिदुक्तं पश्यति नित्यत्वादियुक्तं पश्यतीति यावत्। ईदृशत्वं च ततोऽन्यद्विलक्षणं सदन्वाद्युपलक्षितं पश्यति य स वीतशोक इत्यर्थं इति, तच्चिन्त्यम्, पश्यतावृत्तौ भवद्व्याहारे च गौरवात्। "अस्तिर्भवन्ती पर." इति कात्यायनोक्तं भवद्व्याहार औत्सर्गिक इति चेत्, तथापि श्रूयमाणनियासम्भवे तस्य जघन्यत्वात्। अन्यपदार्थेऽपि वैलक्षण्यं प्रपञ्चस्य प्रतियोगित्वेनान्वयानुपपत्तेश्च। महिमपदस्य तद्विशेषणतयापि कल्प्यत्वात्, पूर्वोपातपुरुषपदार्थजीवस्यैव तत्प्रतियोगित्वौचित्याच्च। भिन्नवाक्यस्थत्वस्यापि तुल्यत्वाज्जुष्टपदस्य महिमपदार्थविशेषणार्थकत्वे व्यवधानाच्च। 'तस्मादभेदो निर्मूल, मुक्तौ ब्रह्मभाव्यमेव जीवस्य प्रामाणिकम्। अथ तु विशेष मोक्षहेतुज्ञानविषयमात्मत्वं विभुत्वाविनाशित्वेनैव न त्वदेहभिन्नत्वादिधर्मेण तत्रैव नैयायिकानामेवदर्शनात्। फलीभूते तु शोकाभाववत्त्वेनेति सिद्धम्। तथा च श्रुत्यन्तराणि—"आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चन। अभयं वै जनक प्राप्तोऽसि तत्र को मोह क शोक एकत्वमनुपश्यत" इत्याद्यानि। न बिभेतीत्यत्र शोकमात्रस्य निषेध्यत्वात्, अनर्थमित्यनाप्यविषयीभावेन भयाभावस्य फलत्वेनाभिधानात्। तथाहि बृहदारण्यकेऽपि[1]—"अथेह जनको वैदेह कूर्चादुपावसर्पन्नुवाच नमस्ते याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राणमहान्तमध्वानमेष्यन् रथं वा नावं वा समादध्यादेतानेवमेवैतानभिसमन्वनिषद्भिः समाहितात्मास्येव वृन्दारक आदित्य सन्नयीतवेद उक्तोपनिषत्क इतो विमुच्यमान क्व गमिष्यसीति नाहं तद्भगवन् वेद यत्र गमिष्यामीति, अथ वै तेऽहं तद्ब्रवाणि यत्र गमिष्यसीति ब्रवीतु भगवान्" इति प्रकम्य मध्ये जीवब्रह्मात्मानौ प्रतिपाद्य "अभयं वै जनक प्राप्तोऽसि" इति श्रूयते। तत्रायमर्थः—जनकस्य मोक्षस्वरूपज्ञानं कर्तुं याज्ञवल्क्यस्य प्रश्न। इतो विमुच्यमान क्व गमिष्यसीति। सन्ति हि वादिनो विप्रतिपत्तय। केचिद् ब्रह्मस्वरूपेणावस्थान मोक्ष इति समाचक्षते, अपरे च दुःखध्वंसविशेष इत्यादि। तत्र जीवब्रह्मणोर्विभेदप्रतिपादनेनाद्यपक्षं निरस्य द्वितीयाभिप्रायेणानुमतिमाह—"अभयं वै जनकप्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहो नमस्ते याज्ञवल्क्याभयं त्वा गच्छताद्यो नो भगवानभयं वेदयस इमं विदेहा अयमहमस्मीति"।

१—१. नास्ति-क।

यत्तु व्याख्यातम् "अभयमविद्यातत्कार्यं गन्धरहित तदभावेनाप्यसंसृष्टम्" इत्यादि, तच्चिन्त्यम्, पदार्थत्वाभावादभयपदे बहुव्रीहौ गौरवाच्च, नपुंसकत्वानुपपत्तश्च। "स एष नेति नेत्यात्मा" इति पुंस्त्वेनैवात्मन प्रक्रान्तत्वात्। ब्रह्मादिविशेष्यवाचिपदकल्पने गौरवात्। नचाभय प्राप्तोऽसीत्यन प्रयमान्तत्वधौव्यात् समक्षीपदक्षिणाप्यत्र तुच्छेति मन्वान आत्मना सममन्यदपश्यन् गुरुणा दत्तमभयरूपमात्मान स्वय गुरुदक्षिणार्थं तमाशीर्वादेन गुरवे दत्तवानित्याहेति स्वयमेव व्याख्यानाच्च। अतोऽभय त्वा गच्छतादित्यनेव भयाभावपरत्वप्रत्याशापि निरस्ता। एकत्वमनुपश्यत इत्यत्रापि भेद पश्यत इत्येवार्थ।

"एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।
साधारणे समाने च सख्याया च प्रयुज्यते॥" इत्युक्ते।

अस्तु वा केषाञ्चिदर्थानामत्र शवयत्वाभावस्तथाप्यन्यार्थत्वमनपह्नवनीयमेव। "एणान्ता पट्" इति सूत्रे एकास्ता इत्यत्र "षड्भ्यो लुग्" इलस्य प्रवृत्तिमाशङ्क्य "तद्योऽन्यार्थे वर्तते तस्येदमिति" महाभाष्यदर्शनात्, "एके मुख्यान्यकेवला" इत्यमराच्च। तथा च भेदज्ञानहेतुको मोहशोकभाव इत्यर्थ। "यत्र सर्वाणि भूतानि आत्मैवाभूद्विजानत" इति पूर्वार्द्धेऽप्येवकार साम्यार्थ। नचाऽभूदित्येकत्वानुपपत्ति, त्वयापि छान्दसत्वस्यैव वाच्यत्वात्। भूतानामेककर्तृत्वस्य वाच्यत्वादन्ययान्न ह्येते सर्वं एक भवन्तीत्यादौ गत्यभावात्। मोक्षधर्मेऽपि—

तज्ज्ञात्वा कालविषयाद्विमुक्ता मोक्षमाश्रिता।
गुणेष्वेव प्रकाशन्तो निर्गुणत्वात्तत परम्॥

गुणेषु गुणमध्ये निर्गुणत्वात् विशेषगुणसामान्याभावात्। तेन घटसयोगादिगुणाना मुक्तात्मनि सत्त्वेऽपि न क्षति, परिमाणस्य विशेषगुणत्वाभावात्। इत्यास्ता पल्लव।

प्रकृतमनुसरम। मोक्षेऽपिजीवाना ब्रह्मभेद एव न तु तदैक्यमित्येवाभ्यासेन दर्शयति—यथासोम्येत्यादिना। नहि वृक्षरसानामेकत्र समाहारे तदवयवाना वस्तुतस्तादात्म्यमस्ति, किन्तु विविच्यज्ञानाभाव एव। अत एव ते यथा तत्र न विवेक लभन्ते इत्युक्तम्, विवेक न लभन्त इत्यस्य भेदनिषेधपरत्वभ्रमनिरासायाह—अमुष्येत्यादि। यद्यप्येतादृशज्ञानाभाव समाहारात्पूर्वमस्ति तेषामचेतनत्वात्, तथापि दार्ष्टान्तिकाना जीवाना वस्तुतो भिन्नानामपि मुक्तावस्थाया ज्ञानाभाव इति प्रतिपादनार्थं दृष्टान्तेऽपि ज्ञानमारोप्य तदभाव उक्त। यद्यप्यन्यविषयज्ञाननिषेधेनापि तत्सिद्धि, तथापि जीवपरयोर्भेदस्य वास्तवत्व-

सामाय निषेधप्रतियोगिभूतज्ञानविषयत्वेन भेदस्यैवोक्ति । सति ब्रह्मणि सम्पद्य साम्य प्राप्यैकीभावेऽपि सम्पद्यते शक्त्यभावात्, स्वमपीतो भवतीत्यस्य च व्याख्यातत्वात् । पर ज्योति स्वरूप सम्पद्य स्वेन रूपेणाभिनिष्पद्यत इत्यत्रापि ब्रह्मविषयकज्ञानस्यैवार्थत्वेनैक्यस्य तदर्थत्वाभावात् । जीवाना प्रथम नानाशरीरावच्छिन्नत्वेऽपि मुक्तौ तदभाव इत्याह-तदुहेति । प्रथममुक्त यद्यदेकशरीरावच्छिन्ना जीवास्ते तत्त्वज्ञाने सति तद्ब्रह्म श्राभवन्ति ईषत्तत्स्वरूपा भवन्ति, शोकाभावत्वेन ततोऽदृश्य न त्वत्यन्ताभेद इत्याकारस्यार्थ । "ईषदर्थे क्रियायोगे" इत्यादौ श्राङ ईषदर्थत्वप्रसिद्धे । एवमुक्तौ भेदमुक्त्वा पूर्वमुत्पत्तावपि भेद एवकारमात्रस्य ब्रह्मापेक्ष इत्याह-इमा सोम्येति । प्राक् प्रत्येकस्पन्दनेन भिन्नस्वभावत्वमुक्त दार्ष्टान्तिके भेदलाभार्थं समुद्रादागम्य समुद्रमेव प्राप्नुवन्ति । स इति । समुद्रलिङ्गोपादाने एवकार सादृश्यार्थं समुद्रपदस्य ततोऽदृशे लक्षणेति विधेयलिङ्गोपादानम् ।

ननु समुद्रप्राप्त्यनन्तर तासा परस्पर समुद्रेण वा सह भेदाभाव, तदाहता यथेति । भेदसत्त्व एव भेदेन विदुरिति स्पष्टोऽर्थ । जीवस्य स्वरूपपरित्यागाभाव दर्शयन्नेव जीवब्रह्मणोरभेद प्रत्याचष्टे—अस्य सोम्येति । पदार्थं स्पष्ट । वावेति निश्चये निपात जीवापेतमदृष्टविशेषघटितसम्बन्धहीनमिद शरीर म्रियते न तु जीवस्तस्य सर्वदैकरूपत्वात् । अतोऽविद्यानिवृत्यनन्तर ब्रह्मभाव इति न शङ्क्यमितिभाव । तत्त्वज्ञानात्पूर्वमीश्वरस्य लौकिकप्रत्यक्षाभाव इति दर्शयन्नेवेश्वरो निमित्तमेव कार्यजातस्य न तु समवायीत्यप्याह-न्यग्रोधफलमिति । अत वृक्षादाहर आनयेद भगव, इति श्वेतकेतोरुक्ति । इदमानीत भगवो भगवदित्यर्थं, 'मतुवसो रु सम्बुद्धौ छन्दसि" इति रुत्वम् । उत्तरत्राप्येव स्पष्टार्थम् । य वै सोम्यैतमणिमान परमाणु वृटिच न निभालयसे न चाक्षुषविषयक करोषि । एतस्येति परमाणुत्वेनैक्य, तया चैतत्समुदायेन द्वयणुकादिपरम्परया महतो न्यग्रोधस्यारम्भ, अतस्तेषामेव समवायित्व न त्वीश्वरस्य । तस्य तु निमित्तत्वमेव । न चात्राप्यणिमपदमीश्वरार्थम्, एतमणिमानमित्यनेन स्थूलावयवभङ्गोत्तरावस्थसूक्ष्मावयवस्यैव प्रक्रान्तत्वेन परामृष्टत्वात् । यत्तु न्यग्रोधमात्रस्येशजन्यत्वोक्तियंथा (?) श्रद्धत्स्वेत्यप्यसगतम्, तत्रासभावनाविरहात्, इति तन्न, उदाहरणमात्रत्वेन तदुक्तिसार्थक्यात् । दृष्यावयवान्यावयवसद्भावाभिप्रायेण च श्रद्धत्स्वेत्यस्योपपत्ते । यदपि यमणिमान निभालयसे । एषोऽणिमा एव न्यग्रोध दृश्यमानन्यग्रोधसदृशन्यग्रोधभिन्नस्तस्य धानारूपस्याणिम्नस्तिष्ठति तादृशाणिमनि तिष्ठति ।

ननु सूक्ष्मधानामध्ये महान्यग्रोधाभिन्नाणिमा कथ तिष्ठति ? तत्राह—श्रद्धत्स्वेति। सस्कारस्पाणिमावस्थाया मूढमायामपि धानाया स्थिति सम्भवतीति, तदपि न, अणिमपदस्य धानापरत्वे मानाभावात्। न निभालयस इत्युक्तिविरोधाच्च। किमत्र पश्यसीत्यादिना तस्याद्दश्यत्वोक्ते । एतत्पदस्य न्यग्रोधपरत्वे बाधकाभावात्। अणिम्न इति तत्सम्बन्धित्वेन तद्विशिष्टस्यैव निर्देशोचित्यात्। तादृशाणिमनीति विभक्तिव्यत्ययकल्पने च गौरवात्। सस्कारस्पावस्थाया इत्यादिवच्च तद्भेद तर्हि अव्याकृतमासीदिति बृहदारण्यकव्याख्याने निराकरिष्यम । एतेन—

'मृदादयो हि दृष्टान्ता प्रतिज्ञामनुरुन्धते ।
धानास्तामनुरुन्धाना भक्तिमार्गं प्रपेदिरे ॥"

एकविज्ञानात्सर्वविज्ञान प्रतिज्ञात प्रधानम्। तच्च सत्त्व परमाणूना वा कारणत्वेन विकल्प्येत, अतो न किंचनेत्यनभिव्यक्तिरणिम्न इति सूक्ष्मता चोक्तेति परास्तम्। प्रतिज्ञाया पूर्वभेदपरत्वेनैव नीतत्वात्, प्रथमाणिमपदेन ब्रह्मण परामर्शे च बाधकस्योक्तत्वात्। सत्यपि जीवब्रह्मणोर्भेदो मुक्तौ नोपलभ्यत इति सूचयन्नेव ससारिदशाया ब्रह्मणो दुर्ज्ञेयमित्यनान्य दृष्टान्तमाह—लवणमेतदिति। तदेव स्पष्टयति "अत्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति" स्पष्टमेतत्। अत एव स यथा सैन्धवखिल्य इत्यादि बृहदारण्यकेऽपि स्पष्ट एव तथार्थ इति पुरस्ताद् व्याख्येयम्। अत्यन्तापरिज्ञातस्यापि ज्ञानमुपायाद्भवत्येवेत्यभिसन्धायाह—यथा सोम्य पुरुष इति। अभिनहन तु अक्षिबन्धनम्। दृष्टान्तार्थं सङ्गमयति—एवमेवेहेति। आचार्यवत्त्व सम्बन्धविशेषेण तदुपदेशेन बोध्यम्। अत एव मातृमान् पितृमानाचार्यवानिति श्रुत्यादिति बृहदारण्यकवाक्ये मातृपित्राचार्यैरनुशिष्ट इति व्याख्यातम्। यावदित्यादिक तु व्याचक्ष्महे। अस्योत्पन्नतत्त्वज्ञानस्य तावदेव चिर विलम्बो यावदुत्पन्नेन भुज्यमानेन भोक्ष्यमाणेन वा कर्मणा न विमोक्ष्ये न विमोक्ष्यते, भोगेनेति शेष । न च तत्र मानाभाव, तत्त्वज्ञानिना हिरण्यगर्भमनूद्दालकप्रभृतीना चिरकालावस्थानश्रुतेरेव मानत्वात्। न च तत्त्वज्ञानात् भोग विनैव कर्मक्षय ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसशया ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥" इति श्रुते ।

यथैधासि समिद्धोऽग्निर्भस्मसात्कुरतेऽर्जुन ।
ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरते तथा ॥

इति स्मृतेश्चेति वाच्यम्, भोगद्वारापि कर्मक्षयोपपत्तौ "नामुक्त क्षीयते कर्म कल्पकोटिशतैरपि" इति स्मृतिसङ्कोचे मानाभावात्। बहूनामपि परस्परवैचित्र्यनाना भर्म्मीभावहेतुत्वाच्च। अथ कर्मभोगोत्तर कैवल्येन परममुक्त्या मम्वत्स्ये सम्पत्स्यते। तकारलोपस्योभयत्रापि छान्दसत्वात्, तादृशपुरुषव्यत्ययाद्वा।

न च तत्त्वज्ञान विनापि भागोदयाद्भोगस्य न तद्द्वारत्व युगपत्तानादेहसाध्यभोगस्य तद्द्वारत्वसम्भवात्। तस्य तत्त्वज्ञानव्यतिरेकेणानुदयादिति सम्प्रदाय। नव्यास्तु प्रारब्धानिरिक्तादृष्टस्य तत्त्वज्ञानान्नाश प्रकृते देहारम्भकस्य तु प्रारब्धस्य भोगादेव, तावत्तत्र तत्त्वज्ञानवृता चिरावस्थानोपपत्ते। अनुत्पन्नप्रयानाल्पापूर्वस्य तत्त्वज्ञाननाश्यताया अवश्यवाच्यतया प्रारब्धानिरिक्तादृष्टत्व तत्त्वज्ञाननाश्यतावच्छेदकम्, इति कल्पनस्यैव युक्तत्वादिति। तत्त्वज्ञान विनापि योगसामर्थ्यादेव कायारम्भसाध्यभोगोदयेन तस्यापि द्वारत्वासम्भवादिति।

न च तत्रापि सौभरिप्रभृतीना तत्त्वज्ञानमावश्यकमेवेति वाच्यम्, मानाभावात्। कायव्यूहस्य ग्राहकसयममध्ये पातञ्जलशास्त्रे परिगणितनया योगमात्रेण तत्सभवाच्च। किञ्च कल्पमन्वन्तरादिकमभाग्यदुःखसन्तानस्य कथमचिरात्कायव्यूहेनापि भाग स्यात्।

न च तावत्कालभाविदुःखसन्तानसममस्यदुःखजनकत्व तदर्थ, यथाश्रुतार्थत्यागे नाशस्यैव वक्तुमुचितत्वात्, तस्मान्न विमोक्षे प्रारब्धकर्मभिर्नविमोक्षो। तथा च व्याससूत्रं "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" भोगन त्वितरे क्षपयित्वा सम्पद्यत इति। तस्यात्मनोऽधिगमे ज्ञान उत्तरस्याश्लेषादृष्ट्याश्रयोऽनुत्पत्ति। पूर्वस्य विनाश तद्व्यपदेशात्, यथा पुष्करपलाश आपो न श्लिष्यन्ते इति। एवमेवविदि कर्म न श्लिष्यत इत्यश्लेषव्यपदेशात्, क्षीयन्ते चास्य कर्माणीति नाशव्यपदेशाच्च। इतरे प्रारब्धपापपुण्ये अनारब्धत्वज्ञानेन प्रारब्धान्यभवैकभोगाय प्रारब्धकर्मभोगपर्यन्त शरीरावस्थान सैव जीवन्मुक्ति तदुत्तर च परममुक्तिरित्याहु ॥

जीवस्य शरीराद्यधीनज्ञानकत्वात्तत्त्वज्ञानोत्तर च देहान्तराभावान तदा ज्ञानाद्युत्पत्तिरिति मनसि कृत्वा जीवनज्ञानयोरन्वयव्यतिरेकाभ्यां—पुरुष सोम्येति। उपतापिन रोगिण सन्निहितमृत्युमितियावत्, पदार्थ. प्राग्वत्॥

तत्त्वज्ञानान्मोक्षो मिथ्याज्ञानात्संसार इत्याह—पुरुष सोम्येति। हस्तगृहीत। स्व-चौरमीति गृहीतहस्तमभियुक्तमिति यावत्। तमपरशुदान तु दीव्यरोत्या

वाच्यम्। सत्येन तमपरशु गृह्णतो मोक्षवत् सत्यब्रह्मज्ञानान्मोक्ष उक्त" इति कल्पतरुकृत । अनृताभिमानत्वप्रयुक्तबद्धत्वसाधर्म्येण स्तेन संसारिणा सत्याभिमानत्वप्रयुक्तमुक्तिरूपसाधर्म्येणास्तेन ऐक्यज्ञानिना दृष्टान्त " इति चन्द्रिकाकृत । सत्यब्रह्मज्ञान त्वसम्मतअद्वैतविषयक नेत्येव विशेष इति दिक। तत्तस्मादस्योद्दालकस्योपदेशाद्विज्ञौ ब्रह्मज्ञानवान् श्वेतकेतु । अभ्यास प्रकरणसमाप्तिज्ञापक इति बोध्यम्। यत्र तत्त्वमसीति वाक्योपदेशादेव ब्रह्म साक्षात्कार इति वदन्ति तत्र वक्ष्याम ।

वेदविरुद्धयुक्तीनामर्के तर्ककुतूहले ।
वाक्यारम्भेण तत्त्वमस्यन्तश्रुतिरूपणम् ॥

— * —

पंचमोऽशः

बृहदारण्यके समामनन्ति—"तद्धेद तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिद रूपमिति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिद रूपमिति स एष इह प्रविष्ट । आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये त न पश्यन्त्यसृतत्वो हि स प्राणानेव प्राणो नाम भवति वदन् वाक् पश्यंश्चक्षुः शृण्वञ्छ्रोत्र मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न वेदासृतत्वो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एक भवन्ति । तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद । यथा ह वै पदेनानुविन्देदेव कीर्तिं श्लोकं विन्दते य एव वेद ॥ तदेतत्प्रेय पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतर यदयमात्मा । स योऽन्यमात्मनः प्रिय ब्रुवाणं ब्रूयात्प्रिय रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपास्तां स य आत्मानमेव प्रियमुपास्ते न ह्यस्य प्रिय प्रमायुक भवति ॥ तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद् ब्रह्मावेद्यस्मात्सर्वमभवदिति ॥ ब्रह्म वा इदमग्र आसीदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत्तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेव प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति । तदिदमप्येतर्हि य एव वेदाहं ब्रह्मास्मीति स इद सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशते । आत्मा ह्येषां स भवत्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेव स देवानां यथा ह वै बहव. पशवो मनुष्यं भुञ्ज्युरेवमेकैक पुरुषो देवान् भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रिय भवति किमु बहुषु तस्मादेषां तन्न प्रिय यदेतन्मनुष्या विद्यु" इति ।

अन्वायं—ह प्रसिद्ध नहि प्रलयकाले तदिद कार्यजातमव्याकृत प्रागभावप्रतियोग्यासीत् । तत्कालीनप्रागभावक इति यावत् । व्याकृतपदस्योत्पत्त्यर्थकत्वात्, कार्यत्वेन चोत्पत्तिलाभात् । उक्त च "सन्यङो" इति सूत्रे महाभाष्ये "कथातिरयमभूत्प्रभूत्प्रादुर्भवि दृष्ट" इति । वैयाकरणभूषणेऽपि—

इतोऽकर्मकापत्तेर्नहि यत्नोऽर्थ इष्यते ।
किन्त्वात्मनमेवातः कर्मवत्कुरुतेऽपि ।
कर्मकर्तृयत्नया तु न भवेत्तद्दृशैरिव ॥ इति ।

अन्वयार्थं —सकर्मकत्वानुरोधेन कृञ उत्पत्त्यर्थकत्वम्, अत एव क्रियते कट स्वयमेवेति कर्मकर्तरि यक्। यत्नमात्रार्थकत्वे तु दृश्यते घट स्वयमेवेति-वन्न स्यात्। यत्नस्य कर्मस्थत्वाभावाद्। दृशे सकर्मकत्वेन कर्मस्थफलवाचि-त्वेऽपि प्राप्ये कर्मणि कर्मवद्भावानङ्गीकारात्। तदुक्तम्—

निवर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणी*ति सिद्धान्तो हि व्यवस्थित ॥ इति।

प्राप्यत्वञ्च क्रियाकृतविशेषेणानुपलभ्यमानत्वम्। घट करोति सोम सुनोतीत्यादौ निवर्त्ये विकार्ये च कर्मणि तद्दर्शनेनाय घट केनचित्कृत, अय सोम केनचित्सस्कृत इति यथायथ ज्ञानात्। देवदत्तेन दृष्टे गते च ग्रामे दृष्टेऽप्यय ग्राम केनचिद् गतो दृष्टो वेति विज्ञानानुदयात्। तदुक्त वाक्यपदीये—

विशेषदर्शन यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषा शब्दैरेव प्रकल्पिता ॥ इति।

यत्र क्रियाकृतो विशेषो दृश्यते, यथा छिन्ने काष्ठादौ, तत्र कर्मस्था क्रिया, अन्यत्र तु कर्तृस्थैवेति भाव। तस्मात्कर्मस्थक्रियाणामेव कर्मवद्भाव इति।

ननु नैयायिकमते यत्न एव कृञर्थ, यत्नार्थकश्च करोतिना विवरणेना-ख्यातस्य यत्ने शक्तिस्वीकारात्।

भावनैव हि यत्नात्मा सर्वाख्यातस्य गोचर।
तया विवरणधौव्यादाक्षेपानुपपत्तित ॥

इति कुसुमाञ्जल्यादौ दर्शनादिति चेत्, किं तत, प्रमाणमत्त्वे उत्पत्तावपि शक्तिस्वीकारे बाधकाभावात्। अत एव रत्नकोशकृद्भिरुत्प-त्तिरेवाख्यातकृत्योऽर्थ उक्त। आख्यातस्थले तु शक्यतावच्छेदकलाघवेन यत्नवाचित्व स्वीकृतमिति वैषम्यमित्यास्तामप्रासङ्गिकम्। तनामरूपाभ्या-मेव व्याक्रियत उदपाद्यत शब्दविशेषवाच्यत्वमभ्यानविशेषादिविशिष्टत्वेन परस्परव्यावृत्तत्वेनोपपाद्यतेति यावत्। तदेव स्पष्टयति—अमौ नामायमिद रूप-मिति। इदरूपपद समस्तमिति विशेष। तद्विदमित्यादि स्पष्टम्।

यत्तु तत्सत्त्वेनासत्त्वेन स दृष्टत्वेन च निर्देक्ष्यमादसगात्मनोऽ-द्वितीयाद्वैतेन चानिर्वाच्य ह प्रसिद्ध शुक्तिरजतायुपादानत्वेन लोकेऽस्मिन्न-ज्ञात हिरण्यगर्भस्य विराट् पटस्यचित्रम्। व्याकृतनामरूप नामरूपकर्मा-

१. अपि—ख। * एतावदेव एशियाटिक-सोसाइटीस्थो ग्रन्थ, ख सज्ञया यो-ऽस्माभिर्टिप्पण्या व्यवहृत।

त्मक निखिल जगत् तर्हि शून्यभूतहिरण्यगर्भमृत्यूलते प्राक्काले ऽव्याकृत स हिरण्यगर्भविराट् स्पष्टनामोपलक्षितमनादीद जायमान जीवमज्ञान वटबीजोपम चिदेकरसाभिज्ञात्मनि वर्तमानमात्मविषयमहमश इति प्रत्येक प्राणिभिरनुभूयमानमासीत्। स्पष्ट तत्। आत्मस्थमज्ञान करणरूप हिरण्यगर्भादिकार्य्यतिमना नामरूपाभ्या [आ] ह्यादिनाम्ना ज्ञानक्रिया-शक्त्यादिरूपण च वर्णित तेन निखिल जगदनुपमृद्य भागवस्य स्वजि सर्पवत्। अव्याकृतबीजावस्थो वट इव नामरूपात्मना व्याक्रियते तथैवमुभयत्र सम्बध्यते तदेव नामरूपाभ्यामेव न त्वन्यथा व्याक्रियत विविध नाना नामरूपात्मना समतादक्रियत, इत्यादि, तच्चिन्त्यम्, स्वकल्पितपदार्थमूलकत्वेन श्रौतशब्दानूह्यत्वात्। अव्याकृतपदस्य जन्यजातसूक्ष्मावस्थारूपज्ञानपरत्वस्य क्वचिदप्यकल्पत्वात्, उपसर्गप्रकृत्यर्थत्वाभावाच्च।

ननु कार्यस्य स्थूलावस्था सूक्ष्मावस्था चावश्यमङ्गीकार्या। तत्राद्या मुद्गरपातादिना द्वितीया त्वात्मतत्त्वज्ञानेनैव निवर्तत इति चेत्, अत्र वदाम।

ननु पूर्वघटादै सूक्ष्मादवस्थानङ्गीकारे तस्यासीदिति कर्तृत्वानुपपत्ति। एव 'भूतग्राम स एवाय भूत्वा भूत्वा विलीयते" इत्यादि स्मृतावपीति चेत्, अत्रोच्यते शब्दप्रयोगस्य प्रयोजना तस्य बुद्धिस्थीकृतत्वेनैवोपपत्ते। अङ्कुरो जायत इत्यादौ तथैव शास्त्रादिके समर्थितत्वात्, कारणत्वस्य च स्वस्य स्व प्रत्यनङ्गीकारात्। किञ्च त्वन्मतेऽपि पूर्वं घटो नासीदित्यत्र घटपद न सूक्ष्मावस्थापर व्याघातात्। न स्थूलावस्थापर व्याघातादेव। पूर्वं तदनस्त्वस्य त्वयाभ्युपगमात्। न चैकरूपेण पूर्वसत्त्वमन्येन चासत्त्वमेकस्यैवास्ति, तावतैव त्वत्तो विशेष, त्वया सर्वमिनैव पूर्वमसत्त्वाङ्गीकारादिति वाच्यम्, अप्रयोजकत्वात्। कर्तृत्वस्य पूर्वमिथैव रूपे विश्रामात्। रूपान्तरेण पूर्वसत्त्वाङ्गीकारस्य पाटच्चरपरिलुण्ठितेऽपि वेश्मनि यामिकजागरणवृत्तान्तानुहारित्वात्। सूक्ष्मरूपावच्छिन्नस्य कर्तृत्वे विलीयत इत्यसामन्जस्यापत्ते। सूक्ष्मरूपेण घटस्य ब्रह्मसाक्षात्कारात्पूर्वं त्वया विनाशानङ्गीकारात्। "रात्र्यागमेऽवश पार्थ प्रभवत्यहरागमे" इत्युत्तरार्धे उत्पत्त्यभिधानविरोधाच्च। अविद्यारूपपूर्वावस्थाया अनादित्वन्तु न एवायमित्यत्र तु तज्जातीय इत्येवार्थं। त्वन्मतेऽप्युत्पत्तिविनयप्रतियोगिन्या स्थूलावस्थाया भेदेन तथैव वाच्यत्वात्। अत एव भारतादा—

यथर्तष्वृतुलिङ्गानि नानारूपाणि पर्यये।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥

इति दृष्टान्तेन तथैव स्पष्टीकृतम्।

किञ्च घटो भविष्यतीत्यत्र घटस्य स्थूलावस्था प्रति सूक्ष्मरूपेण कर्तृत्वस्वीकारेऽपि ब्रह्मज्ञानानन्तरमविद्यामहत्कार्येण न भविष्यतीत्यनाविद्यायास्तत्कार्याणाञ्च कथ कर्तृत्वनिर्वाह । तदुत्तर त्वया घटादे सूक्ष्मावस्थाया अप्यनङ्गीकारात्तादृशरीत्यैव पूर्वमप्यासक्तमानीदित्यादावपि निर्वाहो युक्त इति । तिष्ठतु तावत् ।

मृष्टे जावभोगार्थं तत्र वदन्नेव शरीरमधिकृत्याह—स एष इति । जीव इह शरीरे प्रविष्ट, व्यापकत्वेऽप्यदृष्टविशेषघटितसम्बन्धस्य तत्रैव सत्त्वात् । आनखाग्रेभ्य इति। मर्यादायामाङ्, तेषा शरीरबहिर्भावात्तस्य त्वगवसानात्। तथापि दुर्ज्ञेय इत्याह—यथा क्षुर इति । "क्षुराधान" इत्यधिकरणे ल्युट्, पुरुषकृत्यनवीनमपि स्थल दृष्टान्तयति—विश्वम्भरो वेति। विश्वस्याशनपानादिना भरणादग्नि कुण्डाये तृणारणिमण्यादाविति लोकदृष्टा दृष्टान्त ।

ननु सर्वोऽप्यात्मान जानात्यहमस्मीति तत्कथमुक्त तन पश्यन्तीत्यत आह—अदृष्ट्या हि स इति । हि यत स उक्तज्ञानविषयीभूत, अदृष्टत्वेमिथ्याज्ञानोच्छेदशक्तिहीन देहाद्यतिरिक्तत्वेन तज्ज्ञानस्यात्मानवगाहित्वात् । अत एव बोद्धाधिकारे "नैसर्गिकमात्मज्ञानमतत्त्वज्ञानमेव" इति ।

स्वयमिन्द्रियादीनामात्मत्वाभावमाह—प्राणनेवेति । प्राणव्यापार कुर्वनेव प्राणो भवति प्राण एवात्मेति मन्दैर्गृह्यत । तथा च वेशेषिकसूत्रं "प्राणापाननिमेषोन्मेषे" इत्यादि प्रकम्य "आत्मनो लिङ्गम्" इति प्रयोगस्तु शरीरे विकृता वायुर्भोक्तृप्रयत्नवत्प्रेरित, अमति पमूर्च्छने विकृतक्रियवायुत्वात्, भस्त्रावायुवत्, वायोस्तिर्यग्गतेरेव स्वाभाविकत्वेन ऊर्ध्वागतेर्विकृतित्वम्। एवमुत्तरत्राप्यूह्यम्। अस्यात्मनो यानि कर्माणि तदर्थानान्यतानि नामानि न त्वेतदर्थानामात्मत्वम्। स य कश्चिन्न प्राणादीना मध्ये एकैकमात्मत्वेनोपास्ने, स न वेद प्रमात्मकज्ञानविरहात् ज्ञानाभावोक्ति । अस्य ज्ञान नास्ती यादौ तथैव स्वीकारात्। ।

अदृश्त्मा ह्येष इत्युक्तार्थं । यद्वा एष प्राणादिरदृश्त्मन भूतत्वेन ज्ञानवदात्मकायसाधनागमयं वागादिराहित्येऽपि ज्ञानोदयाच्च । एव क्षुराद्येकैकेन्द्रियाभावेऽपि यथासम्भव योज्य तदाह—अत एकैकेन भवति इति। अदृश्त्मो भवतीत्यन्वय । कीदृश तत्त्वज्ञान मुक्तिहेतुरत आह—आमेयेवो-

पासीतेति। एवकारेण प्राणाद्यभेदेन ज्ञानस्य व्यावृत्ते। अत्र ह्यात्मन्येते सर्वे प्राणादय एक भवन्ति। स्वस्वव्यापारेण तद्गुणज्ञानाद्युत्पत्तावुपयुज्यन्ते। यद्वा अनात्मनि सर्व एते प्राणादय एक भवन्ति, आत्मनिष्ठतादात्म्यप्रतियोगित्वेन ज्ञायन्ते। तथा चात्मान्यतरौपाधिकमेकत्वमितिभाव। अतस्ते आत्मत्वेन नोपास्या।

यत्त्वात्मैवेत्येवमात्मस्वरूपमात्रमेव श्रवणादिसाक्षात्कारपर्यन्तायामुपासनाया सत्या सर्वे पृथिव्याद्यर्था एक केवल स्वकालपूर्वकालवर्ति यत् ज्ञातात्मस्वरूप तदात्मका भवन्ति। चरमज्ञानविषयत्वविशिष्टात्मनो दृश्यकालपूर्ववर्त्यन्यत्वादिति। तच्चिन्त्यम्, तादृशव्युत्पत्तेरसिद्धत्वात्। एतेन सर्व इत्यनेन प्रकृतपरामर्शेऽपि प्रपञ्चमानस्य परामर्शानम्भवात्, नामरूपापेक्षया प्राणादीनामेव सन्निहितत्वाच्च। ज्ञानाकारपरामर्शकेतिशब्दोत्तरवर्तिनैवकारेणात्मत्वान्वयप्रकारकत्वस्यैव ज्ञान व्यवच्छेद्तु शक्यतया आत्मभिन्नस्य व्यवच्छेदबाधासम्भवाच्च। घट इत्यत्र ज्ञानमित्यादौ तथैव व्युत्पत्ते। घट एवेत्यस्य ज्ञानमित्यादौ त्वघटान्यव्यवच्छेदबोधस्य प्रतीतावपि ज्ञानविशेषणतयैव घटान्यव्यवच्छेदस्य भासमानतया घटान्यस्य मिथ्यात्वप्रत्ययाभावाच्च। ज्ञानावच्छेदकतया प्रत्ययस्य सत्तानिश्चयानात्मकत्वात्। अत्र भिन्नक्रमत्वकल्पनयापि न निस्तार., मुक्तिहेतुज्ञानस्यात्मान्यविषयकत्वप्रतिपादनमात्रे तात्पर्येणात्मान्यस्यासत्त्व तात्पर्यविरहात्। साक्षाभावाद्बाधकसद्भावाच्च, शब्दमर्यादयापि तत्प्रत्ययाभावाच्च, इतिदिक्। अपि च हिशब्दापवन्यादेक भवन्तीत्यस्य मानान्तरसिद्धार्थानुवादकत्वान्नाद्वैते प्रामाण्यम्। अत एवोक्त भट्टैः "अनुवादश्च यथा विज्ञातस्य भवति, अत. शब्देनैवाभ्यनुज्ञात यादृश वयमत्र कारणत्व नूर्ये पश्यामस्तादृशमिद तद्भवीत्यंत इति" इति। अतश्च स्वकालत्वाद्यर्थकल्पन न युक्तम्। न च निश्चयार्थमेवाय हि-शब्द इति वाच्यम्, हत्वर्थत्वाभावे नियामकाभावात्। तथापि भवदिष्टासिद्धेश्च।

वस्तुतस्त्वात्मसाक्षात्कारे सति सर्व एवेति त जीवा एक केवल विशेषगुणरहित मथा स्यात्तथा भवन्ति विद्यन्ते। एतेन—

गता कला. पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति॥

इति आथर्वणश्रुतिरपि व्याख्याता।

न च विशेषगुणव्यावृत्तेरेकपदतात्पर्यविषयत्वे प्रमाणाभाव.: "दुःखेनान [तो] विमुक्तश्चरति शरीरं वा वसन्तं प्रियाप्रिये न स्पृशत:" इत्याद्यनेकप्रमाणाना सत्त्वात्। त्वदुक्तार्थे च तदभावात्। तदर्थकत्वाभिमत-श्रुत्यन्तरादावप्यर्थस्यान्यथैव वाच्यत्वात्। दुख:निवृत्तेश्च मोक्षे सर्ववादिसम्म-तत्वात्। तदुक्तमाचार्यै —

"न हि मुक्तस्य दु:ख प्रत्यापद्यत इति कश्चिदुपैति" इति। दु:खादय: साख्यमते प्रकृते: वेदान्तिमते चान्त:करणस्य धर्मा., इत्यन्यदेतत्। यद्वा आथर्वणश्रुतौ परोऽव्यय. इति परमात्मनोऽपि निर्देशात्। एकपदस्य सदृश एवार्थ परमात्मसदृशो भवन्तीत्यर्थ.। दु खाभाववत्त्वेन च परमात्मसादृश्यं पूर्वमसिद्धमेव तत्त्वज्ञानोत्तर भवतीति च्विप्रत्ययसङ्गति:। एवञ्च तदेक-वाक्यतया एक भवन्तीत्यत्रापि तथैवार्थ.। क्रियाविशेषणत्व परमत्र विशेष:, तादात्म्यप्रतियोगित्वेन परमात्मना परैरप्येकत्वान्वयस्य वाच्यत्वात्।

यत्तु तेनैकदिगित्यादावेकशब्दस्य सदृशे न शक्ति, अमरादावनुक्तत्वात्, किन्तु लक्षणेति, तन्न, सर्वनामसज्ञासूत्रस्य कौस्तुभादिविरोधात्। अमरस्य प्रदर्शनमात्रपरत्वाच्च। अन्यथा सख्यायामप्येकशब्दस्य शक्त्यनापत्ते:। न चेष्टापत्ति:, पट्सज्ञासूत्रीयमहाभाष्यविरोधात्। न च केवलपदेन तत्संग्रह:, अन्यत्र पृथगेव तदर्थोल्लेखात्, परोक्तार्थरूपकैवल्येऽपि शक्त्यभावाच्च। नहि भूतले केवल देवदत्त इत्यादौ देवदत्तभिन्नत्वावच्छिन्नव्यवच्छेदप्रतीति:। भूतलत्वद्रव्यत्वतद्रूपादीना सत्त्वात्। तन्न सकोचकप्रमाणमस्ति, न त्वत्रेति चेन्न, प्रत्यक्षादे यहुश प्रमाणस्य दर्शितत्वात्। प्रत्युत भवदुक्तार्थ एव कुत्रचित्प्रयोगविरहात्। यद्वा, एक केवलत्व भवन्ति लभन्ते। भूप्राप्तावात्मने-पदीति पाठात्। णिजभावपक्षेऽप्यात्मनेपदविकल्पस्य सर्वसम्मतत्वात्। अर्थ: प्राग्वत्। न च धर्ममात्रपरत्वे लक्षणादोष. परोक्तलक्षणापेक्षयाम्यर्हित-त्वादित्यास्ता विस्तर:।

नदेतदात्मतत्त्व सर्वम्यापादनीयं ज्ञातुमर्हम्। "गत्यर्था धातवो ये ये ज्ञानार्थास्तेऽपि कीर्तिता" इति न्यायात्। तेन सर्वस्येति नासङ्गतम्। फलोपधानस्य विशिष्टशरीरपरिग्रहसाध्यत्वेऽपि योग्यतायाः कीटादावप्यन-पायात्। अनेन हि परमार्थतो ज्ञातेनेतरसर्वं प्राणादिक वेद यत् तद्व्यापार-हेतुतयादृष्टद्वारा जन्यतया वेतिभाव:। अत एवाह—यया इदं पदेनानु-विन्देतेति। पदेन दृष्टेन यया तत्सम्बन्धी गवादिरनुमीयते स्मर्यते वा

तद्विज्ञानेन कारणानुमानम् प्राणस्येत्यादिवाक्ये व्याख्यानार्थम्य निगमनत्वं-तत्। अत एव नादारभ्यशङ्कापि निरस्ता।

यत्तु कारणज्ञानेन तत्कार्यज्ञानं प्रसिद्धं तत्परित्यज्य प्रौढिमाश्रित्य दृष्टान्तमाह—यथेति। पदेन मार्गेण गवादे प्रतिबिम्बितेन सूत्रेण गवादिपदार्थं नयतु खुरादिसन्निधिमनुगच्छन् प्राप्तयर्थमनुविन्देत्प्राप्नुयात् इत्यादि, तद्विचारयन्, स्वकल्पितस्य वास्तवत्वे क्षौनस्य चार्थस्य प्रौढित्वे प्रमाणाभावात्। गुणकथनमाह—कीर्तिं श्लोकं विन्दते य एवं वेदेति। कीर्तिं ख्यातिं श्लोकं श्रुतियोगं इति व्याख्यातार।

ननु मोक्षे प्रवर्तितं युष्मा दुःखवन्मुक्तस्याप्युच्छेदादित आह—तदेतदिति। वक्ष्यमाणमैत्रेयीब्राह्मणवाक्यवद्व्याख्या। तदेव द्रढयति—स योऽन्यमिति। यो विरक्तो रागी आत्मनो व्यतिरिक्तं प्रियं इति ब्रुवाणं वादिनमन्यं वा क्रूयात्कथयेत्, किं कथयेत्प्रियमिष्टं वस्तु रोत्स्यति नङ्क्ष्यति तवेति शेषः। वाक्यमात्रं व्यावर्तयति—तथैव स्यात् श्लोपहितमेव तद्वाक्यं स्यात्। तस्मादात्मनित्यत्वं प्रियत्वं स्वप्नेऽपि नाशङ्क्येत्। तस्मादात्मानमेव प्रियमुपासीत। तस्य फलमाह—न ह्यस्येति। प्रमायुक्तं नश्वरं वित्तादिरूपस्य प्रियस्य नश्वरत्वाच्चिदात्मरूपस्य च प्रियत्वानुच्छेदादिति भावः। जीवस्यैव ब्रह्मत्वाविर्भावो मोक्ष इति मतं प्रत्याह—तदाहुरिति। ब्रह्मविद्यया वस्तुतात्त्वारेण सर्वं भविष्यन्तं सर्वाभिन्नब्रह्मतादात्म्यं प्राप्स्याम इति मन्यमाना मनुष्या अद्वैतवादिनो मन्यन्ते मनन कुर्वन्ति श्रवणादिव्यावर्तनयोर्युक्तलक्षणम्। यदिति तन्मतानुवादः। द्रढयति—किमु तद्ब्रह्मवित्। किमु इत्याक्षेपे, वेदिता ब्रह्म जानातीत्, विज्ञाने दृष्टादि गम्यमिष्टम्य तद्धि रूपम्। यस्माद् ब्रह्मज्ञानात्तत्सर्वं सर्वाभिन्नब्रह्मात्मकमनवत्। पूर्वोक्तरीत्या श्रवणादौ प्रवृत्तस्य यत्सर्वाभिन्नब्रह्मतादात्म्यप्राप्तिरिति मन्यन्ते तेषां नैव ब्रह्म वेदितृ-द्वैतस्याप्रामाणिकत्वात् ब्रह्मज्ञानमेव तेषां नास्ति। अद्वैताश्रयविषयकत्वेन विशिष्टज्ञानस्य ब्रह्मत्वादिति वाक्यार्थस्याहुरित्यनेन वर्मयन्। आधुनिकाचार्यशालिनो वृद्धा इति भावः। तर्हि का गतिर्ब्रह्मवेद सर्वमित्यादिवाक्यमामत आह—ब्रह्म वा, इति। अग्रे सृष्टिप्रकरणे ब्रह्म आसीत्स्वत्। तद् ब्रह्म आत्मानमेवावेत् व्यजानात् सृष्टिकर्तृत्वेनेति भावः। तदेव दर्शयति ब्रह्मस्वरूपमाह—अहं ब्रह्मास्मीति। बृहति प्रजा वर्द्धयतीति व्युत्पत्तेः, तस्मात्सर्वकर्तृत्वात्तद् ब्रह्म सर्वात्मतात्पर्यादित्यर्थः। अत एव भारतम्—

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययौ ।
सर्वस्य च सदा ज्ञानात्सर्वमेव प्रचक्षते ॥ इति ।

एतद्व्याख्यानञ्च मैत्रेयीब्राह्मणव्याख्याया पल्लवयिष्याम । एवमुक्तम्यापि ब्रह्मसादृश्यमेव न तु ब्रह्मभेदद्वारक सर्वतादात्म्यमिति स्पष्टयति-तद्यो देवानामिति । व्याख्यातमेतत् । न केवल देवानामेव ब्रह्मज्ञानाधिकारोऽपि त्वन्येषामपीत्याह--तथर्षीणा तथा मनुष्याणामिति । तेषा मध्ये यो ब्रह्मसाक्षात्कारवान् स एव ब्रह्मसादृश्य प्राप्नवानित्यर्थ । तथर्षीणामित्यश विशिष्य दर्शयति--तद्धैतदिति । ह प्रसिद्ध तदेतदुक्त ब्रह्म पश्यन् साक्षात्कुर्वन् वामदेवनामा ऋषि प्रतिपेदे प्रतिपन्न । प्रतिपत्तिस्वरूपमाह--अह मनुरभव सूर्यश्चेति । यथा मनुसूर्यौ ब्रह्मसाक्षात्कारवन्तौ तथाहमपि । उक्तञ्च भगवद्गीतायाम्--

इम विवस्वत योग प्रोक्तवानहमव्ययम् ।
विवस्वान् प्राह मनवे मनुरिक्ष्वाकवेऽब्रवीत् ॥ इत्यादि ।

परमतेऽपि वामदेवस्यात्मनि ब्रह्माभेदमभिप्रत्यैव स्वस्य मनुनादात्म्योक्तिरिति वाच्यत्वात्, "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति सूत्रे तथैव दर्शनाच्च । अभवदित्युपलक्षण भवति । भविष्यन्ति चेत्याह--तदिदमिति । अपिशब्दो भिन्नक्रम । 'एतर्हि सम्प्रतीदानीम्" इत्यमरः । अह ब्रह्मास्मीत्येव या वद जानाति स इद सर्व पूर्वोक्त भवति, ब्रह्मसदृशो भवतीति यावत् । अपुनरावृत्तिमाह--तस्य हति । देवाश्चन देवा अपि तस्य मुक्तस्याभूत्यै उक्तब्रह्मीभावस्य व्यावृत्तये न ईश्वरा तेन समर्था भवन्ति । कुत इत्यत आह-हि यत तेषा देवाना आत्मा भवतीति हेत्वर्थवाद । देवास्तर्हि कुत विघ्न कुर्वन्ति इत्यत आह-अथ योऽन्यामिति । यो ब्रह्माभिन्नामिन्द्रादिदेवतामुपास्ते स न वेद स न जानाति । यागादिप्रवृत्तिर्धर्मपरत्वेन समीचीनज्ञानाभावात् । यद्यप्यहमित्यात्मान जानाति तथापि तावन्मात्र पशुसाधारणमित्यत आह-यथा पशुरिति । अन्योऽसावन्योऽहमिति ज्ञानस्य पशावपि सत्त्वादहमिति ज्ञानमात्रेण न निस्तार । असावित्यत्र यत्किञ्चिद्देवपरत्व न तु देवतापरत्वमेव । अन्यदिति पुलिङ्गानन्वयापत्ते । अत्र भेदज्ञाननिन्दाया न तात्पर्य किन्त्वहमिति ज्ञानस्य पशुसाधारण्यदर्शन एव । न हि त्वन्मतेऽपि यत्किञ्चिद्भेदज्ञान निन्द्य किन्तु जीवब्रह्मभेदज्ञानमेव । नचात्र तल्लभ्यम्, एवमेव सोऽनात्मन्न पुरुषा देवाना पशु यज्ञादिद्वारा तत्तृप्तिहेतुत्वात् । पशुत्वमुपपादयति-यथेति । बहवो गवाद्या पशवो यथा मनुष्य भुञ्जयुर्दुग्धादिना पालयेयु, एवमेक पुरुषा

देवान् भुनक्ति यागादिना तर्पयति । अतो मुक्तिप्रवृत्तस्य देवा विघ्न कुर्वन्ती-त्यत आह—एकस्मिन्नेवेति । एवकारोऽप्यर्थे । पशावादीयमाने चौरादिभि-र्गृह्यमाणेऽप्रिय भवति पशुस्वामिन बहुषु तु ह्रियमाणेषु किमु वक्तव्यम् । एव देवपशौ मनुष्येऽपि मुच्यमाने देवाना सस्कृतोपकारग्रहाने । तस्मान्मनुष्या एतदात्मनत्व ज्ञिघृक्षति यतो देवाना प्रिय न भवति । अतस्तान प्रतिबन्धे प्रवर्तते । तथा च भाल्लविब्राह्मणे श्रूयते—

मुक्तेहि विघ्नता देवा माहेनापि दधुर्नरान् ।
तेन ते कर्ममूयुक्ता प्रावर्तति दिवानिशम् ॥ इति ।

एतन्मूलकमेव पाद्मे स्मर्यते—

नित्याग्निहोत्रिणो विप्रास्तिष्ठन्ति ये गृहमेधिन ।
त एव सर्वफलदा सुराणा कामधेनव ॥
मदन भाज्य च पेयञ्च यद्यदिष्ट सुपर्वणाम् ।
अग्नौ हुतेन हविषा तत्सर्व लभ्यते दिवि ॥
नान्यदस्ति सुरक्षानामिष्टसिद्धिप्रद दिवि ।
दोग्ध्री धेनुर्यथा नीता दु खदा गृहमेधिनाम् ।
तथैव ज्ञानवान्विप्रो देवाना दु खदो भवेत् ॥ इत्यादि ।

ततश्च मुक्तिपूर्वमेव देवाना विघ्नसामर्थ्य न तु तत्सिद्धाविति निर्भय-एवाय पदविन्यास । अतो नरेश्वरेभ्य स्वर्गादिभ्यो मनो व्यावर्त्य मुक्त्यर्थमेव यतनीयमिति भाव ।

यत्तु व्याख्यात तत्प्रसिद्ध वक्ष्यमाणमाह कथयन्ति विचार कुर्वन्ता ब्राह्मणा । यन्मार्वात्म्य मन्यन्त इत्यनेन योज्यम् । मननप्रकारमाह—ब्रह्मवि-द्यया ब्रह्मण सत्यज्ञानादिलक्षणस्य विप्रस्य तादात्म्यलक्षणेन साक्षात्कारेण सर्व निखिल भविष्यन्ना भविष्याम । मनुष्या मनुजोपलक्षिता अधिकारिण मन्यन्ते मनन कुर्वते , इतिशब्दाध्याहारेण योजना । अधिकारिणो ब्रह्मविद्यया सार्वात्म्य गमयिष्याम , इति मन्यन्ते नद्दुर्घटमित्याहुविचारका । दुर्घटमि-तीति वहि । दौर्घट्ये कारणमाह —स किमु उ अपि कि ब्रह्मणे, आहोस्वे वा, तत् सत्यज्ञानादिलक्षणसर्वात्मन्न कि ब्रह्म बृहत्यर्थरूप कि स्वात्मनो भिन्न अवेत् ज्ञानवत् द्वितीयाभावात्, किमुत ब्रह्मेति तत्त्वेणोच्चारित द्रष्टव्यम् । तत: किमुत ब्रह्मानो वर प्रश्न । यद्यपि सत्यज्ञानादिलक्षण प्रसिद्ध ब्रह्म तथापि ब्रह्मविद्यया सर्वात्मभाव प्राप्तमप्रसिद्ध यस्मान्त्वात्मनो भिन्नस्याभिन्नस्य ज्ञानात्तद्ब्रह्म सर्वमभवत्सर्वतादात्म्यमगमत् । विनापि ज्ञानेन चेत्तत्सर्वमभव-

त्किमधिकारिणा तन्मूपक्रभक्तितमित्यभिप्राय । सिद्धे धर्मिणि धर्म इति न्यायात् । किमु तद्ब्रह्मापीति विचारकारण प्रश्न हृदि निधाय श्रुतिपूत्तरमाह-ब्रह्मैव सत्यज्ञानलक्षण प्रसिद्धमेव । प्रसिद्धिमुपपादयति-इद नानाप्रत्ययविषयभूत विश्वमग्रे विश्वोत्पत्ते पूर्वमासीत् अभूत् तदेव न विश्वमित्यर्थ । अतो ब्रह्मविद् यथा सर्वात्मभाव प्राप्त यत्सर्वात्मरूप स्वभावतो न तस्मादन्यत्त्त् । यद्यपि भिन्ने ज्ञानेऽस्त्येव दोष तथापि नाभिन्न इति मन्वाना । तत्किमवैदित्यस्योत्तरमाह—तद् ब्रह्म सर्वात्मभूत स्वभावत । अविद्यया असार्वात्म्यमिव प्राप्त आत्मानमेव स्वरूप सत्यज्ञानादिलक्षण नान्यत् । अवेत् ज्ञातवत् तस्मादात्मज्ञानाद्विनाधिकारिणामपि न सर्वात्म्यमित्यनेनैवोत्तर द्रष्टव्यम् । आत्मज्ञानानुकरणमह चिदेकरस ब्रह्म शब्दलक्ष्य ब्रह्म ब्रह्मास्मीति तस्मात्सर्वमभवत् तस्मादात्मज्ञानात्पूर्वं सर्वमेव सत् यदविद्यया सर्वमिवाभूत् सुगममन्यदिति । तत्सर्वं चिन्त्यम्, ब्रह्मणोऽपि ब्रह्मज्ञानेन सर्वतादात्म्यमित्यत्र प्रमाणाभावात् । तत्राध्याहारादिष्टकल्पनप्राचुर्यदुष्टत्वाच्च । अद्वैतदूषणपरत्वेन तदाहुरित्यादिवाक्यस्यास्मदुक्तरीत्योपपत्ते स्पष्टत्वात् । तस्मान्न ब्रह्मण सार्वात्म्य प्रागव तु तज्ज्ञात्वेति फलितार्थ । ब्रह्मैव पूर्वमासीनान्यदितो मिथ्यात्वलाभविरहाच्चापूर्वोत्तरकालयो कार्यात्यन्ताभावस्य मयापि स्वीकारात् । प्रतियोगिदशकालावच्छेदेन तदत्यन्ताभावस्य परैर्मिथ्यात्वघटकेनाभिमतस्य चात्रानवगमादग्रपदस्य निषेधानन्वये च बीजाभावादित्येषा दिक् । अन्यत्तु सूरिभिरूहनीयम् ।

यत्तु स एव इह प्रविष्ट इत्यनेन ब्रह्मण कार्योपाधिप्रतिबिम्बरूपेण प्रवेशमुक्त्वा तन्न पश्यन्त्यकृत्स्ना हि स इत्यनेन ससारदशाया दृश्यमानस्य प्राणनवदनादिक्रियाविशिष्टस्यात्मन परिच्छिन्नत्वेन तद्दर्शनस्यात्मस्वरूपदर्शनाभावमुक्त्वा आत्मेत्येवोपासीतेत्यनेन शुद्धात्मनोऽपरिच्छिन्नस्योपासनमुक्त्वा 'अत्र ह्येते सर्वं एक भवन्ति' इत्यनेन तस्य सर्वाधिष्ठानत्वेन तत्र सर्वमेकता प्रतिपद्यत इत्युक्त्वा कृत्स्नत्वरूपमपरिच्छिन्नत्वमुपपाद्य "तदेतदनीयमस्य सर्वस्यागेन ह्येतत्सर्वं वेद" इत्यनेनोक्तात्मज्ञानेन सर्वज्ञानादात्मैव ज्ञेयो नान्य इत्युक्तमिति, तच्चिन्त्यम्, आत्मेत्येवोपासीतेत्यत्र शुद्धात्मनो ज्ञेयत्वे नावगम इत्युक्तत्वात् । अत्र ह्येत इत्यादेरप्यन्यथैव व्याख्यातत्वात् । बाधकाभावस्य चास्मत्पक्षे विनिगमकत्वात् ।

केचित्तु आत्मेत्येवोपासीतेत्यनेनात्मभिन्नत्वेनेश्वरोपासन विधीयते । अन्या देवतामुपास्त इत्यनेन भेदघटितोपासनानिन्दाद्वारेण तत्स्तूयते ।

उपक्रमप्राबल्याच्च य एव वदेत्यादिवाक्यस्थ वेदेत्यादिपदमुपासनपरमेव। अमदंभावनिवृत्तिश्च तत्फलमित्याहु ।

यत्त्वत्र दूषयन्ति-' अनेन ह्येतत्सर्वं वेदेत्येकविज्ञानेन सर्व विज्ञानम्' प्रतिज्ञानुरोधादुपसंहारस्यैवात्र प्राबल्यम्। नवानन ह्येतदिति वाक्येनात्मोपासनया सर्वोपासनाफलाप्त्या तया सर्वमुपासितमित्युपचर्य इति वाच्यम्, उच्चरितस्यार्थस्य मुख्यत्वात्। आत्मन सर्वात्मत्वेन तज्ज्ञानात्सर्वज्ञानस्यार्थस्य मुख्यत्वात्। वस्तुतस्तु न पश्यन्तीत्यस्यैवोपक्रमबलेनोपसंहारप्राबल्याश्रयणेऽपि क्षतेरभावादिति। तन्न, तद्दोष्यापि सर्वज्ञानस्यौपचारिकत्वाननिवृत्ते। तथाहि तत्सर्वं वेदेत्यस्य घटादिप्रपञ्चमात्रपरतायां वक्तव्यत्वाद् घटत्वप्रकारकज्ञान मुख्य उक्तवाक्यार्थ। अन्यथा प्रमेयत्वेन ज्ञानस्यापि वस्तुतो यावत्प्रमेयविषयकत्वेन नाद्यशब्दज्ञानादुक्तब्रह्मज्ञानस्य वैलक्षण्यानुपपत्ते। घटत्वाद्यशेऽन्याप्रकारकज्ञानस्यैव सर्वज्ञत्वोपयोगात्। घट जानातीति समभिव्याहारस्य घटत्वप्रकारकघटविशेष्यकज्ञानाश्रयत्वबोधे हेतुत्वस्य न्यूनत्वाच्च। ब्रह्मनिर्विकल्पके च किं घटत्वादिप्रातिस्विकरूपेण घटादीनां विषयत्वमुत तस्य घटत्वादिप्रकारकज्ञानजनकत्वम्? नाद्य, स्वयमप्यनभ्युपगमात्। अत एव नान्त्य, विनापि शुद्धब्रह्मज्ञान तस्य जायमानत्वाच्च। अत एव ब्रह्मनिर्विकल्पकस्य विशकलितवस्तुसदार्थविषयकत्वेन तद्दोषोऽपि निर्विकल्पकत्वमेवेत्यप्यनाशङ्क्य ब्रह्मान्यविषयकज्ञानस्यैव मोक्षहेतुतायास्तैरभ्युपगमाच्च। समूहालम्बननिर्विकल्पके घटादिविषयकनिर्विकल्पकाशे ब्रह्मविषयकनिर्विकल्पकस्य जनकतायां सर्वथैवानुपपत्तेश्च।

न च ब्रह्मनिर्विकल्पकानन्तर तन्निर्विकल्पकानन्तर तन्निर्विकल्पक जायत, इतिवाच्यम्, मानाभावात्प्रयोजनाभावाच्च। अतो ब्रह्मण सर्वाधिष्ठानतया तज्ज्ञानेन कारणात्मना सर्वं ज्ञातमेव भवतीत्यस्य भवदभिमतस्यार्थस्य गौरवेण दुर्वारत्वेन। अत एव द्वितीयाध्याये "तदनन्यत्वमारम्भणशब्दादिभ्य-" इतिसूत्रे च भामत्यामुक्तम् "यस्माद्घटशरावोदञ्चनादीना तत्त्व मृदव, तेन मृदा विज्ञाना"। एतेन "कस्मिन्नु भगवो विज्ञान भवति" इत्यार्थवणश्रुतिरपि व्याख्याता। एव 'यनाश्रुत श्रुत भवति" इत्यादि छान्दोग्यम्। "आत्मनि वा र दृष्ट श्रुते मते विज्ञाते इद सर्वं विदितम्" इति बृहदारण्यकं चैत्यवदेवम्। अत एवोक्त तत्तात्पर्यं पार्थसारथिमिश्रैः "यद्यपि भावतिरोभावधर्मा नानाभूतविकारशरावादेर्मृत्तिका च सर्वज्ञानपायिनी तेषा कारणभूता कार्यकारणयोश्चावस्थाभावभेदात्स्वरूपभेदाभावाच्च कारण-

ज्ञानेन सर्वं कार्यजातमवस्थाभेदेनाज्ञातमपि धर्मिरूपेण ज्ञात भवति। तथा पपञ्चाऽप्याविर्भावतिरोभावधर्मावस्थायीति तत्कारणं चात्मा सद्रूप-मर्वानुयायी नापायधर्मा तद्विज्ञानेन तादात्म्यक सर्वमविज्ञातमपि व्यासरूपेण समासरूपेण ज्ञात भवति" इत्यादि।

किञ्च आदानज्ञानादुपादेयज्ञानमित्यत्र प्रमाणाभाव, कपालादि-प्रत्यक्षाभाववतामपि घटादिप्रत्यक्षस्य जायमानत्वात्। द्व्यणुकातीन्द्रियत्वे-ऽपि त्रुटिप्रत्यक्षस्य सर्वसिद्धत्वात्। आद्याशातीन्द्रियत्व शब्दप्रत्यक्षयो सर्वस-म्मतत्वाच्च। तिष्ठतु तावत्।

यत्तु तत्र पश्यन्तीत्यादि, तदकिञ्चित्करम्, वाक्यान्तरगतोपक्रमस्याप्र-योजकत्वात्। विध्यर्थवादयोरेव परस्परमेकवाक्यत्वस्यान्तरङ्गतया तद्गत-प्रत्यासत्तेरेव निर्णायकत्वौचित्यात्। अन्यथा तत्र पश्यन्तीत्यस्मादप्युत्तरे प्राणस्येवेत्यादिवाक्ये 'स योऽन एकैकमुपास्ते" इत्यत्रैवोपान्तरेव सन्निहितो-पक्रमस्थत्वमिति परेणापि वक्तु शक्यत्वात्। य एव वेदेत्यस्मादप्यनन्तर-मात्मानमेव प्रियमुपासीत। 'स य आत्मानमेव प्रियमुपास्ते" इति श्रवणाच्च। "वामदेव प्रतिपेदे" इत्यस्मादप्यनन्तरम् 'अथ योऽन्या देवतामुपास्ते" इत्यादे पाठाच्च। मनुष्या विद्युरित्यतदुत्तरमपि कतिपयवाक्यव्यवधानेन आत्मानमव लोकमुपासान स य आत्मानमेव लोकमुपास्त इति श्रूयमाणा च्च"इत्युक्तम्।

अत एव मृत्पिण्डादिदृष्टान्ताऽपि सङ्गच्छते। न ह्यक्मृत्पिण्डज्ञाने सति तज्ज्ञानस्य घटत्वादिरूपेण यावत्पृथिवीविकारघटादिविषयकत्वम्, सर्वानुभ वविरोधात् भूतले मृत्पिण्डज्ञानस्य घटाभावज्ञान प्रत्यविरोधित्वानुभवाच्च। नापि तज्ज्ञानोत्तर घटत्वादिप्रकारकज्ञानोत्पत्तिनियत्यम्। क्वचित् तादृशज्ञा नस्यान्यत बलप्रकारणैवापपत्ते। घटत्वपटत्वाद्यनन्तधर्मैकप्रकारकज्ञानाना जन्मसहस्रेणाप्यसम्भवाच्च। नापि निर्विकल्पात्मकमेव घटत्वपटत्वादिज्ञान जायत इति वाच्यम्, घटत्वादे पृथिवीविकारत्वाभावात्।

न च घटपटादीनामेव तज्जायत इति वाच्यम्, तथाप्येकैकघटादिव्य-क्तीनामेवानन्तेन तदुत्तिसम्भवाभावात्। यत्किञ्चिद् घटादिनिर्विकल्पकेऽपि मानाभावाच्च। "नाध्यक्ष निश्चयाद्विना" इति न्यायादिति श्रुत्यर्थ।

यत्त्वत्र "सर्वमात्मैवाभूद्" इतिश्रुतिरपि नाऽद्वैते मानम्। तथाहि यथा मैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयते, नाऽन्यो होदग्रहणाय एव स्याद्,

त्तोयनन्त्रादद्दीन लवणमेवय वा अर इद महद्भूतमनन्त विज्ञानमपारविज्ञा-नघन एवेभ्यो भूतेभ्य समुत्थाय तान्येवानु विनश्यति न प्रेत्य सज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य" इति प्रथम पठ्यते। अस्यार्थ— ईश्वरतत्त्वज्ञानाज्जीवस्य मोक्ष मैत्र्युद्दालकदृष्टान्तेन तयोर्भेदश्च माक्षे स्वरूपापेक्षादाज्ञ विज्ञानघनो ज्ञानशक्तिरूपानेव एतेभ्यो भूतेभ्य समुत्थाय शरीरसम्बन्धशून्यो मुक्त इति यावत्। तान्येवानुविनश्यति नष्टेन्द्रियविनाशादात्मापि प्रलयपाषाणवत्तामापन्नो विनष्ट इव भवति" इति पार्थसारथिमिश्रा। तथा च मोक्षधर्मे पञ्चशिखवाक्यम्—

यथाग्नेर्वदना नद्यो व्यक्तोज्जेहति नाम च।
न च स्त्रिया नियच्छन्ति तादृश सत्वसज्ञय॥
एव सति कुत सज्ञा प्रत्यभावे क्य भवेत्।
प्रतिसञ्चिक्षिप जावे गृह्यमाणे च सर्वत॥

सत्त्वजीवात्मन सज्ञयम्नादश स्वविषयकज्ञानाभावोपाधित्वादौपचा-रिक इत्यर्थ। अत एव पक्षिनार्थं माधवस्तथ आह—न प्रेत्यसज्ञास्तीति। एतेन विशेषगुणोच्छेदो मोक्ष इत्युक्तम्, तदविज्ञायतात्मनाशो मोक्ष इत्याशङ्क्य मैत्रेयीप्रश्न। अत्रैव मा भगवानमूमुहदिद्यारमनाशस्य पुरुषार्थत्वानुपपत्तेरिति भाव। मिश्रास्तु 'विज्ञानघन इति न प्रेत्यसज्ञास्तीत्यनयोर्विरोधान्माह" इत्याहु। तदुत्तर याज्ञवल्क्येनोक्तम्। "न वाऽरेऽह मोह ब्रवीम्यत्म वा अर इद विज्ञानायाविनाशी वा अरे यमात्मानुच्छित्तिधर्मा मात्रासमर्गस्तस्य मवतीति"। अविनाशित्वेन मयोक्तनास्तिक्यतानिरास। अविद्यमाना उच्छित्तिर्जीवस्वरूपत्यागेन रूपान्तरप्राप्तिर्यस्यामानुच्छित्तिस्तादृशो धर्मो यस्येति जीवब्रह्मरोराविद्यका भेदोऽविद्यानिवृत्तिश्च मोक्ष इति वेदान्तिमत सिद्धम्।

न चास्यानार्षत्वोद्धारत्व सज्ञाविषयमिश्रित ज्ञान वृत्यात्मक नास्ति किन्तु शुद्धमेव चैतन्यम्, तथा च चिन्मात्रस्वरूपेणावस्थान मोक्ष इति प्रद्धोपपत्ते। यद्वानुगता स्वाभाविकी विच्छित्तिर्भेदो धर्मो स्वभावो यस्येति मर्थः। दृष्टान्तेन भेदाभेदव्यवस्थभेदाग्रे साम्य न विवक्षितमिति याज्ञ-वल्क्यानिरार्यत्वेन्। तन्मते उच्छित्तिरित्यनर्थक स्यात्।

न चाविनाश्यर्थत्वेन भाष्यकारोक्तेन निर्वाह, अविनाशीति पदवैयर्थ्यात्। नाशस्यापि विकारत्वात्। जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीति षड् भावविकारा इत्याह भगवान् यास्कीयनिरुक्तकारोक्तेः। गोबली-

वर्दन्यायेन सङ्कोचस्य वानन्यगतित्वात्। न च उच्छित्तिरत्यन्तोच्छेदो धर्म। प्रतियोगिनासम्बन्धेन यत्रास्त्युच्छित्तिधर्मा तद्भिन्नस्य नञ्समासेन लाभाद् यथा सन्निवेशे न वैयर्थ्यमिति वाच्यम्, न विद्यते उच्छेदो यस्येत्यत एव वयर्थ्याभावेऽपि प्रयोजनाभावादम्मत्पक्षप्रातिकूल्यविरहाच्च।

यत्तु न विद्यते उच्छित्तिविशेषणगुणोच्छेदरूपा धर्मो यत्रेति विग्रह। अविनाशीति नास्तिकमतनिरास। अनुच्छित्तिधर्मेत्यनेन वैशेषिकमतनिरास। धर्मपद चात्मनो निर्धर्मकत्वेन तत्रोक्तगुणोच्छेदरूपो धर्मो नास्तीति सूचनार्थम्। आत्मवृत्त्यभावप्रतियोगितावच्छेदकीभूतधर्मत्वावच्छिन्नत्वेन यथोक्तोच्छेदस्योपस्थितौ तस्यात्मन्यभाववोधनसम्भवादिति। तन्न, धर्मपदसाथक्यानुपपादनाच्चाधिकरणातिरिक्ताभावानभ्युपगमेन तन्मतेऽभावरूपधर्माश्रयत्वस्यापि ब्रह्मणि स्वीकारात्, निर्धर्मकत्वस्यान्याप्यसिद्धेश्च।

वस्तुतस्तु "धर्मादनिच् केवलाद्" इत्यत्र केवलपद न त्रिपदबहुव्रीहिवारणार्थम्, पूर्वपदात्तेपतात्पर्यग्राहकत्वेनैव तदुपयोगात्। पूर्वपदशब्दस्य च समासप्रथमावयवरूढत्वेन मध्यमपदव्यावृत्ते। स्वयमभ्यस्यैवानुगृतत्वाच्च। ततश्च न विद्यते उच्छित्तिरूपो धर्मो यस्येति त्रिपदबहुव्रीहिविग्रहोपन्यासो न युक्त। न उच्छित्तिरनुवृत्ति अनुच्छित्तिर्धर्मो यस्येत्यर्थे तु नेष्टसिद्धिर्धर्मवत्त्वापत्तिश्च। उच्छित्तिश्चासौ धर्मश्च उच्छित्तिधर्म स न विद्यते यस्येत्यपि नार्थे। धर्मपदस्य बहुव्रीह्यवयवीभूतपूर्वपदात्परत्वाभावात्। उच्छित्तिशब्देन व्यवधानात्। केवलय धर्मपदस्यापि विशेषणमिति पक्षे तु एतदर्थस्यातिस्पष्टत्वात्। अत एव सन्दिग्धसाध्यधर्मेत्यादौ पूर्वपदे कर्मधारय कृत्वैव बहुव्रीहि, नतूत्तरपदे इति स्पष्टमेव शाब्दिकैरुक्तम्, इत्यास्ता तावत्।

यदि तान्येवानुविनश्यतीत्यनेनात्मज्ञानप्रयुक्तद्वेषनिवृत्तौ न प्रेत्य सञ्ज्ञास्तीति रूपादिविज्ञानाभावे चोक्ते सामान्यविज्ञानमात्रस्य मोक्षत्व लब्धम्। लोके रूपादिविषयज्ञानजन्यसुखस्यैव पुरुषार्थत्वदर्शनात्। तस्यापुरुषार्थत्वशङ्काया यत्र हीत्यादिना विषयसुखमभिधाय तस्य च हेयतामर्थसिद्धामभिप्रेत्य यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन क पश्येदित्याद्युक्तम्। तेन च निरतिशयात्मस्वरूपसुखस्य परमपुरुषार्थत्व द्वितीयाभावेन निर्भयत्वञ्च सूचितमिति। तदप्यसत्, रूपादिविज्ञानानामपि तद्दोषा द्वेषनिवृत्त्यैव निवृत्युक्तिसिद्धे। पुनस्तदुक्तिर्वैयर्थ्यात्। न प्रेत्य सञ्ज्ञास्तीत्यस्यैव मोक्षस्वरूपनिर्णायकत्वाच्च। शब्देनानुक्तार्थगम्यस्य मोक्षत्वमिति परमकारुणिकेन वक्तुमयुक्तत्वात्।

अत एव हि 'न वा अरेऽहं मोह ब्रवीम्यल वाऽरेद विज्ञायेत्युक्तम्।" तस्माद-स्मदुक्तरीत्याद्वैतमत दूषयित्वा तत्र युक्तिमप्याह—"यत्र हि द्वैतमिव भवति तदितर इतर पश्यति तदितर इतर जिघ्रति" इत्यादि। यत्र त्वस्ये-त्यादि च। अयमर्थ —अद्वैतवादिनापि सर्वसिद्धज्ञेयज्ञातृभावोपपत्त्यर्थ-माविद्यक द्वैतमङ्गीक्रियते। अत उभयसिद्ध द्वैतमेवोपगम्यतामलमग्रामाणि-केनाद्वैतनेति। तत्सूचनार्थं च इव शब्द इति सूक्ष्ममीक्षणीयम्। मिश्रास्तु "द्वैतमिव भवतीत्यत्र द्वैतावभासस्य भ्रान्तित्ववचनमौपचारिकम्। यथा खलु स्वप्नप्रपञ्च इन्द्रजालादय कियन्तचि काल दृष्टिपथमापन्ना सुखदुख-जननयाग्यतामापन्ना पश्चाद्विलोयन्ते तथाऽय शरीरेन्द्रियविषयरूप प्रपञ्चोऽप्यात्मन कियन्तचित्कालमुपभोग्य सन् पश्चाद्विनाशादनुभोग्या भवतीत्यनेन सादृश्येन भ्रान्तिरित्युपचारेणोच्यते, पुरुषाणा विषयभोगेष्वा-स्थानिवर्तनेन मुक्तावभिरुचि जनयितुम्। यदपि यत्र त्वस्य सर्वमात्मैवाभूदिति मुक्तावात्मनोऽद्वितीयत्ववचन, तदपि न, प्रपञ्चस्वरूपनिषेधार्थमस्येतिवच-नात्। न ह्यत्रैतावदुच्यते यत्र सर्वमात्मैवाभूदिति। किन्तर्हि यत्र त्वस्य सर्व-मात्मैवाभूदिति। तेनायमर्थ। यत्र यस्यामवस्थाया मुक्तावित्यर्थ, अस्या-त्मनो दृश्यत्वेन दर्शनसाधनत्वेन दर्शनायतनत्वेन किञ्चिदन्यसम्बन्धि विद्यते। किन्त्वात्मैवास्य सर्वं नान्यत्किञ्चित् तदा केन किं पश्येदिति, यथा लोके यस्य न किञ्चिद् बान्धवो वित्त वा विद्यते स वदति न किञ्चिन्मेऽस्त्य-हमेव सर्वमिति। तत्र न सम्बन्ध्यन्तर किञ्चिदस्तीत्येतावदेव विवक्षितम्। एव मुक्तावप्यात्मैवात्मन सर्वमिति सम्बन्ध्यन्तराभावमात्रविवक्षित न स्वरूपाभाव। तस्मान्न प्रपञ्चविलया मोक्ष किन्तु प्रपञ्चसम्बन्धविलय" इत्याहु। एतेन त्वदुक्तार्थइव शब्दवैयर्थ्यमित्यपास्तम्। इदञ्चारण्य मर्वत्रापि स्पष्टम्।

बीजानि ह्यग्निदग्धानि न रोहन्ति पुनर्यथा।
ज्ञानदग्धैस्तथाक्लेशैर्नात्मा सयुज्यते पुन ॥ इति।

अत एव प्रथमचतुर्थे 'सम्भवादिति काशकृत्स्न" इति सूत्रे यत्र हि द्वैतमिवेति इवकारेण द्वैतवैतथ्योपक्रमाच्चेति कल्पतरूकमप्यपास्तमित्यास्ता विस्तर। इति यत्रत्वस्यति श्रुत्यर्थ ॥

बृहदारण्यके श्रूयते—"जनक ह वैदेह याज्ञवल्क्यो जगाम—समे नेन-वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदातेतस्मै ह याज्ञ-

वल्क्यो वर ददौ स ह कामप्रश्नमेव वव्रे त ह्यस्मै ददौ त ह सम्राडेव पूर्वं पप्रच्छ ॥ याज्ञवल्क्य कि ज्योतिरय पुरुष इत्यादित्यज्योति सम्राडिति होवाचादित्येनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ अस्तमित आदित्ये याज्ञवल्क्य कि ज्योतिरेवाय पुरुष इति चन्द्रज्योति सम्राडिति होवाच चन्द्रेणैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद् याज्ञवल्क्य ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते कि ज्योतिरेवाय पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ कि ज्योतिरेवाय पुरुष इति वाग्ज्योति सम्राडिति होवाच वाचैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्व पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि कि ज्योतिरेवाऽय पुरुष इत्यात्मज्योति सम्राडितिहोवाचात्मनैवाय ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ कतम आत्मेति योऽय विज्ञानमय पुरुष प्राणेषु हृदन्तर्ज्योति स समान सन्नुभौ लोकौ सञ्चरति ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेम लोक-मतिक्रामति मृत्यो रूपाणि ॥ सवाय पुरुषो जायमान शरीरमभिसम्पद्यमान पाप्मभि समृज्यते स उत्क्रामन् म्रियमाण पाप्मनो विजहाति मृत्यो रूपाणि ॥ तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोक-स्थानञ्च सन्ध्य तृतीय स्वप्नस्थान तस्मिन् सन्ध्ये स्थाने तिष्ठन् उभे स्थाने पश्यतीद च परलोकस्थानञ्च । अथ यथाक्रमोऽय परलोकस्थाने भवति तमाक्रममाणस्याभयान् पाप्मनश्चानन्दाश्च पश्यति स यत्र प्रस्वपिती-यस्य लोकस्य सर्वावतो मात्रामपादाय स्वय विहृत्य स्वय निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीत्यनाय पुरुषस्स्वय ज्योतिर्भवति ॥ न तत्र रथा न रययोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथ सृजते न तत्रानन्दा मुद प्रमुदा भवन्त्यथानन्दान्मुद प्रमुद सृजते न तत्र वेशान्ता स्रवन्त्य पुष्करिण्या भवन्त्यथवेशान्ता स्रवन्त्यो पुष्करिण्य सृजते स हि कर्त्ता । तदप्येते श्लोका —

स्वप्नेन शारीरमभिग्रह्यासुप्त सुप्तानभिचाकशीति ।
शुक्रमादाय पुनरेति स्थान हिरण्मय पुरुष एकहस ॥
प्राणेन रक्षन्नवर कुलाय यत्र शेते प्रथमजामहोभि ।
अद्भ्य परिष्वक्त हिरण्मयेन शुक्रेण धातामृत चरित्वा ।

स दैवे अमृतौ यत्नकार्यं हिरण्मय पुरुष एवेत्न. ॥
स्वप्नान्त उच्चावचमीयमानो रूपाणि देव कुरुते बहूनि ।
इत्येव सीमि गर्हमाहनानो जक्षद्गते वापि मयानि पश्यन् ॥

आत्मानमन्य पश्यन्ति न न वञ्चन पश्यतीति तमाप बोधयेदि-त्याह । दुर्भिषज्य हान्ये मर्त्य यमेन न प्रतिपद्यते । अथो स्वप्नाद्जागरितदेश विज्ञेय यानि हृव जागरितदेशे तानि मृत इत्यनेन पुरुष स्वप्नव्याप्ति मतीत्यैवमेतद्याज्ञवल्क्य माह भगवन् मत्व दमस्वित इद्वै विनाशायैव वृहीति ॥ तमथा महामत्व इमे कृणे अनुश्चरन्ति पूर्व सावर चैवमेवाय पुरुष एत इमावेतावनुश्चरन्ति स्वप्नान्त इति चन्द्रादि ॥

अवतर्ण —याज्ञवल्क्यस्तु प्रथम ब्रह्मविचारार्थं बृहदारण्यानाम-ध्यात्मब्राह्मणस्य ज्योतिर्ब्राह्मणस्य लौकिकस्वाभिलाषायोत्तरमाह—

आदि यज्ञोतिरिति । टीका—आदित्यैवैवेत्यादिना । आत्मे कण्टकवृश्चि-कादिभिति मुमागलोक्य नवाधिगति । पश्यति परि नम्नादयते गच्छति उच्चर्वच्यावचे" इति सत्व नर्मणोपादानादिकरा कुरुते विषयैति गुणादिक प्रमागच्छति इति । यद्यपि चक्षुषात एवादित्यप्रकाश इत्यर्थो न तु स्वाचार्यो, उक्त चाप्तवेगनादिवाक्यानीति निर्वक्तुमेवेति वक्तुमह तथापि आदित्यमानेत्यादिवस्य व्यभिचार इत्यभिप्रायवान् जनक आह—अस्तमित आदित्ये याज्ञवल्क्येति । एवमग्न्यादि दाये व्याख्येयम् । प्रत्यक्षवत् । अत्र. सूर्यचन्द्रवत्कालादिगोचरत्वेनाप्तनियमाभावेऽपी-त्यनादिनाम्नी गतिरेवात्र दीप्तमिति तु विशेष । वाचो ज्योतिर्ब्रह्म च व्यवहारजनकत्वेनेति भाव—तस्मादे मनोऽपि । यतोऽन्धकारादौ स्वया-त्मिन्न निजेते तत य वाग्विषद्ध श्रूयते तदनुमितदिगभिमुखमेव गच्छतीत्यर्थः । वाचोऽपि स्वमितारित्वान्नैवमित्यभिप्रायेण राजा पृच्छति-अस्तमित इत्यादि । याज्ञवल्क्यो राजाभिप्रेतमनूद्योत्तरमाह—अात्मज्योति-रिति । अात्मन सामान्यतोऽदृष्टव्याप्तिसिद्धत्वेऽपि तद्विषय. किमित्यत्र नास्ति वादिना विप्रतिपत्त. । तत्र विषयविशेषनिर्णयार्थं पृच्छति—कतम आत्मेति । तत्र ज्ञानमेवेदमात्मेति सौगता । न च ज्ञानस्य गुणत्वेन तदाश्रय-द्रव्यमनुमेयं ज्ञानादीना गुणत्वे मानाभावात् । तदुक्तम्—

सिद्धे ज्ञानसुखादीना गुणत्वे गुणिकल्पना ।
न तु तत्सिद्धमस्माक तावन्मात्रोपपत्तित ॥ इति ।

तदपास्यति—विज्ञानमय इति । हेतौ मयट्, हेतुत्वञ्च ज्ञापकत्वम् । तथा च ज्ञानाश्रयस्यैवात्मत्व न तु ज्ञानस्य, अह जानामीत्यादौ ज्ञानाश्रयत्वस्यैव विषयीक्रियमाणत्वात्, ज्ञानात्पृथगेवाहमर्थोल्लेखाच्च । एव ज्ञानस्य क्षणद्वयावस्थायित्वेन पूर्वानुभूतस्यान्येन स्मरण न स्यात् । अन्यथा च चैनानुभूतस्यापि मैत्रेण स्मरण स्यात् । न च ज्ञानसन्तानस्वीकारादुपादानोपादेयभावो नियामक सुषुप्तौ विज्ञानसन्तानविच्छेदस्यावश्यकत्वात्तदुत्तरमस्मरणापत्ते ।

न च तदाप्यलयाविज्ञानरूपा निर्विषया चित्सन्ततिरनुवर्त्तते, इति वाच्यम्, चिता सविषयकत्वनियमात्, साकारचित्सन्तत्या निराकार-चित्सन्ततेरुत्पादयितुमशक्यत्वाच्च ।

किञ्चैवमपि सुखादीना न ज्ञानोपादेयत्वसभव तैरसजातीयस्यैवोपादा-नत्वोपगमात् । न च सुखमपि ज्ञानमेव अह सुखी अह जाने इति विलक्षण-बुद्धिवेद्यत्वात् । अथ शरीरमेव ज्ञानाद्याश्रयोऽस्तु शरीरस्य निमित्तकारणतया समवायित्वमात्रकल्पनात् । न च भूतत्वेन घटादिवत्तस्य ज्ञानाभावोऽनुमेय, आकारविशेषपरिणताना चैतन्यसम्भवात् । प्रत्येकममादकानामपि गुणा-द्यवयवाना सुराकारपरिणताना मादकत्वमिति चार्वाका । तन्निराकरोति—पुरुष इति । पुरि शरीरे शेते इति व्युत्पत्त्या शरीराधिष्ठातृत्वात्तद्भिन्न इति भाव । तदुक्तमाचार्यैः—

नान्यदृष्ट स्मरत्यन्यो नैक भूतमपत्रमात् ।
वासनासक्रमो नास्ति न च मत्यन्तर स्थिरम् ॥ इति ।

अयमर्थ —एव सति बालशरीरेणानुभूतस्य युवशरीरेण स्मरण न स्यात्, अन्यथा चातिप्रसङ्ग । न च बाल्ययौवनयोरेक शरीरम्, अपत्रमात्पूर्व-शरीरस्य नाशात् । तद्व्यतिरेकेण पूर्वशरीरसमवेतपरिमाणनाशानुपपत्त्या तत्र परिणामान्तरोत्पत्त्यनुपपत्ते । न च कारणवामनाग्र कार्ये सत्रमान दोष इति वाच्यम्, मात्रनुभूतस्यापि पुत्रेण स्मरणापत्ते । न चोपादानवासनैवोपा-देये सत्रामतीति नातिप्रसङ्ग इति वाच्यम्, स्थिरपक्षे पुञ्जातपुञ्जानुपपत्ते, पूर्वशरीरस्योत्तरशरीर प्रत्युपादानतया पूर्वशरीरावयवानामेवोत्तरशरीरो-पादानत्वात् । तथा च करावच्छेदेनानुभूतस्य करच्छेदानन्तर खण्डशरीरेण स्मरण न स्यात्, छिन्नावयवस्य खण्डशरीर प्रत्यनुपादानत्वादिति ।

इन्द्रियाणामात्मत्व निरस्यति—प्राणोन्मेषनिमेषज्ञ्योतिरिति । इन्द्रियाणा ज्ञानहेतुत्वनिर्वाहक इनि यावत् । अन्यथा तेषामेव ज्ञानसमवायित्वेऽन्धबधिरादीना ज्ञानोदयो न स्यात् । योऽहमद्राक्ष सोऽहं स्पृशामीनि प्रतिसन्धानञ्च न सवेत् । अन्धादिदशाया च पूर्वानुभूतस्मरण न स्यात् । चक्षुरादीनामप्यनेकत्वाच्च । एतेन समुदितानामपीन्द्रियाणामात्मत्व निरस्तम् ।

तदाह—मयी स्वप्नो भूत्वेम लोकमतिक्रामतीति । स्वप्नावस्थापन्नो भूत्वा सवेद्यानिनहित इम लोकमिन्द्रियसहित रूपमतिक्रामत्युद्बुद्धयति । इन्द्रियव्यापार विनैव स्वप्ने ज्ञानादितिदर्शनात् । न तेषा ज्ञानाश्रयत्व स्वरूपसनामेव तेषा तदान्वे तु ज्ञानाज्ञातव्यवस्थानुपपत्तिरिति भावः । तर्हि मन एव ज्ञानाश्रयोऽस्तु नित्यत्वादात्मसमानशीलत्वे दोषाभावादित्यत आह—द्युवन्नज्योतिरिति । मनसोऽपि ज्ञानहेतुत्वनिर्वाहकः । अमनयं — मनोऽपि न मानान्तरेण सिद्धम् । तन यदि ज्ञानाश्रयत्वेनैव मनोऽनुमीयते तदा तस्य ज्ञाने कर्तृत्वमेव स्यान्न तु करणत्वम् मानाभावात् । तथा चानेकविषयेन्द्रियसन्निकर्षे ज्ञानयौगपद्य स्यात् । एकदैककक्रियामात्राभिनिर्वर्त्तकत्व हि करणस्यैव स्वभावो न तु कर्तुः, व्यासङ्गासङ्गतिप्रसङ्गात् ।

न च तदर्थकरणान्तरमनुमेयमिति वाच्यम्, नाग्नि विवादो न तु वस्तुनीत्वेनदापत्ते । न च पूर्वं करणत्वेनैव मनोऽनुमाय पश्चात्तस्य ज्ञानकर्तृत्वमनुमेयमिति वाच्यम्, चैतन्याश्रये कर्तरि सिद्धे हि तद्व्यापारविषयत्वेऽन्यकरणत्वेन न मनोऽनुमेयम् । तथा च न तत्र ज्ञानाश्रयत्वानुमानसम्भवो धर्मिग्राहकमानबाधादिति ।

एव सिद्धे देहाद्यतिरिक्ते आत्मनि मागस्वर्गादिरपि सामानाधिकरण्यमुपपद्यते । अन्यथा कृतहानाकृताभ्यागमप्रसङ्गादित्यत आह—स इति । समान एक- मनु उमौ लोकौ सञ्चरति । अवच्छेदकशरीरभेदेऽपि कर्तुमोक्तुरात्मन एकत्वादिति भाव ।

इच्छादीनामप्यात्मगुणत्व व्यवस्थापयति—ध्यायतीव लेलायतीवेति । "ज्ञान चिन्ता हिताप्राप्ते सन्तापादिकरी मता" इति साम्प्रदायिकरीत्या इच्छानवाभि. । कृतचिन्तया ज्ञानपदार्थत्वमस्य, तेन चेच्छानामात्मगुणत्वलाभ । लेलायतीवेत्यस्य च दीप्यत इवेत्यर्थ. । लेला दीप्तावित्यस्य कण्ड्वादिगणे पठ्यमानत्वात् । बहुरा. कथ ससार इत्याशङ्क्य समानो बुद्धया सदृश उभौ लोकौ सञ्चरतीत्युक्त्वा बुद्धौ ध्यायन्त्यामिवलन्तीति च परव्याख्याने चाने-

कार्यत्वस्यैव शरणीकर्त्तव्यत्वात्, सादृश्ये प्रतियोगित्वेन बुद्ध्यन्वयस्य शब्दानुह्यत्वाच्च । तेन च चिन्ताकृतसन्तापो दुःखसज्ञो लभ्यते । तदुक्तम्—

विभावा यत्र दारिद्र्यमैश्वर्यंभ्रंशन तथा ।
दृष्टार्थापहृतिश्चास्या श्वासोच्छ्वासावबोमुखम् ॥
सन्ताप स्मरणञ्चैव कार्श्यं देहानुपस्कृति. ।
अधृतिश्चानुभावा स्यु सा चिन्ता परिकीर्त्तिता ॥ इत्यादि ।

धर्माधर्मयोरात्मगुणत्व च ममानस्मनुभौ लोकौ सञ्चरतीत्यनैवोक्तम् । न च दीप्यत इवेत्यत्र इवशब्दस्य दुःखाग्यगौणतापरत्वेनोपपत्तावपि स्वन्मते ध्यायतीवेत्यत्र इव शब्दानुपपत्ति । चिन्तायास्त्वया वस्तुत एवात्मधर्मत्वाभ्युपगमादिति वाच्यम्, गुणान्तराक्षेपलाघवानुरोधन सपरिकरायां एव चिन्तायां अत्र विवक्षिततया कार्कश्यादीना तदनुभावाना देहनिष्ठत्वेनात्मनिष्ठत्वाभावादहं दृश इत्यादि प्रत्ययाभिप्रायेण तदुपपत्ते । यद्वा दीप्तेमुखप्रसादादिरूपाया ग्रहणात्तदाक्षिप्तसुखस्य लेलायतीत्यनेन लाभ दुःखस्य ध्यानपदेनैव लाभसम्भवात् । एवञ्चार्थादात्मविशेषगुणाना बुद्ध्यादिसस्कारान्ताना सिद्धि । ध्यानकार्यस्मृत्या सस्कारस्याप्याक्षेपात् । इदञ्चोत्तरग्रन्थे स्पष्ट वक्ष्यति । सधारित्यादिव्याख्यान—यद्वार्थं पूर्ववत् । यथा दृश्यशरीरस्य व्यापारविरमेऽपि मन सहकारेण स्वप्नदर्शन तथैव परलोकेऽपि शुभाशुभकर्मणा चरति । अत उभौ लोकावित्यत्र परलोकांशे विप्रतिपत्तिन कार्यति तात्पर्यम् । यद्वा इन्द्रियसयोगेन यथा स्वप्ने सञ्चारस्तथा जन्मान्तरेऽपि । अतो देहेन्द्रियसम्बन्धस्यैवानर्थहेतुत्वम् तथा च मोक्षधर्मे मनुबृहस्पतिसम्वादे—

यया व्याप्तमिद शेते स्वप्ने चरति चेतनम् ।
ज्ञानमिन्द्रियसयुक्त तद्विद्धेत्य भवाभवौ ॥

"व्याप्त शरीर, ज्ञान जीव, इन्द्रियसयुक्तात्मा जन्मजन्मान्तरेऽपि कर्मण्येव वरोतीति नात्मदर्शनमित्यर्थ" इति विद्यासागरः । एतेन ध्यायतीवेत्यादिना आत्मनोऽकर्तृत्वमुक्तमिति वेदान्तिवचन निरस्तम् । तथा बुद्ध्यादिभावापन्ना प्रकृतिरेवेति साङ्ख्यमतमपि । तदुक्तमाचार्यैः—

कर्तृधर्मा नियन्ताऽश्चेति च एव न ।
अन्यथा नापवर्गं स्यादससारोऽथवा ध्रुवम् ॥ इत्यग्रे विस्तरः ।

यत्पुनस्तैरुक्तमात्मनः कर्तृत्वस्य स्वाभाविकत्वे मोक्षो न स्यात् । तदुक्त वार्त्तिके:—

आत्मा कर्त्तादिरूपश्चेन्मा वाङ्क्षीस्तर्हि मुक्तनाम्।
नहि स्वभावो भावानां व्यावर्त्तेतोष्णवह्नवे ॥ इति।

तदसत्, नहि स्वाभाविकत्व नित्यत्व वूमो येन तन्निवृत्तिर्न स्यात्। किन्तु सादात्सम्बन्धेन तद्वृत्तित्व तस्य च निवृत्तावविरोधित्वात्। घटादिरूपस्य स्वाभाविकस्यापि निवृत्तिदर्शनात्। तथा च यदि नित्यत्वरूप स्वाभाविकत्वमनिवृत्त्यापादक तदा स्वर्गोऽसिद्ध। अथानित्यरूप तदा घटस्यादौ व्यभिचार।

नन्वेव घटस्य घटत्वमपि व्यावर्त्तेतेति चेन्न, नाशस्य नित्यत्वनियमादप्रितुमशक्यत्वात् सम्बन्धनिवृत्तेरत्र दृष्टत्वात्। उक्त हि दीधितिटीकाकारैः "अतीतघटादौ ज्ञायमानघटादिसामान्यस्य स्वरूपेण नित्यप्रत्यक्षत्वेऽनिवारित्वात्, सामान्यस्यानित्यस्य प्रत्यासत्तित्वस्वीकारात् इति। औत्पत्तिकस्यापि सुखस्य निवृत्तिस्वीकारात्। आत्मन्याश्रितत्व तु न निवर्त्तने द्वारमिति नित्यत्वादिति। न किञ्चिदेतत्।

यदप्युक्त समानाधिकरणविशेषगुणप्रागभावासमानकालीना विशेषगुणध्वंस आश्रयनाशजन्य एवेति नियम घटत्वादिव्यभिचारी दुर्वच। आश्रयनाशजन्यस्योत्पादिनोऽस्य समानाधिकरणविशेषगुणप्रागभावसमानकालीनत्वादिति, तदपि चिन्त्यम्, एतादृशनियमस्य कार्यानवच्छेदकत्वात्। किन्तु नव्यमते स्ववृत्तिप्रागभावप्रतियोगित्व स्वप्रतियोगिसमवेतत्व कादिविशेषणता वैयधिकरण्येनान्वयेन नाशवान् यत्स्ववृत्तिप्रतियोगितासम्बन्धेनाभाव प्रति स्वप्रतियोगित्वसमवेतत्वसम्बन्धेन नाशा हेतुरित्येव कार्यकारणभावस्वीकारात्। मुक्तादौ चाक्तसम्बन्धेन नाशानुत्पत्ति।

यत्तु—

'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते"।
इतिस्मृतिविरोधाद्धावत तत्तत्प्रारब्धभोगात्।

अनादित्वानिर्गुणत्वान्नित्यमव्ययं।
इतिपूर्वार्द्धपर्यालोचनया तस्य ईश्वरत्वात्। तथा हि श्रीभगवानुवाच—

इद शरीर कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति त प्राहु क्षेत्रज्ञ इति तद्विद॥

क्षेत्र पूर्वकर्म, भोगोत्तरकर्मारम्भहेतुत्वात्। एतद्यो वेत्ति जानाति ममेद शरीरमिति, अन्यथा शरीरान्तरवाप्युपगतो मनादेरपि प्रत्यक्षात्।

त क्षेत्रज्ञपदेन निर्दिशन्ति तज्ज्ञा । अतो देह एवात्मेतिभाव । एवञ्च वेत्तीति ज्ञानाश्रयत्वमात्मन उपक्रान्तम्। शब्दमयदिागम्यत्वात्तनज्ञानरूपत्व ज्ञानस्य बुद्धिगुणत्व च निरस्तम्।

उत्तम पुरुषस्त्वन्य परमात्मेत्युदाहृत ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर ॥

इतिश्रुतम् तच्च कुसुमाञ्जलौ व्याख्यातम्। अत्रोत्तमत्वमसंसारित्व सर्वज्ञत्वादि च परमत्व सर्वोपास्यता लोकत्रयमिति सर्वोपलक्षणम्। आवेशो ज्ञानचिकीर्षाप्रयत्नवतस्संयोग भरण धारणम् अव्ययत्वमागन्तु कविशेषगुणशून्यत्वम् ऐश्वय सकल्पाप्रतिघात इति। एतेन कर्मादिविषया अप्यागमा व्याख्याता । इदस्य प्रपञ्चमाह—

क्षेत्रज्ञ चापि मा विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञान यत्तज्ज्ञान मत मम ॥

क्षेत्रपदमात्मशरीरपरम् तस्यैव तद्व्यवहारविषयत्वात्। तच्चोत्तरार्द्धेन स्पष्टीकृतम्। अत क्षेत्रपदस्य साहचर्यलक्षणसम्बन्धेन क्षेत्रक्षेत्रज्ञोभयपरत्वऽपि न क्षति । तथा च परात्मगुणाना परायोग्यतया जीवस्य जीवमात्रशरीरमात्रगोचरसाक्षात्कारविरहात् सर्वविषयकज्ञानवानह परमेश्वर । क्षेत्रक्षेत्रज्ञमात्रविषयक यज्ज्ञान तज्ज्ञान ममेश्वरस्य न तु जीवनामितियोजना। तथा चाहमेव तत्तत्कर्मानुरूपैर्भोगै जीवान् सयोजयामीतिभाव । विवेकाथमाह—

तत् क्षेत्र यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥

यद्यस्वरूप यादृक यत्कारणक यद्विकारि यत्कायक यतश्च यत्कायमुत्पद्यते इति वाक्यशेष इति भाष्यकारा ।

वस्तुता यतो हेतोयन्नश्वरम् इण शत्तृप्रत्यये यणादेश च व्युत्पत्त । ततश्च यया देहसम्बन्धा न भवति तदपि वक्ष्यामीतिभाव । स क्षेत्रज्ञो जीवश्च या यस्वरूपो यत्प्रभावो यद्गुणकश्चत्यथ । एतेन प्रभावा उपाधिवृत्ता शक्तयो यस्यति पदान्तरप्रक्षेपपूवक व्याख्यानमपास्तम्।

ऋषिभिबहु धा गीत छन्दोभिर्विविध पृथक ।
ब्रह्मसूत्रपदश्चव हेतुमद्भिर्विनिश्चित ॥

क्षेत्र-क्षेत्रज्ञयाथात्म्यविशेषणान्येतानि प्ररोचनार्थानि। ऋषिभिर्वंशिष्ठादिभि बहुधा तात्पर्यनिश्चायकलिङ्गोपन्यासपूर्वं छन्दोभिर्मन्त्रगादिमन्त्रै. ब्रह्मसूत्रपदैरुपनिषद्भि हेतुमद्भिरिति वेदप्रामाण्यानङ्गीकर्तृनिरासार्थम्। अत एव विनिश्चितैर्विशिष्टप्रामाण्यज्ञानानास्कन्दित निश्चित निश्चयो येभ्यस्तै भावार्थकनिष्ठानिश्चितशब्देन पञ्चमीबहुव्रीहि ।

एवमभिमुखीकृत्यार्जुनमुपदिशति—

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचरा ॥
इच्छा द्वेष. सुख दुख संङ्घातश्चेतना धृतिः।
एतत्क्षेत्र समासेन सविकारमुदाहृतम् ॥

महाभूतानि पृथिव्यप्तेजोवाय्वाकाशा। अहङ्कारो मिथ्याज्ञान सवासन मोहोऽहङ्कार इति वार्तिकदर्शनात्। "अविद्याहंमतिर्भ्रम" इति कोशाच्च। बुद्धिर्जनि पडिन्द्रियजन्यम्, अव्यक्त धर्माधर्मौ। साङ्ख्योक्तस्य प्रधानरूपस्याव्यक्तस्य वेदान्तिभिरप्यनङ्गीकारात्। "महतः परमव्यक्तम्" इति काठकवाक्ये "शरीर रथमेव तु" इति वाक्यानुसारेण शरीरस्यैवाव्यक्तपदेन ग्रहणमिति तैर्व्यवस्थापितत्वेऽपि तस्य तैरप्यनुपादानात्। वाक्पाणिपादपायूपस्याना न्यायमते इन्द्रियत्वाऽभावेपि वचनादिनियतत्वेन परं कर्मेन्द्रियत्वस्वीकारादिन्द्रियत्वोक्ति । वाच शरीरकार्यत्वात् पाण्यादीना चावयवत्वेन तत्कारणत्वात्तल्लाभार्यतया न वैयर्थ्यम्। पञ्च गन्धरसरूपस्पर्शशब्दा , मनोविषयाणामिच्छादीना पृथगेवाभिहितत्वात्। इच्छाद्वेषसुखदुःखानि प्रसिद्धानि। चेतना सविषयत्वसाधर्म्येण सस्कार.। धृति. प्रयत्न । अत्र च प्रत्येक पण्णामिन्द्रियविषयबुद्धीना सुखदु खशरीराणा चैकविंशतिदुःखात्मकत्वेनोपादान महाभूतदेहाना च यथायोग देहहेतुत्वेनेत्यादिज्ञेय । अत्र च शरीरस्यावच्छेदकतया ज्ञानादिहेतुत्वात्तज्जन्यत्वमात्मन एव तन्मनवायित्वात्। एवञ्च हेयत्वेन कार्यकारणसहितमेव शरीरमत्र क्षेत्रपदार्थत्वेनोक्तम्। जीवस्वरूप तु ज्ञानाश्रयत्वेन पूर्वमेवोक्तम्। अत्र तु ज्ञानेच्छादिगुणप्रतिपादनद्वयविस्पष्टा तदुक्तिरिति विशिष्टाभिप्रायेण "स च यो यत्प्रभावश्च" इति नानुपपन्नमिति बोध्यम्।

एतादृशदेहप्रवाहस्योच्छेदोपायमुपादेक्ष्यन् तत्साधनान्याह—

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासन शौचस्थैर्यमात्मविनिग्रहः ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमितिप्रोक्तमज्ञानं यदतोऽन्यथा ॥ इति ।

ज्ञायतेऽनेनेति करणे ल्युट्, पदार्थो भाष्याङ्गे स्पष्टः । एषा यद्विषयकज्ञाने उपयोगस्तमाह—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न तत्सन्नासदुच्यते ॥

प्रवक्ष्यामि प्रकर्षेण कथयिष्यामि । कथनञ्च तद्विषयकज्ञानजनकशब्दप्रयोगः । प्रकर्षश्च तद्वृत्ति तत्प्रकारकत्वरूपो ज्ञानान्वयी । यद्वा कथनं शब्दप्रयोग एव । व्यापारानुबन्धिनी विषयतामादाय च कर्मण्वयं । प्रकर्षश्च प्रमाजनकत्वरूप शब्द एवान्वेति । सर्वथापि शब्दगम्यानां धर्माणां ब्रह्मणि पारमार्थिकत्वपर्यवसानम् । तज्ज्ञानस्य फलमाह—यज्ज्ञात्वेति । अमृतमात्मभावमश्नुते प्राप्नोति । आदिरस्यास्तीत्यादिमत्सद्विलक्षणमनादिमत् । प्रागभावस्याप्येतादृशत्वादाह—परमिति । अन्तहीनमित्यर्थः । आकाशादीनामप्येवं विधत्वादाह—ब्रह्मेति । बृंहयति वर्द्धयति प्रजा इति ब्रह्म सद्भावेऽवस्थानाभावेन जन्यमानकारणत्वलाभः ।

ननु कारणतानवच्छेदकमन्वयव्यतिरेकगम्यमीश्वरस्य च कालिकसम्बन्धेन हेतुत्वं वाच्यम्, तादृशश्च व्यतिरेकोऽप्रसिद्धः, नित्यत्वात् । कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानिरूप्यत्वं व्यतिरेकस्य कारणत्वग्रहोपयोगित्वात् । तत्कथं जगत्कारणत्वमित्याह—न सदिति । सदपि अन्यद् व्यतिरेकि नोच्यते । यद्यप्यन्वयीत्युच्यते तथापि व्यतिरेकविशिष्टान्वयानङ्गीकारादन्वयस्यापि निषेधः । ततश्च नान्वयव्यतिरेकविशिष्टप्रत्यक्षगम्यमीश्वरस्य कारणत्वम्, येनोक्तानुपपत्तिः प्रसज्येत्, किन्तु शब्दादिमानमात्रगम्यं तच्च व्यतिरेकं विनापि धर्मिग्राहकमानस्य तदुपादायैव पर्यवसानात् । अन्यथा कारणत्वभावानुमानस्य तर्कस्य वाध्यत्वमिद्धिप्रसङ्गः । तदुक्तमाचार्यैः—

पूर्वभावा हि हेतुत्व मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा नहि ॥

यत्तु ब्रह्म न सदसदादिशब्देन [उच्यते] इति वाच्यम्, जातिरहितत्वात् । नापि गुणशब्देन निर्गुणत्वात् । नापि क्रियाशब्देन निष्क्रियत्वात् । 'निष्कलं निष्क्रियं शान्तम्' इति श्रुते । नापि गामानित्यादिवत्सम्बन्धिशब्देन एकत्वाद्वयत्वादविषयत्वादात्मत्वाच्चेति । न केनचिच्छब्देनोच्यते । 'यतो वाचा निवर्तन्ते" इत्यादि श्रवणाच्चेति । तच्चिन्त्यम्, निर्गुणत्वे मानाभावात् । "सत्य विज्ञानमानन्द ब्रह्म" इत्यादि श्रुतेरभेदस्य च दूषयिष्यमाणत्वात् । निष्क्रियत्वं तु यदि परिस्पन्दशून्यत्वं तदनुमन्यामहे । विभुत्वेनात्मनि कर्मानङ्गीकारात् । अथ धात्वर्थशून्यत्वम्, तन्न ज्ञानादेरपि तथात्वेन निषेधानुपपत्ते । एतच्च तु किं साङ्गत्ययोगित्वमुत द्वितीयनिष्ठात्यन्ताभावप्रतियोगिधर्मत्वम्, उत स्वान्यशून्यत्वम् ? नाद्यो आकाशादेस्तादृशस्यायिपदगम्यत्वोपगमात् । न तृतीय, असिद्धे । एतेनाद्वयत्वादित्यपि निरस्तम् । ज्ञेयं यत्तत्प्रवक्ष्यामि" इतिस्मृत्याद्यनेकमानविरुद्धत्वादविषयत्वमप्यसिद्धमित्यादिस्वयं योजनीयम् ? केचित्तु अनादिपदे बहुव्रीहिः । मत्परम् अहं वासुदेवाख्या पराशक्तिर्यस्य तन्मत्परम्, अन्यथा बहुव्रीहिणैवोक्तार्थत्वान्मत्वर्थोऽनुपपत्तिरिति व्याचक्षते ।

यत्तु सर्वविशेषप्रतिषेधेनैवात्र ब्रह्मजिज्ञापयिषितं 'न सत्तन्नासदुच्यते" इति विशिष्टशक्तिप्रदर्शनं विशिष्टप्रतिषेधश्चेति व्याहतम्, अत्र ब्रह्मपूरणार्थं मत्वर्थेति, तच्चिन्त्यम्, अद्वैतवादकृततादृशव्याख्याया व्याहतत्वेऽप्यन्यदीयतादृशव्याख्याया व्याघातानवकाशात् । यादृश ब्रह्मप्रमाणजातप्रतीयते तादृश न प्रतिपिपादयिषितमपि तु अन्यादृशमेवेत्युक्तरीत्या । परन्तु कर्मधारयप्रवृत्तिभिर्मत्वर्थीयैरभिधान तादृश माभूदित्यादि महाभाष्यपर्यालोचनया कर्मधारयोत्तरमेव मत्वर्थीयो न भवति । पदद्वय बहुव्रीहिकृत्येव शब्दलाघवेन मत्वर्थलाभात् । अत त्वादिपदान्मनुप् तनो नन्म [मास] इति न वाच्यनुपपत्ति । अत एव न कर्मधारयान्मत्वर्थीय इत्यत्र लिखन्नीत्यनेन । किञ्च-

सर्वत पाणिपाद तत्सर्वतोक्षिशिरोमुखम् ।
सर्वत श्रुतिमाल्लोके सर्वमावृत्य तिष्ठति ॥ अथ श्रोत-

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सबाहुभ्या धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एक ।

इतिमन्यार्थसवादी। स चाचार्यैर्व्याख्यात । तद्यथा—सर्वज्ञत्वसर्ववक्तृत्वसर्वमङ्गकारित्वव्यापकत्वानि पूर्वोक्तविशेषणचतुष्टयार्थं । चक्षुर्मुखबाहूपदशदाना दृष्टिवाक्सहायप्राप्त्युपलक्षकत्वात्। बाहुभ्या धर्माधर्माभ्या लोकयात्रावहनहेतुत्वात्। पतत्रे परमाणुनि गतिशीलत्वात्पतन्तीति व्युपत्ते । द्यावित्यूर्द्धमन्नलोकोपलक्षणम्। भूमीत्यधस्तान्। एक इत्यनादित्वम्। मङ्गलमनुत्पादयन्। सन्नमनि गयाजयति "व्यवहिताश्च" इति छन्दसि व्यवधानव्युत्सर्गमञ्जेति। तात्पर्यन्त्वस्य व्यापकत्वे। तदेव दर्शयति—एवमावृत्य निष्ठतीति। यद्वा लोलाविग्रहपरमेतत्। तदुक्तमाचार्यैः—"शरीरान्वयव्यतिरेकानुविधायिनि कार्ये शरीरस्यापि ग्रहणात् गृह्यन्ते हीश्वरोऽपि कार्यवशाच्छरीरमन्तरान्तरा च दर्शयति विभूती" इति। सर्वत इति बहुत्वमात्रपरमेकावच्छेदेन पाणिपादादिनानावयवाना बाधितत्वात्।

स्वभावमाह—

सर्वेन्द्रियगुणाभास सर्वेन्द्रियविवर्जितम्।
असक्त सर्वभृच्चैव निर्गुण गुणभोक्तृ च।

सर्वेन्द्रियगुणैश्चाक्षुषादिभिराभासते तत्प्रकारकज्ञानविषयो भवतीति सर्वेन्द्रियगुणाभासः, नित्यत्वेनेश्वरज्ञानस्य चक्षुरादिजन्यताव्यवच्छेदकधर्मविरहेऽपि तत्र चाक्षुषादिकमुपचर्यते।

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्णं" इत्यादि श्रुतिषु। "अपाणिपादोऽहमचिन्त्यशक्ति पश्याम्यचक्षुश्च शृणोत्यकर्णं" इत्यादिस्मृतिषु चेति भाव। तत्रैव हेतुमाह—सर्वेन्द्रियविवर्जितमिति। धर्मिग्राहकमानेन नित्यज्ञानवत्तयैव सिद्धेरिति भाव। असक्त रागद्वेषादिहीन सर्वभूत्तत्तत्कर्मानुरूपेण नाशोत्पत्तिसुखदुःखादिभिर्भूतग्राह् सयोजयन्। निर्गुण प्रधानमन्यदीयेच्छाज्ञानव्यतिरेकाननुविधायितत्त्वत्वात्। एतेन "साक्षी चेता केवलो निर्गुणश्च" इत्यादिक नैर्गुण्यप्रतिपादकं वाक्यजात व्याख्यातम्। गुणाना भोक्तृत्वमनुभवितृत्वेनातीन्द्रियविषयकसाक्षात्कारत्वम्। अतीन्द्रियाणा गुणानामपि सत्त्वात्। किञ्च—

बहिरन्तश्च भूतानामचर चरमेव च।
सूक्ष्मत्वात्तदविज्ञेय दूरस्थ चान्तिके न तत्॥

बहिर्भवमन्तस्थञ्च देहमपेक्ष्योक्तम्। तत्रश्चावच्छिन्नदेहावच्छेदेन न स्यादियाशङ्क्यायामचर चरमेव चेति। यदि सर्वत्राऽस्ति तर्हि सर्वैरप्युपलभ्यते

अत सूक्ष्मत्वादिति । अतीन्द्रियत्वादित्यर्थ । फलित व्यापकत्वमाह—दूरस्थ चान्तिके न तदिति । तथा च मन्त्रवर्ण —

'तदेजति तन्नैजति तद्दूरे तद्वदन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यत ॥"

विद्वदभिप्रायेणान्तिकदूरस्थत्वोक्तिरित्येतदुभयव्याख्यातार ।

किञ्च—

अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेय ग्रसिष्णु प्रभविष्णु च ॥ इति ।

भूतेषु कार्येष्वविभक्तमेक यावत्कार्यनिरूपितकारणताश्रयत्वात् । यद्वा भूतेषु मूर्तेष्वविभक्त सर्वतत्सयोगित्वात् । अथ च विभक्तमिव स्थित तत्सयोगस्य वृत्तिनियामकत्वाभावेनेश्वरस्य केवलान्वय्यत्यन्ताभावप्रतियोगित्वाद् भूताना कार्याणा भर्तृ स्वेच्छया नियोजक च तदेव ग्रसिष्णु प्रभविष्णु चेति ।

नन्वस्मदादीना तत्साक्षात्कारामावेऽप्यतीन्द्रियपरमाण्वादिदर्शिना देवादीना तत्प्रत्यक्ष स्यादत आह—

ज्योतिषामपि तज्ज्योतिस्तमस पर उच्यते ।
ज्ञान ज्ञेय ज्ञानगम्य हृदि सर्वस्य विष्ठितम् ॥

ज्योतिषा सूर्यादीनामपि ज्योति प्रकाशकम् ।

न तत्र सूर्यो भाति न चन्द्रतारा नेमा विद्युतो भान्ति कुतोऽयमग्नि ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिद विभाति ॥

'येन सूर्यस्तपति तेजसेद्धा" इत्यादि च । स्मृतिरपि—

यदादित्यगत तेजो जगद भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

तथा च सूर्यादीना नात्मप्रकाशकत्व चाक्षुषमायोषमागि वान् । किन्तु आत्मन एव सूर्यादिप्रकाशकत्वमुत्पत्त्यादिनियामकत्वादित्यर्थ । तमस अज्ञानात्पर दूरमुच्यत । मिथ्याज्ञानप्रतिबध्यसाक्षात्कारकत्वमेव दूरस्थत्वमितिभाव । यद्वा तमस तदभाववति तत्प्रकारकत्वरूपभ्रमज्ञानात्पर तद्वृत्तित्वात् भ्रमस्य दोषजन्यत्वनियमेनेश्वरज्ञान भ्रमत्वाभावात् । ज्ञायतेऽने-

नति ज्ञानमस्मदादिज्ञानस्येश्वरजन्यत्वात्, ज्ञानगम्यमस्मदादिज्ञानविषय, सर्वस्य हृदि विशेषेणान्तर्यामितया स्थितम्। तथा च कोपनिषद्ब्राह्मणम्—

एष ह्येवैन साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष उ एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो निनीषते' इति। एतज्ज्ञय यत्तत्पूर्व प्रवक्ष्यामीति च यत्प्रतिज्ञात तदिह परमात्मस्वरूपमुक्तमित्यर्थ ॥ १७ ॥

उपसंहरति—

इति क्षेत्र तथा ज्ञान ज्ञेय चोक्त समासत ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥

ज्ञानपदे करणकर्तृव्युत्पन्नयोर्ज्ञानिशब्दयो 'नपुंसकमनपुंसकेन' इति एकशेषैकवद्भावौ। मद्भावाय मत्साधर्म्यप्राप्तये रीतेरुक्तत्वात् ॥ १८ ॥

प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि।
विकाराश्च गुणाश्चैव विद्धि प्रकृतिसम्भवान् ॥

प्रकृति पुरुषपदार्थश्च सप्तमाध्याये उक्त—

भूमिरापोऽनलो वायु खं मनोबुद्धिरेव च ॥
अहङ्कार इतीय मे भिन्ना प्रकृतिरष्टधा।
अपरेयमितस्त्वन्या प्रकृतिं विद्धि मे पराम् ॥
जीवभूता महाबाहो ययेद धार्यते जगत।
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥
अहं कृत्स्नस्य जगत प्रभव प्रलयस्तथा।

आकाशान्तानामिन्द्रियप्रकृतित्व दुःखहेतुदेहजनकत्व च,मनसो ज्ञानादावसमवायिसयागप्रतियोगित्वेन निमित्तत्वम्, बुद्धिपद सविषयत्वसाधर्म्येण प्रवृत्तिपरम, अहकारो मोह इत्यत्र जगदारम्भहेतुवान् प्रकृति। अपरेयमित्युत्तरश्लोकाद्यभाग पूर्वश्लोकान्वयी। इयमष्टविधा प्रकृतिरपरानुत्कृष्टा अचेतनत्वात्। मिथ्याज्ञानाद्धि दोषो रागाद्यात्मक। तत प्रवृत्ति, ततो धर्माधर्मद्वारा जन्म देहसम्बन्धस्वम्, ततो दुःखमित्यनादिरय प्रवाह। तथा च मिथ्या
म्यात्। तथा च
पाये तदनन्तराप
न्यमित्यादि। परामुत्कृष्टा सर्वस्य चेतनाभोगायतया तस्यैव प्राधान्यात्। मे इति स्वसम्बन्धाल्लब्धस्तु स्वीयकारणतानिरूपित कार्यसहकारित्वाद् भोक्तृ-

भावे सृष्ट्यनुपपत्त्या किंनिष्ठकर्मतानिरूपित कारणत्वनिरूपितमीश्वर स्यात्, तदाह—यमेवैषमिति। यायिने यद्धोक्तृत्वेनोक्तप्रकृतिसम्बन्धादेव जीवस्य संसार इत्याह—

पुरुष प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारण गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥

प्रकृतिस्थो देहादिसम्बन्ध। तज्जनितान् गुणान् स्वसम्बन्धेनान् ज्ञानेच्छादीन् भुङ्क्ते गुणस्य धर्माधर्मरूपस्य सम्बन्ध। सदसद्योनिषु ब्राह्मणचाण्डालाद्यासु योनिषु यज्जन्म देहान्तरसम्बन्ध। तत्कारणमतो देहोच्छेदे नैव कैवल्य स्यान्न त्वन्यथेति भाव।

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वर।
परमात्मेति चाप्युक्तो देहऽस्मिन्पुरुष पर॥

उपद्रष्टा तत्कर्मसाक्षात्कारित्वादनुमन्ता तत्कार्ये सहकारित्वात्। भर्ता कर्मानुरूपफलदातृत्वात्। भोक्ता तत्सुखादिसाक्षात्कारवत्त्वात्। यद्वा जन्यमात्रस्थितिहेतुत्वेन पालकत्वात्। महेश्वर स्वेच्छाधीनयावत्पदार्थकत्वात् परमात्मा इत्यनेन प्रकारेण उक्त। देहेऽस्मिन् पुरुषो जीवस्तु परोऽन्य एव सन्निधानादीश्वरस्यैवान्योन्याभावप्रतियोगित्वलाभ। विज्ञिवद्विषयकज्ञानादेव जीव ईश्वराद्भिन्नइति भाव॥२१॥

य एव वेत्ति पुरुष प्रकृति च गुणै सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥

पुरुष जीव प्रकृति पृथिव्यादिगुणैर्ज्ञानादिभि सह वेद एषा विवेक जानाति स सर्वथा स्वेच्छया वर्तमानोऽपि देहान्तर न गृह्णाति किं पुनस्वबुद्धस्य इति भाव॥२२॥

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे।

केचिद् ध्यानेन निदिध्यासनेन। आत्मानमात्मनात्मनि पश्यन्ति बाह्यवृत्तेभ्यो व्यावृत्तस्य मनसो ध्येयैकग्राहकत्व ध्यान तद्विषयकप्रत्ययप्रवाह इति यावत्। सत्त्वरजस्तमसा गुणाना साम्यावस्था प्रकृति.। पुरुष कूटस्थनित्यस्तद्विलक्षणमिति ज्ञानम्। साङ्ख्ययोगः कर्मयोग, ईश्वरार्पणबुद्धया कर्मानुष्ठानम्।

अन्ये त्वेवमजानन्त श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणा ॥

अन्य त्वेव विजानन्त अन्येभ्य आचार्येभ्यः श्रुत्वा एवचिन्तयतेत्यु-क्त्वा उपासते । अपि श्रवणमेव परमयन मोक्षमार्गप्रवृत्तिसाधन येषान्त केवलपरोपदेशप्रमाणा न्यय विवेकहीना अपि मृत्यु तरन्ति मुतरा तु विवेकिन इतिभाव । एतद्धानीनि सर्वाणीत्यस्य प्रपञ्चमाह—

यावन्जायत किञ्चित्सत्त्व स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञयोगात्तद्विद्धि भरतर्षभ ॥

क्षेत्रक्षेत्रज्ञयोगा भोक्तृभावलक्षण सम्बन्ध, तेन कार्यमात्रोत्पत्ति बीजप्रयोजनव्यतिरेण कस्यचिदनुपपत्ते ।

सम सर्वेषु भूतेषु तिष्ठन्त परमेश्वरम् ।
विनश्यत्स्वविनश्यन्त य पश्यति स पश्यति ॥

विनश्यत्सु सर्वप्राणिषु सम रागद्वेषरहितेन वर्त्तमानमविनश्यन्त नित्य परमेश्वर य पश्यति साक्षात्करोति स पश्यति तत्त्वज्ञानवत्त्वात् । दर्शनान्तरस्य निष्फलत्वात् । अत्रैवर्थेनिमित्यस्य मानान्तरनिन्दाद्वाराश्रवा-नप्रशस्त्याय तात्पर्यमभ्युपगतवान् ।

सम पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मान ततो याति परा गतिम् ॥

सम सर्वत्र समवस्थितमिति व्याख्यानम् । ईश्वर पश्यन् साक्षात्कुर्वन् सम्यग्दर्शनमात्रवत्, न तु मोक्षजनकज्ञाने प्रकारत्वयन्त मानानवान् । न हिनस्तीति । जन्ममृत्युसम्बन्धाभावात् । तत ईश्वरसाक्षात्कारात्परा गति मोक्ष प्राप्नोति ।

एवमात्मान कर्तृत्वमुक्त्वा वादिना मतमाह—

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वश ।
य पश्यति तथात्मानमकर्तार स पश्यति ॥

प्रकृत्यैव च क्रियमाणानि कर्माणि महदादीनि य पश्यति मन्यते स औपनिषद साङ्ख्यो वा आत्मानमकर्तार पश्यति ।

नन्वविद्वन्तु "अन्य त्वेवमजानन्त" "ज्ञात्वाभूय एवमन्देव एक" इत्यादिनेश्वरकर्तारमेव मन्यन्ते, तद्विज्ञाने च जीव-मपि तच्छरीरेषु भिन्न स्वकृतेनेह कर्मणेत्यादिस्मृत्या धर्ममयोऽधर्ममय

इत्यादिश्रुत्या बहुविधया तत्सहकृततर्कैश्च कर्तार भोक्तार च मन्यन्त इत्यभिप्राय ॥ तदेव स्पष्टयति—

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तार ब्रह्म सपद्यते तदा ॥

भूतानां जीवानां घटादीनां च पृथग्भाव भेदमेकस्थ मुख्यपदस्थ यदानुपश्यत्युक्तन्यायादिपर्यालोचनानन्तर निश्चिनोति तत आत्मन एव च विस्तार सृष्टि जानाति, कर्तारमेवात्मान वेदीति यावत् । तदा ब्रह्म सपद्यते, शोकराहित्येन तत्सादृश्यात् ॥

सर्वत पाणिपाद तदित्यत्र लोलम्बा शरीरपरिग्रह परमेश्वरस्योक्त तेन जीववदीश्वरस्यापि बन्ध स्यादित्याशङ्क्य निराचष्टे—

अनादित्वान्निर्गुणत्वात्परमात्मायमव्यय ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥

न विद्यते आदि शरीरपरिग्रहहेतु स्वनिष्ठो धर्मादिर्यस्येति तादृशत्वात् । तत्रैवार्थो निर्गुणत्वादिति । अत एव 'अव्ययत्वमागन्तुकविशेषगुणान्यत्वम्' इति कुसुमाञ्जलौ व्याख्यातम् । अत एव न व्येति स्वकर्मोपार्जितशरीरोपग्रहपरित्यागाभ्या विविक्त न एतीत्यव्यय । ईश्वरस्य कर्तृत्वेऽपि तत्फलसम्बन्धविरहान करोतीत्युक्तम् । तदेवाह—न लिप्यत इति । स्पष्टमन्यत् । जीवकर्मानुरोधेन तत्कर्मभिरेवेश्वर शरीर गृह्णाति न तु स्वकर्मभि, तेषामलौकिकत्वात् । अतस्तच्छरीराद्यच्छेदेन कर्मोत्पत्तावपि मिथ्याज्ञानसहकारविरहेण तददृष्टानुत्पत्त्या न तत्फलसम्बन्ध इतिभाव ॥

दृष्टान्तमप्याह—

यथा सर्वगत सौक्ष्म्यादाकाश नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥

जीववत्परमात्मनोऽप्यनेकत्व स्यादित्यत आह—

यथा प्रकाशयत्येक कृत्स्न लोकमिम रवि ।
क्षेत्र क्षेत्री तथा कृत्स्न प्रकाशयति भारत ॥

क्षेत्रमस्यास्ति अन्यत्वज्ञेयत्वान्यतरसम्बन्धेनेति क्षेत्री परमात्मा ॥

अध्यायार्थमुपसहरति—

क्षेत्रक्षेत्रज्ञयोरेतदन्तर ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्ष च ये विदुर्यान्ति ते परम् ॥

तत्र सत्त्व निर्मलत्वात्प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥
इत्यादिना समनन्तरमेवोक्तम्।

यत्तु तथापि विषयभूतस्य सुखस्य विषयाण्यात्मनि सश्लेषापादान मृषैव सुखे सजनात्सेषा अविद्यैव। न हि विषयधर्मो विषयिणो भवति। इच्छादि च धृत्यन्त क्षेत्रस्यैव विषयस्य धर्म, इत्यादि तत्सर्वं पूर्वोक्तरीत्या परिहृत बोध्यम्।

नान्यं गुणेभ्य कर्तारं यदा द्रष्टानुपश्यति।
गुणेभ्यश्च पर वेत्ति मद्भाव सोऽधिगच्छति॥

गुणेभ्योऽन्य गुणत्वावच्छिन्नप्रतियोगिताकभेदवन्त गुणवद्भिन्नमिति यावत्। यद्यप्येव गुणस्यैव प्रतियोगितावच्छेदकत्व गुणत्वस्य तु प्रतियोगितावच्छेदतावच्छेदकत्वमेव, तथापि स्वाश्रयनिष्ठावच्छेदकत्वसम्बन्धेन गुणत्वस्य तदवच्छेदकत्व बोध्यम्। न वह्निभिन्नमित्यादितो वह्नित्वावच्छिन्नप्रतियोगिताक एव भेद प्रतीयते, न तु वह्नयवच्छिन्नप्रतियोगिताक। तादृशधीसत्त्वेऽपि वह्निमानिति ज्ञानोदयादिति वाच्यम्, अत्र बाधकसत्त्वे न वैपुल्याद् बहुत्वस्य च विनिगमकत्वाभावात्।

पितामह महाप्राज्ञ पुण्डरीकाक्षमच्युतम्।
कर्त्तारमकृत विष्णु भूतानां प्रभवाव्ययम्॥

इत्यादि भारतदर्शनाच्च। अथवा गुणेभ्यो हेतुभ्य कर्त्तारमात्मान पश्यन्ति न त्वन्यम्। गुणसहकारेणैव तस्य कर्तृत्व नान्यथा। अत आत्मा कर्त्तादिरूपश्चेत्यादिक निरवकाशम्। गुणेभ्यश्च परमिति भेदस्य वास्तवत्वसूचनम्, तेन निर्द्धर्मत्वमपि निरस्तम्। यद्वा नान्यमिति नैकेत्यादिवदात्मनाम। गुणाधीनकर्तृत्वाश्रयमिति स्वरूपोक्ति। नान्य केवल साक्षात्करोतीति मोक्षहेतुज्ञानोक्ति। यद्वा गुणेभ्य इति पञ्चम्या प्रतियोगित्वमर्थं इत्युभयसिद्ध ततश्च नान्यमविरुद्ध तथा च गुणवन्तमित्यर्थं। "स एवान्यो जात सखि परिचितः कस्य पुरुषा" इत्यादि दर्शनात्। "नमन्तामित्येके समे" इति वैदिकप्रयोगाच्च। अत एव मोक्षधर्मे वार्ष्ण्ये माध्यात्मे—

नवद्वार पुर पुण्यमेतैर्भावैः समन्वितम्।
व्याप्य शेते महानात्मा तस्मात्पुरुष उच्यते॥ इत्युपक्रम्य

सोऽत्र वेदयते वेद्य स शृणोति स पश्यति ।
कारण तस्य देहोऽय स कर्त्ता सर्वकर्मणाम् ॥

कारण कर्मकरणे सहकारि । तथा मनुबृहस्पतिसवादे मनुरुवाच—

यदा तै पञ्चभि पञ्च युक्तानि मनसा सह ।
अथ तद्ब्रह्म मणौ सूत्रमिवार्पितम् ॥
तदेव तु यथा सूत्र सुवर्णे वर्त्तति पुन ।
मुक्तास्वथ प्रवालेषु तदेव राजते तथा ॥
तद्वदगोऽश्वमनुष्येषु तद्वद्धस्तिमृगादिषु ।,
तद्वत्कीटपतङ्गेषु प्रसक्तात्मा स्वकर्मभि ॥
येन येन शरीरेण यद्यत्कर्म करोत्ययम् ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥

ज्ञानाद्युपधानेन नैव जीवप्रत्यक्ष इति ब्रह्मत्यन्त एवार्थ । स चैक एव स्वकर्मभागाय नानाशरीरसम्बन्धो पर्यायेण भवतीत्याह—मणाविवत्यादि स्वकर्मभिरित्यन्तेन । एकस्यैव ब्रह्मणो जीवरूपेण नानाशरीरसम्बन्धस्तु नोक्तवाक्यार्थ । पुन शब्दगर्भदृष्टान्तानुसारेण स्य क्रमेण नानादेह-सम्बन्धस्यैव दार्ष्टान्तिकार्थत्वादित्यास्ता विस्तर ।

प्रकृतमनुसराम । इन्द्रियादीना सर्वथानुपयोगशङ्का परिहरति—स वा अयमिति । स्वाधिकरणसमवायध्वसानधिकरणसमयसम्बन्धरूपाया उत्पत्तरात्मन्यसम्भवाज्जायमान इत्यस्य व्याख्यामाह-शरीरमभिसम्पद्यमान इति । अपूर्वदेहेन्द्रियसम्बन्ध एवात्मनो जायमानत्वमिति भाव । पाप्मभि पाप्मशब्दस्य दुष्टमात्रपरतया तत्साधनैर्देहेन्द्रियादिभि ससृज्यते सम्बध्यते । 'ससृज्यते सरसिजैरङ्गणाशुभिर्न' इत्यादिदर्शनादकर्मकत्वम् । उत्क्रामन्नि-त्यत्रापि निगमनस्य विभौ बाधितत्वाद् व्याचष्ट—म्रियमाण इति ।

न च मरणमप्यात्मनो नास्ति 'न जायते म्रियते वा कदाचिद्" इत्यादि विरोधादिति वाच्यम्, ज्ञानजनकमन सयोगाजनकस्पन्दजन्यविभागजन्यज्ञान-जनकमन सयोगध्वसरूपस्य मरणस्यात्मनि स्वीकारात् । स्पष्टञ्चेद द्वयो-पायविवरणाद्वो । देहेन्द्रियसम्बन्धस्यैवानर्थमूलत्व दर्शयति—मृत्यो रुपाणीति । ससारकारणानीत्यर्थ । उभौ लोकावित्युक्तौ विशेष्य दर्शयति—तस्मिन् सन्धे इत्यादिना । स्पष्टार्थ । एतज्जन्मानुभूतमेतदुत्तर प्राप्स्यमानञ्च देवदेहादि तच्छरीरत्यागसूचक वा प्रेतालिङ्गनादि पश्यति ।

मध्ये वयसि कार्वश्यात् कारणानामिहादित ।
प्रायेण वीक्ष्यते स्वप्नवासना कर्मणो वशात् ॥
यियासु परलोक तु कर्मविद्यादिमभृतम् ।
भाविनो जन्मनो रूप स्वप्न आत्मा प्रपश्यति ॥

मोक्षधर्मेऽपि धार्ष्णेयाध्यात्म्ये स्वप्नप्रस्तावे—

गुणानामपि यद्यत्कर्म जानात्युपस्थितम् ।
तत्तच्छसति भूतञ्च मनो यद्भावि तत्तथा ॥

गुणाना सत्त्वादीना कर्म सुखदु खमोहात्मकमुपस्थित जानाति स्वप्नेऽप्यनुभवतीत्यर्थ । यद्भावि यद्भविष्यत्कर्म तत्तच्छसतीति, इत्यादि । इदमेव स्पष्टयति-अथ यथाक्रमोऽगमित्यादिना । अथैतच्छरीरारम्भकक्रमण किञ्चिदेवावशिष्टत्वे यथाक्रम । एतच्छरीरमातव्यवहितोत्तरभाविशरीरावच्छेदेन यादृशमुखदु खजनकादृष्टवान् भवति तादृश शरीरादिकमाश्रित्योभयान् धर्माधर्मफलभूतान् पाप्मनो दु खान्यानन्दान् सुखानि पश्यति । चकारोऽनुक्तसकारणसमुच्चयार्थ । प्रासङ्गिकमुक्त्वा प्रकृता स्वप्नावस्था विशिष्य निर्णेतुमाह—स यत्राय प्रस्वपितीति । यत्र यदालोकस्य चक्षुरादे बाह्येन्द्रियजातस्य जाग्रत्यपि किञ्चिदिन्द्रियस्य ज्ञानाजनकत्वादाह—सर्वावत इति । सर्वस्येत्यर्थ । न च जाग्रदवस्थायामपि मानसज्ञानकाले यावद् बाह्येन्द्रियजन्यज्ञानाभावोऽस्त्येवेति वाच्यम्, अवस्थाविभाजकोपाधयवच्छेदेन ज्ञानजनकत्वाभावस्य विवक्षितत्वात् । तस्य च जाग्रदव्याकृतत्वालोकस्य शरीरस्य सर्वावत सर्ववत तच्चाक्षुषत्वेन । मात्रा ज्ञानेन्द्रियाद्येकदेशमपादायापच्छिद्येति व्याख्यातार । मात्रा करणव्युत्पत्त्या ज्ञानानुकूला शक्तिमपादाय फलानुपहिता कृत्वा । तदा दर्शयति—स्वय विहृत्येति । तेन चाक्षुषादियोग्यतायास्तदानी चक्षुरादौ सत्यपि न क्षति० । स्वय निर्माय विलक्षणज्ञानसामग्री सम्पाद्य क्रियाकारकफलानि कृत्वेति कर्मण परैरध्याहारात्कथ जागरविघटन स्वप्नसामग्रीसम्पादन चात्मना क्रियत इत्याशङ्क्याह—स्वेन भासा स्वेन ज्योतिषेति । स्वप्नभोगजनकादृष्टवशाद् बोध । भा इति अदृष्ट ज्योतिरिति च सस्कार साधर्म्यादि ग्राह्य । स्पष्टञ्चेद पद्मपुराणे—

जाग्रत्कर्मक्षयवशात्स्वप्नभोग उपस्थिते ।
बोधावस्था तिरोधाय देहाद्याभ्रयलक्षणम् ॥ इति ।

कर्मोद्भावितसंस्कारस्तत्र स्वप्नरिरंसया ।
अवस्था च प्रयात्यन्या मायावी मायया वृत ।

अस्वपितीति प्रतीकोपादान पूर्वोक्तस्य प्रस्वपितीत्यस्याय ग्रन्थो विवरणार्थ इति सूचनार्थम्। अन्यथा सुषुप्त्यवस्थाप्रत्वभ्रान्ति. स्यादिति व्याख्यातार । अत्र स्वप्नावस्थायामय पुरुषो जीव स्वयज्योतिर्भवति । अन्यनैरपेक्ष्येणैव ज्ञानादिमान् भवति ।

न च मनसोऽपेक्षणात्तैवमिति वाच्यम्, ज्ञानत्वव्याप्यधर्मावच्छिन्नकार्य त्वप्रतियोगिककारणताश्रयापेक्षाया एव व्यवच्छेद्यत्वाद्व्याप्यत्व भेदगर्भम्। मनसश्च ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्व तदपेक्षाया अनयात्वात्। न च तथापि स्मृतित्वावच्छिन्नकार्यत्वनिरूपितकारणताश्रयस्य संस्कारस्यापेक्षणाद्दोषनादवस्थ्यम्, अनुभवविभाजकोपाधित्वादादृव्याप्ये-चादेरुक्तत्वात्। तेन त्वङ्मनोयोगादेरपेक्षणेऽपि न क्षति । स्वप्नेऽपि चाक्षुषादिक न भवत्येव, किन्तु मानसज्ञान एव चाक्षुषत्वादिकमारोप्यते। न च तथापि तादृज्ञानानुमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयस्य परामर्शादेरपेक्षणाद्दोष इति वाच्यम्, स्वप्नत्व मानसत्वव्याप्यजातिविशेषः। अनुमितित्वादिकमपि संस्कारास्यदोषवशादेवारोप्यते, इत्यभ्युपगमात्। स्मरण विनैवाढष्टोद्बोधितसहकारकृतेन मनसा स्वप्नज्ञानोत्पत्तेः। न चैव संस्कारस्य प्रमाणत्वापत्ति, यदसाधारण सहकार्यधीमनोबहिर्विषयकभ्रमा जनयति तस्यैव तथात्वादिति वाच्यम्, प्रत्यक्षप्रमाण एवान्तर्भावादिष्टापत्ते ।

वस्तुतस्तु स्वाप्नमहमुखी, अहं शय्याया सुप्त इत्यादि ज्ञानमपि भ्रम एव। न च विषयाबाधात्कथ भ्रमत्वमतिप्रसङ्गादिति वाच्यम्, लाघवेन स्वप्नवहानाडीमनःसयोगस्यैव दोषत्वकल्पनाद् भ्रमस्य संभृतसामग्रीकत्वात्। उक्तज्ञानेऽपि सुखान्तरशय्यान्तरादेरेव विषयत्वकल्पनात्। अत स्वप्नज्ञानत्वावच्छेदेनैव भ्रमत्वम्। स्वीकृत चेद 'संशयस्वप्नौ तु न भ्रमे' इति मणिकृत्व्याख्याया साम्प्रदायिकैः। एवञ्च विषयतासम्बन्धावच्छिन्नप्रत्यक्षनिष्ठकार्यतानिरूपितातादात्म्यावच्छिन्नकारणताकस्य विषयस्यैव स्वय ज्योतिष्ट्वेन व्यवच्छेद । अत एव स्वयमेव व्यवच्छेद्य प्रकाशयन्नाह—न तत्र रथा इत्यादि। रथयोगा. अश्ववृषभादय., आनन्दा कामिनीस्पर्शादिजन्याः, मुद पुत्रादिलाभजा, प्रमुदो विद्यादिसम्पत्पुत्रादिदर्शनजा । आप्लोदका वेशन्ता, अगाधनीरा पुष्करिण्य, स्रवन्त्यो नद्य । प्रस्रवो बाह्य आभ्यन्तरश्च। आद्यो द्विविध कठिन-द्रवभेदात्। तत्र रथवेशन्तोक्त्योरुक्तम्। तेजस्यपि सुवर्णादौ काठिन्यसत्त्वात्, तत्तान्त-

म्बन्धस्याविवक्षितत्वाद् बाधादेश्च प्रत्यक्षाभावेनात्र तदनभिधानादान्तरसुखादि तत्रानन्दाद्युक्त्योक्तम्। एवञ्च स्वाप्नज्ञानमात्र भ्रम इत्युक्तम्। सृजत इति तु विषयित्वासम्बन्धस्य कार्यनावच्छेदकत्वेन सङ्गमनीयम्। रथादीन् जानातीत्यर्थ। स्वप्नज्ञानमपि परम्परया बाह्यनिमित्तकमिति टीकादिदर्शनात्। अत स्वप्ने सृष्टयन्तरमेवेत्यपास्तम्।

न च सृजते इत्यत एव तल्लाभोऽन्यथा घटादेरप्युत्पत्तिर्न स्यात्। घटो जात इत्यादीनामभिव्यक्त्युत्पत्तिपरत्वेनैवान्यथासिद्धेरिति वाच्यम्; तदुत्पादकक्लृप्तसामग्र्यास्तदा विरहात्। सामग्र्यन्तरकल्पने च तवैव गौरवात्। तदेवाह-स हि कर्तेति। हि यस्मात्स जीवो ज्ञानादीनामेव कर्ता। न तु स्वप्ने दृश्यमानस्य नानाविधस्य कार्यस्य तदुपादानविषयकप्रत्यक्षानुपपत्त्या तत्तदुपादानाभावेन चैकस्य जीवस्य तत्कर्तृत्वानुपपत्ते। तदप्येते श्लोका। स्वप्नज्ञानस्य विषयाजन्यत्व एते मन्त्रा उपन्यस्यन्त इत्यर्थ। स्वप्नेन तदवस्थया शारीर चक्षुरादिबाह्येन्द्रियमभिप्रहृत्य स्वस्वविषयाद्विमुखीकृत्य, अमुम ज्ञानसामान्याभावशून्य। तदेवाह—सुप्तान् विशेष्यनिष्ठात्यन्ताभावप्रतियोगिन पदार्थान्। अवाचाकशीति जानाति। सुप्तान् वासनाफलरूपानित्यादि गौणार्थस्य परैरपि वाच्यत्वात्। शुक्र प्रकाशकमिन्द्रियगणमादाय तत्सम्बन्धीभूय स्वसयुक्तमन प्रतियोगिकसयोगाश्रयत्व सम्बन्ध। पुन. स्थान जागरावस्थामेति प्राप्नोति हिरण्मय प्रकाशप्रचुर पौरुष पुरुष एव एक एव हन्ति गच्छति जाग्रदाद्यवस्था लोकान्तर चेत्येक स॥

कदाचिच्च भावितस्यैव स्वप्ने दर्शनमित्याह-प्राणेनेति। अवर बीभत्स कुलाय शरीरमात्मनोऽहसत्वेन रूपितत्वात् कुलायात्तदानी परिगृहीतशरीराद्बहिश्चारित्वात्, शरीरान्तरस्यापि स्वप्ने परिग्रहदर्शनात्। अमृत पूर्वशरीरसम्बन्धवानेव यत्र काम यत्र विषये कामोद्भवस्तम्, इयत प्राप्नोत्यत एव मोक्षधर्मे—

अत्राह खाऽन्वय भाव स्वप्ने विषयवानिव।
प्रलीनेरिन्द्रियैर्देही वर्त्तते देहवानिव॥
अत्रोच्यते यया ह्येतद्वेद योगेश्वरो हरि।
तथैतदुत्पन्नार्थं वर्णयन्ति महर्षय॥
इन्द्रियाणा श्रमात्स्वप्नमाहु सर्वगत बुधाः।
मनसस्त्वप्रलीन वात्तत्तदाहुर्निदर्शनम्॥

कार्ये व्यासक्तमनस मकल्पो जाग्रतो हि ।
यद्वन्मनोरथेनैव स्वप्ने तद्वन्मनोनन् ॥
समाराणामनल्पाना कामात्मा तदवाप्नुयात् ।
मनस्यन्तर्हित सर्व वद सोम्यपूर्वम् ॥

अनाहुति पूर्वपक्षावतार । देहवानिव विषयवानिव वर्त्तते । इन्द्रिय-व्यापारमावेशति तद्वद्ग्राह्यविषयकज्ञान यत्स्वप्ने भवति तन यथा हेतु । एवमनोमात्रादिदर्शनमपि कथ देहवानिवेत्यत्र सिद्धादिशरीर ग्राह्यम् । मनुष्यादिसगवच्छिन्नादपि विजातीयशरीरावच्छिन्नमात्मानुमन्यतेऽत इवशब्द । अत्रोच्यते इति पञ्चद्वारापत्रम । प्रामाण्यार्थमाह—यमाप्येत-दिवादि. महर्षय इत्यन्तम् । इन्द्रियाणा चक्षुरादीना यमाज्जाग्रदवस्थाया विषयव्यापारजनितायासात् स्वप्न स्वाप्नज्ञानमात्र गत ज्ञान यत्र । तथा च चक्षुरादिव्यापाराभावेन तदसाधारणविषयाणा ज्ञाना-सम्भवाद् व्यक्त भ्रमत्वमित्याह । मनसस्तु प्रवानत्वाज्ज्ञानमत्कारि-सम्भवात्तन्निदर्शन तस्य तस्यार्थनिश्चयन दर्शनमाह । दृष्टान्तेनाप्याह—कार्ये इति । कार्ये कामिनीराज्यैश्वर्यविशेषादावासक्तमनिविष्ट मनो यस्य । यथा जाग्रद्दशाया सकल्पदशाया सकल्पवशादुपस्थितपदार्थाना समर्थकल्पनया तत्तद्विषयलाभस्तथा स्वप्नेऽपि । तथा च सिद्ध भ्रमत्वम् ।

नन्वेतच्चन्मन्यनुभूताना मप्यर्थाना कथ स्वप्न दर्शनमत समाराणामिति। जन्मान्तरानुभूत पश्यन्तीत्यर्थ । यद्व्यतिरेकेण जीवनमनुपपन्न तदनिच्छन्त्य जन्मान्तरानुभूतस्याप्येतज्जन्मनि न स्मरणम् । तथा च स्वप्नेऽपि तत्सस्कारद्वारो न स्यात्, अत मनसीति । सस्कारोन्मीलित विषयतापन-मतान्द्रिय वासस्कारस्यान्तर्हित वासि । जाग्रद्दशाया तथाविधेऽपि स्वप्ने फलबलादन्यविशेषेण तद्द्वारक कल्प्यते, इति भाव । केचिच्च विषय ददर्शना दश्यत्व इत्याह—

तत्तदुपवर्त्तन्ते गुणा रात्रिनामना ।
सात्विका वा यथायोगमान्तर्यज्ञोदय ॥
तत्र दृश्यमसम्बन्धान्नानित्तक्रोडगत् ।
तन्मनोगतभावैस्तदृश्यादृश्यमय ॥
मनसरिन्द्रियैर्यद्यन्मनस्यति नानस्म् ।
तत्स्वप्नेऽनुभवते मनोमात्रनिमोहने ॥

व्यापक सर्वभूतेषु वर्त्तते प्रतिपद्य तम् ।
आत्मप्रभावात्त विद्यात्सर्वा ह्यात्मनि देवता ॥
मनस्यन्तर्हित द्वार देहमास्थाय मानुषम् ।
यद्यत्सदसद्व्यक्त स्वपित्यस्मिन्निदर्शनम् ॥

अयमर्थ —यथायोग यथाकर्मानन्तर्यफलोदय व्यवधानेनाव्यवधानेन वानन्तर भाविफलोदयो यस्य केषाञ्चित्स्वप्नाना निष्फलत्वदर्शनार्थं तत पश्यतीत्यादि । असम्बन्धानिष्फलत्वाद्धातोत्तरा आकाशगमनादय, पित्तोत्तरा अग्निदर्शनादय, श्लेष्मोत्तरा जलदर्शनादय केचित्स्वप्ना प्रतिबुद्धेन विशिष्य वर्णयितुमशक्या भवन्तीत्याह—रज इत्यादि । विकारैर्दुरन्वयदुर्निरूपित-मिदमेव स्वप्नमुपुनरित्याह । स्वप्नपूर्वकाल स्वस्थचित्तो यत्स्वप्ने पश्यति तत्फलत्वेवेत्याह—प्रसन्नैरिति । उपसहरति —व्यापकमिति । सभूतेषु चक्षुरादिषु व्यापक तज्जन्यज्ञानसहकारित्वादत एवाप्रतिपद्य ज्ञानमात्रोपयोगि-त्वेनाप्रतिहतत्वाच्चक्षुरादीना च भिन्नेन्द्रियजन्यज्ञानेऽनुपयोगादात्मप्रभा-वादात्मसयोगात्तु नानाविध पदार्थं विद्याज्ज्ञानीयात् । रूपादीना कथ मनसा ग्रहण इत्यत आह—सर्वा हीति । देवता इन्द्रियाणि स्वजन्यज्ञानजन्यसस्कार-द्वारेण सर्वेन्द्रियाण्यात्मनि वर्तन्तेऽनस्तत्सहकारेण मनसा तत्तद्विषयक ज्ञानमिति भाव । अन्तर्हित द्वार ज्ञानसाधनमिन्द्रियादि यत्रेति । तद्विशेषण मरणावस्थानायाह—मनसीति। ज्ञानाभिमुखे सतीत्यर्थ ।मानुषमिति प्राधान्या भिप्रायम् । सदसज्जन्मानुभूतमसदन्यज-मानुभूतमव्यक्त सस्कारविषयीभूत निदर्शनविषयाऽस्मिन्स्वप्नाख्ये दशाविशेषे भवतीति शेष । स्वपितीति । स्वप्नपदार्थस्य सपरिकरस्यैव निरूपणमित्यर्थ ।

यद्वा देहमाम्यायावक्तव्यमात्मा स्वपितीत्यन्वय । सदसन्निदर्शन-मुक्तरूपमदसद्विषयक दर्शनमस्मिन्निहैवावस्थाभेदे भवतीत्यर्थ । तेन देहवा-निवेति यदुक्त तदप्युक्तरितम् । देहान्तरप्राप्तिज्ञानस्य भ्रमत्वोक्तेरिति बोध्यम् । तदेवाह—स्वप्नान्त इति । अन्तोऽवस्था उच्चावच देवमनुष्यादिशरीरम् । दृश्य-मान इति देवादिशब्दस्य कर्त्तरि रूपम् । देव उद्भूतज्ञानशक्ति । बहूनि रूपाणि ज्ञानानि रूप्यन्ते विषया यैभिरिन्द्रियैरुत्पत्ते । सात्त्विकादिभेदेन त्रैविध्यमाह—उर्ध्वेति । स्त्रीभि सह क्रीडनिव जलादिव हसन्निव "जक्ष-भक्षाहसनयो" "जक्षित्यादय षट्" इत्यभ्यस्तसज्ञात्वात् "झाभ्यस्ताच्छतु" इति नुमभाव । भयानि पश्यन्तीत्यत्रापीवशब्द, स च सर्वत्रोक्तज्ञानस्य भ्रमत्वसूचनार्थ । अतश्च स्वप्नेऽपि न प्रपञ्चसम्बन्धाभाव इत्याह—आराम-

मिति । स्वप्ने आत्मन इन्द्रियसम्बन्धो नास्तीति स्फुटयन्नाह—तदिति । आयतनं शरीरं प्रयानमिति यावत् । न खलु यदकस्मादुच्छ्वसनिद्र न दुर्भवितुमर्हति । शयान न प्रबोधयदित्यादिप्रार्थनिपद्यसत्वेऽपि प्रकृतोपयुक्तमेव हेतुमाह—दुर्भिषजमिति । यदवन्द्रियमकस्मादुच्छ्वसनिद्र आत्मान प्रतिपद्यत । तदुच्छ्वसितमित्यं भवति । तदिन्द्रियविकल्पा भवतीतिभाव ॥

स्वप्न नृत्यन्तरमेवेति ह स्म नाह—अथो इति । खलु निश्चयेन आह: वृद्धा । तयाचाम्य सिद्धान्तस्य सूचनम् । अस्यात्मन एषाऽवस्थाभिदा जाग्रितदेश एव जागरूकस्थायाम् य विषया सन्ति पश्यन्तया तद्विषयकमेव स्वप्नज्ञान न स्वप्नविषयकम् । हेतुमाह—यानि होव जाग्रत्पश्यति तानि मुम्ह इति । स्पष्टम् । अत स्वप्न विषयान्तरसृष्टयङ्गीकारा व्यर्थो नियुक्तिकश्चेति भाव ॥

स्वप्नोत्तर कदाचित्सुषुप्तिसत्वेऽपि ता बहुवक्तव्यतयाऽनुद्धृत्य लोकसिद्ध जागरूकत्व प्रदर्श्याह— स वा एष रत्वा क्रीडित्वा चरित्वा दृष्ट्वा दृष्टाननुभूय पुण्यपापपद तत्कार्यपरम् । इतरामानायो न्याय । अयतयन् प्रतिन्याय प्रतिकूलमित्यय । प्रतियोनि यथास्थानमा द्रवति धावतीव प्रबुद्धो भवतीत्यर्थ । अत्र स्वप्न यत्किञ्चित्पश्यति सदसद्वा तनानन्वागताऽसम्बन्धा भवति, स्वप्ने ब्राह्मणचाण्डालादिदर्शने धर्माधर्मानुत्पत्ते । अनन्याद्वयफलनाकृत्व जीवस्य दर्शयति—तद्यथेति । स्पष्टोऽर्थ ।

तदुत्तर न पतति—'तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्त सहत्य पक्षौ सल्लयायैव निियत एवमेवाय पुरुष एतस्मा अन्ताय धावति, यत्र सुप्तो न कञ्चन काम कामयते न कञ्चन स्वप्न पश्यति ॥ ता वा अस्यैता हिता नाम नाड्यो यथा केश सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति । शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैन घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रदस्य पश्यति तदनाविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेद सर्वोऽस्मीति मन्यते साऽस्य परमो लोक ॥ तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभय रूपम् । तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्य किञ्चन वेद नान्तरमेवमवास शारीरमा मा प्रज्ञानेनात्मनाभिसम्परिष्वक्तो न बाह्य किञ्चन वेद तदा अस्यैतदाप्तकाममात्मकाममकाम रूप शोकान्तरम् ॥ अत पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा यत्रा अस्यैतेनोऽन्तेनो भवति अनुगाहोऽननुगाहो पोल्कसोऽपोल्कसश्चाण्डालोऽचाण्डाल श्रमणोऽश्रमण

तापसोऽतापसोऽनन्वागत पुण्य पुण्येनानन्वागत पाप पापेन तीर्णो हि तदा सर्वान्शोकान्हृदयस्य भवति ॥ यद्वै तन्न एष पश्यति पश्यन्वै तद्द्रष्टव्य न पश्यति नहि द्रष्टुर्दृष्टे विपरिलोपो विद्यतेऽविनाशित्वात्तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यत्पश्येत् ॥ यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति नहि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यज्जिघ्रेत् ॥ यद्वै तन्न रसयति रसयन्वै तद्रस न रसयति नहि रसयितू रसाद्विपरिलोपो वर्ततेऽविनाशित्वान्न तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यद्रसयेत् ॥ यद्वै तन्न वदति वदन्वै तन्न वदति वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यद्वदेत् ॥ यद्वै तन्न शृणोति शृण्वन्वै तच्छ्रोतव्य न शृणोति नहि श्रोतु श्रुते विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यच्छृणुयात् ॥ यद्वै तन्न मनुते मन्वानो वै तन्मत वा न मनुते नहि मन्तुर्मते विपरिलोपो विद्यतेऽविनाशित्वान्नहि तद द्वितीयमस्ति ततोऽन्यद्विभक्त यन्मन्वीत ॥ यद्वै तन्न स्पृशति स्पृशन्वै तत्स्प्रष्टव्य न स्पृशति नहि स्प्रष्टु स्पृष्टे विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यत्स्पृशेत् ॥ यद्वै तन्न विजानाति विजानन्वै तद्विज्ञेय न विजानाति नहि विज्ञातुर्विज्ञानाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्त यद्विजानीयात् ॥ मलिल एको द्रष्टाद्वैतो भवति एष ब्रह्मलोक सम्राडिति हैनमनुशशास याज्ञवल्क्य । एषास्य परमा सपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" । मैत्रेयीब्राह्मणे मात्रासमर्गंस्त्वस्य भवतीत्युक्त्वा "यद्वै तन पश्यन्तीत्यादीनि विजानीयादित्यन्तानि" वाक्यानि पठित्वा "यत्र वा अन्यदिव स स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यद्रसयेदन्योऽन्यदभिवदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन क पश्येत् केन क जिघ्रेत्केन कमभिवदेत्तत्केन क शृणुयात्तत्केन क मन्वीत तत्केन क स्पृशेत् तत्केन क विजानीयात् येनेद सर्वं विजानाति त केन क विजानीयाद्विज्ञातारमरे केन विजानीयाद्" इत्युक्त्वा "शासनामि मैत्रेय्येतावदरे खलु मृजत्वमिति होक्त्वा याज्ञवल्क्य प्रवव्राज" इति पठ्यते ।

अयमर्थ —श्येन शशादो बृहच्छरीर सुपर्णं कपोताद श्येनाल्लघुशरीर क्षिप्रगामी । सलय सम्यग्नीड, लीयतेऽस्मिन्निति व्युत्पत्ते । म्रियते गच्छति । दार्ष्टान्तिकमाह—एवमय पुरुषो जीव । एतस्मै प्रसिद्धाय-

सुषुप्तिरूपायान्नावस्थाविशेषाय धावति गच्छति। तदनुकूल यन्मन-स्तयागराहित्य तद्वान्भवति। सुषुप्तावस्थास्वरूपमाह—यत्र सुप्त इति। सुप्ता निद्रामुपागत। सिद्धा[क्ष्य ?]नाडिमनःसयोगो निद्रासिद्धावे च पुरात-स्तावारणे नाडीवृत्तिजातिविशेष इत्यङ्गीकारात्। सुषुप्तावपि निद्रातति प्रयागापगमात्। जाग्रद्वैलक्षण्यमाह—न कञ्चनेति। काम यावित्पुत्रक्षेत्रादिरूप विषय न कामयत नेच्छति। स्वप्नवैलक्षण्यमाह—न कञ्चनेति। स्वप्न तदव-सम्बन्धम्।

प्राणेन रक्षन्पर कुलाय बहि कुलादमृत चरित्वा।
स ईयते अमृतो यत्र काम हिरण्मय पौरुष एकहस ॥

इति श्रुत्या जाग्रद्दशायामुत्कटच्छाविषयीभूतानामेव पदार्थाना प्रायश स्वप्न दर्शनात्। न कञ्चन काम कामयते। इत्येतत्कार्यदर्शनव्यतिरेकमुखेनव स्वप्नवैलक्षण्योक्ति। इयमवस्था कदाचिद्भवतीत्यत आह—ता वा अस्यैता इत्यादि। हितनना नाड्य केशसहस्राणवदत्यतरपरिमाणास्तिष्ठन्ति। तया च पूर्व गार्ग्य प्रत्यवोचत्—

'अय यदा सुषुप्तो भवति यदा नु कस्यचन वेद हिता नाम नाडयो द्वा-सप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभि प्रत्यवसृत्य पुरीतति-शेत' इति। हिता इति। निखिल दृष्टानादिरसवहनेन सर्वेभ्य प्राणिभ्यो जनन्य इव हितकारिण्य। पनाकारो मासपिण्ड पञ्चच्छिद्र सनालो हृदयम्, तस्मादेकाधिक शत कुलनाड्य शास्त्रान्तरोक्ता शत चैका च हृदयस्य नाड्यस्तासा मूर्द्धानमभिनिसृतैकेति छान्दोग्यदर्शनात्। तासामेकस्य कुलशत नाड्य तासा एकस्या कुल द्वासप्ततिसहस्राणि एवमन्यासामपि सुषुम्णा च वर्णयित्वा। तनामलक्षणन्यायेनककुलमुररीकृत्योक्त रविस्थानाया निर्गता बहिर्मुखास्तानिश्चाश्वत्थपर्णराजिभिरिव सर्व शरीर व्याप्तमिति तद्विवृत्या सारेणार्थ। अत एव पद्मपुराणे—

कदम्बकुसुमाद्भूतकेसरा इव सर्वत।
प्रसृता हृदयात्तस्माद्याभिर्व्याप्त शरीरकम् ॥
हित बल प्रयच्छन्ति यस्मात्तत हिता स्मृता।
द्वासप्ततिसहस्रेस्ता सख्याता योगवित्तमै ॥
हृदयात्तास्तु निष्क्रान्ता मयार्काद्रश्मयस्तथा।
एकोत्तर शत तासु मुख्या विश्वविनिर्गता ॥

प्रतीन्द्रिय दश दश निर्गता विषयोन्मुखा ।
नाडय कर्मादिहेतुत्वात्स्वप्नादिफलभुक्तये ॥
वहन्त्यपा यथा नद्यो नाडय कर्मफल तथा ।
अनन्तैकोर्ध्वगा नाडी मूर्द्धपर्यन्तमञ्जसा ॥
सुषुम्णेति समादिष्टा तया गच्छन्विमुच्यते ।

इति प्रत्यवमृष्य ज्ञानादिविशेषगुणोत्पत्तिप्रातिकूल्येन पुरीतत्स युक्तमनोऽवच्छिन्ने भूयेत्यर्थ । शुक्ल श्लेष्माधिक्ये, नील कृष्ण पिङ्गल पीत पित्ताधिक्ये, हरित श्यामो दूर्वादलाभ कृष्णश्चाञ्जनाभ वाताधिक्ये एते च तन्नाडीगतानामन्नरसाना वर्णा । स्वप्नाद्यैलक्षण्य स्फुटयितु स्वप्नस्वरूपमाह—अथेत्यादि । यत्र स्वप्नावस्थायाम् । जिनन्तीति । "ज्या वयोहानौ" इत्यस्य रूप विच्छाययति पलायन कारयति । उपलक्षणञ्चैतदित्याह—यदेवेति । जाग्रदवस्थाया यदेव भय पश्यति तदेवात्र स्वप्नावस्थायामविद्यया मन्यते । अविद्ययेत्यभेदस्तृतीयार्थ । मतिरूपधावर्यस्तदन्वयादिभयमिति द्वितीयार्थो विषयत्व "अविद्याहमतिर्भ्रम" इत्यमर । भ्रमाभिन्नज्ञानविषय करोतीत्यर्थ । स्वप्नज्ञानमात्रस्य भ्रमत्वाल्लाघवेन स्वप्नवहनाडीसयोगस्यैव दोषत्वकल्पनात् । एतेन भयानि पश्यन्तीति पूर्वोक्त व्याख्यातम् । एव स्वाप्न दु खमुक्त्वा सुखमप्याह—अथ यत्रेति । सुखमात्रस्यदमुपलक्षणम् । एव पापपुण्याभ्या स्वप्नहेतुविघ्यमभिधाय प्रकृतमनुसरन् पूर्वोक्त सुषुप्तिस्वरूपमनुवर्दति—अथ यत्र सुप्त इति । तदवस्थाया उत्कर्षमाह—तद्वा अस्यैतमिति । अतिच्छन्द कामातीतमपहतपाप्म पापपुण्यकार्य सुखदु खराहित्यात् । अत एवाभयमिष्टवियोगानिष्टसयोगचिन्ताशून्यत्वादस्य जीवस्य रूप तत्कालीन स्वरूपम् । तत्र दृष्टान्त यथा कश्चन कामी प्रियया स्त्रियात्यन्त स्वेष्टया युवत्या सम्परिष्वक्त सम्यगालिङ्गित वाह्य चक्षुरादिकमान्तर पुत्रादिक स्वमयुक्त नम्रादिव न जानात्यय शारीर आत्मा जीव प्राज्ञसञ्ज्ञेन स्वात्मना सपरिष्वक्तस्तादात्म्य प्राप्त जाग्रत्स्वप्न सुषुप्त्यवस्थासु विश्वतैजसप्राज्ञसञ्ज्ञाना जीवस्यैव नैयायिकै स्वीकार्यत्वात् । तत्र प्राज्ञसञ्ज्ञाप्रयोजकावस्थापन इति यावत् । वाह्य घटादिकमान्तर बुद्धिमुखादिक च न जानाति तेन ज्ञानसामान्यशून्यत्वलाभ । वाह्याभ्यन्तरविषयकज्ञानानिरुक्तज्ञानस्यालोकवत् । आत्मैव कामो यस्य कामान्तरराहित्यमेवार्थ । तदेवाह—अकाममिति । अथ कथ तत्र सुखप्रसिद्धि, सुषुप्तौ जीवस्य विशेषगुणसामान्यशून्यत्वोक्ते सुखस्यापि तद्विशेषगुणत्वात् ।

चत्किञ्चद्विशेषणत्वस्यैव सामान्याभावविरोधित्वादत आह—शोकरूपच्छिद्र-रहित शोकावकाशरहित वा। तथा च शोकाभावमेवमेव सुखत्वेन व्यवहरन्ती-त्यर्थ। क्वचिच्छाखाया शोकान्तरमिनि पाठ। तत्रापि शोकस्यान्तरमिति व्युत्पत्या शोकाभावत्वमेवार्थ। तत्सामग्र्यभावमेव वक्तुमाह—अत्र पितेत्यादि।

वस्तुतस्तु पिता पितृत्वप्रकारकज्ञानविषयत्वाभाव नियतो भवति, तन जाग्रदादिसाधारण्य पितृमातृपद पुत्रादिसम्बन्धानामप्युपलक्षणम्। मानुषशरीरस्य सर्वोत्तमत्वेनाभिमतादृष्टजनकत्वात्प्रथम पितृमात्रोर्निर्देश। तद्भाग्य प्रकृत्याह—लोका अलोका इनि। लोका कर्मफलानि सुखदु खानि नुबन्ध्य यागादिजन्यत्वात्, दु खस्य च निषिद्धाचरणमूलत्वात्। आह—देवाऽदेवा इनि। विहिते यागादौ उद्देश्यत्वन निषिद्धे च तदुल्लङ्घनादौ प्रत्यवाय-साधनीभूताभावप्रतियोगियागानुद्देश्यत्वसम्बन्धेन तेषा घटकत्वात्। तत्प्र-मापकत्वेनाह—वेदा अवेदा इति। कर्मकृतविशेषमभिप्रेत्याह—अत स्तेन इत्यादि। स्तेनश्चोर, चौरत्वप्रकारकज्ञानाविषयो भवति। भ्रूणो गर्भ। योनियो वा। तथा च हेमाद्रौ देवल।—

सोऽनूचानगुणोपेतो यज्ञस्वाध्यायवन्नित.।
भ्रूण इत्युच्यते शिष्टै शेषभोजी जितेन्द्रिय ॥

कर्मकृतविशेषस्य ज्ञानाभावमिदमुक्त्वा वाच्यात्मकविशेषस्यापि तमाह—चाण्डाल इति। ब्राह्मण्या शूद्राज्जात चाण्डाल, तन्निषादा शूद्राच्च पुल्कसा, स एव पौल्कस-स्वार्थिकस्तद्धित। आश्रमविशेषस्य ज्ञानाभावमाह—श्रमण इति। सन्यासीत्यर्थ। तापसो वानप्रस्थ भवतीत्यस्य सर्वत्रानुषङ्ग.। एव सुखहेतूनामेतज्ज्ञानाविरहाच्छोकाभावोपपत्ति।

ननु तदानी ज्ञानापत्तिरेव कथमित्यत आह—अनन्वागतमिति। स्वरूपस्य विशेष्यत्वान् बलीयत्व तदीयकर्मणा युगपद्वृत्तिनिरोधादत एव कुसुमाञ्जलौ प्रलयप्रस्तावे उक्तम्—"वृत्तिरोध सुषुप्तिवत्" इति। तद-वस्थाया शोकराहित्य यदुक्त तन्निर्गमयन्नुपसहरति—तीर्णो हीति। हि निश्चयेन तीर्णो भवति शोकरहितो भवतीति यावत्।

ननु तद्व्याख्याने हृदयस्येति पद व्यर्थमत ससारावस्थायामपि शोकादेरात्मधर्मत्व निषेद्धु बुद्ध्यर्थकहृदयपद बुद्धिसम्बन्धिन शोकान् व्यजतीति व्याख्यानमेव मुक्तमिति चेन्, सत्यम्, बुद्धिसम्बन्धिशोकराहित्यस्य ससारावस्थायामपि सत्त्वेन तद्वैलक्षण्यानुपपत्ते.। नहि स्फटिके लौहित्यारो-

पेऽपि वस्तुतस्तस्य लौहित्यराहित्य नास्तीति। न च परम्परासम्बन्धाभाव एवात्र प्रतिपाद्य दुःखाभावलक्षणाया उभयत्र साम्येऽपि मम समवाय-सम्बन्धस्य प्रतियोगितावच्छेदकत्व तव तु दुःखाश्रयान्त करणतादात्म्या-रोपविशेष्यतासम्बन्धस्य तथेति महद्गौरवम्। अथ हृदयपदसार्थक्याय तदपि सोढव्यमिति चेत्, असमवायिकारणसयोगप्रतियोगित्वसम्बन्धेन मनसि शोक-सम्बन्धस्य प्रसङ्गेन प्रतिपाद्यत्वात्। न च तद्वैयर्थ्यं पुरोतन्मन सयोगदशाया त्वक्सयुक्तमन प्रतियोगिकसयोगिविरहेण ज्ञानादेरनुत्पत्तिरिति, प्रकृतिसङ्कल्प-थत्वात्। शोकपदस्य फलतो विशेषगुणमात्रपरत्वमिति सूचयति—सर्वानिति। "बाधनालक्षण दुःखम्" इति न्यायसूत्रे सुखादीनामपि दुःखानुवन्धित्वेन दुःखत्वमित्यस्य व्यवस्थापितत्वात्। सङ्क्षेपस्तु प्रसङ्गेन—"यथा षडिन्द्रियाणि षड्विषया षड्बुद्धय सुखदुःखौ शरीरश्चैकविंशति। अत्र शरीर दुःखा-यतनतया, इन्द्रियविषयबुद्धयोर्दुःखसाधनतया सुखञ्च दुःखहेत्वनुषङ्गात् दुःखञ्च स्वरूपेणैव दुःखमिति व्यवहारविषय" इति वार्तिकार्थ। सुखानुषङ्गित्वेन दुःखहेतवो यथासाधनपारतन्त्र्य क्षयित्व कामश्चेति। पारत-न्त्र्यस्य दुःखहेतुत्व 'सर्व परवश दुःखम्" इत्यादि सर्वसिद्धम्। इष्टवियोगे दुःसजियोगस्यानुभविकत्वस्यापि तथात्वम्। काम इच्छा, सा चोद्देश्यत्वेन मुखस्य रागश्च सुखस्य साधनस्य व्यापिका। सुख तत्साधन वानिच्छत सुखानुदयात्। सुखसाधनञ्च द्वेधा—सुलभ दुर्लभञ्च। तत्राप्यन्ता दुःखफलैव। अन्त्यापि द्विविधा साधनस्यानिषिद्धत्वनिषिद्धत्वभेदात्। तत्रान्त्या स्वरूपत कार्यतोऽधर्मजननद्वारा च दुःखहेतु। आद्यापि शरीरपाटवाभावे दुःखहेतु तत्सत्त्वेऽपि सविघ्ना निर्विघ्ना च। आद्या दुःखहेतुरेव। द्वितीया द्विविधा अनिष्टसम्भिन्नविषया तद्विपरीता च। प्रथमा मधुविषसम्पृक्तान्नभोजनेच्छादि-रूपा स्पष्ट दुःखहेतु, द्वितीयापि साफल्यवैफल्याभ्या द्वेधा। तत्रान्त्या सुतरा दुःखहेतु। प्रथमापि तथैव, विषयस्य परिणतिविरसत्वेन दुःखस्याग्रेऽवश्य-जनयिष्यमाणत्वात्। व्यामोहविशेषाद्विषयमात्रभग्नस्यापि तदिच्छाधाराज-नानात्। इच्छान्तरस्य दुःखाभिन्नविषयत्वदुःखावश्यकत्वाद् धारान्तर्गत-कतिपयेच्छाना फलोपधानेऽपि मध्येऽन्ते च दुःखस्य दुर्वारत्वादिति सिद्धम्। सुखानुपक्त कामो दुःखहेतुरित्याकरे स्थितम्।

प्रकृतमनुसराम*। एवञ्च तच्छरीरावच्छिन्नतदात्मसमवेतविशेष-गुणप्रागभावसमानकालीनस्तदात्मवृत्तिस्तदात्मविशेषगुणसामान्याभावस्तदा-त्मन सुषुप्तिरिति। घटादिवृत्ति। वृत्तितदभावे व्यभिचारवारणाय तदात्म-वृत्तिरिति। मरणे मुक्तौ च तद्वारणाय कालीनान्तम्, तत्रापि मृतशरीरे केन-

चित्परपुरप्रवेशस्य क्रियमाणस्थले तच्छरीरावच्छिन्नविशेषगुणप्रागभाव-सत्त्वादुक्तम्—तदा ममभवेनेति। देहान्तरे तदात्मन्यपि विशेषगुणस्योत्पद्यमानत्वात्। तच्छरीरावच्छिन्नेति विशेषगुणविशेषणम्। धर्मादिस्तदापि सत्त्वायोग्यत्वमपि तत्र देयम्। तेन स्वसामानाधिकरण्यकालिकविशेषणतोभयसम्बन्धेन यागविशेषगुणावच्छिन्नत्वे सति सामानाधिकरण्य स्वप्रतियोग्यवच्छेदकावच्छेद्यप्रतियोगिकत्वसत्त्युभयसम्बन्धेन तादृशविशेषगुणप्रागभाव-विशिष्टा विशेषगुणध्वंस इति फलितार्थः। विशेषगुणध्वंसमात्रस्य जन्यत्वादात्मन्यपि सत्त्वात् सत्यन्तम्। मुषुप्तावपि पूर्वोत्पन्नगुणसामानाधिकरण्यस्य विशेषगुणध्वंसे सत्त्वात् स्वसामानाधिकरण्यनिवेश [शे] स्वपदलक्ष्यत्वाभिमतसुषुप्त्यात्मकविशेषगुणाध्वंसपरम्। स्वत्वस्य परिचायकमात्रेणानिवेशानानुगम, सम्बन्धस्वाननुगमग्रन्थादोषत्वात्। मुक्तौ व्यभिचारवारणाय विशिष्टान्तम्, अन्यदीयविशेषगुणप्रागभावस्य कालिकेन मुक्तात्मगुणाध्वंसेऽपि सत्त्वात्सामानाधिकरण्यम्, अभावीयविशेषणतासम्बन्धाभ्यां बोध्यम्। इदञ्च तदेति शब्देन श्रुत्या सूचितम्। अग्रे विशेषगुणोत्पत्तेस्तदभिमतत्वात्। अत एवाग्रे सप्त दधति "स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव च पुण्यञ्च पापञ्च पुन प्रतिन्याय प्रतियोन्याद्रवति बुद्धान्तायैव" इत्यादि। मरणे व्यभिचारवारणाय स्वप्रतियोग्यवच्छेदकावच्छेद्यप्रतियोगिकत्वनिवेश। तत्र तु ध्वंसप्रतियोगिविशेषगुणावच्छेदकशरीरस्य प्रागभावप्रतियोगिनो ये नाविविशेषगुणास्तदवच्छेदकत्वाभावान दोष। इत्यात्मप्रासङ्गिकम्।

एव सुषुप्तौ ज्ञानसामान्याभावमुक्त्वा तदुपपत्तिं दृष्टव्यमप्याह—यद्वै तदित्यादिभि। अत्र पार्थसारथिमिश्राद्यनुसारेण व्याख्यान पल्लवयाम। दृष्टमादिशब्दा हि नेत्रादिजन्यज्ञानविशेषाणामेव वाचका, न तु ज्ञानसामान्यस्य, वाक्यान्तरवैयर्थ्यापत्तेर्लोकप्रसिद्धयविगमत्वाच्च। शब्दार्थनिर्णयस्य गन्धादीनामनुपादित्सयापि जिघ्रत्यादिपदानामप्रयोगात्।

यत्तु "दृष्ट्वा म्लायेद्" इत्यम्बोपरागप्रकरणन्यवाक्यस्य व्याख्यानं दर्शनमद न चाक्षुषे शक्तमिति दाक्षिणात्यनिबन्धकारैरुच्यते, तदसङ्गतम-शुद्धम्; क्वचिल्लक्षणया तथापि शक्तौ मानाभावात्। यत्तु "पश्यार्यश्चानालोचने" इति पारिभाषिके अचाक्षुषज्ञानार्थकैर्दीनुभिर्यो युष्मदस्मदोरादेशा न स्यु "चेतसा त्वा समीक्षते", परम्परासम्बन्धेऽप्य निषेव "भक्तस्तत्र रूप ध्यायति"। आलोचने तु "भक्तस्त्वा पश्यति चक्षुषा" इति व्याख्यानात्। मानसस्यापि परार्थदर्शनान्न चाक्षुषत्वमात्र शक्यतावच्छेदकमिति।

तदमत्, तत्र चाक्षुषज्ञानार्थधातुपर्युदाससामर्थ्येन पश्यार्थपदस्य तद्भिन्नज्ञानार्थकधातुपरत्वकल्पनात्। एकार्थपदयोगे विधिपर्युदासयोरसम्भवात्। अत एव "अक्षणोऽदर्शनाद्" इतिसूत्रे करणल्युडन्तदर्शनशब्देन सह नञ्समास-व्युत्पत्तादर्शनशब्देनाचक्षुपर्यायादिति व्याख्यानम्। अत एव "पश्यत्यचक्षुस्स शृणोत्यकर्ण" इत्यादौ चाक्षुषसमानविषयताकज्ञानाभिप्रायेण व्यवहारात्। अन्यथा चाक्षुषीया विषयता पश्यामीत्याकारकशब्दाभिलप्या न स्यादिति सर्वविप्लवप्रसङ्ग।

किञ्च "शमो दर्शने" इत्यत्र दर्शनपदेन चाक्षुषज्ञान सर्वैरेव वैयाकरणैर्व्याख्यातम्, निशामयति रूप दर्शने कि 'प्रणयिनो निशमय्य वधू कथा" अत्र मित्त्वमेव यथा स्यात् "निशामय तदुत्पत्तिम्" इति तु चौरादिकस्येत्यस्य तत्र व्यवस्थितत्वादित्यलमनेन। सुषुप्तौ मुक्तौ वा चाक्षुषादिज्ञानाना विपरिलोपो नास्तीति वक्तुमशक्यमेव। तस्मात् द्रष्ट्या-दिशब्दा शक्त्यभिप्राया इत्यवश्य वाच्या'। शक्तिश्च पदार्थान्तर कारणत्व वेत्यन्यदेतत्। उक्तञ्चात्र वेदान्तिभिरपि "यद्यपि सुषुप्तौ चाक्षु-षादिवृत्त्यवच्छिन्नचिद्रूप द्रष्ट्यादिक नास्ति तथापि तादृशावच्छिन्नत्व-योग्यतामादाय पाचकादिपदस्येव द्रष्ट्यादिपदस्य प्रयोग इत्यदोष." इति। तदयमर्थ —तदवस्थाया यत्र पश्यतीत्यर्थादाक्षिप्त तत्र दर्शनसामर्थ्या-भावात्। किन्तु पश्यतव चाक्षुषशक्तिमानेव द्रष्टव्य चक्षुर्ग्राह्यमर्थं न पश्यति। हेतुमाह—न हीति। द्रष्टेरिति पञ्चम्यन्त घ्राणरसविज्ञान-वाक्ये घ्राणाद्विपरि-लोपो विज्ञानाद्विपरिलोप इति घ्राणरसविज्ञानशब्दाना पञ्चम्यन्तदर्शनात्। अथवा तत्र षष्ठ्यर्थे छान्दसव्यत्ययात्पञ्चमी। उभयथाप्यर्थ समान एव व्याख्येय। शास्त्रान्तरे घातेर्विज्ञातेरितिसर्वत्र क्तिप्रत्ययस्यैव दर्शनात्। अत एव द्रष्टुरात्मनो या दर्शनशक्तिस्तस्या कदाचिदपि विपरिलोपो न विद्यते। सा ह्यसावविनाशिनीति मिश्राणां फक्किका समञ्जते। तर्हि कथ तदा दर्शना-नुत्पत्तिरत आह—न त्विति। द्रष्टुद्वितीय दर्शनसाधन चक्षुरित्यपि रूप दृश्य वा द्वितीयपद सहायार्थकमिति महाभाष्यादिदर्शनात्। यद्यपि दृश्य रूपादिक स्वरूपतस्तस्यामवस्थायामस्ति, तथापि दृश्यता दर्शनयोग्यता तस्यामव-स्थाया नास्तीति तेन रूपेणाभावाद् दृश्य नास्तीत्युच्यते। योग्यता चात्र सहकारिसमवधान निषेध्यत्वेन विवक्षित न तु कारणतावच्छेदकधर्ममात्र विषयनिष्ठदर्शनयोग्यताया अपि सार्वत्रिकत्वात्, स्वस्यापि सहकारित्वात्सा-धनमात्रनिषेधानुपपत्तिरतस्ततोऽन्यदिति। यद् येन सहकारिणा विभक्त

फलोपहित पश्येत्, पश्यत्वित्वस्य शक्त्यभिप्रायतामा पूर्वमुक्तत्वात्। अत्र परयतेरपि तन्मात्रार्थकत्वशङ्का स्यादत आह—विभक्तमिति। शक्ते कार्यमात्रगम्यतया विभक्तपदस्य च विविच्य ज्ञातत्वार्थकतया विभक्ताभिन्नत्वस्य दर्शनशक्तौ लाभादर्थतस्तत्कालावच्छिन्नफलोपहितदर्शनशक्त्याश्रय स्यादिति भाव। ततश्च स्वभिन्नाहंकारिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वस्य तत्कालावच्छिन्नफलोपहितदर्शनशक्तावन्वयिशक्तेस्तदानीं सत्त्वेन निर्वाहात्तथा "नहि विशेषणे हि विधिनिषेधौ विशेषणमुपसक्रामत विशेष्ये बाधम्" इति न्यायेन तत्कालावच्छिन्नदर्शनस्यैवोक्तव्यतिरेकप्रतियोगित्वपर्यवसानात् प्रतिज्ञातार्थोपपत्ति। एवमुत्तरवाक्येष्वपि व्याख्येयम्। इदन्तु बोध्यम्—वदति शब्दञ्च ज्ञान करोति शब्दानुच्चारयति वा। इद च पाण्यादिकर्मेन्द्रियाणामप्युपलक्षणमिति व्याख्यातारः। जानातीत्यनुमानपरः, चाक्षुषादीना शब्देरकत्वात्। "मनुते मानस ज्ञान करोति इति" कारेक्ते। वदतीत्यस्य प्रथमव्याख्यापक्षे शाब्दान्यपरत्वमपि जानातेर्बोध्यम्।

यत्तु "न बाह्य किञ्चन वेद नान्तरम्" इति यदुक्त तन्न, दृष्टिलोपात्। किन्तु दृश्यलयादित्यनुदृष्टित्य आत्मेत्याह—यद्वै तत पश्यतीत्यादि। ततश्च सुप्तौ यन्न पश्यतीत्युक्त तत्पश्यन्नेव न पश्यतीत्यादिरूपम्। प्राज्ञेनात्मना सम्परिष्वक्त इत्यनेनोक्तो लयो दृश्यमात्रस्येत्याशयेनाह—न तु तद्द्वितीयमित्यादि। ततो द्रष्टुरन्यद्विलक्षण जड द्वितीय विभक्त स्थूल तत्राग्नि य न चक्षुरादि नामरूपक च पश्येत्, किन्त्वविभक्त सस्कारूप सर्वमस्तीति शेषः। अत एव "सुषुप्तिकाले सकले विलीने स्वमधीतो भवति" इत्यादि श्रुत्यन्तराणि। तथा च सस्काररूपेण द्वैतावस्थानरूपस्य लयस्य ब्रह्मण्युक्तत्वात्तस्यैव चोपादान एव स्वीकारादुपादानत्वस्य च ब्रह्मण्यपरिणामिन्यविद्योपरागेण वाच्यत्वाच्चिज्जडयोरुपादानोपादेयत्वनिर्वाहकतादात्म्यस्य कल्पितत्वाद्विनिगमकाभावेन द्वैतसामान्यस्य कल्पितत्वसिद्धिरिति भावः। यत्र वा अन्यदिव न्यादित्याद्यन्यदेवाभासित्वरूपाल्पत्वप्रयुक्तमल्पत्वम्। अत एव स्वप्ने ध्वनीवेत्याद्युक्त्वा अविद्ययामन्यत इत्यग्रे आविद्यकत्वेनाभासत्वमुपपादितम्। लोकेऽपि स द्वितीयचन्द्र इवेति प्रयोगो न द्वितीयचन्द्र प्रसिद्धोऽस्ति यस्य सादृश्य बुद्धयेत्। तस्मादुक्तः श्रुतिसन्दर्भो द्वैतमिथ्यात्वपरमिति। तर्हि वक्तव्यम्—प्राज्ञेनात्मना सम्परिष्वक्त इत्यनेन लय कथमुक्तः यदुपपाद्यत्वेन "यद्वै तद्" इत्यादिक व्याख्यायते। नहि तत शब्दात्तादृशार्थः प्रत्ययः; नन्वापि पदार्थवाक्यार्थत्वाभावात्। ततो द्रष्टुरन्यन्न विद्यते इत्यप्ययुक्तम्;

अनादृश्याना तदा सत्तायास्त्वयैवोपगमात्। अत एव वैलक्षण्य जडत्वेनोक्त्वापि न निस्तार सुलभ अन्यपदस्य वैलक्षण्यायकत्वे मानाभावात्। जीवब्रह्मभेदादेजडस्यापि तदा सत्त्वाच्च द्वितीयपदवैयर्थ्याच्च ततोऽन्यदित्यत एव भवदुक्तार्थस्य सिद्धे। मन्मते तु पदार्थान्तरसत्त्वेऽपि तदन्वयव्यतिरेकयोश्चाक्षुषाद्युत्पत्तावप्रयोजकत्वाच्चाक्षुपसाधनीभूततदन्यव्यावृत्तिलाभायोक्तरीत्या द्वितीय पद सार्थकमिति वैषम्यम्। तदद्वितीयमित्यत्र यत्पदवैयर्थ्यच्च, भेदप्रतियोगिसमर्पणस्य ततोऽन्यदित्येतत्पदेनैव कृतत्वात्। मन्मते तु तदन्यत्साधन नास्तीत्युक्ते साधनमात्रलाभेऽपि प्रकृतोपयुक्त चाक्षुषादिविशेषकायतानिरूपितकारणतालाभायतया तत्साथक्य दृष्ट्यादिपदाना चाक्षुषादिवृत्त्यवच्छिन्नस्वरूपयोग्यताभिप्रायत्वेऽविनाशित्वादिति। इह त्वनन्वयश्च, ब्रह्मातिरिक्तस्य विनाशितायां यावद्विकारालोकवदिति न्यायेन मवद्भिरभ्युपेतत्वात्।

न च द्रष्टव्येव तदन्वय इति वाच्यम्, उक्तयोग्यताया सुषुप्तिकाल सत्त्वस्यानुपपत्त, हेतो स्वाश्रय एव साध्यसाधनसामर्थ्यात्। न च विपरिलोपाभावे साध्ये कथमविनाशित्व हेतुसाध्यविशेषादिति वाच्यम्, उभयसमाधेयत्वात्। दृष्टिर्हि प्रतिनिष्ठात्यन्ताभावाप्रतियोगिनी, तन्निष्ठत्वे सति नाशा प्रतियोगित्वात् यद्यनिष्ठत्वे सति नाशाप्रतियोगितत्तन्निष्ठात्यन्ताभावप्रतियोगि यथा कपालनिष्ठो नाशप्रतियोगी च घटस्थनिष्ठात्यन्ताभावप्रतियोगीति सामान्यव्याप्तिमूलकानुमानस्य विवक्षितत्वात्। अत एव द्रष्टुरित्यत्र द्रष्टाश्रयत्वेनात्मनोऽभिधान द्रष्टेर्हेतुविशेषणीभूतात्मनिष्ठत्वलाभाय सगच्छते। एवञ्च ब्रह्मातिरिक्तायामपि दृष्टावविनाशित्वस्योक्तयुत्या साध्यमभिहितत्वात्। नन्वित्यादेरपि नाद्वैततात्पर्येनयन युक्तमशतो बाधसत्त्वात्।

ननु दृष्टे स्वरूपात्मकज्ञानस्येति व्याख्याय तादृशस्यैवाविनाशित्वादित्यन्वयस्य व्याख्यातुमिरुक्तत्वात्कथ ब्रह्मातिरिक्तस्याविनाशित्वमेतद्वाक्यबोध्यमिति चेत् न, योग्यतापरत्वेनोक्तभवद्व्याख्यान प्रत्यक्ष्यैवोक्तदोषस्योद्भावितत्वात्। एव सुषुप्त्यवस्याप्रतिपादकोक्तसन्दर्भेण तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तमिति वाक्यस्य स्थूलदृश्यलयाभिप्रायत्वेन कथञ्चिद व्याख्यानेऽपि मैत्रेयीब्राह्मणे श्रूयमाणस्य तस्य न तथा व्याख्यान वक्तुं शक्यम्, तत्रत्यवाक्यानाम् मुक्त्यवस्याप्रतिपादकत्वेन सर्वसम्मतत्वादुपक्रमस्य तथैव स्पष्टत्वात्। 'इत्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वम्"

इत्युपसंहारात्र। यद्यपि 'एतावद् यद्धि न वारे पत्यु कामाय" इत्युपक्रम्य 'सर्वमिदमात्मैवात्मरूप स्वयंप्रकाश विज्ञातारमरे केन विजानीयाद्" इत्यन्वयमुक्तम्, इयदेवात्मनस्त्वसाधन नाधिकम्। अरे मैत्रेयि खलु निश्चित-मनृतत्वमनृतत्वसाधनमिति व्याख्यातृभिरुक्तम्। सा तैत्तिरीयश्रुतिराह सादर न्यास प्रशस्तातिलकमणा स्फुटमेनावदिन्याह च याज्ञिना श्रुति ' ज्ञान विनाज्ञाय न धर्मसाधनम्' इत्यध्यात्मरामायणे चोक्तम्। तथाप्यमृतत्वस्य स्वरूपतस्साधनतश्च प्रक्रान्तत्वादुभयस्याप्युपसंहारो युक्त इति वोऽयम्। एव स्थित स्थूलदृश्यलयाधत्वमुक्तवानयस्य न युक्तम्, अवस्थाद्वयस्यापि तदानी भवता साक्षाभ्युपगमात्। उक्त च विवरणाचार्यैः— "अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृत्ति-र्यथा" इति। वार्त्तिककृद्भिरप्युक्तम्—

'तत्त्वमस्यादिवाक्ये ह्यसम्यग्धीजन्ममात्रत ।
अविद्यासहकार्येण नासीदस्ति भविष्यति ॥" इति।

अत्र हि कार्येण सह नासीदिति संस्कारावस्था प्राप्तलीनकार्येण सह निवृत्त्यभिप्रायम्। एव च तत्रत्याना विभक्तादिपदाना वैयर्थ्य न स्यात् स्थूलमात्रलयप्रतिपादकत्वेन तत्र तदुपयोगाभावात्। न च तत्र ततोऽन्यदिति संस्कारावस्थाप्राप्तस्य विभक्तमिति स्थूलावस्थाप्राप्तस्य तमप्रति-पादनार्थमिति वाच्यम्, ततोऽन्यदित्यत एव तदुभयसंग्रहसिद्धे समुच्चय-चकारादिविरहाच्च। वाक्यद्वयेऽपि तेषा समानार्थकत्वस्य प्रतीयमानस्य बाधापत्तेश्च। तथा हि बृहदारण्यकव्याख्यातभिस्तावज्जनकयाज्ञवल्क्य-संवादगतान्यपि 'यद्वै तन्न पश्यति" इत्यादि वाक्यानि मोक्षावस्थापरत्वेनैव व्याख्यातानि, सुषुप्तिप्रक्रमसत्वेऽपि 'अनन्वागत पुण्येन" इत्यस्य व्याख्यायाम्— "किं बहुनोक्तमात्मरूपमनन्वागतमसम्बद्ध सत्यधर्मेण फलेन पुण्यनामेयेनानन्व-यागतमसम्बद्धपापेन संसाधनेन फलेन पापकर्मणा तीर्णो हि यस्मादहममा-ध्यासवर्जितस्तस्मात् सुषुप्तिमा मोक्षोऽप्युत्तीर्णं। तदा मोक्षावस्थाप्रसरे सर्वान् शोकान् निखिलान् कामादीन्। तिमेते पूर्वमात्मन इत्याशङ्क्य" इत्याह। हृदयस्य ग्रन्थि भवति समाराध्येह चोर पापी साधु पुण्यवान्मम पितेत्यादे-रहममाभिमानस्य निबिडमूलस्य परं पारमानन्दात्मान निर्देवरसम-पगतदेशकालवस्तुभेद प्राप्तो वर्त्तते।

ननु मोक्षावस्थाया ज्ञानस्य भवत्युच्छेदोऽन्यथावलोकनादिर स्यात्, न च तत्र दृश्यनेऽसौ मन्यामहेज्ञानस्वभाव। अज्ञानस्वभावत्वे च श्रुत

स्वप्रकाशत्व पूर्वोक्तमित्यत आह—यद्वै प्रसिद्ध स्मर्यमाण च यत्। मनोरम पुत्रादिविपरीत च वैयर्थ्याद्युपेक्षणीयञ्च तृणादि तद्विविध रूप रूपि वा तद्धर्मे-र्बोध्यम्। न पश्यति नेत्रसम्बन्धजेन ज्ञानेन नावलोकयति पश्यन्वै स्वात्म-रूपज्ञानन स्वय प्रकाशमान इव तन्न पश्यति नहि यस्माद्वै द्रष्टुरात्मनो दृष्टे. स्वरूपज्ञानविपरिलोपो विनाशो विविच्यते नास्ति।

नन्वस्तु स्वरूप तावता कथ नित्यत्व ज्ञानस्येत्यत आह—अविनाशि-त्वात्। आत्मस्वरूपस्याविनाशित्वमित्यभिप्रायेणोक्तमविनाशित्वात्।

ननु नित्य चेज्ज्ञान स्वयप्रकाशमात्मनो रूप कुतस्तत्र नावलोकयती-त्यत आह—न तु द्वितीयम्। नास्त्येव यत्र विलोकयेदयमात्मा येनावलोक्येत्, यच्चावलोकन तदपि स्वयप्रकाशाच्चिदानन्दात्मनोऽन्यन्नास्त्येवेत्येतद्द्वितीय पदग्रहणेनैव सिद्धमित्यादि तद्ग्रन्थदर्शनात्। अत एव पूर्व मैत्रेयीब्राह्मणे प्रति-ज्ञायानत्य त्वधिकाथनिगमनमित्यपि तैरुक्त द्वितीय मैत्रेयीब्राह्मणे।

नन्वेतावताप्यस्माकमिष्टसिद्धितादवस्थ्यमिति चेत् न, सुषुप्त्यवस्थापर-त्वेन व्याख्याने हि विभक्तादिपदाना सार्थक्ये कदाचिदुपपादयिष्यामीत्यभि-प्रायेण भवतोक्तवाक्य व्याख्यातम्, तच्च त्वद्व्याख्यानविरुद्धमित्यस्यैवेदानी-मुद्भावितत्वात्। एकत्र सुषुप्तिपरत्वमपरत्र च मुक्तिपरत्वमिति वैषम्यम्। निर्बीजमस्तु वा तदपि कथञ्चिदुभयपर्यायेऽर्थभेद सर्वथैवानुपपन्न। अत एव पूर्वमैत्रेयीब्राह्मणे यावान्पाठ पठित स तु पाठभेदमर्थभेद वा विना नास्माभिर्यत्क्रियत इति प्रक्रम्य व्याख्यातृभि पश्चादुक्तम्—यत्र हीत्यारभ्य विजानीयादित्यन्तम्। पूर्ववत् पूर्वत्र जिघ्रते पर्यायस्य प्रथम पाठ पश्चात्तु पश्यते। अत्र तु वैपरीत्य तथा पश्यति जिघ्रतीति स्यात्। तृतीयश्च पर्य्याय-योरसयत इति स्थले यत्र त्विति च। पश्यत्याद्या विजानातीत्यन्ता अष्टौ पर्याया। अत्र पूर्वन्तु जिघ्रतीत्याद्या विजानातीत्यन्ता षट् इति। एवञ्च पाठभेदमात्रस्योभयत्र दर्शितत्वादर्थभेदस्य चानुक्तत्वाद् द्वितीयमैत्रेयी-ब्राह्मणस्य याज्ञवल्क्यीयकाण्डोपसहारार्थकत्वेनैवोक्तत्वाच्च। एकार्थत्व सर्वा-नुभवसिद्ध पर्यायद्वयपठितानामपि "यद्वै तन्न पश्यति" इत्यादिवाक्यानामि-त्यास्ता तावत्। नैयायिकमते तु पूर्वव्याख्यातरीत्या याज्ञवल्क्यीयकाण्डस्थानि यद्वै तदित्यादिवाक्यानि सुषुप्त्यवस्थाप्रतिपादकप्रकरणान्तर्भूतान्येव। मैत्रेयी ब्राह्मणस्थानि तु मुक्त्यवस्थाप्रतिपादकान्येव। किन्तु सुषुप्तिमुक्त्योर्ज्ञानादि-राहित्यांशे तुल्यत्वमेवेत्युभयोरेक एवार्थ। अत एव न चैषा विज्ञानविशेषेण सुषुप्तौ मुक्तौ वा कथञ्चिदपरिलोप सम्भवतीति पर्यायद्वयाभिप्रायेण यस्याद्वय-

परत्वे कार्यपरत्वोभयाभिप्रायत्व पार्थसारथिमिश्रवाक्य संगच्छते । परन्त्वत्र दुःखोत्पत्त्यनुत्पत्तिभ्यामेव विशेष' । अत एव प्रथमपर्यायानन्तर बुद्धान्ता येतीत्युक्तम् । द्वितीयपर्याये तु "इत्युक्तानुशासनासि मैत्रेयि" इत्युपसहार एव कृत. । अत एव मोक्षे सुखप्रत्यक्ष नास्तीति तार्किकाणामुद्घोषः सगच्छते । सुषुप्तौ शोकाभावमात्रस्योक्ते श्रुतिपदार्थतयैव व्याख्यातत्वेन तत्र विप्रतिपत्ते-रनुचितत्वात् । सुषुप्तिमोक्षयोश्च साम्यस्य सर्वसम्मतत्वात् । उक्तविशेषमात्रा-भियानेन श्रुतिसम्मतत्वाच्च ।

प्रकृतमनुमराम । एतेन किन्त्वविभक्तसंस्काररूप सर्वमस्तीति शेष-कल्पन निरस्तम् । तत्कल्पकविषयंयप्रनियोगिनो वाच्यत्वाभिमतार्थस्यैवा-सिद्धे । "सुषुप्तिकाले सकल विलीनम्' इत्यादिक दृष्टिसृष्टिनिरासे व्याख्येयम् । स्वमपीतो भवतीति वाक्यञ्च तत्त्वमसीत्येतद्वाक्यानप्रसङ्गे व्याख्या । एतेन संस्काररूपेण द्वैतावस्थानरूपलयस्य ब्रह्मण्युक्तत्वात्तस्कारस्य चोपादान एव स्वीकारादित्यादिकमपास्तम् । पूर्वपूर्वस्मिन्प्रमाणाभावेन तदनन्ययानु-पपत्तिमूलकस्योत्तरोत्तरन्यायस्य मूलोच्छेदपराहतत्वादित्यग्रे विस्तरः । किञ्च दृष्टिपदस्य स्वरूपातत्कज्ञानार्थत्वेन व्याख्यानमयुक्त निर्बीजलक्षणा-पत्तेः । वाक्यान्तरस्थजिघ्रत्यादिपदाना वैयर्थ्यापत्तेश्च । मन्मते तु ज्ञानविशेष-शक्त्यभिप्रायत्वेन न कस्यापि वैयर्थ्यम् ।

न च तयापि लक्षणातादवस्थ्यमेवेति वाच्यम्, जहत्स्वार्थत्वा-जहत्स्वार्थत्वाभ्या विशेषाभावात् । नहि स्वरूपार्थकज्ञानार्थत्वे चक्षूर्जन्यत्वा-द्यंश कश्चिल्लक्षतावच्छेदके प्रविशति, ब्रह्मस्वरूपस्य नित्यत्वात् । एव न प्रेत्य सञ्ज्ञास्तीति ज्ञानव्यतिरेकमुक्त्वापि "अत्र वार इद विज्ञानाय" इतिश्रुत्या ज्ञानसामर्थ्यं मुक्त्यवस्थाया दर्शयन्त्या विज्ञानघन इत्येतदभि-प्रायकथनपरया ज्ञानश्रुतीना तच्छक्तिपरत्वे तात्पर्यस्य पार्थसारथिमिश्र-रीत्या स्फुटतरमेव ग्राहितत्वात् । एव द्रष्टुर्दृष्टेरिति दृष्ट्याश्रयत्वस्या-त्मनि तत्सम्बन्धस्य च दृष्टौ स्पष्टमुक्तत्वात् । स्वरूपमात्रस्य ज्ञानत्वे मानाभावात् । न चाविद्यकस्य भेदस्यायमनुवाद इति वाच्यम्, मुख्यत्वे बाधकाभावात्, शब्दस्वारस्यस्यैवेदानी विचार्यमाणत्वात्, आविद्यकभेदादे-र्मिथ्यात्वमिद्ध्युत्तरकालीनत्वात् ।

ननु धर्म-धर्मिभावे गौरवमैक्येन लाघवमिति चेत्, सत्यम्, अहो प्रमाणविरोधेऽपि लाघवनिर्बन्धस्तवैव शोभते । न वा तदपि निरसयितु शक्यम्, व्यावहारिकस्य धर्मधर्मिभावस्य त्वयाभ्युपगमात् । अतश्च धर्म-

धर्मिभाव उभयोस्तुल्य, अभेदस्तु तात्त्विकस्तावदतिरिक्त । तथा च धर्म-धर्मिभावस्तादात्म्य व्यावहारिकत्व पारमार्थिकत्व चेति चत्वार पदार्था कल्प्या । मम तु धर्मिधर्मभावस्तात्त्विकत्व चेति कुत्र लाघवमिति विभावय तावत् । अत्र ममापि 'विज्ञानमानन्द ब्रह्म इति श्रुतिस्तात्पर्यग्राहिका-ऽस्तीति चेत् कुत एतन्निर्णीति विज्ञानपदसामानाधिकरण्यस्य सुलभत्वात् । विशिष्टश्च तज्ज्ञानमस्येति बहुव्रीहिव्युत्पत्तत्वाद् विज्ञानपदस्य ब्रह्मसामानाधिकरण्यस्य सुलभत्वात् । विशिष्टश्च तज्ज्ञान चेति समासे लाघवमिति चेत्, मैवम, ज्ञानब्रह्मणोर्भेदसमर्पकश्रुतिविरोधे तस्याकिञ्चित्करत्वात् । नहि तत्र गौरवमाश्रित्यापि शब्दार्थमर्यादया स्वाभिमतोऽर्थस्त्वया सु[व्या]ख्यात । वस्तुतो निषादस्थपतिरित्यादौ पूर्वपदस्य लक्षणाविरहादभेदस्य सांसर्गिक विषयतापन्नत्वाल्लाघवमिति न तु कुलधर्म । इह तूपसर्गाणा वाचकत्वाभावेन पूर्वपदे च लक्षणैव वक्तव्ये कुतो लाघवम् । न च तदगौरव तथापि समानमेव, पर त्वन्यपदार्थलक्षणाप्रयुक्त तत्तवापि वाच्यम्, उत्तरपदस्यैव विशिष्ट-ज्ञानवति लक्षणाभ्युपगमात् । चित्रगुरित्यादौ पदद्वयस्यापि सार्थक्येन विनि-गमकाभावात् पदद्वयलक्षणाशङ्कादे प्रसक्तावप्यत्र पूर्वपदस्यानर्थकत्वेन तदप्रसङ्गात् । न च ममाप्युत्तरपदस्य विशिष्टज्ञान एव लक्षणा त्वद्रीत्या-तु धर्म्यंशेऽपि लक्षणेति स्वरूपगौरव दुर्वारमिति वाच्यम्, 'य सर्वज्ञ स सर्वविद् विज्ञानघन द्रष्टुर्दृष्टेस्तदैक्षत बहुस्याम्' इत्यादावनेकस्थले प्वाश्रयाश्रयिभावप्रतीत्या तस्या[पि] योजकत्वात् । पार्थसारथिमिश्रास्तु 'नीलोत्पलादिवद् गुणगुणिनोस्तत्रापि सामानाधिकरण्यम्, न चानन्दादि-शब्दाना गुणमात्रपरत्वेन गुणिनि प्रयोगो न दृश्यते इति वाच्यम्, तादृशाना-मपि कदाचिद् गुणिनि प्रयोगदर्शनात् । मधुरो गुरु स्निग्ध शीतो रसश्चेति रसशब्दस्य द्रव्यपरत्वाभावे शीतसामानाधिकरण्यानुपपत्ते" इति वदन्ति । भावार्थविज्ञानपदस्य मत्वर्थीय 'अर्शआद्यच्" प्रत्ययान्तत्वमाश्रित्यापि सामानाधिकरण्यनिर्वाहाच्च । तस्य करणल्युट्प्रत्ययान्तत्वोपपत्तश्च । कर्तृत्वकरणत्वयोश्च रूपभेदेनाविरुद्धत्वादात्मानमात्मना वेत्सीति दर्शनाच्च । नह्याय तृतीया कर्त्तरीति वक्तु शक्यम्, वेत्सीति कर्तर्याख्यातदर्शनेनानभिहिता-धिकारीयतृतीयाया असम्भवात् । बाहुलकेन कर्तर्यपि ल्युटो वक्तु शक्य-त्वाच्च । कथञ्चित्सामानाधिकरण्यमुपपद्यत इति तात्पर्यटीकावाक्ये 'विजा नातीति विज्ञानमानन्दयतीत्यानन्दम्' इत्युदयनाचार्यैर्व्याख्यातत्वात् । न च विनिगमकाभावसाम्य शब्दस्वारस्यबलस्य बाहुलकाश्रयेण विघटितत्वादिति वाच्यम्, "कृत्यल्युटो बहुलम्" इत्यनुगमस्य विनिगमकस्य सत्वात् । अत

एव "रक्तोहगमलब्धसन्देहा प्रयोजनम्" इति महाभाष्यवाक्यस्यप्रवर्त्तकविधिपरत्वेन प्रयोजनपदमप्येव व्याख्यानम्। नहि द्रष्टव्य इत्यादौ तृजादेरभेदार्थकत्वे विशिष्य किमप्यनुशासन त्वन्मते आनेत शक्यमिति। एतेनानन्दन्यापि ब्रह्मात्मकत्वमपास्तम्। तथा चोत्पत्तिविनाशशीलयो ज्ञानसुखयोरहं जानाम्यहं सुखीति स्वभिन्नत्वेनानुभूयमानयोर्ब्रह्मभेदनाधने बाध [न]। किञ्चानन्दमिनि पद श्रुतिस्थ मत्वर्थीयाच्प्रत्ययान्तमिति तेनानन्दवत्त्व बोध्यते। ब्रह्मण्य नानेद, अन्यथा तस्य नपुसकालिङ्गत्वानुपपत्ते। न च "व्यत्ययो बहुलम्" इत्यनुशासनाल्लिङ्गव्यत्यय मानाभावादिति मणिङ्कतो लीलावतीकिरणावल्योरुपाये च वर्द्धमानचरणा.। आनन्दपदस्य भावे घञन्तत्वात्तस्य च पुल्लिङ्गत्वनियमात्। अत एवामरः "स्यादानन्दथुरानन्द शर्मशातसुखानि च" इति। अत एव 'रस ह्येवाय लब्ध्वानन्दीभवति" इति स्पष्टमत्वर्थीयनिर्देश।

आनन्द ब्रह्मणो विद्वान बिभेति कुतश्चन।
आनन्द ब्रह्मणो रूप तच्च मोक्षे प्रतिष्ठितम्॥

इत्यादीनामनेकासा भेदप्रतिपादिकाना श्रुतीना प्रत्यक्षस्य च प्रामाण्येन निर्बीजमानन्दज्ञानयोरात्मभेदमभ्युपगम्य सर्वनामस्वरसकदर्थजडबुद्धिकल्पन सर्वथैव हेयम्। छान्दसत्व त्वगतिकगति। अन्यथा "स्थूलपृषतीमनड्वाहीमालभेत" इत्यादौ सत्यपि पूर्वपदान्तोदात्तत्वे लाघवादेव कर्मधारयमाश्रित्य तत्प्रयुक्तसमासान्तोदात्तत्वप्रसङ्गे छान्दसमेव पूर्वपदप्रकृतिस्वरत्वमित्यादेरप्यापत्तौ महाभाष्यादिग्रन्था विरुध्येरन्। अहीनमित्यादौ च मध्योदात्तदर्शनेन खप्रत्ययान्तत्वनिर्णयो न स्यात्। 'यस्मिन् पञ्च पञ्चजना" इत्यादौ च द्वितीयपञ्चशब्दस्य समासाभावे यद्युदात्तत्वापत्त्यानुदात्तत्वपाठो न स्यादतो जनशब्देन सह समास, एव तयासत्वन्तोदात्ते शेषनियातेन पूर्वेषामनुदात्तोपपत्तिरिति भगवत्पादादिभिरुक्तमपि छान्दसत्वादेवान्यथा स्यादिति दर्शनजातविप्लव स्यादित्यास्ता तावत्। आनन्दो ब्रह्मेत्यपि क्वचिच्छ्रूयते इति चेत् किं तेन, लक्षणया सामानाधिकरण्योपपत्ते। विनिगमकस्य न वाहुल्यस्योक्तत्वात्। न च धर्मिलक्षणाया क्लीवत्वापत्ति, अन्यथा शुक्ल वस्त्रमित्यादिकमपि न स्यादिति वाच्यम्; [लक्षणास्थले] . . ? समानलिङ्गकत्वे गङ्गायां घोष इत्यादावपि क्लीवानुपपत्ते। दृष्टान्ते तु "गुणलिङ्गास्तु तद्धर्मा" इत्यनुशासनमानमिति वैषम्यम्। न च तदपि विशेषणपदत्वेन प्रामस्य विशेष्यसमान-

लिङ्गत्वम्यानुवाद एव, शुक्ल रूपमित्यत्र गुणमात्रपरत्वेऽपि तदनुशासन परिभूय विशेषणपदत्वात्। "शुक्लपद विशेष्यरूपपदस्यैव लिङ्ग गृह्णाति इति मणिकारैरुक्तमिति वाच्यम्, किञ्च बहुव्रीहिलिङ्गानुशासनभावन स्वलिङ्गाभावाद्विशेषणोपस्थापकवाक्यत्वाच्च विशेष्यपदलिङ्गतैव युक्ता। यथायथ दण्डीपुरुष इत्यादाविति फक्किकाया आपातनिकाया शुक्लो रूपमिति नान्वय। शुक्लादय इत्यस्य विशेष्ये इत्यर्थकत्वादित्यरुचिबीजस्य बीजैरुक्तत्वात्। गुणविशेष्यकबोधजनकस्य शुक्लपदस्य पुस्त्वविधानात् शुक्लप्रकारकरूपविशेष्यकबोधजनके शुक्लो रूपमित्यस्यानापत्ते। न च रूपस्यापि गुणत्वाद् गुणस्य विशेष्यत्वमक्षतमिति वाच्यम्, रूपत्वव्याप्यधर्मावच्छिन्नविशेष्यकेत्यर्थादत एव गुणस्य विशेष्यत्वविवक्षाया शुक्लो रूपमितीष्टमेवेति तत्र कण्टकोद्धारकृतः। एतेन नीलरूपस्यैव तमस्त्वे 'गुणे शुक्लादय घुमि 'इतिवृत्त्वा नीलस्तम इति प्रत्ययप्रसङ्गादिति शशधरवाक्यमपि व्याख्यातम्।

न चैवमानन्द ब्रह्मेत्यत्र नीलोत्पलादिवत्सामानाधिकरण्यमिति पार्थसारथिमिश्रोक्तं न सगच्छत इति वाच्यम्, मत्वर्थीयाभिप्रायेणैवतस्य नेयत्वात्। अस्तु वा प्रकृत एव छान्दसत्वम्, तदविशेषेऽपि यथोक्तविनिगमकस्य मुख्यत्वात्।

शुक्लादेर्गुणिपरत्वे लाक्षणिकत्वेन स्वलिङ्गप्राप्तौ 'गुणे शुक्लादय [illegible] यलिङ्गकत्वमिति मणिकारीयाद्यपक्ष एव युक्त। अत [illegible] चन्द्रसदृशे लक्षणया चन्द्रसदृशाभिन्न मुखमिति बोधो बहुभिरङ्गीकृत. सगच्छते। अत एव 'पौर्णमास्या पौर्णमास्या यजतामावास्यायाममावस्यया" इत्यत्र पौर्णमास्यमावस्याशब्दौ तात्कालौनत्वेन यागसमुदाये लाक्षणिकावपि स्त्रीलिङ्गान्तावेव दृश्येते।

न चैव बहुव्रीहौ विशेष्यसमानलिङ्गत्व न स्यादन्यपदार्थे लाक्षणिकत्वाद् "गुणलिङ्गास्तु तद्धनि" इतिवद्विशेषानुशासनाभावाच्चेति वाच्यम्, तस्य स्वलिङ्गाभावेन लिङ्गाकाङ्क्षायामनुशासनान्तराऽभावेऽपि सामानाधिकरण्येन विशेष्यलिङ्गस्यैव ग्रहणात्। चन्द्रादिशब्दाना तु विशेष्यलिङ्गनिर्णयेन तेनैव तदंशे निराकाङ्क्षतया विशेष्यपदलिङ्गोपादानं बीजाभावात्। अत एव दण्डीत्यादावपि नानुपपत्ति तत्तदनुशासनञ्च नत्र लक्षणाया निरूढत्वे तात्पर्यग्राहकम्। अत एव—

कात्यानवार्त्तिकं "समानाधिकरणत्वातसिद्धमिति न विशेषणां लिङ्ग-वचनमनुशास्यम्" इति। तस्मात्लक्षणया अविमिष्टत्वेऽपि यादृशानुपूर्वी-कस्य शब्दस्य लिङ्गविशेषोपादानमिति सिद्धम्। अत एव कण्टकोद्धारकारैः-'न च विशेष्यपदाभावे चित्रगुमानयेत्यादौ लिङ्गानियमापत्तिः, पदानुपादानेऽपि विशेष्यविशेषस्य स्त्रीशूद्रादेरवश्य विवक्षितत्वात्। तदभावे सामान्ये नपुंसकलिङ्गत्वाद्" इत्युक्तम्। एव चन्द्रादिपदानामजहल्लिङ्गत्व बोध्यम्। उक्तञ्च मणिकृद्भिः—'अजहल्लिङ्गाना तु विशेषानुशासनान तया" इति। तत्तद्धर्ममभिसन्धाय "अजहल्लिङ्गानन्दशब्दस्य क्लीवत्वा-नुपपत्ति" इति वर्द्धमानोपाध्यायैः किरणावल्युपाये अजहल्लिङ्गेत्युक्तम्। तथा च तस्य नपुंसकानुरोधादव्ययान्तत्वेऽप्यानन्दो ब्रह्मेत्यत्र लक्षणि-कत्वेऽपि पुंस्त्वमेवेति तेषामभिप्राय इति सुधीभिरनुसन्धेयम्। इदमप्यनानु-सन्धेयं ज्ञानानन्दशब्दौ लोकेऽर्थप्रकाशे वन्दनादिसयोगजन्ये च सुखरूपे धर्मे प्रसिद्धौ। न च ब्रह्मात्मक ज्ञान न्वयापि विषयविशेषावग्राहिवस्तुस्वरूप. तदुक्तमद्वैतसिद्धौ—'वृत्त्युपरक्तचैतन्यस्यैव ज्ञानत्वे न केवलाया वृत्तेः केवलस्य चैतन्यस्य च ज्ञानत्व नास्ति" इति। व्याख्यात च चन्द्रिकायाम्—'वृत्तेर्जडत्वात् वृत्त्यभावकालेऽपि घट जानामीत्यापत्तेश्च द्वयोर्ज्ञानयो-ज्ञानत्वाभाव." इति। शब्दार्थश्च लोकानुरोधगम्यः। उक्त च दहराधिकरणे भामत्याम्—"ये त्वाकाशशब्दो ब्रह्मण्यपि मुख्य एव नभोवदित्याचक्षते तैरन्या-यश्चानेकार्थत्वमिति चान्यलभ्यः शब्दार्थ इति च मीमासकाना मुद्रालेद-कृत। लभ्यते ह्याकाशशब्दाद्विभुत्वादिगुणयोगेनापि ब्रह्म। न च ब्रह्मण्येव मुख्यो नभसि तु तेनैव गुणयोगेन वर्त्स्यतीति वाच्यम्; लोकायीनाधानारत्वेन शब्दार्थसम्बन्धस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वाद्" इति। एव स्थिते ज्ञानात्मकं ब्रह्मेति स्वीकारे तेषामपसिद्धान्तोऽपि, चैतन्यमाने च ज्ञानपदार्थ-त्वभाव.। तदेतदभिप्रेत्य मीमांसकैरुक्तम्—"यदि पुनर्यदेवेदमात्मरूप प्रतीयते तदेव ज्ञानमानन्दमिति च लक्षणेत्युच्यते सा न लौकिकी, नापि वैदिकी, यदि पुनर्वृद्धादिवत्परिभाष्येत तदस्तु यथाकामम्" इति।

यत्तु ज्ञायानोः सकलना चिद्व्यक्तावेव निरवच्छिन्ना शक्तयनानात्व एवानुगमायैमवच्छेदकत्वीकारात्। घटं जानातीत्वादिवाक्यजन्यबोधे तदीयामत्वापादकाज्ञानविरोधित्वसम्बन्धेन घटादेर्ज्ञायानोयतित्वयेऽन्वयः। तदीयत्वञ्च स्वावच्छिन्नचिद्विषयितानिरूपितत्वसम्बन्ध। स्वाव-च्छिन्नविषयितामात्रनिवेशे ब्रह्म जानातीत्यादावनुपपत्ति ब्रह्मणश्चिदात्मकत्वे

शुद्धचिन्मात्रशक्तिज्ञानसत्त्वे तद्बोधस्य वारयितुमशक्यत्वात्। अवच्छिन्नचिद्बोधनात्पर्यग्राहकस्य शुद्धचिद्बोधप्रतिबन्धकस्य वा घटादिपदसभभिव्याहारस्यासत्त्वाच्च। नहि तीरपरत्वतात्पर्यग्राहकघोषादिपदान्वयि गङ्गापद तीरमेव बोधयति, अतिप्रसङ्गात्। अथ ज्ञाधातुज्ञानमेव शुद्धचिद्बोधे प्रतिबन्धकमिति, नहि कथ शुद्धचिद्व्यक्तौ शक्ति अज्ञातस्य ज्ञाधातोस्तच्छाब्दजनकत्वानुपपत्ते। कथ वा विज्ञानपदेऽपि शुद्धचिल्लाभ। अहो महदाश्चर्य शक्तज्ञानमेव शक्यज्ञानविरोधीति, यदाहु नहि वरघाताय कन्यामुद्वाहयति, इति। निष्ठतु तावत्। एतेन चिद्विषयकशाब्दत्वमेव शक्तिज्ञानकार्यतावच्छेदकमेवेत्यपि परास्तम्। आकाशादिपदाना निरवच्छिन्नशक्यतामतेऽपि कर्मवाद्यशे तद्बोधस्य सविकल्पकत्वेऽप्याकाशाशे तदनङ्गीकारात्। अस्तु वा "पदादपि निर्विकल्पकम्" इति मणिशक्यस्य निर्विकल्पकमाकाशनिष्ठानवच्छिन्नविषयताकम्, तेन आकाशाशे सुवर्थस्य सख्यादे कर्मत्वादौ सुवर्थे वाकाशस्य प्रकारकत्वेऽपि न क्षतिरिति तेरेव व्याख्यातत्वात्। चित्वावच्छिन्नप्रकारताकशाब्दस्यानुचितत्वात्।

किञ्च अज्ञानविरोधित्वाश ससर्गमर्यादया समभिव्याहारधीकार्यतावच्छेदककोटौ निविशताम्, चित्व तु प्रकारतावच्छेदकत्वेन कथं भासता पदोपस्थितानामर्थानामन्वयस्यैव समभिव्याहारधीकार्यत्वात्। उक्त हि लीलावत्युपाये "उपस्थितपदार्थेष्वेव समभिव्याहारव्युत्पत्तेः ससर्गभेदस्य प्रतीतेः। न तु तत पदार्थोपस्थितिरपि" इति। नहि शक्यतावच्छेदकत्वेन भासितुमर्हति चिद्व्यक्तेरैक्येन शक्यतावच्छेदकचित्त्वानङ्गीकारात्। न च ज्ञाधातोरुक्तचिल्लक्षणया लक्ष्यतावच्छेदकत्वेन घटादिपदवत्यर्थान्वितात्पर्यग्राहकत्वेन तदुपयोग इति चेत्, तर्हि जानाते कर्मणि लकारो न स्यात्। धात्वर्थान्तर्भूतकर्मत्वेनाकर्मकत्वापातात्। न च शब्दस्वरूपसिद्ध्यनन्तरमेव लक्षणेति वाच्यम्, चिन्मात्रशक्तौ पूर्वमप्यकर्मकत्वापत्तेरुक्तत्वात्। ततश्च विषयनिराकाङ्क्षत्वधात्वर्थान्तर्भूतकर्मत्वाभ्यामवस्थाद्वयेऽपि दोषस्य दुर्वारत्वात्। अथ यथाकाशपदादशक्यमपि शब्दाश्रयत्व प्रकारत्वेन भासते तद्वदत्रापीति चेत्, अत्रोक्तधर्मस्य विषयभेदभिन्नत्वेनाननुगतत्वात्। शब्दाश्रयत्व [स्य] अधुद्रव्यातिरिक्तद्रव्यत्वादेश्चानुगतत्वात्। पट जानातीत्यादौ पटावच्छिन्नचिद्विषयिताकाज्ञानविरोधित्वावच्छिन्नप्रकारताकशाब्दबोधस्योपपादयितुमशक्यत्वात्। नियतोपस्थितिवशादेव शब्दाश्रयत्वादेरशक्यस्यापि शाब्दबोधधीप्रकारत्वोपगमात्। अन्यथा च

तदनभ्युपगमात्। वस्तुतस्तु नियतोपस्थितिरेव नास्तीति मणिकारोक्तेः विरोधित्वस्यापि निरूपकभेदेनानुगतत्वात्। अतोऽवच्छिन्नस्याखण्डत्वस्वीकारेणापि निस्तारः। एकदेशान्वयप्रसङ्गश्च घटावच्छिन्नत्वयोः संसर्गान्तरप्रत्यापत्तिश्च। वस्तुतो घट जानातीत्यनो घटावच्छिन्नचिद्विषयिताज्ञानविरोधित्वावच्छिन्नप्रकारताक शाब्दबोध एव न भवति. तत्तद्दर्शनमात्रसम्मतपदार्थान्तर्भविन विशिष्य तत्प्रकारकबोधस्य स्वीकारे लौकिकाना तद्बोधानापत्तेः। तस्माद् घटविषयकज्ञानवानित्येव बोध। विषयत्व तु यत्किञ्चिदिति। एतेन नानार्थत्वस्वीकारेणापि न निर्वाह। घटविषयकज्ञानवानित्यघटावच्छिन्नचिद्विषयिताकेत्यादिविषय इति तु भवन्मतमेव। न तु घट जानातीत्येतज्जन्यस्य सर्वसाधारणस्य शाब्दस्य स आकार.। अन्यथा ज्ञानादौ विप्रतिपत्तिरेव न स्यादित्यलम्।

एवं पदाभिधिविकल्पकस्वीकारपक्षे उक्तसम्बन्धेन घटादेश्चिदन्वयो चिन्त्य, शुद्धचित्यज्ञानविरोधित्वस्य तत्सिद्धान्तविरुद्धत्वादन्ययाध्ययत्वभागिनी निर्विभागचितिरेव केवलमित्युक्तिविरोधात्। उक्तञ्च—

'ननु कथ चैतन्यमज्ञानाश्रयः तस्य प्रकाशरूपत्वात्, तयोश्च तमः प्रकाशवद्विरुद्धस्वभावत्वाद्" इत्याशङ्क्य अद्वैतसिद्धौ "अज्ञानविरोधि ज्ञानं हि न चैतन्यमात्र किन्तु वृत्तिप्रतिबिम्बित तच्च नाविद्याश्रय., यच्चाविद्याश्रयः तच्च नाज्ञानविरोधि" इति। चन्द्रिकायामुक्तम् "चितो वृत्त्युपहिताया एव प्रकाशस्यानीयत्वाद्" इति। न च शुद्धस्याज्ञानविरोधित्वाभावे घटादिवदप्रकाशत्वापत्तिवारणाय—

तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृण दहेत्।
सूर्यकान्तमुपारुह्य तन्यायं चिति योजयेद्॥

इति न्यायेन स्वतस्तृणतूलभानकसौरालोकस्य सूर्यकान्तावच्छेदेन तद्दाहकत्ववत् स्वतोऽविद्यातत्कार्यभासकस्य चैतन्यस्य वृत्यवच्छेदेनाज्ञाननाशकत्वस्वीकारान्नानुपपत्तिरिति वाच्यम्, तथापि वृत्यवच्छिन्नचैतन्य एवोक्ताज्ञानविरोधित्वसम्बन्धेन घटाद्यन्वय. स्यात्, न तु शुद्धचैतन्ये प्रकृते तादृशस्य पदजन्योपस्थितिविरहात्। विशेष्यनिष्ठात्यन्ताभावप्रतियोगिना च सम्बन्धेन विशेष्ये प्रकारस्यान्वयबोधानर्हत्वात्। [लघुतर] बोधस्यैव क्रियमाणत्वात्कपालस्य घटकाले घटविशिष्टसमवायवत्वेऽपि घटानुत्पत्तिकाले घटप्रकारकसमवायससर्गककपालविशेष्यकबोधस्य प्रमात्वाभावादुक्तसम्बन्धापेक्षया विषयितासम्बन्धस्य कार्यतावच्छेदकत्वे लाघवाच्च।

अन्यतमत्वस्य भेदयोर्विशेष्यविशेषणाभावेन विनिगमकाभावेन गुरुतरत्वाभावाच्च। किञ्च निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्धयप्रतिबध्यत्वेन घटत्वावच्छिन्नविशेष्यतायोग्यताज्ञानस्य बाधप्रतियोगितायाः घटत्वावच्छिन्नविषयत्वसम्बन्धावच्छिन्नप्रतियोगितायाः वा बाधस्य निर्णयदशाया घटं जानातीति शाब्दबोधापत्तेः। तादृशबाधनिर्णयस्य घटत्वावच्छिन्नविशेष्यतानिरूपितज्ञानविषयत्वप्रकारकयोग्यताज्ञान प्रत्यविरोधित्वात्समानप्रकारकत्वेनैव बाधधिया विरोधित्वादनियतप्रतिबन्धकत्वाश्रयणेऽपि प्रतिबन्धकतावच्छेदकधर्मैक्याभावेन पृथक् प्रतिबन्धकत्वकल्पने गौरवात्।

ननु घटविषयकज्ञानाभावस्य घटो न ज्ञानविषय इति विरोधित्वान्तरस्य त्वयापि कल्पयत्वात्साम्यम्, अज्ञान न घटीयमित्यस्यापीति साम्यमेव। अनुभवस्योभयसमाधेयत्वादिति चेत्, सत्यम्, एव घटविषयक ज्ञानमित्याकारकयोग्यताज्ञानदशाया शाब्दबोधो विनैव हेतुत्वम्। अतो घटप्रकारकचिद्विशेष्यकबोध प्रति चिद्विषयकत्वप्रकारकघटविशेष्यकयोग्यताज्ञानस्य हेतुत्व दुर्घटमेव। बाधस्य त्वनुभवानुरोधेनान्यादृशत्वेऽपि विरोधित्व न त्वनुभव प्रामाणिकोऽस्ति। एव "सत्य ज्ञानम्" इत्यादौ लक्षणया शुद्धचिद्बोध इति सिद्धान्तस्यापि हानिर्दुर्वारा। विशिष्टरूपेणेत्यादि त्वयुक्त बवाचित्कालपप्रयोगस्यैव लाक्षणिकत्वौचित्यात्। ज्ञानानन्दादिपदाना पर्यायत्ववारणप्रकारोऽपि न साधीयान्, चन्दनादिसेवाजन्यवृत्तिविशेषस्य ससर्गतया प्रतीतावप्यानन्दादिपदजन्यबोधे तद्भाने मानाभावेन केवलाना ज्ञानानन्दादिपदाना पर्यायत्वापत्तितादवस्थ्यात्। अत एव न्यायवार्त्तिकतात्पर्यटीकायां वाचस्पतिमिश्रैरुक्तम् "अभेदे त्वानन्दविज्ञानयोस्तत्पदयो पर्यायतया सहप्रयोगानुपपत्ति' न च कृष्णप्रकाशस्त्विति यत्र प्रकर्षप्रकाशयोरभेदोऽप्रकाशस्यापि प्रकर्षसम्भवात्। अत्र कृष्णस्यापि खद्योतादे प्रकाशस्य सम्भवात्, तस्माद्यत्किञ्चिदेतद्" इति।

यत्तु सत्यत्वाद्युपलक्षितशुद्धानामैक्यनिश्चयार्थं सत्यादिपदत्रयोपादानमन्यथा सत्यत्वोपलक्षिताद्वैतो ज्ञानानन्दत्वाद्युपलक्षितवृत्तिरिति प्रमानिवृत्या ब्रह्मस्वरूपमोक्षाय स्वप्रकाशचिदानन्दादिभिन्ने ज्ञानवत्स्वरूपेणाभेदबुद्धया तत्प्राप्तेरपुरुषार्थत्वबुद्धया तत्साधनश्रवणादावप्रवृत्ति। तस्य मिथ्यात्वबुद्धया ब्रह्मज्ञाने मिथ्याविषयकत्वरूपभ्रमत्वज्ञानादविद्यानिवर्तकत्वानुपपत्तिश्च। तावत्पदसत्त्वे तु सत्यत्वाद्युपलक्षिताना परम्परावृत्तिपरस्परप्रतियोगिकभेदकत्व विना समानविभक्तिकवैदिकसत्यादिपदजन्यशाब्दबुद्धिविषयत्वमनुपपन्नमिति धियोक्तपरस्परावृत्तिभेदप्रतियोगित्वनिश्चयानोक्तभेदभ्रम। उक्तञ्च कल्पतरौ—"इतरव्यावृत्तिस्त्वर्थश्च तु शब्दादिति।

इतरव्यावृत्तिः सत्यत्वाद्युपलक्षितान्यस्माद् व्यावृत्तिः सत्यत्वाद्युपलक्षितानामैक्यमिति यावदिति, तच्चिन्त्यम्; वैदिकपदेन हि तुल्यञ्च साम्प्रदायिकमिति न्यायेन नैरर्थक्यानुपपत्तिरिति परेषा विवक्षित तत्र नैयायिकोक्तव्याख्यानेनैवान्यथासिद्ध विनिगमकञ्चोक्तमेव। किञ्च सत्यादिपदत्रयमध्येऽन्यतमपदमात्रसमभिव्याहृतब्रह्मशब्दस्यैव सामर्थ्यात्पदद्वयवैयर्थ्यात्पदद्वयवैयर्थ्ये आपादिते सत्यत्वोपलक्षिताद्भेदो ज्ञानत्वाद्युपलक्षितवृत्तिरिति भ्रमवृत्तिर्न स्यात्, इत्युक्तिरनुक्तिमम्भ्रमग्रस्ता। तदन्वयोपलक्षितव्यक्तेस्तदानीमनभ्युपगमात्। न च यत्र यत्र शाखाया प्रत्येक पदत्रयमुक्त तत्रोक्तपदत्रयोपलक्षितव्यक्तयः प्रसिद्धा इति वाच्यम्; उक्तपदत्रयमध्येऽन्यतमपदमात्रसमभिव्याहृतब्रह्मशब्दस्थलेऽन्यथानुपपत्तिप्रयोगिनो वैदिकसमानविभक्तिकपदजन्यशाब्दधीविषयत्वस्यैवाभावात्। तन्मूलकस्य परम्परावृत्तिभेदप्रतियोगित्वनिश्चयस्य भवदुक्तस्यानुदयने भ्रमनिवृत्तितादवस्थ्यात्। एव ब्रह्मस्वरूपमोदन्य स्वप्रकाशविज्ञानन्दादिभिन्नेनान्तवत्स्वरूपेणाभेदबुद्धयेत्यप्ययुक्तम्; स्वप्रकाशाद्यभेदज्ञानस्य प्रवृत्तावनुपयोगात्, लौकिकदशाया मवन्मतेऽपि स्ववृत्तित्वेनैवानन्दस्येष्यमाणतया पुरुषार्थतावच्छेदकरूपेणानन्दप्रमाया आनन्दाभेदबोधनेऽप्यपिद्धितादवस्थ्याच्च। इदानीं पुरुषार्थत्वेनानुभ्यमानस्य वृत्तिविशेषोपहितानन्दस्योक्तयुत्याप्यबोधनात्।

यत्तु साक्षात्क्रियमाणत्वेनैव सुखस्य पुमर्थतासम्बन्धस्य त्वनित्यत्वसाधनपारतन्त्र्यादिरिवार्जनीयसन्निधिकत्वमेवेति, तदसत्, साक्षात्क्रियमाणत्वस्यैवार्जनीयसन्निधिकत्वेनानित्यत्वस्थानीयत्वात् सुखस्य साक्षात्कारविषयत्वनियमात्। सुख मे स्यादित्यादिना सुखेच्छामाने विषयीक्रियमाणसम्बन्धस्य न पुरुषार्थतावच्छेदकत्वमपि तु सर्वदाप्यनुल्लिख्यमानस्य साक्षात्क्रियमाणत्वस्यैवेत्युक्ते साहसमात्रत्वात्। अत एव "सुखमेव तया न तदवगम तस्यावश्यकत्वेनान्यथा सिद्धेर्गौरवाच्च" इति मणिकृतः। इत्यास्ता विस्तरः।

प्रकृतमनुसराम। आत्मस्वरूपस्याविनाशित्व पूर्वमुक्तम्, अतस्तदभिन्नस्य ज्ञानस्याविनाशित्वमित्यभिप्रायेणोक्तमविनाशित्वादिति व्याख्यानमप्ययुक्तम्, विपरिलोपस्य विनाशार्थक[त्वेन] तैरेव व्याख्यातत्वात्। हेतोः साध्याविशिष्टत्वप्रसङ्गात्, आत्मभिन्नत्वस्यैव हेतू[तो.]कर्त्तव्यत्वात्, मया तु पूर्वमन्यथैव तदर्थस्योक्तत्वात्। यदपि, न तु तद्द्वितीयवर्तमित्यस्यापातनिकाया नित्य चेज्ज्ञान स्वप्रकाशमित्यादि, तदप्ययुक्तम्; ज्ञान हि शुद्धचिद्रूप वृत्त्युपरक्तचिद्रूप वा विवक्षितम्? नाद्य, तस्यित्यत्वेन वाक्योपादेरापाद-

यितुमशक्यत्वात्। न द्वितीयः, तन्नित्यत्वस्य सैरभ्युपगमात्। अत एव द्रष्टृदृश्यादिकमात्मभिन्न नास्त्येवेति द्वितीयशब्दार्थे इत्यपि, परास्तम्। ततोऽन्यदित्यतोऽपि तत्सिद्धे। न चेद प्रमाणान्तरेणाद्यापि सिद्धमस्ति, येन शब्दाधिक्यादिना तात्पर्यविषयत्वेन कल्प्येतेति, न किञ्चदेतत्। तस्मात्सहकार्यन्तराभावेन सुषुप्तौ ज्ञानादिशून्यत्वमात्मनो न तु दृश्यलयादिति श्रुत्यर्थः पर्यवसन्न। तदेव निगमयति—सलिल इति। सलिलवच्छोभूत इति परवदेव व्याख्येय विकारशून्यत्वात्। न च क्लीबत्वापत्तिः चन्द्रिकाकारैरेव त्रेधा समाहितत्वात्। तत्राद्यं छान्दसत्वम्, "द्वितीयं तु सलिलमस्यास्तीत्यर्शं आदित्वादच्प्रत्यय, सादृश्यञ्च सम्बन्ध इति। तृतीयं तु सलिलमिवाचरतीत्यर्थे क्विप्, तदुक्त महाभाष्ये "अपर आह सर्वप्रातिपदिकेभ्य आचारे क्विब् वक्तव्य इति, ततः पचादित्वादच्प्रत्यय"" इति। एक आगन्तुकगुणशून्य द्रष्टा उक्तरीत्या दर्शनशक्तिविशिष्ट। अत एवाद्वैत द्वैतसम्बन्धहीनो भवति स्वरूपेणास्ति एव ब्रह्मलोक भूम्न्यवस्थातुल्य सुषुप्तिरूप। तदुक्त छान्दोग्योपनिषदि "ता एता प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोक न विदुः" इत्यादि। सम्राडितिवाजपेययाजिनो राज्ञ सम्बुद्धिः। साम्प्रत श्रुतिरुपसंहरति—इति होवाचेति। याज्ञवल्क्य इति शेष। एषा उक्तरूपैवास्य जीवस्य परमा उत्कृष्टा सम्पत् सम्पत्तिशब्देन यदन्यश्रुतिषु व्यवह्रियते तदप्येतदेव सति सम्पद्य न विदु सतिसम्पद्यामहे इति पूर्वोक्तछान्दोग्यादिदर्शनात्। एष एवास्य जीवस्य परमदृष्टान्तादुत्कृष्टो लोक दुःखाभावस्यैव परमपुरुषार्थत्वादुक्तरीत्या सुखादेरपि दुःखकुक्षावेव निक्षेपात्। अतएवास्य निरुपधीच्छाविषयत्वरूपसाधर्म्येण सुखत्वव्यवहारोऽपीत्यत आह—एषोऽस्य परम आनन्द इति। विस्तर पुरस्तात्। एतस्य यथोक्तस्यैवानन्दस्यान्यानि भूतानि स्थानानि मात्रा लेश जीवन्ति मनुष्यानन्दादिभ्यो यथोत्तर शतगुणेभ्यो मोक्षस्याविनाशाभावेऽपि न परमपुरुषार्थत्वात्तदपेक्षया सुखान्तराणामपकृष्टत्वमित्यर्थ। एतच्च सुषुप्तिमुक्त्योरशेषविशेषगुणोच्छेदसाम्याद्दर्शितमिति सर्वं शिवम्। इति यद्वै तन्न पश्यतीत्यादि श्रुत्यर्थः॥

सुखाना सातिशयत्वं हेय वार्थमुपदिशति—"स यो मनुष्याणा राद्ध समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः सपन्नतम स मनुष्याणा परम आनन्द.। अथ ये शत मनुष्याणामानन्दा. स एक. पितृणा जितलोकानामानन्दः। अथ ये जितलोकाना शत पितृणामानन्दाः

स एको गन्धर्वलोक आनन्दः। अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते। अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शत प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ एष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति हैनमनुशशासैतदमृतं सोऽहं भगवते सहस्र ददाम्येतदूर्ध्वं विमोक्षायैव ब्रूहीति॥

अयमर्थः—स य. कश्चिन्मान्धात्रा सदृशः मनुष्याणां मध्ये राद्धो रूपयौवनाङ्गसांकल्पदृढगात्रत्वबलसम्पन्नोऽष्टादशविद्यारहस्यज्ञः समृद्ध समद्वीपंश्च सम्पन्नोऽन्येषा राज्ञामधिपतिरव्याहताज्ञ. मानुष्यकैः मनुष्यसम्बन्धिभिः कामैः पितृमातृसोदरजायापुत्रबन्ध्वादिभिः समुह्य समुह्य भोगैः एतादृशमनुष्यस्य य आनन्द तदुपरि मनुष्याणामानन्दो नास्तीत्यर्थः। अथानन्तरमानन्दस्योत्कर्षं। एवमग्रेऽपि पूर्वानन्दाच्छतगुण. पितृणामग्निष्वात्तादीनां जितलोकाना कर्मणा प्राप्तलोकानाम्। कर्मदेवशब्दार्थमाह—ये कर्मणेति ज्योतिष्टोमादिप्राप्तभोगा इत्यर्थ.। आजानदेवा स्वभावतो देवाः "आजानसिद्धं भगवन्त सनत्कुमारम्' इति भामत्यां प्रयोगात्। श्रोत्रिय. अधीतवेद, अवृजिनो निष्पापः, अकामहत. एतदेवाक्स्थले कामरहित'तस्याप्याजानदेवानन्दतुल्य एवानन्दोऽत्र भवतीत्यर्थः। एव पुरस्तात् देवलोकः इन्द्रादिलोकः प्रजापतिर्ब्रह्मा हिरण्यगर्भः। ब्रह्मलोको मुक्तिः सुषुप्तिर्वा। तत्र च सुखाभावेऽपि दु.खाभावव्याख्यातरीत्या सुखशब्दार्थः। एवं मुक्तावपीत्याह—एतदमृतमिति। स्वरूपे ज्ञातेऽपि सोपायां मुक्तिं ब्रूहीत्यभिप्रायवान् जनक आह—सोऽहं भगवत इत्यादि। तत्रोत्तरब्राह्मणे याज्ञवल्क्यो वक्ष्यति। सुषुप्तेः प्रकृतायामाद्विशेष वक्तुं तदुत्तर दुरुत्पत्तिमाह—"स एष एतस्मिन्सप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुन' प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवम्। स यदत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गोऽह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽह भगवते सहस्र ददाम्येतदूर्ध्वं विमोक्षायैव ब्रूहि" इति। रत्वा वन्यादि-दर्शनजा रतिमनुभूय चरित्वा भ्रमदृष्टशरीरावच्छेददेशेषु विहृत्य पुण्यञ्च पापञ्च सुखदु.खतत्साधनानि दृष्ट्वा चकारादुपेक्षणीयस्यापि दर्शनसंग्रहः इति स्वप्नावस्थादिकीर्तनमेतस्मिन्नुक्ते सम्यक्प्रसीदत्यस्मिन्निति सम्प्रसादः सुषुप्त्यवस्था, तत्र स्थित्वा च पुनः प्रतिन्याय प्रतियोन्या बुद्धान्तायैव जाग्रदवस्थां प्रतिपद्यत इति यावत्। पदार्थः पूर्ववत्। स्वप्ने च शालग्राम-

चाण्डालादिदर्शनेन पुण्यपापानुत्पत्तिरित्याह—स यदत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवतीति । तेन तज्जन्येन शुभाशुभेन कर्मणा अनन्वागतोऽसम्बद्धो भवति पूर्ववद व्याख्या । यद्वात्र बुद्धावस्थाया यत्किञ्चित्पश्यति तेन सुषुप्त्यवस्थायामसम्बद्धो भवति तज्ज्ञानाभावेन तन्निबन्धनसुखदुःखानुत्पादादित्यर्थः । अत एवाह—असङ्गो ह्यय पुरुष इति । अय सुषुप्त पुरुषो जीव असङ्गज्ञानरूपतत्सम्बन्धाभाववान्, अत सुखादिहीन इत्यर्थः । तेन न साध्याविशेषशङ्का । पूर्वोक्ताभिप्रायवानेव जनक आह—सोऽहमित्यादि । श्रुतिराह—' अत्र याज्ञवल्क्यो बिभयाञ्चकार मेघावी राजा सर्वेभ्यो मा तेभ्य उदरौत्सीद" इति । "स यत्राणिमान न्येनि जरया वोपतपता वाणिमान निगच्छति तद्यथाम्र वोदुम्बरं वा पिप्पल वा बन्धनात्प्रमुच्येत एवमेवाय पुरुष आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जयति तद्यथा राजानमायान्तमुग्रा प्रत्येनस सूतग्रामण्योऽन्नै पानैरावसथै प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येव हैवविद सर्वाणि भूतानि प्रतिकल्प्यन्त इद ब्रह्मायातोदमागच्छतीति ॥ तद्यया राजान प्रयियासन्तमुग्रा प्रत्येनस सूतग्रामण्य उपसभावयन्त्येव हैवविद सर्वे प्राणा उपसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति" ।

अयमर्थ —अत्र प्रश्ने ह किल याज्ञवल्क्यो मुनिर्बिभयाञ्चकार भीतवान् । कारणमाह—मेघावी राजा सर्वेभ्यो मा तेभ्य उदरौत्सीदिति सर्वमच्छिद्यापेक्षयाय राजा बुद्धिमान् यत कामप्रश्नव्याजेन सर्व मदीय ज्ञानमुपसहृतवानिति भयम्, न तु वक्तुमशक्त्या ज्ञानाभावेन वेति व्याख्यातार । वस्तुतस्तु एतावत्पर्यन्त बुद्ध्या अत ऊर्ध्वमित्यादिप्रश्न साधीयानेव कृत । अन्यथा एतस्मादमृतमित्यादिश्रवणेन कृतार्थं मत्वा मोक्षोपायादिप्रश्नानुपपत्ते । किन्तु यदि विवक्षितार्थे प्रतिपादितेऽपि भ्रान्त्या तदुत्तरमपि प्रयच्छति तदा शाकल्यवदस्याप्यनिष्टमापतिष्यतीति भावन भयहेतुरिति बोध्यम्। इति स्वगतमेव विभाव्य जीवब्रह्मणोर्भेदमेव द्रढयितु मरणप्रक्रियामावदाह याज्ञवल्क्य —स यत्रेत्यादिना । स स्थूलदेहो यत्र यस्यामवस्थायामणिमानमपकर्षं न्येति नितरा गच्छति । हेतुमाह—जरया चोपतपताणिमान गच्छतीति वेति । जरा प्रसिद्धा उपतापो ज्वरादि वा शब्द आकस्मिक सग्रहार्थं । अणिमान निगच्छतीति पूर्वोक्तव्याख्यान स्वदर्शनार्थं पूर्वं दृष्टनिमित्तकमिदानी स्वदृष्टनिमित्तकमणुत्वमुक्तमिति व्याख्यातार । औदुम्बर पिप्पलानामुपादान दार्ष्टान्तिके शरीराणामुत्तममध्यमाधमत्वदर्शनार्थं एवाय शारीर आत्मा जीव एभ्योऽङ्गेभ्य शरीरस्थेभ्यादिभ्य सम्प्रमुच्या

दृष्टघटितावच्छेद्यावच्छेदकभावलक्षणसम्बन्धरहितो भूत्वा ज्ञानाद्युत्पत्तौ शरीरमेवान्त्यावयवित्वगर्भेण न हेतुत्वं किन्तु शरीरतदवयवनाड्यादिसाधारणेन चेष्टावत्त्वेनैवेति स्वीकारात्। अङ्गेभ्य इत्युक्तं पुनरिति, जन्ममरणप्रवाहस्यानादित्वदर्शनायं प्रतिन्याय यथा गमनाद्वै परीत्य प्रतियोनि तत्तज्ज्ञानकर्मवासनाद्रुवि यथा तमाद्रवत्यागच्छति। प्राणायैव शरीरान्तरे प्राणादिग्रहणार्थमेव अन्यथा भोगासभवादिति प्रयोजन दर्शितम्। पूर्वशरीरत्यागावस्थामाह—तद्यथेति। अन शकट सुसमाहित शोभनैः गुरुभारैः परिच्छदैः सम्पूर्णमुत्सृजन् शब्दानकुर्वन् यायात् चित्सारथिना नून ग्रामाद् ग्रामान्तर गच्छन्नेवमेवाय शारीर आत्मा स्पष्टम्। प्राज्ञेनात्मना ईश्वरेणान्वारूढः प्रेरितः हा तातेत्यादिशब्दान् कुर्वन् याति शरीरान्तर गच्छति। शरीरान्तरग्रहणे पूर्वकर्मणा हेतुत्व प्रतिपादयति—तद्यथेत्यादिना। उप्रा. शूद्रासु क्षत्रियाज्जाता.।

"वैश्याशूद्रयोस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ।" इति स्मृतेः। एनं पाप तत्प्रतिनियुक्ताः चौरादिनियन्तारः प्रत्येनस "ब्राह्मण्या क्षत्रियासूत." इति स्मृतिः। ग्रामण्यो ग्रामाध्यक्षा. अन्नैश्चतुर्विधैर्नानाजातीयैः पानैः कर्पूरादिवासितनीरैरावसथं राजयोग्यगृहे. प्रतिकल्पन्ते तदागमनयुद्धचा उक्तसामग्री सपाद्य सज्जीभवन्ति। सम्भ्रमविशेषमाह—अयमायात्ययमागच्छतीति। एतादृशज्ञातुरपि फलमाह—एव हेत्यादिना। ब्रह्मशब्द आत्ममात्रपरः सर्वत्र प्रतिष्ठितो भवतीत्यर्थः।

प्राणादीनामपि तदंवोत्क्रमणमित्याह—तद्यथेति। व्याख्यातम्। अभिसमायन्ति सर्वतस्तदभिप्रायज्ञा स्वयमेव सम्यक् स्व स्व स्थान परित्यज्यागच्छन्ति। एवमेवेममन्तकाले सर्वप्राणा मुख्या गौणाश्चक्षुरादयश्चाभिसमायन्ति, ज्ञानजनकत्वेन तदभिमुखीभवन्ति परस्परप्रकारेणैवात्मचक्षुरादीनां ज्ञानजनकत्वादुभयेषा कार्यवैमुख्यमेव परस्पराभिमुख्यम्। दृष्टान्तस्तु तदधीनत्वमात्राशे इति बोध्यम्। अन्तकालमाह—यत्रैतदूर्ध्वोच्छ्वासी भवत्यपानवृत्तिविलयेन प्राणवृत्तिप्राबल्यादित्यर्थः। उक्तार्थप्रसङ्गाय पृष्टान्तरप्रतिपादनाय न ब्राह्मणान्तर "स यत्राय शारीर आत्मा बल्य न्येत्यसम्मोहमिव न्येत्यर्थनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्यादत्तो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्तते ऽथारूपज्ञो भवत्येकीभवति॥ एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहु-

रेकीभवति न मनुते इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुरेतस्य हैतस्य हृदयस्याग्र प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्द्धनो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्त प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्त सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति त विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ तद्यथा तृणजलायुक तृणस्यान्त गत्वा अन्यमाक्रममाक्रम्यात्मानमुपसहरत्येवमेवाय पुरुष इद शरीर निहत्याविद्या गमयित्वात्मानमुपसहरति। तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतर कल्याणान्तर रूप तनुत एवमेवाय पुरुष इद शरीर निहत्याविद्या गमयित्वान्यन्नवतर कल्याणान्तर रूप तनुते-पित्र्य वा गान्धर्व वा ब्राह्म वा प्राजापत्य वा दैव वा मानुष वान्येभ्यो वा भूतेभ्य ।" इत्यादि ॥

अस्याथ —अबल्य बलराहित्य नीत्य नितरा गत्वा निपूर्वादिनोर्ल्यप् समोह मूर्छामिव न्येति नितरामेति मूर्च्छायास्तच्छरीरावच्छिन्नतदात्मसमवेतज्ञानप्रागभावसमानकालीनरूपत्वाभ्मर [णा]वस्थाया अतथात्वेऽपि ज्ञानाभावसाम्येन इवशब्द । अत एव नित्यज्ञानरूपे तस्मिन् विशेषज्ञानाभावादिवशब्द इत्यपि परास्तम्। अथ तदैन जीवमेते प्राणा अभि समायन्ति । व्याख्यातम् । अत एवाह—स एता इत्यादि। एता उक्ता स्तेजोमात्रा प्रकाशहेतुभूतानीन्द्रियाणि करणव्युत्पत्ते समभ्याददान समन्तात् अभिस्वाधीनत्वेन आददान ज्ञानजनकमन सयोगविरहेण तान्यपि स्वस्वजन्यज्ञानानुपहितानि कुर्वन्तीति यावत्। हृदयमेव शरीरावयवान्तराणि परित्यज्य हृत्पुण्डरीकमेवान्ववक्रामति अवच्छेदकत्वेन स्वीकरोति। प्राणचैतन्यादेर्जीवनलिङ्गस्य तत्रैवोपलम्भात्। तदेव प्रपञ्चयति—स यत्रेति। यदा एष प्रसिद्धश्चाक्षुष चक्षुरधिष्ठात्री देवता पराङ् आत्मन पराङ् मुखत्वेन पर्यावर्त्तते ज्ञानरूपे कार्ये आत्मन सहकारिता जहातीति यावत्। चक्षुर्द्वारकमेव चोक्तपराङ्मुखत्व बोध्यम्। अथ तदा जीवात्मा रूपाणि न पश्यति सहकारिवैकल्यात्। तच्चादृष्टविशेषविरहादित्यर्थ । तद् व्याचष्टे—एकीभवति न पश्यतीत्याहु । वस्तुतत्त्वज्ञा इति शेष । यदा एकीभवति तस्यामवस्थाया समीपस्था न पश्यन्तीत्याहुरिति तद्व्याख्यातार । एवमग्रेऽपि व्याख्येयम्। श्रवणवदनादिपदानि च पूर्वं पूर्वं व्याख्यातानीति । एव मरणस्य पूर्वामवस्थामुक्त्वा मुख्य तद्वक्तव्यमाह—तस्य हेति । एतस्य पूर्वोक्तस्य हृदयस्य अग्रमूर्ध्वं नाडीमुख प्रद्योतते मुख्यत्वेन

प्रकाशते तेन प्रकाशभूतेन एष आत्मा निष्क्रामति तदा तत्प्रयावच्छिन्नो भवतीति यावत्। तत्स्थानचानियतमित्याह—चक्षुष्टो वेत्यादि। आदित्यलोकप्राप्तिजनककर्मसत्त्वेऽपि मूर्द्धनो वा मस्तकनाडीतो वा, तच्च ब्रह्मलोकप्राप्तिनिमित्तसत्त्वे स्मृत्यन्तरोक्तविलक्षणकर्मसत्त्वे वेत्याह—अन्येभ्यो वा शरीरेभ्य इति। तथा च मोक्षधर्मे—याज्ञवल्क्य उवाच।

तथैवोत्क्रममाणं तु शृणुष्वावहितो नृप।
पद्भ्यामुत्क्रममाणस्य वैष्णव स्थानमुच्यते॥
जङ्घाभ्यां तु वसून् देवानाप्नुयादिति नः श्रुतम्।
जानुभ्यां च महाभागान्साध्यान् देवानवाप्नुयात्।
पायुनोत्क्रममाणश्च मैत्रस्थानमवाप्नुयात्।
पृथिवीं जघनेनाथ ऊरुभ्यां च प्रजापतिम्।
पार्श्वाभ्यां मरुतो देवान्नाभ्यामिन्द्रत्वमेव च।
बाहुभ्यामिन्द्रमेवाहुरुरसा रुद्रमेव च।
ग्रीवायान्तु मुनिश्रेष्ठ नरमाप्नोत्यनुत्तमम्।
विश्वेदेवान्मुखेनाथ दिशः श्रोत्रेण चाप्नुयात्।
घ्राणेन गन्धवहन नेत्राभ्यामग्निमिति।

उक्तरूपात्मनिष्क्रमणानन्तरं प्राणोऽनूत्क्रामति नश्यति तदनन्तरं च सर्वे प्राणाश्चक्षुरादयो नश्यन्तीत्यर्थः। उत्क्रमणावसरे च भाविकर्मकर्यादिवासना स्वप्न इव सविज्ञानो गन्तव्यलोकाभिलाषवान्सम्पद्यते स[वि]ज्ञानमेव स्वाभिलाषविषयीकृतमेव लोकान्तरमन्ववक्रामति गच्छति।

यं यं वापि स्मरन्भाव त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावित॥ इति स्मृतेः।

पूर्वदेहोपार्जितज्ञानादिनाशेऽपि केषाञ्चिद् गुणानां न नाश इत्याह—तमिति। विद्याज्ञानजन्यः संस्कारः कर्म पुण्य पापञ्च समन्वारभेते सम्यगनुबध्नीत। कर्मत्वेन द्वयोरेकविलक्षणाभ बहुवचनापत्तिः। पूर्वप्रज्ञास्तनपानादिप्रवृत्तिहेतुभूतेष्टसाधनत्वस्मरणहेतुः संस्कारः। विशिष्यैतदुपादानं जरायुजमात्रसाधारण्यदर्शनार्थम्। देहान्तरप्राप्तिसामग्रीमादायैव पूर्वदेह त्यजतीत्याह—तद्यथेति। तृणजलायुकः तृणजोऽतिसुकुमारोऽनेकपान् हरितोऽल्पो जीवः तृणस्याश्रितस्यान्तमग्रं पुच्छादंस्तदित्वा मुखपादंस्तृणान्तरमवष्टभ्य पूर्वतृणादात्मानमुपसंहरति विभजति एवाय पुरुषः। स्पष्टम्। इदं प्रत्यक्षशरीरं निहत्य निश्चेष्टं कृत्वा अविद्या गमयित्वा संज्ञारहितं

कृत्वा आत्मानमुपसंहरति । अदृष्टविशेषघटितमवच्छेदकावच्छेद्याभावलक्षण सम्बन्ध देहे परिहरतीत्यर्थ । देहान्तरारम्भक्रममाह—तद्यथेति । पेशस्कारी सुवर्णकार पेशस सुवर्णस्य मात्रावयवान् अपादायावयव्यन्तरादाच्छद्यान्यपूर्वावयविनो रुचकादेर्भिन नवतर नूतन कल्याणतरमतिरमणीय रूप कण्टकादिक तनुते एवमेवाय पुरुष । स्पष्टम् । इद शरीर विहत्याविद्या गमयित्वेति पूर्ववत् । अन्यन्नवतर कर्मान्तरभोगसाधन कल्पान्तर रूप शरीर तनुतेऽदृष्टद्वारा परिगृह्णाति । तथा च पूर्वदेहपरित्यागे देहान्तरपरिग्रहे चात्तसादृश्य न तु पूर्वावयव्यवयवैरुत्तरावयव्यारम्भ इत्यनापि बीजाभावात् । उत्तरदेहस्यानैयत्यमाह—पित्र्य वेति । पितृसम्बन्धि गान्धर्व वा मानुष मनुष्याणा कल्याणतरमितिविशेषणानुरोधादेतदुक्तम् । पापकर्मसत्त्वे त्वाह—अन्येभ्या वा भूतेभ्य इति पञ्चम्यर्थे चतुर्थी । स्मृत्यन्तरोक्ततत्कर्मानुसारेणेत्याशयान्यवहितात्तरमेव पठन्ति "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मय प्राणमयश्चक्षुर्मय श्रोत्रमयश्चाकाशमयो वायुमय पृथिवीमयस्तेजोमय आपोमया ऽक्रोधमयोऽक्रोधमया हर्षमयोऽहर्षमया धर्ममयोऽधर्ममय सर्वमयस्तद्यददमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्य पुण्येन कर्मणा भवति पाप पापेन । अथो खल्वाहु काममय एवाय पुरुष इति । स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यत इति ॥ तदेष श्लोका भवति—

तदेव रक्त राह कर्मणेति लिङ्ग मनो यत्र निषक्तमस्य ।
प्राप्यान्त कर्मणस्तस्य यत्किञ्चित्करोत्ययम् ॥

तस्माल्लोकात्पुनरेत्यास्मै लोकाय कर्मण इति तु कामयमानोऽथाकामयमानो निष्काम आत्मकाम आप्तकामो भवति न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येति । तदेष श्लोका भवति—

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता ।
अथ मर्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ इति ।

तद्यथाहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद शरीर शेतेऽयायमशरीरो मृत प्राणो ब्रह्मैव तेज एव सोऽह भगवते सहस्र ददामीति होवाच जनको वैदह । तदप्येते पुण्यश्लोका —

अणु पन्या विततः पुराणो मा स्पृष्टोऽनुवित्तो मयैव ।
तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो विमुक्ता ॥

तस्मिञ्छुक्लमुत नीलमाहु पिङ्गल हरित लोहित च ।
एष पन्था ब्राह्मणा हानुवित्तस्तेनेति ब्रह्मवित्तेजस पुण्यकृच्च ॥

अन्ध तम प्रविशन्ति ये सभूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्या रता ॥
असुर्या नाम ते लोका अन्धेन तमसावृता ।
तास्ते प्रेत्याभिगच्छन्त्यविद्वासोऽबुधा जना ॥
तदेव सन्तस्तदु द्रुवामो न चेदवेदीमहतीं विनष्टि ।
ये तद्विदुरमृतास्ते भवन्त्यथेतर दु खमवोपयन्ति ॥
आत्मानञ्चेद्विजानीयादहमस्मीति पूरुष ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्चरेत् ॥
यस्यानुवित्त प्रतिबुद्ध आत्मास्मिन्सुन्देहे गहने प्रविष्ट ।
स विश्वकृत्स हि सर्वस्य कर्त्ता यस्य लोक स उ लोक एव ॥
यदैतमनुपश्यत्यात्मान देवमञ्जसा ।
ईशान भूतभव्यस्य न तदा विचिकित्सति ॥
यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित ।
तमेवमयमात्मान विद्वान् ब्रह्मामृतोऽमृतम् ॥
यस्मादर्वाक् सम्वत्सराऽहोभि परिवर्त्तते ।
तद्देवा ज्योतिषा ज्योतिरायुर्होपासतेऽमृतम् ॥
प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम् ।
मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥
मनसैवानुद्रष्टव्य नेह नानास्ति किञ्चन ।
मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति ॥
एकधवानुद्रष्टव्यमेतदप्रमेय ध्रुवम् ।
विरज पर आकाशादज आत्मा महान् ध्रुव ॥
तमेव धीरो विज्ञाय प्रज्ञा कुर्वीत ब्राह्मण ।
नानुध्यायाद्बहूञ्छब्दान् वाचोविग्लापन हि तत् ॥

स वा एष महानज आत्मा योऽय विज्ञानमय प्राणेषु न एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते सर्वस्य वशी सर्वस्येशान सर्वस्याधिपति स न साधुना कर्मणा भूयानो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषा लोकानामसम्भेदाय ॥ तमेत

वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेन तपसा नाशकेनतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमीप्सन्त प्रव्रजन्ति ॥ एतद्ध स्म वैतत्पूर्वे ब्राह्मणा अनूचानो विद्वास प्रजा न कामयन्ते किं प्रजया करिष्यामो येषा नोऽयमात्माय लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति । या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे भवत ॥ स एष नेति नेत्यात्मागृह्यो न गृह्यते अशीर्यो न शीयतेऽसङ्गो न सज्ज्यते उषितो न व्यथते न रिष्यत्येतमु ह्यैवैते न तरत इत्यत पापमकरवमित्यत कल्याणमकरवमित्युभे नु ह्यैवैष एते तरत्य मृत साध्वसाधुनी नैन कृताकृते तपतो नास्य केचन कर्मणा लोको मीयते ॥ तदेतदृचाभ्युक्तम्—

एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् ।
तस्यैव स्यात्पदवित्त विदित्वा न कर्मणा लिप्यते पापकेन ॥ इति ।

तस्मादेवविच्छान्तो दान्त उपरतस्तितिक्षु समाहितो भूत्वात्मन्येवात्मान पश्येत्सर्वमेन पश्यति सर्वोऽस्यात्मा भवति नैन पाप्मा तरति सर्वं पाप्मान तरति नैन पाप्मा तपति सर्वं पाप्मान तपति विपापो विजरो विचिकित्सो ब्राह्मणो भवति एष ब्रह्मलोक सम्राडेव प्रापितोऽसीति होवाच याज्ञवल्क्य । सोऽह भगवते विदेहान्दास्यामि मा चापि सह दास्यायेति ॥ स वा एष महा नज आत्माऽन्नादो वसुदानो स यो ह्येवमेत महान्तमज्जसात्मानमनाद वसुदान विन्दते वसु य एव वेद ॥ स वा एष महानज आत्माजरोऽमरोऽभयोऽमृतो ब्रह्माभय वै ब्रह्माभय हि ब्रह्म भवति य एव वेद ॥ ' इति ।

अयमत्रार्थं —पूर्वजन्ममरणप्रकारमाह—मुक्त्वा तद्विच्छेदोपायाकाङ्क्षाया सर्वानर्थहेतो शरीरादे काममूलकत्वात्तदुच्छेदेनैव शरीरोच्छेदद्वारा मरणाद्युच्छद स्यादिति स्पष्टयितुमाह—विज्ञानमय इत्यादि । प्राचुर्यं मयट् । विज्ञानसामान्यसामग्रीमाह—मनोमय इति । शरीरसामान्योपयोगाभिप्रायेणाह—वाङ्मय इत्यादि, श्रोत्रमय पर्यन्तम् । इन्द्रियान्तराणामप्युपलक्षणम् । निमित्तमुक्त्वावच्छेदकस्य समवायित्वमन्येषा निमित्तत्वमिति विशेष । आत्मनो गुणान्तराण्याह—क्रोधमय इति । अक्रोधपद द्वेषविरोधिरागात्मकेच्छापरम् । हर्षाहर्षौ सुखदु खे तज्जनक गुणद्वयमाह—धर्ममयोऽधर्ममय इति । अधर्म पापम्, एतद्भोगार्थमेव सर्वमित्याह—सर्वमय इति । नहि बीजप्रयोजनाभ्या विना कस्यचिदु-

त्पत्तिरिति न्यायात्। विस्तर पुरस्तात्। सर्वपदार्थमाह—तदित्यादि। तदेव स्पष्टयति—इदमर्थोऽदोमय इति। इदमदशब्दौ प्रत्यक्षपरोक्षाभिप्रायौ। इतिशब्द आत्मगुणोत्कीर्तनसमाप्त्यर्थं। यथाकारी यादृशप्रयत्नवान्। यथाचारी यादृशानुष्ठानशीलश्च तथाभवति तत्सम्बद्धो भवति। लोकप्रसिद्धिमप्याह—साधुकारी साधुर्भवति पापकारी पापो भवतीति। स्वाजातौ यत्कर्म साधुत्वेन प्रसिद्ध तत्कारी साधुरिति विपरीतकर्मा चासाधुरिति प्रसिद्ध। एवमिहापीत्याह—पुण्यापुण्येनेत्यादि स्पष्टम्। यत्नक्रिययो कार्यकारणभावमुक्त्वा यत्नहेतुरिच्छेत्याह—अथो खल्वाहुरिति। कामय इच्छाप्रचुर "ऋतु सकल्प" इति तात्पर्यटीकायाम्। व्याख्यात चोदयनाचार्यै—'फलगोरसास्वरसावाहिनी इच्छा काम तेनोपाधिना साधनगोचरा, अनेनेद कुर्यामित्याकारा च। सकल्प इति पौनरुक्त्य न तु प्रयत्न, यत्कर्म कुरु इतिवात्वर्थस्य करोत्यर्थत्वात्। तदुक्तम्—

यादृशोऽस्या भवेत्कामस्तादृशो जायते ऋतु।
ऋतुनिश्चय एवात्र तत कर्म प्रवर्तते॥" इति।

तया प्रथमक्लेच्छा तदुत्तरमुपायेच्छा ततो याग कृत्वा साधयामीत्यादे कृतिसाध्यप्रकारकेच्छारूपाचिकीर्षा ततो यागादिकृतिरित्यादिरीत्या फलसिद्धिरित्याह—यत्कर्म कुरुते तदभिसम्पद्यत इति। मोक्षार्थमेऽपि मनुबृहस्पतिमतादे—

ज्ञानपूर्वा भवेल्लिप्सा लिप्सापूर्वाभिसन्धिता।
अभिसन्धिपूर्वक कर्ममूल तत फलम्॥

"अभिसन्धि. मायनानुष्ठानाभिप्राय स्वार्थे तद्धित" इति विद्यासागरः। अतैव मन्वसवादमाह—तदेष श्लोको भवतीति। उक्तोऽभिलाषवान्स पुरुषः ह प्रसिद्ध कर्मणा क्रियया तदेवाभिलाषविषयमेवैनि प्राप्नोति। स्पष्टमाह—लिङ्ग मन इति। वस्तुमानस्य लिङ्ग ज्ञापक मनो यत्रार्थे निषिक्त नितरामासक्तमिच्छाया मन सयोगस्यासमवायिकारणत्वाच्चेदमिच्छाया मनोधर्मत्वाभावात्। इदानी प्राप्तस्यापि फलस्य क्षयित्वात्तत्रासक्तिर्न कार्येत्यभिप्रायवानाह—प्राप्यान्तमित्यादि। यत्किञ्चित्कर्महे लौकिके करोति तस्य कर्मण फलभोगनान्तनाश प्राप्य तस्माल्लोकादिन्द्रादिलोकात्पुनरेति भूलोकमु सासारस्यानादितया पूर्वमप्येतादृशगतागतसूचनाय पुनरिति। आगमनप्रयोजनमाह-अस्मै लोकायाशरीरग्रहणाय। तस्यापि प्रयोजनमाह—कर्मण इति। धर्मायमनुष्ठानाय शरीरव्यतिरेकेण पूर्वोपात्तकर्मणा भोगासम्भवाच्छरीरिणा

विहितनिषिद्धकर्माचरणस्यावश्यकत्वात्तद्भोगार्थं स्वेदन्तरोत्पादस्यावश्यकत्वाद् विच्छेद एव यथोक्तप्रवाहस्येत्यर्थः। इतिशब्द उक्तोपसहारार्थः। नु सानुकम्पखेदे कामयमानो विषयासक्त। एवविधदु खस्येतिभावः। अथाधिकारेऽकामयमानो विषयेष्वनासक्त प्रतिपाद्यत इतिभाव। तात्पर्यटीकाया तु "कामयमानो य आसीत्स एवाप्यकामयमानो भवति। अकामयमान काममपरिहरन् तत्परिहारसिद्धौ सोऽकाम.। तस्य व्याख्यान निष्काम इति। आत्मन कैवल्योपेतात्मकाम तत्प्राप्त्या आप्तकामो भवति। न तस्य प्राणा इति। शाश्वतो भवतीत्यर्थ" इति व्याख्यातम्। अत्रैव जीवन्मुक्त्यवच्छेदकदेह एव समवनीयन्ते समाप्यन्ते तदारब्धभोगावच्छेदकदेहावच्छिन्नप्राणप्रागभावसमानकालीनध्वसप्रतियोगित्व फलितार्थ.। तत्पूर्वदेहावच्छिन्नप्राणप्रतियोगिकाश्च प्रागभावासिद्धा ब्रह्मैव सन्निति प्रागेव ब्रह्मसादृश्यप्राप्तिपरत्वेन व्याख्यातम्। तथा च ब्रह्मसादृश्यप्राप्तिरेव ब्रह्मप्राप्तिरित्यर्थ। तत्तत्रार्थो वक्ष्यमाणश्लोको मन्त्रो भवति। पूर्वार्द्धस्य स्पष्टम्। अथ तदेति व्याख्यातार। मर्त्यो जीव, अमृतः शरीरसम्बन्धरहितो भवतीत्यनेनावस्थाया ब्रह्म समश्नुते प्राप्नोति, अयमेव ब्रह्मप्राप्तिपदार्थ इत्यर्थ। इति मन्त्रसमाप्तौ। जीवन्मुक्त्यवस्थामाह—तद्यथेति। अहिनिल्वयिनी सर्पकञ्चुकः वल्मीके प्रसिद्धे "वामलूरश्च गाकुश्च वल्मीक पुन्नपुसकम्" इत्यमरः। मृता श्वासोच्छ्वासादिशून्या प्रत्यस्था वैपरीत्येन प्रक्षिप्ता अधोमुखा ऊर्ध्वपुच्छा च शयीत तिष्ठेत। एवमेवेद शरीर शेते, आत्मत्वेनानवगम्यमानत्वात्। अथायमनस्थिक शरीर तदभिमानशून्य ब्रह्मज्ञानवान् आत्मा जीवो ब्रह्मैव ब्रह्मसदृश प्रारब्धभोगाय विद्यमानेऽपि शरीरे तादृशसम्बन्धाभावात्। तथा च तात्पर्यटीकायां वाचस्पतिमिश्राः "अनात्मन्यात्मग्रहोऽहमस्मीति मोहोऽहकार" इतिवार्त्तिकमुपादाय "अत एव सर्वस्येयमात्माशी कृमेरपि मानुभूव प्रयास" इति। सोऽयमीदृशोऽभिनिवेश शरीरादीनात्मत्वेनाध्यवस्यतो भवति नात्मतत्त्वमविदुष स खल्वहिनिल्वयिनीमिवाहि स्वतो व्यतिरिक्त शरीरादिक पश्यन् तया स्निह्यति स्नेहविरहान्न तप्यते नाप्यनुशोचतीति। लोकते भुङ्क्त इति, लोक एव प्रारब्धमात्र भुञ्जानो न तु कर्मान्तरमर्जयन्। तदाहु —

दोषा तुषानुबद्धा हि कर्मतण्डुलजा यथा।
जन्माङ्कुराय कल्पन्ते न कल्पन्ते तु केवलाः॥ इति।

इदञ्च माध्यन्दिनानां पाठमनुसृत्य। काण्वास्तु-"अथाऽयमशरीरोऽमृत प्राणो ब्रह्मैव समश्नाडिति" आदिपठन्ति। अशरीरत्वादेवामृतो देहत्यागचि-

न्ताविरहात् प्रकर्षेणाविति जीवति इति प्राण । प्रकर्षस्तु प्रपञ्चसम्बन्धरा-हित्यमेव । तदेवाह—ब्रह्मवेति । कर्मान्तरानुत्पत्तिमाह—तेज एवेति । परैरपि स्वयज्योतिश्चिदानन्दमात्रमेवेति मुख्यार्थस्यावश्य त्याज्यत्वात् । सम्राडिति जनकस्य सम्बुद्धि । राजा हर्षविशेषादाह—सोऽहमित्यादि । स्पष्टम् । तदभिप्रा-यस्तु ब्रह्मज्ञानाङ्गस्य सन्यासस्यानुक्तत्वात्तदपि कथनीयमिति प्रश्नस्तु न कृतो याज्ञवल्क्यबुद्धिपरीक्षार्थमिति व्याख्यातार । तदर्थेते श्लोका इति । स्पष्टम् । अणु सूक्ष्मो दुर्ज्ञेयत्वात् पन्या ब्रह्मबोधोपाय वितर ससारतरणहेतु-त्वात् । विनत इति काण्वपाठे विस्तीर्ण वितते ससारसमुद्रेऽस्य तरणहेतुत्वा-दिति व्याख्यातार । पुराण पुरापि नव नित्यश्रुतिप्रकाशित्वात् । मा मुमुक्षु स्पृष्ट प्राप्त । फलोपघाननियममाह—अनुवित्तो मयैवेति । पुराणशब्दार्थं प्रदायानुच्छेदमाह—तेनेति । धीरा कर्मफलेच्छामात्रशून्या । इतो देहादिप्रप-ञ्चाद्विमुक्ता सन्त. स्वर्गलोक कर्मफलमात्रमुत्क्रम्य विहाय यान्ति मुक्ति लभन्त इत्यर्थ । भ्रान्तानां मतमाह—तस्मिन्निति । तस्मिन् मोक्षे शुक्ल श्वेत-वर्ण लोक तादृशे प्रासादे स्त्रीपुशरीरैश्च सपरिच्छदैस्तादृश्याधिष्ठात्र्या देव-तया योषिता पुरुषेण वाधिष्ठितमाहु । उतोऽन्ये नील कृष्णाञ्जनचयाभमाहु-रित्यस्य सर्वत्रानुषङ्ग । पिङ्गल सुवर्णाभ हरित दूर्वादलाभ लोहित प्रवाला-दितुल्यम् । अनेन शैववैष्णवशाक्तभैरवसौराद्यागमाना प्रतिषेधो दर्शित', इतिव्याख्यातार । एतदभिप्रायेणैव भारतेऽपि पठ्यते—धृतराष्ट्र उवाच—

भाभाति शुक्लमिव लोहितमिवाथो कृष्णमप्याञ्जन काद्रव वा ।
न पृथिव्या तिष्ठति नान्तरीक्षे नैतत्समुद्रे सलिल बिभर्ति ॥
न तारकासु न च विद्युदाश्रित न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न च देवतासु नैतच्चन्द्रे दृश्यते नोत सूर्ये ॥
नैवक्षु नैतद्यजुषु नाप्यथर्वसु न वा दृश्यमभलेषु सामसु ।
रथन्तरे बृहत्यथ वापि राजन् महाव्रतस्यात्मनि दृश्यतेऽपि तत् ॥

एव भ्रान्तानां सालोक्यमेव मुख्यमुक्ति मन्वानाना मतमुक्त्वा प्रकृतमाह—एव इति । पूर्वोक्त पन्या उपाय ब्रह्मण ब्राह्मणेनानुवित्तोऽनुभूत. । यद्वा ब्रह्मण ईश्वरेणानुवित्त तत्साक्षात्कारहेतुत्व निरस्यति—ब्रह्मविदिति । मोक्ष कीदृश इत्याकाङ्क्षाया मतान्तर निरस्यति—अन्धन्तम इति । असभूतिं विनाशमुपासते आत्मनाश मोक्षत्वेन ये जानन्ति, अन्धन्तम प्रविशन्ति तत्त्वा-नभिज्ञत्वात् । न च सम्भूतिपदस्य नाशपरत्वे किमानमिति चेत्, उच्यते, ईशावास्याव्याये हि एतन्मन्त्रानन्तर मन्त्रद्वय पठ्यते—

अन्यदेवाहु सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणा ये नस्तद्विचचक्षिरे ॥
सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभय सह ।
विनाशेन मृत्यु तीर्त्वा सभूत्यामृतमश्नुते ॥ इति ।

नास्तिका हि-"आत्मनाश एव मोक्ष' । न चैवमपुरुषार्थत्व दु खहेतुत्वेन शरीरादेरिवात्मनोऽपि हेयत्वात् शरीरादिव्यतिरेकेणात्मनि दु खानुदयवदात्मव्यतिरेकेण शरीरादावपि दु खानुदयात् । तदुक्तम्—

न तैर्विना दु खहेतुरात्मा चेत्तेऽपि तादृशा ।
निर्दोष द्वयमप्येव वैराग्यच्चेद् द्वयोस्तत ॥ इत्याहु ।

तदयुक्तम्, आत्मनाशस्यापुरुषार्थत्वात् । दु ख मे मा भूदित्यात्मनि दु खाभावसम्बन्धार्थमेव प्रवृत्तिदर्शनात् । ये तु सभूत्यामविनाशेन जीवस्य स्वाभाविकब्रह्मभावसम्पत्तौ रतास्ते तत पूर्वापेक्षया भूयो बहुलमिव तम प्रविशन्ति । नित्यप्राप्तस्यापि ब्रह्मणोऽविद्यया प्राप्तत्वाभिमानादविद्यानिवृत्तौ प्राप्तत्वोपचार, कण्ठचामीकरन्यायात् । हिविध हीप्सित पुरुषस्य किञ्चिदप्राप्त ग्रामादिक किञ्चित्पुन प्राप्तमपि विभ्रमवशादप्राप्तमिवावगतम् । यथा स्वग्रीवावनद्ध ग्रैवेयकादि । एव जिहासितमपि द्विविध किञ्चिदहीन जिहासति यथा वलयितचरण फणिन, किञ्चित्पुनर्हीनमेव जिहासति यथा चरणाभरणे नूपुरे फणिनमारोपितमिति प्रक्रम्य तथेहाप्यविद्यामारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुत सुखदु खरहिते समारोपितनिबन्धनस्तद्भावस्त्वमसीतिवाक्यार्थज्ञानात्साक्षात्कारपर्यन्तानिवर्त्तते । तन्निवृत्तौ च प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्त भवति । त्यक्तमपि शोकदु खाद्यत्यक्तमिव त्यक्त भवतीत्यादि वेदान्तिन । तदप्ययुक्तम्, जीवब्रह्मणोर्भेदस्य प्रामाणिकत्वादविद्यामूलकत्वे च मानाभावात् । तदेव दर्शयति-अन्यदेवाहुरिति मन्त्र । मोक्षस्वरूप सम्भवाद् ब्रह्मैक्यरूपादन्यदेवाहु । असम्भवादात्मनाशादप्यन्यदेवाहुरिति धीराणा वेदतात्पर्याभिज्ञाना वाक्य शुश्रुम । यद्वा इति पूर्वोक्तमर्थं शुश्रुम शाब्दयाम । आत्मा श्रोतव्य इत्यादिदर्शनेन श्रृणोते शाब्दज्ञाने निरूढलक्षकत्वस्वीकारात् । ये धीरा नोऽस्माक तन्मोक्षस्वरूप विचचक्षिरे विशेषेणाख्यातवन्त । कस्तर्हि तान्येवानुविनश्यति ब्रह्मैव सन् एति ब्रह्मैव सन् ब्रह्माप्येतीत्यादि श्रुतीनामर्थ इत्यप्याह—सम्भूति चेति । उक्तरूप सम्भूतिविनाशोभय यो वेद जानाति वेदतात्पर्यविषयत्वरूपसाक्षात्यावशिष्ट वेदेत्यर्थ. । स नैयायिकादि विनाशेन मृत्युदु ख तीर्त्वा सभूत्यामृतमश्नुते

मोक्षं प्राप्नोति । दुःखनाशाभिप्रायेण तान्येवानुविनश्यतीत्युक्तम्, ब्रह्मसाम्यसम्पत्त्या च ब्रह्मवेद ब्रह्मैव भवतीत्युक्त तादृशमेव मोक्षं प्राप्नोतीत्यर्थः । काण्वाः प्रकृते—

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रता ॥

इति मन्त्रं पठन्ति । तदुत्तरमपीशावास्योपाख्याये पठ्यते—

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥
विद्यां चाविद्यां च यस्तद्वेदोभय सह ।
अविद्यया मृत्यु तीर्त्वा विद्ययामृतमश्नुते ॥ इति ।

तत्र भाष्यानुसारेणैव व्याख्यानम् । नन्वश्वमेधादिना साकारोपासनया च स्वातंत्र्येणैव मोक्ष स्यादत आह—अन्धं तम इति । ये प्रसिद्धाः कर्मिणः अविद्यामश्वमेधादिरूपा मिथ्याज्ञानजन्यामुपासते ते अन्धं तमः संसाररूपं प्रविशन्ति न तु मोक्ष लभन्ते । येऽपि विद्यायां साकारोपासनायां रतास्तेऽपि तदधिकं संसारं लभन्ते । उपासनाकर्मफलकामिनो हि स्ववर्णाश्रमनियतं कर्म त्यजन्ति, अतस्तेषां श्वसूकरादिशरीराण्येव स्युः कर्मिणां तु तत्कर्मापरित्यागात्प्रथमं पित्र्यदैवगान्धर्वादीनि शरीराणि तदुत्तरकर्मक्षये तु श्वसूकरादिशरीराणीति कर्मपित्तया सगुणविद्यामात्रविदां तदधिकतमः प्रवेश इतिभावः । एवमुत्तरवाक्यद्वयमपि व्याख्येयम् । तथा चेशावास्यभाष्यम्—"विद्याकर्मणो. समुच्चयसिद्ध्यर्थं फले भेदमाह—अन्य देवेति । अन्ययैकस्यैव फलवत्त्वेऽन्यस्य तदङ्गत्वमेव स्यात् । विद्याविद्ययोरन्यदेव फलमाहुः "कर्मणा पितृलोको विद्यया देवलोकः" इति श्रुतेः । इति शुश्रुम धीराणा धीमतां वचन ये आचार्या नोऽस्मभ्य तत्कर्म ज्ञान च विचचक्षिरे व्याख्यातवन्तः तेषामस्मागमः पारम्पर्यागत इत्यर्थः । अतो ज्ञानं कर्म च सहानुष्ठेयत्वेन यो वेद तस्यैतत् समुच्चयकारिण एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते । अविद्यया कर्मणा मृत्युशब्दवाच्य कर्म ज्ञानं च तीर्त्वा विद्यया देवताज्ञानेन चामृतमश्नुते प्राप्नोति । तद्धयमृतमुच्यते यद्देवतात्मगमनम्" इति । अमृतत्वमत्रापेक्षिक न तु मुख्यमिति बोध्यम् । भाष्यार्थं तु "अप्रमाणात्कर्य पारमार्थिकाद्वैतानुभवोत्पत्तिरित्यत आह—

"देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पित ।
लौकिक तद्वदेवेद प्रमाणन्त्वात्मनिश्चयात् ॥

आत्मनिश्चयात् ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थ । यदलौकं तन्न प्रमाहेतुरिति व्याप्तौ मानाभाव, पारमार्थिकप्रपञ्चवाहिभिरपि हि देहादिष्वात्माभिमानो मिथ्येवेति वक्तव्यम्, प्रमाणबाधितत्वात् । तस्यैव समस्तप्रमाणकारणत्व च भाविकलोकयात्रावाहित्वञ्चाभ्युपेयम् । सेयमस्माकमप्यद्वैतसाक्षात्कारे विघा भविष्यति । अन्त करणवृत्तिभेदप्रतिफलितचैतन्यरूपस्याद्वैतसाक्षात्कारस्य प्रतिबिम्बितचिदशे सत्यत्वेऽपि वृत्त्यशे मिथ्यास्वरूपरूपत्वात् साक्षात्कारस्य च ब्रह्मरूपस्य पारमार्थिकत्वेऽप्यकार्यत्वात्, एकान्तत पारमार्थिकस्योत्पत्त्यभावादुत्पद्यमानस्य च पारमार्थिकत्वाभावात्कथमप्रमाणादुक्तानुभवात्पारमार्थिकत्वोत्पत्तिरिति नाशङ्कनीयम्, अविद्याया अविद्योत्पादकत्व तदुच्छेदकत्व वा नानुपपन्न कनकवदविद्याया अप्यविद्योच्छेदकत्वोपपत्ते । तथा च श्रुति.—विद्याञ्चाविद्याञ्च" इत्याद्युक्तम्, तच्चिन्त्यम्, देहात्मैक्यज्ञानस्य भ्रमत्वेऽपि स्वदुक्तमिथ्यात्वलक्षण्याज्ज्ञानत्वावच्छिन्नकरणतायाश्च भ्रमसाधारणत्वात् । मन्त्रश्च कल्पतरुकृद्भिर्व्याख्यात "विद्या वृत्तिमविद्याञ्च कार्यकारणभावेन सहितेन यो वेद सोऽविद्योपादानकत्वेन तन्मय्या वृत्त्या तदुपादान मृत्युमविद्यां तीर्त्वा स्वरूपभूतविद्योपलक्षितममृतमश्नुते" इति । अथ मन्त्रद्वयस्थाविद्याविद्यापदार्थैक्यमनुपपन्नम्, अविद्यापदस्य च स्वोपादेयवृत्तिलक्षकत्व विद्येत्युपपदविभक्त्याश्रयणञ्चेत्यादिस्वरूपमूह्यमित्यास्ता विस्तर । तस्मादयमर्थ.—ये विद्यामुपासते स्वीकुर्वन्ति तेऽन्धन्तम ससारं प्रविशन्ति अविद्यापदार्थस्यैकस्य सर्ववादिभि स्वीकारादाह—तत इति । विद्याया ज्ञानस्वरूपे आत्मनि रता ततश्चार्थाद्वैदान्तिना लाभ । एवञ्च विद्यात्मके ब्रह्मण्यविद्याया कथ सम्भव इत्यपि युक्तिर्दर्शिता । न हि भास्करे तिमिरावकाश । न च वृत्त्युपहितचिदेवाज्ञानविरोधीति वाच्यम्; शुद्धचित. स्वप्रकाशत्वानुपपत्तेः 'तमस परस्तात्" इत्यादिश्रुतिविरोधाच्च वृत्त्युपहितचितो घटावच्छिन्नचैतन्यनिष्ठाज्ञानमात्रविरोधित्वोक्तावपि तावता शुद्धस्याज्ञानविरोधित्वानुपपादनात् ।

न च स्वतस्तृणतूलभासकस्य सौरालोकस्य सूर्यकान्तावच्छेदेन यथा तद्दाहकत्वमेवं स्वतोऽविद्यातत्कार्यभासकस्यापि चैतन्यस्य वृत्त्यवच्छेदेनाज्ञानविरोधित्वं नानुपपन्नमिति वाच्यम्, शुद्धचैतन्यस्य विषयभासकताया

एव तैरनङ्गीकारात् । अन्यथा सर्वदैव जगद्ज्ञानापत्ते । सूर्यकिरणसूर्यकान्त-सयोगजन्यवह्नेरेव तृणादिदाहकत्वाच्च । भासकताया भास्वरत्व तेजोरूपनिष्ठो ज्ञानविशेषोऽवच्छेदक' । दाहकताया च स्पर्शनिष्ठमुष्णत्वमिति भेदाच्चेत्यास्ता तावत् । अत एवाह—अन्यदेवाहुरिति । विद्याया ज्ञानादन्यदेवाहुर्न तु ज्ञान-स्वरूपम् । अविद्याया अप्यन्यदेवाहुर्नियज्ञानाश्रयत्वात् । भ्रमस्य दोषजन्य-त्वेनेश्वरज्ञाने नित्यभ्रमत्वाभावादविद्यासम्बन्धमिश्रमाहुरिति फलितार्थ । यद्वा पराभिमताविद्याया अन्यद्विरुद्धमेवाहु स्वस्या भावाभावात् ।

शङ्करोपाध्यायास्तु "अविद्या कर्म तदुपासते तन्मात्रासक्ता भवन्ति तेन केवलकर्मोपासनेन जन्मविच्छेद । विद्या तत्त्वज्ञान तन्मात्रासक्ता न भूयोऽति नान्ध तम प्रविशन्ति निन्याकरणेन प्रत्यवायस्यातिविरुद्धत्वात्, विद्या तत्त्वज्ञानविद्या कर्म च सह वेद मोक्षजनने परस्परसापेक्षत्वात् । तत्र कर्मणस्तत्त्वज्ञानद्वारा ज्ञानस्य च साक्षान्मोक्षहेतुत्वम् । सहित्यस्य तावतैव सिद्धे । न तु तुल्यक्षतया द्वयोर्नौहियववत्कारणत्वम्" इत्याहु ।

इत्यल बहुना । सकामकर्मानुष्ठायिना निन्दामाह -असुर्या नाम इति । आत्मतत्त्वानभिज्ञत्वेनाविद्योपासनरूपेणोपाख्यानम् । आनन्दा इति । शाखान्तरपाठे अनानन्दा इत्यर्थ, तदानन्दस्य दु खमिश्रित्वेनानुपादेयत्वात् । अत एवान्धेनादर्शनात्मकेनाज्ञानेन तमसा वृता आच्छादिता तान् स्थावरा-न्ताम्प्रेत्य, परलोकार्थकर्मक्षयात्, त्यक्त्वा देह वा अभिगच्छन्ति । यथाकर्म यथा-श्रुत ये केचिदामहन आत्मतत्त्वानभिज्ञा जना आत्मना दु खमध्ये निक्षेपात्त-द्घोपचार । प्रकृते त्वविद्वासोऽबुधा जना इति पाठ । तत्रावुधा इति पूर्ववद्-व्याख्या । ब्रह्मसादृश्यमेव मोक्ष इति दर्शयति—तदेवेति । तद् ब्रह्मैव तत्सदृशा भवन्ति वयन्तद्ब्रह्म तद्विज्ञा भवाम । ब्रह्मसादृश्यप्राप्तिरेव ब्रह्मभावप्राप्ति-रित्युच्यते इत्यर्थ । उत्कारो निपात । न चेदेव विजानीयास्तर्हि अवेदी अज्ञानी वेदतात्पर्यानभिज्ञश्च मुख्यमेव जीवब्रह्मणोरभेद गत्वा नो भ्रान्त इत्यर्थ । तथा च तत्त्वज्ञानाभावान्न मोक्ष इत्याह—महती विनष्टिरिति । परम-पुरुषार्थापवर्गाप्ति[द्धि] रूपा परमा क्षतिरिति भाव । तदेव विनिगमयति—ये तद्विदुरित्यादि । स्पष्टम् । तथा च ब्रह्मज्ञानेनामृतभावप्राप्तिर्जन्ममरणोच्छेदा-न्महतीविनष्टिरिति व्याचष्टे । अथेतरेरिहैव सन्तोऽप्यविघ्नद्वयमिति शाखान्तरे पाठ । अस्मिन्नेव शरीरेऽस्यात्मन्या न तज्ज्ञातु समर्था भविष्याम इत्यादि-रर्थ । इदमपि भेददृष्टीकरणार्थत्वेन समञ्जसम् । अभेदमतमेव दूषयति—आत्मान चेदिति । अयमस्मीत्यभेदज्ञानानुकरणम्, तर्हि किमिच्छन् कस्य

कामाय शरीरमनु शरीरसम्बन्ध मचरेत्ससारे सचरण कुर्यात् । सज्वरोदिति काण्वपाठे शरीरसबन्धेन दु खी कथ स्यात् । अयमर्थ.—उक्तपक्षे मुक्तससारिणोरविशेषापत्ति. ससारदशायामपि स्वप्रकाशसुखात्मकस[त्ता]त्वात् । न चावच्छिन्नानन्दरूपेण तत्र भासते, तदंशे मूलाविद्यावरणसत्त्वादिति वाच्यम्, चिदानन्दयोरैक्येन ज्ञानाशस्याप्यावरणापत्तेः ।

यत्त्वानन्दादीनामपि ग्रहोऽस्त्येव परन्त्वविवेकेनागृहीतत्वाभिमानोऽभिज्ञाया गृहीतस्यापि देवदत्तैक्यादे तत्तेदत्वाख्योपाधिद्वारकसामानाधिकरण्याननुसन्धानादगृहीतत्ववदिति, तच्चिन्त्यम्, अभिज्ञायामैक्यग्रहे मानाभावात्, ऐक्यस्य वस्तुतस्तदतिरिक्तत्वेनागमाच्च । ज्ञानानन्दयोश्च भेदाभावात् । तदेतदुक्त यद्यसौ न प्रकाशेत कि[र्ह्यन्य]प्रकाशन इत्यादि । अपि चैव चिदात्मकानामानन्दादीना विप्रतिभासेन प्रतिभासस्वीकारे बुद्ध्यादिभेदस्यापि चिदात्मनि विद्यमानस्य ग्रहापत्त्या विशेषदर्शनसत्त्वाद्विषयविषयिणोस्तादात्म्याध्यासो न स्यात् । न च बुद्ध्यादिभेदस्य निर्वाच्यप्रतियोगिकत्वेन तात्त्विकत्त्वाभावान्न चिदात्मस्वरूपत्वम्, आनन्दादीना तु चित्स्वरूपत्वेन तात्त्विकत्वात्तद्ग्रहेणैव ग्रह इति वाच्यम्, प्रातिभासिक शुक्तिरूप्यप्रतियोगिलाभावस्यापि त्वया व्यावहारिकत्वाभ्युपगमेन प्रतियोग्यभावयो. समानसत्ताकत्वनियमाभावात्, तात्त्विकस्यैव स्वरूपस्य ग्रहोनत्वतात्त्विकस्येत्यस्य स्वन्मते क्वचिदप्यसिद्धत्वाच्च ।

किञ्च ब्रह्मणो नित्यसिद्धत्वान्मोक्षस्यापुरुषार्थत्वापत्ति, पुरुषप्रयत्नसाध्यस्यैतत्त्वात् । अन्यथा घटावच्छिन्नामृतहरणेऽपि प्रवृत्त्यापत्तेरिति प्राञ्चः । अविद्यादिक चाग्रे निरसिष्याम । ब्रह्मण उपादानत्व निरस्यति—यस्येति । तस्यात्मनो लोक: उत पक्षान्तरे स आत्मा लोक इव आत्मा निमित्तमात्र लोकस्योपादान वेत्यस्मिन् सन्देहे गहने तर्कप्राचुर्यदुर्गमे सशये प्रविष्टो विशेष्यत्वमापन्न स ब्रह्मरूप: विश्वकृतस्यैव व्याख्यानम् । स विश्वस्य कर्ता निमित्त परंनिमित्तत्वस्यापि स्वीकारात् । सिद्धसाधनवारणाय हिशब्दोऽवधारणे उपादानत्वव्यावृत्त्यर्थं । एतादृश आत्मा यस्यानुचित्तो येन साक्षात्कृत. तेरेवमेवोक्तत्वात्, स प्रतिबुद्धस्तत्त्वज्ञानवान्न तु ब्रह्मण. प्रपञ्चतादात्म्यप्रपञ्चवादी । अत्र प्रतिबुद्ध इत्यन तच्छब्दानुषङ्गश्चतुर्थचरणस्य द्वितीयचरणोक्तसन्देहस्वरूपसमर्पकत्वेनान्वयश्च व्यवधानेऽपि न दोष, अर्थगत्या तथैवान्वयोपपत्ते: । परंरपि हि राजादिभीत्या कर्म कर्तव्यमित्याशङ्कावारकत्वेनोक्तमन्यमदतायं सन्देहे सम्यगुपचीयमाने गहनेऽचिन्त्यशक्तौ प्रविष्टो घटा-

काञ्चदन्तरवस्थित प्रतिबुद्ध स्वयंप्रकाशचित्स्वभाव आत्मा निरतिशयानन्दो यस्यानुवित्तो येन साक्षात्कृत मोक्ष्यमन्त शरीरे प्रविष्टोऽज्य ज्ञातुरात्मा विरवक्ष्यन्। तस्य व्याख्यानम्—स हि सर्वस्य कर्त्ता हि यस्मात्कार[ण]स्य विदुषो य स एव भवभौतिकप्रपञ्चस्याद्यादिकस्तस्मादयमर्थ मनि भेदे ईश्वरादीनिर्भनि भेदे ईश्वरादिभेदोल्लेखेन कर्मनिकारोऽप्युक्त। तत्त्व लो[क] ऽनि विश्वकर्त्तृत्वेन तेन भेदवृद्धि। प्रवक्तव्या वारयति—स उ लोक एव विश्वमपि स एव न तु तस्मादन्यदिति व्याख्यानम्। तत्रापि येन साक्षात्कृत इत्यादेश्यस्य प्रतिनिर्देशो न कश्चिदिदुक्त।

न च स विश्वकृदित्येव विधेयमित्यवाचम्, ब्रह्माकारविषयस्यैव प्रपञ्चकर्तृत्वमिति व्याख्यानविरोधात् विषयस्य पूर्वमनुद्दिष्टत्वात्, न योऽन शरीरे प्रविश्य इत्यत्र यच्छब्दाध्याहारेण तस्याप्यादेशवाचकत्वसम्पादनाच्च। आमान चेद्विज्ञानीयादित्यत्रोक्तस्यार्थस्य विषयत्वमाह—यदेवमिति। अनुपश्यति साक्षात्करोति देव निरवधानसम्पन्न एतमित्यनेन विश्वकर्तुरीश्वरस्य परामर्शात्। अञ्जसा तत्त्वत भूतभविष्यग्रहण वर्तमानस्याप्युपलक्षणा तनिरूप्यवात्। ईशान स्वातन्त्र्येण प्रयोक्तार तदा न विचिकित्सति द्वैधिनो भवतीत्यर्थ, न जुगुप्सतीति शाङ्करान्तरे। यस्मिन्निति पञ्चजनाइति समन्न पूर्वपञ्च च समस्तन मन्त्राया इति नालमरणाम्नायुक्तादुदात्तपाठात् पञ्चजना इत्यत्र नमासस्वरस्यैव पाठाच्चेति वेदान्तिन। पञ्चजनाश्च प्राणचक्षुश्रोत्रान्नमनोरूपा वक्ष्यमाणवाक्यशेषात्। काण्वशाखाया तु प्राणस्य प्राणमिति मन्त्रेऽन्नस्यान्नमित्यशो न पठ्यते। तत्र तदेव ज्योतिषा ज्योतिरिति मन्त्रे निरुक्तकार 'गन्धर्वा पितरो देवा असुरा रक्षामीत्येके। चत्वारो वर्णा निषाद पञ्चम इत्यौपमन्यव" इत्याह। अनिष्टिन यथासम्भव ज्ञेय तमेवात्मान परमात्मान ब्रह्मक्षत्रमृत विद्वान्मृत इति मन्त्रे निश्चिनोमि। तज्ज्ञानादमृतत्व भवति न तु तत्तादात्म्य भेदस्यैव प्रामाणिकत्वादिति भाव। ईश्वरसामर्थ्यं न कालाद्योनमित्याह—यस्मादर्वागिति। यज्ञस्यवालोपाविरूप सम्वत्सरो मनुष्यपित्रादिभेदभिन्नोऽहोरात्रादिविभक्तकालोपाधिभि परिच्छिन्न परिवत्त चक्रवदविच्छेदेन भ्रमण करोति। अत एवाष्टावक्रेण जनक प्रयुक्त।

चतुर्विंशतिपर्व त्वा द्विनेमि द्वादशप्रधि।
तत्रिणष्ठिशतार वै चक्र पातु सदागति॥ इति।

तदा मन्त्र ज्योतिषा प्रकाशकाना सूर्यादीना ज्योति प्रकाशसामर्थ्यनिर्वाहमावश्यकेषा स्थितिकालपरिच्छेदक चार्यानाश्चकमपि। कालविशेषस्यापि

तद्धेतुत्वादाह—अमृतमिति। उपासते साक्षात्कुर्वते स्वीकुर्वन्ति देवाद मुक्तिफलकब्रह्मविद्याया तेषामप्यधिकारलाभायम्। सर्वनियामकत्वमाह—प्राणस्य प्राणमिति। शरीरविधारकस्य प्राणस्यापि विधारकम्। एतेन—

न प्राणेन नापानेन जन्तुर्जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ॥

इति श्रुत्यन्तरमपि व्याख्यातम्। एवञ्चक्षुषश्चक्षुरित्यादावपि व्यारयेयम्। श्रोत्रस्याजन्यत्वेऽपि तदवच्छेदककर्णशष्कुलीजनकत्वादवच्छेदकत्वस्य चादृष्टविशेषघटितसम्बन्धरूपत्वादन्नस्य भोग्यवस्तुजातस्यान भोग्यत्वनिर्वाहक भोग्यभोक्तृनियामक वाद् ये विदुर्जानन्ति ते ब्रह्म निश्चक्युर्निश्चितवन्त। पुराण पुरापि नव ध्वसप्रागभावरहितम्। तस्य कालादिसाधारण्यादाह—अग्र्यमिति। तत्साक्षात्कारोपायमाह-मनसैवानव्यम्। एवकारेण चक्षुरादिव्यवच्छेद। नेह नानेत्यादि व्यारयेयम्। ग्राह्यग्राहकमेव दृढयति-मनसेति। एकधैवेति शाखान्तरपाठे त्वेकेनैव प्रकारेणात्मरूपेणात्यर्थ। यद्वा एकया एकमेवानुद्रष्टव्यमिति निर्विकल्पाभिप्राय। अत एव प्रमेय प्रमेय तद्धति तत्प्रकारकत्वरूपेणेत्यर्थ। यद्वा एकधैकमेवानुद्रष्टव्यमिति निर्विकल्पाभिप्रायमत एवाप्रमेयमप्रमेय तद्धति तत्प्रकारकत्वरूपप्रमित्यविषयत्वादस्यैव मुख्यप्रमाणदार्यत्वात्। तज्ज्ञानफलस्य निवृत्त्यभावमाह—ध्रुवमिति। नह नानेत्यस्य मिथ्यात्वेन प्रामाण्य तदर्थकत्वे मानाभावात्।

यत्तु नानापदोपात्त वृत्तिविषयत्व तादात्म्येनैव निषेधे प्रतियोगितावच्छेदक न तु पर्याप्त्या एकाश्रयेण नानास्तीति प्रयोगमत्वेऽपि वायौ नानारूपाणि न सन्तीत्यादौ स्वरूपेणापि तदृर्शनात्। अन्यथा किञ्चनेत्यस्य वैयर्थ्यात् केनापि सम्बन्धेन नानात्ववत्तास्तीत्यस्य ततो लाभात्। अन्यथा युगपत्सर्वदृश्याभावस्य प्रत्यक्षसिद्धतया तत्र विवादाभावेन तद्बोधकवैयर्थ्यापत्ते। किञ्चनेति मूढधीविषयार्थक द्वयोर्मध्ये एकमभावप्रतियोगितायामवच्छेदकमेक तु प्रतियोग्यशे विशेषणमात्रम्। न चाभाववुद्धौ प्रतियोगितावच्छेदकभिन्नस्य प्रतियोग्यशे प्रकारकत्वेन न भानमिति वाच्यम्, प्रमेयघटो नास्तीत्यादौ प्रमेयघटत्वस्य गौरवेण प्रतियोगितानवच्छेदकतया प्रमेयत्व प्रतियोगिनि प्रकार एव, प्रतियोगितावच्छेदक तु घटत्वमेवेत्यङ्गीकारात्। तदुपादानत्व त्वात्मनि प्रतीयमानस्य तद्भिन्नस्यात्मनि तादात्म्यासम्भवात्। स्वप्नवद्विषयिणि विषयस्य कल्पितत्वाच्च, सुतरामभावमिति सूचनार्थमिति, तच्चिन्त्यम्, नानापदस्य वृत्तिविषयार्थकत्वे किञ्चनपदस्य मूढधीविषयार्थकत्वे च प्रमाणा-

भावात् । प्रपञ्चे मूल्योविषयत्वस्य मिथ्यात्वसिद्धयुत्तरकालीनत्वाच्च । वायौ रूपाणि न सन्तीत्यादौ तु रूपसामान्याभावस्य प्रमाणान्तरसिद्धतया स्वरूपेण प्रतियोगितावच्छेदकत्वादत्र च तदभावेन वैषम्यात् स्वरूपेण वृत्तिनियतस्यावच्छिन्नप्रतियोगिनस्तदभावस्य भवदभिमतस्य व्यावर्त्तनार्थमेव पर्याप्त्या तदवच्छिन्नप्रतियोगिताकाभावो बोध्यत इति वाक्यवैयर्थ्यमित्यस्यापि चरमत्वाच्च । यदप्युक्तं मिथ्यात्वानुमाने च वक्ष्यमाणं यत्पक्षतावच्छेदकं तदेवात्र नानापदोपात्तं सन्निषेध्यतावच्छेदकमित्यादि तदपि चिन्त्यम्, नानापदस्य तदर्थकत्वे उक्तिसम्भवाभावात् । सामान्यानुमाननिरासप्रस्तावे विस्तरः । यदप्युक्तं कण्ठशल्लीवाक्ये—

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावति ॥ इति ।

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति, इति पूर्वं ब्रह्म दृश्यमात्रस्य दृश्यादृश्यमात्रस्यापि सकार एव भवति, दृश्यमात्रं विदित्वा जलबिन्दुदृष्टान्तेन ब्रह्मात्मैक्यज्ञानेनात्मनो ब्रह्मत्वोक्तेः । तत्र धर्मपदं दृश्यमात्रार्थकं 'पराच्यः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्' जागरितान्तं च भूतेभिर्व्यंजायत" इति पूर्वंदृश्यमात्रस्य प्रकृतत्वाद् "ईशानो भूतभव्यस्य स एवाद्य स उ" इति परत्रापि दृश्यमात्रस्योक्तत्वात्। तस्माद् 'यदेवेह तदेवामुत्र च" इति वाक्ये इह जीवोपाधावमुत्रेश्वरोपाधाविति ब्रह्मण्येव सर्वप्रपञ्चप्रसक्तिपुरस्कारान्यत्र प्रपञ्चस्य सत्त्वशङ्का निरस्ता । नेहेत्यत्र तु पूर्वं पश्चाच्च ब्रह्मसन्निधानादिह शब्देनब्रह्म परामृश्य निश्चनेत्यनेनोक्तस्य दृश्यमात्रस्य निषेधः । नानेति नञ्शब्दः स्वार्थिकनञ्तात्पर्यान्ततया भेदरूपपार्थक्यार्थकः । भेदे च निषेधाधिकरणत्वेनोपस्थितस्य ब्रह्मण एव प्रतियोगित्वं ब्रह्मभिन्नं किमपि ब्रह्म नास्तीति । न तु निषेध्यत्वेनोपस्थितस्य प्रपञ्चस्य दृश्यभिन्नं दृश्यं ब्रह्मणि नास्तीत्यर्थे दृश्यभिन्नं दृश्यमित्यशक्यं वाधितत्वात् । एवं बृहदारण्यकस्थेऽपि नेह नानेतिवाक्ये बोध्यमिति ।

अत्रेदं वक्तव्यम्—नानाशब्दस्य भेदार्थकत्वे मानाभावः । न च स्वार्थिकप्रत्ययान्तत्वमेव मानम्, तत्र हि विनञ्भ्यां नानाञौ न सहेत्यस्य प्रत्ययार्थत्वपक्षे नञश्च प्रकृतिभूतस्याभावार्थकत्वे 'द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायेन साहित्यमेव नानापदार्थः स्यादित्याशङ्क्य "न सहेति नञ् एवार्थः लक्षणाश्रयणात्। नञ्प्रत्ययस्तु साहित्याभावरूप एव लक्ष्ये नञ्पदार्थः" इतिभद्राभाष्यकार-

दुक्तम्। तथा च तन्त्रसिद्धान्तग्रन्थे पठ्यते "नैष दोष नाय प्रत्ययार्थ। किन्तर्हि प्रकृत्यर्थविशेषणमेतत् विनश्—इत्येताभ्यामसहवाचिभ्यो नानाञौ भवत" इति। व्याख्यातश्च कैयटेन "लोकप्रसिद्धार्थानां शब्दानामिह साधुत्वान्वाख्यानाल्लोके च नानाशब्दस्य पृथग्भावाविवायित्वात्र सहेति प्रकृत्यर्थनिर्देश" इति। अत एव नानाशब्दो विनाशब्दपर्याय "नानेत्यनेकविनार्थयो" इत्यव्ययार्थेषु दर्शनात् 'पृथग्विनान्तरेणर्ते हिरक् नाना च वर्जने" इत्यमरोक्तेश्च। एतेन भेदरूपपाथक्यादित्यपास्तम्। भेदनियतसयोगादिरूपसाहित्याभावरूपपाथक्यस्यैव तदर्थतया कैयटेनापि विवक्षितत्वात्। अन्यथा नञ्पदस्य भेदार्थकत्वात्तदर्थ एव नाञ्प्रत्ययस्योपपत्त्या न सहेत्यशक्यम्। 'अनादिष्टार्था प्रत्यया स्वार्थे भवन्ति" इति न्यायात्, साहित्याभावलक्षणापरभाव्यविरोधाच्च। एतेन नापदस्य भिन्नसम्बन्ध एवार्थस्तत्रापि भेदाशमान दायम्। अधिकरणसम्बन्धस्त्वधिकरणनिष्ठसम्बन्धरूपो विशेषणतात्वादिरूपेण वाक्यार्थ। अन्यथा नञ्पदस्य सम्बन्धपर्यन्तशक्त्यभावेन स्वार्थिकत्वेन तत्समानार्थकनाञ्प्रत्ययान्तनानाशब्दस्यापि तदबोधकत्वापत्ते। "नानाविष्णुर्मोक्षदो नान्यमेव" इत्यादावपि विष्णुभिन्नो मोक्षदो नेत्यर्थ। अमरोक्तिमात्रेण नानाशब्दस्य विनाशब्दनानार्थकत्वे पृथक्शब्दस्यापि तदापत्ति। विनाशब्दार्थे पृथक्शब्दप्रयोगाभावस्तु नानाशब्देऽपि तुल्य, तस्य तथा प्रयोगसत्त्वेऽपि विनाशब्दस्येव भिन्नतादार्थकत्वस्यापि सम्भवात्, भिन्नात्मक किमपि नास्तीत्यर्थे बाधकाभावादित्यपास्तम्। तथाहि नानापदस्य नञ्पदसमानार्थकत्वे घटो नास्तीति घटो नानास्तीत्यपि प्रयोग स्यात्। अभावार्थेषु च तन्निर्देशेऽनुशासनेषु स्यात्। अत एव—

नञभावे निषेधे च रूपार्थे च व्यतिक्रम।
ईषदर्थे च सादृश्ये तद्विरुद्धस्तदन्ययो ॥
नाना विनार्थेऽपि भवेनानानेकाभमार्थया ॥

इति विश्वकोषे नानानञ्पदयो पृथगर्थोक्ति। एव भेदार्थकनञ्समानार्थकत्वेऽपि घट पटो नेतिवद् घट पटो नानत्यपि स्यात्। स्वार्थिकत्वे तु साहित्याभावेन नञा लक्षणा कृत्वेवेत्युक्तमेव भेदार्थकनञ्समासार्थकतया तु न किञ्चित्प्रमाण पश्याम। 'तद्धितश्चासर्वविभक्ति" इतिसूत्रे 'तद्धितश्चापि कश्चिद्विभक्त्यर्थप्रधान, तन यथेति कश्चित्क्रियाप्रधान नानाविना" इति महाभाष्यदर्शनाच्च नञ्पदस्य क्रियाप्राधान्याभावान्नानाशब्दस्यापि तदनुपपत्ते। अत एव क्रियावाचित्वे सति गणपठितत्व धातुत्वमिति

लक्षणे क्रियावाचिषु हिरुक् नाना इत्यादिष्वतिव्याप्तिवारणाय विशेष्यदल-मिति शाब्दिकसम्प्रदाय । अत एवोक्तामरोक्तिमात्रेणोपास्तम्। एकस्मि-न्नेवार्थे द्वयोर्व्युत्पादितत्वाच्च । एव पृथक्शब्दस्यापि विनाशब्दार्थे प्रयोगा-पत्तिरितीष्टापादनमेव । नानाशब्दस्य तु विनाशब्दार्थे प्रयोगाना "नानारीति-फला लोकयात्रा" इति क्षीरस्वाम्यादिभिरेवोपन्यस्त । न ह्यत्र नारीभिन्ना लोकयानेत्यर्थो वक्तु शक्य नारीसाहित्यसाधारण्यात् । न च नार्यत्यन्ताभावय-दभिन्नेत्यय तात्पर्य तस्य नञर्थत्वाभावात्तदुक्तस्वार्थिकत्वव्याघाताल्लक्षणा-या च मानाभाव । नानाविष्णुमित्यादौ च लक्षणाया एवाश्रयणीयत्वाद्वि-निगमकस्य च बहुशो दर्शितत्वात् । अत एव –

मृगलोचनया विना विचिनव्यवहारप्रतिभाप्रभाप्रगल्भ ।
अमृतद्युतिसुन्दराशयोऽय सुहृदा तेन विना नरेन्द्रसूनु ॥

इत्यादौ साहित्यभाव एव विनार्थो न तु भेद । वस्तुतस्तु नानाविष्णु-मित्यस्य नानापदस्य, न भेदोऽर्थ , अन्यदेवेत्यन्यपदवैयर्थ्यापत्ते । विष्णुभिन्नोऽ-न्यदेवो मोक्षदो नेत्यत्रान्यपदार्थैकदेशान्योन्याभावेऽपि विष्णोरेव प्रतियोगित्वे-नान्वयस्य वाच्यत्वात् । अन्यथा विष्णुभिन्नस्यापि मोक्षदातृत्वबोधप्रसङ्गा-द्विष्णोरेव मोक्षदातृत्वाव्यवच्छेदबोधेऽप्रसङ्गाच्च । भूतले नानाघट इत्यादौ तु बहुत्वमेव प्रतीयते तच्च स्वाश्रयभेदनान्तरीयकमित्यन्यदेतत् । भेदोऽपि नानापदार्थे विशेष्यतावच्छेदकधर्मावच्छिन्नव्यक्तिनिष्ठद्वयक्तित्वावच्छिन्न-प्रतियोगित्वानुयोगित्व [यो] एक [एव] भासते, न तु भूतलत्वावच्छिन्न-प्रतियोगिताकघटत्वावच्छिन्नानुयोगिताकोऽपि । एवञ्चात्राप्यधिकरणत्वेनो-पस्थितस्यात्मनो भेदप्रतियोगित्व दुर्लभम् । किन्तु किञ्चनपदार्थत्वेनाभाव ।

यत्तु 'नेह नानास्ति किञ्चन मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति" इति वाक्येऽपि नात्र काचन भिदास्ति । अत्र भिदामिव मन्यमानः शतधा सहस्रधाभिन्नो मृत्योर्मृत्युमाप्नोतीति श्रुत्यन्तरैकवाक्यतया नानाशब्दो भेदपर इति कल्प्यते इति, तन्न, भेदनिषेधेऽपि भिन्ननिषेधस्यासिद्धे । प्रत्युत नानापदेन नानात्वमुपादायानेकत्वरूप तन्निषिध्यत इति व्याख्यानस्यैव स्वावकाशत्वापत्ते । अनेकवाचकनानाशब्दस्य भावप्रधानत्वादनेकत्वपरत्वे लक्षणा स्यादिति भवदुक्तदोषस्य श्रुत्यन्तरसवादिलक्षणयादोषत्वेनाप्रयो-जकत्वात् । भवन्मतेऽपि नानाशब्दस्य लक्षणयैवाभिन्नपरतया वाच्यत्वात् । प्रत्युत भवन्मते धर्मिलक्षणाया प्रमाणस्यैव परेण पर्यनुयोज्यत्वात् । न च भेद-परत्वेऽपि नानाशब्दस्य तदर्थस्य विशेषणताविशेषसम्बन्धेन किञ्चनपदार्था-

न्वयेन वाक्यार्थतयैवाश्रयलाभसम्भवान्न लक्षणेति वाच्यम्; श्रुत्यन्तरीयभिदापदे भिन्नलक्षणाया आवश्यकत्वात्। न च नानापदे भेद एव निपिध्यत इति वाच्यम्, ननास्तीत्यतो भेदाभावप्रतीतिविरहेण निपातार्थस्य भेदस्य प्रतियोगिनासम्बन्धेनाभवान्वये निराकाङ्क्षत्वात्। निपातार्थभेदप्रकारकशाब्दत्वावच्छिन्ने तदाश्रयोपस्थापकपदजन्योपस्थितेरेव विशेष्यतया हेतुत्वस्य कल्पयत्वात्। एव किञ्चनेत्यस्यासकोचात्सर्वदृश्यधरत्वमित्यप्ययुक्तम्, "असाधारण्ये तु चिद्धनेत्यपवर्गे" अमरकोशादिदर्शनात्। चनशब्दस्य समभिव्याहृतकिंशब्दस्य समभिव्याहृतधर्मावच्छिन्नव्यक्तिसङ्कोचतात्पर्यग्राहकस्य व्युत्पत्तिसिद्धत्वात्।

किञ्च घटमानयेत्युक्ते घटपदस्यानेकघटतात्पर्यविधारणाच्चिदादिपदसमभिव्याहृतकिंशब्दस्य विशिष्यपदोपात्तैकधर्मावच्छिन्नव्यक्तिबोधकत्वाच्च क्वचिद्घट कश्चित्पट इत्यादिप्रयोगदर्शनान्निर्द्धारणार्थकत्वपर्यवसानात् तादृशस्य दृश्यत्वादिबोधकदृश्यादिपदस्य चात्रविरहात्, कश्चिदपि घटो नास्तीत्यादावन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्त्यैव घटत्वावच्छिन्नप्रतियोगिताकाभाववोधः। नचैव कश्चनेति पदवैयर्थ्यं घटविशेषप्रतियोगिकत्वाभिप्रायविघटनार्थं तदुपादानात्। अन्यथा तात्पर्यसन्देहेन घटत्वावच्छिन्नाभाववुद्धावप्रामाण्यसशयापत्ते.। तदुक्तम् "घटो नास्तीत्यादे. सामान्याभाव एवोत्सर्गतस्तात्पर्यम्" इति। नहि "कश्चिद्यतो रामगिर्य्याश्रमेषु वसतिञ्चक्रे" इत्यादौ यत्तस्य लाभ। अत. समभिव्याहृतधर्मिविशेषबोधकपदान्तरसहकारेणैव किञ्चनादिशब्दा बोधका., न तु स्वयं पूर्वपरामृष्टस्यैव बुद्धिस्थस्य वा बोधका.। दृश्यादिपदञ्च पूर्वमत्र नास्त्येव येनानुपङ्गादिनापि कथञ्चिदुक्तिसम्भवः स्यात्।

ननु विधिस्थले कञ्चन पदस्योक्तरीत्या सङ्कोचकत्वे निषेधस्थले निषेधप्रतियोगिवृत्तित्वेन भासमानधर्मस्य प्रतियोगितावच्छेदकत्वतात्पर्यग्राहकतया किञ्चन नानानास्तीति दृश्यमात्रस्य निषेध: स्यादेवेति चेत्, मैवम्; किञ्चनपदस्य नानापदार्थविशेषणसमर्पकत्वे नानापदार्थभेदस्य निषेधान्वयानुपपत्तेरुक्तत्वात्, भेदाश्रयविशेषसमर्पकत्वे तु दृश्यमात्रस्य पूर्वतत्तदसाधारणरूपेण प्रक्रान्तत्वाभावात्, प्रतियोगितावच्छेदकस्य सर्वसाधारणस्य दृश्यत्वादेरपि तदभावाच्चेत्युक्तत्वात्। पूर्वोक्तानामनेकेषामेकधर्मावच्छेदेन परामर्शस्तु न किञ्चनशब्दसाध्यः प्रत्युत सङ्कोचस्यैव तत्साध्यत्वात् पूर्वोक्तानां मध्ये किञ्चन तत्र नास्तीत्युक्तेऽपि निर्द्धारणस्य स्वेच्छामात्रकल्पितत्वादप्रामा-

प्यम्। न च तावतापोष्टसिद्धिप्रत्याशा दृश्यमात्रस्य प्रातिस्विकरूपेण पूर्वमनुक्तत्वात्। एव धर्मान्पृथक् पश्यन्नित्यत्र धर्मपद दृश्यमानपद [र]-मित्यत्र तु प्रमाणाभाव एव, दृश्यमानस्य च धर्मताया अद्याप्यसिद्धत्वात्। एतेन धर्मदृश्यमानस्य दृष्ट्या ससार एव भवतीत्यादिकमप्यपास्तम्। विभुत्वादि-धर्मपरस्यैव तावदुपगन्तु शक्यत्वात्। ननु मन्मतेऽपि न वस्तुतो ब्रह्मधर्मा इतिचेत्, मा भूवन्, व्यावहारिकास्तु सन्ति दृश्यमानस्यापि त्वन्मते वास्तवत्वा भावाच्च। मन्मते तु दृश्यमात्रस्य ब्रह्मधर्मत्व कथमभ्युपगत नास्ति तदेतावति विनिगमके विद्यमाने किं पुन ब्रह्मधर्मत्वेनोभयसिद्धा एव धर्मा गृह्यन्ताम्। इतश्च मात्रसम्प्रतिपन्नदृश्यमात्रमिति बोधाया द्वितीयस्य प्रेक्षावद्भिरवश्य-मुपेक्षणीयत्वात्, तत्किमिदानीमेवासिद्धस्वसिद्धान्तसमुद्भावनेनेति, तिष्ठतु तावत्। अत एव धर्मान्पृथक् पश्यन्नित्यस्यात्मन पृथग्भूतान्धर्मानिष्या-त्मज्ञाने विषयीकुर्वन् सप्रकारकात्मज्ञानवानिति यावत्, नि प्रकारकात्मकज्ञान-स्यैव मोक्षहेतुत्वात्। एवञ्च धर्माणा धर्मिसमानसत्ताकभेदवत्त्व मोक्षजनक-ज्ञाने प्रकारत्वेनानवभासश्चेति स्थितम्। धर्मपदोक्तपरामर्शकत्वे किञ्चने-त्यत्र केचनेत्यस्यापत्तेश्च चनशब्दपूर्ववर्तिकिशब्दस्य विशेष्यसमानलिङ्गत्व-नियमात्। अत एव—

काचित्कीर्णा रजोभिर्दिवमनुविदधे मन्दवक्रेन्दुलक्ष्मी
रात्रावत्र विवाहमण्डपतले कश्चित्प्रसुप्तो युवा ॥

किञ्चिद्वेदमय पात्रमित्यादय प्रयोगा। न च नानापदार्थ एवात्र विशे-ष्यत्वेनान्वेतिवति वाच्यम्, स ह्यात्मभिन्नरूपो वा, अनेकरूपो वा, विनार्थरूपो वा? नाद्य, दूषितत्वात्। न द्वितीय, तस्यापि विशेष्यविशेषणसानाङ्गत्वात् त्वदिष्टसिद्धेरुक्तत्वाच्च। नान्त्य, द्वितीयातृतीयापञ्चम्यतिरिक्तविभक्त्य-न्तस्य तत्रानन्वयनियमादनुपयोगाच्च। यदप्युक्तम्—

ननु कथमुक्तश्रुत्या मिथ्यात्वेन प्रपञ्चतदभावयोर्बोध ब्रह्मणि प्रपञ्चस्या-भावबोधेऽप्यबोधेऽप्यभावे प्रपञ्चसामानाधिकरण्यस्य प्रपञ्चान्यूनसत्ताकत्वस्य चावोधनादिति चेन, इत्यस्य प्रपञ्चविशिष्टब्रह्मणि इत्यर्थकत्वात्किञ्चनेत्यस्य चातोऽन्यपदार्थकत्वमिति श्रुत्यादिमानेन विनाशितयाभ्रमितिदृश्यमानमि-त्यर्थकत्वाद्विनाशिदृश्यविशिष्टब्रह्मणि दृश्य नास्तीति बोधकस्योक्तश्रुत्या-बोधनाद्विनाश्यदृश्यवति विनाशिदृश्याभावस्योक्तश्रुतिभ्रमितत्वेनैवाप्रातिभासिकत्वानुमितिसम्भवात्। विनाशिदृश्यन्वावच्छेदेनाप्रातिभासिक-

स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्यानुमितिद्वारोक्तश्रुतितात्पर्यविषयत्वसभवात्। न च तथाप्युक्ताभावे प्रतियोग्यवच्छेदकदेशकालावच्छिन्नत्वस्यावच्छिन्नवृत्तिकान्यत्वस्य चासिद्धया मिथ्यात्वबोधनमसिद्धमिति वाच्यम्, निषेधस्य प्रसक्तिपूर्वकत्वेन निषेधवाक्यस्वाभाव्येन प्रतियोगिप्रसक्त्यवच्छेदकदेशाद्यवच्छेदेनैवोक्तवाक्येनोक्ताभावस्य बोधनीयत्वात्। तदवच्छेदकविशिष्टदृश्यवद्ब्रह्मण एवाधिकरणत्वेन इहेति सर्वनामपदेनोक्तिसम्भवेन तदभावाना स्वस्वप्रतियोग्यवच्छेदकावच्छिन्नतया इहेति समभ्यानवच्छिन्नविशेषणतासम्बधावच्छिन्नाधेयतयावोक्तश्रुत्या बोधनसभवादिति।

तदपि चिन्त्यम्, वह्निमति वह्निर्नास्तीतिवद्दृश्यवति दृश्याभावबोधनस्य बाधितत्वात्। धर्मितावच्छेदकांशे प्रकारतया भासमानस्य धर्मस्याभावांशे प्रतियोगितानवच्छेदकत्वेनानवभासनियमात्। इह किञ्चनपदयोर्दृश्यमात्रपरत्वांशे च प्रमाणाभावस्योक्तत्वात्। अतोऽन्यपदार्थमित्यादि श्रुतावपि तदभिमतार्थस्य प्रत्यक्षत्वादे वक्ष्यमाणत्वात्। न चायमभाव प्रातिभासिकमभिन्न श्रुतिबोधितत्वादित्यनुमिति, तदप्रातिभासिकत्वे मान साध्याप्रसिद्धया व्याप्तेरग्रहात्। भ्रमविषयवभिन्नत्वस्य साध्यत्वेऽपि यथा श्रुतहेतोर्ग्रावाण प्लवन्त इत्यादिवाक्यबोधभ्रमविषये ग्रावोन्मज्जनादौ व्यभिचारात्। न च श्रुतितात्पर्यविषयत्व हेतु, स्वरूपासिद्धे। अनुमित्या यथोक्ताभावस्याप्रातिभासिकत्वसिद्धावुक्तश्रुत्या तात्पर्यगत्या तद्घटितयथोक्तमिथ्यात्वबोधन श्रुतितात्पर्यविषयसिद्धौ तदभावस्याप्रातिभासिकत्वसिद्धिरित्यन्याऽन्याश्रयात् पारमार्थिकत्वेनार्थान्तरस्य दुर्वारत्वाच्च। भावार्द्वैतपक्षे तत्रेष्टापत्तावपि प्रकृतग्रन्थासङ्गतेरनुद्धारात्। मिथ्यात्वमिथ्यात्वस्यैव तत्र प्रक्रान्तत्वात्। एव प्रतियोगिप्रसक्त्यवच्छेदकदेशकालावच्छेदेनाप्यभावबोधो वक्तुमशक्य, निषेधाधिकरणान्यदेशकालावच्छेदेन तत्सत्त्वापत्ते। देशान्तरकालान्तरवर्तिवस्तुविरहबोधकत्वस्यापि निषेधप्रमाणत्वाभाव्यात्। स्वबासनामात्रेण स्वभावैकदेशपरित्यागोपादानानुपपत्ते. अत एव तद्विशिष्ट एव तदभावस्य निरवच्छिन्ने विशेषणतया बाधनमित्यप्यपास्तम्। मानान्तरविरुद्धयथोक्तविशेषणता सम्बन्धस्य वाक्यार्थान्तर्भावकल्पनाया असम्भवात्। पदार्थवत्सर्गेऽशतोऽपि श्रुत्यस्पृष्ट विप्रतिपत्ते वर्तुमशक्यत्वादित्यास्ता विस्तर। कस्तर्हि उक्तश्रुतेरर्थ इति चेत्, उच्यते, इह ब्रह्मणि विद्यमान नाना अनेक वस्तुजातेच्छादिरूपकिञ्चनानिर्वचनीय नास्ति, विशिष्यनिर्वक्तुमशक्य हि वस्तु किञ्चिदिति व्यवहरन्ति। "नमस्तस्मै कस्मैचिदमितमहिम्ने

पुरभिदे" "यस्मैचित्कपटायकेटभरिपूर पीठदीर्घा—" इत्यादौ तथा दर्शनात्। यद्यपि वेदान्त्यभिमतमिथ्यात्वरूपमनिर्वाच्यत्वमभिप्रत्य नते प्रयोगाः तथापि किञ्चिदंशसाम्येन दोषाभाव.। अस्तु वा तादृशमेवानिर्वाच्यत्वमर्थः तथाचाद्वैतनिषेधपरमेवेद वाक्यम् अत एवात्र न काचन भिदास्तीत्यनाप्यनिर्वचनीया निदास्ति किन्तु ब्रह्मणि विद्यमानो भेद पारमार्थिक एव तथा चार्थातप्रतियोगिनामप्यमिथ्यात्वलाभ। अस्तु वा तच्छ्रुत्येकवाक्यतया नानाशब्दस्य भिदायें लक्षणा। किञ्चनेदन्नाद्ययविशेषणत्वात्तुल्यत्वम्। तथाचानिर्वाच्यभेदनिषेध एवार्थ। अत एव य इह नानेव पश्यति अत्र भिदामिव मन्यमानत्यत्र चावास्तव पश्यन् सरिलो लङ्घयन्ति तत्त्वानभिज्ञत्वादित्यर्थकमिवपद सगच्छते। आरोपितत्वस्यापि सम्भावनारूपस्य इवपदार्थत्वात्। अत एव—

न नित्यमस्मिन् परिपूर्णतेति हित्वा नम चोरिलतावतीर्णा।
आनन्दयन्निन्दुरिव स्ववाम्ना विभाति लोके नवकाकलीन्द्र॥

इत्यादावुत्प्रेक्षास्थले तथैवाङ्गीक्रियते काव्यमीमांसकैः। यदि तु नानापदस्यामिदापरत्वेऽपि तदर्थस्य प्रतियोगितया नञर्थाभावान्वयो न स्यात्, यदुक्तयुक्त्यैवेति विभाव्यते, तदास्तु नानाशब्दस्य भिन्नपरत्वमेव लक्षणासाम्येऽपि मानान्तरसवादविगानयोरेव विनिगमकत्वात्। अत्र भिदामिवेति श्रुत्यन्तरेऽप्यनिवार्यभेदनिषेध एवार्थ, लक्षणाया प्रयाजनाभावाद्भेदनिषेधस्य तावतैव सिद्धे। अथवा इह ब्रह्मणि विद्यमान किञ्चन ज्ञानादिक नाना अनेक स्वजातीयप्रागभावसमानाधिकरण नास्ति किन्त्वेकमेव नित्यत्वादिति भाव। न च ज्ञानेच्छादीनामनुपस्थितत्व प्रमाणस्य प्रमाणमिति पूर्वार्द्धे प्राणादिनियामकत्वेन तेषा प्रशान्तत्वात्। ननु "मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति" इतिवाक्यशेषेण नानात्वदर्शनस्य ससारप्राप्तिहेतुत्वाभिधानेन नानात्व दर्शनस्यैव मिथ्याज्ञानत्व लभ्यते ससारहेतोर्मिथ्याज्ञानत्वे सर्वेषामेव विवादात्। तदेव नानात्व निषेध्यत्वेन तात्पर्यविषय। तथाचसङ्गति, न हि न्यायमते परमात्मन्यनित्यज्ञानवत्त्वज्ञान मिथ्याज्ञानमनात्मन्यात्मग्रहेऽहमस्मीति मोहोऽहङ्कार इति न्यायवार्त्तिकोक्तेः। "अनित्याशुचिदुःखानात्मसुखात्मख्यातिरविद्या" इति पातञ्जलसूत्राच्चेति चेत्, नानाविध किञ्चन वस्तु इह ब्रह्मणि नास्ति तथा च जगद् ब्रह्मण्यध्यस्तमिति नाशङ्कनीयमितिभाव। ब्रह्मसत्ताप्रयुक्तसकलव्यावृत्त्या स्वतन्त्रसत्तावत्त्वस्य बाधकाभावेन बोधितत्वादध्यस्तमिति पर्यवसानात्। अथवा मनसेवानुमित्युक्तम्, तनैवकारव्यवच्छेद्य स्पष्टयति—नेह नानास्ति

किञ्चनेति । प्रत्यक्षानुमानादिप्रमाण नात्मनि प्रवर्त्तत इत्यर्थ । मनसैवेति तृतीयया करणत्वस्य ज्ञानविरूपितस्यैवार्थवशादुपस्थितत्वात् । ननु बहिरिन्द्रियमात्मनि मा नाम प्रवर्तिष्ट शब्दानुमानादिवन्तु न वर्त्तत एवेत्याशङ्क्याह—मृत्यो स मृत्युमित्यादि । यश्चात्मनि शब्दानुमानादिप्रवृत्ति मन्यते ससारमेव प्राप्नोति गाढहेतुज्ञानजकत्वस्यैव प्रमाणान्तरव्यवच्छेद्यत्वात्तादृशशब्दानुमित्याद्यात्मकज्ञानस्य च सत्वेऽपि साक्षात्कारानुपयुक्तत्वात् । अत एवाग्रे मनसैवानुद्रष्टव्यमिति माध्यन्दिनशाखायां नियमन सगच्छते । मध्येऽर्थान्तरप्रतिपादने तु तदनुपपन्न स्यात् । यद्वा इह ब्रह्मसाक्षात्कारे नानाविध किञ्चन किमपि सुविषयो नास्ति तेन समूहालम्बनस्य सविकल्पकस्य च मोक्षहेतुत्वव्यवच्छेद । तदेवाह—मृत्यो स मृत्युमित्यादि । एकधैव एकमेवानुद्रष्टव्य साक्षात्करणीयम् । धाप्रत्ययस्य विशेषणरूपविषयपरत्वे मानाभावेन विशेष्यरूपविषयस्यापि तदर्थत्वकल्पनात् । एकधा एकधानिर्विकल्पकेन घटो ज्ञान इत्यादौ तथा दर्शनाच्चेति परैरेवाभिहितत्वादिति दिक् ।

नह नास्तीत्यर्थ ॥ जीवस्य ब्रह्माभिन्नत्वमेवाह—विरज इति । आसम-न्तात् काशते इत्याकाशो जीव, सर्वप्रत्ययविषयत्वात् । तस्मादज आत्मा महान् ध्रुव परमात्मा परो भिन्न । भेदहेतुमाह—विरत इति । रागहीन इत्यर्थ । एतेन सुखद्वेषधर्माधर्मसंस्कारशून्यत्व जीवाद्ब्रह्मणोवैलक्षण्यमित्युक्तम्, अजपदेन शरीरासम्बन्ध, महानिति जन्यविशेषगुणानाश्रयत्वम्, ध्रुव इति सर्वदैकरूपेण नित्यज्ञानादिमत्त्व कार्यमात्रजनकत्व चोक्तम् । धीर काम्यकर्मफलेच्छाहीन, तमेव विज्ञाय श्रवणेन ज्ञात्वा मननेन चाप्रामाण्यशङ्काशून्यज्ञानविषयीकृत्य निदिध्यासनेन प्रज्ञा साक्षात्कार कुर्वीत । ब्राह्मण इति साक्षात्कारफलोक्ति । "यो वा एतदक्षर गार्ग्यविदित्वा अस्माल्लोकात्प्रैति स ब्राह्मण" इति श्रुते । अधिकारिपरत्वस्य परैरप्यनभ्युपगमात् । अद्वैतादिमतान्तर च न श्रद्धेयमित्याह—नानुध्यायादिति । बहूननेकदुस्तर्कग्रन्थिलान् शब्दाननर्थकत्वेन शब्दमात्रभूतान् नानुध्यायात्तत्रासक्ति न कुर्यात् । हेतुमाह—वाच इति । हि यत्तादृशतर्कानुसरण वाचो वाग्देव्या विग्लापन ग्लानिमात्रजनक न तु मोक्षफलकम् । तस्मात्तादृशवादेषु विश्वासो न विधेय इति भाव ।

यत्तु तमेव विज्ञाय प्रज्ञा ब्रह्मात्मकसाक्षात्कार कुर्यात् ततो भेददर्शननिवृत्ति स्यादित्याह—ब्राह्मण इति । ब्रह्मज्ञानेनापगतभेद कृतकृत्यो जायतइति, तच्चिन्त्यम्, स्वपक्षवासनामात्रमूलत्वाद्ब्रह्मविषयकज्ञानवत्त्वस्यैव

ब्राह्मणपदार्थतायां श्रौतत्वाच्च भेदस्य तदर्थत्वे मानाभावात्। अत्यत्स्वय-मूह्यम्। इति शब्दो मन्त्रसमाप्त्यर्थं । इदानीं ब्रह्मज्ञानोपाय गोसहस्रदानप्रति-ज्ञात्तिमसन्यास तैजस पुण्यकृन्चेत्यत्र मोक्षहेतुत्वनोक्ताना कर्मणा चारा-दुपकारक व वक्यन् याज्ञवल्क्यो भेद दृढयनवात्मस्वरूप तावदनुवदति—स वा अयमिति। सर्वस्य ब्रह्मन्द्रादेरपि ज्ञी स्वाधीनताक इति यावत्। ज्ञानाद्यधानानामपीच्छादीना न तत्स्वामिकत्वमत सर्वेशान इति। ईशानत्वस्यान्यानपक्षत्वमाह—सर्वस्याधिपतिरिति। स्वरूपस्यैव सवस्याधि-पति । अधिपतीनामस्वीयव्यापारजन्यव्युत्पत्त्यादिमन्निरपिताधिपत्यनियमा-भावादाह—सवमिद प्रशास्तीति। सृष्ट्यादौ वेदनिर्माणेन हिताहितप्रवृत्ति निवृत्तिजनकत्वात्स्वय शरीरमादायाशेषशब्दशक्तिग्रहकायकारणाभावग्रह जनकत्वाच्च वह्न्यादीनामपि स्वान्यसर्वप्रकाशकत्वादाह—सवमिति। तेषा-मपि प्रशासक नेन योग्यादिभि सिद्धसाधनानवकाश । तदानीन्तनशरीर-परिग्रहे तत्तत्कर्मजन्यफलसम्बन्ध स्यादत आह—स न साधुना कर्मणा भूयान् तज्जन्यपुण्यसम्बन्धहीन नो एवासाधुना कनीयान् पापसम्बन्यहीन मिथ्याज्ञानवासनाराहित्येन तत्कृतकर्मणामदृष्टानुत्पादक वात्। तदेतदभिप्रत्य आचार्यैरुक्तम्—

स्वाम्य यस्य निज जगत्सुतमिते त्वादौ तत पालन
व्युत्पत्त करण हिताहितविधिन्याने च सभावनम्।
भूतोक्ति सहजा कृता निरुपधियत्नस्तदर्थात्मक
स्तस्मै पूर्वगुरुत्तमाय जगतामीशाय पित्रे नम ॥

एव जन्यमात्रोत्पादकत्वमुक्त्वा परमाण्वादीनामपि तन्नियम्यत्वात्त-दाधिपत्यमप्यक्तमित्याह—एष भूताधिपतिरिति। तद्विषयकप्रत्यक्षादिम-त्त्वात्तदुपादेयैश्वर्यवत्त्वमेव तदैश्वर्यमपोत्याह—एष लोकेश्वर इति। ईश्वराणामपि राजादीना पालकत्वव्यभिचारादाह—एष लोकपाल इति। वेनादीनो मर्यादाच्छेदकत्वदर्शनादाह—स सेतुरिति। सेतुशब्दप्रवृत्तिनिमित्त धर्ममाह—विधरणमिति। एतेन मृण्मयत्वपरिच्छिन्नत्वादिनिरास। तन्नि-मित्तमाह—एषा लोकानामसभेदायासाकर्याय तत्तत्कार्यनियमायेत्यर्थ। एतेन यस्मिन्द्यौ पृथिवी चान्तरिक्षमोत मन सहप्राणैश्च सर्वैस्तमेवैक जानथा-त्मानमन्यावाचो विमुञ्चथामृतस्यैव सेतु " इति श्रुत्यन्तरमपि व्याख्यातम्॥

प्रकृतमाह—तमेतमिति। वेदानुवचनेन स्वाध्यायानुध्यानेन यज्ञकाण्डो-क्तस्वरूपेणाश्वमेधादिकर्मणा दानेन गोभूम्यादे तपसा कृच्छ्रचान्द्रायणादिना

अनाशकेन कामानशनेन यावज्जीव रागद्वेषादिराहित्येन। "अनाशकेनेति तपसो विशेषणम्' इति वाचस्पतिमिश्राः। तथा च भामत्यां 'कामानशनमेव हि तप स्तमितमेव्याशिनो हि ब्रह्मणि विविदिषा भवति न तु सर्वथानशनत मरणात् नापि चान्द्रायणादितप शीलधातुवैषम्यापत्ते। अथवा वेदानुवचनेन ब्रह्मचर्याश्रमोक्तकर्मभि यज्ञन दानेन गृहस्थाश्रमोक्तकर्मभि तपसा वनस्थ-नैष्ठिक-ब्रह्मचारिकर्मभि अजासकेन सन्यासधर्मैरिति व्याख्यातार। अत्र तिप्रत्ययसोपात्ताना तत्तद्यज्ञादिकरणैकनानाभावानामेव ज्ञानविविदिषा-न्यतररूपेण फलेन सम्बन्धो न तु यज्ञदानाद्यन्यतरस्य भावनान्तरस्य वा सुबन्तयज्ञादिपदैस्तन्नद्यागादीनामुपस्थिते विधेयधात्वर्थश्रवणाभावात्।

न च यज्ञादिपदाना सुबन्तत्वेऽपि मासे जुहोतीतिवत् प्रकृताप्रकृतय-ज्ञमात्रवाचित्वानियमेन पूर्वकर्मानुपस्थित्या कर्मान्तरत्वमेव युक्तम्। न च द्रव्यदेवतयोरश्रवणात् रूपाभाव, अव्यक्तत्वादिसाम्यश्येन ज्योतिष्टोमविध्य-न्तोपपत्तेरिति वाच्यम् विविदिषायेच्छितचित्तशुद्धिरूपद्वारसमर्पके "स ह वा आत्मयाजी यो वेदेदमङ्गेनाङ्ग सस्क्रियते" इत्यादि वक्ष्यमाणवाक्ये एत-च्छब्देन प्रकृतयज्ञादिपरामर्शात्तदनुरोधेन द्वारि समर्पके उक्तवाक्येऽपि यज्ञादिपदस्य पूर्वविहितयज्ञादिपरामर्शकत्वनिश्चयात्। न चैतच्छब्दस्यापि पूर्वविहिताविहितसाधारण्यात् यज्ञादिपदसमानशीलत्वमेवेति वाच्यम्, स यदेव यजेतेत्ति पूर्ववाक्ये यच्छब्दापपद पशुनेतिवद्यजे पूर्वविहितकर्म मात्रपरत्वादेव यच्छब्दस्यापि तन्मात्रपरत्वात्। अतश्च तात्पर्यग्राहकवशेन यज्ञादिपदस्य पूर्वकर्मपरामर्शकत्वान कर्मान्तरत्व प्रत्यभिज्ञापकप्रमाणाभाव एव 'सामग्निहोत्र जुहोति" इ यादौ प्रकरणान्तरेण कर्मभेदप्रत्ययात्।

न च धात्वर्थमात्राभेदेऽपि पूर्वभावलोपस्थापकाभावात्कर्मभेद म्यादि-तिवाच्यम् सर्वेभ्यो दर्शपौर्णमासाविवद् यज्ञादिनैव स्वसम्बन्धाभिचरित-भावनोपस्थापनोपपत्ते। फलभेदेन भावनाभेदे च प्रमाणाभावात्। नचानेक-भावनाविधानाद्धात्वर्थभेद, यज्ञादिविशिष्टैकभावनाविधाने तु यज्ञादिसक्ल-साधनविशिष्टप्रयोगान्तरविध्यापत्तिरिति वाच्यम् यज्ञादिप्रत्येकान्वितनाना-भावनाना तत्तेनैकाख्यातोपात्तत्वाद 'दर्शपूर्णमासाभ्या स्वर्गकामो यजेत" इत्याग्नेयादिपड्यागाना स्वर्गाद्युद्देशेनेवात्रापि विविदिषोद्देशेन यज्ञादी-ना विधानेऽपि वाक्यभेदाभावात् तद्भावनाना तत्तद्यज्ञादिकरणकत्व प्राप्तमेवेति यज्ञादिपदमनुवादो भावनान्तरव्यप्रतिबन्धार्थं। विविदिषाफलसम्बन्धेन विनि-योगकरणाच्च नैकप्रयोगापत्ति, यूपदृष्टेनिवत्।

केचित्तु विविदिषन्तीत्यस्यानुषङ्गेणय ज्ञेन विविदिषन्तीत्यादिवाक्यानि भिन्नान्येव। यद्वा अर्द्धमन्तर्वेदी मिलोत्यर्द्ध बहिर्वेदी निरग्यान्तरालदेश इव यज्ञादिपदाना धर्मसामान्ये लक्षणा। तयैकवाक्यत्व कर्मणा विविदिषन्तीत्यस्य पर्यवसानादित्याहु । विविदिषन्तीति च लेट । यज्ञादिनिष्पविविदिषामावनत्वस्यापूर्वत्वात्तत्सिद्ध कर्मकाण्डोत्पन्नानामेव यज्ञादीनामत्र विविदिषोद्देशेन विधानमिति। तथा च वेदव्यासमूत्र "सर्वथापि त एवोभयलिङ्गाद्" इति। यज्ञेत्यादिक सिद्धार्थकनामरूप तावन्निङ्ग व्याख्यातम्। 'अनाश्रित कर्मफल कार्य कर्म करोति य ' इत्यादिस्मृत्यादिरूप विज्ञातकर्त्तव्यताकानामेव कर्मणा विद्यायैकल्यबोधक च द्वितयमपि शाण्डिल्यस्यैनेऽप्रचत्वारिंशत्सस्कारा 'स ब्रह्मण सायुज्य सलोकता गच्छति" इति स्मृत्या कर्मकाण्डोक्तकर्मणा विद्योपयोगित्वेनैवमस्कारत्वोपतेश्चेति। नचैव यज्ञादिर्विविदिषार्थत्वतत्कामनारहितकर्त्तव्यत्व न स्यादिति वाच्यम् यावज्जीवमग्निहोत्र जुहोतीत्यादिना विहितत्वे प्रत्यवायपरिहारार्थं तदुपपत्ते । तथा च सूत्र 'विहितत्वाच्चाश्रयकर्मापि" इति। अथैव नित्यत्व काम्यत्व विरुद्धमिति चेत्, अत्रापि सूत्र "सहकारित्वेन च" इति। यज्ञादीना विविदिषावाक्येन श्रवणादिसहकारित्वलाभात्तद्वचनबलाच्खादिरो यूपो यूपो भवति खादिर वीर्यकामस्येतिवदुभयात्मकत्वात्काम्यप्रयोगेणैव प्रसङ्गान्नित्यप्रयोगसिद्धया प्रयोगानावृत्तेर्विरोधाभावात्। तथा च जैमिनीयन्यम् "एकस्य तूभायर्थत्वे सयोगपृथक्त्वात्" इति। उभयार्थत्वे नित्यकाम्यत्वे सयोगाऽऽर्थैकत्वबोधकवाक्य तस्य पृथक्त्वभेदप्रमाण वचनेनोभयार्थत्वबोधने उक्तरीत्या नित्यत्व काम्यत्व चेत्युभयरूपत्वमित्यर्थ । इदमप्यवधेयम्-यज्ञादीना विविदिषन्तीति सम्प्रत्ययार्थे इच्छायामेव विनियोगो न तु धात्वर्थे ज्ञाने शाब्दप्राधान्यस्यैव शाब्दान्वयनियामकत्वात्, राजपुरुषमानयेत्यादावर्थत प्रधानस्यापि राज्ञ आनयनानन्वयात्। अत एव श्रुतिः "सह वा आत्मजीवयोरेवैतदमनेनाङ्ग सस्क्रियते इदमनेनाङ्गमुपचीयते" इति। अनेन कर्मणा इद ममाङ्गमात्मा सस्क्रियते क्षीणपाप क्रियते पुण्येन चोपचीयते इत्यर्थ। अत एवान्त करणशुद्धावेव कर्मणामुपयोग आथर्वणे श्रूयते "विशुद्धसत्त्वस्ततस्तु स पश्यति निष्कल ध्यायमान" इति। विशुद्धौ नियतनैमित्तिकानुष्ठानेन निष्कलमप । सत्त्व आयस्य यया हि प्रकृतौ यस्याङ्गस्य य उपकारस्तदतिरिक्त उपकारोऽतिदेशस्थले न कल्प्यते कृतेषु वंशुप्यरूपप्रकृतोपकारत्वाधेऽप्यवघानस्यादृष्टार्थत्वानभ्युपगमात्, तथैव ज्ञाने विनियुक्तानां यज्ञादीना पापक्षयरूपनित्यकर्मफलातिरिक्तो नित्यकाम्यसाधारणो, मोक्षोपयोग्युपकारोऽपि न

कल्पते। न च कर्मणा ज्ञानोत्पत्तौ पापक्षयस्य द्वारत्वे मानाभाव इति वाच्यम्, ततस्तु तमितिश्रुतेरेव मानत्वात्। अत एव

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण ।
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ इति स्मृति ।

न चैव नित्यभ्य पापक्षयस्यपापक्षयाच्चज्ञानोत्पत्ते सिद्धत्वाद्यज्ञेनेत्यादिवाक्य व्यर्थमिति वाच्यम्, नित्याना विशिष्यज्ञानोत्पत्तिप्रतिबन्धकदुरितनाशकत्वान्यतोऽसिद्ध ज्ञानोद्देशेन नित्यानुष्ठानेऽवश्य ज्ञानोत्पत्तिरन्यथा तु शुद्धिमात्र ज्ञानोत्पत्तिरिव नियतेत्येतदयुक्तया विनियोगसार्थक्यया विनियोगसार्थक्यत्यादिर्वाच्यस्त्यादौ विस्तर । अत एव सत्त्वशुद्धिद्वारेणारादुपकारकत्वे "कर्म सन्निपत्योपकारक तत्त्वज्ञानम्' इति किरणावलीवाक्य "सत्त्वमात्मा तस्य शुद्धिर्ज्ञानोत्पत्तिप्रतिबन्धकनिवृत्ति" इति उपाध्यायवृद्धिर्व्याख्यातम्। एवञ्च—

तस्मात्तत्प्राप्तये यत्न कर्तव्य पण्डितैर्नरै ।
तत्प्राप्तिहेतुर्विज्ञान कर्म चोक्त महामते ॥

इति विष्णुपुराणम्।

उभाभ्यामेव पक्षाभ्या यथा खे पक्षिणो गति ।
तथैव ज्ञानकर्माभ्या प्राप्यते ब्रह्म शाश्वतम् ॥

इति हारितवाक्यम्।

ज्ञान प्रधान न तु कर्महीन कर्म प्रधान न तु बुद्धिहीनम्।
तस्माद्द्वयादेव भवेत्प्रसिद्धिर्नत्वेकपक्षा विहग. प्रयाति ॥

इत्यादि वाक्यञ्च यथोक्तद्वारेणैव कर्मणामुपयोगाभिप्राय न तु समप्रधान्येनाग्नेयादिवत्। नापि विकल्पेन व्रीहियववत्, दृढभूमिसंस्कारनमिथ्याज्ञानोच्छेद विना मोक्षासम्भवात्तस्य च मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंसरूपस्य तत्त्वज्ञानैकसाध्यत्वादित्यन्यदाकरे स्पष्टमिति दिक्।

उक्तफलीभूतेच्छाविषयस्य ज्ञानस्य फलमाह—एवमेवेति। विदित्वासाक्षात्कृत्य मुनि[ ]विषयेतरेच्छाविरहितो भवति। कृतकृत्यत्वात्सन्यासमाह—एवमेवति। लोक ब्रह्मसाक्षात्कारमिच्छन्त. प्रव्राजिन परमहंसा सर्वतो विरक्ता प्रव्रजन्ति पञ्चमलकार, तथा च तदुद्देशेन परिव्राजकवार्य मित्यर्थः। इदञ्चात्यन्तायोगव्यवच्छेदमात्रार्थं न तु आश्रमान्तरे तत्त्वज्ञान

न भवतीति भ्रमितव्यम्, आश्रमचतुष्टयमुपक्रम्य "ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुतेः। संकोचे मानाभावादाकाङ्क्षाया विशेषेणानन्तर्यस्याप्रयोजकत्वात्। "मोक्षाश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तित" इत्यसाधारण्येन व्यपदेशाच्च। गृहस्थस्य च पुत्रदारादिसंसर्गो दुर्वार इत्यभिप्रायकत्वात् "तत्त्वज्ञाननिष्ठो गृहस्थोऽपि विमुच्यत इत्यागमाच्च" इति चिन्तामणिकृतः। श्रूयते हि छान्दोग्योपनिषदि "त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति। प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एवैते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति" इति। तत्र यज्ञाध्ययनदानावच्छिन्नत्वेन गृहाश्रम, तप इति वानप्रस्थभिक्षुरूपमाश्रमद्वयम्, ब्रह्मचारी चेतिचतुर्णामेवैतत्पदपरामृष्टानां पुण्यलोकभुक्त्वा तेषां मध्ये ब्रह्मणि नस्या निष्ठा यस्य स मोक्षभागिति तस्यार्थः।

यद्यपि "अनुष्ठेयं बादरायण साम्यश्रुते" इति सूत्रे परिव्राजकमात्रानुष्ठेयं यत्कर्म तदेव ब्रह्मसंस्थाशब्देनोच्यते द्वितीयैतत्पदोपादानादेकवाक्यत्वावगमात्तत्र चोपक्रमस्य बलवत्त्वादुपक्रमे च यज्ञादिरूपासाधारणधर्मेण गृहाश्रमोक्त्वा भिक्षवाश्रमस्यापि तदसाधारणधर्मं वक्तुमुचितत्वात्तप'शब्देनाश्रमद्वयोक्त्ययोगादतोऽसाधारणधर्मेण तत्तदाश्रमाभिधानरूपसाम्यानुरोधादवसादयन्नित्यनेन आश्रमत्रयस्यैवोक्तत्वात्सर्व एतदित्यादिना तन्निन्दानुवादे च ब्रह्मसंस्थ इत्यादिना भिक्षुः स्तूयत इत्येव सिद्धान्तितम्। तथाप्याश्रमान्तरानुक्तत्वरूपमसाधारण्यं नात्र विवक्षितमध्ययनस्य ब्रह्मचर्याश्रमसाधारण्येन व्यभिचाराद् दानस्य सर्वसाधारण्याच्च। तपसोऽपि भिक्षुप्रभृतिसाधारणत्वेन तेन वानप्रस्थाश्रमाभिधानानुपपत्तिप्रसङ्गाच्चोपक्रमस्य शब्दार्थनिर्णायकत्वेऽभिधानप्रकारनियामकत्वाभावाच्च पूर्वोक्तरीत्यैतत्पदेन चातुराश्रम्योपादानमिति मणिकृतामभिप्रायः। विधे सतिसम्भवेऽर्थवादसापेक्षत्वा-

· · · · · · · शस्त्वार्थमाह—एतत्मै वै तदिति। ह वित्त स्म प्रतिद्धाः वै स्मर्यमाणास्तदित्यस्य ते इत्यर्थः। पूर्वे सन्न्यासाधिकारिणः कृतसंन्यासाः ब्राह्मणाः ब्रह्मज्ञानुकामाः अनूचानाः साङ्गवेदाध्यायिनः कृतनित्यनैमित्तिककर्माणश्च विद्वांसः श्रवणादिना प्राप्तब्रह्मसाक्षात्काराः प्रजापुत्रादिरूपान कामयन्ते नेच्छन्ति। तदनुवादमाह—किं प्रजया करिष्याम इति। तत्र हेतुः तेषां नोऽस्माकमयमात्मैवायं लोकः प्रजासाध्यलोकेच्छाविच्छेदहेतुत्वात्। इदञ्चेच्छान्तरस्याप्युपलक्षणमित्याह—ते ह स्मेति। वित्तं गोधनादि, लोकः स्वर्गादि, एषणा इच्छा, व्युत्थानं परित्यागः, लोकैषणापरित्यागेन यागादिनि-

वृत्तिदर्शनम्। तथा च मैत्रेयोपनिषदि "एतद्धैव तद्विद्वास आहु ऋषय काव-षेया किमर्था वयमध्येष्यामहे किमर्था वय यद्यामहे" इति। तथा च सूत्रम्-"उभयथा च दर्शनम्" इति। उभयथा तत्त्वज्ञानिना कर्माऽननुष्ठानेऽनुष्ठाने चाम्त्यमुक्तमाद्य यथा 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेन" इत्यादि। तथा च तत्त्वज्ञानमेव कारण न त्वाश्रमविशेष इति फलितार्थ। भिक्षाचर्य ब्रह्मचर्य सन्यासं पारमहस्यमिति व्याख्यातार। एषणात्रयस्यापि द्वयोरन्तर्भाव इति दर्शयति—या ह्येति। पुत्रैषणाया वित्तैषणैव, पुत्रस्यापि वित्तत्वात्, तद्धेतुद्वारवित्तैषणापि च लोकैषणा, लोकस्यापि वित्तत्वात्तत्साध्यत्वाद्वा। अन्तर्भावहेतु धर्ममाह—उभे ह्येते इति। एषणे इच्छे एव भवतः। तथा च विषयान्तरेच्छामात्र परित्याज्यमिच्छात्वस्यैव परित्याज्यतावच्छेदकत्वा-दिति भाव। ब्रह्मसाक्षात्कारे सोपाये उक्ते तत्फलाकाङ्क्षाया सत्या ब्रह्माभेदेनावस्थानस्य फलत्व निराकर्तुमाह—स एष इति। जीवपरामर्श। जीवो मोक्षावस्थाया नास्ति, ब्रह्मैक्यसम्पत्तेरुपाधेरविद्यायाश्च निवृत्ते। इतिशब्देन तन्मतमनूद्य नेति तद्दूषणप्रतिज्ञा, इतिशब्द समाप्त्यर्थ। तथा च तन्मतनिरासस्य सिद्धत्वन्नदनुवादाद्धेत्वादिकं यथासम्भव योज्यम्। प्रतिज्ञाया तु बोधकभावान्तराभावेन साध्य सर्वथैव सिद्धमिति भाव। एव पूर्वेणैव नकारेणात्मनाशो मोक्ष इति नास्तिकमतमप्यनूद्य द्वितीयेन तन्मतदूषणमपि प्रतिज्ञेयम्। कथ तर्हि मोक्षस्वरूपमत आह—अगृह्य इति। तद्व्याचष्टे—न गृह्यन्त इति। परममुक्तौ सत्या शरीरादिसामग्र्यभावेन ज्ञानानुत्पत्या तद्व्यतिरेकेण च जीवस्य ग्रहानुपपत्ते। एतेन "तान्येवानु-विनश्यन्ति" इत्यादिश्रुतयो व्याख्याता इति भाव। द्वितीय निराचष्टे—अशीर्यत इति। तद्व्याचष्टे—नहि शीर्यत इति। ध्वसप्रागभावोभयप्रतियो-गित्वविरहाद् दुःख मे मा भूदित्यात्मोपरागेणैव दुःखाभावस्य काम्यत्वात्। न च त्वन्मतेऽपि दुःखाभावस्य ज्ञानाभावे कथ काम्यत्वम्?

दुःखाभावोऽपि नावेद्य पुरुषार्थतयेष्यते।
न हि मूर्च्छाद्यवस्थार्थ प्रवृत्तो दृश्यते सुधी॥

इतिन्यायादिति वाच्यम्, शास्त्रेणेदानी तस्य ज्ञायमानत्वात्स्वकाला-वच्छेदेन ज्ञायमानत्वादकिञ्चित्करत्वादन्यत्र दुःखाभावज्ञानेऽपि दुःखाभावमुद्दि-श्यापि दयाविशेषे मरणप्रवृत्तिदर्शनात्, विवेकित्वस्य च पुरुषार्थत्व प्रत्ययोज-कत्वात्। अन्यत्र दुःखाभावज्ञानेऽपि पुरुषार्थतायां तस्यानपेक्षितत्वात्। "दुःख मे मा भूदित्युद्देश्येनैव प्रवृत्त्या दुःखाभाव जानीयामित्युद्दिश्य प्रवृत्य-

भावाद् ' इति मरिच्छत । प्रपञ्चनिवृत्तिमगास्यति-असङ्ग इति । प्रपञ्चसम्बन्धहीन इत्यर्थ । अत एव असित अबद्ध "षिञ्बन्धने" इत्यतो व्युत्पत्तत्वात् प्रपञ्चसम्बन्धस्यैव बन्धत्वात् । अत एव श्रुत्यन्तर 'तदा विद्वानामरूपाद्विमुक्त" इत्यार्थवैरेऽपि 'तथा विद्वानामरूपाद्विमुक्त " इति । एतेन प्रपञ्चस्य तत्त्वज्ञाननिवृत्तिरित्यर्थैकत्वमुक्तवाक्यस्येत्युक्ति परास्ता । राहोश्चन्द्रो विमुक्त इत्यादौ राहोश्चन्द्रजन्यनाशप्रतियोगित्वबोधस्य सर्वानुभवविरुद्धत्वात्, अत्रैव नञ्शार्थे मानाभावात् । अत एवास्मदुक्तमेवार्थं स्पष्टयति—न सञ्चत न व्ययते इति । सङ्गाभावान व्ययते इतिभाव । इतिशब्द उक्तार्थसमाप्तौ । न केवल परममुक्तावेवास्य सगहीनत्वम्, किन्तु जीवन्मुक्त्यवस्थायामपीत्याह—अत इति । अतो निषिद्धात्साधनात्पाप प्रत्यवायमकरव कृतवानस्मीत्यनुकरणार्थ । एवमुत्तरत्रापि । अतो विहितादनुष्ठानादे कल्याण पुण्यमिति विशेष । उभे एते चिन्ते साक्षात्कारौ व्यजनि । तत्र हेतु—अमृत इति । तत्त्वसाक्षात्कारवानित्यर्थ । अत एवाह—नैनमिति । कृताकृतेति । विहितस्य निषिद्धस्य वोभयत्राप्युपादान विहितकरणेऽभ्युदयस्य तदनुकरणे प्रत्यवायस्य चानुपपत्ते । एव निषिद्धकरणेऽपि प्रत्यवायानुत्पादात्, अनुष्ठोपवासादिस्थलेऽभ्युदयाभावाच्च । न च तस्यापि विहितपदेनैवोपादानम्, पर्युदासे नञर्थत्वसाम्येनैतेनापि ग्रहे बाधकाभावात्, इतिभाव । नास्य केनचन कर्मणा लोको मीयते हिंस्यते, इति स्पष्टम् ।

अत्र शाकल्यस्य ब्रह्मत्वजात स एष नेतीति वाक्य व्याचक्षाण आह—"इति परिदृश्यमानसमासव्यासकल्पो न इति स्वयप्रकाशात्मव्यतिरिक्तन्यूनमूक्तमकारेण न । अथवा इति सकारेणो निश्शेषप्रपञ्चो नेति सकारणप्रपञ्चाभावा नकारार्थ । सोऽपि न निश्शेषकार्यकारणसदसद्विलक्षण" इत्यादि तन, इत्येतादृशार्थपरत्वे मानाभावात्, स्ववासनामात्रमूलत्व व्याख्यानस्य दृष्टत्वात् । स एष नेति तन्मानानुवादेन तन्निषेधपरत्वमित्यस्मद्व्याख्यानस्य च पदोक्तत्वात् । एतेनेतिशब्दोपात्तनानाधर्मावच्छिन्नप्रतियोगिका निषेधा इतिशब्दसमभिव्याहृतनकारेण बोध्यन्ते । अतो घटत्वादिप्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकाभाववोधपरत्वादुक्तवाक्यस्य मिथ्यात्वे प्रामाण्यमिति निरस्तम्, इतिशब्दस्य घटाद्युपस्थापकत्वे बीजाभावातादृशप्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकाभाववोधेऽपि मानाभावाच्च । अभावनिष्ठप्रतियोग्यवच्छेदकावच्छेद्यत्वानवच्छिन्नवृत्तिकत्वाशयो'

कथमप्यलाभाच्च । अभ्युपेत्यापि ब्रूम —आत्मा न दृश्यत इत्यत्र आत्मेत्यनुयोगिसमर्पकपदस्य सप्तम्यन्तत्वान्नञोऽत्यन्ताभावपरत्व दुर्लभम्, नामार्थप्रतियोगिकनञर्थात्यन्ताभावनिष्ठत्वनिरूपितवृत्तित्वीयविषयत्वनिरूपितप्रकारतया बोधे विशिष्यतया सप्तम्यन्तपदोपस्थितेर्हेतुताया भूतले न घट इत्यादौ कल्पितत्वात् । तदवच्छिन्नप्रतियोगिताकभेदस्यात्मनि बोधेन त्वस्माकमेवेष्टसिद्धि ।

न च निपातार्थस्य यत्र प्रतियोगित्व तादृशात्यन्ताभावप्रकारकबोधऽनुयोगिपदस्य सप्तम्यन्तत्वमनपेक्ष्य घटः पाण्डुर एव नेत्यादौ मुख चन्द्र इव नेत्यादौ च एवकाराद्यर्थात्यन्ताभावस्य घटादौ प्रतीयमानत्वादिति वाच्यम्, तत्र एवादेर्धर्मिलक्षणया पाण्डुरत्वायोगव्यवच्छेदवद्भेदस्य चन्द्रसादृश्यवद्भेदस्यैवावगम्यमानत्वात् । वस्तुतस्तु तत्र नञ् विनिर्मोक एवकाराद्ययस्य विशेषणतादिभेदसम्बन्धनैव घटादावन्वयात्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावबोधेऽपि स एष इति वाक्ये घटादीना सयोगादिनाभेदेन आत्मविशेषणत्वावच्छिन्नप्रतियोगिताकोऽभावो बुद्धयते, यथा भूतले न घट, घट पटो न भवति, चत्रो न पचतीत्यादावित्यस्यैवानुगतस्य नियामकत्वाच्छास्त्रकृतसम्मतत्वाच्चेति किं बहुना ।

उक्तार्थे मन्त्रसवादमाह-तदेतद्दृशामुक्तमिति । ब्राह्मणस्य ब्रह्मसाक्षात्कारवत महिम्नो नित्यत्वमुपपादयति—न वर्द्धतेऽधिको न भवति कर्मणा पुण्येन, कनीयानल्पोऽपि न भवति पापेन । कर्मशब्दस्योभयसाधारण्यादिति तद्भाष्यम् । अन्यत्र तु स्वमतानुसारेण विशेषमुक्त्वा विरुद्धस्थले तद्रीत्यैव व्याख्येयम् । तथाहि तस्य ब्राह्मण एव पदवित्स्वरूपा ता स्यात्, तमात्मान विदित्वा पापकेन द्विविधनाप्यन्ते दु खहेतुना कर्मणा न लिप्यते । स्पष्टम् ।

यत्तु तस्यैव ब्रह्माभिन्नस्य ब्राह्मणस्यैव स्याद्भवेत्, अन्योऽपि पदवित् पद नेतिनेतीत्युक्तमात्मान वेत्तीति पदवित्स्यादिति, तच्चिन्त्यम्, स्यादित्यस्यावृत्त्यापत्ते । पदशब्दस्यात्मवाचित्वे बीजाभावात्, ब्राह्मणपदस्य ब्रह्माभिन्नार्थकत्वेऽपि मानाभावात्, ब्रह्मविषयकज्ञानपरत्वे च प्रमाणस्य दर्शितत्वात् । न च त्वन्मते तच्छब्देन साक्षात्कारे विषयत्वेन विशेषणस्य ब्रह्मणः परामर्षस्तन्मते तु विशेष्यस्य ब्रह्माभिन्नत्वस्येति वाच्यम्; अप्रयोजकत्वात्, आत्मज्ञानस्य फलत्वेन विधेयत्वायोगात्, तदुपायस्य च श्रवणादेः पूर्वमेव विहितत्वात् । आत्मज्ञानानुवादेनेतिकर्तव्यता विधत्ते—तस्मादेवविदित्यादि । शान्तो दान्त. चित्तेन्द्रिययोर्व्यापारोपरमादुपरत सर्वप्रवृत्तिहीन । अस-

त्प्रवृत्तीना शान्तदान्तपदाभ्या व्यावृत्ति सत्प्रवृत्तीना तूपरतशब्देनेति व्याख्यातार । तितिक्षु प्राप्तस्य शीतोष्णादिसुखदुखस्य परिहारमनाकाङ्क्षन् श्रद्धाविद्यान्तिश्रवद्धिसम्पन्नो भूत्वा आत्मन्येवमात्मान पश्यति न तु तदर्थं देशदिविशेषापेक्षा । एवच्च परमात्मनि साक्षात्कृते सर्वमेव पश्यति सर्वज्ञो भवति एतच्छ्रुत्वस्य प्रपञ्चमरत्वात् । यद्वा द्रष्टव्यान्तरदर्शनाभावादकृतार्थत्वमाशङ्क्याह—सर्वेण सर्वात्मकमेनमात्मा न पश्यति । सर्वात्मकत्वञ्चाग्रे व्याख्येयम् । तया चैतद्दर्शनादेव कृतकृत्यत्वम् ।

"एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च"भारत । इति स्मृतिः । स[र्वो] परमात्मान्य तत्त्वज्ञन्यात्मा भवति शोकराहित्यात् । अयमपि परस्यात्मा भवति । उक्तार्थं सर्वपाप्मानमित्यादि स्पष्टार्थम् । तरतिशब्दार्थं स्पष्टयति—विजर इति । पापत्वदनुभवरम् । तदभावफलमाह—विजिघत्सोऽपिपास इति । द्वन्द्वमात्रोपलक्षणम् । ब्राह्मणो ब्रह्मज्ञ । जीवपरयोर्भेद स्पष्टयति—स वा एष इति । मन्नानज इत्युभयभावारणम् । अनाद कर्मफलभोक्ता जीव "तयोरन्य पिप्पल स्वाद्वत्ति"इति दर्शनात् । वमुदान तत्फलसुखदु खदानानुपर "प्राणिना मोमुनन " इत्यादिदर्शनात् । एवमुभयविधमात्मानमुक्त्वा प्रसङ्गेन सफलामुक्तानामाह—विदन्ने वमु इति । मुक्त गवाश्वादितत्साधन वा प्राप्नोति । मक्तस्तर च जीवस्यापि ब्रह्मसाधर्म्यमित्याह—स वा एष इति । अजरामयामरणशब्दैर्जीवस्य शरीरादिसम्बन्धप्रयुक्तधर्महानिरात्यन्तिकयुक्ता । प्रकृतमाह—ब्रह्माभय वै जनक प्राप्तोऽसीति । ब्रह्मप्राप्तिश्च तत्साधर्म्यप्राप्तिरेव । अत एव नप्रयोजकवर्मब्रह्मत्याह—उभयमिति । मुख्यप्राप्ते परेषामपि बाधित्वादेवश्च इति । विमुच्यमान एव गमिष्यसीत्युक्तस्य गन्तव्यस्य निर्णये सति कृतार्थो जनक आह—सोऽह भगवत इत्यादि । स्पष्टार्थम् । एवमप्यन्येषामात्मतत्त्वज्ञाना शोकोच्छेदो भवतीति श्रुतिराह—स वा एष इति । उक्तार्थम् । तन्नमेव पठन्ति—

'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ मैत्रेयीति होवाच याज्ञवल्क्य प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्त करवाणीति ॥ सा होवाच मैत्रेयी यन्नु न इम भगो सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्या न्वहं तेनामृताहो नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवता जीवित तथैव ते जीवित स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ सा होवाच मैत्रेयी येनाह

नामृता स्या किमह तेन कुर्या यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ स होवाच याज्ञवल्क्य प्रिया वै खलु नो भवती सती प्रियमवृधदत तद्धि भवत्ये-तद्ब्रवीम्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ स होवाच न वा अरे पत्यु. कामाय पति. प्रियो भवत्यात्मनस्तु कामाय पति. प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणा कामाय पुत्रा. प्रिया भवन्त्यात्मनस्तु कामाय पुत्रा प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्त प्रिय भवत्यात्मनस्तु कामाय वित्त प्रिय भवति । न वा अरे पशूना कामाय पशव प्रिया भवन्त्यात्मनस्तु कामाय पशव. प्रिया भवन्ति । न वा अरे ब्रह्मण. कामाय ब्रह्म प्रिय भवत्यात्मनस्तु कामाय ब्रह्म प्रिय भवति । न वा अरे क्षत्रस्य कामाय क्षत्र प्रिय भवत्यात्मनस्तु कामाय क्षत्र प्रिय भवति । न वा अरे लोकाना कामाय लोका: प्रिया भवन्त्यात्मनस्तु कामाय लोका. प्रिया भवन्ति । न वा अरे देवाना कामाय देवा. प्रिया भवन्त्यात्मनस्तु कामाय देवा. प्रिया भवन्ति । न वा अरे वेदाना कामाय वेदा: प्रिया भवन्त्यात्मनस्तु कामाय वेदा. प्रिया भवन्ति । न वा अरे भूताना कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रिय भवत्यात्मनस्तु कामाय सर्व प्रिय भवति । आत्मा वा अर द्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्ट श्रुत मत विज्ञात इद सर्व विदितम् ॥ ब्रह्म त परादाद्योऽन्य-त्रात्मना ब्रह्म वद क्षत्र त परादाद्योऽन्यत्रात्मन. क्षत्र वद लोकास्त परादुर्यो-ऽन्यत्रात्मना लोकान्वद देवास्त परादुर्योऽन्यत्रात्मना देवान्वद वेदास्त परादुर्योऽन्यत्रात्मना वेदान्वेद भूतानि त परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्व त परादाद्योऽन्यत्रात्मन. सर्व वेदेद ब्रह्मद क्षत्रमिम लोका इमे देवा इम वेदा इमानि भूतानीद सर्व यदयमात्मा ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत. ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीत. ॥ स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय वीणायै तु ग्रहणेन वीणा-वादस्य वा शब्दो गृहीतः ॥ स यथार्द्रेधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्च-रन्त्येव वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽ-थर्वाङ्गिरस इतिहास. पुराण विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि

व्याख्यानानीष्ट हुतमाशित पायितमय च लोक परश्च लोक- सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥ स यथा सर्वासामपा समुद्र एकायनमेव सर्वेषा स्पर्शाना त्वगेकायनमेव सर्वेषा गन्धाना नासिके एकायनमेव सर्वेषा रसाना जिह्वैकायनमेव सर्वेषा रूपाणा चक्षुरेकायनमेव सर्वेषा शब्दाना श्रोत्रमेकायनमेव सर्वेषा सकल्पाना मन एकायनमेव सर्वासा विद्याना हृदयमेकायनमेव सर्वेषा कर्मणा हस्तावेकायनमेव सर्वेषामानन्दा-नामुपस्थ एकायनमेव सर्वेषा विसर्गाणा पायुरेकायनमेव सर्वेषामध्वना पादावेकायनमेव सर्वेषा वेदाना वागेकायनम् ॥ स यथा सैन्धवघनोऽनन्तरोऽ-बाह्य कृत्स्नो रसघन एवव वा अरेऽयमात्मानन्तरोऽबाह्य कृत्स्न प्रज्ञानघन एवैतेभ्यो भूतेभ्य समुत्थाय तान्येवानुविनश्यति न प्रेत्य सज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य " ॥

अस्यार्थ —प्रकृते स्त्रिय उद्देश्यत्वात्तामा च पतिविषयकप्रेमा-तिशयवत्त्वात्तामेव प्रस्तुत्याह—न वा अरे पत्युरिति । तर्हि तत्त्वमूर्द्धाभिषि-क्तस्य याज्ञवल्क्यस्यापि मैत्रेयीमापन्नत्वाज्ज्ञायापदस्वारस्याद् ' आत्मवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथवित्त मे स्यादथ कर्म-कुर्वीय" इत्यादिश्रुतिदर्शनाच्च । पुत्रस्य प्रियत्व स्यादत आह—न वा अरे पुत्राणामिति । जीविष्यति विनाधनेनत्वनुपपन्नमिति न्यायादुक्तश्रुतिदर्शनाच्च । द्रव्यस्य प्रियत्व सम्भाव्याह—न वा अरे वित्तस्येति । एषणात्रयमुक्त्वा लोकैषणा-प्रयुक्त लोकाना प्रियत्व व्यावर्त्तयिष्यन् तत्साहश्यवनकर्माधिकारितावच्छेद-कजाते प्रियत्वव्यावृत्त्यर्थमाह—नवा अरे ब्रह्मण इति, न वा अरे क्षत्रस्येति । प्राधान्याद्रुभयोपादानम् , लोकविशेषप्राप्त्यय प्रयासदर्शनादाह—न वा अरे लोकानामिति । द्रव्यदेवतयो कर्मरूपत्वाद् बलया स्वनिर्वाहिकत्वेन प्रियत्व-माशङ्क्याह—न वा अरे देवानामिति । यज्ञादेरिष्टसाधनत्वेव वेदैकगम्य-त्वादाह—न वा अरे वेदानामिति । अत एव न कर्मणोऽपि निरुपाधिक प्रियत्व-मित्याह—न वा अरे यज्ञानामिति । तथापि स्थूलदेह एव प्रिय स्यादत आह—न वा अरे भूतानामिति । उपलक्षण चेतदात्मभिन्ने निरुपाधिकप्रियत्वाभावस्ये-त्याह—न वा अरे सर्वस्येति । तदेतत्प्रेय पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मा-त्सर्वस्मादन्तरतम यदयमात्मेति तत्पूर्वमपि श्रूयते । अत्र पुत्रादेरात्मसम्बन्धेन प्रियत्व बोधयन्ती श्रुतिरात्मन स्वाभाविक प्रियत्व बोधयति । "यदन्वय यत्प्र-तीयते तद्विरहे तु न प्रतीयते तत्तस्य स्वाभाविकमिति व्युत्पत्ते " इति वर्द्धमानोपाध्याया ।

ननु त्वन्मते आत्मन सुखरूपत्वाभावात्कथ निरुपधीच्छा-विषयत्व तस्य स्यात्, सुखदु खाभावान्यतरस्यैव मुख्यप्रयोजकत्वादितिचेत्, अत्राहु "नहि सुखमपि स्वरूपेण मुख्य प्रयोजन पुरुषान्तरीयसुखेऽपि तादृशेच्छापत्ते, कि त्वात्मसम्बन्धित्वेनेव। अपिच आत्मन इदानीमप्यस्मदनुभवविषयत्वात्सुखरूपत्व सा च तत्रानुभवादिदानीमपि सुखरूपेणानुभववारितश्च लोकमर्यादातीतत्वेनोत्तरानर्हत्वात्, मुक्तससारिणोरविशेषप्रसङ्गाच्च। दृष्टबलादेवान्यथानुपपत्या सुखानात्मकस्याप्यात्मन प्रियत्वमुपपन्न सुखस्यापि-प्रियत्वेऽन्वयव्यतिरेकयोरेव प्रमाणत्वाद्" इति पार्थसारथिमिश्रादय।

नन्वनवच्छिन्नानन्दरूपेण ससारावस्थाया न प्रकाशते तदावरणहेतुभूतमूलाविद्याया सत्त्वादवच्छिन्नानन्दरूपेण तु प्रकाशत एव तदावरणहेतोरवस्याज्ञानस्य विषयसम्बन्धजन्यवृत्त्या नष्टत्वादिति चेत्, सत्यम्, तथापि यस्यामवस्थायामवच्छिन्नानन्दरूपेणापि न प्रकाशते तदाप्यात्मन प्रियत्वानुभवत्वादानन्दरूपत्वे मानाभावात्।

किञ्चावच्छिन्नानन्दरूपेण तस्य प्रियत्वेऽपि तादृशानन्दस्य ब्रह्मविषयत्व भवद्भिरपि नोपगम्यते। प्रियतानवच्छेदकरूपेण तत्त्वन्त्वनुपयुक्तमेव। अत एव तर्कचरणे मीमासकैरुक्तम्—

अथ ससारावस्थायामानन्दो न प्रकाशते।
नह्यप्रकाशन युक्त स्वप्रकाशस्य वस्तुन ॥
यद्यसौ न प्रकाशेत किं तर्ह्यन्यत्प्रकाशते।
आत्मस्वरूप इति चेन्ननु चानन्द एव न ॥
तच्चेत्प्रकाशते नूनमानन्दोऽपि प्रकाशते।

प्रकृतमनुसराम। द्रष्टव्य इत्यस्य निदिध्यासितव्यमित्यनन्तरमन्वय। श्रवणमननिदिध्यासनैरात्मा साक्षात्कर्तव्य इत्यर्थ। पाठक्रमादर्थक्रमस्य बलवत्त्वात्। अत एव "अग्निहोत्र जुहोति यवागू पचति" इत्यत्र पाठक्रमादग्निहोत्रहोमो द्रव्यान्तरेण, यवागूपाकस्तु पश्चाददृष्टार्थं इति प्राप्ते होमस्य द्रव्याकाङ्क्षत्वाद्यवागूद्रव्यस्य विनियोगापेक्षत्वाद् द्रव्यान्तरेण होमस्य यवागूद्रव्यस्य चादृष्टार्थत्वस्य कल्पनापेक्षया यवागूद्रव्येणाग्निहोत्रहोमकल्पनायामेव लाघवात्तथैवेति सिद्धान्त। अत एव श्रोतव्या मन्तव्यो निदिध्यासितव्य साक्षात्कर्तव्य इति व्यत्ययेनैव श्रुतिपाठ आदरस्य सङ्गच्छते। अत एव स्पष्टार्था स्मृति—

आगमेनानुमानेन ध्यानाभ्यासवशेन च।
त्रिधा प्रकल्पयन्प्रज्ञा लभते योगमुत्तमम्॥

"उत्तमयोग आत्मतत्त्वसाक्षात्कारः" इति उपायकृत । तत्फल तु मुक्तिः "न च पुनरावर्त्तते" इत्यर्थवादान्तरेण तस्य समर्थनात् । "तज्ज्ञात्वा मृत्युमत्येति नान्यः पन्था विमुक्तये" इति श्रुत्यन्तराच्च । "ईशं तं ज्ञात्वा अमृता भवन्ति" इत्यादि श्रुतेश्च ।

केचिच्च श्रवणादीनामपि मुक्ति प्रत्येव हेतुत्व प्रकरणोपात्तानामुत्सर्गतः प्रधानफलान्वयात् । उत्तमयोगपदार्थश्चात्र मुक्तिरेव । नच साक्षात्कारस्वरूपसाधनावरुद्धे मोक्षरूपे फले साधनान्तराकाङ्क्षत्व शङ्क्यम्, श्रवणावरुद्धे साक्षात्कारे त्वन्मतेऽपि मनननिदिध्यासनयोः भावनत्वेनानन्वयापत्तेः । किमन्यत्साधनमित्याकाङ्क्षायाश्च तुल्यत्वात् । न चोत्पत्तिविशिष्टसाधनावरुद्धे उत्पन्नविशिष्टाना नान्वय, साक्षात्कारे तु श्रवणादीनामुत्पत्तिविशिष्टत्वात्साम्यमेवेति वैषम्यम्, मोक्ष प्रत्यपि साक्षाच्छ्रवणादीनामुत्पन्नविशिष्टत्वरूपवैषम्याभावादित्याहु. । अन्ये तु श्रवण मनने तन्निदिध्यासने तत्साक्षात्कारे स च मुक्तौ हेतु, विधेरात्माश्रयेतुत्वबोधकताया औत्सर्गिकत्वात् । व्यत्ययेन श्रुति पठद्भिराचार्यैरप्ययमेवार्थोऽनुमनप्राय. । एवञ्च साक्षात्कारहेत्वपेक्षाया निदिध्यासितव्य इति तद्धेतुत्वाकाङ्क्षाया च श्रोतव्य इतीति वदन्ति । अयं चैषामभिप्राय प्रधानफलान्वयित्वमेकप्रकरणोपात्तानामुत्सर्ग. स च बाधकबलात्त्यज्यते । अत एव "सोमेन यजेत" इत्यादौ सोमयागत्वर्यादीना प्राथमिकभावनासम्बन्धे समानेऽप्यदृष्टोत्पत्तिद्वारत्वर्थादेव द्रव्यादीना तु याग एव हेतुत्वम् । अन्यथाऽनेकादृष्टकल्पनापत्तेरिति अतिपदाधिकरणे सिद्धान्तः । अस्ति चात्र बाधक "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" ये "तद्विदुरमृतास्तेभवन्त्यथेतरे दुःखमेवोपयन्ति" ।

"यदा चर्मवदाकाश वेष्टयिष्यन्ति मानवा. ।
तदादेवमविज्ञाय दुःखस्यान्तो भविष्यति ॥

इत्यादि. श्रुतिसहस्रस्य स्मृतिपुराणाना चानेकेषामात्मतत्त्वसाक्षात्कारस्य मुक्तिहेतुत्वबोधकाना दर्शनात् । मिथ्याज्ञानध्वसस्य तत्त्वसाक्षात्कारसाध्यत्वदर्शनाच्च । एवञ्च श्रौतसाधनावरुद्धे मोक्षे आकाङ्क्षोत्थापनद्वारकसाधनत्वकाना श्रवणादीना न साधनत्वेनान्वय कल्पयितुं शक्य. । अत एव "वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र स्वधावाक्योपात्तद्रव्यदेवतयोः वाक्यान्तरोपात्तद्रव्यदेवतापेक्षया शीघ्रोपस्थितिकत्वात्तत एव यागस्य निराकाङ्क्षत्वे वाक्यान्तरोपात्तयोर्न तत्र निवेश इति पूर्वकर्मणि वाजिनस्यानिवेशात् कर्मान्तरत्वमिति गुरौ सिद्धान्तः । एवञ्च साधनान्तरव्यवच्छेदेन विकल्परय समुच्चयान्यतरप्रकारासम्भवाच्च ।

नचात्र पक्षे वाक्यभेदो दोष, श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति प्रत्ययत्रयश्रवणेन विधेरावृत्त्यभावात्तन्निबन्धनवाक्यभेदानवकाशात् "समिधो यजति तनूनपात यजति' इत्यादिवन्मुक्त्युद्देशेन सर्वविधाने च बाधकोक्तत्वात्। न च साक्षात्कारोद्देशेन श्रवणादीना विधानमेवास्त्विति वाच्यम्, निदिध्यासनस्यात्मसाक्षात्कारोद्देश्येनैव विधेयत्वस्यावश्य वाच्यतया श्रवणमननयोस्तदुद्देशेन विधातुमशक्यत्वात्। शब्दानुमानयोः साक्षात्कारजनकत्वानुपपत्ते। ततश्च सकृत् प्रतिसहितेन दर्शना साक्षात्कार-परोक्षयोर्बोधयितुमशक्यतया तदावृत्त्यैव शब्दानुमितिरूपोद्देश्यसम्पर्णस्य वाच्यत्वाद्वाक्यभेदस्यावश्यकत्वात्।

ननु "वै पत्न्यवेक्षितमाज्य भवति" इत्यादावीक्षतेश्चाक्षुपवाचित्व-निर्णयात् तदयकस्य दर्शेरपि तथात्वात् साक्षात्कारार्थकत्वमपि दर्शेर्लक्षण एव कल्प्यम्। तथा च परोक्षापरोक्षसाधारण निश्चयत्वमेव लक्ष्यतावच्छेदकीकृत्य निश्चयोद्देशेन श्रवणादीना विधिरस्विति चेत्, उद्देश्यानेकत्वनिबन्धनवाक्य-भेदस्य परिहारेऽपि विधेयानेकत्वनिबन्धनस्य तदवस्थत्वात्। वस्तुत उद्देश्य-क्यसम्पादनमपि दुर्घटमेव। तथा हि तदभावप्रकारकत्वे सति तस्य कारक-रूप निश्चयत्व न निदिध्यासनजन्यतावच्छेदक 'तमेव विदित्वा" इत्यादिना निर्विकल्पकात्मसाक्षात्कारस्यैव मोक्षजनकत्वावधारणेन सप्रकारकत्वस्य तज्जन्यतावच्छेदकत्वस्वीकारे प्रयोजनाभावात्। निर्विकल्पकस्य च शब्दादि-कार्यतावच्छेदकानाक्रान्तत्वादनुमितित्वस्य च निर्विकल्पकवृत्तित्वे उक्ति-सम्भवस्याप्यनवकाशाच्च। अथात्मान्याविशेष्यकज्ञानमेव तमेवेत्यादि-श्रुतेरर्थ, अत आत्मनि वृत्तिमत्प्रकारकज्ञानस्यापि मोक्षजनकत्वमबाधित-मित्यादिकमाश्रीयते, तथाप्युक्तनिश्चयत्व जन्यतावच्छेदक ममूहालम्बन-साधारण्यात्। न चावच्छेदकपर्यन्त श्रुतेर्न व्यापार, स्वर्गकामा यजेदि-त्यादौ गङ्गास्नानादिजन्यस्वर्गव्यावृत्तवंजात्यस्य यागजन्यतावच्छेदकत्वस्य व्यभिचारपरिहाराय कल्पनेऽपि तद्रूपेण श्रुत्यानवबोधनात्। सामानाधिकरण्य-मात्रस्यैव सर्वत्र बोधनादिति वाच्यम्, तत्र स्वर्गत्वेनैव कामनावदत्रापि ब्रह्मनिश्चयत्वेनैव तदापत्ते.। फलतावच्छेदकरूपेणैव कामनाया. समुल्लिख्य-मानत्वात्। न चेष्टापत्ति, आत्मान्याविषयकज्ञान जायतामितीच्छयैव निदिध्यासने प्रवृत्तेरात्मनिश्चयमात्रस्येदानीमपि सत्त्वेन तत्साधारण-रूपेण तदिच्छानुदयादिच्छाविषयत्वावच्छेदकरूपवत्सिद्धेरिच्छाविरोधित्वात्। तस्मान्निदिध्यासनादेवात्मसाक्षात्कार तस्माच्च दुःखाभावरूपो मोक्षः

मिथ्याज्ञानस्य प्रागभावासहवृत्तिमिथ्याज्ञानध्वंसश्च व्यापार । दृष्टे-नैवोपपत्तावदृष्टकल्पनानवकाशात् । न च निदिध्यासनस्य साक्षात्कारहेतु "पश्यते निष्कलध्या ध्यायमान." इत्याथर्वणश्रुतिदर्शनाच्च ध्यायमान इति न धानच्, ध्यायते परस्मैपदित्वात् चानश्, स च "ताच्छील्यवयोवचनशक्तिषु-चानश्" इति सूत्रात् । तेन च विजातीयप्रत्ययव्युदासेन सजातीयप्रत्ययानु-वृत्तिरूपध्यानप्रवाहरूपनिदिध्यासनस्य स्पष्टमेव लाभात् । अत्र वेदान्तिन-"सुवर्ण हिरण्य मायसुवर्ण एव भवति दुर्वर्णोऽस्य भ्रातृव्यो भवति" इत्यादाविवाव्यवहितपाठरूपसन्निधानात् साक्षात्काररूपफलसाधनत्व श्रवण-स्यैव विधिना बोध्यते, मननिदिध्यासनयोस्तु श्रोतव्य इत्यनेन व्यवधाना-दृश्नरूपेष्टसाधनत्वबोधनासम्भवात् । प्रकरणेन श्रवणाङ्गतानिश्चयेन श्रवण-रूपेष्टसाधनत्वमेव बोध्यत । तदुक्त विवरणाचार्यै —' श्रवणमङ्गिप्रमाणस्य प्रमेयावगमप्रत्यगात्मप्रवरणत्व ब्रह्मात्मैक्यमात्रविषयकत्व तदेकाग्रवृत्ति-विपरीतभावनाशून्यब्रह्मात्मैक्याकारवृत्ति मननासम्भावितत्वज्ञान-रूपस्योपक्षाज्ञानचित्तविक्षेपयोर्हेतोर्निवृत्यापेक्षात्मकब्रह्मात्मैक्यज्ञानेन ब्रह्मा-त्मैक्यमात्रविषयकसस्कार निदिध्यासने ।

न च तस्य तस्य बाहुल्यरूप तत्प्रयुक्तजातिविशेषरूप वा दार्ढ्य सम्पद्यत-तता विपरीतसस्कारनिवृत्या भावनाशून्यब्रह्मात्म्यैक्याकारवृत्तिरिति-भाव । ब्रह्मानुभवहेतुताम्विद्यानिवृत्युपधायकानुभवप्रयोजकतामङ्गस्य प्रधानजन्यफलाहेतुत्वात् । न चोक्तदृष्टसस्कारद्वारावृत्तकाग्रवृत्तिरूपात्कानु-भवप्रयोजकतामिति व्याख्यायताम्, तत्तामाकारकवृत्त्यन्तरकल्पन प्रयोज-नाभावादिति वाच्यम्, विपरीतसस्कारनिवृत्युपपत्तिकाल जायमानाया वृत्तावप्रामाण्यशङ्कासभवेन तच्छङ्काशून्यवृत्यन्तरस्यैवाविद्यानिवृत्युपधायक-त्वात् फलोपकारङ्ग" इति । उक्तैकाग्रवृत्तिरूपो याऽप्रामाण्यशङ्काशून्य-साक्षात्काररूपस्य श्रवणफलस्य प्रयोजक उक्तोपकारस्तज्जनकाङ्ग इत्यर्थ । तस्माच्छ्रवणमेवाङ्गि ।

न च सामर्थ्यं निदिध्यासनस्यैवाङ्गित्वमिति वाच्यम्, "बर्हिर्देवसदन दामि" इत्यादि मन्त्रस्य बर्हिलम्बननिष्पाद्यतानिरूपितस्वनिष्पादनतावोध-कसामर्थ्यवत् साक्षात्काररूपे साध्ये निदिध्यासननिष्पादनत्वबोधकसामर्थ्यस्य निदिध्यासनपदेदुर्वचत्वात् । मन्त्रादिरूपसाधननिष्पाद्यार्थप्रकाशनसामर्थ्य शब्द-सामर्थ्यविषया श्रुतिस्तत्रमानम् । तत्र हि कर्मणा पूर्वमुक्तत्वात्तस्यैव श्रवण-रूप[स्या ?]चारात्मकस्य तच्छब्देन परामर्श । सामान्यरूपेण परामर्शोऽपि

योग्यतावलाच्छ्रवणात्मकभानम्, निषेधस्तु तदन्यकर्मपर ज्ञानप्रसादशब्देन-मननाधीनबुद्धयेकाग्र्यविशुद्धसत्त्वपदेन निष्कामकर्मानुष्ठानाधीनसत्त्वशुद्धे ध्यायमानपदे न निदिध्यासनस्योक्तत्वात्तत इति शब्देन पारिशेष्याच्छ्रवणस्यैव परामर्शौचित्यात्। तस्माद्ध्यायमान इति कर्तृकारकगतत्वेन श्रुत ध्यान कर्तृसंस्कारकतया श्रवणाङ्गनि सदिग्धवाक्यान्तरस्तत इति पञ्चम्याचार-निस्सदिग्धे हेतुताबोधात्, श्रवणस्यैव साक्षात्कारहेतुत्वस्य श्रुतितात्पर्य-विषयत्वादिति। तत्रेद वक्तव्यम्—तत इत्यस्य हेतुपञ्चम्यादेशतसिलन्तत्वमेव सन्दिग्ध "पञ्चम्यास्तसिल्" इत्यनेन पञ्चम्यन्तेभ्य किमादिभ्यस्तसिल्-विधानेऽपि हेतुपञ्चम्यन्तत्वनियमाभावात्। एव तच्छब्दस्य सर्वनाम्न श्रवणपरामर्शकत्वमपि दुर्घटम्, पूर्वोपस्थितपरत्वाच्छ्रवणस्य च पूर्वमनु-रक्रान्तत्वात्।

न च कर्मपदेन तत्परामर्श, आत्मसाक्षात्कारनिष्ठकार्यत्वप्रतियोगिक-कारणत्वाभाववतामेककर्मणा तत्रोपादानात्। निषेध श्रवणान्यकर्मपर इत्यस्य स्वयमेवोक्तत्वात्। श्रवणान्यपरत्वे निर्णीतकर्मपदस्य सामान्यरूपे-णापि श्रवणस्य यच्छब्देन परामर्श इति वक्तुमशक्यत्वात्, शब्दतात्पर्या-विषयस्य तत्प्रक्रान्तत्वे बीजाभावात्। अत एव "अचोरहाभ्या द्वे" इतिसूत्रे तक्रकौण्डिन्यन्यायेन परपदस्य रेफाभिन्नपरत्वात् "अनचि च" इत्यत्रापि तथैव। तेन हर्य्यनुभव इत्यादावपि न रेफस्य द्वित्वमिति शाब्दिकाः। स्वशब्दोपादानेऽपि पूर्वार्थपरत्वे च तच्छब्दस्य पूर्वानुपक्रान्तपरत्वे उक्तिसम्भवाभावात्। ततश्च-ध्यायमानपदोक्तनिदिध्यासनस्यैव तच्छब्देन परामर्शौचित्यात्तस्यैव च साक्षा-त्कारहेतुत्व तत इत्यनेन बोध्यते। न च पूर्वोक्तपरामर्शकतच्छब्देन कथ पश्चादुक्तनिदिध्यासनपरामर्श इति वाच्यम्, आर्थिकपौर्वापर्यस्यैव तत्रोपयो-गेन शब्दतस्तस्याकिञ्चित्करत्वात्। अत एवानुकृतेस्तस्य चेत्यधिकरणे पूर्वोक्त-परामर्शित्व तच्छब्दस्येत्यत्र "तेन रक्त रागात्" "तस्मापत्यम्" इत्यादौ व्यभि-चारशङ्कया भामत्यामुक्तम्—"प्रकृते परस्मिन् प्रत्ययेऽर्थभेदेऽन्वाख्यायमाने प्रातिपदिकप्रकृत्यर्थस्य पूर्ववृत्तित्वमस्ति" इति। व्याख्यातञ्च कल्पतरौ "प्रकृते परो यस्तस्मिन् योऽर्थविशेषस्तस्मिन् व्याख्यायमाने प्रत्ययाधस्तनप्रकृत्यर्थ-स्यास्ति प्रस्तुतत्वमिति ध्यायमानस्य ततस्त पश्यतीत्यनुनये तस्यैव पूर्वत्वात् साक्षात्कारानन्तर निदिध्यासनस्य प्रयोजनाभावेन परैरपि कर्तृसंस्कारकत्व-स्वीकारेण प्रथममेव तदन्वयस्य वाच्यत्वात् एकवाक्यान्तर्गतत्वेन निदिध्या सनोपस्थितेरन्तरङ्गतया तस्या एव नियामकत्वाच्च। एतद्वाक्यार्थबोधका-

लेन कर्मणेत्येतद्वाक्यार्थोपस्थितेरनपेक्षितत्वात्। अत एव मनोमय प्राण-शरीर इत्यत्र प्राणः शरीरमस्येति सर्वनामार्थगर्भस्य बहुव्रीहेः सन्निहितावल-म्बित्वात्स्ववाक्योपात्तस्य मनोमयादेर्विकारप्राचुर्याद्यर्थकत्वेनानवधारितत्वाद्ध-र्मिविशेषसमर्पकत्वानुपपत्त्या शमविधिपर "सर्वं खल्विद ब्रह्म" इतिवाक्योप-क्रान्तब्रह्मैव समासार्थ इतिसिद्धान्तः। तदुक्तम्—

समास सर्वनामार्थं सन्निकृष्टमपेक्षते।
तद्धितार्थोऽपि सामान्य नापेक्षो निवर्तकः॥
तस्मादपेक्षित ब्रह्म ग्राह्यमन्यपरादपि।
तथा च सत्य सङ्कल्पप्रभृतीना यथार्थता॥ इति।

प्रकृते च ध्यायमानपदस्य निदिध्यासनपरतया उभयसम्मतत्वा-देववाक्योपात्तत्वाच्च तस्यैव परामर्शे बाधकाभावात्। एवञ्च तत इत्यस्या-भावेऽपि ध्यायमानस्त पश्यतीत्येनावतापि मलिन ते वपु. स्नाया इत्या-दाविव सिद्धसाध्यसमभिव्याहारन्यायेन निदिध्यासनात्मसाक्षात्कारयोर्हेतु-हेतुमद्भावलाभः सुघट.। प्रागेव तु तत इत्यनेन श्रुत्यैवेति न किञ्चिदनुपपन्नम्। एवञ्च व्यवहितपाठरूपसन्निधानेन श्रवणस्य साक्षात्कारहेतुत्वं बोधयितुं शक्यम्, श्रुते. सर्वतो बलवत्त्वात्। एतेन दर्शपौर्णमासयोः "श्रुते हस्तावनेनिक्त उपलराजीस्तृणाति" इत्यत्राव्यवहितपठितेप्युपलराजिस्तरणमात्रे हस्तावनेजननाङ्गमपि तु योग्यत्वात् तदुत्तरकरिष्यमाणेष्वेवेति स्थितम्। तृतीयप्रथमे आनन्तर्यमचोदनेत्यधिकरणे "तस्मादनापि सन्निधिना श्रवणस्य न साक्षात्कारहेतुत्वम्" इत्यनूद्य यद्दूषणमुक्त हस्तावनेजस्य कर्तृसंस्कारकर्तृ-त्वात् कर्तुश्च प्रयोगान्वयित्वेन तद्द्वारा करिष्यमाणसर्वकर्माङ्गत्व युक्तम्। प्रकृते तु प्रकरणस्य फलान्वयात्पूर्वमसिद्धत्वाल्लिङ्गस्य च मननादौ सत्वेऽपि सन्निधानसहकृतलिङ्गस्य बलवत्त्वेन श्रवणे दर्शनान्वयिनियामकत्वसम्भवात्। अत एव "एष वै हविषा हविर्यजते योऽदाभ्य गृहीत्वा सोमाय यजते परा वा एतस्यायु. प्राण एति योऽश्नु गृह्णाति" इत्यनारभ्य श्रुतेः अश्नुमदाभ्यमिति यागनामनी, अशौ यजत्यश्रवणेऽपि गृह्णाति चोदनासामान्येन ज्योतिष्टोमप्रकृ-तिकत्वात्तदीयद्रव्यदेवतासम्बन्धेन यागत्वसिद्धिसम्भवात्। तथा च नाम्ना-भेदाज्ज्योतिष्टोमाद्भिन्नावेतौ यागावित्याशङ्क्य अदाभ्यस्याव्यवहितपाठाद् ग्रहणैकान्वयाद्यागसामानाधिकरण्याभावेन संज्ञाया भेदकत्वायोगात्। उपांशुयजादिग्रहणापेक्षया च भेदस्य ग्रहणसामानाधिकरण्येन दृढत्वात्। अंशौ च यजतेरप्यश्रवणाद् ग्रहणस्य संस्कारत्वेऽपि नामसम्भवात्। ज्योतिष्टोमाङ्गत्वेन ग्रहण एव विधीयेते इति द्वितीयतृतीयेऽद्रव्यत्वात्केवले

कर्मविशेषस्यादित्यधिकरणे सिद्धान्तितमित्यादि तत्सर्वमपास्तम्। अपि च शब्दस्य साक्षात्कारकरणत्वबाधादपि नश्रवणस्यार्थित्वम्। तदुक्तमुदयनाचार्यैः "तस्मादेव वदान्निनो वाक्यार्थज्ञानादेव मुक्तिमिच्छन्ति ते प्रष्टव्या-किं वस्तुसन्त्युपायोपेयभावमभ्युपगमस्य प्रवृत्ति सम्वृतिरन्त वा? आद्ये अद्वैतसिद्धान्तक्षतिः, कार्यकारणभावस्य भेदाधिष्ठानतया तयो पारमार्थिकत्व भेदस्यापीति पारमार्थिकत्वप्रसङ्गात्। द्वितीये तु किमविशेषरूपप्रवृत्तिर्यथातत्त्ववृत्तिव्यवस्य वा? आद्ये भोगिनोऽप्यपवृज्येरन्। द्वितीये तु न शब्दाद्वाऽनुमानिकाद्वा तत्त्वज्ञानादैन्द्रियकव्यामोहविगम। किन्तर्हि साक्षात्कारादेव इष्ट इति तथैव तदर्थिन प्रवृत्तिर्युक्ता? न च वाच्य वाक्यादेव साक्षात्कारोदय इति तस्य केवलस्य सामर्थ्यानुपलम्भात्। यदि तु स्वसविदितरूपतया किं तमध्यानादिक्रमपूर्वमाघास्यतीत्युच्यते। तदा श्रुतेरपि वैफल्यमनेन न्यायेन। यदपि भोनदशकनदीसन्तरणमुदाहृत तथापि न केवलेनैव वाक्येन साक्षात्कार, किन्तु चक्षुरादिनैव। अत्रापि मनसा सहकृतेन भविष्यतीति चेत्, अनेकवा श्रुत्वकेऽपि(?) सत्यपि पटीयसि मनसि ब्रह्मसाक्षात्काराभावात्। "तत्कस्य हेतो भौनानामिव शरीरे दृढतरस्य चाक्षुषस्याभ्यासस्य मुमुक्षोर्मानसस्याप्यभावात्। तस्मात्तदर्थं मभ्यासमेव शरणम्" इत्यादि। न्यायभास्करकृद्भिरप्युक्तम्—

यत्तु भ्रनदशकनदीसन्तरणोदाहरण तत्र शाब्दज्ञान तद्बोधितो दृढतरशरीरसाक्षात्कारज सस्कारो वा सहकारी चाक्षुषे न, शब्दाविरोधात्। अत्रापि तदभ्यर्थनासिद्ध दृढसस्कारहेतुनिरन्तरदीर्घकालादरोपासनीयसाक्षात्कारिफल निदिध्यासनम्" इत्यादि।

यत्तु "तद्धास्य विजज्ञौ तमस पार दर्शयति वेदान्तविज्ञानसुनिश्चितार्था" इत्यादिक शब्दस्यापरोक्षज्ञानजनकत्वे मानम्, अस्योद्दालकस्य तत्त्वमात्तत्त्वमसीत्याद्युपदेशादात्मान विज्ञातवान् श्वेतकेतुरिति शेष। ततश्च फलजनकापरोक्षज्ञानस्योपदेशमात्रसाध्यत्वलाभ। तमस पारमज्ञानप्रयुक्ताद्विलक्षण सवाधिष्ठानमनवच्छिन्नानन्द दर्शयति—साक्षात्कार इति। "तस्मै मृदितकषायाय तमस पार दर्शयति भगवान् सनत्कुमार" इति श्रुते। वेदान्तेत्यादिवाक्ये च शाब्दज्ञानस्य विषयेण विशेषविषयत्वस्य लाभात्। सुपदेनापरोक्षत्वमेवोक्तम्। न च विजज्ञौ विषयस्य परोक्षपरत्व दर्शयतीत्युक्तवाक्यत्वारूढेन साक्षात्कारपरत्वात्। न च ग्राममार्गोपदेष्टरि ग्राम दर्शयति वदुपचारात्तदुपपत्ति, मुख्यत्वे बाधकाभावात्। उपदेशातिरिक्तकारणस्य नारदसनत्कुमारव्यापिकायामप्रतीतेश्चेत्यादि, तन्न, भूय एव भगवान्विज्ञापयतिति

पूर्वं वाक्यानुसारेण विजज्ञावित्यस्य शाब्दपरोक्षत्वात् । अन्यथा तत्त्वमसी-त्यादेर्नवकृत्व उक्तत्वा पूर्वोक्तार्थपर्यायेषु तद्वाक्यात्परोक्ष नवमे तु प्रत्यक्षमिति वैषम्यात् । न च पूर्वत्रापि तत्त्वमसीत्यन्मात्रप्रत्यक्षमेवेति वाच्यम्, अभ्यास-वैयर्थ्यापत्ते । नचाप्रामाण्यशङ्कानिवृत्यर्थमभ्यास, भवदभिमतनिर्विकल्प-कसाक्षात्कारे तदसम्भवादप्रामाण्यादिज्ञानस्य सप्रकारकज्ञानविशेष्य-कत्वनियमात् । भावरूपाप्रामाण्यस्य निर्विकल्पके शङ्कानर्हत्वात् । उक्ता-भावात्मकप्रामाण्यस्य ज्ञानानुपयोगात् । तदुक्तम्—असम्भावनाविपरीत-भावने च निर्विकल्पके न सम्भवत प्रमाणे सम्भवाच्चेति ।

यत्तु निर्विकल्पकेऽपि सशयत्व सुलभ त पश्यामि तमनुमिनोमी-त्यादिधीसिद्धलौकिकविषयत्वविधेयत्वादिवत्स देहीत्यादिधीविषयताविशेषनि-रूपकत्वस्यैव सशयत्वात् तन्नियामकाश्चाननुगता । शक्तिविशेषाविशिष्टत्वे-नानुगता वा दोषा विशेषणीभूतकोट्यारन्धनस्य विशेष्यतावच्छेदकव्याप-कत्वविशिष्टसम्बन्धेन विशेषणता यत्र ज्ञाने तत्र तु न सशयत्वम्, अनन्त-वस्तुघटितत्वेन सन्देहीति सर्वजनसिद्धानुभवानुपपत्ते, भावमात्रकोटिक-सशयमाधारण्याभावाच्च । अथवा विचारोत्तरमेव ज्ञानमविद्या निवर्तयति लौकिकमूदमार्योपदेशजन्यज्ञाने तथैवानुभवात् 'वेदान्तविज्ञानसुनिश्चितार्था" इत्यादि 'परिमुच्यन्ती" इत्यन्यश्रुतेश्च । निवर्तकावच्छेदक तु विचारनिर्व-र्त्यस्य तात्पर्यसशयस्य तदाहिताप्रामाण्यविरहेण विशिष्टसाक्षात्कार व शक्तिविशेषो वा ? तत्राद्येऽप्रामाण्यज्ञाननिवर्तकत्वेन, द्वितीये च शक्तिविशेष सम्पादकत्वेन विचारस्योपयोग इति । तच्चिन्त्यम्, सशयत्वस्य विषयिता विशेषत्वापत्तिवादिभिरपि सप्रकारकज्ञान एव तदभ्युपगमाद्विशेष्यताविशेष्य-रूपस्य सशयत्वस्य विशेष्यतावच्छेदनान्तरकोटिकप्रत्यक्षस्यैवोपगमात् । विशेष्यतावच्छेदकसामानाधिकण्यमात्रेणाभयकोटिकज्ञानस्य च समुच्च-यान्तर्भावात् । अत एव विशेष्यतावच्छेदकावच्छेदेनैककोटिप्रकारकज्ञानस्य तादृशविषयितावशेषनियामकत्व तत्र स्वीक्रियते, तेन दायविशेषस्य नियामकत्वकल्पन चिन्त्यन्, निर्विकल्पकसशयस्य प्रामाणिकत्वे सत्येव तन्ना-धारणनियामकस्य कल्प्यत्वात् सशयात्मकनिर्विकल्पकस्य कुत्राप्यनङ्गीकारात्, सदेहानुपवसायेन सन्देहस्य सप्रकारकत्वेनैवाल्लेखात् । "अथोहि भगव इति होपससाद सनत्कुमार नारदस्त होवाच यद्वेमोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ऋग्वेद भगवोऽध्येमि यजुर्वेद सामवेदमाथर्वण चतुर्थमितिहासपुराण पञ्चम वेदाना वेद पित्र्य राशि दैव निधि वाको-

वाक्यमेकायन देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्यामेतद् भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतह्येव मे भगव दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगव' शोचामि तं मा भगवाञ्छोकस्य पार तारयतिवति" तदनुरावेनोपसंहारस्यस्य तमस पार दर्शयतीत्यस्यापि ज्ञापनार्थत्वज्ञोव्यात्। वेदाना वेद ज्ञापक व्याकरणं पित्र्य श्राद्धकल्प राशि गणित दैवमुत्पातज्ञान निधि महाकालभूतादिनिधिशास्त्र वाकोवाक्य तर्कशास्त्रमेकायन नीतिशास्त्र देवविद्या निरुक्त ब्रह्मविद्या शिक्षाकल्पछन्दश्चितो भूतविद्या भूततन्त्र क्षत्रविद्या धनुर्वेद नक्षत्रविद्या ज्योतिष सर्पविद्या गारुडतन्त्र देवजनविद्या गन्धर्वोक्तयुक्ति स्पष्टमन्यत्। नचोक्तव्याख्याने क्षीयतीत्यस्य गौणत्व तत्समर्थाचरणे णिप्रत्ययोपगमात् "कारोषोऽग्निरव्यापयति" इत्यादौ तदनुकूलव्यापारपरतयैव व्याख्यानात्। वेदान्तविज्ञानेत्यस्य स्वयमय –उपनिषद्वाक्यानां यद्विज्ञान तात्पर्यनिर्णय श्रवणमिति यावत् तेन सुप्रुवप्रामाण्यशङ्काशून्यत्वेन निश्चितोऽर्थ आत्मस्वरूपो यैस्ते। तथा च श्रवणात्तरमननलाभात् श्रवणस्य शेषित्व दूरापास्तमेव।

यत्तु वेदान्तवाक्यार्थाद्विशेषविषयक मद्वितीयत्वाद्युपलक्षणेन व्यावृत्ताधिष्ठानमात्रविषयक ज्ञान तन सुनिश्चितस्तदभिन्नस्यापरोक्षस्यास्याप्रामाण्यज्ञानानास्कन्दितस्य विषयीकृत वेदान्तवाक्यार्थोऽखण्डब्रह्मात्मैक्यरूपा यैस्ते तथेत्यर्थ इति, तच्चिन्त्यम्, वेदान्ताद्विज्ञानमित्यत्र पञ्चमीसमासस्यानुशासनावरहात्। यागविभागादिकल्पने च मानाभावात्। मन्मने च कर्मोपघ्नन्तत्वेन च तत्समासस्य प्रत्यक्षानुशासनसम्मतत्वात्। तदभिन्नस्येत्यपि न युक्तम्, अभेदार्थकतृतीयान्तस्य समासविध्यभावात्। एतेन क्रियाविशेषणत्वेन विज्ञानपदस्य द्वितीयान्तत्वशङ्कापि निरस्ता, तत्रापि समासस्य दुर्लभत्वात्। अपरोक्षत्वस्य सुशब्दार्थत्वमप्ययुक्त तात्पर्यग्राहकमानान्तराभावाच्छब्दगत्या च तदलाभात्। एतेन निश्चितपदेनैवाप्रामाण्यशङ्काविरहादिनाभात् सुपदमपरोक्षपरमेवेत्यपि परास्तम्। अत एव निर्णयत्वेन प्रतिबन्धकतायामप्यप्रामाण्यज्ञानाभावमपि निवेशयन्ति। यदपि आचार्यवान्पुरुषो वेदेत्यनेनाचार्योपदेशात्तत्त्वज्ञानवन्तमुक्त्वा तस्येत्यादिनोक्तज्ञानादेव कैवल्योक्तरीतिस्तदपि चिन्त्यम्, "तस्य यथाभिनहन प्रमुच्य प्रब्रूयादेना दिश गन्धारा एता दिश व्रजेति। स ग्रामाद् ग्राम पृच्छन् पण्डितो मेधावी गन्धारानेवोपसम्पद्यतैवमेवेहाचार्यवान् पुरुषो वेद तस्य तावदेव चिर यावन्न विमोक्ष्ये" इत्यादि छान्दोग्ये दृष्टान्तपर्यालोचनया उपदेशस्य-

पारम्पर्येण ब्रह्मप्राप्तिहेतुत्वस्यैव लाभात् । एतेन तमसस्पार दर्शयतीत्यस्यापि पूर्वोक्तार्थो व्याख्यात इति दिक् ।

एतेनापि वेदान्तबोध्यस्य ब्रह्मातिरिक्तस्याप्येयमपरोक्षापत्तिः. अर्थपदस्य मुख्यतस्तात्पर्यविषयपरत्वाद्वेदान्तबोध्यताया ब्रह्ममात्रपर्यवसानत्वाच्चेत्यपि परास्तम्। इन्द्रियशरीरादीना प्रत्यक्षपरोक्षजनकत्वस्य वेदव्यवस्याप्यत्वविरहाच्च मानान्तरेण ब्रह्मणो वेदजन्यप्रत्यक्षविषयत्वासिद्धचार्थपदस्येत्यादेरत्यन्तमेवायुक्तत्वात् ।

यत्तु अपरोक्षत्व तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववदिति, तदसत्, अनुमितित्वमुक्तवृत्त्यनुमितिनिष्ठात्यन्ताभावाप्रतियोगित्वादित्याद्याभासवदप्रयोजकत्वात् । अपरोक्षत्व तत्त्वमस्यादिवाक्यजन्यज्ञानावृत्ति घटमानयेत्यादिवाक्यजन्यज्ञानावृत्तित्वात्, स्मृतित्ववदिति प्रतिरोधाच्च । यद्यपि ज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तित्वमप्युक्तहेतुता स्यादित्याशङ्क्योक्त तज्ज्ञानस्यापरोक्षत्वमनुष्ठानार्थं फलार्थं वा वाच्यम् ? नाद्य., परोक्षज्ञानादेव तत्सम्भवात्तत एवानुष्ठानात्फलासिद्धेर्न द्वितीयोऽपीति, तदप्यसत्, अनापि श्रवणादे साक्षात्कारिभ्रमनिवृत्तौ मानाभावेन कल्पकाभावात् । यद्यपि विमतः शब्दो नापरोक्षधीहेतु. शब्दत्वादिति प्रतिसाधनमाशङ्क्य दशमस्त्वमसीत्यादावेव व्यभिचारादिति, तदप्यसत्; तत्रापि चक्षुषैव प्रत्यक्षोदयात्, अन्धस्य तत्र साक्षात्कारोदये मानाभावात्। एव तमस्यपीति बोध्यम् । तथोक्त कल्पतरुकारैः "शब्दस्तु नापरोक्षभ्रमाहेतुः क्लृप्त. प्रमेयापरोक्षयोग्यत्वात्प्रमाया साक्षात्कारत्वे देहात्मनेदविषयानुमितेरपि तदापत्तिः, दशमस्त्वमसीत्यत्रापि तत्सविवाद[त्वा]देव साक्षात्कार', अन्धादेस्तु परोक्षधीरेव" इति ।

यत्तु निदिध्यासनरूपभावनाप्रकर्षजन्यत्वे साक्षात्कारस्य कामातुरकामिनीसाक्षात्कारवदभ्रमत्वापत्तिः । न च "वेदान्तवाक्यजन्यज्ञानभावनाजापरोक्षधी. मूलप्रमाणदार्ढ्येन भ्रमत्व प्रपद्यते" इति कल्पतरुरीत्या निस्तारः, मूलप्रमाणस्य निदिध्यासनप्रयोजकवेदान्तवाक्यस्य दार्ढ्यानिर्दोषत्वादिति तदर्थादिविवाच्यम् ; तदपेक्षया शब्दस्य साक्षात्कारकरणत्वकल्पनाया एव युक्तत्वादिति, तच्चिन्त्यम्, अकल्पकल्पनापत्ते । न च शब्दस्य प्रमाकरणत्व क्लृप्तमिति वाच्यम्; कार्यतावच्छेदकभेदेन करणत्वभेदात्, साक्षात्कारत्वावच्छिन्नकार्यतानिरूपितस्य करणत्वातिरिक्तस्यैव कल्पत्वात् । चक्षुरादेस्तु चक्षुरादिप्रमाकरणत्वस्य क्लृप्ततया तत्कार्यतावच्छेदकाक्रान्ताभावात् । चाक्षुषत्वावच्छिन्न प्रत्यपि तया-

त्वमिति विशेष । तस्माच्छब्दो न साक्ष्यादिप्रमाकरण ज्ञायमानकरणत्वा-
ल्लिङ्गवत् । पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नाश्रित सिद्धसा-
धन दोष ज्ञायमानत्वप्रयुक्तकारणताकत्वस्य च सर्वसम्मतत्वान्न भागासिद्धि,
अन्यथान्येषामपि ततो ब्रह्मात्मैक्यसाक्षात्कारप्रसङ्गात् । किञ्च शब्दस्य
स्वभावेन प्रत्यक्षजनकत्व घटमानयेत्यादावतिप्रसङ्ग नैमित्तिकत्वे तु निमित्त
दुर्वचम्, विषयापरोक्षत्वस्य तत्त्वे दोषस्य पूर्वदर्शितत्वात् । अर्थस्य चापरोक्षत्व
न तावदपरोक्षबुद्धिरूपत्व ब्रह्मान्यस्मिन्नभावात् । नाप्यपरोक्षव्यवहारविष-
यत्वम्, अपरोक्षार्थविषयकत्वस्यैव व्यवहारनिष्ठापरोक्षत्वस्य वाच्यत्वादन्योन्या-
श्रयात् । नाप्यपरोक्षोऽयमित्याकारकत्व व्यवहारस्यापरोक्षत्व शाब्दवृत्तेरपरो-
क्षव्यवहारविषयकत्वेनाज्ञाननिवर्तकत्वम्, अज्ञाननिवृत्तौ च सत्या यथोक्तरूप
व्यवहारस्यापरोक्षत्वमित्यन्योन्याश्रयात् । नाप्युक्तव्यवहारयोग्यत्व व्यव-
हितघटे शब्दादपरोक्षप्रसङ्गात् । नाप्यपरोक्षज्ञानविषयत्वमेवार्थस्यापरोक्षत्व
वाच्यम्, तत्र ज्ञानपद यदि यस्य ज्ञानस्यापरोक्षत्वनिर्वचनाय विषयापरोक्षत्व
निरुच्यते तज्ज्ञानव्यक्तिपर तदान्योन्याश्रय । अपरोक्षविषयत्वेन तज्ज्ञानस्या-
परोक्षतज्ज्ञानविषयत्वेन चार्थस्यापरोक्षत्वमित्यत्र पर्यवसानात् । अथ
यत्किञ्चिज्ज्ञानपर तर्हि स्वर्गादेरपि केषाञ्चिदपरोक्षतया तत्रास्माकमपि शब्दा-
दपरोक्षधीप्रसङ्गात् । यदि तत्पुरुषीयज्ञानपर तदा भिन्नकालीन ज्ञानमादायाति-
प्रसङ्ग । अथ तत्कालीनत्वस्यापि निवेश, तथाप्यग्न्यादिप्रत्यक्षकाले
शब्दाल्लिङ्गाद्वापरोक्षज्ञान स्यात् ।

यत्तु शाब्द लैङ्गिक वा बोधमादाय यस्य बोद्धव्य तदभिन्नार्थविषयक-
ज्ञानत्वमेव तस्यापरोक्षत्वम्, तदभिन्नत्व च मनोऽनवच्छेदकप्रयुक्तो यो मे
भेदस्तच्छून्यतावच्छेदकत्व तेन घटादिप्रत्यक्षकाले घटादौ प्रमात्रभेदेऽपि न
क्षति । यद्विषयावच्छेदेन चिति वृत्तिरूपेण परिणतमन सम्बन्धस्तद्विषयाव-
च्छेदेनैव पूर्वसत उक्तभेदस्य नाशाभावेन पटतासपत्ते । घटप्रत्यक्षकाले च चिति
उक्तमन सम्बन्धाभावेन पटावच्छेदेन सत उक्तभेदस्य नाशाभावेन पटस्यो-
क्तशून्यतावच्छेदकत्वाभावात् । पुरुषान्तराभिन्नविषयज्ञानस्यापरोक्षत्ववारणाय
तन्मनोऽवच्छिन्नचिद्भेदविषयतावच्छेदकविषयज्ञानत्व तन्मनोवच्छिन्नज्ञान-
स्यापरोक्षत्व वाच्यम् । इच्छादिवारणाय ज्ञानत्वनिवेश । विषयस्यापरोक्षत्व
तु नोक्तज्ञानविषयत्व धर्माधर्मादौ तदापत्ते । किन्त्वनावृत्तत्वमित्यग्न्यादि-
प्रत्यक्षकाले शब्दादिनाप्यपरोक्षोत्पत्तावितिष्टापत्तिरेवेति, तदसत्, एतादृशसा-
क्षात्कारत्वस्य तद्व्यक्तिघटितत्वेनानुगतप्रतीत्यनुपपादकत्वान्नावृत्तिचिद्रूपत्वे

ब्रह्मण्य[ण्यो]पि तादात्म्येनैव विषये तद्विषयकत्वेन च वृत्तावपरोक्षव्यवहार इत्यनेकाननुगमदोषस्य च दुर्वारत्वात्। मनआद्यतीन्द्रियपदार्थघटितत्वेन तदनुपस्थितौ चाक्षुषादिविषयकानुव्यवसायविषयत्वानुपपत्तेश्च। अननुगमे च जन्यजनकत्वावच्छेदकत्वाभावाच्च।

यत्त्वनावृत्यत्वन्त्वेवाखण्डाभावस्य प्रतियोगिविशेषितस्वरूपानवच्छिन्नस्यापि हेतुत्वमवश्येति, तच्चिन्त्यम्, अभावस्य तद्व्यक्तित्वेन हेतुत्वापेक्षया भावहेतुत्वे लाघवाच्चैत्यान्तामग्राह्यत्वकम्। एतेन "मनसैवानुद्रष्टव्यम्" इति मनसो ब्रह्मप्रत्यक्षकरत्वमाशङ्क्य च "यन्मनसा न मनुते" इत्यनेन तन्निषेध ।

न च "यतो वाचो निवर्तन्ते" इति शब्दस्यापि तत्करणत्व निरुद्धमिति वाच्यम्, तस्य शक्तया तद्बोधकत्वनिरासमात्रतात्पर्यकत्वात्। "शक्तिमभिधत्ते श्रुतिरपि" इति न्यायात्। शक्तिं विना अभिधत्ते बोधयतीत्यर्थात्। तत्त्वोपनिषदमेव पुरुष पृच्छामि इति तत्र साधुरित्यर्थकप्रत्ययान्तोपनिषदशब्देन तदन्याकरणकत्वस्य ब्रह्मसाक्षात्कारे लाभाच्च। न च यत्मनसेत्यस्य युक्तमनोविषयकत्व कल्प्य मनस्करणत्व तज्जन्यज्ञानस्य साक्षात्कारित्वचेत्युभयकल्पनापेक्षया करणकत्वशब्दजन्यज्ञानस्य साक्षात्कारित्वमात्रकल्पने लाघवादित्यादिकमप्यपास्तम्। करणत्वस्य श्रुत्युक्तौ वा भिन्नस्यैव कल्प्यतया लाघवाभावात्। मनसोऽपि करणत्वस्य तार्किकसिद्धत्वाच्च मनसैवानुद्रष्टव्यमित्यात्मसाक्षात्कारित्वावच्छिन्नकार्यत्वप्रतियोगिकरणत्वस्यापि श्रौतत्वाच्च। औपनिषदमित्यस्य च निदिध्यासनापेक्षितबोधकतयान्यथासिद्धत्वात्। औपनिषदपदस्य "तत्र साधु-" इत्येतदर्थकप्रत्ययान्तत्वे मानाभावाच्च। उपनिषदा गृह्यत औपनिषद इत्येव व्युत्पत्तिसम्भवात् ग्रहणस्य च चक्षुषा गृह्यते चाक्षुष रूपमित्यादौ साक्षात्कारात्मकत्वेऽपि प्रकृते तादृशसमानाभावेन तदर्थत्वपर्यवसानानुपपत्ते । अत एव मन्त्रार्थानुसारेण व्यासः—

नैवाम्पेन चक्षुषा ग्राह्यो न च शिष्टैरपीन्द्रियैः।
मनसा तु प्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः॥

भारते सनत्सुजातवाक्यम्—

न दर्शने तिष्ठति रूपमस्य पश्यन्ति चैन सुविशुद्धसत्त्वा ।
स्थितो मनीषी मनसाभिपश्य त भजेयुरमृतास्ते भवन्ति॥

अभिमत्य प्राप्य साक्षात्कृत्येति यावत्। एतेन "तदेत्यादिश्रुतेः क्वापि मनस्त्वादेरुक्त शब्दत्वादनुमितेर्व्याद्व्यभिचारादनुपस्थितेः" इति चिन्तुस्वाचार्योक्तं परास्तम्।

शब्दा[व्याहार]विरहाच्छ्रुतेरर्थान्तरोदयात् ।
मनस श्रुतियुक्तिभ्यामात्मप्रत्यक्षहेतुता ॥

इति तत्र प्रत्युत्तरस्य पठनीयत्वात् । इत्यादि बहुतरमूहनीयम् । तस्माच्छ्रवणस्य शेषित्व निष्प्रमाणकमिति स्थितम् । इदमप्यत्रानुसन्धेयम्—यदपि विचाररूप श्रवण शब्दज्ञाने न करण वेदेन धर्म इव ब्रह्मणि प्रमीयमाणेऽपि विचारस्य शब्दरूपे तज्ज्ञानरूपे वा करणे इतिकर्त्तव्यतामात्रत्वादनुमाने तर्कवत् इति चेत्, न, शब्दशक्तितात्पर्यावधारण हि विचार, अवधृतिशक्तितात्पयकश्च शब्द करणम् शक्तीत्यभेदेन तात्पर्यविशेषणमवधृतिशाब्दप्रमाजननानुकूलशब्दरूपतात्पर्यक इति यावत् । अपौरुषेये वेदे पुरुषेच्छाल्पभावात् । अतो विचारस्य करणतावच्छेदकघटकत्वेन नेतिकर्त्तव्यतामानत्वम् । तदुक्त विद्यासागरेण—'अनुमितौ लिङ्गविशिष्टज्ञानवत् तात्पर्यावधारणविशिष्टशाब्दज्ञान करणम्" इति । यथाहि लिङ्गज्ञानत्वेन करणताग्राहक प्रमाण ज्ञायमानलिङ्गत्वेन ता ग्राहयति न तथैव शब्दज्ञानतात्पर्यावधारणत्वेन करणताग्राहकमवधृततात्पर्यकशब्दज्ञानत्वेऽपि विशिष्टधर्मिकमानस्य बाधकम्, विना विशेषणे विधेयग्राहकत्वनियमात् । न च ज्ञायमानलिङ्गस्यातीतादे कथमनुमितिहेतुत्वम्, कार्यव्यवहितपूर्वकाले तदसत्त्वादिति वाच्यम्, ज्ञानसम्बन्धन तदुपपत्तेरन्यत्र कृतत्वात् ।

न च तात्पयभ्रमनिरासोपक्षीणस्य तात्पर्यावधारणस्यान्यथासिद्धिरेव करणत्वबाधिकेति वाच्यम्, एव सति निराकाङ्क्षत्वादिभ्रमनिरासकत्वमात्रेणाकाङ्क्षादेरपि करणकोटिबहिर्भावापत्ति । ततश्चाकाङ्क्षादिज्ञानाभावे विपरीतव्युत्पन्नस्येव तात्पर्यज्ञानाभावे शुकादिवाक्यश्रोतुश्शाब्दबोधो वाच्यम्, स्वविशिष्टशाब्दबोधे साकाङ्क्षज्ञानत्वस्येव तात्पर्यज्ञानस्यापि हेतुत्वमन्वयव्यतिरेकबलात् । यदभावाविषयको यत्संशयव्यतिरेकनिश्चयो यत्र प्रतिबन्धकी तन्निश्चयस्तद्धेतुरनुमितो व्याप्तेरिव व्याप्तेश्चेति । न च वाक्यार्थस्यापूर्वत्वात्प्रथम प्रमाणान्तरेणानिश्चयाच्छाब्दनिश्चये सत्येव वाक्यार्थघटिततात्पर्यनिश्चयस्तत्सत्त्वे च शब्दनिश्चय इतरन्योन्याश्रय । सामान्यत पदार्थत्वरूपेण तन्नियमसम्भवात् । गां देहीत्यादावन्वयप्रयोग्यनानार्थपदे तात्पर्यज्ञानस्यैव नियामकत्वात् । तस्माद् विपरीतज्ञानोत्तरप्रत्यक्ष विषयदर्शनस्येव तात्पर्यसशयहेतुर्यस्तात्पर्यसशयस्तदवारकत्वमात्रेण तात्पर्यनिर्णयस्य शाब्दनिर्णयोपयोगित्वमिति स्वीकारात् । ततश्च न तावच्छाब्दत्वावच्छिन्ने तस्य हेतुत्व शुकादिवाक्यजन्यबोधे व्यभिचारात् । नापि स्वविशिष्टशाब्दत्वावच्छिन्ने

उक्तरीत्यान्ययासिद्धे, यत्सशयव्यतिरेकनिश्चयो यत्प्रतिबन्धको तन्निश्चय-न्तद्धेतुरिति व्याप्तेश्च प्रकृतेऽनवकाशात्। तात्पर्यसशयस्य शाब्दकारणीभूता-भावप्रतियोगित्वरूपप्रतिबन्धकतायामेव तदभ्युपगमात्। अन्यथा योग्यताज्ञान-स्यापि निश्चयत्वेन हेतुत्वापत्ते। अत एव फलज्ञानादावपि तद्व्यभिचार आकरे स्पष्ट।

न च शाब्द[तात्पर्य?]निर्णयत्वादच्छिन्नव्यापादयितुमशक्यत्वात् [मश-क्य] न च (?) निर्णयत्व मन्मते विषयितविशेष एव न तु तदभावाप्रकारकत्वे नानि तत्प्रकारकत्व येनायंवशसम्पन्न स्यात्, निर्विकल्पकस्यापि मया निर्णय-त्वाभ्युपगमादिति वाच्यम्, तथापि तात्पर्यसशयाभावस्यैव तद्धेतुत्वोपगमात्। न च लाघवात्तात्पर्यनिर्णयो हेतुत्वस्यैव कल्पयितु युक्तत्वात्। न च तथापि तात्पर्यसशयाभावसम्पादकतयैव तन्निर्णयो हेतु प्रतिबन्धप्रयोजकत्वस्यैवान प्रतिबन्धकत्वस्य वाच्यत्वादिति वाच्यम्, "ज्ञानप्रामाण्यसन्देहे सत्यर्थसन्देहे-नार्थनिश्चयादेवाप्रवृत्या प्रामाण्यसन्देहो न प्रवृत्तिप्रतिबन्धक" इति मणिका-रोक्तेः विरोधात्। न चैवमनुमितौ व्याप्तेरिवेति दृष्टान्तानुपपत्ति, व्याप्ति-सशयव्यतिरेकनिश्चयोरपि व्याप्तिनिश्चयेनान्ययासिद्धत्वात्तत्सत्वे व्याप्ति-निश्चयाभावादेवानुमित्यनुत्पत्तेरिति वाच्यम्, प्रतिबध्यत्वाभिमतनिष्ठकार्य-त्वप्रतियोगिककारणताश्रयस्यार्थनिश्चयस्य कारणमर्थसशयाभाव एव। अर्थ-सशयश्च प्रामाण्यसशयनान्तरीयक इत्यन्यदेतत्। तत्प्रतियोगित्व प्रामाण्य-सशये नास्तीत्यदोषात्। अनुमितिनिष्ठकार्यत्वनिरूपितकारणताश्रयव्याप्ति-निश्चयन्य कारण तत्सशयाभाव तत्प्रतियोगित्व च व्याप्तिसशयस्यास्ति, ग्राह्यसशयत्वेऽप्युपाधिसशयाद्धि व्याप्तिसशयस्य फलबलेन प्रतिबन्धकत्वस्वी-कारादिति स्पष्टमाकरे।

प्रकृते च प्रतिबध्यत्वाभिमतशाब्दनिर्णयनिष्ठकार्यत्वप्रतियोगिककार-णताश्रयत्व तात्पर्यसशयाभावस्यैव, उक्तयुक्ते। तत्कारणीभूताभावप्रतियो-गित्वञ्च न तात्पर्यनिर्णयन्य तात्पर्यनिर्णयाभावस्य तात्पर्यसशयाभाव-कारणत्वन्य चानुमिनि प्रति पुरुषत्वव्याप्यकरादिमत्ताज्ञानस्य हेतुत्वकल्पन-त्वन्यावश्यकतया केनाप्यनङ्गीकारादित्यास्ता विस्तर। नानार्थे विनिगमा-र्थं च पदतात्पर्यज्ञानमानमपेक्ष्यताम्, सर्वथापि वाक्यार्थतात्पर्यनिश्चयो न हेतु, विशेषदर्शनस्यैवात्रान्तरङ्गत्वात्तिविषम, तनानुमितित्वमुक्तरीत्या लाघवादिति वैषम्यात्। इदञ्च सर्ववस्तुगतिमनुसृत्योक्तम्। तात्पर्यनिर्णयस्यापेक्षायाम-प्येकवाक्यार्थबोध एव न तूपक्रमोपसहारायनेकवाक्यार्थतात्पर्य-ज्ञानस्यानेकवाक्यार्थबुद्धयपेक्षा। किन्त्वेतद्वाक्यार्थबोध कीदृक्प्रमा कीदृक् च

केनेति ज्ञानप्रामाण्यनिर्णयार्थमेव विचारस्यापेक्षा न तु शाब्दबोधोत्पत्त्यर्थं घटपदमम्पदार्थविशेष्यकस्वार्थप्रकारकबोधपरम्, न चेत्यादितात्पर्यनिर्णयस्यैव शाब्दबुद्धावुपयोगात्। अद्वैते वेदतात्पर्यमस्ति न वेत्यादिविचाररूपतात्पर्यज्ञानस्य तद्बुद्धावनपेक्षितत्वात्। अन्यथा दर्शनान्तरीयाणा तत्तद्वाक्येभ्यो विलक्षणशब्दबुद्धरनुपपत्तेन हि प्रकारताविशेष्यताविशेषत्वेन तत्तदर्थं निवेश्य यथाविध वाक्यतात्पर्यज्ञान कारणम्, तदव प्रकृते परेषामपि श्रवणपदार्थं। अस्मदादीनामपि तच्छाब्दोत्पत्त्या साक्षात्कारसिद्धयापत्ते। अतो यत्किञ्चिदवैतत्। यद्यपि तात्पर्यज्ञानस्य करणकोटिप्रवेशे वेदऽपि तात्पयभ्रमस्य बाह्यागमेऽपि तत्प्रमायाश्च सभवाच्छाब्दकरणत्वस्य दुष्टादुष्टत्वव्यवस्था न स्यादित्याशङ्क्योक्तम्—वेद कदाचित्कुत्रचित्कस्यचित्तात्पर्यभ्रमसम्भवेऽपि यथार्थतात्पर्यमस्त्येव। परागमे तु पौरुषेयतया प्रत्तारणादिमत्पुरुषप्रणीतत्वेन दुष्टत्वान्न तथेति, तदपि चिन्त्यम्, स्वरूपसत एव यथार्थतात्पर्यस्य दुष्टादुष्टव्यवस्थापकत्वमिति पर्यवसानात्। तथा च तस्य प्रमात्वप्रयोजकत्वे परेषा स्वत प्रामाण्यभङ्गापत्ते। ज्ञानसामग्रीभिन्नभावानपेक्षत्वस्यैवोत्पत्तौ स्वत प्रामाण्यपदार्थत्वात्। परत प्रामाण्यपक्षे तु तात्पर्यभ्रमकालेऽपि स्वरूपतो यथार्थतात्पयसत्त्वाच्छाब्दप्रमापत्तिरुत्तरीत्या स्यात्। अप्रमाया तस्य नापेक्षा किन्तु जन्यबोधस्य प्रामाण्याभावप्रसङ्गात्। प्रमितिजनकातिरिक्तस्य तदुभयनियामकत्वानुपपत्तेश्च तात्पर्यस्यादुष्टत्वव्यवस्थापकत्ववैयर्थ्याच्चाधिक धीमद्भिरनुसन्धेयम्। एतेन तात्पर्यावधारणस्यावघातादेरिव यागे शब्दे सन्निपत्योपकारकतयाप्यङ्गत्व मननाद्यपेक्षयेति निरस्तम्।

यत्तु करणस्वरूपे तद्गत तायां वा प्रयोजकाङ्गत्वमेव सन्निपात्याङ्गत्व देवतासग्रहाय स्वरूपेत्यभिक्रामञ्जुहोतीति विहिताभिक्रमणस्यापि कर्तुराहवनीयदेशप्राप्तिरूपसस्कारद्वारा प्रयाजहोमप्रयोजकत्वेति नाव्याप्ति। प्रोक्षणादिसग्रहाय तद्गतेत्यादि। तथा च प्रोक्षणादर्ब्राह्यादिनिष्ठातिशयाधीनकरणनिष्ठयोग्यतायामिव तात्पर्यावधारणस्यापि करणीभूतशब्दनिष्ठायामवघृततात्पयकत्वरूपयोग्यताया प्रयोजकत्वात्तन्निपात्याङ्गत्वमिति, तन्मन्त्यम्, योग्यताप्रयोजकत्व हि करणेनावान्तरव्यापारे जननीये सहकारित्व प्रोक्षणादिजन्यापूर्वाणा यागेनोत्पत्त्य पूर्वे जननीय सहकारित्वोपगमात्। अस्तु वा यागनिष्ठकारणतावच्छेदका योग्यतास्य कश्चिद्धर्मविशेष एव तत्प्रयोज्य, ययाश्रुतप्रन्यस्वारस्यानुरोधात्, इह तु शब्देन फल-

जन्यायं भवद्दीया तात्पर्यविषयगम्य प्रयोजकत्व न त्वयान्तरव्यापारं तात्पर्यभ्रमनिरासस्य शब्दजन्यत्वात्, पदार्थोपस्थितेश्च तात्पर्यावधारणानुत्पाद्यत्वात्। अन्यथाचारादुपकारकस्यापि सन्निपात्यङ्गत्वापत्तेरिति, तिष्ठतु तावत्। इतिकरणस्य शेषित्वनिरास ॥

यत्तु ज्ञानस्य न विधेयत्व कृत्यसाध्यत्वात्, न च प्रत्यक्षेक्षितसाध्य भवति "विदुषा कर्म कर्तव्य नस्मात्तत्फलवत निरवग" इत्यादि निराव, अनन्यगम्या लक्षणा ज्ञानहत्विन्द्रियसम्प्रयोगगम्यैव विधेयत्वात्। न च न विधौ पद-शब्दार्थ इति वाच्यम्, गोभि श्रीणीत मत्सरम्" इत्यत्र गौशब्दस्य पशौ लक्षणाङ्गीकारात्, तादृशनियमाभावादर्थवादानुरोधेन विधौ न लक्षणेत्यर्थस्य। न च साक्षात्कृतिसाध्यत्वस्येन्द्रियसम्प्रयोगप्रत्यभावादिन्द्रियसम्प्रयोग तु तद्विपरीतत्वेन विशेषात्। तथा हि स्वर्गेच्छास्वर्गसाधनीभूतायागादिकृतौ न कारण किन्तु यागादिविधीषा तथा च स्वविधीषाधीन कृतिसाध्यत्व कृतेः साध्यतान्यविषयतानात्पर्यविच्छेद विधेयत्वप्रयोजकम्, न च ज्ञाने साध्यत्वाभ्यविषयतया यश्चिन्प्रवर्त्तते, तस्मिन्यम्, भिन्नविषयकानुमितिसामग्रीकाले आप्तवचनादीन्द्रियसम्प्रयोगमन्तरेऽप्रत्यक्षेक्षितसाध्यत्वप्रसङ्गात्। न चेष्टापत्ति, अन्यथागवच्छेदेनापि तदनुष्ठानापत्तावाचारविरोधात्। अत एव विधाहं श्रुवदर्शनविधौ "मा यदि न पश्येत्पशुमान्येव ब्रूयाद्" इतिसूत्र श्रुवचक्षुसंयोगमात्रस्य विधेयत्वे न हि श्रुवचाक्षुषाभावेऽपि तच्चक्षुसंयोगस्य ज्ञानत्वाद्विध्यर्थनिष्पत्तौ न पश्येदित्यादेरसङ्गत्यापत्तेः। पूर्वविधेयत्वनिरूक्त्यैवदर्थत्वात्। अत एव ज्योतिष्टोमे भवेद्हि भावि "श दीर्घायुत्वाय श तनुत्वाय रायस्पोषाय" इत्यादिभंक्षणे "नृवदमत्वा देव सोम सुवना अवख्येयम्" इत्यस्य च दर्शने विनियोग, भक्षणावेक्षणयोरनुष्ठेयत्वात्। "मद्रा विभूति. केतुर्यज्ञाना वाग् जुषाणा सोमस्य तृप्यतु" इत्यस्य तु भक्षणमन्त्रस्यैववाक्यतया भक्षण एव विनियोगो न तु तृप्तौ, तृप्तेन तु निष्पादितत्वेनानुष्ठेयत्वादिति तृतीयाधिकरणे स्थितम्।

यत्तु इन्द्रियसंयोगरूपाविकरणस्य तृप्त्यादिवदनुनिर्वादितत्वाभावेनानुष्ठानया तत्प्रकाशनया तत्प्रकाशनागम्य विभज्य तद्विनियोग इति तन्त्यायः इति, तदसत्; वमनविरेकसाधनीभूतद्रव्यस्य द्रव्यसंस्कारपरिहारार्थत्वेनावदानविधेष्टत्वाद्वमनविरेकनिमित्तकप्रायश्चित्तसमाम्नानात्। अवदानसम्पाद्यत्वाभावेन सम्प्रदानपर्यन्तस्यैव भक्षणस्य तद्विधेयत्वात्। इन्द्रियसंप्रयोगमात्रेण तादृशद्रव्यसंस्कारानुपपत्तेः। विशेषविहितनृतिसाध्य-

त्वस्य ज्ञानविशेषेऽनुभवसिद्धस्य दुरपह्नवत्वात्। ज्ञानत्वावच्छेदेनैव ज्ञानत्वाभाव कल्प्यत इति, तन्न, आहार्यस्थले जानामीत्याद्यनुव्यवसायस्य सर्वसिद्धत्वात्तत्र धर्मान्तरकल्पने गौरवात्।

यत्तु इच्छाजन्यज्ञानत्वेन पराभिमते तत्तदिच्छानामेव विशिष्यावश्यके हेतुत्वे प्रमाणहेतुत्वे प्रमाणाभाव, तस्य प्रमासिद्धे। अन्यथा तत्पूर्वमिन्द्रियप्रयोगाद्यनन्तव्यक्तीना ज्ञानहेतुना कल्पने महागौरवात्। अनुमित्यादावीक्षाजन्यत्वमात्र तु प्रक्रियामात्र सिद्धे प्रतिबन्धकत्व एव गौरवेणाननुभवेन च प्रामाण्यापवादाद्विवादादिति, तदपि चिन्त्यम्; तत्र प्रामाण्याभावकल्पने गौरवेण बाधकविरहेण च प्रमात्वस्यैव कल्पयितु युक्तत्वात्। द्विविधस्य क्वचित्फलमुखत्वात्तदिच्छाया प्रमाणजन्यज्ञानविषयकत्वेन तद्व्यापारापेक्षावश्यकत्वात्तदिच्छाजन्यत्वस्य ज्ञानत्वादेर्दुर्वारत्वात्। अन्यथा पश्यामीत्याद्यनुव्यवसायानुपपत्तेरप्यप्रामाण्यस्य प्रमात्वापेक्षया गुरुशरीरत्वात्। अत एवेन्द्रियसप्रयोगादिकल्पनगौरव निरस्तम्। कुत्रचित्तेषा सिद्धत्वेनाकल्प्यत्वासमानविषयकप्रत्यक्षसामग्री नानुमित्यादाविच्छाहेतुत्वे बाधकाभावाच्च। इच्छाया उत्तेजकत्वपक्षेऽपि ज्ञानान्तरापेक्षया वैलक्षण्यसत्त्वात्। यद्यपि विज्ञाय प्रज्ञा कुर्वीतित्यत्र ज्ञानमात्रस्य प्रज्ञाशब्दार्थत्वे प्रशब्दवैयर्थ्यं प्रकृष्टज्ञानरूपयोग्यार्थादिरनुज्ञानविध्यनुपपत्ति अन्त करणरूपप्रत्ययार्थमादाय प्रकृष्टज्ञानसाधनरूपविचारार्थकत्वमेव युक्तम्। ज्ञानविध्युक्तानुपपत्त्या प्रज्ञाशब्दस्य विचारलाक्षणिकत्वमिति ग्रन्थस्त्वनुपपत्तिसत्त्वे लक्षणापि न दोष इत्यभिप्राय। पत्यवेक्षितमित्यादावपि चाक्षुपमात्रपरत्वे उपसर्गवैयर्थ्यात्तदुत्तरशुद्ध्यशुद्धिविचार एवावेक्षणपदार्थ। आलोचनात्मकविचारेऽपूर्वके क्तेर्निरूढलाक्षणिकत्वात्। विदुषा कर्म कार्यमित्यादौ तु विधेविचारेऽपि शक्त्या कर्मविचार एवार्थ। तस्मात्पश्यैनमित्यादौ तु कर्त्तव्य सर्वं विचारयेदित्युभयसिद्ध एवार्थ इति तदपि चिन्त्यम्, श्रवेक्षत इत्यत्र चाक्षुपानुरूपव्यापारस्य तिङर्थतयोक्तप्रयागस्य सुस्थत्वात् विचारस्यापि युक्तिजन्यनिर्णयात्मकज्ञानविशेषतया तस्य विधेयत्वेऽप्यस्मदिष्टसिद्धेश्च "विचार्यते परीक्षते" इति कैयटोक्तेः। रजतत्वाभावव्याप्यवत्ताज्ञानरूपाया युक्तेरिति भवद्व्याख्यानाच्च। अत एव "प्रमाकर्तृत्वेन प्रमातृत्वे तदनुकूलत्वप्रयत्नवत्त्वरूप स्वातन्त्र्य प्रमायामस्मदादीनामपि नास्ति" इति उपाध्यकृतः। सूक्ष्मशास्त्रार्थादिप्रमाया कृतिसाध्यत्वसत्त्वादिति तदभिप्रायस्य प्रमाया सर्वत्वविशेषणत्वोपसन्दानेन गम्यमानत्वात्। एतेन प्रथस्तज्ञानयोर्विधिनिषेधादर्शनमपि ज्ञानवा-

रणविषयकमेवेत्यपि निरस्तम्। ज्ञानस्यैवेष्टानिष्टसाधनत्व ज्ञानगम्यत्वात्, तत्परित्यागे मानाभावात्। अत एवेत्यादिना तदुत्पत्तिनिरोधयोरनुभव· सोऽपि करणव्यापारविषय, इत्यपि निरस्तम्। यदपि परोक्षज्ञानसन्तानरूपोनदिध्यासनस्य विधेयत्ववादिना वेदान्तिनामपि ज्ञानस्य विधेयत्वमङ्गीकार्यमन्यथा सन्तानविधानानुपपत्तेरित्याशङ्क्योक्तम्—उपनिषदमावर्त्तयेदित्यावृत्तिगुणस्यैव विधेयत्वादिति, तदपि न, एकपदोपात्तयोरुद्देश्यविधेयभावाभावेन ज्ञानोद्देशेनावृत्तेर्विधातुमशक्यत्वात्। आवृत्तिविशिष्टज्ञानस्यैवाऽवश्य विधेयत्वात्। अत एव "यस्मै देवतायै हविर्गृहीत स्याद्वा ध्यायेत् वषट् करिष्यन् सन्ध्या मनसा ध्यायेत्" इत्यादिक सङ्गच्छते।

यत्तु ध्यान ज्ञानाद्भिन्नमेवेति, तन्न, मानाभावात्। इच्छायाः ज्ञान प्रत्यपि हेतुत्वदर्शनात्। विध्यन्यथानुपपत्त्या तत्कल्पने त्वन्योन्याश्रयात्, तस्य स्वविषये व्यवहारजनकत्वानुपपत्तेश्च। यत्तु तत्कारणत्वाभिमतज्ञानान्तरेणैव तद्विषयव्यवहारगौरवस्य प्रामाणिकत्वाद्वस्तुतो ज्ञानान्यस्यापि शशविषाणादिविकल्पस्य व्यवहारादिहेतुत्वेन तत्साधारणजातिविशेषस्य ध्यानादिनिष्ठस्य तदवच्छेदकत्वानुपपत्तिरिति, तदसत्; ध्यानतृतीयक्षणे ध्यानतज्जन्यस्मृत्योश्च मध्यसमये तद्विषयव्यवहारस्य दुरुपपादत्वात्, शशविषाणादिविकल्पस्यापि ज्ञानत्वात्। नचासन्नि सन्निकर्षव्याप्तिवृत्तीनामसत्त्वेन तत्प्रत्यक्षानुमितिशाब्दानामसम्भव इति वाच्यम्; शब्दस्य तत्र वृत्तिसम्भवात्। अनेन पदेनालोक बोध्यमिति वृत्तेस्त्वयापि स्वीकाराच्च। अर्थरहितशब्दजन्यत्वाभिप्रायेण शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पातञ्जले सूत्रे विकल्पस्य पृथगभिहितत्वात्। अत एव गगनकमलस्यापि ज्ञानमयं शब्दः करोति हि खण्डनम्। यत्तु "सङ्गतिग्रहणाभावाच्छशशृङ्गादिपदानामेवोच्छेदेन" इति बौद्धाधिकारवाक्य तदप्रमापकत्वाभिप्रायम्। अन्यथा सतोऽर्थानि च वासनावशादेव तै समुल्लाच्छब्दाना सङ्केते अनिपत्ते इत्यनेनैतदिष्टस्य शशादिप्रत्येकपदार्थाव्युत्पन्नस्य शशविषाणादिपदात्तदर्थप्रत्ययप्रसङ्गादिति तद्वाक्यस्यैवानुपपत्तेश्च। अत एवाद्वैतसिद्धौ शशशृङ्गादिपदानामनर्थकत्वपक्षमवतार्योक्तम्—"न चानन्वयनिश्चयविरहदशाया प्रवृत्तिपर्यनुभवविरोध.। अनन्वयनिश्चयदशायामेवाबोधकत्वोक्तेस्तद्विरहदशायामपि नाखण्डशशशृङ्गादिबोधकत्व किन्तु सन्मात्रगोचरव्यधिकरणप्रकारकज्ञानं वा सदुपरागेणासद्गोचरज्ञान वा केवलासद्ज्ञाने सामग्रीविरहात्। तदुक्त ससर्गज्ञानादित्यादि। अत एवायंवदादिसूत्रेणैव शशविक-

लप्स्य ज्ञानत्वे तु तदन्यज्ञानविषयत्वाभाव आपाद्य इत्यपि प्रागुक्तम्। अत एवार्थवदादिसूत्रेणैव शशशृङ्गादिपदस्य प्रातिपदिकसंज्ञासिद्धौ "कृत्तद्धितसमासाश्च" इति सूत्रे समासग्रहणस्य नियमार्थत्वमिति वैयाकरणसिद्धान्तः सङ्गच्छते। अन्यथा उक्तस्थले अप्राप्तप्रमाणपदार्थतयापूर्वविधित्वापत्तेः। एवञ्च शाब्देतरज्ञानविषयत्वाभावनियताना शशशृङ्गादीना विभक्त्यर्थैकत्वादिरूपसदुपरागेणैव प्रत्यय। प्राचीनमते भ्रमस्थले पुरोवर्तिविषयोपरक्तयोरिवात्यन्ताविद्यमानयोस्तादात्म्यसंसर्गयोस्तदुक्त मणिकारैः "सदुपरक्तस्यात्यन्तासत ख्यातिरसत्ख्यातिर्नाभ्युपेयते कारणाभावाद्" इति। एतेन शशविषाणमनुभवामीति प्रत्ययाभावादित्यपि निरस्तम्। "ज्ञातता विनापि शशविषाणादिविकल्पोपपत्ते" इति लीलावतीवाक्ये शशविषाणादिविकल्पानामप्यनुभवोऽस्ति। न च तत्र लिङ्गमिति किमनुमापक स्यादित्यर्थकतयोपायकृद्भिर्व्याख्यातत्वात्। अत एव सम्बन्धिद्वयस्य सम्बन्धस्य च प्रसिद्धया तत्रैव ज्ञाततोत्पत्तिरित्याशङ्क्य तथा सत्यवस्तुविषयकत्व न स्यादित्ययुक्तम्।

यत्तु कारणे सत्यपि पुरुषेच्छान्यथाकर्तुं शक्य यत्तदेव विधेयम्, ज्ञान तु न तथा चक्षुर्घटसयोगादिसत्त्वे तदुत्पत्तेरावश्यकत्वादिति, तदप्यसत्, अन्यथाकरण हि रूपान्तरापत्तिर्वा निरोधो वा? नाद्य, घटत्यागादावप्यभावात्। नान्त्य, ज्ञानसाधारण्यात्। चक्षुर्मीलनादिना तस्यापि निरोधसम्भवात्। सामग्र्यव्यवहितोत्तरक्षणस्य कार्यव्याप्यतया कारणपदस्य सामग्र्येकदेशपरत्वस्यावश्यवाच्यत्वात्। अत एव

विन्ध्यादुत्तरतो यस्य निवासः परिकीर्त्तित।
पराशरमत तस्य सेतुबन्धन[दर्शन]म्॥

इत्यादौ ब्रह्महत्याप्रायश्चितत्वेन सेतुदर्शनविधिः सङ्गच्छते।

यत्तु नहि सेतुदर्शनमात्रस्य दुरितनाशकत्व तत्रत्यम्लेच्छानामपि दुरितनाशप्रसङ्गात्। किन्तु पर्वदपस्थानादिपूर्वकव्रतकलापविशिष्टसत्त्वतया च, छत्रपादुकादिवर्जनदोषोद्धोषणदूरदेशगामित्वभिक्षाभोजित्वादिनियमाना कृतिसाध्यत्वात्तद्विशिष्ट सेतुदर्शनमपि कृतिसाध्यमिति विशिष्टरूपेण विधानोपपत्तिरिति, तच्चिन्त्यम्, उक्तरीत्या दर्शनस्य विधाने बाधकाभावात्। अन्यथा दर्शनस्याविहितत्वेन पापक्षयाद्यनुत्पादकत्वप्रसङ्गादङ्गस्य प्रधानविधिसापेक्षविधिविधेयत्वनियमात्तत्यागाच्च पूर्वार्द्धेनैव निरासात्। अन्धकारे व्रतकलापविशिष्टेन सेतुचक्षुःसंयोगेन पापक्षयप्रसङ्गाच्चेति दिक्।

"श्रोतव्य श्रुतिवाक्येभ्य" इति वाक्यान्तरम्। तत्र च श्रुतिपद प्रमाणशब्दमात्रपरम्, अन्यथा नियमदृष्ट कल्पनापत्ते। अत सामान्यतो निर्णीतवेदमूलकत्व स्मृतीतिहासपुराणादिभ्य। श्रवणेन मननमविरुद्धमेव। एव च स्मृत्यादिना श्रुतेर्जानिमननस्य शूद्रस्याप्यपवर्गभागित्वे न दोष, सामग्रीसत्त्वात्। अत एव जगन श्रमायेति वार्तिकोक्ता यथाश्रुतव जगदुद्देशता शास्त्रप्रणेतुर्महर्षेरप्युपपद्यते। अत एव "श्रुतो हि भगवान् श्रुतिस्मृतीतिहासपुराणेभ्य' इति कुसुमाञ्जलिलिखनमपि सङ्गच्छति" इति मिश्रा। एव सति शूद्रस्यापि मोक्षाधिकारे चानधिकृतव्युत्पादनेनास्य तपोनिषे कश्चिद्दोष इति टीकाकारेविरोध। वार्त्तिक तु शूद्रादेरनधिकारेऽपि तत्तदुद्देश्यना महर्षेरस्त्येवेति टीकाकृतैवोपपादितम्। कुसुमाञ्जलिलिखनन्तु "सवादेनाप्रामाण्यशङ्कानिवृत्यर्थं स्मृत्याद्युपयोग" इति वदता प्रकाशकृतैव समर्थितम्।

किञ्च विना बाधकमदृष्टार्थकत्वकल्पना भयमानेण मुख्यार्थत्यागे स्वर्गादिपदेष्वपि तत्परित्यागापत्तिरित्यन्ये। इदञ्च नियमादृष्ट दुरितनिवृत्तिद्वारा तत्त्वज्ञान एवोपयुक्त न तु मोक्षे बीजाभावात्। "सर्वकर्माखिल पार्थ ज्ञाने परिसमाप्यते" इति स्मृतेश्च। ज्ञानपरिसमाप्तिश्च ज्ञानजन्याजनकत्वे सति ज्ञानजनकत्वम्। अत एव वेदव्याससूत्र 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववद्" इति। अस्यार्थ—तत्त्वज्ञान सर्वधर्मजन्यादृष्टापेक्षा 'विविदिषन्ति यज्ञेन" इत्यादिश्रुते "कषाये कर्मभि पक्वे ततो ज्ञान प्रवर्त्तते" इति स्मृतेश्च। यथाश्वो रथचालनादौ विनियुज्यते योग्यत्वान तु लाङ्गलकर्षणादौ, अयोग्यत्वात्तथैवात्रापीति। एतेनारादुपकारक कर्म सन्निपत्योपकारक तत्त्वज्ञानमिति किरणावलिवाक्य व्याख्यातम्। फलजनकजननोपयोगित्व ह्यारादुपकारकत्व स्वर्गजनकपरमापूर्वोत्पत्त्युपयोगिना यजादीना तथात्वदर्शनात्। तथात्वहेतुवसाक्षात्कारोत्पत्त्युपयोगिना प्रतिबन्धकापनायकाना कर्म आरादुपकारकत्व सुघटम्। नच प्रधानोत्पत्त्युपयोगित्वेन द्रव्यादिवत्सन्निपातवत्त्वमेव युक्तमिति वाच्यम्, मनस एवात्र यागस्थानीयत्वात्तस्य चोत्पत्त्यभावात्।

ननु तदपि श्रोत्रणादिवत्सन्निपातित्व स्यात्, यागेन पूर्व इव मनसा तत्त्वसाक्षात्कारे जननीये कर्मणामुपयोगादिति चेत्, सत्यम्, अत एव 'हेत्वपेक्षया सन्निकर्षविप्रकर्षौ नात्र विवक्षितौ, अपि तु फलापेक्षयेति मनसिकृत्य

तत्त्वज्ञानमेव मोक्षहेतु कर्म तु तत्प्रत्युपयोगीत्यन्यथासिद्धम्" इत्युपायकारेव्याख्यातमित्यास्तामप्रासङ्गिकम्।

इदन्त्ववधेयम्—वेदान्तिना साक्षात्कारस्य श्रवणसाध्यतया श्रवणादिनियमादृष्टस्य स्वजनकश्रवणादिसाध्यसाक्षात्कार एव कथमुपयोग, अवघातजन्यनियमादृष्टस्यावघातजन्यवैतुष्यादन्यत्रैव हेतुत्वदर्शनात्। नियमादृष्टजनकयोर्भिन्नफलकत्वनियमात्। नैयायिकाना तु साक्षात्कारस्य निदिध्यासनसाध्यत्वानुपपत्ति। यत्तु ऋत्वर्थनियमापूर्वस्य परमापूर्वसाधनत्वेऽपि पुरुषार्थहिरण्यधारणादिनियमादृष्टस्य तदभाववच्छ्रवणादिनियमापूर्वस्य श्रवणादिसाध्यसाक्षात्कारान्यफलाभावेऽपि तेनैव फलवत्त्वोपपत्तिरिति, तच्चिन्त्यम्, नियमादृष्टस्य स्वजनकसाध्यान्यफलाभावस्य तावताऽन्यनायनात्। हिरण्यधारणविधिस्त्वपूर्वविधिरेव। न च "सुवर्ण एव भवति दुर्वर्णोऽस्य भ्रातृव्यो भवति" इति सुवर्णतायाः प्रत्यसिद्धत्वात्कथ तदर्थोऽपूर्वमिति वाच्यम्, हिरण्यधारणस्य तादृशदुःखहेतुत्वे मानाभावात्, स्वधार्यमाणेनैव सुवर्णेन तदुत्पत्तेश्च। किञ्चोक्तनियमापूर्वस्य क्वोपयोग, नोक्तदुःखे धर्मस्य तन्त्राजनकत्वात्। न च तदधर्मात्मकमेव फलव्यधिकरणत्वात्, नापि वैफल्य मानाभावात्, नापि स्वर्गादावपूर्वविधित्वस्यैव युक्तत्वात्, नियमादृष्टेन फलस्य क्वाप्यजननात्।

वस्तुतो नियमविधित्वेऽप्यस्य प्रत्यवधारणफलमृतुगमनादिनियमस्तया व्युत्पत्तेरिति तत्त्वम्। इन्दश्चात्र विचारणीयम्—यन्निष्ठकार्यत्वनिरूपितकारणत्वेन यद्विधीयते तन्निष्ठकार्यत्वनिरूपितकारणान्तर नियमविधिस्थले व्यवच्छेद्यम्। व्रीहीनवहन्तीत्यादौ हि वैतुष्यसाधनत्वेनावघातविधिवैतुष्यनिष्ठकार्यत्वप्रतियोगिककारणान्तरस्य नखविदलनादेश्च व्यावृत्ति, अर्थात् विधिं विनाप्यर्थाक्षेपात्पुरोडाशनिष्पत्त्यर्थं तुषतण्डुलविभागरूपवैतुष्यसाधनत्वेन दलनादिविकल्पितावघातस्य वृत्त्या तत्साधारण्यमेव प्राप्तौ विवक्षितायां विधिवैयर्थ्यापत्त्या पाक्षिकप्राप्तिव्यवच्छेदे तात्पर्यात्। तेन च पाक्षिकप्राप्तिप्रतियोगिन साधनान्तरस्य निवृत्ति। नचेयमेव नियमफलमस्त्विति वाच्यम्; अप्राप्ताशप्रापणरूपनियमाभावे तदनुपपत्ते, तत्सत्त्वे चार्थादेव तत्सिद्धे। एवञ्च यद्विघ्यभावे प्रकृतवार्यप्रतियोगिककारणत्वेन साधनान्तरस्य प्राप्ति स्यादेव। अवघातदलनयोर्हि विजातीय स्वविशिष्ट वा विभागत्व योज्यतावच्छेदक प्रकृते च परेया निर्विकल्प-

ब्रह्मात्मैक्यसाक्षात्कारप्रतिबन्धकनिवृत्ति श्रवणस्य फलम्, तादृशफले च साधनान्तर किञ्चित्, नैव प्रसक्तमिति नियमविधित्वमनुपपन्नम्।

यत्तु वैतुष्यादौ क्रियाप्रयोजकत्वेन दलनादे प्रसक्तिरूपावच्छिन्ननिवृत्तेर्नियमफलत्वेऽवघातादेरपि तत्त्वानिवृत्त्यापत्ति अतोऽपूर्वसाधनवैतुष्येऽवघातनियमस्य विधिविषयत्वात्तादृशवैतुष्येऽवघातान्यस्यैव क्रियाप्रयोजकस्य निवृत्ति। तथा च ततत्क्रियायास्तत्क्रियाविशिष्टविभागे कारणत्वे क्रियाविशेषप्रयोजकस्य दलनादेरपूर्वीयवैतुष्ये कथ प्रसक्ति, तथापि यद्विशेषयोरिति न्यायेन कार्यमात्रवृत्तित्वेन च विभागत्वस्य क्रियाकार्यतावच्छेदकत्वावश्यकतया प्रसक्ति। तन्नियमानङ्गीकारेऽपि विध्यभावेऽपूर्वीयवैतुष्यहेतुक्रियाविशेषविशिष्टत्वसम्भवादिति, तच्चिन्त्यम्, व्यावृत्तिप्रतियोगितावच्छेदकरूपावच्छिन्नप्रसक्तेरेव नियमविध्यपेक्षितत्वात्। विभागत्वस्य क्रियात्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वेऽपि तस्य विधेयसाधारण्येन व्यावृत्ति प्रतियोगितानवच्छेदकत्वात्। एतेन "यद्वाचानभ्युदित येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेद यदिदमुपासते" इत्यादिवाक्येभ्य कथमखण्डार्थयोरिच्छासम्भावनाया साक्ष्यादिना निवृत्तिर्नास्ति किन्तु "तत्तु समन्वयात्" इत्यादिशारीरकोक्त्यायेनैव। तथा चाकर्तृत्वस्वप्रकाशत्वादिप्रकारकात्मनिश्चयसाधारणरूपविरहादस्मदभिमताकर्तृत्वाद्युपलक्षितात्मविषयकनिर्विकल्पक प्रति साङ्ख्यश्रवणादीना प्रसक्तिभावेऽपि [प्रति]पक्षा, तथापि प्रतिबन्धकनिवृत्तिद्वारोक्तप्रकारकात्मनिश्चयत्वावच्छिन्न प्रति विशेषहेतुत्वे वाच्ये यद्विशेषयोरिति न्यायेनात्मज्ञानत्वावच्छिन्न प्रत्यपि सामान्यत उक्तद्वारा साङ्ख्यश्रवणादीना हेतुत्वावश्यकत्वादुक्तसामान्यरूपावच्छिन्ने तत्प्रसक्तिरिति निरस्तम्। एतन्नियमविध्यभावे भवदभिमतजीवात्मैक्यविषयकसाक्षात्कारसाधनतया साङ्ख्यादिश्रवणस्य प्रसक्त्यभावात् तादृशप्रसक्तेरेव नियमोपयोगित्वात्। सामान्यहेतुत्व हि शास्त्रश्रवणत्व कारणतावच्छेदक वाच्यम्, तस्य च वेदान्तश्रवणसाधारणतया व्यावृत्तिप्रतियोगितानवच्छेदकत्वात्। न ह्यज्ञानत्वेन साङ्ख्यादिश्रवणत्वेन हेतुहेतुमद्भाव सम्भवति, विशेषावच्छिन्नकार्यतानिरूपितहेतुतायामेव तस्यावच्छेदकत्वात् सामान्यविशेषयोरेकधर्मावच्छिन्नकारणतानिरूपितकार्यतानवच्छेदकत्वनियमात्, अन तादृशकल्पने बीजाभावाच्च। यदपि कर्तृत्वादिधीविरोधितावच्छेदक जातिविशेषादिरूपमकर्तृत्वादिप्रकारकानुपलक्षितविषयकनिर्विकल्पकोभयसाधारण तदेव साङ्ख्यादिश्रवणादिप्रयुक्तया अकर्तृत्वाद्यशेऽसम्भावनानिवृत्तेर्जन्यतावच्छेदकमिति तत्रापि तादृशकल्पने बीजाभावाच्च। अत्र केचित्—

च्छेदकमिति नानुपपत्ति । न चैव निर्विकल्पकप्रतिबन्धकनिवृत्तौ साङ्ख्यादेरारणत्वे कथ विधिना तन्निवृत्तिरिति वाच्यम्, विधिना प्रतिबन्धकविशेषस्यापा अद्वितीयस्वरूपाद्यशेऽसभावनादेर्निवृत्तिर्वेदान्तश्रवणादिनैव कार्येति बोधनादिति, तदपि चिन्त्यम्, अद्वितीयस्वरूपाद्यशेऽसम्भवादिना निवृत्यर्थं साङ्ख्यादिश्रवणप्रसक्तेस्तथाप्यनुपपत्ते । सामान्यहेतुहेतुमद्भावे साङ्ख्यादिवेदान्तोभयसाधारणस्यैव हेतुतावच्छेदकस्य वाच्यतया तद्धर्मस्य व्यावृत्ति प्रतियोगितावच्छेदकत्वानुपपत्ते । अद्वैतस्य साङ्ख्यादिभिरनङ्गीकारेण सद्वितीयत्वादिधीविरोधितावच्छेदकस्य साधारण्यकल्पनानवकाशात् । अपि च साङ्ख्येनात्मनोऽकर्तृत्वस्वीकारादात्मनो नोपयुक्ततया तत्साधारण्य जन्यतावच्छेदक दुर्वचम्, तैरकर्तृत्वाद्यशेऽसम्भावनानिवृत्तेस्तत्त्वज्ञानहेतुत्वानवगमाच्च । तथा च न्यायादिश्रवणाना नियमैकनिवृत्तिर्न स्यात् इति न त्वदिष्टसिद्धि । सर्वसाधारणात्मतत्त्वज्ञानसाधारणस्योक्तनिवृत्तिजन्यताजनकतावच्छेदकस्य दुर्वचत्वादित्यास्ताम् ।

प्रकृतमनुसराम । जीवात्मानमुपक्रम्यैव श्रवणादिविधानात्तत्साक्षात्कारस्य मोक्षहेतुत्वमिति नैयायिका । तदुक्तमात्मतत्त्वविवेके "आत्मज्ञानतत्त्वमेव तदुपायमेवमाकर्णयन्ति न ततोऽन्यम्" इति । "नैसर्गिकमात्मतत्त्वज्ञानमतत्त्वज्ञानमेव" इति च । व्याख्यातञ्च दीधितिकृता "अपरे पुनरनादिनिधनमात्मान न्यायादिना निर्णयन्तस्तदीय तत्त्वज्ञानमेव न्यायागमाभ्या मोक्षोपायमाचक्षत इतिनैसर्गिक गौरोऽहमित्याकारकमनादिदेहाभेदवासनासमुद्भूतमात्मज्ञानमेव" इत्यादि । कुसुमाञ्जल्युपन्येऽपि "श्रोतव्यो मन्तव्यो निदिध्यासितव्य साक्षात्कर्तव्य इति श्रुतौ सामानाधिकरण्याद्यद्विषयक साक्षात्कारस्तद्विषयक मनन मोक्षहेतु, साक्षात्कारश्च न जीवात्ममात्रगोचरो न चेश्वरविषयस्तथा मिथ्याज्ञानध्वसद्वारा ह्यस्य तद्धेतुत्वम् । न च जीवात्ममात्रगोचरमीश्वरगोचर मिथ्याज्ञान ससारहेतुर्यैन तदुच्छेदस्तद्द्वार स्यात्, किन्तु स्वात्मगोचरमिथ्याज्ञानमिति, तस्य तथात्वात् । तत्साक्षात्कारो मोक्षहेतु" इति । न चात्र जीवोपक्रमे मानाभाव, "आत्मनस्तु कामाय पति प्रियो भवति" इति प्रियत्वान्वाख्यानस्य तथात्वादीश्वरात्मसन्निकर्षासम्भवेन तत्साक्षात्कारासम्भवाच्च ।

केचित्तु "मन सयोगसन्निकर्षेणाग्राह्केणेश्वरविषयकस्यापि प्रत्यक्षसम्भव "वेदाहमेत पुरुष महान्तमादित्यवर्णं तमस परस्ताद्" इतीश्वरमुपक्रम्य "तमेव विदित्वा मृत्युमेति" इति श्रुतौ तत्पदेनेश्वरस्यैव ग्रहणाच्च

जीवात्मनीतरभिन्नत्वज्ञान वासनानाशापयुक्त विरोधिज्ञानस्य सस्कार-नाशकताया प्रवृत्तत्वात्। न च मुक्तिहेतुत्वेनावश्यकादीश्वर इति ज्ञानादेव वासनानाशोऽस्तीति वाच्यम्, अतिरिक्तकार्यकारणभावकल्पनापत्ते। जीवप्रत्यक्षस्य तथात्वे तु घट शरीरादिभ्यो भिन्न इति ज्ञानस्य घट शरीराद्यभिन्न इति सस्कारनाशकत्वे कल्पनीय धर्मविशेषभन्निवेश्य शरीरा-दिनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसासर्गिकविषयतानिरूपितभेदनिष्ठ-विशेष्यतात्वप्रकारतानिरूपितविशेषणतावशेषीयससर्गतानिरूपितविशेष्यताकसस्कारनाश प्रति हेतुत्वकल्पनयैव निर्वाहात्। आत्मशरीराद्यभिन्न इति सस्कारनाशे आत्मा शरीरादिभिन्न इति ज्ञानस्य हेतुत्वान्तराकल्पनात। तर्हि मोक्षहेतुत्वमपि जीवतत्त्वज्ञानस्यैव स्याल्लाघवादितिचेत्, न, तमेवेत्यादिना ईश्वरप्रत्यक्षस्यैव मोक्षहेतुत्वप्रतिपाद नाद" इति वदन्ति। अत्राहु—अन्यपुरुषीयजीवप्रत्यक्षवारणाय विषयतया तत्पुरुषीयात्मप्रत्यक्षे तदुरुषीयात्मनस्तादात्म्यन हेतुत्वग्रौव्यात्तादृशकारणा-भावेन जीवानामीश्वरसाक्षात्कारानुपपत्ति। तादात्म्येनेश्वरात्मनोऽपि हेतुत्वकल्पने गौरवम्।

न च मोक्ष प्रतीश्वरसाक्षात्कारहेतुत्वबोधकवेदान्यथानुपपत्या गौरव प्रामाणिकमिति वाच्यम्, तमेवेत्यादिवेदस्यापि जीवपरत्वे बाधका-भावात्। "तत्त्वमसि श्वेतकेतो" इत्यादिश्रुतेस्तु जीवपरमात्मनोरभेदभावन मोक्षप्रयोजकमित्येतत्परत्वादिति। न च "तस्य महतो भूतस्य निश्वसित-मेतद्यद्ऋग्वेद" इत्यादेरीश्वरधर्मस्य जीवप्रकरणे कथ न विरुद्धत्वमिति वाच्यम्, अभेदभावनार्थत्वे सार्थक्यात्। अतएव—

आत्मान चेद्विजानीयादयमस्मीति पूरुष।
किमिच्छन् कस्य कामाय शरीरमनुसञ्चरेत्॥

इति स्वात्मज्ञानस्य प्रवृत्त्यभावद्वारा मोक्षहेतुत्व कथ न सगच्छते। भयन्तु विशेष—वेदान्तिना जीवाजीवेश्वराभेद ज्ञान धर्मेव तु तार्कि-काणा भ्रम। परन्तु श्रुतिबलान्मोक्षे हेतुरिति दीधितिकारानुयायिन।

अन्ये तु, सार्वज्ञसम्पादकयोगधर्मादनाद्यार्यभ्रमानुत्पत्ति सवासनमिथ्या-ज्ञानोच्छेदासम्भवाच्चाद्यार्यभ्रमोऽप्यत एव निरस्त। श्रवणमननिदिध्यासन-

तत्त्वज्ञानानां समानाकारकत्वप्रतीतिविरोधाच्च । शब्दानुमित्योरनाहार्यैक-स्वभावत्वात् ।

स्वर्गापवर्गयोर्द्वारमामनन्ति मनीषिण ।
मदुपास्तिमसावत्र परमात्मा निरूप्यते ॥
न्यायचर्येयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥

इति, आचार्यस्वरसाच्च । एव च कामिनोजिज्ञासाधीनकामिनी-साक्षात्कारवत्परमात्मजिज्ञासाधीनपरमात्मसाक्षात्कार स्वगतासाधारण-धर्मेण स्वमात्रविषयक , स चादृष्टद्वारा स्वात्मनि देहादिभेदलौकिकप्रत्यक्ष-हेतु । अत एव तत्पूर्वं तल्लौकिकप्रत्यक्षाभाव तदेवानादिदृढभूमिसवासन-मिथ्याज्ञानोन्मूलकम् । अत एव कुसुमाञ्जलौ "ईश्वरमनन च यद्यपि मिथ्या-ज्ञानोन्मूलनद्वारा नोपयोगि तथापि स्वात्मसाक्षात्कारायोपयुज्यते" । यदाहु "स हि तत्त्वज्ञात स्वात्मसाक्षात्कारस्योपकरोति" इत्युपायकृतः तत प्रत्यक् चेतनाधिगमोऽप्यन्तरायाभावश्चेति पातञ्जलसूत्रे "तत ईश्वरप्रणिधा-नात्" प्रत्यक्चेतनाधिगम उक्तजीवप्रत्यक्षमित्यर्थाच्च, इत्याहु ।

अपरे तु, पापविशेषो देहादिभेदलौकिकप्रत्यक्षविरोधी, तन्नाश- क्वचिदी-श्वरसाक्षात्कारात्क्वचिद्योगजधर्मकाशोमरणादिभ्यस्तन्नाशस्तत्त्वधीहेतु । अत एव "ईश्वरप्रणिधानाद्वासप्रज्ञातलाभ" इत्युक्त पातञ्जलसूत्रे । असप्रज्ञात. स्वात्ममात्रविषयिणीवृत्ति.। द्रष्टव्य इति । श्रुतावपि पापनाशकत्वमेव विध्यर्थ.। जीवपरत्वे तु मुक्तिसाधन तदर्थं । अत एव तत्त्वज्ञान मोक्षसाधन-त्वेन विधिना बोध्यते इति द्रव्यकिरणावल्यामुपायकृत इत्याहु ।

यत्तु वेदान्तिन जीवोपक्रम त्रेधा समर्थयन्ते, तथाहि ब्रह्ममीमांसायां प्रथमचतुर्थे आचार्यदर्शीयमतेन सामाधानपर सूत्र 'प्रतिज्ञासिद्धेलिङ्गस्य्या" इति । अस्यार्थं —यथा वह्नेविकारा व्युच्चरन्तो विस्फुलिङ्गा न वह्नेरत्यन्त-भिना स्वरूपेण निरूपणात्, नाप्यभिन्ना वह्नयपेक्षयैव परस्परापेक्षयापि भेदाभावप्रसङ्गात् । न चेष्टापत्ति, परस्पर व्यावृत्तत्वेन प्रतीयमानत्वात् । एव जीवात्मनोऽपि ब्रह्मविकारास्ततो नात्यन्त भिद्यन्ते चिद्रूपत्वाभाव-प्रसङ्गात् । नाप्यत्यन्तमभिन्ना परस्परव्यावृत्तिप्रसङ्गात् । सर्वज्ञ प्रत्युपदेश-वैयर्थ्याच्च । तस्मात्कथञ्चिद् भेदाभेदौ ब्रह्मणा सह जीवानामास्थेयौ । तत आत्मविज्ञाने सर्वविज्ञानप्रतिज्ञासिद्धये जीवपरमात्मनोरभेदमुपादाय परमात्मन्यपि दर्शयितव्ये जीवोपक्रम इति, आश्मरथ्य आचार्यो मन्यते ।

साप्तमेव द्वितीयसूत्रम् "उत्क्रमिष्यत एवभावादित्यौडुलोमि" इति। औडुलोमिमञ्जस्त्वाचार्य पूर्वमाह—ससारदशाया भेदश्च बलीयस्त्वात्, मुक्तौ त्वभेद एव। तथा च पाञ्चरात्रिकाः—

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावत' ॥ इति।

पूर्वमुत्क्रमिष्यते भाविमुक्त्यवच्छिन्नस्य जीवस्येश्वराभिन्नत्वात्तादृशभेदजीवोपक्रमो न विरुद्ध इति सिद्धान्तस्तु तृतीयसूत्रम् 'अवस्थितेरिति काशकृत्स्नः' इति। काशकृत्स्नसञ्ज्ञस्त्वाचार्यो मन्यते—"अनेन जीवेनात्मना स एष इह प्रविष्ट" इति च श्रुत्या ब्रह्मणश्च जीवरूपेणावस्थितेर्वस्तुत्वमेवैक्यमादाय जीवोपक्रमो न विरुद्ध इति। आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विकेऽनाद्यविद्याकल्पितो भेदस्तु तत्त्वमसीति जीवात्मनोर्ब्रह्मभावतत्त्वोपदेशश्रवणमननिदिध्यासनप्रकर्षपर्यन्त जन्मना साक्षात्कारेण विद्यया शक्यो निवर्तयितु रज्जौ सर्पभ्रम इव रज्जुतत्त्वसाक्षात्कारेण। म्लेच्छकुले वर्धमानस्य राजपुत्रस्यैव च स्वात्मन्यारोपितो म्लेच्छभावस्तत्त्व राजपुरुषोऽयमीत्याप्तोपदेशेन। न हि शरावादिमृद्विकारशतशोऽपि मृन्मृदिति चिन्त्यमानस्तज्जन्मनाममृद्भावसाक्षात्कारेण शक्यो निवर्तयितु तत्कुतो विकारस्यापि मृदो भिन्नाभिन्नस्य तात्त्विकत्वादिति।

तत्रेद वक्तव्यम्—जीवस्येश्वराभिन्नत्वे मानाभाव। तथा च प्रयोग.—जीव परमात्मनिष्ठतादात्म्याप्रतियोगी तद्वृत्तिधर्मत्वात्, घटवत्। जीव परमात्मनिष्ठानौपाधिकभेदप्रतियोगी भेदपूर्वकालीनाभावप्रतियोग्युपाधित्वात्, यो यन्निष्ठस्यानौपाधिकस्य भेदस्यासत्प्रतियोगी स तद्भेदपूर्वकालीनाभावप्रतियोग्युपाधिसहित। यथा चैत्रनिष्ठानौपाधिकभेदतत्प्रतियोगी तत्क्षणावच्छिन्नश्चैत्रस्तत्पूर्वकालीनाभावप्रतियोगितत्क्षणादिरुपोपाधिमानिति व्यतिरेकी। अविद्या हि भेदापादित्वेन त्वदभिप्रेता सा च न भेदपूर्वकालीनाभावप्रतियोगिनी, अनादित्वात्, भेदस्यापि त्वयानादित्वाभ्युपगमन तत्पूर्वकालाप्रसिद्धश्च। न च त्वन्मतेऽपि भेदस्य नित्यत्वात्तत्पूर्वकालाप्रसिद्धिरिति वाच्यम्, भेदसम्बन्धस्यापि विवक्षितत्वात्। यद्वा परमात्मजीवभेदो नौपाधिक अनादित्वात्परमात्मवत्।

ननु शुद्धचैतन्ये धर्मानधिकरणतया साध्यहत्वोरभाव, उपहिते च सिद्धसाधनम्। तदुक्तम्—

अप्रमेये तु मानस्य प्रवृत्तिर्न कथञ्चन ।
प्रमेयस्य त्वनात्मत्वात्तत्र भेदानुमेष्यते ॥ इति ।

इति चेत् मैवम् धर्मभावस्य धर्मत्वादैक्यस्यात्रापि सम्भवादैक्यानुमितिभङ्गाच्च । तच्छब्दस्याप्यसम्भवादित्यस्माभिस्तत्र पठनीयत्वात् । धर्मानधिकरणत्व हि धर्माधिकरणत्वाभावाधिकरणत्व तथा च व्याघात धर्माधिकरणत्वाभावस्यापि धर्मत्वविशेषात् । तस्यापि शुद्धे वक्तुमशक्यत्वात् । अथ तद्भावोऽधिकरणस्वरूप एवेति चेत्तर्हि अनौपाधिकत्वमनादित्व चेत्यपि . तथैवास्तु मिथ्यात्वपरप्रकाश्यत्वकालदेशवस्तुपरिच्छेदाभावरूपाणा सत्यत्वस्वप्रकाशत्वनित्यत्वविभुत्वपूर्णत्वाना "सत्य ज्ञानमनन्तम्' इत्याद्यनुरोधेन तैरपि तथाङ्गीकारात् । न च धर्माभावेऽपि तत्र नास्त्येवेति वाच्यम्, प्रतियोगिसद्भावापत्ते. तदभावानाश्रयस्य तद्वत्त्वनियमादित्यग्रे विस्तर । एव जीवब्रह्मणोरैक्यानुमितिरपि न स्यात् । जीवा परमात्मनस्तत्त्वतो न विभिद्यन्ते प्राःमत्वात्परमात्मवदित्यादिका ।

यत्तु शुद्धचैतन्यशब्दैकगम्यत्वेन तत्राननुमेयत्वमिष्टमेवेति, तन्न, उक्तानुमानवैयर्थ्यात् । न च भेदे तात्त्विकत्वभ्रमनिरासार्थमेव तदिति वाच्यम्, विकल्पासहत्वात् । तथाहि ब्रह्मणि तात्त्विकजीवभेदज्ञान प्रत्युक्तभेदाभावानुमितेस्तद्ग्राह्याभावावगाहितयावच्छेदकधर्मदर्शनविधया वा तदभावव्याप्यवत्ताज्ञानविधया वा विरोधित्व, नैकमपि युक्त, विशेष्यवृत्तित्वेन ज्ञान विनैतदन्यतमेनापि भ्रमनिवृत्तेर्दुर्घटत्वात् । उपहितवृत्तित्वे नैव तज्ज्ञानस्य चान्यविशेष्यकभ्रमनिवृत्तावसामर्थ्यात्, उपहितभेदभ्रमनिवृत्तेश्च भवताप्यनुद्देश्यत्वात् । शब्दमात्रगम्यत्व शुद्धस्येत्यध्यग्रे निराकरिष्यत एव । इत्यास्ता तावत् । उक्त भेदानुमान च न युक्तम्, परमात्मप्रतियोगिकतात्विकभेदाभावे साध्यप्रतियोग्यप्रसिद्धे । न च त्वद्वीत्यैव तदिति वाच्यम्, दृष्टान्तस्योभयसप्रतिपन्नत्वनियमात् । आगमबाधादिदोषाणा च यथोक्तवद्यमाणरीत्या दुर्वारत्वात् । न चाद्यभेदानुमाने दुःखादेरन्तःकरणधर्मत्वेन स्वरूपासिद्धिरिति वाच्यम्, अहं सुखी दुःखीत्यादिप्रत्यक्षेण तत्सिद्धे । न च 'काम सकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येत सर्वं मन एव" इति श्रुत्या तेषामन्तःकरणधर्मत्वसिद्धिरिति वाच्यम्, आयुर्घृतमित्यादिवत्कार्यनिमित्तयोरभेदोपचारेण तत्र सामानाधिकरण्यस्योपपत्ते । 'ओण्यात्मनेऽकुरुतेति मनो वाच प्राण सान्यात्मनेऽकुरुतान्यत्र मना अभूव नादर्शमन्यत्र मना अभूव नाश्रौषमिति मनसाह्येव पश्यति

मनसा शृणोति" इत्यनन्तरं "काम सकल्प" इत्यादे श्रूयमाणत्वात्। पञ्च-तीत्यादिना दर्शनाद्याश्रयत्वमात्मन्युक्त्वा करणत्वेनैव मनस उपक्रान्तत्वात्। सर्वं मन एवेत्यस्मात्तदनन्तरं तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानातीति तथैवोपसंहृतत्वात्। एतेन कुलालो घट इति सामानाधिकरण्यादर्शनान्मान तयेति चित्सुखाचार्योक्त परास्तम्। "स वायमात्मा ब्रह्म" इति जीवात्मान प्रक्रम्य "क्रोधमयोऽक्रोधमयो हर्षमय" इति श्रुतेश्च। हर्षाहर्षौ सुखदुःखेच्छा तदर्थस्य च व्याप्त्या[तत्वात्]। न च व्यावहारिकभेदमादाय सिद्धसाधनम्, तद-न्नङ्गीकारिण तार्किक प्रति तदुद्भावनस्यायोग्यत्वात्। व्यावहारिकत्वभेदस्या-सिद्धत्वाच्च तत्रैवेदानीं विवादात्। भेदसिद्धौ तात्त्विकत्वेन व्यावहारिकत्वस्य बाधकालावादनियत्वात्। न च भेदानुमानानामप्रयोजकत्वम्, आगमादेरनु-कूलतर्कत्वात्। तथा च वेदव्याससूत्रं "शारीरश्चोभयेऽपि हि भेदेनैवमधीयत" इति। मन्त्रार्थः "यः पृथिव्या तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीर य पृथिवीमन्तरो यमयत्येष आत्मान्तर्याम्यमृत" इत्यादि-वाक्ये जीवो नार्थः। हि प्रस्मादुभयकाण्वशाखिनां च जीवपरयोर्भेदेन "यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन्" इत्यादिना पठन्ति, इत्यादि। एव 'विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ" इत्याद्यपि निराहार्यम्।

दीव्यो ह्यमूर्त- पुरुष स बाह्याभ्यन्तरो ह्यजः।

अप्राणो ह्यमना शुभ्र इति जीवादक्षरात्परत पर॥ इति प्रधानाच्च भेदेन व्यपदेशात् "यकृतयोनि परिपश्यन्ति धीरा" इत्यथर्वणवाक्ये जीव-प्रधानयोर्भूतयोनित्व नार्थ इति तदर्थात्। तथैक मुण्डकोपनिषदि मन्त्रवर्णं —

द्वा सुपर्णा सयुजा सखाया समान वृक्ष परिषस्वजाते।
तयोरन्य पिप्पल स्वाद्वत्यश्नन्नन्यो अभिचाकशीति॥ इति।

प्रथमाद्विवचनस्य 'सुपा सुलुक्' इत्यादिसूत्रेण डादेश तेन द्वौ सुपर्णौ सयुजौ सखायौ इत्यर्थः। अत्र ह्यन्यपदेऽन्यपदेन तात्त्विक एव भेद उक्तः।

यत्तु बुद्धिजीवपरत्वेन प्रकृतवाक्यव्याख्यानान जीवब्रह्मभेदकत्वमे-वेति, तन्न, छुम्नाद्यायतन स्वशब्दादिति प्रथमतृतीयाधिकरणे "यस्मिन्द्यौ पृथिवी चान्तरीक्षमोत मन सह प्राणैश्च सर्वैस्तमेवैक जानथात्मानमन्या वाचो विमुञ्चथा अमृतस्यैष सेतु" इति वाक्यस्थ ब्रह्मपरत्वं सिद्धान्तयित्वा तस्य हिरण्मयजीवादिपरत्वे तत्प्रकरणे तयोरन्य पिप्पल स्वाद्वत्ति इति कर्मफलाशनमनश्नन्योऽभिचाकशीति, इत्यौदासीन्येनावस्थानच्च

निर्दिश्यते। तथा च स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञौ परिगृहीतौ तथा च यन्नाद्यायतनत्वेनेश्वरविवक्षायामेव प्रकृतस्य तस्य क्षेत्रज्ञात्पृथक् वचन युक्तम्। जीवस्य हिरण्यगर्भस्य वा तदायतनत्वे तु प्रकृत्याऽनश्नन्नन्योऽभिचाकशीतीति परमात्माभिधानमसङ्गत स्यात्।

न च जीवात्मनस्तदायतनत्वेऽपि दृष्टान्तार्थं तत्प्रतिपादनायैव ब्रह्माभिधानमिति वाच्यम्, वेदस्यानधिगतार्थबोधनस्वभावतया प्रत्यक्षसिद्धेर्जीवात्मनि तात्पर्ययोगानधिगते ब्रह्मण्येव तथात्वादिति भाष्यादावभिहितत्वेन जीवब्रह्मणोरेवात्र प्रतिपादितत्वावगमात्। अत एव "गुहा प्रविष्टावात्मानौ हि तद्दर्शनाद्' इति सूत्रे—

ऋत पिबन्तौ सुकृतस्य लोके गुहा प्रविष्टौ परमे परार्धे।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता ॥

इति कठवल्लीवाचो बुद्धिजीवौ पूर्वपक्षयित्वा विज्ञात्मपरमात्मानाविहोच्येयाता कस्मादात्मानौ हि तावुभावपि चेतनस्वभावौ, साङ्ख्यश्रवणे च समानस्वभावेष्वप्रतीतेर्लोके दृश्यते। अस्य गौर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोऽन्विष्यते नाश्व पुरुषो वा, तदिह ऋतपानेन निश्चिते ज्ञानात्मनि द्वितीयोऽन्वेषणीय। समान स्वभावश्चेतन परमात्मैव प्रतीयते इति सिद्धान्तयित्वा परमात्मन कर्मफलभोगो गुहाप्रवेशश्च कथमित्याशङ्क्य सृष्टीरुपदधातीति तद्गौणत्वेन समाहित भाष्ये। तथा भामत्या "ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता ब्रह्मणैव सरूपे न तु बुद्ध्याविरूपया प्रथम सा सद्वितीयत्वे ब्रह्मणा ब्रह्मणावगत सति गुहाशयत्व परम व्याख्येयमवरोधत" इति। ततश्च भाष्यकारैरपि 'एष एव न्यायो द्वा सुपर्णा सयुजा सखायेत्यादावपि। तत्रापि ह्यध्यात्माधिकारात प्राकृतौ सुपर्णावुच्येते। अदनलिङ्गाद्विज्ञानात्मा भवति, अनशनचेतनत्वाभ्या परमात्मा। अनन्तर च मन्त्र च तावेव द्रष्टव्यभावेन विशिनष्टि—

समाने वृक्षे पुरुषो निमग्नो अनीपया शोचति मुह्यमान।
जुष्ट यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक ॥ इति।"

अत्र च अत्तीति कर्तृत्वस्योपचारात्करणभूताया अपि बुद्धेरुक्ते एधासि पचन्तीति वदता बुद्धिजीवाविति पूर्वपक्ष। मुख्यकर्तृत्वसभवे उपचारायोगाज्जीवपरमात्मानाविति सिद्धान्त। स्यादेतत्, श्रुत्वाचिन्त्यमेवेद भाष्य तदुत्तरमेवापर आहेत्यादिनान्यथा व्यवस्थापितत्वात्। तथाहि वैङ्किरहस्य—

ब्राह्मणे श्रूयते "तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वं अनश्नन्नन्यो अभिचाकशीत्यनश्नन्नन्योऽभिपश्यति न तावेतौ सत्त्वक्षेत्रज्ञौ" इति। न च सत्त्वक्षेत्रज्ञशब्दौ जीवात्मपरमात्मपरौ इति वाच्यम्, अन्तःकरणशारीरपरतयैव प्रसिद्धे। 'तदेतन्नित्यं नैव त्वन्तं पश्यतीत्यर्थयोगं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंविदि किञ्चन रज आध्वंसत" इति श्रुत्यैव व्याख्यानाच्चेति। न चोक्तन्यायवचनविरोधे तस्याभासत्वादिति कल्पतरुकृद्भिरुक्तत्वात्। अतोऽत्र बुद्धिजीवपरत्वमेव सिद्धान्त इति।

अत्रोच्यते, अनश्नन्नित्यस्य कथं जीवपरत्वम्? यत्तु भामत्यां तस्य भोक्तृत्वेऽप्युपाधिरहितेन रूपेण ब्रह्मस्वभावस्योदासीनत्वादभोक्तृत्वादचेतनस्य च बुद्धितत्त्वव्यापारमाश्रित्य भोक्तृत्वमुक्तम्। तथा ह्येवभूतं जीवं कथयता अनेन मन्त्रवर्णेन द्युभ्वाद्यायतन ब्रह्मैव कथित भवति, उपाध्यवच्छिन्नश्च जीवः प्रतिपिद्धो भवतीति, तच्चिन्त्यम्; स्वारस्यावगतार्थत्यागे बीजाभावात्। अभेदविप्रतिपत्तिदशायामुपाधिरहितेन रूपेणोक्त्यादेरनवकाशाच्चेति। अतो भगवता निरुक्तकारेणाप्युक्तं "सुपर्णा सयुजा सखायेत्यात्मानं चेति"। "स्थितदनाभ्याञ्चेति" भूयसो वेदव्यासस्यापि तथैवाभिमतत्वात्। पैङ्गिन्याख्याने कथञ्चिदुपपत्तावपि मूलस्वारस्यस्यानैवोत्कटत्वात्। अत एव पुराणादौ द्वासुपर्णेत्यादिरीत्या जीवपरमात्मनोरेव निर्देशः। गुहां प्रविष्टावात्मानौ हीत्यनेनैव दर्शितम्—"द्वा सुपर्णेत्यस्यामूर्चि ईश्वरक्षेत्रज्ञावुच्येते" इति। तत्र भाष्यकारैरुक्तत्वादेकान्ततस्तत्र कृत्वा चिन्ताऽस्य वक्तुमशक्यत्वात्। अत एव भामत्यामपि समन्वयसूत्रे उक्तम् [तत्पिप्पलं च] स एवात्रात्मादि मान्त्यं प्रक्रम्य "तयोरन्यः पिप्पलमिति। अन्यो जीवात्मा पिप्पल कर्मफलमनश्नन्नन्य इति परमात्मा"। संहतस्य च भोक्तृत्वमाह—मन्त्रवर्णः 'आत्मेन्द्रियमनोयुक्त भोक्तेत्याहुर्मनीषिणः" इत्यादि। न च श्रुतिस्मृतिविरोधेनानेन निरुक्तादिव्याख्यानापेक्षया पैङ्ग्युपनिषद्व्याख्यानमेव बलीय इति वाच्यम्; तस्याप्येतदविरोधेन व्याख्यानसंभवात्। न च सत्त्वमन्य जीवात्मपरत्वे मानाभावः,

सत्त्वं गुणे पिशाचादौ चले द्रव्यस्वभावयोः।
शान्तमूढे व्यवसाये च चित्ते प्राणिनि जन्तुषु॥ इति।

विश्वकोषे प्राणिशब्देन जीवस्य विवक्षितत्वादन्यथा जन्तुवर्थेन पौनरुक्त्यात्। "प्राणी तु चेतनो जन्मी जन्तुर्जन्यशरीरिणः" इत्यमरोक्तेः

प्राणभृच्छब्देन जीवनिर्देशस्य वेदान्तग्रन्थेषु दर्शनाच्च। "सत्त्वशुद्धिद्वारेणारादुपकारक कर्म सन्निपत्योपकारकं तत्त्वज्ञानम्" इति किरणावलीवाक्ये "सत्त्वमात्मा तत्त्वशुद्धिश्च तत्त्वज्ञानोत्पत्तिप्रतिबन्धकनिवृत्ति" इति वर्द्धमानोक्तिदर्शनाच्च। सत्त्व आत्मेति तात्पर्यशुद्धावाचार्योक्तेश्च।

सुखी भवेय दु खी च माभूवमिति ऋध्यत ।
यैवाहमिति धी सैव सहज तत्त्वदर्शनम् ॥

इति वाक्ये सत्त्वपदेनात्मेत्ययंस्य बौद्धाधिकारशिरोमणौ दर्शनाच्च।

आत्मारामाविहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्तेकाद्विघटिततमोग्रन्थयस्तत्त्वनिष्ठा ।
य वीक्षन्ते कमपि तमसा ज्योतिषा वा परस्ताद्
त मोहान्च कथमयममु वेत्ति देव पुराणम् ॥

इति वेणीसंहारश्लोके काव्यप्रकाशटीकाकारैः केश्चित्तत्त्वपदस्यात्मपरत्वेन व्याख्यानाच्च। स्वप्नदर्शनस्यान्त करण इव जीवेतिसभवात् करणे कर्तृत्वोपचारवत्तत्रैरि करणत्वोपचारस्यापि सभवात्प्रत्युत व्याख्येयत्वेन प्रधानभूते मन्त्रे उपचारापेक्षया ज्ञानत्वेन तदङ्गभूते ब्राह्मणवाक्यस्य तदौचित्यात्। न चैवमपि शारीरपदस्य परमात्मपरत्वेन व्याख्यानमशक्यम्, शारीरे जीवात्मनि उपद्रष्टेति सप्तम्यन्त शारीरपद "लोप शाकल्यस्य" इति पक्षे लुप्तयकार व्याख्याय सप्तम्याश्च विषयत्वमर्थमाश्रित्य जीवविषयकसाक्षात्कारवत्त्वेन तत्परत्वोपपत्ते एकजीवस्यान्यजीवसाक्षात्कारासम्भवात्। स्वपरत्वे च शारीरपदेनैव तत्सिद्धौ उपद्रष्टेत्यस्य वैयर्थ्यात्। अथ शारीरपद प्रथमान्तमेवेत्याग्रहस्तथापि न क्षति, शारीरस्थायमित्यणन्तत्वोपपत्ते। स्वविषयसाक्षात्काराश्रयत्व सम्बन्ध। अथ

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।
सरूप प्रत्ययो नेष्ट,

इति वचनानैवमित्युच्यते, तथापि शारीरस्यास्तीत्यर्थं आद्यत्र सम्बन्ध उक्त एवेति बोध्यम्। एतद्व्याख्याने च निरुक्तकारादिमहर्षिग्राहकमित्यप्यधिकमवधेयम्। अत एव "द्वौ सुपर्णेसाम्यात्सुपर्णौ सयुजौ सर्वदा सहयुक्तौ सखायौ समानाख्यानौ स्वप्रकाशकत्वात्। समानमेकमुच्छेदत्वाद् वृक्ष शरीर परिष्वक्तवन्तौ एक पिप्पल कर्मफल ससारस्याश्वत्थत्वेन निरूपितत्वात्" इतिकल्पतरुकारैर्व्याख्यातम्। नहि बुद्धिजीवो सर्वदा

सहयुक्तौ बुद्धि [द्वे] सादित्वस्य तैरभ्युपगमात्। नापि समानाख्यानौ बुद्धेरचेतनत्वादिति दिक्।

अत एव द्वौ सुपर्णेत्युपक्रम द्वित्वस्याश्रयप्रतियोगिकभेदसामानाधिकरण्यनियमात्। द्वौ चन्द्रावित्यादिवद्भेदस्य कल्पितत्वे च प्रमाणाभावात्। परमसाम्यमेतीत्युपसहार। तयोरन्य अनशनन्नन्य अन्यमीशमित्यभ्यास। शास्त्रैकगम्येश्वरप्रतियोगिकभेदस्य मानान्तराप्तेरपूर्वत्व पुण्यपापे विधूयेति फलस्य महिमानमिति श्रुतिरूपोऽर्थवाद। अत्ति अनश्नन्नित्युपपत्तिरिति षड्विधतात्पर्यग्राहकलिङ्गोपेतश्रुतिगम्यत्वाद्भेदस्य तात्त्विकत्वमिति वदन्ति।

यत्तु आथर्वणे प्रथममुण्डके "कस्मिन्नु भगवो विज्ञाते सर्वमिद विज्ञात भवति" इति आङ्गिरस प्रति शौनकप्रश्नानन्तर "तस्म स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चवापरा च। तत्रापरा ऋग्वेदो यजुर्वेद सामवेदोऽथर्ववेद. शिक्षा कल्पो व्याकरण निरुक्त छन्दो ज्योतिषमिति। अथ परा या तदक्षरमधिगम्यते यत्तदद्रश्यमग्राह्यमगोत्रमवर्णमचक्षु श्रोत्रमपाणिपाद नित्य विभु सर्वगत सुसूक्ष्म तदव्यय यद्भूतयोनि परिपश्यन्ति धीरा" इत्यादिना परविद्याविषयमक्षर प्रश्नानुसारेण प्रतिपादयताभेदस्यैवोपक्रान्तत्वात्, अन्यथा तदुत्तरत्वानुपपत्ते। द्वितीयमुण्डके "पुरुष एवेद विश्वमिद वरीयुम्" इति मध्ये परामर्शात्। तृतीयमुण्डकान्ते च "परेऽव्यये सर्वमेकीभवन्ति स यो ह वै तत्परम ब्रह्मैव भवति" इत्यैक्यलक्षणफलेनोपसहाराच्च। मुण्डकत्रयात्मिकया उपनिषदैक्यपरत्वे स्थिते सप्रयुक्ते प्रकरणादिति न्यायेनाभिक्रमणादिवन्मध्यस्थितवाक्यस्यापि द्वा सुपर्णेत्यादेस्तदनुकूलत्वे सभवति, महाप्रकरणविरोधेन विपरीततात्पर्यकल्पनयाभेदोपक्रमत्वात् इति, तच्चिन्त्यम्, "कस्मिन्नु भगवो विज्ञाते" इत्यस्य "येनाश्रुत श्रुत भवति" इति छान्दोग्यवाक्येन तुल्यार्थकत्वेन व्याख्यातत्वादभेदस्योपक्रमे मानाभावात्। "पुरुष एवेदम्" इत्यादिश्च "इद सर्व यदयमात्मा" इति बृहदारण्यकवाक्यस्य वक्ष्यमाणो योऽर्थस्तत्समानार्थकत्वात्। सर्व एकीभवन्तीत्यस्य तु "आत्मेत्येवोपासीतात्र ह्येते सर्व एकीभवन्ति" इति छान्दोग्यवाक्येन भेदपरतयैव व्याख्यातत्वात्। अतश्चाभेदस्य महाप्रकरणमित्यस्यासभवदुक्तिकत्वात्। एतेनान्तर्यामिब्राह्मणे षड्विधलिङ्गोपेत वाक्य भेदप्रमाणम्। तथाहि "वेत्थनु त्व काप्य तमन्तर्यामिणम्" इत्युपक्रम। "एष त आत्मान्तर्यामी" इत्युपसहार। एष त आत्मेत्येकविंशतिकृत्वोऽभ्यास। अन्तर्यामीत्वस्याप्राप्तया पूर्वत्व "स ब्रह्म स ब्रह्मविद्" इत्यादिफल "तच्चेत्त्व

याज्ञवल्क्य मूनमविद्वांस्त चान्तर्यामिणमिमा ब्रह्मगवीरुदजसे मूर्द्धा ते विपतिष्यति" इति निन्दारूपोऽर्थवाद । "यस्य पृथिवी शरीरम्" इत्याद्युपपत्तिरित्याशङ्क्य यदुक्तम् 'आत्मेत्येवोपासीत" इति सूत्रितब्रह्मविद्यावरणरूपाया चतुरध्याय्यामनेन ह्येतत्सर्वं वेदेत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञापूर्वक "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेद ब्रह्मास्मीति तस्मात्तत्सर्वमभवद्" इत्यभेदेनोपक्रम्य षष्ठाध्यायान्ते मैत्रेयीब्राह्मणे निगमरूपे "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन क पश्येद" इत्यादिना अभेदेनैवोपसंहारादध्यायचतुष्टयस्याभेदपरत्वे स्थितम्, तदन्तर्गतब्रह्मलोकान्तरसूत्रात्मप्रतिपादनपरस्य उत्तरब्राह्मणप्रतिपाद्यनिरुपाधिकसर्वान्तरब्रह्मप्रतिपत्त्यनुकूलस्य महाप्रकरणविरोधेन तद्विरोधिभेदपरत्वाभावात् । त्वदुपन्यस्तलिङ्गाना भेदापरत्वनिर्णायकत्वेऽपि कल्पितभेदपरतयातात्त्विकभेदाविरोधित्वात् । अत एव न "शारीरश्चोभयेऽपि" इति सूत्रभा[प्य]विरोधोऽपीति, तदप्यपास्त वेदितव्यम् । "आत्मेत्येवोपासीत" इत्यादे सकलस्यापि श्रुतिसन्दर्भस्याभेदसिद्ध्यनन्तरकल्प्यतया तत्सिद्धे पूर्वमसिद्धतया तत्परत्वेन श्रुतीना सावकाशत्वायोगात्, इत्यास्तां तावत् । अत एव भगवद्गीतायाम्—

न त्वेवाह जातु नाश न त्व नेमे जनाधिपा ।
न चैव न भविष्याम सर्वे वयमत परम् ॥

अत्र पूर्वकालीनात्यन्ताभावप्रतियोगित्वस्येवोत्तरकालीनाभावप्रतियोगित्वस्यापि निषेधस्य निरवच्छिन्नविशेषणतयैव बोधितत्वात्, त्वद्रीत्याविद्यानाशेन तद्भेदनाशे तु तत्त्वज्ञानोत्पत्तिपूर्वकालावच्छिन्नविशेषणतयैवोत्तरकालीनाभावप्रतियोगित्वस्य निषेधे तद्विरोधस्यापत्तिर्दुर्वारा स्यात् । न च जीवब्रह्मणोरैक्यपक्षेऽपि ब्रह्मणस्तत्त्वज्ञानोत्तरमपि सत्त्वात्तद्रूपेण जीवस्याप्युत्तरकालीनाभावप्रतियोगित्वाभावो निरवच्छिन्नविशेषणतया सम्भवत्येवेति वाच्यम्, एकरूपावच्छेदेनैवोभयकालीनात्यन्ताभावप्रतियोगित्वाभावस्य शब्दस्वारस्येन गम्यमानत्वात्, इति दिक् ।

यत्तु विमता जीवा वस्तुतो ब्रह्मणो न भिद्यन्ते वस्तुत्वात्पूर्ववदिति, तन्न, पक्षदृष्टान्तसाधारणवस्तुत्वस्य दुर्वचत्वात् । व्यावहारिकभेदाभावसाध्याभाससाम्याच्च श्रुत्यनुग्रहस्य बहुशो निराकरणात् । एवञ्च विमता जीवाश्चैत्रात्तत्वतो न भिद्यन्ते जीवत्वाच्चैत्रवदिति जीवैक्यानुमानमपि सावद्यम् ।

अतीतानागताश्चैव यावन्त सहिता क्षणा ।

ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् ।
बहवो ज्ञापनतपसा पूता मद्भावमागता ॥

इत्याद्यागमवाधात् । अय घटस्तद्घटात्तत्त्वतो भेदहीन घटत्वात्तद्-घटवदित्याद्याभाससाम्यात् । विमतानि शरीराणि चैत्राधिष्ठितानि शरीरत्वा-न्मृतवदित्यपि न साधु, मैत्रशरीर चैत्रशरीराधिष्ठानधिष्ठित चैत्रभोगानद-च्छेदकत्वाद् घटवदिति प्रतिरोधाच्च । यदप्यात्मा स्वसमानाधिकरणा या द्रव्यत्वन्यूनवृत्तिजातिस्तदाश्रयप्रतियोगिकभेदवत् यद्यत्तदन्य स्वसमानकाली-नयावन्मूर्तसयोगित्वादाकाशवत्, साध्ये स्वभेद इति, तदप्यसत्, आत्मा उक्तभेदवान् शब्दान्यविशेषगुणवत्त्वात् पृथिव्यादिवदिति प्रतिरोधात् । यदपि सवित् सविदनुयोगिप्रतियोगिकभेद आकाशानुयोगिप्रतियोगिकभेदश्चेत्यन्यतर-भेदवत्त्वात् गगनवत् प्रतियोग्यनुयोगिस्पधर्मप्रत्यक्षव्यतिरेकप्रयुक्तव्यतिरेक-प्रतियोगिप्रत्यक्षविषयभेदकघटपटादौ व्यभिचारवारणाय भिन्नान्तमिति, तदप्यसत्; स्वभेदाभावमादाय सिद्धसाधनात् । न च सवित्वावच्छिन्नप्रति-योग्यनुयोगिताकभेद एवाभावप्रतियोगित्वेन साध्ये निवेश्य, एकधर्मावच्छिन्न-त्वानुयोगित्वयोरनङ्गीकारात् । शब्दादिरूपप्रतियोगिज्ञानन्यापि भेदप्रत्यक्ष-धीहेतुत्वेन स्वरूपासिद्धे, अस्माक सविदात्मनो भेदेन व्यधिकरणत्वाच्च । आत्मा आत्मत्वाश्रयप्रतियोगिकभेदवान् द्रव्यत्वादाकाशवत्, इति प्रतिरोधाच्च । यदप्यात्मत्व स्वप्रतियोगिकभेदवत्त्वं स्वसमानकालीनत्वञ्चेत्युभयसम्बन्धेन मत्स्वाश्रयवत्त्व तत्र समवायश्चेत्युभयसम्बन्धेन वर्तते यत्तदन्यत्, आत्मवृत्ति-त्वाच्चैत्रत्ववद्बहिरिन्द्रियग्राह्यम् । आद्योभयसम्बन्धे घटत्वाश्रयवत्त्व समवायश्चेत्युभयसम्बन्धेन वर्तते घटत्व न तु चैत्रत्व तत्तत्समवायिव्यक्ति-द्वयत्वैकदा विरहात् इति, तदप्यसत्, चैत्रत्वादेः शरीरवृत्तितया दृष्टान्तस्यैव वैफल्यात् । तथा च समानकालीनानेकावृत्तिशरीरवृत्तिजातित्व दुःखावच्छेदक-त्वासमानाधिकरणवृत्तिर्न वेति विप्रतिपत्तौ तादृशी च जातिर्बलियानभिन्न-शरीरवृत्तिरसाधारणो चैत्रत्वादिः प्रसिद्धेति कुसुमाञ्जलिप्रकाशोक्तोभय-सम्बन्धेन स्वाश्रयत्वस्य घटत्वघटयो सम्बन्धत्वे मानाभावाच्च । आत्मत्वत-द्विशेषगुणसमानाधिकरणत्वे सति प्रत्यक्षत्वात्पृथिवीत्ववत् प्रत्यक्षत्वे सति द्रव्यविभाजकोपाधित्वात्तद्वत्त्वान्मनस्त्वद्मानवृत्तिरिति प्रतिरोधाच्च । इति जीवस्य भेदानुमानम् ।

यत्तु "पादोऽस्य विश्वा भूतानि" "ममैवांशो जीवलोके जीवभूतस्स-नातन." इति श्रुतिस्मृत्योरंशत्वव्यपदेशाज्जीवे ब्रह्माभेदसिद्धिः । भूतपद

जीवपर "अहिंसन् भूतान्यत्र तीर्थेभ्य" इति प्रयोगात्, तीर्थेभ्यो यज्ञेभ्य इति, नत्र, अवयवत्वरूपांशशब्दमुख्यार्थत्वस्य बाधितत्वात्, "द्रव्यसमवायिवचनेनावयवपदेन" इति न्यायभास्करोक्ते । "ज्ञानेऽवयवाभावेनाशो विषय एव" इति मणिकारोक्तेश्च । जीवस्याभेदपक्षे कल्पितप्रदेशत्वरूपत्वस्येव भवन्मते मन्मतेऽपि तन्नियम्यत्वादिरूपस्यांशत्वस्य सम्भवात् । 'य विज्ञाने तिष्ठन् य आत्मनि तिष्ठन्" इत्यादौ भेदश्रवणाच्च । यत्तु वस्त्वेकदेशे मुख्यस्यांशशब्दस्य सतो निरंशे प्रकल्पिते प्रयोग एवात्यन्तिकभेदगर्भांतरकल्पनापेक्षया युक्त । अत एव व्याससूत्रम्-"अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" इति । अस्यार्थ —लौकिक भेदव्यवहारमपेक्ष्य जीवो ब्रह्माभिन्नत्वेन य आत्मनि तिष्ठन्नित्यादौ निर्दिष्ट । यकारस्त्वर्थ, अपिरेवार्थे । एके आथर्वणिकादयस्तु अन्यथैव लोकानवगतसप्रयोजनत्वेन तात्पर्यवन्तो ब्रह्मणि दासकितवाद्यभेदमधीयते । यथा च तेषा मन्त्रवर्णं "ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत" इति । दाशा कैवर्त्ता दासा सेवका, कितवा द्यूतकारा हीनजीवा । भेदोक्तिस्तु जीवमात्रस्य तदभेदसूचनार्था । अत एव "त्व स्त्री त्व पुमान् त्व कुमार उत वा कुमारी" इत्यादि "तत्त्वमसि" इत्यादि च श्रूयते ।

नन्वेव हस्तगतस्य शरीरसम्बन्धवज्जीवगतस्य संसारस्य ब्रह्मगतत्व स्यात्, अंशगतस्यांशिगतत्वनियमात् । न चेष्टापत्ति, नित्यमुक्तश्रुतिविरोधादित्यत्र सूत्रान्तर 'प्रकाशादिवन्नैव पर" इति । यथा सूर्यादिप्रकाशो गुल्माद्यवच्छेदेनैव ऋजुत्ववक्रत्वादि, यथा वा कर्णाद्यवच्छेदेनैवाकाशादे शब्दादिग्राहकत्वम्, एवमन्त करणरूप यदंशतावच्छेदक तदवच्छेदेनैव संसार इति, परो नैव तथाचोक्तनियमोऽसिद्ध इति, तत्रोच्यते, दासत्वादिधर्माणामात्मवृत्तित्वाभावादाथर्वणमन्त्रलिङ्गस्य जीवब्रह्माभेदपरत्वे मानाभाव, पदोदात्तरूपावच्छिन्नयोरभेदस्य तैरप्यनभ्युपगमाच्च । व्याख्यान तु पुरुष एवेद सर्वमित्यादिवद्वक्ष्यमाणरीत्या बोध्यम् । न हि तत्त्वादिभ्य पटादिरभिनो येनाभेदगर्भ एवार्थः कल्प्येत, अवयवावयविनोरभेदस्यैव प्रत्यक्षत्वात् । अंशपदस्य द्रव्यसमवायिन्येव मुख्यत्वाभिधानाच्च ।

केचित्तु, पादोऽस्येति श्रुत्यादिना शुद्धचैतन्यांशत्व जीवस्य बोध्यते उत ईश्वरांशत्वम्? नाद्य, इदंशब्देन प्रकृतसहस्रशीर्षत्वादिविशिष्टस्यैव ममैवांश इति स्मृतावीश्वरोच्चरितास्मच्छब्देन च ईश्वरस्योक्ते । नान्त्य, वेदान्तिमते ईश्वरस्याप्युपहितत्वेन जीवस्य त प्रत्यंशत्वायोगात् । न च

गृहावच्छिन्नमेवाकाश यथा पुनर्घटे नावच्छिद्यते, एवमीश्वरोपाधिनावच्छिन्नमेव चैतन्य पुनर्जीवोपाधिनावच्छिद्यत इति वाच्यम्, तथात्वे मुक्तस्य शुद्धब्रह्मत्वानुपपत्तेरिति वदन्ति ।

यत्तु सर्वनाम्ना सहस्रशीर्षत्वाद्युपलक्षितचैतन्यस्यैव परामर्शान्न दोष इति, तन्न, विशिष्टपरामर्शे वावक्याभावादन्ययाचान्योन्याश्रयात् ।

तत्र य. परमात्मा हि सन्नित्या निर्गुण स्मृत ।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥

कर्मात्मा त्वपरो भोक्ता, बन्धमोक्षैस्स युज्यते । इतिस्मृतेश्च ।

प्रकृतमनुसराम. । ननु शरीरादिव्यतिरिक्ते आत्मनि मानाभावः । तस्य च दर्शनादिक सिद्धमेवेत्याशङ्क्याह—"ब्रह्म त परादादित्याद्यात्मनोऽन्यत्रात्मानं विनात्मन्यसति" इति यावत् ताभ्य ऋतेऽन्वय इति याज्ञवल्क्यवाक्ये "ताभ्यो दुहितृभ्यो विना दुहितृणामभावेऽन्वये पुत्रादिर्गृह्णीयात्" इति विमतेश्वरव्याख्यानात् । यो ब्रह्म ब्राह्मणत्वं जाति वेद जानाति परंरपि जातिमत्त्वेनैव ब्रह्मादिपदव्याख्यानात् । अय ब्राह्मण इति ज्ञानमन्यद्देहज्ञानविलक्षणविषयकत्वे सति ब्राह्मणविषयक यो मन्यते । ब्राह्मणत्वजातिनिरनुक्ते स्वाभावे स्वविषयकज्ञानवन्त व्याघातेन यो जयति ब्राह्मणत्वजातेरदृष्टविशेषोपगृहीतशरीरवृत्तित्वाद्देहस्यैवात्मत्वेन तस्य साधारण्यात् । क्षत्रियादिव्यावृत्तब्राह्मणव्यवहारानुपपत्त्याऽदृष्टाश्रय आत्मावश्यमिति रीत्याऽङ्गीकर्तव्य. । एवं जात्यन्तरोऽपीत्याह—ब्राह्म त परादादित्यादि ।

ननु ब्राह्मणोऽयमित्याकारकानादिव्यवहारविषयपिण्डविशेषजन्यशरीरवृत्तिरेव ब्राह्मणत्वादिजातिरतो नानुपपत्तिरत आह—लोकास्तमिति । तद्व्यवहारो हि लौकिको वाच्यः । लोकाश्च प्रयोक्तार: पुरुषाः । न च तद्व्यवहारस्याविच्छेद. सम्भवति प्रलये वृद्धपरम्पराविच्छेदस्यावश्यकत्वात् । ततश्च सर्गाधिब्राह्मणादौ तद्व्यवहाराभावादव्याप्तिः स्यादतो नेयमुपपत्तिरित्यर्थः । तदुक्तमाचार्यैः उद्भिद्वृश्चिकवद्वर्णा इति । एवमिन्द्रियाणामप्यात्मत्व निरस्यति—देवास्तमिति । "देवमाख्यातमिन्द्रियम्" इति कोषदर्शनेऽपि । नैतद्देवा आप्नुवन्पूर्वमर्पदित्यनेन्द्रियपरत्वेन तद्भाष्यव्याख्यानदर्शनात् । एकेन्द्रियोप[घा]ते तदनुभूतस्यान्येन्द्रियेण स्मृत्यनुपपत्तेरित्यादि प्रागुक्तम् । ज्ञानमेवात्मेति निरस्यति—वेदान्तमिति । विद ज्ञाने भावे घञ् ।

ज्ञान पृथिव्याद्यतिरिक्तद्रव्याश्रित तदनाश्रितत्वे सति कार्यत्वात् । यत्पृथिव्याद्यतिरिक्तद्रव्याश्रित न भवति तत्तदनाश्रितत्वे सति कार्यं न भवति यथा गन्धादिरिति । केवलव्यतिरेकीतिभाव । यद्वा परमात्मसाधनार्थमाह—वेदास्तमिति । वेद पौरुषेयो वाक्यत्वाद्भारत[ति]वत् । अस्मदादेश्च तत्कर्तृत्वासम्भवात् । तत्कर्तृत्वेनेश्वरसिद्धि । 'वाक्यात्सख्यादिशेषाच्च साध्यो विश्वविदव्यय" इत्याचार्योक्त । यज्ञादानामिष्टसाधनत्वेनाप्तामिप्रायविषयत्वेनानुमेयम् । विध्यर्थंस्त्वभिप्रायमात्रम् । न च तद्दर्शी जीव सम्भवति तस्यातीन्द्रियविषयक साक्षात्कारानुपपत्ते । अतो विध्यर्थेच्छाश्रयत्वेनापीश्वरसिद्धिरित्याशयवानाह—यज्ञास्तमिति । उक्तञ्चाचार्यैः ।

विधिर्वक्तुरभिप्राय सा चेच्छातो यतश्च सा ।
तज्ज्ञानविषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥ इति ।

एव सूर्यादेना नियतक्रियावत्त्वेनापि तथेत्याह—भूतानीति । प्रागुक्तरीत्यैवार्थं । यद्वा नित्यादिक सकर्तृक कार्यत्वादित्यादौ तात्पर्यम् । अतिरिक्तसग्रहायमाह—सवतामिति । तस्मादेतद्रीत्या प्रपञ्चात्मानो अतिरिक्तावेवेति निगमयति—इद ब्रह्मेति । सदयमात्मेति साध्यसाधनयोरभेदोपचार । यद्वा इद सर्वं यद्गमनशीलमनित्यमिति यावत् । इणधातो शतृप्रत्यये "इणो यण् इति यणादेश । सर्वपद नित्यादतिरिक्तपर पूर्वोक्ताग्यतरत्वेन सकोचस्य तेनापि वाच्यत्वात् । अयमात्मेति य पूर्वं श्रोतव्यत्वादिनोक्त सोऽयमात्मा न तु शरीरादिस्वरूप इति वाच्यम् । मिश्रास्तु—"आत्मैवेद सर्वमित्यादौ सवस्यात्मा भोक्तेत्यर्थं, यथा य कामयेत राष्ट्र स्यामिति राष्ट्रस्य भोक्तेत्यर्थ, य कामयते सर्वमिद भवेयमिति सर्वस्य भोक्ताभवेयमित्यथ" इत्याहु । यद्वा इद सर्वमिति सर्वशब्दाघान्यमेवार्थं । तेनेह "तेन विश्वकर्मा और्वं ईजे तेनेष्ट्वात्यतिष्ठत्सर्वाणि भूतानीद सर्वं समभवदतिष्ठत् सर्वाणि भूतानीद सर्वं भवति य एव विद्वान् सर्वमेधेन यजते यो वै तदेवं वेद" इत्यादिवत् । अथवा यो ब्राह्मणजातीयमात्मनोऽन्यत्राधारे वेदेत्यादि व्याख्येयम् । तैरपि चिदानन्दरसाद् ब्रह्मात्मन सत्तास्वभावादन्यस्मिन् सत्त्वे विभिन्नेऽनुगते व्यावृत्ते वा ज्ञाते स्वरूपेऽस्वरूपे वा स्वातन्त्र्येण स्थित ब्रह्म ब्राह्मणत्वजाति वेद जानातीत्याधारार्थकत्वेन व्याख्यानात् । सयोगादिना ब्राह्मणादोना तत्रासत्त्वेऽपि तन्नियामकप्रयत्नविशेषाद्याश्रयत्वेन तथोक्ति । "यस्मिश्च द्यौ पृथिवी च तते" इत्यादिश्रवणात् ।

— यत्तु व्याख्यातारः अभेदपदैरेकवचनबहुवचनान्तैरप्यद्वितीयैर्विविधप्रत्ययविषयायं ब्रह्मादिसमानाधिकरणैः ब्राह्मणत्वाद्यनूद्यात्मैव विधीयते। यथाऽयं पुमान् योऽयं स्थाणुरितीदमासमानाधिकरणेन पुरुषत्वमनूद्य स्थाणुत्वं विधीयते। योजना त्वेवम्—इदं ब्रह्म यत्तच्छब्दाध्याहारेण तदयमस्मदीमाणो आत्मा चिदेकरसः। न तु ब्राह्मणत्वजातिरस्मदादेर्न चास्मिन्नपि वस्तुतः किन्तु रज्जुसर्पवत्परिकीर्तिता। एवं शेषेष्वपि क्षत्रियान्तेषु सर्वान्तेषु योज्यमिति, तच्चिन्त्यम्, बाधाया सामानाधिकरण्याश्रयणे मानाभावात्। तत्र पदद्वयस्यापि लाक्षणिकत्वापत्तेः। तदपेक्षया एकस्यैव लक्षणाया युक्तत्वात्। अथवान्यदितरादिनाद्वैतवाददूषणस्यैव व्याख्यातत्वाच्च। ब्राह्मणादीनामात्मनि सत्वस्य पूर्वशब्दादेव प्रतीतत्वेन तद्विरोधिनो वस्तुतस्तत्रापि नास्तीत्येतदर्थकल्पनस्य बाधितत्वाच्च।

यत्तु सर्वप्रपञ्चाभावोपलक्षितात्मस्वरूपबोधकेनेदं सर्वमिति वाक्येनावान्तरतात्पर्येणात्मनि सर्वभावो बाध्यते। सर्वपदस्य सर्वभावोपलक्षितार्थकत्वेऽप्यात्मपदस्य मुख्यार्थैकदेशाखण्डात्मनि लक्षकत्वान्नावादखण्डात्मन एव प्राकरणिकत्वेन तात्पर्यविषयमर्वव्याप्यादिलाक्षणिकार्थमिम्भव इति, तन्न, योऽन्यत्रात्मनो ब्रह्म वेदेत्यादिविरोधोक्तत्वात्। पृथिवीभिन्ने गन्धो नास्तीति शाब्दे पृथिवीवृत्तित्वस्यागिगन्धे निर्णयादनात्मतद्बोधाद् गन्धे पृथिवीवृत्तित्वसंशयस्यानुच्छेदप्रसङ्गात्। आत्मत्वविशिष्टशाब्दस्यात्मपदशक्तिज्ञानकालावच्छेदकत्वेन कल्पनत्वात्तद्बोधस्य केवलव्यक्तिविषयकबोधस्य लक्षणामूलकत्वाभावेऽपि विशेषणज्ञानभावस्य कल्पने गौरवाच्च। अखण्डात्मन एव प्राकरणिकत्वे च प्रमाणाभावात्पूर्वं सन्दर्भबलात्तात्पर्यविषयत्वेन निर्णीतदुक्तसामानाधिकरण्यानुरुद्धैकपदलक्षणाकल्पनापेक्षया तात्पर्यविषयकत्वेन सन्दिह्यमानसर्वव्याप्यादिलक्षणाया श्रुत्यन्तरबाधितायाश्च कल्पनस्य सुतरामेव युक्तत्वात्। "सर्वभूतमयत्वं हि न हि किञ्चित्त्वया विना" इति रामायणे लङ्काकाण्डे श्रीराम प्रति नारदोक्तौ सर्वभूतमयत्वस्य सर्वव्यापकत्वपरतयैव स्पष्टं दर्शितत्वाच्च। वह्निं विना न धूमवत्यादौ तथैव प्रत्ययाद्धूमत्वमिथ्यात्वप्रत्ययाभावाच्च। विनाशब्दस्य पूर्वोक्तरीत्यात्यन्ताभावपरतया वह्नयभावे धूमाभाव इति प्रत्ययात्। वह्नयभावव्यापकीभूताभावप्रतियोगित्वस्यैव धूमे लाभात्। अत एव भगवद्गीतायाम्—

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥

अत्र सर्वजनकत्वेन सर्वतादात्म्यस्य स्पष्ट प्रतिपादितत्वात्। व्याप कत्व पुनस्तत्रान्याद्दशमत्र च तत्सयोगित्वनियामकत्वादिकमित्यन्यदेतत्। अत एव मोक्षधर्मे भीष्म उवाच—

श्रुतोऽयमर्थो रामस्य जामदग्न्यस्य जल्पत ।
नारदस्य च देवर्षे कृष्णद्वैपायनस्य च ॥
असितो देवलस्तात वाल्मीकिश्च महातपा ।
मार्कण्डेयश्च गोविन्द कथयन्त्यद्भुत महत् ॥
केशवो भरतश्रेष्ठ भगवानीश्वर प्रभु ।
वायुर्ज्योतिस्तथा चापः ख च गा चान्वकल्पयत् ॥

इत्यादिना सर्वहेतुत्वमुक्तम्। तथा च सर्वस्रष्टृत्वव्यापकत्वज्ञातृत्वादिना सर्वत्वमिति स्पष्टम्। अत एव सर्वसंहारकत्वेनापि तज्ज्ञेयम्। तथा च मोक्षधर्मे याज्ञवल्क्यजनकसंवादे—

अथ ग्रसत्यन्ततो हि महात्मा विश्वमीश्वर ।
तत समभवत्सर्वमक्षयाव्रणमव्ययम्।

इत्येकवाक्यतया तथोक्तार्थलाभात्। अत एव दानधर्मे भीष्मवाक्यम्—

अप सृष्ट्वा सर्वभूतात्मयोनि पुराकरोत्सर्वमेवाथ विश्वम्।
ऋतूनन्यान् विविधान्यद्भुतानि मेघाद्या विद्युत्सर्वमैरावतञ्च ॥
सर्वं कृष्णात्स्थावर जङ्गमञ्च विश्वात्मान विष्णुमेन प्रतीहि।
ततो [देवान] सुरान्मानवाश्च लोकानृषीश्चापि पितृनजाश्च ॥
समासेन विधिवत्प्राणिलोकान् सर्वान् सदा भूतपति सिसृक्षु ।
यद वर्तते यच्च भविष्यतीह सर्वमेतत्केशवात्त्व प्रतीहि ॥
मृत्युश्चैव प्राणिनामन्तकाले साक्षात्कृष्ण शाश्वतो धर्मबाहु ।
भूतञ्च यच्चेह न विप्र किञ्चिद्विष्वक्सेनात्सर्वमेतत्प्रतीहि ॥

यत्प्रशस्तञ्च लोकेषु पुण्य यच्च शुभाशुभम्।
तत्सर्वं केशवो चिन्त्यो विपरीतमत परम् ॥

अत्र सर्वस्रष्टृत्वादिना सर्वत्वमित्यस्य स्फुटतर प्रोक्तत्वात्। अत एव "कुतश्चाह कुतश्च त्वम्" इति प्रश्नोत्तरत्वेनावतार्य "वासुदेव सर्वम्" इति वाष्णेयाध्यात्मे "वासुदेवात्सर्वमुत्पन्नमिति" विद्यासागरव्याख्यानम्।

असतश्च सतश्चैव सर्वस्य प्रभवाप्यय ।
सर्वस्य च सदाज्ञानात्सर्वमेत प्रचक्षते ॥
पुरुष एवेद सर्व भूत भव्य भवच्च यत् ।
इत्युच्यते तदीयत्वान्नतु सर्वस्वरूपत ॥
सर्व समाप्नोसि ततोऽसि सर्व ।

इति स्पष्टमेव भारते तद्विरुद्धार्थकत्वेन व्याख्यानाच्च । अस्यार्थ — असत कार्यस्य सत. कारणस्य सर्वस्योत्पत्तिविनाशहेतु ।

नन्वेतावतापि नित्याना कारणाना बहिर्भावापत्ति, तेषामपि सर्वपदेन सङ्कोच विना सगृहीतत्वात् । अत आह—सर्वस्य चेति । तथा च तदशे ज्ञापकत्वादेवाशान्तरे चोत्पत्तिविनाशहेतुत्वात्सर्वमित्युच्यते । अत एव—

यतो द्रव्य गुणा कर्म तथा जाति परापरा ।
विशेषा समवायो वा तमीश्वरमुपास्महे ॥

इति किरणावलीवाक्ये "उत्पत्तिजन्तिहेतुहेतुत्व यथायोग नित्यानित्यानामश्र" इति उपाध्यकारा । श्रीनारायणसर्वज्ञास्तु उद्योगपर्वटीकायाम् "असतोऽनित्यस्य प्रभवो जनन नित्यस्याप्यय अप्ययते आप्नोतीति व्युत्पत्त्या सदसच्च सर्वपदेनोच्यते, अतस्तच्छब्दस्तत्प्रभवाप्ययहेतावुपचारात्प्रवर्तते । एव सर्वस्य ज्ञानादित्यत्रापि निमित्ते उपचार." इति व्याचख्यु । पुरुष एवेद सर्वमिति । "आत्मैवेद सर्वम्" "इद सर्व यदयमात्मा" "ब्रह्मैवेद सर्वम्' इत्यादीनामप्युपलक्षणम्, तदीयत्वादिति । व्यापकत्वाद्भोक्तृत्वादि योग्यसम्बन्धमात्रपरिग्रह्यमिति स्पष्टयति—नत्विति । तथा च सर्वात्मकत्वादिकनोक्तश्रुत्यर्थ इत्यत्रोक्तस्मृतिरेव प्रमाणमिति न काप्यनुपपत्ति । मत्तु व्याचक्षते सर्वं ब्रह्मण स्वमसाधारण निरुपममित्यर्थमादाय तत्सर्वमिति नोच्यते, किन्तु स्वदीयत्वात्सर्वं ब्रह्मसम्बन्धात् सम्बन्धश्चासत इत्यादिश्लोके विशिष्योक्त । प्रभवाप्ययथोर्भासकताया च नियामक तादात्म्यसम्बन्धमित्यर्थ । तथा च चिज्जडतादात्म्यानुपपत्तिदृग्दृश्यसम्बन्धोऽनुपपत्त्यादिन्यायैराध्यासिकत्वेनाध्यासे बाधाया वा सामानाधिकरण्य न त्वभेदे, इत्यत्र तात्पर्यम् । "एतावदरे खल्वमृतत्वम्" इति वाक्यशेषाद् "इद सर्व यदयमात्मा" इत्यादेरखण्डप्रकरणस्थस्य बाधायामेव सगुणोपासनाप्रकरणस्थस्य "सर्वं खल्विद ब्रह्म" इत्यादेरध्यासेऽपि सामानाधिकरण्यसम्भवे नाविरोधात् । "सर्वं त परादाद्" इत्यत्रान्यत्रेत्यस्यान्यदित्यर्थकत्वात् ।

यथा श्रुतार्थत्वेऽप्यात्मनि सर्वगध्यस्तमित्यर्थपर्यवसानादिति, तच्चिन्त्यम्, उपक्रमन्यायेनात्मवृत्तित्वस्य यथोक्तस्यैव प्रपञ्चे प्राबल्यात्। यत्र वान्यदिव स्यादित्यादेरुपसंहारस्याप्यङ्गे तदूषणपरत्वात्। मध्येऽपि तदनुगुणस्यैवार्थस्य न्याय्यत्वात्। अन्यत्र पदस्यान्यदित्यर्थकत्वे मानाभावात्। त[द्व्याख्यान]-विसंवादाच्च।

नान्य प्रतिबलो लोके तवार्जुन भविष्यति।
अन्यत्र भीष्माद्भीष्माद् ॥

इत्यादौ प्रथमान्तान्यशब्दसमानार्थकत्वेऽपि ह्रस्वनन्यत्र तीर्थेभ्य कारणत्वश्चान्यत्र पारिमाण्डल्यादिभ्य इत्यादौ सप्तम्यन्तत्वस्यौत्सर्गिकत्वात्। उक्तस्थले प्रथमासमानार्थकत्वस्यागतिकगतित्वाच्च। "न कर्म कुर्याद्विदित ममैतदन्यत्र युद्धाद्बहु यल्लभेय।" इति उद्योगपर्ववाक्येऽन्यत्र युद्धादन्यत् प्रथमार्थे सप्तमीति व्याख्यातत्वात्। 'गुदवद्गुरुपुत्रे यतितव्यमन्यत्रोच्छिष्ट-भोजनात् पादोपसंग्रहणाच्च" इत्यत्र विनाशब्दसमानार्थकत्वात्। आत्मनि सर्वमध्यस्तमित्यर्थपर्यवसानमूलम्य सम्बन्धान्तरास्तमयस्यासिद्धेश्च। स्मृति-व्याख्यानगम्ययुक्त सर्वज्ञानादेव सर्वत्वमुच्यत इत्यर्थस्य स्पष्टतरत्वात्। भासकत्वादौ नियामकतादात्म्यमिति शेष दत्त्वा व्याख्यानस्य निर्बीजत्वात् शब्दास्तस्यानवगमात् कल्पकस्य चासिद्धत्वात्, प्रत्युत सर्वस्मादपि स्वरूपतोऽ-भेदबोधकाकाङ्क्षाघटितपदद्वयगम्यात्सम्बन्धादिति वाधाध्यासयो सामाना-धिकरण्यस्यापि न्यावृत्ताबेव तात्पर्यात्। सर्वं ब्रह्मण स्वमसाधारणरूपमि-त्यर्थकस्य केनचिद्वादिनाशङ्कितत्वेन तद्व्यावृत्तौ तात्पर्ययोगाच्चेति दिक्।

यदपि समयेत्यादेर्व्याख्यान भामत्यां 'यत्खलु यदग्रह विना न शक्यते ग्रहीतु ततो न व्यतिरिच्यते, यथा रजत शुक्तिकाया भुजङ्गो वा रज्जो दुन्दुभ्यादिशब्दसामान्याद्वा तच्छब्दभेदा न गृह्यन्ते। क्वचिद्रूप-ग्रहण विना स्थितिकाल नामरूपाणि तस्मान्न चिदात्मनोऽभिद्यन्ते। तदिद मुक्तम्—यथादुन्दुभेर्हन्यमानस्येति। दुन्दुभिशब्देन तद्गत सामान्यमुप-लक्षयतीत्यादि। यच्च सूत्रमुक्तावल्या बाह्यान् दुन्दुभिशब्दविशेषरूपान् न शक्नुयादिति दुन्दुभिशब्दस्य सामान्यस्याभावेन यथा तद्गतविशेषाणा न ग्रहणमेव ब्रह्मरूपस्य सत्सामान्यस्य ग्रहणे तद्गतविशेषरूपस्या (अवस्या?) पीति स तत्र कल्पित इति दुन्दुभिवाक्यार्थे" इति। यच्च बृहदारण्यकव्याख्याने मया शब्दत्वेनानुस्यूतभेरीशङ्खवीणाशब्दा विजातीये शब्दान्तरे सत्यपि केषाञ्चिदनादरे विजातीयशब्दतिरस्कारेण

समानीयशब्दग्रहणादस्वद्भिरपि भेरीशब्दविशेषा वीणाशब्दविशेषा अपास्य भेरीशब्दसामान्य शङ्खशब्दसामान्य ग्रहीतुमशक्या तानि वा शब्दत्वमपास्य ग्रहीतुमशक्यानि तथा ब्रह्मसत्त्वानुस्यूता अव्याकृतहिरण्यगर्भं विराजन्तत्कारितेन नयग्रहणमन्तरेण तानि तत्रय वात्मसत्त्वग्रहणमन्तरेण न गृह्यन्त इति दृष्टान्तनयस्यार्थ इति तात्पर्यसंग्रहकथनम्, तत्सर्वं चिन्त्यम्, प्रतिज्ञाया एकोक्तरीत्या प्रपञ्चमिथ्यात्वपरत्वासिद्धे । पूर्वमेव स्वेच्छया शब्दान्परिक्षिप्य स्वाभिमतार्थपरत्वमभिधाय दृष्टान्तेऽपि लक्षणाव्याहारादिना तत्परत्वमित्यस्य वक्तुमशक्यत्वात् । तस्माच्छ्रुतिशब्दन्वारस्यादर्थस्य विचार्यमाणत्व स्वपदप्रक्षेपात्तत्कदर्थन व्यर्थमत्यर्थमपि च प्रारिप्सु वचनयु विचारकाले पदान्तरैरनवगीतपदान्वयेषु निक्षिप्य शेषमपि तत्प्रतिकूलमर्थमानीय तत्र रनिरस्यतिचाहसिक्यम् । यत्तु यद्धि यन विना न शक्यते ग्रहीतु तत्तदभिन्नमिति, तदसत्, सहोपलम्भनियमोऽन्य "नामाव उपलब्धे" इत्यादि सूत्र एव निरस्तत्वात् । नामरूपाणा विद्यमत्रह्मावीनयहत्वस्यासिद्धेश्च ।

किञ्च दुन्दुभित्वावच्छिन्नजनकत्वप्रयोजकत्वप्रतियोगिकजन्यतावच्छेदकवैजात्यविशिष्टशब्दग्रहे न हेतु, निर्विशेष न सामान्यसामान्यमिति न्यायेन व्याप्यधर्मावच्छिन्नशब्दाविषयकव्यापकीभूतधर्मावच्छिन्नशब्दमानविषयकप्रत्यक्षस्याप्रसिद्धे । न च व्याप्यजात्यवच्छिन्नशब्दस्य व्यापकजात्यविषयकप्रत्यक्षाविषयत्वमित्येव दृष्टान्तार्थो न तु हेतुहेतुमद्भावेऽपीति वाच्यम्, दुन्दुभेस्तु ग्रहणेति तृतीयार्थपरित्यागापत्ते दुन्दुभिशब्दस्य दुन्दुभिसामान्यलक्षणापत्तेश्च । ब्रह्मैव सर्वानुस्यूतसत्त्वात्मकमित्यत्र निराकरिष्यत इत्यास्ता तावत् । तस्मादयमर्थ ज्ञानादीना शरीरगुणत्वाभाव उक्तस्तत्रैवोपपत्तिमाह— स यथेति । बाह्यान् दुन्दुभिशब्दभिन्नान् शब्दान् हन्यमानस्य दुन्दुभे समवेतत्वसम्बन्धेन ग्रहणाय ज्ञान कर्तुं न शक्नुयात् । शब्दो न स्पर्शवद्विशेषगुण अयावद्द्रव्यभावित्वादिति दुन्दुभिगुणत्व शब्दस्य न तु वक्तु शक्यम्, दुन्दुभिसमवेतनाश प्रति दुन्दुभिनाशकालीनदुन्दुभिसमवेतनाशत्वमेव तत्तानाश्य कार्यतावच्छेदकम्। अतस्तत्सत्त्वेऽपि शब्दनाशो नानुदयन तस्य दुन्दुभिसमानकालीनत्वाभावादित्यादिक कल्प्यते । तथापि शब्दत्वादिशब्दे शब्दत्वादेस्समवायित्व कल्प्यमिति गौरव स्यादत शब्दसमवायित्वेनाकाश एवाभ्युपगमात्, इति दृष्टान्तार्थं । दुन्दुभेरेव शब्दमात्रे समवायिकारणत्व कुता न स्यादत आह—दुन्दुभेस्त्विति । ग्रहणेन शब्दसम-

वायित्वनिश्चयेन दुन्दुभ्य[व]घातस्य जन्यत्वेन सम्बन्धो शब्दस्य गृहीतो न तु शब्दादिजन्य, तत्र तादात्म्येन दुन्दुभेरभावात्। अतस्तत्तदनन्तद्रव्याणा तादात्म्येन शब्दहेतुकल्पने गौरवप्रसङ्ग इति भाव। एव शङ्खवीणावा क्ययोरपि योज्यम्। वाकार एवकारार्थकत्वादवधारणार्थं।

वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये।

इति कोषदर्शनात्। एव देहादीनामनन्तानामित्यात्मत्वकल्पनम[ना]पेक्षातिरिक्तस्वीकार एव युक्त। एव क्षित्यादेरपि कर्तृसिद्धौ पूर्वसर्गसिद्धानातत्सर्गकर्तृत्वे गौरवातिरिक्त एव सवत्र कर्तेति यथायोगमूह्यम्।

नाध्याहार क्वचिच्च लक्षणा कुत्रचिच्छन्दे।
अत्रैव व्याख्याने रुचिरुचिता तद्विपश्चिता प्रचिता॥

एवच्च दुन्दुभ्यादीना निमित्तहेतुत्वेऽपि जीवस्य स्वकार्यज्ञानादौ समवायित्वस्वीकारादीश्वरस्यापि स्वकार्ये उपादानत्वशङ्का स्यादतस्तन्निवृत्यर्थमाह—स यथेति। आर्द्राणि एधानि काष्ठानि यस्य 'एधान् हुताशमनयत' इत्यादिप्रयोगादकारान्तोऽप्येधशब्द। तादृशस्याग्नेरभ्याहितस्येति सवत स्थितादिति परव्याख्यानात्। छान्दसो व्यत्यय। पृथग्धूमा कृष्णकपिलह्रस्वदीर्घादिभेदभिना इति व्याख्यातार। वस्तुत पृथक्त्वमग्निप्रतियोगिकत्वेन तदुपस्थितेरन्तरङ्गत्वात्। तेनोपादानोपादेयभावशङ्काप्रसञ्जकतादात्म्यव्यावृत्ति। अत एवात्र विस्फुलिङ्गाना नोपादान तेषा कथञ्चिदभेदशङ्काघायकत्वात्। तेन सजातीयाश्चाग्ने कणा पूर्वोक्ता विनिश्चरन्ति विविध निगच्छत्युत्पद्यन्ते इति परकोय तत्प्रक्षेपवर्णन हेयम्। आर्द्रेन्धनप्रभवविह्नित्व धूमकारणतावच्छेदकमिति पक्षे यथाश्रुतमवेद सम्यक आर्द्रेन्धनत्वमेव तथेति पक्षेऽप्यार्द्रेन्धनप्रभवविह्नत्व एव धूमोपधायकत्वादिति बोध्यम्। एव व एव अरे मैत्रेयि अस्य प्रमाणसिद्धत्वेन सशयाविषयतया प्रत्यक्षतुल्यस्य महतो नित्यज्ञानादिमत्त्वेन विभुत्वेन च अत एव भूतस्य सत्यस्य नि श्वसित नि श्वासवत्पुरुषकल्पनामूलकत्वाभावात्। एतद् वक्ष्यमाण यदि व्यत्यय वक्ष्यमाणेषु तत्तल्लिङ्गेषु तत्तल्लिङ्गानुसारेण सम्बध्यते।

ऋग्वेद पादवद्ध 'तेषामृग्यत्राथवशेन पादव्यवस्था' इति जैमिनीयोक्ते। यजुर्वेदोऽविवच्छन्दा शेषे यजु शब्द" इति जैमिनीयात्। ऋक्सामभिन्नमन्त्रत्व यजुषमित्यर्थ। सामवेदो गीतिसहित 'गीतेषु समाख्यान्ति" इति जैमिनीयसूत्रात्। अथर्वाङ्गिरसो ब्राह्मणादुद्धता मन्त्रा इति चतुर्विधा मन्त्रा। ते च, वेदपदमपि ऋगादिमात्रपर बोध्यमिति तासा 'इमवाला-

किहानूचानो गार्ग्यं" इत्यादि सवादकथन पुराणम् "आत्मैवेदमग्र आसीद्" इत्यादिवमुक्त्यादेर्विधान विद्या उपा वा इत्याद्या उपनिषदः "सत्यस्य सत्यम्" इत्याद्याः। श्लोका ब्राह्मण्या मन्त्राः "तदेष श्लोको भवति" इत्यादौ निदिष्टा "यत्रास्तादेति सूर्यः" इत्याद्या। सूत्राणि "आत्मेत्येवोपासीत" इत्यादीनि। अनुव्याख्यानानि "अर्वाग्विलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर" इत्यादीनि। "स एष इह प्रविष्ट इत्याद्या अर्थवादा। इत्यष्टविधं ब्राह्मणमुक्तम्। 'दत्तदानमिष्टम्" इति काण्डशेषाम्नातमिष्ट यागादिकम्, हुत मन्त्रपूतमग्नौ प्रक्षिप्तं द्रव्यम्, आशित ब्राह्मणादेरशनं कारितम्, पायितं तृषार्तस्य पानं कारितम्। अयञ्च लोक एव जन्मापि परश्च लोकः जन्मान्तरमपि सर्वाणि च भूतानि निखिलानि स्थावरजङ्गमान्यपि। चकारत्रयमुक्तानुक्तसमुच्चयार्थम् 'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत" इत्यादिकमत्रानुसन्धेयम्। प्रतिनियतविषयकत्वादपीन्द्रियाणां नात्मत्वमित्याशयेनाह—स यथेति। एकमयनमाश्रयः। सर्वपदं बाहुल्यपरं तेन केषाञ्चिज्जलानामन्यत्र नाशेऽपि न क्षतिः। सर्वशरीरव्यापकत्वेन प्रथमं त्वगिन्द्रियस्योक्तिः। एषायनत्व तत्साक्षात्कारसाधारणकारणत्वात्। ब्राह्मणमनसश्चक्षुरादीनां क्रमेणैवोपादान नासिके क्षेपणवा हित्वं जिह्वापदमप्यविघ्नपरं सर्वपद योग्यतद्विषयपरं तेनानुद्भूतस्पर्शादीना प्रथमशब्दस्य चेन्द्रियाग्राह्यत्वेऽपि न क्षतिः। इन्द्रियग्राह्यवृत्तिगुणत्वव्याप्यवृत्तिजातिमत्त्वं वा विवक्षणीयम्। अन्तःकरणस्य मनसो नित्यत्वे ज्ञानमात्रहेतुत्वे च सत्यपि बहिरवें स्वातन्त्र्याभावान्नात्मत्वमित्यभिप्रायेण तस्याभ्यन्तरमात्मविषयकत्वमाह—सर्वेषा सकल्पानामिति। ज्ञानमुत्पद्यमेच्छादीनामित्यर्थः। एव च त्व मनोयोगस्य ज्ञानमात्रहेतुत्वादाद्यन्तयोस्त्वङ्मनसोरन्तिमध्ये चतुर्णां घ्राणादीनामिति बोध्यम्। एव प्रत्यक्षेन्द्रियाणामनात्मत्वमुक्त्वानुमित्यादिज्ञानाधीनत्वमाह—सर्वेषां वेदानामिति। सर्वपदमनुमित्युपमितिशाब्दपरम्, वेदाद ज्ञानपरम् हृदयपदमपि लक्षणया व्याप्तिज्ञानादतिदेशवाक्यार्थज्ञानपरम्, हृदयपदस्य बुद्धिपरत्वेऽपि लक्षणाया एव परंरभ्युपगम्यत्वात्। अवच्छेदकतासम्बन्धेन शरीरव्यापि ज्ञानहेतुत्वात्तदवयवाना कर्मेन्द्रियत्वेन परप्रसिद्धानां शरीरस्थितिहेतुभूतत्वात्। तद् व्यापारमप्याह—सर्वेषा कर्मणामित्यादिना। कर्मणामादानादीनामव्यानाख्यानां गमनानां विद्यानां शब्दाना चामनदुच्चारणहेतवो जिह्वायाः। एवञ्चैतत्सम्बन्धेनैव जीवात्मनि विशेषगुणोत्पत्तिर्न स्वतन्त्रेति तात्पर्यम्। अत एवैतद्व्यतिरेकेण मुक्तिदशायामा चाद्युपादेरनुत्पत्तिरिति यद्वं-

तन्न पश्यतीत्यादिना वक्ष्यति, तच्च प्रागेव व्याख्यातम्। साम्प्रत मुक्तौ ज्ञानाद्यभाव वक्तु तदानीमात्मन इन्द्रियसम्बन्धाभाव प्रतिपादयति—स यथेति। सैन्धवघन सैधवस्य कठिन पिण्ड, अनन्तराऽबाह्य इत्यस्य लवण-रसबहिरन्तरावयवशून्यत्वमर्थ। अत एवाह—कृत्स्नो रसघन एव स्यादिति। सर्वेषामेव तदवयवाना लवणरससमवायित्वादित्यर्थ। एव वै एकमेव अरे मैत्रेयि अयमात्मैव अनन्तरोऽबधिशून्य पूर्वापरावधिराहित्यात्। अस्य परमा वादिसाधारण्यादाह-अबाह्य इति। न विद्यते बाह्य सयोगविहित यस्येति विभुत्व दर्शितम्। तदेवाह—कृत्स्न इति। अस्याप्याकाशादिसाधा-रण्यादाह—प्रज्ञानघन एवेति। ज्ञानसामर्थ्येन ज्ञानघन इत्यर्थ। व्याख्यात-मन्यत्। तस्मात्सिद्ध मुक्तौ सामग्र्यभावेन जीवस्य ज्ञानादिमावद्विशेषगुण-राहित्य श्रुत्यर्थ इति। अत एव मोक्षधर्मे—

विज्ञानानुगत ज्ञानमज्ञानेनापकृष्यते।
पृथक्त्वासप्रयोगाच्च नाशपूर्वादशाश्वतम्॥ इति।

एतद् विमलबोधेन व्याख्यातम्—'मुक्तिदशाया ज्ञानमस्ति नास्तीति वा विचार्यते। विज्ञान शास्त्रपरिचय ध्यानाशनादिशिल्पपरिचयश्च तेनानु-गत हेतुमद्भावेन सम्बद्ध ज्ञानमात्मतत्त्वज्ञान तदनेनाविद्याविच्छेदेनापकृष्यते। तत्राह—पृथक्त्वानाशपूर्वासप्रयोगाच्च विषयेन्द्रियादिज्ञानहेतुसयोगनाशात्। अत एव तदशाश्वतमनित्य तस्मान्मुक्तौ नात्मन्यात्मनि ज्ञानमित्यर्थ" इति। यद्वा विज्ञानमात्मा कर्तृव्युत्पत्ते तस्मिन्ननुगतमुपादानोपादेयभावेन सम्बद्ध ज्ञानमज्ञानेन ज्ञानाभावेनापकृष्यते मुक्त्यवस्थाया स्वासमानाधि-करणक्रिय देश मुक्तिकालान्यकालोभयानवच्छिनाविशेषगुणतया ज्ञानाभाव आत्मनि तिष्ठतीत्यर्थ। ननु ज्ञानस्वरूपत्वादात्मनस्तदा ज्ञानाभावोऽनुपपन इत्यत आह—पृथक्त्वादिति। आत्मभिन्नत्वात्। अशाश्वतमागन्तुकतद्गुण रूपम्। ननु ज्ञानमात्मनि सम्बद्ध न वा? नाद्य, असम्बद्धसमवायस्यासम्बद्ध-त्वायोगादन्ययाचानवस्थानात्। नान्त्य, गुणगुणिभावानुपपत्ते। अत श्राविक एवायमित्यत आह—सप्रयोगाच्चेति। समानात् समवायस्पा-सम्बन्धात्। उक्तानुपपत्तिस्तु तर्काभासत्वादेव परिहार्येतिभाव। तदानी कथ न ज्ञानोत्पत्तिरत नाशपूर्वंपूर्वादिति। शरीराविनाशरूपात् कारणादित्यर्थ। तदेव याज्ञवल्क्यजनकसंवादे विश्वावसुरुवाच—

पञ्चविंशपदे तत्ते प्रोक्त ब्राह्मणसत्तम।
तथा तन्न तथा चेति तद्भवान्वक्तुमर्हति॥

जगीषव्यस्यासितस्य देवलस्य मया श्रुतम् ।
पराशरस्य विप्रर्षेर्वार्षगण्यस्य धीमत ॥
भृगा पञ्चशिखस्यास्य कपिलस्य शुकस्य च ।
गौतमस्यार्ष्टिषेणस्य गर्गस्य च महात्मन ॥
नारदस्यासुरेश्चैव पुलस्त्यस्य च धीमत ।
सनत्कुमारस्य तत शुकस्य च महात्मन ॥
कश्यपस्य पितुश्चैव पूर्वमेव मया श्रुतम् ।
तदनन्तर च रुद्रस्य विश्वरूपस्य धीमत ॥
दैवतेभ्य पितृभ्यश्च दैतेयेभ्यस्ततस्तत ।
प्रायमेतन्मया कृत्स्नं वेद्य नित्य वदन्त्युत ॥
तस्मात्तद्वै भवद्भ्यो श्रोतुमिच्छामि ब्राह्मण ।
भवान् प्रवर्हं शासाणा प्रगल्भश्चातिवीर्यवान् ॥
न तवाविदित किञ्चिद्भुवान् श्रुतिनिधि स्मृत ।
कथ्यते देवलोके च [पितृलोके] च ब्राह्मण ॥
ब्रह्मलोकगताश्चैव कथयन्ति महर्षय ।
पतिश्च [तपता] शश्वदादित्यस्तव भाषते ॥
साङ्ख्यज्ञान त्वया ब्रह्मन्नवाप्तं कृत्स्नमेव च ।
तथैव योगशास्त्रच्च याज्ञवल्क्य विशेषत ॥
निस्सन्दिग्ध प्रबुद्धस्त्व बुध्यमानश्चराचरम् ।
श्रोतुमिच्छामि तज्ज्ञान वृत भण्डमय यथा ॥

याज्ञवल्क्य उवाच—

कृत्स्नवारिणमेव त्वा मन्ये गन्धर्वसत्तम ।
जिज्ञासा ते तु या राजस्तन्निबोध यथाश्रुतम् ॥
अबुध्यमानप्रकृति बुध्यते पञ्चविंशक' ।
न तु बुध्यति गन्धर्व प्रकृति पञ्चविंशकम् ॥
अनेन प्रतिबावेन प्रधान प्रवदन्ति तत् ।
साङ्ख्या योगाश्च तत्त्वज्ञा मयाश्रुतिनिदर्शनात् ॥
पश्यस्तथैव च[पश्यन्]पश्यत्यन्य सदानघ ।
षड्विंश पञ्चविंश च चतुर्विंश च पश्यति ॥
न तु पश्यति पश्यस्तु यश्चैनमनुपश्यति ।
पञ्चविंशोऽनिमन्येत नान्योऽस्ति परतो मम ॥

न चतुर्विंशति ग्राह्यो मनुर्ज्ञानदर्शिभि ।
मत्स्यश्चोदकमन्वेति [प्रवर्तेत] प्रदर्शनात् ॥
यथैव बुध्यते मत्स्यस्तथैवोऽप्यनुबुध्यत ।
सस्नेह सहवासाच्च साभिमानाच्च नित्यश ॥
स निमज्जति कालस्य यदैकत्व न बुध्यते ।
उन्मज्जति हि कालस्य ममत्वेनाभिसवृत ॥
यदा तु मन्यतेऽन्योऽहमन्य एष इति द्विज ।
तदा स केवलीभूत षडविंशमनुपश्यति ॥
अन्यच्च राजन् षड्विंशस्तथान्य पञ्चविंशक ।
तत्स्थानाच्चानुपश्यन्ति एक एवेति साधव ॥
तेनैतन्नाभिनन्दन्ति पञ्चविंशकमुच्यते ।
जन्ममृत्युभयाद्भीता योगा साख्याश्च काश्यपा ॥
षडविंशमनुपश्यन्त मुनयस्तत्पराधणा ।
यदा स केवलीभूत षडविंशमनुपश्यति ॥
तदा स सर्वविद्विद्वान् पुनर्जन्म न विन्दति ।
एवमप्रतिबुद्धञ्च बुध्यमानश्च तेऽनघ ॥
बुद्धश्चोक्तो यथातत्त्व मया श्रुतिनिदर्शनात् ।
पश्यापश्य यो न पश्येत्तेमनत्वञ्च काश्यप ॥
केवलाकेवल चाद्य पञ्चविंश परञ्च यत् ।

विश्वावसुरुवाच—

तथ्य शुभ चैतदुक्त त्वया विभो सम्यक ज्ञेय्य देवताद्य यथावत् ।
स्वस्त्यस्तु ते भवतश्चास्तु नित्य बुद्धया सदा बुद्धियुक्त नमस्ते ॥

याज्ञवल्क्य उवाच—

एवमुक्त्वा सम्प्रयातो दिव स विभ्राजन्वै श्रीमाञ्छ्रीदर्शनेन ।
दृष्टश्च तुष्ट परयाभिनन्द्य य दक्षिणे मम कृत्वा महात्मा ॥ इति ।

अस्यार्थं —चतुर्विंशतिपदार्थो पूर्वं गीताद्वाक्यविचारप्रसङ्गे उक्तो । अत पदार्थविभाजकोपाधीना च चतुर्विंशतित्वमित्यनाशङ्कयम् । पञ्चविंशस्त्वात्मा जीव तथा सत्य न वेति सशय उत्तर ब्रूहि भूम्यादिक मिथ्यादिक न वेति भाव । जीवस्यापि वेदान्तिभिर्वाच्यत्वाभ्युपगमात् । तथा पदस्य सत्यार्थकत्व क्षीरस्वाम्यादिसर्वसिद्ध दर्शित च प्राक् ।

प्रश्नस्यापि विप्रतिपत्तिमूलकत्वसूचनाय स्वस्यानेकाचार्योपदिष्टत्वमाह—जैगीषव्यादिना। स्पष्टमन्यत्। अबुध्यमान इति कर्मणि शानच्। प्रकृति पूर्वं मुक्ता भूम्यादि न। यद्यपि भूम्यादितत्संवेतज्ञानविषयत्वाभाव-वानिति नार्थः, असिद्धः तथापि भूम्यादिनिष्ठात्यन्ताभावप्रतियोगिज्ञान-विषयत्वनार्थः। प्रकृतिं भूम्यादिकं बुध्यते जानाति। एतेन देहादिभिन्नत्व दर्शितम्। तदेव स्पष्टयति—न तु इत्यादि। बुध्यतीति छान्दसं परस्मैपदम्, अनेनोक्तेन प्रतिबोधेन ज्ञानेन जीव प्रधान अवदन्ति, मोक्षनर्थत्वात्सर्वस्य मोक्ष्यन्त्य च तेन मात्रे सम्भवात्। मोक्तृभोग्ययोश्च मोक्तृप्राधान्यस्य सर्व-सम्मतत्वात्। श्रुतेरप्यर्थ एव तात्पर्यमित्याह—यया श्रुतीति। तया चात्मनो निर्गुणत्वादिकल्पनमानानमात्रमिति भावः। ईश्वरमधिकृत्याह—पश्यतीति। अन्यः परमात्मा सदा नित्य पश्यति नित्यज्ञानाश्रय इत्यर्थः। प्रमात्व तु ज्ञानस्य दर्शयति—तया सत्यमेव पश्यन्। एवशब्दो ज्ञानस्य सर्वत्रि प्रमात्वसूचनार्थ। अन्यथा भ्रममात्रस्याप्यशत प्रमात्वनियमेन तज्ज्ञा-नमेव पश्यन् एव भ्रमत्वव्यवच्छेदाप्रसिद्धे। ततश्चार्थज्ञानविषयाणा सत्यत्वज्ञान। पश्यतीत्यस्य मुख्यार्थत्वनिषेधायाह—अपश्यनिति। नित्य-ज्ञाने चक्षुरादेरनुपयोगात्, चाक्षुषत्वस्य ज्ञाने निषेधात् पश्यतीत्यस्य साक्षा-त्कारिज्ञानमात्रपरत्वमिति भावः। पञ्चविंश परमात्मान पञ्चविंश जीव चतुर्विंश भूम्यादि तदुभयभिन्नपदार्थं च पश्यति साक्षात्करोति। एतेन सर्वविषयकत्व तज्ज्ञानस्योक्त भूम्यादीना तज्ज्ञानस्यैवाभावात्। जीवा-नाञ्च परमात्मतद्गुणत इन्द्रियपदार्थसाक्षात्काराभावादीश्वरस्यैव सर्व-विषयकसाक्षात्कारवत्त्वात्। एवञ्च तया नन्न तयेति चेति विप्रतिपत्तौ विधि-कोटिरेव सर्वसम्मतेत्युक्तम्। पश्यन्ति साक्षात्काराश्रयमेन परमात्मान च पञ्चविंशो जीव अनुपश्यति साक्षात्करोति। स तु न पश्यति न जानाति परन्तु सत्या ज्ञानाश्रयभावेन ज्ञानानुदयात्। इदमेव मन्तव्यस्य "सर्वमात्मै-वाभूद्" इत्यादिश्रुतीना तात्पर्यविषय इत्याह—अभिमन्येत नान्योस्ति परतो मनेति। परतो मुक्त्यवस्थायामन्य. पदार्थो मम सम्बन्धी नास्तीत्य-भिमन्यते इति। मोक्षपूर्वकालीनमोक्षावस्थाज्ञानानुवाद.। नन्वेव सुखस्यापि हानावपुरुषार्थत्व मोक्षस्य स्यादित्यत आह—नेत्यादि। ज्ञानदर्शिभिर्विशेष-बुद्धिर्मनुजैरनुविधकः सुखहेतुः देहादिसमुदयो न ह्यो नोपादयत्वेन बोध्य। तया च सुखस्य दुःखसम्भेदावश्यकतया प्रेक्षावद्भिरवश्य हेयतया न तद्धानिप्रयुक्तमपुरुषार्थत्वमिति भावः। तदुक्तमाचार्यैः बहुतरदुःखानुविद-

तया सुखस्यापि प्रेक्षावद्धेयत्वान्मधुविषसम्पृक्तान्नभोजनजन्यसुखाद्" इति। अत एव सांख्यसूत्राणि तदपि दु खपक्षे निक्षिपन्ते विवेचका । अत एवोक्तम्-

जन्ममृत्युजराव्याधिदु खान्यनुदिन नृणाम्।
स्वयमेव विना यत्नान्निपतन्ति सहस्रश.॥
विहिताकरण नित्य प्रतिषिद्धनिषेवणात्।
महदामुष्मिक दु ख यत्नैर्नाविगम्यते॥
बहुदु खपरिष्वक्त यन्नाम खल्वक सुखम्।
सुरापानादिसुख रञ्जनीय विवेकिनाम्॥
एव भूतेऽपि ससारे ये रक्ता सुखतृष्णया।
न तेषामधिकारोऽस्ति मुक्तिशास्त्रे कथञ्चन॥
ससारादुद्विजन्ते ये दृष्टलोकपरम्परा.।
त एव खलु मोक्षन्ते न तु य प्राकृतो जन.॥
तेषामेवाधिकारश्च मुक्तिशास्त्रे ·· ··।
तेषामेवापवर्गाख्यपुरुषार्थो महात्मनाम्॥
तेनाभावात्मकत्वेऽपि मुक्तेर्नापुरुषार्थता।
सुखदु खोपभोगो हि ससार इति कीर्त्यते॥
तयोरनुपभोगस्तु मोक्ष मोक्षविदो विदु।
श्रुतिरप्येवमेवाह भेद ससारमोक्षयो.॥
न ह वै स शरीरस्य प्रियाप्रियविहीनता।
अशरीर ह वै सन्त स्पृशन्तो न प्रियाप्रिये॥ इति।

तिष्ठतु तावत्।

ननु देहानवच्छेदेन ज्ञानानुत्पत्त्या आत्मनो देहभिन्नत्व कुत इत्यत आह-मत्स्यश्चेति। बुध्यत इति कर्मणि तङ्, तथा च सर्वदा सहचरितेऽपि मत्स्यो लिङ्गविशेषेणोदकभिन्नत्वेन ज्ञायते, तथैव देहभिन्नत्वेनात्मापीति भाव.। एतच्च तत्रैव पूर्वं स्पष्टमुक्तम्—

यथा मुञ्ज इषीकाणा तथैवतद्विजायते।
अन्यच्च मशक विद्यादन्यच्चोदुम्बर तथा॥
नरोदुम्बरसयोगैर्मशकस्तत्र लिप्यते।
अन्य एव तथा मत्स्यस्तदन्यदुदक स्मृतम्॥
न चोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्वश.।
अन्यो ह्यग्निरपाप्यन्या नित्यमेवमवेहि नो॥

न चोपलिप्यते सोऽग्निस्पासस्पर्शनेन वै ।
पुष्कर त्वन्यदेवात्र तथान्यदुदक स्मृतम् ॥
न चादिकस्य स्पर्शेन लिप्यत तन पुष्करम् ।
एतेषा सहवासश्च निवास चैव नित्यश ॥
माथात्म्यन पश्यन्ति न नित्य प्राकृता जना ।
ये त्वन्यथव पश्यन्ति न साम्यक् तेषु दशनम् ॥
ते व्यक्त निरय घोर प्रविशन्ति पुन पुन ।

तथा च वशिष्ठजनकसवादे—

मशकोदुम्बरे यद्वदन्यत्व तद्वदेतया ।
मत्स्योदके यथा तद्वदन्यत्वमुपलभ्यत ॥
एवमेवावगन्तव्य नानात्वैकत्वमेतया ।

नन्वेव देहपुष्टयादावह पुष्ट इत्यादि ज्ञान कथमत आह--सस्नेह इति । साभिमानादविवेकविशिष्टात्सहवासात्साहचर्यात्तु सस्नेहो भवति । देह एव आत्मेति पूर्वोक्त विशेष्यम् । एकश्चकारस्त्वर्थं एक समुच्चयार्थ । अत एव देहात्मज्ञानभ्रमत्वात्तेन ससार इत्याह—स निमज्जतीति । एकत्व भेद यदा न बुध्यते तदा कालस्य जन्ममरणाद्यवच्छिनस्य सम्बन्धी सन् निमज्जति, उक्तरूप एव निमज्जनोन्मज्जन प्राप्नोतीत्यर्थ । ममत्वेनाविवेकेनाभिसवृतोऽभिनिविष्ट । तथा च स्मृतिकल्पतरौ देवल —

इद ममेति यत्स्वाम्यमात्मनोऽर्थेषु मन्यते ।
अजानस्तदनित्यत्व ममत्वमिति तद्विदु ॥

आत्मनि देहादिभिन्नत्वेन ज्ञातेऽप्याह—यदा त्विति । यद्यप्यात्मनि देहभिन्नत्वज्ञानमेव प्रकृतोपयुक्त तथापि देहादीनामप्यात्मप्रतियोगिकभेदवत्वेन तदावश्यमवगाहनात्तदप्ययुक्तम् । तदा तादृशभेदज्ञान सम्पत्तिकाले केवलोभूतो मुमुक्षु षड्विश परमात्मानमनुपश्यति श्रवणादिप्रतिपत्तिक्रमेण साक्षात्करोति । इदानी जीवपरमात्मानौ वस्तुतो भिन्नौ न वेत्याशङ्क्याह—अन्यश्चेति । परमात्मजीवौ परस्परप्रतियोगिकस्वाभाविकभेदवन्तावेव । न चैवायमाविद्यकभेदानुवाद, वैयर्थ्यापत्ते । मया तदभेदानङ्गीकारेण त्वद्व्याख्यायामप्रसक्तनिषेधत्वप्रसङ्गात् । मदीयात्तु भवदभ्युपगताभेदनिषेधज्ञापकत्वेन सार्थक्यात् ।

नन्वेव जीवपरैक्यवाक्याना का गतिरित्यत आह—तत्स्थानाच्चेति। भावव्युत्पन्नस्थानशब्देन स्थैर्यलाभात्तस्य च दुःखादिनिवृत्तिरूपस्य प्रकृते वाच्यत्वाच्छोकात्यन्ताभावरूपेण साधर्म्येण एक एवेत्यनुपश्यन्ति। तथा च सुसदृशेषु वक्तारो भवन्ति नास्यास्य च कश्चिदपि भेदोऽस्तीति भाव। अतश्चात्मना दुःखनिवृत्तौ विवेकिनो यतन्त इत्याह—तेनेति। अच्युत स्वगुणेभ्योऽपृथग्भूतविशेषगुणवन्तमिति यावत्। पञ्चविंशक जीव नाभिनन्दन्ति सविशेषेण हीति न्यायेन दुःखस्यैवाभिनन्दनीयत्वपर्यवसानम्। तदेवाह—जन्मेति। जन्ममृत्युरूप यद्भय भीतिहेतुस्तस्माद्भीतास्तत्प्रयुक्तभयवन्त तत्परिहारार्थं न इति यावत्। षड्विंश परस्यात्मानमनुपश्यत। मोक्षहेतुज्ञानकर्त्तृमिच्छन्त शुचयस्तत्परायणा इति शमदमादिसम्पत्तिरपीति पदार्थना सूत्रम्। यदा तु जीव केवलोभूत अकेवल केवल सम्पन्न केवलीभूत क्विप्प्रत्ययस्तु ज्ञानादिगुणाना ससारितादशायामप्यनारोपितत्वलाभाय। सर्वंवित्त्व सर्वमिद विज्ञात भवतीत्यादिरीत्या व्याख्येयम्। विद्वान् तत्त्वज्ञानसम्पन्न पुन पूर्वजन्मापेक्षया भित्र जन्म न चिन्दति न प्राप्नोति तथाचात्यन्तिकी दुःखनिवृत्तिरेव मोक्ष न तु ब्रह्मात्मैक्यसम्पत्तिरपीति। पदार्थना मिथ्यात्व न प्रामाणिकमिति तात्पर्यमुपसहरति—एवमिति। अप्रतिबुद्ध शरीराद्यात्मनोर्भेदानभिज्ञ बुध्यमानस्तद्भेदज्ञ बुद्ध आत्मसाक्षात्कारवाश्च श्रुतिनिदशनाच्छ्रुतितात्पयरीत्येति भाव। तस्माद् योगीश्वरेण विवृतो मैत्रेयीब्राह्मणाद्यर्थं मतद्वे पक्षपाति विपक्षश्च परपक्षे, इत्यास्ता विस्तर। इदसर्वंमिति श्रुत्यर्थं॥

"तमेव विदित्वातिमृत्युमेति नान्य पन्था विद्यतेऽयनाय"।
"यस्मात्पर नापरमस्ति किञ्चित्तस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्।
वृक्ष इव तब्धो दिवि तिष्ठत्येकस्तेनेद पूर्णपुरुषेण सर्वम्।
ततो यदुत्तरतर तदरूपमनामयम्।
य तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति।

इति श्वेताश्वतरश्रुतेश्चायमर्थ—आत्मान्यविषयकमात्मविशेषकज्ञानत्वेन मोक्षजनकत्वम्। न च मन संयुक्तसमवायप्रत्यासत्त्या आत्मत्वस्यापि भाने बाधकाभाव इति वाच्यम्, आत्मान्यविषयकज्ञानत्व निदिध्यासनस्य प्रतिबध्यनावच्छेदकमित्यभ्युपगमात्। नचैवमपि तादात्म्यसम्बन्धेनात्मप्रकारकात्मविशेष्यकज्ञानस्य हेतुत्व दुर्वारमात्मा[न्य]विषयक-

त्वस्य रक्षणादिनि वाच्यम्, सप्रकारकात्मज्ञानत्वस्य प्रतिबध्यतावच्छेदकमित्यस्य विवक्षितत्वात्। न च एवकारो भिन्नक्रमत्वात् विदित्वेत्यनन्तरं योज्य, कर्मणो मोक्षजनकत्व व्यावर्त्यमिति वाच्यम्, नान्य पन्था इत्यत एव तत्सिद्धे "न कर्मणा न प्रजया धनेन" इत्यनेन मोक्षनिषेधाच्चेति प्राञ्चः। नव्यास्तु 'एवकारभङ्ग आवश्यक। यथाश्रुतेऽपि सप्रकारकात्मज्ञानस्य द्वारत्वनुभवत्वादात्मान्याविशेष्यकज्ञानस्य तदर्थत्वाद् घटत्वेन घट जानातीत्यादौ विशेष्यत्वस्यैव द्वितीयार्थत्वात्।

न च विषयतामात्र तदर्थ, शत्रुघननाशेच्छाया शत्रुघनमिच्छतीत्यादेरप्रयोगात्। अत एव "आत्मा द्रष्टव्य" इत्यादितोऽप्यात्मत्वविशिष्टस्य ज्ञानन्यत्वलाभ। अतः परमात्मनोऽसाधारणधर्मेण निश्चयोऽप्रामाण्यशङ्काकलङ्कशून्यः प्रारब्धातिरिक्तविद्यमाननिखिलपापनाशकोऽपवर्गहेतु, परमात्मगतधर्मभाने तदसाधारणधर्मकथनस्य वेदे वैयर्थ्यापत्ते" इत्यादिकमाहुः।

यत्तु "एकमेवानुद्रष्टव्यमेतदप्रमय शिवम्।
तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैव सेतुः।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानत ।
तत्र को मोह क शोक एकत्वमनुपश्यतः॥

तमेव विदित्वातिमृत्युमेति" इत्यादिश्रुतिभिर्ब्रह्मस्वरूपमात्रगोचरनिर्विकल्पस्यैव मोक्षहेतुत्वम्। तथा ह्यासामयमर्थः-एकमेव केवलब्रह्मविषयक यथा स्यात्तथानुद्रष्टव्य श्रवणाद्युत्तरसाक्षात्कर्तव्यमेकमेव वाक्यद्वयेऽप्येवकाद्वयमेकपदार्थव्याशुद्धाविषयकत्वस्यानुवाद। तमेव कदाचिद्वेतदर्शन कदाचिद्वैतदर्शनम्।

ननु युगपदेवोभय सन्नमश बहुना लोकयोरिव विरोधादिति विवरणोक्तेर्विरोधः, प्रपञ्चविषयकत्वेऽपि केवलविषयकत्वसम्भवात्, तस्य समूहालम्बनसाधारण्यात्।

न बुद्धि मर्दयन् दृष्टो घटो न त्वस्य वेदिना।
उपमृद्नाति चेद्बुद्धिर्व्यर्थानाती न तु तत्त्वविद्॥

इति विवरणोक्तेश्च घटपटोभयविषयकज्ञानस्यापि घटतत्त्वज्ञानत्वानपायात्तस्माद्भ्रमनिवृत्त्यादिदर्शनाच्चेति वाच्यम्, केवलात्ममात्रजिज्ञासाकालीनात्मज्ञानस्य केवलात्मविषयकत्वात्, तादृशजिज्ञासायाश्च मुमुक्षो प्रायेण सत्त्वात्तादृशेच्छाभिधायेण तस्या योजनीयत्वात्। अय यथाश्रुतार्थकत्वे आग्रहस्तथापि न क्षतिः, एकमेवस्यैवकारसमभिव्याहारेण केवलात्मान्याविषयक

यथास्यादित्यर्थसम्भवात्। यस्मिन्काले सर्वाणि भूतान्यात्मैवाभूत् स्वकालपूर्वकालवर्तिविज्ञानात्मनस्तादात्म्यवत्येवकारबलान्न तु तादृशतादात्म्यशून्यानि तत्र काले को मोह क शोक, मोहादे स्वकालपूर्ववर्तितासम्बन्धेन विज्ञानात्मन्यभाव। स्वकालेत्यत्र स्वपद सर्वभूतपरम्। एकत्वमनुपश्यत एकात्मदर्शनहेतुक, शतृप्रत्ययस्य हेत्वर्थकत्वात्। न च कालेत्याद्यर्थकल्पनमदृष्टपूर्वमिति वाच्यम्, बाधकाले शुक्तावारोपित रजतादिक ज्ञातश्चतिरभूदित्यादौ लोकेऽपि तादृशार्थप्रतीते। आत्मपद च केवलात्मपरमेकत्वमित्यग्रिमानुरोधात्। तमेवेत्यादौ तदन्याविषयकज्ञानोत्तर मृत्युमतिक्रामतीत्यर्थ। विचरणोक्ते पूर्वोक्तार्थाभिप्रायकत्व तु अन्नमेव भुक्त्वा यस्तृप्यतीत्यादावेतदीयतृप्तावन्नेतरभोजनत्वेन न हेतु किन्त्वन्नभोजनत्वेनेतिधीरिव मोक्षे आत्मेतरज्ञानत्वत्वेन हेतुत्व किन्त्वात्मज्ञानत्वेनेतिधी। अत समूहालम्बनसाधारण्य विषयान्तरज्ञानस्य सत्त्वेऽपि मोक्ष प्रत्यप्रयोजकत्वेनोक्तार्थस्यावाधितत्वात्। सविकल्पकज्ञान घटत्वादिविशिष्टस्य निर्विकल्पक तु घटत्वस्येत्याशयेनान्यविषयत्वानिरूपिताविषयकताकज्ञानस्य धीर्वा वस्त्वन्तरस्य विषयत्वेऽप्यात्मविषयतायास्तन्निष्ठविषयत्वानिरूपितत्वादिति। तत्रेद वक्तव्यम्—घटपटोभयज्ञानकाले घटमेव जानातीत्यादेरप्रयोगाद्घटत्वप्रकारतानिरूपितघटविशेष्यताकज्ञानमात्रगत्वे च तत्प्रयोगात्। घटान्यविशेष्यकज्ञानज्ञानत्व घटमेव जानातीत्यादिसमभिव्याहारज्ञानस्य कार्यतावच्छेदक कल्प्यते, न तु घटान्यविषयत्व निरूपितविषयताकज्ञानत्वम्, विशिष्टज्ञाने विशेष्यत्वप्रकारत्वयो परस्पर निरूप्यनिरूपकभावसत्त्वात्तदानी घटमेव जानातीति प्रयोगानुपपत्ते। अत एव निर्विकल्पकाभिप्रायेणापि न तथा प्रयोग। निर्विकल्पक घटत्वस्यैवेत्यादौ शब्दे तु निर्विकल्पकीयघटत्वादिविषयताया घटादिविषयतानिरूप्यत्वे मानाभावाद् घटत्वान्यविषयत्वस्यैव बाधेन व्यवच्छेत्तुमशक्यत्वादुक्तनिरूप्यस्यैव व्यवच्छेद इति वयम्यम्। एवमात्मेतरज्ञानत्वेन हेतुत्वव्यवच्छेदेत्यप्ययुक्तम्। आत्मविषयकत्वाभाववद्वृत्तिविषयिताकान्यज्ञानस्यैवात्मेतरज्ञानत्वात्। आत्मान्यमानविषयकत्वस्य तदर्थबाधकस्योक्तत्वाच्च। आत्मैवाभूदित्यस्यार्थोऽप्ययुक्त। स्वकालेत्यादिसम्बन्धस्य मिथ्यात्वसिद्धयुत्तरकालीनत्वमिथ्यात्वे प्रमाणाभावेन दूरपराहतत्वात्। सर्वभूतेषु रागद्वेषप्रहाणस्योक्तवाक्यार्थत्वाच्च।

यस्मात्परमित्यस्य त्वयमर्थ—अपरमात्मभिन्न किमपि वस्तु यस्मादात्मन पर पूर्वंकालवृत्तिर्नास्ति नित्यत्वादात्मनस्तत्पूर्व-

कालस्याप्रसिद्धेः। यद्वा यस्मात्परमुत्कृष्टं नास्ति नित्यज्ञानादिमत्त्वात्। यद्वा यस्मादिति जीवपरं द्वितीयार्थे निरूपाविप्रियत्वात्पञ्चमिः। न चानाकाङ्क्षितामियानीश्वरज्ञानमात्रस्य न मुक्तिहेतुत्वमित्ययंकत्वात्। यस्मात्किञ्चिदणीयो नास्ति दुर्ज्ञेयत्वात्। न च ज्यायोऽस्ति व्यापकत्वादहमिति प्रत्यक्षबोधत्वेऽपि तस्यातिरिक्तविषयकत्वासिद्धेः। प्रागभावप्रतियोगित्वमात्मस्याद्यव्याख्याने लाभेऽपि ध्वंसाप्रतियोगित्वस्यालाभादाह—वृक्ष इवेति। हि विस्पष्टो वृक्ष इवेत्यनपह्नवीयत्वसूचनम्। एक तिष्ठतीत्यनेन च जन्यद्रव्यासमवेतस्यावस्थानलाभादयं ध्वंसाप्रतियोगित्ववारणम्, यथाश्रुतार्थस्य सर्वस्यानङ्गीकार्यत्वात्। विभुत्वलाभार्थमाह—तेनेदमिति। न च ज्यायस्त्वनिषेधेनैव तत्सिद्धिः, तदर्थव्याख्यानतयैवोपपत्तेः। प्रकृतमाह—तत इति। उत्तरतरमतिशयेनम्। परमात्मनो जीवात्मापेक्षयोत्कर्षहेतुमाह—यदरूपमनामयमिति। रूपपदं साधकप्रमाणपरम्; रूप्यतेऽनेनेति व्युत्पत्तेः। न च करणाधिकरणयोश्चेति ल्युटाबाधितत्वात्करणे घञ् दुर्लभ इति वाच्यम्; रूपयतीति पचादित्वादचप्रत्ययस्यैव संभवात्। यद्वा न विद्यते रूपं रूपत्व साक्षात्कारो यस्य सामान्यस्य विद्याशेषपरत्वाज्जीवस्यैव परमात्मनः प्रत्यक्षाभावात्। अनामयमिति। दुःखरहितमित्यर्थः। स्पष्टमन्यत्। यत्तु जीवेशभेदज्ञानं मुक्तिहेतुरिति मतमाश्रित्य तद्विरोधनिरासायाह—यस्मादित्यादि। यस्मादपरन्तु नास्ति परमित्यस्य तुशब्दसमानार्थत्वात्। जीवोऽणुरीशो महानिति तयोरखण्डैक्यज्ञानं न मोक्षहेतुरत उक्तमतविरोध आवश्यक इति भ्रान्तिं निरस्यति— यस्मान्नाणीय इत्यादि। किञ्चिदपि वस्तुस्वरूपं यस्मादात्मनो न ज्यायो न चाणीयोऽस्ति यदात्मस्वरूपमुमुक्षुभिर्ज्ञेयं तस्याणीयस्त्वं ज्यायस्त्वं चौपाधिकं न स्वाभाविकमिति वस्तुतस्तन्नास्तीति भावः। ईशज्ञानादेव मोक्ष इति पाशुपतादिमतं निरस्यति—वृक्ष इवेत्यादि। तत ईशरूपाद्युत्तरतरमधिष्ठानतयानन्दघनसद्रूपतया च श्रेष्ठतरमित्यादि. तच्चिन्त्यम्; परशब्दस्य भिन्नत्वमात्रार्थत्वे ज्यायस्त्वादिनिषेधस्य वास्तवत्वनिषेधपरत्वे च मानाभावात्। तेनेद पूर्णमित्यादिविरोधाच्च। न च पूर्णत्वस्योत्तरतरत्वस्य चाविद्यकस्याविद्यादशायां शुद्धब्रह्मस्तुत्यर्थमुक्तत्वान्न दोष इति वाच्यम्; आविद्यकत्व एव विवादस्य प्रशान्तत्वात्।

यदपि विष्णुपुराणे—

सितनीलादिभेदेन यथैकं दृश्यते नभः।
भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्॥

एक समस्त यदिहास्ति [किञ्चित्त] दच्युतो नास्ति पर ततोऽन्यत् ।
सोह स च त्व स च सवमेतदात्मस्वरूप त्यज भेदमोहम् ॥ इति ।

तस्याप्ययमर्थ —एकमेव नभो यथा भ्रान्तैर्नाना दृश्यते तथा पृथक् पृथक् सनात्मा भ्रान्तदृष्टिभिरेकोऽद्वितीय इति दृश्यते । तथा चाद्वैतज्ञानमेव भ्रम इति स्पष्टमवोक्तम् । एकस्मिनेव ज्ञानभिन्ने ऐक्यज्ञानस्यापि भ्रमत्वाविशेषात् । न चात्तरार्द्धेऽपि भेदज्ञानस्यैव भ्रमत्वमिति वाच्यम्, अप्रयोजकत्वात्, चरम निर्दिष्टज्ञानस्य प्रमात्व पूर्वनिर्दिष्टस्य भ्रमत्वमित्यस्य पूर्वार्द्धे दर्शनाच्च । प्रमाणान्तरसवादाच्च । "यदिहास्ति किञ्चित्तदच्युत" इत्यस्य तात्पर्य तु 'नास्ति पर ततोऽन्यद्" इत्यनेनैवोक्तम् । तदपेक्षश्रेष्ठत्वस्यैवान्यत्र निषेधात् । तथा च व्यापकत्वादिना गौण सामानाधिकरण्यमिति भाव । तदेवाह— सोऽहमित्यादि । तस्माद्भेदे भेदो नास्तीति भ्रम माकार्षीदित्यर्थ । अथ ज्ञानस्य भ्रमत्व भेदविषयकत्वप्रयुक्तमेव लभ्यते, भेदमोहपद-माहात्म्यात् । घटभ्रमपदेन घटाभावभ्रमस्य म्वारस्यादप्रतीतेरित्याग्रहस्त-थापि न क्षति , उत्सर्गस्य बाधे सत्यकिञ्चित्करत्वात्, भेदसशय त्यजेदित्यर्थ-सम्भवाच्च । तत्त्यागस्य भेदाभावकोटित्यागेनापि सम्भवाद् विनिगमकस्योक्त-त्वात्, मोहपदस्य विपरीतज्ञानमात्रवाचित्वात् ।

तत्र च त्रिविधो मोह सम्भव सर्वपाप्मनाम् ।
अज्ञान सशयज्ञान मिथ्याज्ञानमिति त्रिकम् ॥

इति स्मृतिकल्पतरौ देवलवाक्याच्चेति दिक् । तमेवेत्यादिश्रुत्यर्थं ॥

सत्य ज्ञानमनन्तमित्यत्राऽनन्तपदमपि न मिथ्यात्वे मानम् । यत्तु अन्तपदस्य भेदार्थत्वादनन्तपदेन ब्रह्मणि भेदनिषेधे भेदव्याप्याना दृश्यस्वरूपाणामपि निषेधस्यार्थिकत्वाद्भेदसामान्यस्यैव दृश्यसामान्यस्यापि मिथ्यात्वसिद्धि व्यापकनिषेधे व्याप्यनिषेधस्यावश्यकत्वाद्भेदप्रतियोगित्वस्यैव दृश्यसामान्यस्यापि निषेधमादाय दृश्यभेदप्रतियोगित्वनिषेधस्य पर्यवसा-नसम्भवेन वाधकाभावादविनिगम्यत्वाच्च दृश्यमानस्यैव निषेधसभवात् । न च भेदत्वेनैव भेदोऽनन्तपदेन निषिध्यत इति न दृश्यनिषेधे पर्यवसानमिति वाच्यम्, देशकालवस्तुघटितत्वेनैव परिच्छेदाना त्रैविध्यव्यवहारात् । प्रपञ्चस्यापि वस्तुगत्यापरिच्छेदशून्यत्वेनानन्तत्वापत्या स्वसमानसत्ताकपरिच्छेदविशिष्टप्रतियोगित्वाना दृश्येष्वेव प्रसिद्धाना मतपदार्थतया तच्छून्यमनन्तपदबोध्यमिति । तद्दृश्यसमसत्ताकाना भेदादि-

प्रतियोगित्वाना तादृशत्वेनैव निषेध्यत्वात् । किञ्चिद्वस्तुनिष्ठतादात्म्यावच्छिन-प्रतियोगिनाभावत्वस्यैव भेदत्वेन सामान्यतस्तादात्म्यत्वस्यानुगतस्याभावेन दृश्यतादात्म्यमादायैव प्रकृते निषेधात् तादात्म्यस्य भेदत्वस्य वातिरिक्तत्वेऽपि दृश्यमान एव स्वाश्रयभिन्नभेदत्वसत्त्वात्तन्निषेध सिध्यत्येव। अधिकरणमेव भेद इति मते तु सुतरामिति, तदसत्, भेदस्य केवलान्वयितया प्रतियोगि-विशेषाविशेषिनरूपेण निषेधानर्हत्वात्। न च केवलान्वयित्वमेव तस्य मया नाङ्गीक्रियत इति वाच्यम्, अप्रसक्तप्रनिषेधत्वापत्ते, व्यवहारदशाया त्वयापि तदभ्युपगमाच्च। तज्ज्ञानस्य भ्रमत्व नास्तीत्यनेन परमस्माभि सह त्वद्विवादात्। ततश्च भेदे प्रतियोग्यपेक्षाया आत्मभिन्नत्व दृश्यत्व वा तन प्रतियोगित्वेनान्वयोपगमे तु सिद्धसाधनापत्ते । अतो दृश्यत्वविच्छिन-प्रतियोगिताकभेदानुयोगित्वाभावस्तावनार्थ । नापि दृश्यवृत्तिभेदप्रतियोगि-त्वाभाव । अनोऽन्यदार्त्तमित्यादि श्रुतौ ब्रह्मप्रतियोगिकभेदवत्त्वेन दृश्य-मात्रस्याभिधानात्।

मत्तु स्वसमानसत्ताकेत्यादि, तदत्यन्तमयुक्त, सत्ताभेदस्य मिथ्यात्व-सिद्धे । प्रागसिद्धया प्रपञ्चस्य पारमार्थिकभेदप्रतियोगित्वादनन्त्यत्वापत्तौ दृश्यसमानसत्ताकभेदप्रतियोगित्वानामनन्तपदार्थत्वे उक्तिसम्भवाभावात्। उक्तश्रुत्यैव मिथ्यात्वस्य साधयित प्रक्रान्तत्वात्। एतेन तस्मादन्तपरिच्छित्ति मा चाभावीयतेव हि निषेध्य प्रतियोगित्वमभावीयमतोऽखिलमिति परास्तम्। ध्वसप्रतियोगित्वरूपकालपरिच्छेदस्यात्यन्ताभावप्रतियोगित्वरूपदेशपरिच्छे-दस्य कथचित्प्रतिषेधसम्भवेऽपि भेदप्रतियोगित्वरूपवस्तुपरिच्छेदस्य निषेध इति वक्तुमशक्यत्वात्। पौराणिकानन्तपदव्यवहारविरोधाच्च। स्मर्य्यते हरिवशे—"देवैर्नादृष्टश्चान्तस्तेनानन्त इति स्मृत" इति। मत्स्यपुराणेऽपि वराहप्रादुर्भावे—

यस्माद् ब्रह्मादयो देवा मुनयश्चाग्रतेजस ।
न ते तमधिगच्छन्ति तेनानन्तस्त्वमुच्यसे ॥ इति ।

न चाम्यापि त्वदुक्तरीत्या व्याख्यान शक्यम्, दृष्टपदवैयर्थ्यात्। तस्मा दनन्तपदस्यानवयवमित्येवार्थ । अतो भ्रान्तस्येति सूत्रेऽयमन्तशब्दोऽ-न्येवावयववाची। तद्यथा "वस्त्रान्तो वसनान्त" इति महाभाष्यदर्शनात्। यद्वा अन्तशब्दस्य ध्वसपरतया ध्वसप्रतियोगित्वाभाव एवानन्तपदार्थ । "अन्त प्रतीतिके नाशे स्वरूपेऽतिमनोहरे" इति विश्वोक्ते। यदप्युक्तम्—अति

अदि बन्धने इति धातुसिद्धस्यान्तपदस्य बन्धनार्थकतया बन्धनस्य यत्किञ्चिद्देशकालससर्गविरोधिस्वरूपतया ससर्गाभावप्रतियोगित्वरूपत्वमिव क्वचिद्वस्त्वैक्यरूपमिलनविरोधितया भेदप्रतियोगित्वरूपत्व सभवतीति, तदप्यन्तपदार्थप्रकृतेर्निपिध्यते इति, तदप्यसत्, बन्धनस्य किञ्चिद्देशससर्ग-विरोधित्वेऽपि किञ्चित्कालससर्गविरोधे मानाभावात्। बन्धनाभावे यस्य यद्देशससर्गित्व प्रसक्त तद्देशससर्गस्य बन्धनसत्त्वेऽप्यनपायात्। अत एव किञ्चिद्वस्त्वैक्यरूपमिलनविरोधितयाभेदप्रतियोगित्वमपि तदर्थं इति परास्तम्। यद्वस्त्वैक्यबन्धनाभावे नास्ति तदैक्यस्य बन्धनदशायामप्यभावेन तस्य बन्धनावच्छेदकसाधारण्यादिति दिक्। अयन्तु श्रुत्यर्थ ॥

बृहदारण्यके श्रूयते—

'इय पृथिवी सर्वेषा भूताना मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्या पृथिव्या तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म शारीरस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ इमा आप सर्वेषा भूताना मध्वासामपा सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म रैतसस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ अयमग्नि सर्वेषा भूतान्ना मध्वस्याग्ने सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म वाङ्मय स्तेजोमयोऽमृतमय पुरुषोऽयमेव सयोऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ अय वायु. सर्वेषा भूताना मध्वस्य वायो सर्वाणि भूतानि मधु यश्चायमस्मिन् वायौ तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म प्राणस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ अयमादित्य सवषा भूताना मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म चाक्षुपस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ इमा दिश सर्वेषा भूताना मध्वासा दिशा सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म श्रौत्र प्रातिश्रुत्कस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ अय चन्द्र सर्वेषा भूताना मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिंश्चन्द्रे तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म मानसस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम्॥ इय विद्युत्सर्वेषा भूताना मध्वस्यै विद्युते सर्वाणि भूतानि मधु यश्चायमस्या विद्युति

तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म तैजसस्तेजोमयोऽमृतमय पुरुषोऽय-
मेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥ अय स्तनयित्नु सर्वेषा
भूताना मध्वस्य स्तनयित्नो सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ
तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म शाब्द सौवरस्तेजोमयोऽमृतमय
पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥ अयमाकाश सर्वेषा
भूताना मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिनाकाशे तेजोमयो-
ऽमृतमयः पुरुषो यश्चायमध्यात्म हार्याकाशस्तेजोमयोऽमृतमय. पुरुषोऽयमेव
स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥ अय धर्म सर्वेषा भूताना मध्वस्य
धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमय पुरुषो
यश्चायमध्यात्म धर्मस्तेजोमयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदम-
मृतमिद ब्रह्मेद सर्वम् ॥ इद सत्य सर्वेषा भूताना मध्वस्य सत्यस्य सर्वाणि
भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म
सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद
सर्वम् ॥ इद मानुष भूताना मध्वस्य मानुषस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमय पुरुषो यश्चायमध्यात्म मानुषस्तेजो-
मयोऽमृतमय पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥
अयमात्मा सर्वेषा भूताना मध्वस्य आत्मन सर्वाणि भूतानि मधु यश्चाय-
मस्मिनात्मनि तेजोमयोऽमृतमय पुरुषो यश्चायमात्मा तेजोमयोऽमृतमय
पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेद सर्वम् ॥ स वा अयमात्मा
सर्वेषा भूतानामधिपतिः सर्वेषा भूताना राजा तद्यथा रथनाभौ च रथनेमौ
चारा सर्वे समर्पिता एवमेवास्मिनात्मनि सर्वाणि भूतानि सर्वे देवाः
सर्वे लोकाः सर्वे प्राणा सर्व एत आत्मान समर्पिता ॥ इद वै तन्मधु दध्यङ-
ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । तद्वा नरा सनये
दस उग्रमाविष्कृणोमि तन्यतुं वृष्टिम् । दध्यङ् ह यन्मध्वाथर्वणो वामस्य शी-
र्ष्णा प्र यदीमुवाचेति ॥ इद वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत् । आथर्वणायाश्विनो दधीचेऽस्य शिर प्रत्यैरयतम् ।
स वा मधु प्रयोचदृतायन्त्वाष्ट्र यद्दस्तावपि कक्ष वामिनि ॥ इद वै तन्मधु
दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । पुरश्चक्रे द्विपद
पुरश्चक्रे चतुष्पद । पुर स पक्षी भूत्वा पुर पुरुष आविशदिति । स वा
अय पुरुष सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृत नैनेन किंचनासंवृतम् ॥
इद वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

रूप रूप प्रतिरूपो बभूव तदस्य रूप प्रतिचक्षणाय। इन्द्रो मायाभि पुरुरूप ईयते युक्ता ह्यस्य हरय शता दशेति। अय वै हरयोऽय वै दश च सहस्राणि बहूनि चानन्तानि च तदेतदृ ह्यापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्' ॥

अयमत्राथ --मध्येयीब्राह्मणे ह्युक्त शरीरेन्द्रियसम्बन्धादेवात्मनि ज्ञानाद्युत्पत्ति, मुक्तौ तु तदभावान्नति प्रागेव व्याख्यातम्, तदेव मधुब्राह्मणेन प्रपञ्चयते। तथा हि–पृथिवीजलवायूना शरीरेन्द्रियभेदेन त्रैविध्य नत्वाकाशस्येत्याकाशमादित्यादिभिर्विच्छि य पृथिव्यादिचतुष्टयमेवापूव प्रथम निर्दिश्यते। तत्राप्यस्यादिशरीरस्य पृथिवीसमवायित्वतामेव पूर्वमाह—इय पृथिवीति। सर्वेषा भूताना जलतेजोवायूना मधु तद्धदुपकारिका मधुपदमुपकार्योपकारकभावपरमित्यस्य तैरप्युक्तत्वात्। अस्या पृथिव्या सर्वाणि भूतान्युक्तानि। मधु उक्तप्रायार्थं उत्तरश्चैवकार्यानुग्राहकत्व मानुषशरीरे पृथिवीसमवायिकारण जलतेजोवाय्वव्यवस्तूपष्टम्भकतया निमित्तमात्रम्। एव जलादि शरीरेष्वपि योज्य विस्तरो द्रव्यकिरणावल्यादौ द्रष्टव्य। एवञ्च पृथिव्यादीना परस्परमुपकार्योपकारकभाव सिद्ध। तेजोमयो ज्ञानप्रचुरो निरवज्ञानवानिति यावत्। तैरपि चित्परत्वेनैव तेज पदस्य व्याख्यानात्। अमृतमयो विना हीन पुरुष परमात्मा तथा चोद्दालकब्राह्मणे श्रूयते "य पृथिव्या तिष्ठन् पृथिव्यामन्तरो पृथिवी न वेद यस्य पृथिवी शरीर य पृथिवीमन्तरोपमयेतिय्त आत्मान्तर्याम्यमृत" इति। अस्यायमथ —पृथिव्या तिष्ठन्नपि पृथिव्या अन्तरोऽबाह्य उत्पत्यादिनिमागकत्वेन पृथिव्या तिष्ठनित्युच्यते न तु घटादिवत्तद्वृत्तित्वमिति 'अन्तर बहिर्योगोपसव्यानयो" इति सूत्रे तरशब्दस्य बहिरर्थत्वप्रसिद्धे। पृथिवी भूम्यधिष्ठातृदेवता य न वेद न जानाति परंरपि तथैव व्याख्यातत्वात्। यस्य पृथिवीशरीर पृथिव्यवच्छेदेन परमात्मनो भोगाभावेऽप्यवच्छेदकत्वमात्रेण शरीरत्वोपचार। एतावतोऽप्यर्थस्य जीवसाधारण्येन सभावना स्यादत आह—य पृथिवीमन्तरो यमयतीति। अन्तरोऽबाह्य उदासीन एव सन् पृथिवी यमयत्युत्पत्तिस्थितिप्रलयैर्योजयति स्वकार्यसबद्धाच्च करोति। पृथिवीत्वावच्छेदेन चैतन जीवसाध्यमिति परमात्मलाभ इति भाव। एष एव प्रष्टव्यत्वेन तद[दे]वोद्दालकस्य सबन्धी अन्तर्यामीपदवाच्य आत्मा अमृत इति स्वरूपकथनम्। एवमेव तत्रत्येषु योऽप्सु तिष्ठन्नित्यादिषु व्याख्येयम्।

प्रकृतमनुसराम । यश्चायमध्यात्मे सुखाद्यवच्छेदकविशिष्ट शारीर शरीरभोक्ता तेजोमय इत्यादिपदद्वय पूर्ववत् । ज्ञानाशे नित्यत्वत्यागमात्र विशेष । योऽयमात्मा जीव स अय शारीरत्वेनोक्त एव, न तु पृथिवी-नियामकत्वेनोक्त । अतो जीवपरमात्मानौ भिन्नावेवेत्याशय । यत्तु पृथिवी-नियामकत्वेन तत्सबन्धकृतागन्तुकविशेषानुपहित एवोक्तस्तमधिकृत्याह—इदममृतमिद ब्रह्मेद सर्वमिति । इदमिति ब्रह्मशब्दसामानाधिकरण्यापेक्षं नपुंसकत्वम् । यद्वा तदुद्देशेन ब्रह्मत्वस्य विधेयत्वात् । "शँत्य हि यत्सा प्रकृति-र्जगत्स्य" इतिवद्विधेयलिङ्गोपादानम् । तदुक्त कैयटादिभिः "उद्देश्यप्रति-निर्देश्ययोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गमुपाददत" इति । कदाचिदुद्देश्यात्तल्लिङ्गस्य कदाचिच्च विधेयगतलिङ्गस्य विवक्षाव-शात्प्रयोग इति तस्यार्थ । यद्यपि जीवोऽपि मरणहीन एव तथाप्यात्मवि-शेषगुणजनकमन सयोगार्थं प्रागेवोक्त ।

यत्तु व्याचक्षते अयमेव सर्वबुद्धेर्द्रष्टैव स पृथिव्या शरीरे चोक्तो य अयमेव स इति सामान्यत उक्तम्, विशेषेणाह—योऽयमात्मेति । स्पष्टम् । नन्वात्मा चेज्जीवस्ततोऽस्य ससारित्वेन मरण स्यादत आह—इदममृतम् । चिज्जीवत्वेनाभिमतो भवत आत्मा स एवेद शास्त्रैकगम्य मरणशून्यत्वमात्मनो ब्रह्मैवेत्यत आह—इद ब्रह्मपदे तदमृतत्वेनोक्तमात्मतत्त्व पदे चेद सत्यज्ञानादितत्त्वेन जगज्जन्मादिकारणम् । न ततोऽन्यत्किञ्चिदप्यस्तीत्यत आह—इद सर्वं स्पष्टमित्यादि, तच्चिन्त्यम्, पृथिव्या शरीरे च य उक्तस्तद-न्यस्यानिर्देशेनोद्देश्यत्वविधेयत्वानुपपत्तें । न च पृथिव्या शरीरे च य उक्तस्तमुद्दिश्याप्ययमेव स इत्यनेन सर्वबुद्धेर्द्रष्टारमभिधाय तदभेदो विधीयत इति वाच्यम्, स इत्यनेन द्वयोर्निर्देशानुपपत्तेस्तदभेदस्य चासिद्धे, यत्पदाध्या-हारे मानाभावाच्च । मन्मने तु योऽयमात्मेत्यस्योद्देश्यसमर्पकत्वमयमेव स इत्यस्य च विधेयपरत्वम् । इदपदञ्च शारीरत्वेन निर्दिष्टपरम्, निर्देश-पौर्वापर्यापेक्षया यत्तच्छब्दयोगस्योद्देश्यविधेयभावे स्पष्टतर निर्णायकत्वात् । योऽयमात्मेत्यत्र इदपदन्तु यच्छब्दसमानार्थमेव यच्छब्दाव्यवहितोत्तर प्रयुज्यमानात्तद्विदमादाय शब्दा उद्देश्यपरा एवेति काव्यप्रकाशादौ—

यत्तद्भूजितमत्युग्र क्षात्र तेजोऽस्य भूपते ।
द्यौव्यताच्चस्तदा तेन नून तदपि हारितम् ॥

इत्यादौ तथैव दर्शनात् । इत्यल बहुना । रेतस इति । यद्यपि शरीरे पृथिव्या इव रेतसि जलस्य न समवायित्व जलादिशरीरमयोनिजमेवेति

मूलव्याख्याने "शुक्रशोणितयोर्नियमेन पार्थिवत्वात् पार्थिव न च पार्थिवीयानारम्भाद्" इति किरणावल्यां दर्शनात्। तथापि पञ्चाग्निविद्याया "सोमाद्वृष्टिर्वृष्टेरापोऽद्भ्योऽन्नमन्नाद्रेतस्तत पुरुष" इति दर्शनात्तत्रोक्तम्, यद्वा रेतस्यपामधि देवतात्वात्। अत एवार्त्तभागब्राह्मणे "याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वात प्राणश्चक्षुरादित्य मनश्चन्द्र दिश श्रोत्र पृथिवी शरीरमाकाशमात्मौषधी वाङ्मयइति रेवाय पुरुष इति वाग्ज्योति सम्राडिति होवाच" इत्यादौ श्रूयमाणत्वात्। प्राण इति पञ्चवृत्तिस्तत्सबन्धी। चाक्षुषश्चक्षुःसबन्धी। आदित्यस्य तदधिदेवतात्वाच्च। श्रौत्र इति। श्रोत्रस्य सबन्धी, तज्जन्यज्ञानसमवायित्वात्। एव चाक्षुषादावपि यथायोग्यमूह्यम्। प्रातिस्विक प्रतिश्रवणावसरभव इति तद्व्याख्या। मानसो मन सबन्धी। विद्युत्प्रसिद्धा। तैजसस्तेज सबन्धी। स्तनयित्नु मेघनिनाद इति व्याख्या। शाब्द शब्दानुभविता, सौवर स्वरानुभविता, स्वरशब्दस्य द्वारादिषु पाठादैजागम। सौवर समभ्यस्त समभ्यस इति शाब्दिकप्रयोगोऽपि। शब्दपद वर्णात्मकशब्दपर स्वरपद च ध्वन्यात्मकतत्पर पुण्डरीकावकाश तस्य जीवस्यानत्वात् तदवच्छिन्न इत्यर्थ। धार्म. धर्मस्य समवायित्वात्, अधर्मस्याप्येतदुपलक्षण ताभ्या शरीरपरिग्रहात्। सात्य शास्त्राविरुद्धवचनस्य सबन्धी तत्प्रयोगहेतु ज्ञानवत्त्वात्। तथा च स्मृति.—

सत्य ब्रूयात्प्रिय ब्रूयान्न ब्रूयात्सत्यमप्रियम्।
प्रिय च नानृत ब्रूयादेष धर्म सनातन।

धर्मपदस्यादृष्टपरत्वेन व्याख्यानानुपपत्ति। वेदान्तिनस्तु धर्मपदेन तद्धेतुमभिसन्धाय धर्मसारसर्वस्वज्ञापनार्थं सत्यस्य पृथक्करणमित्याहु। मानुष मनुष्यत्वजाति इति तद्व्याख्या। मानुषो मनुष्यत्वजात्यवच्छिन्नशरीरावच्छेद्यज्ञानादिमान्, शरीरान्तराणा मानुषशरीराधिकातिरिक्तकर्मजन्यादृष्टमूलकत्वात्प्राधान्येन मानुषस्य पृथगुपादानम्। अयमात्मा जीव सर्वेषा भूताना मधु सर्वोत्पत्तिमन्निमित्तादृष्टाश्रयत्वम्। अस्य जीवस्य सर्वाणि भूतानि मधु भोग्यत्वात् सर्वस्य चेतनभोगायत्वात्। यथायमस्मिन् जीवात्मनि तद्भोगहेतुप्रपञ्चजनकत्वेन स्थित पुरुष। तथा च वैशेषिकभाष्यं "ततः पुनः प्राणिना भोगभूतये महेश्वरस्य सिसृक्षानन्तर सर्वात्मगतवृत्तिलब्धादृष्टेभ्यस्तत्सयोगेभ्य. पवनं परमाणुषु कर्मोत्पत्तौ" इत्यादि।

यश्चायमात्मा पूर्वोक्तो जीव । पूर्ववदन्यत् । मधु ब्राह्मणस्य जीवादीनां भेदविषयकं तात्पर्यं निगमयति—स वा इति । अयं परमात्मा यश्चतुर्दशसु पर्वसिषु नियामकत्वेन सर्वभूतस्यत्वेनोक्त । सर्वेषा भूतानामधिपतिस्तत्प्रेरकत्वात् । तन्मात्रस्यादुक्तमाधारण्यादाह—सर्वेषा भूताना राजेति । स्वातन्त्र्येण नियामक । ईश्वरत्वोपादानत्वभ्रम निरस्यन्नेव भेद व्यनक्ति—तद्यथेति । रथपद तदङ्गचक्रपर तस्य नाभिमंध्यम्, नेमि परिवि, अरा दीर्घकीलाः एवमेवास्मिन्परमात्मनि सर्वाणि भूतानि नियन्यत्वादिना सर्व आत्मानो जीवाश्च भोगद्वारानुग्राह्यत्वेन समर्पिता । एव च रथचक्रनेमिनाभीनामराणा च नोपादानोपादेयभाव । न वा तादात्म्य किन्तु भेदः किञ्चित्कार्यनिबन्धनश्च सङ्गेपन्तयाभूतजीवपरमात्मनामीति तात्पर्यम्। एवमुक्तामिप्रायामा मधुविद्याया प्राशस्त्यार्थमर्थवादमाह मन्त्रद्वयेन—इद वा इति । दध्यङ् तत्सज्ञ आथर्वणोऽश्वर्वसज्ञस्य मुनेरपत्यम्। अश्विभ्या देवभिषग्भ्यामुवाच प्रोक्तवान् स च वृत्तमर्थमृषिर्वेदः अवोचत् मन्त्रेण प्रतिपादितवान्। मन्त्रमाह—तद्वामिति। वा युवयोः तल्लोकोत्तरमुग्र रौद्रप्राय सत्ये मधुविद्याया लाभार्थमिद स आथर्वणशिरश्छेदादिकं वक्ष्यमाण कर्म आविष्करोमि प्रकाशयामि। क किमिव तन्यतुः सशब्दः पर्जन्यो वृष्टिमिवेति बृहदारण्यके ..... आविष्करोमि तन्यतुनं वृष्टिमिति मन्त्रे तन्यतुर्गर्जितमिति "स वा वृष्टिन्न तन्यतुः" इति मन्त्रे तन्यतुर्मेघ इति, "दिवश्चित्रं न तन्यतुः" इति मन्त्रे च तन्यतुरशनिरिति व्याख्यात तदेवाहोत्तरार्द्धं "ह प्रसिद्ध दध्यङ्डाथर्वण उत्कार्यमश्वस्य शीर्ष्णा शिरसा यन्मधु प्रोवाच ईमित्यवधारणार्थको निपातः। यद्वा ई इति उच्चारयन्नश्वो रे[ह्रे]षां कुर्वन् प्रोवाच तदाकृतं कर्मेति शेषः। दध्यङ्डाथर्वण इन्द्राय मधुविद्यामुवे तत इन्द्रेणोक्त मघन्यस्मै इमा विद्या वदसि ना शिरस्ते छेत्स्यामीति त कदाचिदश्विना ऊचतुर्मधु विद्यामावयोर्वहेति। स इन्द्रवृत्तान्तं प्राह। ततस्ताभ्यामुक्तं तव शिरः छित्त्वा स्वमायया क्वचिन्म्लानमेव स्थापयिष्यावः, अश्वस्य शिरः छित्त्वा स्वदङ्गे योजयिष्याव-। तादृशेन त्वयास्मत्सकाशे वाच्या। ततोऽश्वशिर इन्द्रेण छिन्ने स्वकीयमेव शिरो योजयिष्याव इति, ततस्तथैव तेन कृतम्" इति प्रथमंमाहरम्। इति मन्त्रसमाप्तिद्योतनार्थः। द्वितीयमन्त्रपूर्वार्धं स्पष्टार्थम्। अश्वशिरोयुक्तश्च स दध्यङ्डाथर्वणो मधु वक्ष्यामीति प्रतिज्ञाय वां युवाभ्या मधु प्रावोचत्। कीदृशं सत्यं मधु वक्ष्यामीति प्रतिज्ञारूपस्य सत्यवचनस्य आपः प्राप्तिस्तदर्थम् अन्यथा तद्भङ्गापत्तेः। त्वष्टा आदित्यः

तस्येदन्त्वाद्र प्रवर्ग्यं कर्म विज्ञान कृत्स्न गोप्यमात्मतत्त्वज्ञानाख्यमपि मधु ब्राह्मणतात्पर्यव्याख्यानार्थो मन्त्रौ । पुर इति । द्विपदा पदद्वययुक्ता पुर शरीराणि मनुष्यहीना चक्रे प्राधान्यादेषा पूर्वमभिधान चतुष्पदो गवादिशरीराणि तेषा यज्ञादिसाधनत्वात् । अपदा बहुपदा चेदमुपलक्षणम् । इद च सर्गाद्यकालाभिप्राय पुर पूव स परमात्मा पक्षौ इच्छाप्रयत्नाभ्या पक्षप्रायाभ्या युक्तो भूत्वा तयोर्नित्यत्वेऽपि सहकारिसमवधान विना फलानुपधानात्तदानीमव तद्वैशिष्ट्यम् । पक्षीपदस्य परेषामपि ज्ञानक्रियाशक्तिपरत्वेन विज्ञानमयो भूत्वेत्यर्थ । लाभाय लाक्षणिकत्वात् पुर पुरस्सर्वाणि स्वसृष्टानि जीवभोग्यानि शरीराण्याविशत् । तत्तदिष्टानिष्टप्रवृत्तिनिवृत्त्यादिमन्ति कृतवान् । तेषा स्वतस्तदनुकूलज्ञानाद्यभावादावेशोक्ति । तच्च स्पष्टम् । अग्रिममन्त्र व्याख्यास्याम । वीप्सार्थं प्रकटयति—स वा एष पुरुष इति । पुरि शेते उक्तसम्बन्धेनेति व्यत्ययात्परमात्मनोऽपि पुरुषपदवाच्यत्वम् । जीवस्य तु तदवच्छेदभोगवत्त्वेनेति तात्पर्यम् । नैतेन किंचनानावृत्त स्वजन्यकार्यान्वित न कृत तेन नित्यानामप्यावृतत्वलाभ । व्यापकत्वमाह—नैतेन किञ्चनासवृतमिति । सर्वमेव तदधिकपरिमाणाभावादिति भाव ।

ननु शरीरमात्रे सृष्टे सर्गाद्यकाले जीवाना कायकारणभावानभिज्ञत्वेनेष्टसाधनत्वज्ञानाधीनप्रवृत्त्यनुपपत्ते सर्वेषा तादृशत्वेनोपदेशकजीवान्तराभावेन परेच्छाधीनप्रवृत्तरप्यनुपपत्ते कथ लोकयात्रानिर्वाह इत्यत आह—रूप रूपमिति । द्वितीयो मन्त्र रूपरूपव्यवहारत्वावच्छिन्न प्रति वीप्सायामृते कर्मप्रवचनीयत्वाद् द्वितीया । रूपयति ज्ञापयतीति रूपो ज्ञापको बभूव परमात्मनोऽर्थाल्लाभ । तेनैव व्यवहारसमर्थस्तदानी जीवात्मान कृतास्तद्धेतुशब्दसङ्केतावगमादिद्वारेति भाव । यद्वा प्रतिरूपोऽनुकूल सन् रूप रूप सर्वान् व्यवहारान् बभूव प्राप्तवान् 'आधृषाद्वा" इत्यधिकारे चुरादिषु भूप्राप्तावित्यस्य पाठात्, णिजभावपक्षे परस्मैपदम् । [सा]कल्पिक तथा च कल्पद्रुमे भूड् भून् प्राप्तौ इति । व्याख्यात च कामधेनौ भावयतेऽत्र भवति भवते इति, एतेन छान्दसत्वादिति परास्तम् । ईश्वरस्य ईश्वरेऽस्य येन व्यवहारवत्त्वमित्याकाङ्क्षायामाह—तदस्येति । तद्व्यवहारानुरूपमस्येश्वरस्य रूप प्रतिचक्षणायानभिज्ञाना जीवात्मना शब्दशक्तिग्रहकायकारणभावज्ञानादिरूपज्ञानार्थं भवतीति शेष । "अस्तिर्भवन्तीपर' इति कात्यायनोक्ते । तत्तदनेकशरीरपरिग्रहेण स्वयमनेकान्व्यवहारान् कृत्वा जीवान् शिक्षयतीति भाव । ईश्वरस्य कथ शरीरोपादानमदृष्टाभावादत

आह—इन्द्र इति। मायाभिर्जीवादृष्टे पुरुरूपो बहुदेहस्तन्नीयते। ईड् गतावति देवादिकस्य रूपम्। तदुक्तमाचार्यै—

इत्येषा सहकारिशक्तिरखिला माया दुरुक्तीतितो
मूलत्वात्प्रकृति प्रबोधभयतो विद्येति यस्योदिता॥ इति।

स्वादृष्टाभावेऽपि जीवादृष्टबलादेव शरीर परिगृह्णाति। तद्व्यवहाराच्च व्युत्पत्तिर्जीवानामुदेति, इदानीन्तनवृद्धव्यवहारदर्शनादिव बालाना मित्यर्थ। तदुक्तमाचार्यै मायावत्समयादय" इति। प्रयोज्यप्रयोजककार्या धिष्ठातुरीश्वरस्यैव व्यवहारान्मायादिव्यवहारवत्तद्दर्शी व्युत्पन्नो भवति इति उपायदृत्त। अत एव 'नम कुलालेभ्य कर्मारेभ्यश्च वो नम" इत्यादि श्रुतय सगच्छन्ते। नन्वेकस्य युगपदनेकशरीरेन्द्रियसबन्ध कथमित्यत आह—युक्ता ह्यस्येति। दशशतानीति बहूनामुपलक्षणम्। हरय इन्द्रियाणि युक्ता सम्बद्धा। इन्द्रियाणि ह्यानाहुरित्यादौ हरित्वेनेन्द्रियाणा निरूपणात्। योगिनामपि स्वेच्छयानेकदेहाधिष्ठान योगसामर्थ्यादुपपद्यते किं पुनरीश्वरस्येति भाव। अत एवेन्द्रियादीना तदधीनत्वमाह—अय वै हरय इति। गौण सामानाधिकरण्य तन्मतेऽप्येतादृशस्थले मुख्यार्थत्यागस्यावश्यकत्वात्प्रत्यक्षानुरोधाच्च। दशशतपद बाहुल्यपरमिति स्पष्टयति—अय वै दशसहस्राणि न बहूनि वानन्तानि चेति। तावदुक्तशरीरावच्छिन्नानभिज्ञ इत्यर्थ। उपसहरति—तदेतद् ब्रह्मेति। अपूर्वं न विद्यते पूर्वं यस्मात् अविद्यमानपरस्वध्वसाधिकरणकालवृत्तिवस्तु यस्य निश्चिद्वस्वधिकरणकालवृत्तिध्वसाप्रतियोगीत्यर्थ। अनन्तर च भेदहीन द्वितीयनिष्ठात्यन्ताभावप्रतियोगिवदिति यावत्। आत्मीयरहित वा आ[रा]गादिराहित्यात्, अन्तरात्मरहित वा नियामकान्तराभावादिति जीवाद् वैलक्षण्यम्। "अन्तरमवकाशावधि परिधानान्तभेदतादर्थ्ये" इत्यमर०। अबाह्यमिति बहुव्रीहिणा व्यापकत्वलाभ। अय परमात्मा ब्रह्म बृहत्वात्सर्वानुभूत सर्वविषयकानुभवाश्रय। अतो दृष्टश्रुतया सर्वज्ञत्वानुपपत्त्या कुतर्कानवकाशो निराकरिष्यते च विशिष्य तत्सर्वमित्यास्ता विस्तर। अत्रैव तात्पर्यमुपसहरति—इत्यनुशासन वेद तात्पर्यमित्यथ।

यत्तु आद्यचरणेन नानारूपप्राप्तिर्ब्रह्मणोक्ता तत्किमर्थमत आह—तस्यानारूपत्वमस्यात्मना प्रतिपत्तये प्रतिष्ठापनाय प्रज्ञानघनस्य हि निरवधिकस्वभावस्य नानारूपत्वेनैव ससारिरूपेणाचार्यादिज्ञेयब्रह्मरूपेण

वा प्रतिख्यापन नान्यथा। अतोऽय नानारूपत्वादिन्द्र परमेश्वर एकरूपोऽपि मायाभिर्मिथ्यारूपैरभित पुरुरूप ईयते ज्ञायते। कथ नानारूपत्व माया-यास्तनाह—हि यस्मात् अस्यात्मनो रथिस्थानीयस्य हरयोऽश्वा इन्द्रियरूपा रथस्थानीये शरीरे विषयरूपदेशप्राप्तये आगन्तुकतया युक्ता सम्बद्धा। तथाहि काठकश्रुति —

आत्मान रथिन विद्धि शरीर रथमेव तु।
बुद्धिञ्च सारथि विद्धि मन प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचरान्॥ इति।

अतश्च हयादिनामागन्तुकत्वादात्मैव हरय अयमेव च दशादिरूपा विषया। नात्मान्यदस्ति ततस्मा र्यद्युपाधिशून्यत्वादेतदात्मस्वरूप ब्रह्मेत्यादि, तच्चिन्त्यम्, प्रतिचक्षणपदे णिजन्तभावेन व्याख्यानेऽप्याया-देशापत्ते। शुद्धस्य तु अनजो प्रतिषेधो वक्तव्य इति तदभावोपपत्ते। "बहुल सञ्ज्ञाछन्दसो' इत्यस्याश्रयेऽपि गौरवात्। मायाभिरित्यभेदार्थ-तृतीयापेक्षया कारकविभक्तित्वेन करणे तृतीयाया एव युक्तत्वाच्च। इन्द्रियाणामागन्तुकतया युक्तत्वेऽप्यागन्तुकस्य मिथ्यात्वमित्यस्य पूर्वमसिद्ध-तया नानारूपत्वमिथ्यात्वे हेतुत्वानुपपत्तेश्च। अय वै हरय इत्यादौ सर्वत्र बाधाय सामानाधिकरण्ये गौरवाच्च। एतेन तदेतद्ब्रह्मेत्यत्र तदेतच्छब्देना-विद्याकार्यमुद्दिश्य तस्य ब्रह्मत्व विधीयत इति व्याख्यानमपि निरस्तमिति दिक्। तदेतन्मध्वित्यादि श्रुत्यर्थ॥

अतोऽन्यदार्त्तमिति श्रुतिरपि न मिथ्यात्वे मानम्, अनित्यत्वपरतया परकीयैरेव व्याख्यानात्।

यत्तु आत्मन्यस्य सर्वस्य नाशित्वबोधनेन तेन हेतुना मिथ्यात्वानु-माने तात्पर्यं धूमोऽस्तीत्यादेर्वह्यनुमानवदिति, तन, वह्न्यादिस्वरूपस्य प्रमाणान्तरसिद्धत्वेन धूमादेश्च तथात्वेनावगततयात्वेऽपि मिथ्यात्वस्य तथात्वाभावेन तत्र श्रुतितात्पर्यस्य वक्तुमशक्यत्वात्। यदप्यार्त्तत्व पीड्य-मानत्व तया चान्यत्सर्वमतम्। आत्तमेतज्ज्ञाननिवर्त्यमिति, तदप्यसत्, इद पदस्य तज्ज्ञानेन लक्षणापत्ते.। नचेम ज्ञात्वेति ल्यब्लोपपञ्चम्या निर्वाह, समानकर्तृकत्वाभावात्। अन्यत्वे प्रतियाग्यन्वयार्थमत इत्यस्यावृत्या-पत्तेश्च। 'स्वात्मबन्धहर सर्वाद्वैतरहित आनन्दरूप सर्वाधिष्ठान-सन्मात्र" इति तापनीयादिश्रुतेरप्ययमर्थ —स्वात्मनो जीवस्य बन्धहर

ईश्वरतत्त्वज्ञानेन ससारनिवृत्तें द्वैतपदस्य प्रपञ्चसम्बन्धप्रयुक्तदु खादि-परन्या तच्छ्रुय सर्वाधिष्ठानत्वञ्च सर्वप्रेरकत्वादिरूप सन्मात्रत्व सर्वदा सत्त्वमिति। यदप्यत एव सम्बन्धाद दार्तं पीडित विनयोकृत दक्षसबन्धाद्दश्य मिथ्यासबन्धानिरूपणादिति, तदप्यसत्, एतत्सबन्धबलक्ष[णा]या आवृत्तेश्च सत्वादात्मनो दग्रूपत्व मानाभावाच्च। सबन्धनिरूपणबाधकाना च निराकरिष्यमाणत्वादन्यपदस्य प्रतियोग्यशे उथिताकाङ्क्षत्वेन तदन्वयस्यान्तरङ्गत्वाच्च।

वस्तुत "अथ हैनमुद्दालक आरुणि पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद् भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण" इति प्रत्रम्य "सोऽब्रवीत्पतञ्चल काप्य याज्ञिकाश्च यो वै तत्काप्य सूत्र विद्यात्तवान्तर्यामिणमिनि स ब्रह्मवित् स लोकवित् स देववित् स यज्ञवित् स भूतवित् स आत्मवित् स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्व याज्ञवल्क्य सूत्रमविद्वांस्ते चान्तर्यामिणमिमा ब्रह्मगवीरुदजसे मूर्द्धा ते विपतिष्यति" इत्यादिनान्तर्यामिप्रश्रय। "पृथिव्या तिष्ठन्" इत्यादि "य आत्मनि तिष्ठन्" इत्यन्तमुक्त्वा "अदृष्टो द्रष्टाश्रुत श्रोतामतो मन्ता नान्योऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्त्तं होद्दालक आरुणिरुपरराम" इति श्रूयते। ततश्च द्वैतेनोपक्रमादमृतत्वस्यात्मन्युक्त्या तदन्यस्मिंस्तद्व्यतिरेकरूपस्यानित्यत्वस्यैव वो[वक्तव्या]द्यात् तदन्यत्वावच्छेदेन चानित्यत्वान्वयस्यायोग्यतया तदन्यत्वसामानाधिकरण्यमात्रेणान्वये दोषाभावात्। सभवति यमयोरपदार्थत्वेन तात्पर्यगम्यत्वात् वेदतात्पर्यस्य च बाधिते व्यतिरेकनियमात्। यद्वा अन्योन्यदित्यनेन प्रतियोगिसजातीयस्यैव भेदानुपयोगिनो लाभात्। आर्त्तपदस्य च दु खाश्रयपरत्वान्न दोष। न च जीवत्वावच्छेदेनापि न दु खाश्रयत्वमुत जीवे तदभावात्। दु खाश्रयवृत्तिद्रव्यविभाजकोपाधिमत्त्वविवक्षाया त्वीश्वरबहिर्भावानुपपत्तिरात्मत्वजातेस्तत्रापि सत्त्वादिति वाच्यम्, कालानवच्छिन्नसमवायसबन्धेन दु खाश्रयत्वविवक्षाया प्रयोजनाभावेन कदाचिद्दु खवत्त्वेनैवावच्छेदकावच्छेदेनान्वयरक्षणात्। "यत्तदेष त आत्मा नान्योऽस्ति द्रष्टृ" इत्यादौ जीवैक्यापन्नब्रह्मण एव प्रकृतत्वेन तस्यैवात्र शब्दार्थत्वात्तदन्यत्वेन जीवोपादानमनुपपन्नमिति, तन्न, न वेत्यस्य वस्पष्ट इत्यर्थकत्वाज्जीवब्रह्मणोरैक्यस्यासिद्धेश्च। "यस्योभय हविरार्त्तिमार्च्छेद" इत्यादावर्थवशादार्त्तशब्दस्य नाशार्थत्वेऽपि दु खविशेष एव तच्छक्ते। "कामार्तां हि प्रकृतिकृपणाश्चेतनाचेतनेषु"

'रुद्रेषु विद्रावितमार्त्तमारात्' 'नृपा स्मरार्त्ता शरणं प्रवष्टुम्' इत्यादि-दर्शनात्। मतोन्मत्तार्त्तव्यसनेति याज्ञवल्क्योक्ते 'आर्तो व्याधिना" इति विज्ञानेश्वरव्याख्यानाच्च। एतेनोच्चस्तराह्मणस्थमप्यतोऽन्यदार्तमितिवाक्यं व्याख्यातमिति दिक्। अतोऽन्यदार्त्तमिति श्रुत्यर्थं ॥

अदृष्टो द्रष्टेतिश्रुतेस्त्वयमर्थं —दृष्टादिपद भावार्थकक्तप्रत्ययान्तचक्षुरादिजन्यज्ञानपर निषेधप्रतियोगित्वेन बहुव्रीहिणा व्याख्येयम्। तृप्रत्ययप्रकृतिभूतदृश्यादिपदानि च तत्समानफलज्ञानमात्रपराणि। तथा च चाक्षुषज्ञानरहितोऽपि तत्तुल्यज्ञानफलकज्ञानाश्रय इत्यादि। पश्यत्यचक्षु स शृणोत्यकर्ण' इति श्रुत्यन्तरेणैकवाक्यत्वात्। मतिपद मानसपर विज्ञानपद पूर्वोक्तान्यज्ञानपरम्। यद्वा अदृष्ट प्रत्यक्षात्मकज्ञानविषयोऽपि द्रष्टा तादृशज्ञानाश्रय प्रलये जीवाना तद्विषयज्ञानाभावेऽपीश्वरस्य सर्व विषय[क]ज्ञानसत्त्वात्। अश्रुत शब्दादिविषयोऽपि श्रोता तत्समानाकारकज्ञानवान्। मतिपदमनुमितिपर विज्ञानपदमुपमितिपर पारिशेष्यात्। अथवा द्रष्टा दर्शनानुकूलकृत्याश्रय चैत्रो जानातीत्यादौ ज्ञानानुकूलतत्समवेतकृतेरप्रसिद्धचा आख्यातस्याश्रयलाक्षणिकत्वोपगमेऽपीश्वरकृते कायमात्रजनकत्वादन लक्षणाया प्रमाणाभावात्। न चानुकूलत्वमसाधारणमेव धात्वर्थकृत्यो ससगतया भाति, ईश्वरकृतेस्तु ज्ञानादौ नासाधारणमनुकूलत्व कार्यत्वावच्छिन्नजन्यतानिरूपितहेतुताशालित्वादिति वाच्यम्, तत्र प्रयोगवशात्तथात्वेऽप्यत्रानुकूल्यस्य साधारण्येऽपि क्षतिविरहात्। न च कर्त्ताख्याताद्दश्यादिप्रकृतिके आश्रयत्वप्रकारकबोधत्वमेव कायतावच्छेदक कल्पत्त तत्कथ कृतिप्रकाराश्रयत्वससर्गबोध इति वाच्यम्, चक्षुर्जानातीत्यादौ ज्ञानजनकसयोगरूपव्यापारस्यैवाख्याताथतया तत्प्रकारकाश्रयत्वससर्गक बोधस्याप्यभ्युपगतत्वात्। किञ्च भवद्भिरप्यदृष्टो नयनज्ञानाविषय द्रष्टा नयनव्यापारस्य कर्त्ता अश्रुत श्रोत्रज्ञानस्याविषय श्रोता श्रोत्रव्यापारस्य कर्त्ता, इत्यादिरीत्या व्याख्यातम्। ततश्च दृश्यादीना नयनादौ लक्षणेति लक्षणाचतुष्टयमिति गौरवम्। अथादृष्टत्वादिक चाक्षुषादि[वृत्ति]फलावृत्तिविषयत्वात्। द्रष्टृत्वादिक चाक्षुषादिवृत्त्यवच्छिन्नचित्तात्म्यादित्याद्यभिप्राय इत्युच्यते, तदपि न, दृशिधातूत्तरधर्मप्रत्ययस्य यथाश्रुतफलविषयत्वार्थंत्वस्वीकारे आत्मा द्रष्टव्य इत्यदावन्वयापत्त, इत्यादि बोध्यम्। अत परमात्मनाभिन्न द्रष्टा चाक्षुषानुकूलकृतिमानास्ति तेन चक्षुरादेस्तदनुकूलव्यापार-

वत्वनापि न क्षति । श्रोता शब्दप्रत्यक्षानुकूलकृतिमानपि नास्तीत्यादिक याज्यम् ।

यत्तु अतोऽन्तर्यामिण अन्यो वस्तु भिनो द्रष्टा श्रोता च नास्ति तयोरैक्यादिति, तन, वस्तुत इत्यस्य कल्पने मानाभावात्, वास्तवभेदस्य तन्मतेऽप्रसिद्धे । व्यावहारिकभेदानिषेधे च तेषामपि व्याघातात् । एतेन श्राता श्रोतुर्जीवस्य स्वरूपमित्यपि निरस्तम् लक्षणापत्ते । यन रूपेण तस्य श्रातृत्व तदवच्छिन्नानुयोगिताकभेदस्य च तेरपि स्वीकारात् । एव च एतद्वै तदक्षर गार्गि दृष्ट द्रष्टृ श्रुत श्रोतुमत मन्तुविज्ञात विज्ञातुरिति ' गार्गी-ब्राह्मणस्य न दृष्टद्रष्टार पश्येर्न श्रुत श्रातार श्रुणुया न मतमन्तार मन्वाथा न विनानविज्ञानार विजानीया इत्युपस्तब्राह्मणस्थचैनत्समानाय कमव वाच्यम् । अदृष्टा द्रष्टति श्रुत्यय ॥

वेदाविरुद्धयुक्तीनामकँ तर्कंकुतूहले ।
बृहदारण्यकीयाना वाचामर्थंनिरूपणम् ॥

षष्ठोंऽशः

यत्तु श्रुतिस्मृत्यादिषु दृश्यमसद्वस्त्वपरमार्थमतात्त्विकमविद्यमानं स्वप्नसम मायामयमित्यादि निर्देश्यते तद्भोक्तृभोग्याना स्वकं प्रत्यविनाशि-त्वनियमादस्थिरत्वाभिप्रायम्। त्वदुक्तिमिथ्यात्वेऽसदादिपदाना वृत्तेरभावात्, कल्पनस्य च मानान्तरविरोधानुपपत्ते.। यत्तु भागवतम्—

तस्मादिद जगदशेषमसत्स्वरूप
स्वप्नाभमस्तधिषण पुरुदुःखदुःखम्।
त्वय्येव नित्यसुखबोधतनावनन्ते
माया तदुद्यदपि यत्सदिवावभाति॥ इति।

तस्यायं.—असत्स्वरूपमित्यस्य तात्पर्यमाह—स्वप्नाभमिति। स्वप्नवदा-भातीति स्वप्नाभमल्पकालभोग्यमित्यर्थः। अर्थाप्रतिबद्धा धिषणा तत्त्वधीर्येन तथापि रागविषय इति यावत्। सुखस्यापि दुःखसभेदमित्याह—पुरुदुःख-दुःखमिति। नित्यसुखज्ञानाश्रयेऽनन्ते नित्ये च नित्याना घटत्वादीनामपि नित्यघटादिवृत्तित्वादुभयत्र नित्यपदोपादानम्। त्वय्येव कारणे मायातो जीवादृष्टैरुद्यदपि सदिव नित्यवस्तुवदनुरागविषयोऽवभाति रागिणामिति यावत्। तस्माद्विषयेषु नात्यासक्तिः कार्येति तात्पर्यम्। अत एव भारते—

सत्त्व स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे।
अस्वातन्त्र्यात्तदन्येषामसत्त्व विद्धि भारत॥ इति।

इदं हि असत्त्वस्य मिथ्यात्वे तात्पर्यमिति भ्रमनिरासार्थम्। स्वातन्त्र्य-मन्यान्वयाद्यनुविधायिवृत्तिमत्त्वम्। तच्च कृष्णे परमात्मनि न त्वपरे जीवे अदृष्टेच्छाद्यधीनत्वात् तत्प्रवृत्तेः। अस्वातन्त्र्यादन्याधीनप्रवृत्या[त्ति]मत्त्वादेव तेषामसत्त्वमित्युच्यते न तु मिथ्यात्वाभिप्रायेणेत्यर्थं.।

यत्तु स्वातन्त्र्य तत्त्वज्ञानाभावप्रयुक्तस्थितिकत्वरूपपारतन्त्र्यशून्यत्व-मिति, तन्न, मानाभावात्। स्वाधीने च स्वतन्त्रशब्दस्य कोपप्रयोगादिना सिद्धे.। अन्यानधीनत्वे लक्षणायामप्यर्थसन्निकर्षात्। यत्तु "सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सन्" इत्यमरादौ स्वातन्त्र्यस्य सत्यत्वादिभिन्न-स्यार्थस्यानुक्ते. स्वातन्त्र्यस्य सच्छब्दार्थत्वे मानाभाव इति, तन्न; साधुत्वप्राप्त-

स्याऽभ्यर्हितत्वानामनुगतत्वेन यत्र यादृश तद्विवक्षित तत्र तस्यैव तदर्थत्वात्, स्मृत्युक्तार्थस्य परित्यागे मानाभावाच्च। अवस्तुपदेन तु कथ मिथ्यात्वलाभः? न हि वस्तुपद पदार्थमात्रसाधारण्यात् "अगोरणिच्चेति" तदुत्तरसूत्रे वस्तुशब्दस्य त्वसमभ्यर्थत्वेन सर्वैरेव विवृतत्वात्, नापि प्रयोगो मान ब्रह्मभिन्नेष्वपि वस्तुपदप्रयोगात्। प्रत्युत हि समन्वयसूत्रे भगवत्पादै—"ननु ज्ञान हि नाम मानसी क्रिया न, वैलक्षण्यात्। क्रिया नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च। यथा "यस्यै देवतायै हविर्गृहीत स्यात्ता ध्यायेद्वषट्करिष्यन्निति सन्ध्यां मनसा ध्यायेदिति" चैवमादिषु ध्यानं चिन्तनं यद्यपि मानस तथापि पुरुषेणाकर्तुमकर्तुमन्यथाकर्तुं शक्यं पुरुषतन्त्रत्वात्। ज्ञानन्तु प्रमाणजन्य प्रमाणञ्च यथानुभूतवस्तुविषयमतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्य केवल वस्तुतन्त्रमेव तत्र चोदनातन्त्रं तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा "पुरुषो वा गौतमाग्निर्योषा वा गौतमाग्निः" इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति केवलचोदनाजन्यत्वाद्विक्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा नापि पुरुषतन्त्रा किन्तर्हि प्रत्यक्षवस्तुतन्त्रैवेति ज्ञानमेव तत्र क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्" इति। मामत्यामपि "देवतासम्प्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षाध्यानक्रिययोषित्यग्निवस्त्वनुपेक्षाऽग्निबुद्धिः। न ह्यस्माद्विधेः प्राग् देवताध्यानं प्राप्त प्राप्त त्वधीतवेदस्य विदितपदतदर्थसबन्धस्य विदितशब्दन्यायतत्त्वस्य सदेव सोम्येदमित्यादेस्तत्त्वमसीत्यन्तात्पदसन्दर्भाद् ब्रह्मात्मभावज्ञानशब्दप्रमाणसामर्थ्यादिन्द्रियार्थसन्निकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्ती कुम्भानुभवः। न ह्यसौ स्वसामग्रीबललब्धजन्मा मनुजेच्छयान्ययाकर्तुमकर्तुं वा शक्यो देवताध्यानवत्, येनार्थवास्तत्र विधिः स्यात्। पुरुषचित्तव्यापाराधीनाया क्रियाया वस्तुस्वरूपनिरपेक्षता क्वचिद्विरोधिनी यथा देवताध्यान क्रिया, न ह्यत्र वस्तुरूपेण कश्चिद्विरोधः। क्वचिद्वस्तुस्वरूपविरोधिनी यथा योषित्पुरुषयोरग्निबुद्धिरित्यादि। अन्यत्रापनुष्ठान हि किं कल्पते? न वस्तु" इति। भट्टपादैरपि—

तेन भूरितिकर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामाहुर्भावना भावनाविदः॥

श्रीहर्षेणापि—

वस्तु वास्तु घटते न भिदाना योक्तनैकविधबाधविरोधै । इति ।

विष्णुपुराणे च—

ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्नं च वस्तुभूत॰ ॥ इति ।

ब्रह्मणो वस्तुत्वाभावोक्तेश्चापरिच्छिन्नत्वस्य वस्तुत्वेन तत्र विवक्षितत्वात् । अशेषमूर्त्तित्वव्यापकत्वाभिप्रायकत्वेन तद्विपर्ययस्य न तु वस्तुभूत इत्यनेन प्रतिपाद्यत्वात् । न च दृश्यमात्रस्य कथमवस्तुत्वोक्तिस्त्वन्मते व्यापकान्तराणा सत्त्वादिति वाच्यम्, न हि तवेव ममापि दृश्यपदमात्मपर किन्तु वैराग्यसम्पादनार्थत्वात्प्रकृतप्रबन्धस्य भोग्यवस्तुमात्रपरम् । न चाकाशादयो भोग्या इति दोषाभावाद् व्यापकत्वाभावोक्तिरप्यनित्यत्वतात्पर्या । न च परमाणुषु व्यभिचारः कालिकव्यापकत्वस्य विवक्षितत्वात् । सर्वमूर्त्तसयोगित्वरूपविभुत्वेन तस्याप्याक्षेपात् । यद्वा देशपरिच्छेद एव वस्तुपदेनोक्त, न च वैयर्थ्यं देशान्तरे तद्विपयस्याभावेन दुखहेतुत्वे तात्पर्यात् ।

यत्तु स्वप्नादिसाम्य मिथ्यात्वेन न त्वनित्यत्वादि प्रत्यक्षादिसिद्धित्वेन तदुक्तिवैयर्थ्यमिति तन्न, अदृष्टे स्वर्गादौ वैराग्यार्थमागमेन तद्बोधनस्यावश्यकत्वात् ।

न च कृतकत्वलिङ्गकानुमानेन तत्रापि गतार्थत्वमाक्षिप्य हेत्वेत्याद्यागमविरोधेन नरशिर शौचानुमानवत्तस्यानुत्थानात् । आगमसत्त्वे तु तत्सहकारेणानुमानस्य प्राबल्यमिति । उक्तञ्च तथैव वाचस्पत्यादौ—"अशत सिद्धिश्चावच्छेदकावच्छेदेन प्रवृत्ते माने न दोष इन्द्रजालिकमिव माय स्वप्न इव मिथ्यादर्शन कदलीगर्भ इवासार नट इव क्षणवेष चित्रभित्तिरिव मिथ्यामनोरमम्" इति । मैत्रायण्यादिश्रुतेरप्युक्त एवार्थ । तथाहि—इन्द्रजालजलादिरहितेऽपि जलादिभ्रमहेतुर्विद्याविशेष । यथा तदानीमेव गजादिनिर्माणम् । इन्द्रजालदृष्टाना वस्तूना स्वस्वासाधारणार्थक्रियाकारित्वविरहात् । तथा च मात्स्ये—

प्रकोपधृतताम्राक्ष कालनेमी रुषातुर ।
अभवत्कल्पमेघाभ स्फुरद्भूरिशतह्रद ॥
गम्भीरास्फोटनिर्ह्रादो जगद्धृदयघट्टक ।
आच्छाद्य गगनाभोग रविमाया व्यनाशयत् ॥—

शीत ववर्ष सलिल दानवेन्द्रबल प्रति ।
दैत्यास्ता वृष्टिमासाद्य समाश्वस्तास्तत. क्रमात् ॥
बीजाङ्कुरा इव म्लाना प्राप्य वृष्टि धरातले ।
ततश्च मेघरूपी तु कालनेमिर्महासुर. ॥
अस्त्रवृष्टि ववर्षोग्रा देवानीकेषु दुर्जयाम् ॥

इत्यादिमायामयाना तु तत्कार्यकरित्वान्मायावद्भेपु तथा तद्दर्शनात्, रावणादिष्वेन्द्रजालिकत्वव्यवहाराभावाच्च । "इन्द्रजाल तु कुमृति" इति कोपे तुशब्देन मायातो भेदस्य लाभाच्च । क्वचिदिन्द्रजाले मायापदस्य सत्त्वे च लाक्षणिकत्वाद्विशेषपदादस्त्वादौ नातिव्याप्ति, न वास्त्राणामपि लक्षत्व "विद्दीनमिव मायाभिरस्त्रैरेव वहिकृतम्" इति भेदोक्तेः । एतेन मिथ्याप्रकृतिकत्वस्य प्रपञ्चसाध्यताकाले तदिन्द्रजाले सिद्धन् । मिथ्यात्वेनानुभूयमानस्य शुक्तिरूप्ययोर्मिथ्याभूताज्ञानोपादानकत्वेन कल्पनत्वान्मायाशब्दस्य लोके मिथ्यात्वरूपत्वादिति निरस्तम् । शुक्तिरूप्ययोरनिरिकत्वासिद्धेरन्यथाख्यातेर्व्यवस्थापयिष्यमाणत्वात्, शुक्तिरूप्यस्य मिथ्यात्वानुमानाच्च । ततश्च प्रकृते इन्द्रजालपद तत्प्रकाश्यवस्तुपरं मायामय भ्रमात्मकज्ञानविषय । अयन्तु विशेष तत्र धर्मिणोऽपि तदवच्छेदेनाविद्यमानत्व प्रपञ्चे तु नित्यत्वाज्ञावभ्रम । एतेन स्वप्न इवेत्यपि व्याख्यातम् । अत एव तदभिमतमिथ्यात्वपरत्वभ्रमनिरासायाह—कदलीगर्भ इवासारमिति । स्वरूपेणानित्यत्वमुक्त्वा तद्विद्यमानत्वदशायामेव तद्भोगाभाव सूचयति—नट इव क्षणवेष इति । विद्यमानेऽपि नटे पश्चाद्भोगस्यानीयवेषस्य निवृत्तेः ।

किं धनेन करिष्यन्ति देहिनः क्षणभङ्गराः ।
मदर्थं धनमिच्छन्ति तच्छरीरमशाश्वतम् ॥

इति पुराणे तदर्थस्य स्पष्टत्वात् । यौगवासिष्ठेऽपि—

अजस्रमुपभुक्तेषु त्रैलोक्योदरवर्तिषु ।
भोगेषु भजदुद्वेग वलिरेवमचिन्तयत् ॥
प्रपातमानमधुरमावश्यकपरिक्षयम् ।
भोगेषभोगमात्र हि [illegible] ॥

इष्टस्य क्वचिन्मिलनमेव नेत्यभिप्रायेणाह—चित्रभित्तिरिव मिथ्यामनोरथमिति । मिथ्येतिफलानुपधानस्य मनोरमेतीच्छाविषयस्य सूचन "यावदस्य

प्रगल्भपाण्डवस्य जयद्रथरक्तेनैव मिथ्याप्रतिज्ञावैलक्षण्यसम्पादितमशस्त्र-मरणमुपदिशामि" इति वेणीसंहारे नि फले मिथ्यापदप्रयोगात् ।

मूर्द्धानुद्वृत्तकृत्ताविरलगलगलद्रक्तधारासहस्रै-
र्धौतेशाङ्घ्रिप्रिसादोपनतजगज्जातमिथ्यामहिम्नाम् ॥

इत्यादौ दर्शनाच्च ।

कर्मेन्द्रियाणि सयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारस्स उच्यते ॥ इति गीतायाम् ।

"मिथ्याचार सत्त्वशुद्धचभावेन फलायोग्यत्वात्पापाचार" इति सरस्वतीभिर्व्याख्यानाच्च । "मृषा मिथ्या च वितथे" इत्यमरेऽपि वितथत्वस्य नैफल्य एव पर्यवसानात् । "अवितथमदाध्याते रोषान्मुनावभिधावति" इत्यादौ साफल्यस्य तद्विपर्ययत्वेनाभिधानाद्वाक्यस्यापि फलविसवादित्वेनैव मिथ्यात्वात् । अत एव "भ्रान्तप्रतारकवाक्ये मिथ्यात्वव्यवहारो नास्ति मिथ्याशब्दस्यार्थमाचष्टे" इति न्यासकृता व्याख्यातम् । स्वरादिदोषेण हि विवक्षितार्थानुत्पादकत्वान्मन्त्रनै फल्यमेव—

मन्त्रो हीन स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमान हिनस्ति यथेन्द्रशत्रु स्वरतोऽपराधात् ॥

इति शिक्षायाः पठ्यमानत्वात् । मन्त्रशब्दस्य शब्दमात्रपरत्वमित्याशयेन महाभाष्ये "दुष्ट शब्द स्वरत" इत्यादे. पठितत्वात् । ततश्च "स्वर-वर्णादिदोषा एव पदस्य मिथ्यात्वतान्यतात्पर्यात् । अत एव मिथ्याप्रयुक्तो यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तर स्वरवर्णदोषात्प्रतिपादयन् 'अत एव तमर्थमाहेत्यर्थं" इति शब्दकौस्तुभे । एतेन मिथ्यापदस्य दुष्टार्थकत्वे दुष्टजलादावपि मिथ्यात्वव्यवहारापत्तिरिष्टापत्त्यैव परिहार्या मिथ्योत्तर-मिथ्यादौ दुष्टार्थतत्प्रयोगस्य मितक्षरतादिसिद्धत्वात् "मिथ्याप्रव्रजितो रणे" इत्यादिदर्शनाच्चेति दिक् ।

यत्तु भागवतम्—' मृतेऽर्थं यत्प्रतीयेत" तत प्रत्यय स्यात् विशेष्य-निष्ठात्यन्ताभावप्रतियोगिधर्मप्रकारक यज्ज्ञानम् । यदित्यत्र क्रियाविशेषणत्वा-त्क्लीवत्व 'इद गम्यने' इत्यादिवत्सकर्मकत्वेऽप्यविवक्षितकर्मकत्वाद्भावे लकार , नेह पच्यत इत्यादिवत् । तन्मामागदार्थं विद्यादिति परैरपि व्याख्या-तत्वात् । न प्रतीयेत न विश्वस्येत च यत्प्रकारकज्ञाने सति कदाचित् कस्य-

चिदप्रामाण्यज्ञानं भवत्येवेति यावत् । ज्ञानञ्च प्रमा, तेन कस्यचिद् घटविशे-
ष्यकघटत्वप्रकारकज्ञानेऽप्यप्रामाण्यशङ्कोदयेऽपि न क्षति* । न कस्यचिद्भ्रमे-
ऽप्रामाण्यज्ञानानुदयेऽपि दोष । अत एवात्मनोत्युक्तम् । यत्किञ्चिदात्मनिष्ठा-
प्रामाण्यज्ञानस्य तदुपादानेनैव लाभात् । तात्पर्ये तु पूर्वोक्तमात्र न भ्रमशरीर
समोगाभावादिप्रमाणमतिव्याप्ते । किन्तु द्वितीयचरणस्यात्यन्ताभावे
प्रतियोगिविरुद्धत्वतात्पर्यतया विशेष्यनिष्ठप्रतियोगिविरुद्धात्यन्ताभावप्रति-
योगिधर्मप्रकारकमेवावच्छेदकभेदमन्तरेण वृत्ते सयोगतदभावज्ञानस्य
प्रमात्वेन तत्र कस्याप्यप्रामाण्यभ्रमाविरहात्, एकावच्छेदेनोभयावगाहने च
भ्रमत्वस्य स्पष्टत्वात् । यथाभास इति । आभासशुक्त्यादौ रजतादिज्ञान तद्-
भ्रमत्वस्य लोकेऽपि प्रसिद्धत्वादाह—यथा नभ इति । नील नभ इति ज्ञान-
मित्यर्थ. । एवञ्च मद्रीत्या भ्रमशरीरस्य समस्तस्य पूर्वार्द्धे लाभात् । यदपि
रजतादिभ्रमोपादानाज्ञानस्य शुक्त्याद्यवच्छिन्नचैतन्यमधिष्ठान वियदाद्युपा-
दानाज्ञानस्य त्वनवच्छिन्नमेव चैतन्यमन्यस्य सविकल्पितत्वादित्याशयेनात्म
इत्युक्तम् ।

नन्वेव स्वप्रकाशस्याधिष्ठानस्य सर्वदा भानात्कथ तत्रारोपस्तत्राह-
न प्रतीयेत यात्मनीति । आत्मनि परमानन्दरूपे न प्रतीयेत इति यत्तदपि
माया, पूर्णानन्दस्वप्रकाशस्फुरणरूपप्रतीत्यभावरूपमज्ञान जगदुपादानमपि
तादृशमायेति यावत् । तथा च स्वप्रकाशेऽप्रकाशस्य कल्पितत्वात्तन्मूलको-
ऽन्यस्य सर्वस्यारोप । अर्थाभावे प्रतीयमानत्वे दृष्टान्तमाह—यथाभास
इति । शुक्तिरूप्यादौ रूप्य' 'भास । प्रकाशस्वरूपे तदभावत्वेन
कल्प्यमाने यथातम इति । मध्याह्नमूर्योलोके तदभावत्वेनोलूकै. कल्प्यमान
तम इत्यर्थ इति, तदपि चिन्त्यम्, न प्रतीयेत इति यत्तदपि मायेत्यनेक
पदाना कल्पत्वात्, एकस्यैव वाक्यार्थस्यावगम्यमानत्वाच्च । अर्थाभावे
प्रतीयमानत्वस्य शुक्तिरूप्यादावसिद्धे च परेण प्रामाणिकरूप्यस्य तत्र प्रती-
त्यभ्युपगमात् ।

यत्तु गौतमसूत्रैरेव प्रपञ्चो मिथ्या, तथाहि-"एकस्मिन् भेदाभावा-
द्भेदशब्दप्रयोगानुपपत्तेरप्रश्न । बुद्ध्या विवेचनात्तु भावाना यायार्थ्या-
नुपलब्धिस्तन्त्वपकर्षेण पटानुपलब्धिवत् । तदनुपलब्धिः स्वप्नविषयाभि-
मानवदय प्रमाणप्रमेयाभिमान. । मायागन्धर्वनगरमृगतृष्णावद्वा । मिथ्योप-
लब्धेर्विनाशस्तत्त्वज्ञानात्स्वप्नविषयोपलब्धिप्रणाशवत्प्रतिबोधे । बुद्धेश्चैवनिमि-
त्तसद्भावोपलम्भात् । तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्ति. ।

दोषनिमित्ताना तत्त्वज्ञानादहङ्कारनिवृत्ति । दोषनिमित्त विषया सकल्प-कृता । तन्निमित्त त्ववयव्यभिमान । विद्याविद्या द्वैविध्यात्सशय ॥" इति चतुर्थाध्यायसूत्राणीति तदसत्, तेषा पूर्वपक्षसूत्रत्वात् । अहो आश्चर्यं 'नाभाव उपलब्धे" इत्यादिषु स्वसिद्धान्तसूत्रेषु शेषमपि प्रक्षिप्याद्वैतानयन परकीयाणि च पूवपक्षसूत्राण्यादायापि द्वैते तात्पर्यनिरास इति । अथेमेऽसत्ख्यैकान्त-वादा" इत्युपक्रम्य 'सर्वमेकमद्वैतवादस्य" प्रथममेव न्यायसूत्रभाष्यादौ निरासाच्च । तथाच तन्त्रान्ते तात्पर्यटीकाया वाचस्पतिमिश्रै• 'अद्वैतादि-ष्वेकान्तयु प्रेत्यभावो न तात्त्विको भवेदपि तु काल्पनिक । न केवलप्रेत्य-भावोऽपि तु षोडशापि पदार्था । तदेतेषा यत्तत्त्वज्ञान तस्य विवेकार्थमेका-न्तवादा परीक्षिता' इति । उक्तमेतिसूत्र हि अवयव्यनङ्गीकर्तृविज्ञानवादिनो युक्त्यनुवाद । यद्वाचस्पत्यं 'यदि हि पटस्तन्तुभ्यो भिन्नो भवेत्तन्तुव्यतिरे-केण गौरवाच्चातिरेकेणोपलभ्येत, न चोपलभ्यते, तस्मात्पट इति मिथ्या-बुद्धिरिव तन्तुरित्यपि मिथ्याबुद्धिरशुभ्यो भेदेनानुपलम्भात् । एवमशु-रित्यपीति । तदनेन क्रमेण परमाणुष्वपि बुद्धया विध्या विविच्यमानेषु यायात्म्यानुपलब्धेर्न बाह्य वस्तु स्थूल वा घोदीयो वास्तीति सर्वा एव बुद्धय स्वाकारमबाह्यतया आलम्बासमिथ्याभूता" इत्यादि । एतच्च दूषित व्याहृतत्वादहेतुरिति । यस्य विविच्यमानस्य याथात्म्यानुपलब्धिस्तत्कु-तश्चिद्विवेचनीयम्, अवध्यभावे तदनुपपत्ते । तथा च तेनावधिना क्वचि-दवस्थातव्यम्, अनवस्थाया नुटेरमेयत्वप्रसङ्गादित्युक्तम् । तस्मात्परमाणुषु वा तत्सयोगेषु च तेनावस्थातव्यम् । तथा च—

'यतो विविच्यते भाव स एवास्यावधिर्यथात्म्येनोपलभ्यत" इति ।

बुद्धयविवेचनस्य सर्वभावानुपपत्त्या व्याघात एव प्रमाणस्यापि सर्वभावान्तर्गतत्वे तदनुपपत्तौ सर्वभावानुपपत्तेरनुपपत्ति । अपृथग्ग्रहणस्या दित्यस्यापि कोऽर्थ किं विलक्षणबुद्धयवेद्यत्वम्, उत देशभेदाभाव, किं वा तल्लुव्यतिरेकेण देशान्तरेऽनुपलम्भ इति । नाद्य पटबुद्धेस्तन्तुबुद्धिवैलक्षण्यात् । न द्वितीय, तत्तु पदयोरशुतन्तुरूपदेशभेदात् । नान्त्य, तन्तुभ्योऽन्यनादर्शा-नस्य भेदेऽपि तदाश्रितत्वेनोपपत्ते । प्रमाणस्यानुपपत्तौ सर्वभावानुपपत्तेरनु-पपत्तिरित्यत्र विज्ञानवादिप्रत्यवस्थान स्वप्नविषयाभिमानवदय प्रमाणप्र-मेयाभिमान इति, अत्रापि वाचस्पत्यव्याख्या 'न खलु वास्तवप्रमाण-प्रमेयभाव किन्त्वनादिवासनानिबन्धनकल्पनाधीन । यथा हि न स्वप्ने

सन्ति परमार्थतो विषया अथ च प्रतिभान्ति कल्पनामात्रेण तस्मात्सावृते-नैवापरमार्थसत्ताप्रमाणप्रमेयभावेन बाह्यार्थशून्यता सिद्ध्यति परमार्थसतो प्रत्ययाना मिथ्याप्रत्ययानामपि तत्त्वप्रतिपत्तिहेतुतादर्शनाद्रेखागवयादिना सत्यगवयादेरङ्गमात् ।

ननु स्वप्नप्रत्ययाना मिथ्यात्वेऽपि न जाग्रत्पदार्थतो नयास्त्व तेषामत्य-न्तवैलक्षण्यादत आह विज्ञानवादो—मायागन्धर्वमृगतृष्णावद्वेति । जाग्रत्प्रत्य-यवादसिद्धिरित्यनेन यद् वाचम्पत्यं स्वप्नज्ञानस्यायाथार्थ्यमिच्छता बाधक-मन्तरेण तदनुपपत्तेर्जाग्रत्प्रत्ययोऽस्य बाधको वक्तव्य । न चासावसमीचो-नत्वद्भावयितुमुत्सहते इति समीचीनत्वं जाग्रत्प्रत्ययस्याभ्युपगन्तव्यमित्यादि । माध्यमिकस्तु मिथ्याबुद्धिदृष्टान्तेन बाह्यापह्नव कृत्वा तेनैव दृष्टान्तेन विज्ञाना-भाव कृत्वा विचारासहत्व भावाना तत्त्वमिति मेने । तद्दूषणाय सूत्रम् "बुद्धेश्चैव निमित्तसद्भावोपलम्भाद्" इति । अर्थे निषिद्धे हि भवेदप्येतत्, तद्व्यवस्थापने तद्बुद्धाप्रत्यूह बुद्धिसद्भावोऽपि सिध्यति । नचैव वादिनः प्रमाणमस्ति अतना सप्रमाणेन विचारासहत्व भावाना व्यवस्थापयन् श्लाघनीयप्रज्ञो देवाना प्रिय इति । न च कल्पनामात्रनिर्मित उपालम्भस्तत्त्व-ज्ञानाय पर्याप्तः । न च वनस्पतितत्त्वज्ञानस्य मिथ्याहस्तिज्ञाननिबन्धनम्, अपितु प्रणिहितमनस इन्द्रियार्थविशेष एव । न चासौ मिथ्याज्ञानसमय आसीत्, न च मोहाभ्यामसमीचीनाय ज्ञानाय कल्पते स हि मोह एव दृश्यतीत्यादि माध्यमिकोऽनुभूय मानी मिथ्याबुद्धि नापह्नोतुमर्हतीति । तथा च मिथ्याबुद्धि प्रतिनद्यमानेन तस्यानिमित्त वक्तव्यमित्युक्तम् । तत्त्वप्रधानभेदाच्च मिथ्यामिथ्याबुद्धि प्रति द्वैविध्योपपत्ति । अत्रमिथ्याबुद्धि-पद तन्निमित्ते लाक्षणिकम्, अन्यथा व्याघातात् । तथा च मिथ्याबुद्धि-निमित्तस्य द्वैविध्यमित्यर्थ । प्रस्तावे द्वितीयाह्निके च मिथ्याज्ञाननिरूपणे "केचिदद्वैतमाकारसत्यज्ञानमि · · सत्त्वपुद्गलान्यताख्यातिरित्यपरे, धर्मपुद्गलनैरात्म्यज्ञानमित्यन्ये । धर्मनैरात्म्य हि भावनैरात्म्यम्, पुद्गलनै-रात्म्य तैर्थिकाभिमतात्मनि स्वभावमिरयर्थः । शरीरेन्द्रियाद्यनित्यत्वातिरिक्त-नित्यादमदर्शनमिति वृद्धा." इत्युल्लासादिमतानि निरस्य "अनात्मग्रहोऽहम-स्मीति मोहोऽहङ्कार" इति वार्तिकमुपादाय सर्वस्येयमात्माशी. कृमेरपि मानुभूय प्रभासमिति सोऽयमीदृशोऽभिनिवेशः शरीरादीनात्मत्वेनाव्यवस्यतो भवति, नात्मनत्त्वं विदुष. । स खल्वहिनिर्ल्वयिनीमिव । अहिः स्वतो व्यतिरिक्तं शरीरादि पश्यन् न तत्र स्निह्यति स्नेहविरहान्न तप्यते नाप्यनुशोचति, इत्यं

तत्त्वज्ञानवत ससारस्तद्वतस्तन्निवृत्तिरिति वाचस्पत्योक्तार्थम्। "दोषनिमित्ताना तत्त्वज्ञानदहद्वारनिवृत्ति" इति सूत्रम्। तन शरीरादिष्वात्मबुद्धौ निवर्त्तयितव्यायां तत्त्वज्ञानास्त्र प्रसख्यान विषये सुकरमिति। तनैव प्राथमिकस्य प्रथम प्रयत्नो युक्त इति। "दोषनिमित्त रूपादयो विषया सकल्पकृता" मिथ्याज्ञान सकल्प तेन विषयीकृता इत्यर्थ। विज्ञानवादिसौत्रान्तिकवैभाषिकास्त्वर्थजीवनमनङ्गीकुर्वतोऽर्थाभावज्ञानमेव प्रसख्यानमाहुस्तन्निराकरणाय सूत्रम्। तन्निमित्त त्ववयव्यभिमाननिमित्त तन्त्वादितद्विशिष्टविषया सञ्ज्ञा। प्रियाया कामुको दन्तौष्ठनासिकादीनवयवानभावयस्तस्या प्रसक्तो भवति। अवयवानुव्यञ्जन तेषामनुव्यञ्जन सादृश्य तदारोप। तथा च स्त्रैणानां व्यवहार —

द्रवत्कनकनिर्मलद्युतिरनङ्गलीलैकभू-
मंहेभकटविभ्रमस्तनभरालसाङ्गी यदि।
प्रिया न परिरभ्यते धुलितसिद्धमजीवनी
सहेमहि कुतोऽन्यतो विषमबाणबाणव्यथाम्॥

मदनसरितमेना गाहमानो जनोऽय जघनपुलिननाभीमण्डलावर्त्तरम्याम्।
मुखमलिनसनाथामुल्लसद्भ्रूनतोर्मि चिरविरहहुताशायासमुद्गाचकार॥

विवेकिनस्त्वशुभसञ्ज्ञा भावयन्त प्राहु —

मज्जामस्थ्नामथ प्लीहायकृता शकृतामपि।
पूर्णा स्नायुशिरास्यूता स्त्रिय सर्गप्रसेविका॥

ऋषयोऽप्यूचु —

स्थानाद्बीजादुपष्टम्भानिस्पन्दान्निधनादपि।
कायमाधयशौचत्वात्पण्डिता ह्यशुचि विदु॥

तस्माद्विविधस्यासौ कामिनीलक्षणो विषय। तथा रागादिप्रहाणार्थमवयवादिसञ्ज्ञागोचरत्व परित्यज्याशुभसञ्ज्ञागोचरत्वमेवोपादेयवैराग्योत्पादनार्थं यथाविषसम्पृक्ते मधुनि विषसञ्ज्ञेति। अवयविसशयोपपत्त्यर्थं विद्याविद्याद्वैविध्यात्सज्ञानसूत्र "विद्याविद्ये उपलब्ध्यनुपलब्धी सत्सलूपलभ्यते यथा तडागे तोयम्, असद्वा यथा मरुमरीचिकायाम्, सदपि नोपलभ्यते यथा चिरनिखात भूमौ निध्यादि, असच्च तथा यथा भूतले दृश्यमाने तुल्योपयो-

न्यतो घटादि । यथैव यद्यवयव्युपलभ्यते तथापि सशय । अथ नोपलभ्यते तथापि सशय इत्यर्थ । अवयवी चैकदेशेनावयवे वर्त्तत इत्यवयवसमूहमात्रमवयवी प्राप्नोति" इति वार्तिकम् । तत्र टीका "अवयवे वर्त्तमानो ह्यवयवीत्युच्यते । अवयवेषु देशाश्चेदवयवेषु वर्त्तन्ते एकदेशा एव तर्ह्यवयविन , ते च नानेति अवयवसमूहमात्रमवयवी प्राप्नोति । नावयवी क्वचिदवयवे वर्त्तते तदेकदेशाना तनावयवे वृत्ते । यत्रावयवेऽवयविन एकदेशो वर्त्तते तत्रैव ग्रहीतव्य तथैकस्मिस्ततो घटैकदेशो वर्त्तते इति तत्तावेकस्मिन्घटो दृश्यत । सिद्धान्तवायाह—एकस्मिन्भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्न । एकदेशावयवी न स्वावयवेषु वर्त्तते, इत्यत्र प्रतिज्ञार्थेऽवयवान्तराभावादित्यहेतु । कस्माद्यद्यवयवान्तरमेवावयविनो भवति तथाप्यवयवान्तराण्येवावयविनोऽवयवान्तरेषु वर्त्तन्ते किमापतितमवयविवृत्तेरिति । एवञ्चानेकत्र वर्त्तत इति प्रतिजानान किञ्चार्थेन किमेकदेशेनेति नानुयोज्य । कस्मा ज्जभयेन वाप्येनैकदेशेन वा नानात्वैकार्थसमवायिना एकस्यावयविनो व्याघातात्" इत्यादि ।

प्रकृतमनुसराम । न च स्वकल्पनयैव सूत्रमद्वैतपरत्वेन व्याख्येयमिति वाच्यम् , अद्वैतनिराकरणपरस्पष्टार्थकसूत्रविरोधात् । प्रमाणादितत्त्वज्ञानेन निःश्रेयसप्रतिपादकाद्यसूत्रविरोधाच्च । चतुर्थाध्यायप्रथमाह्निके शून्यत्वोपादान त्वनिरस्य 'ईश्वर कारण पुरुषकर्मफलदर्शनाद्" इति । अस्यार्थ —मा भूदय प्रपञ्चशून्योपादानो भविष्यति ब्रह्मैव हि प्रपञ्चरूपेण परिणमते, मृत्तिकैव घटशरावोदञ्चनादिभावेन । न चैव नित्यत्वव्याघात परिणामेऽपि तत्त्वाविघातात्तल्लक्षणत्वाच्च नित्यतामा । यदा ह्यस्मिस्तत्त्वेन विहन्यते तदापि नित्यमिति परिणामवाद । विवर्त्तवादस्तु ब्रह्मैवानाद्यविद्योपधानभेदानामरूपप्रपञ्चभेदेन विवर्त्तते मुखमिवैकमनेकमरिक्तकृपाणदर्पणादिभेदानेकविधप्रतिबिम्बभेदेनेति ।

न च जीवकर्मनिबन्धन एव नामरूपप्रपञ्चोऽस्तु इति वाच्यम् , पुरुषस्येच्चेतयैव निष्फलकर्मारम्भे तत्र निष्फलत्व त्वविद्वान्प्रवर्त्तमान कथञ्चेतनो नाम, तस्मात्पुरुषकर्मालोचनात्तस्मादीश्वर कारणमित्येतद्दर्शनद्वयाकरणाय सूत्रम् "न पुरुषकर्माभावे फलानिष्पत्ते" इति । इदमत्राकूतम्—न तावन्मृत्तिकेव नामरूपप्रपञ्चभेदेन ब्रह्म परिणमते, तद्धि सर्वात्मना वा परिणमते एकदेशेन वा ? नाद्य , तत्त्वव्याघातादनित्यत्वापत्ते । नान्त्य ,

सावयवत्वेऽनित्यत्वादन्यथा व्याघातात्। अथ तत्त्वेनानुगतस्य परिणाम, तत्त्व ब्रह्म न तर्हि ब्रह्मण परिणाम, न च निभाग्यस्यैव त्वस्य स्वसवेदन-प्रत्यक्षस्य विपरीतज्ञानगोचरत्वसम्भव। सामान्यतो ग्रहे रूपविशेषाग्रहे च तदन्यरूपेण विभ्रमो दृष्ट, शुक्तिकादौ न जातु शुक्तिस्वरूप विद्वान् रजतमिति पयवस्यति। न च निरशे स्वसवेदनप्रत्यक्ष ब्रह्मणि तत्स्वरूपाग्रह सामान्य-ग्रहो वा भवति। तस्मादीश्वरो जगद्धेदेन विवर्तत इत्ययुक्तमित्यस्याकरे व्यवस्थितत्वात्। तस्माद्गौतमस्याद्वैते तात्पर्यमिति कल्पन साहसमात्रम्।

यत्तु चतुर्थाध्यायान्ते आरम्भादिप्रक्रियाया हेयत्वमद्वैतमतस्य च ग्राह्यत्व सूत्रभाष्ययोरुक्तमिति, तदप्यसत्, तत्त्वज्ञानोत्पत्तिविवृद्धिपरिपालनो-पायस्यैव तत्रोक्तत्वेनाद्वैतमतस्याशतोऽपि बाह्यत्वानुक्ते। तत्र हि दोष-निमित्ताना तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्, तत्र तत्त्वज्ञानोत्पत्तिस्तावदा-गमतो वानुमानतो वाहङ्कारनिवृत्तिपर्याप्तदोषनिमित्तपूत्पन्नतत्त्वज्ञानानामपि पूर्वमत्याहृतस्य मनसस्तत्त्वबुभुत्साविशिष्ट आत्मना सयोग प्रत्याहृतस्येति विक्षेपनिवृत्ति। इन्द्रियेभ्य प्रत्याहृतस्य मनस क्वचित्पुण्डरीकैकदेशे आत्मनि निजौकसि धारकेन प्रयत्नेन धार्यमाणस्यात्मना सयाग इत्यर्थ। सुषुप्तिवारणाय तत्त्वबुभुत्साविशिष्ट इति। तदभ्यासश्च तद्विषयधारकप्रयत्नो-त्पादपौनरुक्त्यम्। तस्मादादरनैरन्तर्यदीर्घकालसेविता तत्त्वबुद्धिरुत्पद्यते इत्यर्थ। तत इन्द्रियविषयैरपहृतस्य मनसो न धारणा तदभ्यासाभावान तत्त्व-साक्षात्कार इत्याशङ्क्य समाधानसूत्रम्- पूर्वप्रकृतफलानुबन्धात्तसिद्धि'। पूर्वकृत समाधे फल सस्कारस्तस्यानुबन्ध स्थैम्ना तस्मादित्यर्थ। कस्मात्त त्कल्पमिति चेन्न, प्रयत्नविशेषा हि विशरारवो बहवोऽपि परस्पर न सभवन्तो न तत्त्वसाक्षात्काराय पर्याप्ता तत्सस्काराणा तु स्थैम्ना सभवति, सभूयकारित्व समाधिविशेषमात्रस्य तत्त्वज्ञानसहननत्वव्यवच्छेदाय सूत्रम्- तदर्थं यमनिय-माभ्यामात्मसस्कारो योगाच्चाध्यात्मविध्युपाय' समानमाश्रमिणो धर्मसाध-नमहिंसासत्यमस्तेय ब्रह्मचर्य इति यम। आश्रमिणामसाधारणा धर्मोपायो नियम। सस्कारस्त्वधर्महान धर्मोपचयश्च। योगपद पातञ्जलपरम् अध्यात्म-विधिस्तप प्राणायाम प्रत्याहारो ध्यान धारणेति। इन्द्रियविषयेषु च प्रसख्यानाभ्यासो रागद्वेषनिषेधार्थ। उपायो यागाचारविधान एकाकिता आहारविशेष एकस्मानवस्थानमित्यादि। एतेषा तत्त्वज्ञानोत्पादद्वारेणा-पवर्गसाधनत्वम्।

नन्वेवमान्वीक्षिकीवैयर्थ्यात्ततः सूत्रम्—"ज्ञानग्रहणाभ्यासास्तद्विद्यैश्च सह सवादः" तदर्थमित्यस्यानुवृत्तिः। ज्ञानमान्वीक्षिकीरूपात्मविद्या तस्याः ग्रहणमध्ययन धारण चाभ्यासः सततक्रियातद्विद्यैश्च सवादः प्रज्ञा-परिपाकार्थः। प्रज्ञापरिपाकस्तु देहाद्यतिरिक्त आत्मा उत नेति सशयच्छेदन विज्ञातार्थविबोधावसितार्थाभ्यनुज्ञानमव्यवसित प्रमाणेन तस्याभ्यनुज्ञान तर्केण तद्विद्यैस्सह सवाद इत्येतद्विभज्यते। त शिष्यगुरुसब्रह्मचारि-मित्रसूभिरभ्युपेयात्। ब्रह्मचारी सहाध्यायी गुरुशिष्यसब्राह्मणेभ्योऽन्य शास्त्रेण विशिष्ट.। श्रेमोऽर्थिनश्च श्रेयसि मोक्षलक्षणे श्रद्धा, तेषामपवर्गे श्रद्धादर्शनात्तदुपायाभ्यास प्रागभावीय इत्यनुमीयते। न तेषामपि प्रागभावीय-सस्कारवशात्प्रतिभोपासनोयेऽभ्युपेयादभिमुखमुपेयात् गुर्वादिभिस्सहेत्यर्थं। तदनेन गुर्वादिभिर्वाद कृत्वा तत्त्वनिर्णय उक्त। यदि च मन्येत पक्षप्रतिपक्ष-परिग्रहः परस्य गुर्वादेः प्रतिकूल तस्मान्न वादोऽप्युचित इति, तन्नेद सूत्रमुप-तिष्ठेत "प्रतिपक्षहीनमपि वा प्रयोजनार्थमधित्वे" तमभ्यनुपेयादित्यनुवर्त्तते। पुरतो गुर्वादेः प्रज्ञामुपादित्समान' आत्मनः शरीरादिभ्यो भेदमद्दिबुभुत्सेति स्वतत्त्वबुभुत्सा प्रकाश्य च पक्षमनवस्थापयन् गुर्वादिकृताद्विचारात्पूर्व-पक्षोदयेन सिद्धान्तव्यवस्थापनलक्षणात्स्वदर्शन परिशोधयेत्। अन्योऽन्य-प्रत्यनीकानि च प्रावादुकाना दर्शनान्ययुक्तपरित्यागेन युक्तपरिग्रहेण परिशोध-येत्। बुध्यवादस्यैवेयमीदृशी दशा तत्त्वनिर्णये दत्तजलाञ्जली तर्हि जल्पवि-तण्डे। अत. स्वपक्षरागेण चैके न्यायमतिवर्त्तते "तत्त्वाध्यवसायसरक्षणार्थं जल्पवितण्डे बीजप्ररोहसरक्षणार्थं कण्टकशाखावरणवद्" इति सूत्रम्। अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणा तदयं घटमानानामेतदित्यर्थः। न केवलमिदमेव किन्तु जल्पवितण्डयोः प्रयोजनान्तरमप्यस्तीत्याह—विद्या-निर्वेदादिभिश्च परेणावज्ञायमानस्य "ताभ्या विगृह्य कथनम्" इति सूत्रम्। यस्तु कुदर्शनबलाहितमिथ्याज्ञानावलेपपटुविदग्धतया सिद्धविद्यावैराग्याद्वा लाभपूजाख्यात्यर्थया कुहेतुभिरीश्वराणा जनाधाराणां पुरतो वेदब्राह्मणपर-लोकादिदूषणप्रवृत्तस्य प्रतिवादी समीचीनं दूषणप्रतिभया अपश्यन् जल्पवित-ण्डेऽवतार्य जल्पवितण्डाभ्यां विगृह्यातत्त्वकथन करोति। विद्यापरिपालनाय माभूदीश्वराणा मतिविभ्रमेण तच्चरितानुवर्तिनीनां धर्मविप्लव इति, इद-मपि प्रयोजन 'जल्पवितण्डयोर्नतु लाभख्यात्या दृष्टं नहि परहितप्रवृत्तः परमकारुणिको मुनिर्दर्शनार्थं परमासनोपायमुपदिशतीति तत्र सर्वैकवाक्यतया फलितार्थः। अद्वैतविद्याया ग्राह्यत्वमत्र न कुत्राप्युक्तमित्यास्ता तावत्।

यत्तु यदग्ने रोहित रूपमिति श्रुत्यर्थो "धुद्भ्याविवेचनाद्" इति सूत्रेणोक्त' अत एवोक्तसूत्रार्थस्तोटकाचार्यैरुक्तश्रुत्यर्थत्वेनोक्त प्रतिदर्शयिपुर्वसनस्य यथा वितथत्वमापास्यति तन्तुगुणमपकृष्य तु तन्तुसमन्वित य ज्वलनप्रमुखस्य तयोक्तवतीति यदग्नेरित्यादि श्रुतिरितिशेष । मायेत्यादिना इन्द्रजालमिव मायामयमित्यादि श्रुत्युक्त, मिथ्येत्यादिना यत्र हि द्वैतमिव भवतीत्यादिश्रुत्युक्त, सकल्पकृता इत्यादिना एतत्सर्वं मन एवेत्यादिश्रुत्युक्तश्चाऽपरिहार्यस्तर्क उक्त इति, तदप्यसत्, विज्ञानवाद्युक्तयुक्तेरेव तैरनूदितत्वात्, अनुवादानुवादत्वे प्रमाणाभावात् । वस्तुतो वेदान्तिनामपि सैव युक्ति, तदशे ब्रह्मवादिविज्ञानवादिनोरविशेषात् । "अयमेव सौगतब्रह्मवादिनोर्विशेष" इत्यादिना खण्डनादौ आत्मनस्तात्त्विकत्वोपगममात्रेण वेदान्तिना सौगताद्विशेषोक्ते । कथञ्च लोके पटस्य मिथ्यात्व बुबोधयिषु सूत्रमपाकरोतीति निर्णीत महापटनाशस्यैव तेन बोधयितु शक्यत्वात् । पटत्वेव तद्वृत्तित्वनियामकसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावस्यैव भवन्मते मिथ्यात्वदूषणपरतयैव व्याख्यातत्व । यदग्नेरित्यादिश्रुतेर्मिथ्यात्वप्रतिपादकश्रुतेर्मिथ्याप्रतिपादकत्वमपि पूर्वमेवापास्तमित्यास्ता विस्तर । एवमन्या अपि श्रुतय स्मृतिपुराणेतिहासाश्च सुधीभिर्व्यूह्येया ।

तुल्यस्तत्र यथाश्रुतार्थविरहोऽस्माक परेषामपी-
त्येषा रीतिरुरीकृता बहुविरोधाना तिरोधायिका ॥

अपि च असत्त्वमिथ्यामनोरथत्वमायामयत्वादि यदुक्तमस्मिन् तैरैहिकामुष्मिकभोगरागत्यागायत्यसदायतित्वम् । अत एव पार्थसारथिमिश्रैरुक्त "तस्माद् ब्रह्मण प्रशसार्थेऽस्यामित्वेनासत्त्वमुपचरद्भिरौपनिषदैर्वाक्यैस्तदनुसारिभिश्चेतिहासपुराणैर्भीताना वाक्यतात्पर्यमजानता न्यायाभियोगशून्याना प्रलापोऽयमद्वैतवाद इत्युपेक्षणीय" इति । न्यायसूत्रमालायां न्यायपञ्चाननैरप्युक्त 'तमेव भान्तमनुभाति सर्वं एतस्यैवानन्दस्य नित्यज्ञानम्" इत्यादिश्रुत्या ब्रह्मणो ज्ञानादिरूपता । तदपि रूप कल्पितमिथ्यार्थमिमात्र सत्यमित्यादिक यथाश्रुत बलसिद्ध प्रमाणगम्यस्य मिथ्यात्व तदवगम्यस्य मननदशाया न्यायविदर्थश्रुत्यर्थविचारनिर्णयमिति ।

मा हि पार्थं व्यपाश्रित्य येऽपि स्यु पापयोनय ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परा गतिम् ॥
किं पुनर्ब्राह्मणा पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुख लोकमिम प्राप्य भजस्व माम् ॥

इति । तस्मा एवमोपनिषद ' भिलापीयाया श्रुति प्रणिदधाति मादाभिधाने अस्थान एव रभसा मासासाध्यतापृथग्देवहन्ति । एतेन यत्खण्डनकर्द्धिरत्न 'श्रुतिरद्वैते प्रमाणमिति चेन्न श्रूयते खल्वेकमेवाद्वितीय नास्ति किञ्चनेत्यादि सिद्धार्थाना श्रुतीनामन्यपरत्वमपि स्यात् तथापि पदसमन्वयबलेन तासु प्रतीयमानमर्थमबाधितमादायैव तासामन्यपरी-क्षणात्, धिया स्वत प्रामाण्यस्य बाधकैकापोढत्वात्" इति, तत्सर्वम-पास्तम्, बाधकाना पूर्वमेव प्रपञ्चितत्वात्, पदसमन्वयस्य च द्वैतपरत्वेनैव सम्भवेऽस्याद्वैतपरत्वे प्रत्युत प्रातिकूल्यस्यैव बहुशो दर्शितत्वाच्च । यदप्युक्तम्—

एक ब्रह्मास्त्रमादाय नान्य गणयत क्वचित् ।
आस्ते न धीरवीरस्य भङ्ग समरकेलिषु ॥ इति ।

तत्राप्येव प्रतिवक्तव्यम्—

ब्रह्मास्त्रमालम्बतो दम्भदाडिमानीत्याद्या गिर समरसोमनि तद्बलेन ।
तद्वैदिभि सह समागममागतस्य जागर्त्ति वागपि जय प्रतिरागत किम् ॥
आपातनो यदिदमद्वयवादिनीनामद्वैतमाकलितमर्थतया श्रुतीनाम् ।
तत्त्वप्रकाशपरमार्थविदेव भूत्वा निष्पीडितादहह निर्वहते विचारात् ॥

इत्यपि परास्तम्, तत्र ह्येवमस्माभि पठनीयम्—

आक्षेपतोऽपि न यदद्वयवादिनीनामद्वैतमाकलितमर्थतया श्रुतीनाम् ।
तत्त्वप्रकाशपरमार्थविदेव भूत्वा निष्पीडितात्किमिति निर्वहते विचारात् ॥

इति । अथ पदसमन्वयमप्यनादृत्य मदभिमतार्थं श्रुतिबोध्य इति चेत्, सत्यम्, मानविरोधिन्यर्थे तात्पर्यमुदीर्य सम्मत पूर्वमपदार्थोऽपि तदुक्तामिथ्या-वादित्वमादिशद्वैधा । यत्तु तन्नोक्तमद्वैते किं प्रमाणमिति प्रश्नादेवाद्वैत-सिद्धिरिति, तन्न, प्रश्नस्याप्रमाणत्वात् । न च प्रश्नापेक्षितार्द्वैतज्ञानोपपादक-वाक्यकत्वेन तदाक्षेप इति वाच्यम्, न हि प्रमाणावगतस्यैव प्रश्नापेक्षणीयत्व त्वद्व्याख्यावगतस्यैवाद्वैतस्य तथात्वापत्ते । तत्साधकप्रामाण्ये च विप्रत्ति-पत्ते सुलभत्वात् । अन्यथा शृङ्गित्व कथ शशीयत्वमित्यादिनोऽपि शशशृङ्गा-दिसिद्धिप्रसङ्गात् । एतेन तवाद्वैतज्ञान यदुत्पद्यते तत्करण मया प्रमाणरूप वक्तु प्रभित्यन यमानियमादिति परास्तम् । ग्रन्थारुटत्वद्वादादेव ममाद्वैतज्ञानो-त्पत्तेः स्ववाक्यप्रामाण्यस्य त्वयावश्यमुपपाद्यतया तदर्थं त्वदभियोगस्यावश्य-

कर्तव्यत्वात् स्ववाक्यप्रामाण्यस्य त्ववस्थापयितुमशक्यत्वे तव भङ्गप्रसङ्गात् । यदप्ययुक्तपचयमनिर्वचनीय साधयाम किन्तु चिदात्मनि स्वप्रकाशे भरमालम्ब्य सुखमास्महे इति, तन्न, अकथकत्वेन त्वदुक्तदूषणाना कथाबहिर्भावादसाधकत्वापत्ते । इतिदिक ।

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले ।
अद्वैतश्रुतितात्पर्यं शङ्कराख्या निराकृतम् ॥
सद्विद्वत्पदवाक्यमाननिगमाकूपारपारङ्गम-
श्रीलक्ष्मीधरलब्धबोधजनुषा विश्वेश्वरेणोदिते ।
अस्मिंस्तर्ककुतूहले परिहृतप्रत्यर्थिकोलाहले
मिथ्यात्वस्य कदर्थितोऽर्थवशत श्रुत्यर्थताविभ्रम ॥

॥ भवानीशङ्कराभ्या नम ॥

॥ इति प्रथम परिच्छेद ॥

— * —

द्वितीयः परिच्छेदः

तर्ककुतूहलम्

सप्तमोंऽशः

कर्कटज्वलदर्कोऽमर्कसम्पर्ककर्शे ।
पथि पाथोधरच्छाया काचिदालम्बत मम ॥ १ ॥
अध्यक्षादिविगानतः पदगतेर्मर्यादया च श्रुते-
रद्वैतावगमेऽन्तरिक्षसुमन सब्रह्मचारीकृते ॥
तच्छायामुपजीव्य लब्धपदतामासेदुषामद्वये
मानानां प्रमितिं प्रति प्रवणता तत्सौरभोरस्यभूत् ॥ २ ॥

यत्तु "प्रत्यक्षमेव मिथ्यात्वे मान घटोऽस्तीत्यादावस्ति त्वशब्देन ब्रह्मसत्ताया प्रतिपन्नस्य घटादेर्घटो नास्तीति प्रत्यक्षेण तस्यामेवाभावावगाहन-मिति" विवरणोक्तेः स्वसमानाधिकरणस्यावच्छिन्नवृत्तिकात्यन्ताभावस्य प्रतियोगित्व हि मिथ्यात्वम्। न चोक्तप्रतौ वस्तुतो घटाधिकरण सत्ता मातापि तत्त्वेन न भातेति न मिथ्यात्वशरीरभानमिति वाच्यम्, तथापि फलतो मिथ्यात्वभानस्यावश्यकत्वात्। घटोऽस्तीति ज्ञानानन्तर जाय-माने घटो नास्तीति ज्ञाने अस्तित्वाशे घटतदभावयोर्भाने बाधकाभावात्। प्रत्यक्षज्ञाने शब्दव्युत्पत्तिविरोधासभवात्। तत्त्वज्ञाना प्रपञ्चाधिकरणत्वेन गृह्यमाण एव तदभावप्रत्यक्षाच्चेति, अत्रोच्यते,

अस्तिनास्तीति धोर्भावाभावसत्ता विगाहते ।
नायंभेदो दवीयान्स्यादुल्लेखोल्लिख्यमानयो ॥

उक्त प्रत्यक्षस्य तदुक्तार्थविषयकत्वे मानाभाव । घटोऽस्ति घटो नास्तीत्यस्य च क्रमेण घटे सत्ताभावप्रतियोगित्व चावगाहमानत्वात्। घटे सत्ताश्रयत्वविषयकप्रत्यक्षेण सत्ताया घटाधिकरणत्व सत्ताविरहाव-गाहिना च प्रत्यक्षेण सत्ताया घटाभावाधिकरणत्वमवगाह्यत इति कल्पनस्य विवर्जितत्वात्। सत्ताया ब्रह्ममानघसंत्वस्य चासिद्धे । प्रत्यक्षेण च घटादिनिष्ठतयैव तद्ग्रहेण वैपरीत्यात्। सत्ताया घटादिनिष्ठात्यन्ताभाव-प्रतियोगित्वसिद्धावपि हि सत्प्रतीतेर्भ्रमत्वमेव स्यात्। न तु सत्ताया घटाधि-करणत्वविषयकत्वम्।

न च घटोऽस्तीति शब्देन तथा बोधेऽपि तदुल्लिख्यमानप्रत्यक्षस्य यथोक्तविषयकत्वमेवेति वाच्यम्; घटप्रकारकभूतलविशेष्यकसंयोगसंसर्गक-प्रत्यक्षस्य घटसंयोगप्रकारकभूतलविशेष्यकसमवायससर्गकशाब्दबोजनकेन घटवद्भूतलमिति शब्देनोल्लेखेऽपि घटावृत्तिभूतलमित्यादिशब्देनानुल्लिख्य-मानत्वात्। अगत्या उल्लेख्यज्ञाने सासर्गिकविषयतापन्नस्य प्रकारत्वेनोल्लेखक-ज्ञाने भानेऽप्यत्यन्तविप्रकर्षाभावात्। एतेन घटोऽस्तीति ज्ञानानन्तरमित्या-द्यपि परास्तम्। अस्तित्वांशे घटतदभावयोस्तदविषयत्वस्य सर्वानुभव-सिद्धत्वात्। फलतो मिथ्यात्वभानमित्यप्ययुक्तम्, घटो ब्रह्म, अधिकरण-मभाव, प्रतियोगित्वमित्यादिवद्विशिष्टशरीरानवगाहिज्ञानस्य तदपर्यवसायि-त्वात्। स्वाधिकरणवृत्तित्वस्याऽभावांशेऽवच्छिन्नवृत्तिकान्यत्वस्य च तत्र कथमप्यभानाच्च मिथ्यात्वशरीरप्रविष्टप्रतियोगित्वस्य प्रतियोगित्वत्वावच्छि-न्नत्वेन, घटो नास्तीत्यत्र संसर्गत्वेन भासमानस्य तु तस्य तदनवच्छिन्नत्वेन भासमानतया वैषम्याच्च यत्किञ्चिद्घटकपदार्थभानमात्रेण स्वकल्पितपदार्थ-सिद्ध्यभिधाने चातिप्रसंगात्।

किञ्च भवन्मतेऽपि कपालावच्छिन्नसत्तैव घटाश्रयो न तु केवलसत्ता. तत्कथं फलतोऽपि स्वसमानाधिकरणेत्यादिमिथ्यात्वशरीरभानम्। न चोप-हितशब्दयोरैक्यात्तथेति वाच्यम्, कपालान्यावच्छिन्नसत्ताया अपि तादृशत्वेन घटव्यधिकरणात्यन्ताभावप्रतियोगित्वस्य घटेऽवगाहनेनाप्युक्तप्रतीतिपर्यव-सानापत्ते। न हि घटस्य ब्रह्मनिष्ठाभावप्रतियोगित्वरूप मिथ्यात्व भवदभ्यु-पगतम्; इष्टापत्ते। किन्तु कपालनिष्ठावच्छिन्नवृत्तिकात्यन्ताभावप्रति-योगित्वमेव। तच्च दुर्लभप्रतीतिकमेव। घटज्ञानस्य कपालविषयकत्व-नियमानाभावात्। अथ कपाले घटो नास्तीति प्रत्यक्ष विवक्षितमिति चेत्, मैवम्, किमत्र कपालवृत्त्यभावप्रतियोगित्व घटस्य विषय, उत सत्तावृत्त्य-भावप्रतियोगित्वम्, अथ कपालावच्छिन्नसत्तावृत्त्यभावप्रतियोगित्वम्? नाद्य, अविवादात्। अत एव न द्वितीय, अनुभवविसंवादाच्च। नान्त्य, कपाल-सत्तयोरवच्छेद्यावच्छेदकभावस्य तद्विषयत्वे उक्तिसंभवाभावात्।

अपि च कपाले घटो नास्तीति प्रत्यक्ष घटकालावच्छेदेन न भवती-त्युभाभ्यां सप्रतिपक्षम्। उक्तञ्च दीधितौ "इहेदानीं घटो नास्तीति प्रत्यक्षे सामयिकोऽत्यन्ताभावो विषय" इति। पूर्वापरकालयोश्च कपाले घटाभावो मयापि स्वीक्रियत एवेति न तावता मिथ्यात्वप्रत्यक्षनिर्वाह। यत्तु काल-

विशेषावच्छिन्नवृत्तिक एवाभावस्तत्र भासत इति नाशङ्कनीयम्, काल-विशेषावच्छेदेन सम्बन्धानन्त्यकल्पने गौरवात्। अभावस्य सर्वदा सर्वत्र सम्बन्धाङ्गीकारात्। यद्देशकालावच्छेदेन प्रतियोगी गृह्यते नद्देशकालावच्छेदेन तदभावो न गृह्यत इत्यनास्माकमप्यविप्रतिपत्ते। तत्तत्कालीनसन्निकर्षविशेषादे शक्तिविशेषेण प्रतिबन्धकत्वात्। अत एवाभावस्यावच्छिन्नवृत्तिकत्वानङ्गीकाराद् घटावच्छेदकदेशकालावच्छेदेन तदभावो वर्तत इति वाक्यस्य न प्रामाण्यम्। घटे घटो नास्तीत्यस्य तु प्रामाण्यमिष्यते परैरपि। उक्तं हि दीधितिटीकादौ—'ज्ञायमानघटत्वादिसामान्यस्यातीतानागत-घटादावभावेन व्यभिचरितत्वात् प्रत्यक्षे कारणत्वासम्भवेन घटत्वादि-सामान्यज्ञानस्य तत्कारणत्वापत्तस्वीकार' इति। घटे प्रागभावध्वंसकालावच्छेदेन तत्प्रतियोगित्ववैशिष्ट्यस्येव घटत्वाभाववैशिष्ट्यस्याङ्गीकार्यत्वात्। घटावच्छेदककालावच्छेदेन घटत्व घटे नास्तीत्यस्य तु पूर्ववदेवास्माकमप्य-प्रामाण्यमित्यादि, तत्रेद वक्तव्यम्—घटावच्छेदककालावच्छेदेन घटाभाव कपाले न गृह्यत इत्युभाभ्या सम्प्रतिपन्नम्। अभावोऽवच्छिन्नवृत्तिरनवच्छिन्न-वृत्तिर्वेति त्वन्यदेतत्। एव स्थिते घटसत्त्वकाले कपाले घटो नास्तीति प्रत्यक्षाभावात्तत्समानाधिकरणात्यन्ताभावप्रतियोगित्वस्यापि न प्रत्यक्ष-विषयत्वम्। प्रागेव तूक्ताभावनिष्ठानवच्छिन्नवृत्तिकत्वस्य. तस्मादभावस्यान-वच्छिन्नवृत्तिकत्वे तावन्न प्रत्यक्ष प्रमाणम्, नापि युक्ति. प्रतियोगिदेशावच्छेदे-नाप्यभावस्य वृत्तौ चक्षु सयुक्तविशेषणतावैशिष्ट्यरूपकारणासत्त्वेन तत्प्रत्यक्षा-पत्ते। अस्य तत्कालीनसन्निकर्षविशेषादेः शक्तिविशेषेण प्रतिबन्धकत्वमिति चेन्, न; तदापत्तया विषयाभावादेव तत्र न घटाभावप्रमेत्यस्य युक्तत्वात्। तदभावाना हेतुत्वकल्पने गौरवात्तेषामप्यनवच्छिन्नवृत्तिकत्वापत्त्या प्रति-बन्धककालेऽपि कार्योत्पत्त्यापत्तेश्च। एवञ्च प्रतिबन्धकाभावाधिकरण य. प्रतिबन्धकाभावसहितकारणकूटाधिकरणक्षणोत्तरक्षणस्तत्त्वस्य कार्यव्याप्यत्व न तु प्रतिबन्धकाभाव: कारणमित्यादिनापि न निस्तार। प्रतिबन्धकाधि-करणक्षणस्यापि प्रतिबन्धकाभावाधिकरणत्वेनापत्तेर्दुर्वारत्वात्। एव प्रति-बन्धकाधिकरणावृत्तित्वमपि न प्रतिबन्धकाभावे विशेषणमप्रसिद्धे। नापि प्रतिबन्धकानधिकरणवृत्तित्वम्; तद्धि प्रतिबन्धकाधिकरणत्वाभाव-वद्वृत्तित्वमेव। तच्च प्रतिबन्धकाधिकरण एव प्रतिबन्धकाधिकरणत्वाभाव-स्वरूपतदाप्यस्त्येव। तस्यापि त्वया मिथ्यात्वोपगमात्। तस्मादुक्ताभावस्य समवायावच्छिन्नवृत्तिकत्व विना न निर्वाह इत्यादि योज्यम्।

तत्कालीनसन्निकर्षादे शक्तिविशेषमवच्छेदकीकृत्य प्रतिबन्धकतेक्य-सम्पादनमप्ययुक्तम्। तत्कालीनत्व हि प्रतियोगिप्रत्यक्षकालीनत्व वस्तुगत्या यत्काले तद्देशावच्छेदेन प्रतियोगी वर्त्तते तत्कालीनत्व वा। सन्निकर्षोऽप्यभावेन्द्रिययावा, इन्द्रियाधिकरणयोर्वा, इन्द्रियप्रतियोगिनोर्वा ? न तावद्घटचाक्षुपकालीनचक्षु सयुक्तविशेषणतायास्तादृशचक्षुर्भूतलसयोगस्य तादृशचक्षुर्घटसयोगस्य वा प्रतिबन्धकत्वमिति नय आद्यपक्षा. सभवन्ति। तथाहि प्रथमतो घटचक्षु सयोगरूपघटचाक्षुपकारणस्येव चक्षु सयुक्तविशेषणतारूपघटाभावचाक्षुपकारणस्यापि सत्त्वात् समूहालम्बनरूपमुभयचाक्षुप दुर्वारम्, तदानी घटचाक्षुपाभावेन यथोक्तप्रतिबन्धकाभावसत्त्वात्। न च प्रतियोगिज्ञानविलम्बेन प्रथम घटमात्रचाक्षुपोत्पत्ति घटघटत्वयोर्निर्विकल्पकस्य प्रतियोगितावच्छेदकप्रकारकत्वाभावेन तदभावज्ञानानुपयुक्तत्वात्। अनन्तर च प्रतिबन्धकसपत्त्यैव न घटाभावचाक्षुपमिति वाच्यम्, यत्र घटचाक्षुपसामग्री घटाभावव्याप्यवत्तापरामर्शश्चास्ति तत्र घटाभावे चाक्षुपहेतुसन्निकर्षस्यापि सत्त्वात्, भिन्नविपयकानुमितिसामग्रीसत्त्वेन घटचाक्षुपानुदयात्समानविपयकप्रत्यक्षसामग्रीसत्त्वेन घटाभावानुमितेरप्यनुदयाद् घटाभाव चाक्षुपस्य दुर्वारत्वात्। परामर्शस्यैव तत्र प्रतियोगिज्ञानस्थानीयत्वात्। इतराविशेषणत्वेन प्रतियोग्युपस्थितेरभावज्ञानानङ्गत्वात्। अन्यथा घटाभावप्रत्यक्षापारानुपपत्ते। न च तत्र समानविपयकप्रत्यक्षसामग्र्यविशिष्टघटाभावानुमितिसामग्र्यभावेन तदा घटचाक्षुपोत्पत्तौ बाधकाभाव इति वाच्यम्, तावतापि घटतदभावोभयविपयकरामूहालम्बनात्मकचाक्षुपम्यापत्तेरपरिहारात्। सिद्धान्ते तु तत्र घटाभावविरहेण तच्चाक्षुपसामग्र्येव नास्तीति वैपम्यम्। एवमुत्तरोक्तमपि पक्षत्रय न साधीय। यदा वस्तुगत्या भूतले सन्नपि घटो न ज्ञात तदानी घटाभावचाक्षुपानुपपत्ते। न चेष्टापत्तिरनुभवविरोधात्। सिद्धान्ते तद् भ्रमात्मकम्, परेषा तु प्रमेति विशेष।

घटावच्छेदकेत्यादिकमपि विपमम्। परमते देशाद्यशेऽवच्छेदकत्वावगाहनप्रत्युक्तमप्रामाण्यम्, सिद्धान्ते तु घटाभावावगाहनप्रयुक्तम्। ततश्च घटाभावावच्छेदकत्वाभाववति तदवच्छेदकत्वावगाहित्व तज्जन्यशाब्दस्य भ्रमत्व तदपेक्षया च घटाभावाभाववति घटाभावावगाहित्वरूपस्य तस्यावच्छेदकत्वाशरीरत्वेन लघुत्वात्। घटे घटत्वमित्याद्यपि तादृक्। कालविशेषावच्छिन्नविशेषणतासम्बन्धेनैव तज्ज्ञानस्य सिद्धान्ते प्रमाणत्वात्। परस्परया

तु निरवच्छिन्नविशेषणतयैव तथात्वात्। न चेष्टापत्तिः; घटसत्त्वकालीनघटे घटत्वाभावो नास्तीत्याद्यनेकप्रत्ययाना भ्रमत्वापत्तेः। घटावच्छेदककालावच्छेदेनेत्यादिकमप्ययुक्तम्, घटप्रागभावध्वसकालावच्छेदकीकृत्य जायमानाना घटे घटत्व नास्तीत्यादिज्ञानानामप्रामाण्यापत्ते। एवमिहेदानी घटो नास्तीत्यादेरप्यप्रामाण्यकल्पनापत्तिरुद्भाव्या। यदपि तद्घटनाशकालावच्छेदेन तद्घटवति तद्घटो नास्तीति तु कालावच्छिन्नाभावावगाहि चेदप्रमाणमेव। मीमासकमते ककारानुपलम्भकाले इहेदानी ककारो नास्तीत्यादौ प्रतियोग्युपलम्भत्वरूपेण प्रतियोग्युपलम्भस्य भावमेतद्देश [भवन्मते तद्देश]-कालावच्छिन्न यथा वगाहते तथा मन्मते एतद्देशकालावच्छिन्नत्वरूपेण प्रतियोग्युपलम्भस्याभाव प्रतियोगिन एव वा, एतद्देशकालावच्छिन्नत्वसबन्धेनाभाव चेदवगाहते तदा प्रमाणमेवेत्यादि. तदपि चिन्त्यम्, विना बाधक प्रतीतेर्भ्रमत्वान्यविषयकत्वादिकल्पनायोगात्। तादृशशाब्दस्थले एतद्देशकालावच्छिन्नत्वावच्छिन्नप्रतियोगिताकघटोपलम्भाभावविषयताया. दुरुपपादत्वात्। उपलम्भरूपस्य तदभावप्रतियोगिन. पदादनुपस्थितत्वात्। लक्षणादिविलष्टकल्पनस्य च गौरवकल्पकभावाभ्या पराहतत्वात्।

किञ्च स्वीयस्य प्रतियोग्युपलम्भस्याभावस्तत्र विषयोऽन्यदीयस्य वा? नाद्यः, व्याघातात्। नान्त्य, परज्ञानस्य पर प्रत्यतीन्द्रियत्वात्। यत्र च तादृश चाक्षुष जायते तत्रोक्तधर्मावच्छिन्नप्रतियोगिताकप्रतियोग्युपलम्भाभावविषयकत्वेन तत्प्रत्ययस्य दुर्लभत्वात्। ज्ञानस्य चक्षुराद्ययोग्यतया तद्भावस्य चाक्षुषाद्यनुपपत्ते। एतद्देशकालावच्छिन्नत्वस्याभावविशेषणत्वेन प्रतीयमानस्य प्रतियोगितावच्छेदकसबन्धकुक्षिनिक्षेपानर्हत्वाच्च। इहेदानी घटाभावो नास्तीत्यादौ तथापि गत्यभावाच्च। तत्रोक्तसबन्धेन सर्वदा घटाभावस्याभावसत्त्वेन प्रतियोगिसत्त्वकालेऽपि तादृशप्रत्ययापत्ते। घटाभाववत्त्वेनोभयसिद्धभूतलस्थले च इहेदानी घटाभावो नास्तीति प्रत्ययस्य सर्वानुभवविरुद्धत्वात्।

यत्तु प्रतियोगिकाले तद्भावसत्त्वेऽप्योपनिषद्दर्शनापरिशीलित पुरुष प्रत्यावृतत्वस्वीकारादेवावकाशोपपत्तिरत एव गवादौ गोत्वाभावधियो न भ्रमत्वमिति, तदसत्, नरविषाणादावप्येव शपथोपन्यासापत्ते। गवादौ गोत्वाभावज्ञानानुत्पत्तिप्रसगात्। तस्य भ्रमत्वापत्तेश्च। एव कारणत्वादेरतिरिक्तपदार्थत्वेऽपि कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वादिबुद्धेस्तद्व्यञ्जकत्वावश्यकत्वात्तत्राप्यनुपपत्तिः। परशेत्या दण्डत्वादेरपि घटाद्यव्यवहितपूर्वक्षणावच्छिन्नकपालवृत्त्यभावप्रतियो-

गितावच्छेदकत्वात्। भ्रमसाधारणतज्ज्ञानस्य व्यञ्जकत्वे रासभादेरपि घटादि-निरूपितकारणत्वाश्रयत्वापत्ते। तन्न वस्तुत कारणत्व नास्तीति नोक्त दोष इति चेत्, न, उक्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वस्योभयसाधारण्येन दण्डे कारणत्वमस्ति न तु राराभ इति वैषम्यस्य व्यवस्थापकान्तरविरहेण दुर्वचत्वात्। एतेन सामानाधिकरण्यावच्छेदकरूपव्याप्तिनिरूपकत्वमेव व्यापकत्वम्। अवच्छेदकत्वमखण्डमेव मिथ्यात्वसम्मतमिति न तत्राप्यभावप्रवेश इत्यादिकमपि निरस्तम्। हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदक-साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यत्वरूपेण ज्ञानविरहेऽनुमित्यनुत्पत्त्या तद्रूपेण ज्ञानस्यावश्यमपेक्षितत्वात्। तद्रीत्या च तस्य दुर्लभत्वात्। अथ व्यवहारोपयुक्तादत्यन्ताभावादन्य एवात्यन्ताभावो मिथ्यात्वघटक; तर्हि सुतरा प्रत्यक्षस्य मिथ्यात्व न विषय इति सर्वथापि मिथ्यात्वे प्रत्यक्ष न प्रमाणमिति स्थितम्।

वेदाविरुद्धयुक्तीनामकैं तर्ककुतूहले।
प्रत्यक्षविषयीभावो मिथ्यात्वस्य परीक्षितः ॥ ७ ॥

— ❋ —

अष्टमोंऽशः

ननु वेदान्त्यभिमतमिथ्यात्वविरोधिसत्त्वमपि न प्रत्यक्षविषय । तथाहि प्रमाणविषयत्व वा सत्त्वम् तद्योग्यत्व वा, भ्रमाविषयत्व वा ? नाद्य, असति प्रमाणाप्रवृत्त्या प्रमाणप्रवृत्ते पूर्वमपि सत्त्वस्य वक्तव्यतया तस्य प्रमाणविषयत्वरूपत्वानुपपत्ते । प्रमात्वस्य सद्विषयकत्वरूपत्वेनान्योन्याश्रयाच्च । रजतमिद जानामीति भ्रमानुव्यवसायरूपप्रमाया विषयीभूतप्रमात्मकव्यवसायांशे नेद रजतमिति प्रमाया निषेधांशे च यथानम विषयत्व प्रतियोगित्वाभ्या मिथ्याभूतस्यापि रजतादेर्विशेषणत्वेन विषयत्वाच्च । न द्वितीय, तद्योग्यत्वन्यावच्छेदकरूपान्तराभावादनिरुक्ते । न तृतीय, सर्वस्यैव क्षणिकत्वादिना भ्रमविषयत्वात् । अत एव 'तत्त्वमनारोपित रूपमित्यत्रारोपाविषयत्वमप्रसिद्धम्, सर्वस्यैवारोपविषयत्वाद्" इति द्रष्टव्यो पाय. । अत एव नासत्त्वाप्रकारकभ्रमाविषयत्वमपि, अन्योन्याश्रयात् । नापि सत्त्वप्रकारकभ्रमाविषयत्वम्, आत्माश्रयात् । नाप्यसत्त्वप्रकारकभ्रमाविषयत्वम्, अन्योन्याश्रयात् । नापि प्रतिपन्नोपाधौ त्रैकालिकसत्त्वनिषेधविरह, आत्माश्रयात् । नापि सत्ताजातिरर्थक्रियाकारित्व सद्वैलक्षण्य वा, एषा मिथ्यात्व यतिरेकावन्वितत्वेन तत्प्रत्यक्षेण मिथ्यात्वश्रुत्यादौ बाधाभावात् । नापि वेदान्त्यभिमतमिथ्यात्वाभाव, तुच्छेऽतिव्याप्तेरिति चेत् अत्र ब्रूम, मिथ्यात्वमपि हि त्वया सत्त्वविरोधि वक्तव्यम्, अत्या[ता]न्तिक सत्त्वानाश्रयात् । अतस्त्वमपि परिभावय तावत्कीदृश सत्त्व प्रत्यक्षविषय इति । तथाहि प्रमाविषय व तावत्सत्त्व निर्दोषम् । न चोक्तानुपपत्ति, योग्यत्वस्य विवक्षितत्वात् । न च योग्यतावच्छेदकानिरुक्ति, ईश्वरज्ञानविषयत्वस्य तथात्वात् । न च तदिच्छाविषयत्वेन विनिगमनाविरह, प्राचीनमते इच्छाद स्वातन्त्र्येण सविषयकत्वाभावात् सविषयकत्वेन तदनुगमाच्च । न च भ्रमविषयस्यापि तथात्वादतिव्याप्ति, विशेष्यप्रकारयो* सत्त्वस्येष्टत्वात् । तत्सर्गस्य च ईश्वरज्ञानाविषयत्वात् । न चेश्वरस्य सार्वज्ञानुरोधेन भ्रमज्ञानस्यापि स्वीकार्यतया ज्ञानज्ञानस्य च स्वविषयज्ञानविषयविषयकत्वनियमाद् भ्रमविषयीभूतसर्गस्यापीश्वरज्ञानविषयत्वात्तनातिव्याप्तिरिति वाच्यम्, ग्राह्यज्ञानस्य ग्राह्यज्ञानविशेष्ये तज्ज्ञानप्रकारीभूतधर्मवैशिष्ट्य-

मपि विषय इति व्याप्तौ बाधकाभावस्यापि प्रविष्टत्वात्। अन्यथा भ्रान्ति-भ्रान्तिज्ञसंकरापत्ते। ईश्वरस्य च विशेषदर्शनरूपबाधकसत्त्वेन तत्संसर्गस्य तज्ज्ञानाविषयत्वात्। ईश्वरज्ञानञ्च वस्तुतो यत्संसृष्टविषयक न तूक्तयोग्यतायां विशिष्यसत्त्वप्रवेश इत्यात्माश्रयादेर्नावकाश। मिथ्याभूतस्य रजतादेर्भ्रम-विषयत्व तु तात्त्विक प्रत्यभिज्ञसिद्धमेव। प्रमात्वाश्रयज्ञाननिरूपितविषयतासमर्गा-वच्छिनप्रकारतारूपविषयत्वोक्त्या सुपरिहर च। अनुव्यवसायरूपप्रमाया रजतस्य विषयत्वेनाविशेषणत्वात्। भ्रमे च तथात्वेऽपि तस्य प्रमात्वानाश्रयत्वात्।

किञ्च येन सम्बन्धविशेषेण येन चावच्छेदकविशेषेण यदधिकरणता-प्रतीतिर्यत्र भवितुमर्हति तेनैव सम्बन्धविशेषेण तेनैव चावच्छेदकविशेषेण तन्निष्ठात्यन्ताभावप्रतियोगित्वम्। तस्य मिथ्यात्व परैरङ्गीक्रियते। तथा च मयोगन घटवति भूतले चक्षुषा गृह्यमाणे सयोगसबन्धावच्छिन्नप्रतियोगि-ताकभूतलनिष्ठात्यन्ताभावप्रतियोगित्वाभावोऽपि घट चक्षुषा सुग्रह एव। यदीद भूतल सयोगावच्छिन्नप्रतियोगिनाकघटात्यन्ताभावाधिकरण स्यात्, तादृशघटात्यन्ताभाववत्त्वेनोपलभ्येतेत्यापादनसाम्राज्यात्। न हि भूतल-मयोगम्, न वा घटो न वाऽभाव। भूतले घटो नास्तीति प्रत्यक्षस्य सर्वसिद्धत्वात्। एव घटाऽय यद्येतद्भूतलनिष्ठतत्कालीनसयोगावच्छिन्न-प्रतियोगिताकात्यन्ताभावप्रतियोगी स्यात्तथात्वेनोपलभ्येतत्यत्रापि योज्यम्।

अत एव "साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्य साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्व वा व्याप्ति। तदुभयमपि योग्यत्वात् प्रत्यक्षेण धूमवह्निसम्बन्धानुभवेन प्रथममवगतमेव। अस्मिन् महानसे योऽत्यन्ताभावोऽन्योन्याभावो वा तत्प्रतियोगी न वह्निर्न वह्निमा-नित्यनुभवाद्' इति व्याप्तिग्रहमणावुक्तम्। व्याख्यातञ्च दीधितौ— "महति वायौ योग्यायो यादृभूतरूपसामान्यतद्वतोरेव योग्ये वह्नौ तादृश-प्रतियोगित्वसामान्यतद्वतोरप्यत्यन्तान्योन्याभावयोर्योग्यत्वाद्" इति। "एत-न्महानसनिष्ठाभावप्रतियोगित्वस्यातीन्द्रियवृत्तित्वेऽपि योग्ये वह्नौ यद्येतन्म-हानसनिष्ठाभावप्रतियोगित्व स्यात्तदापलभ्यतेत्यापादनस्य तद्योग्यतायाश्च सभवात् तदभावो योग्य." इति च तद्व्याख्यातारः। एव च यदि देशान्तरीय-कालान्तरीयात्यन्ताभावप्रतियोगित्वस्य प्रत्यक्षाभावेन तदभावप्रत्यक्षमनु-पपन्नम्, तदा का नो हानि स्यात्। तत्कालीनतद्देशीयतत्सबन्धावच्छिन्न-प्रतियोगिताकात्यन्ताभावप्रतियोगित्वाभावग्रहेणैव सर्वदेशकालनिष्ठात्यन्ता-

भावप्रतियोगित्वरूपमिथ्यात्वस्य बाधोपपत्ते । मिथ्यात्वानुमित्यादावपि तदधिकरणदेशनिष्ठात्यन्ताभावप्रतियोगित्वांशज्ञानस्यैव सत्त्वअत्यक्षविपरीतग्राहकत्वात् । तदन्यदेशनिष्ठात्यन्ताभावप्रतियोगित्वस्य तार्किकैरप्यङ्गीकारात् ।

नन्वेवमपि घटज्ञानमाने न भासत इति चेत्, भा नाम भासिष्ट । तर्हि सर्वदाभासमानमेव बाधकमित्यस्ति नियम, बाधकज्ञानस्य कदाचिद्भानमात्रेण सपत्ते । अत एव घटादिचाक्षुषानन्तर घटाभाववत्ताबुद्धयनुदय । अत एव यद्वत्त्वेन विज्ञाते यद्वत्त्व न प्रतीयते तदभाववत्त्वञ्च व्यवहियते, तस्यैव तदभावात्मकत्वमित्यादिरभ्युपगम । यत्तु घटो नास्तीति व्यावहारिकात्यन्ताभावादन्य एवायमनवच्छिन्नवृत्तिको मिथ्यात्वघटकोऽत्यन्ताभाव इति तच्छ्रद्धाजाड्यमात्रम् मानाभावात् । घटाभावविरुद्धस्वभावस्य घटाभावत्व एव मानाभावाच्च । अत एव तत्प्रत्यक्ष प्रत्यविद्यायाः प्रतिबन्धकत्व विशद्धाशयपुरस्सरमत्यक्षीक्रियत इत्यादिकमपि निर्बीज, प्रतिबध्यप्रतिबन्धकोभयाप्रसिद्ध प्रत्यक्षस्य शपथमात्रमूलकत्वाच्च तदभिमतमिथ्यात्वप्रत्यक्ष कस्यापि जातमित्यत्र बीजाभावात् ।

ननु एकस्मिन् स्वदेशकालवृत्तिनिषेधे ज्ञायमाने देशत्वकालत्वाभ्या सकलदेशकालाना ग्रहणे तत्तद्देशतत्कालवृत्तिनिषेधत्व ज्ञात्वा तेन प्रत्यासत्तीभूतेनोपस्थिताना स्वदेशकालवृत्तिसकलनिषेधाना प्रतियोगित्वस्याभावो घटे ग्राह्यस्तत सार्वदिक्सर्वदेशीयनिषेधप्रतियोगित्वग्रहण घटे सुघटमिति सर्वदेशकालवृत्त्यत्यन्ताभावप्रतियोगित्वाभावोऽपि प्रत्यक्ष एवेति चेत्, तन वदन्ति, न हि सन्निकर्षाभावेन तदत्यन्ताभावस्यायोग्यत्वमस्माभिरुक्त येन सामान्यलक्षणारूपसन्निकर्षेणापि तदुपपत्तिस्त्वया क्रियेत, किन्तूक्ताभावप्रतियोगित्व यदि घटादौ स्यात्तदोपलभ्येतेत्यापादनासभव । उक्ताभावप्रतियोगित्वस्य तत्र सत्त्वेऽपि तन्निरूपकाभावानामतीन्द्रियत्वाल्लौकिकसन्निकर्षाभावाच्चानुपलब्धिसभवात् । अत उक्ताभावप्रतियोगित्वाभावस्य न लौकिकप्रत्यक्षविषयत्वम् । अत एव दीधित्यादावुक्तम्—"यथा विद्यमानमपि वह्नित्वे रासभादिदेशनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्व न गृह्यते, अभावदेशविप्रकर्षादिना ग्राहकाभावात्, तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वमपीति नानुपलब्धे । प्रतियोगिसत्त्वविरोधित्वरूपायोग्यतेति, न तत्सामान्याभावो लौकिकप्रत्यक्षगम्य इति, योग्यप्रतियोगिकस्यैव ससर्गाभावस्य योग्यत्वात् ।

ननु कस्तावदस्यार्थः । योग्यप्रतियोगिकान्य ससर्गाभावो न योग्य इति वा, अयाग्यप्रतियोगिको न योग्य इति वा, अयोग्यधर्मावच्छिन्नप्रतियोगिताको न योग्य इति वा ? नाद्य, उक्तप्रतियोगित्वाभावस्य योग्यायोग्यप्रतियोगिकत्वेन याग्यत्वापत्त । न द्वितीय, महावायौ याग्यायोग्योद्भूतरूपसामान्याभावप्रत्यक्षस्य दीधित्यादावङ्गीकारात् । न तृतीय, उक्तप्रतियोगितावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य प्रत्यक्षवारणेऽपि स्तम्भे पिशाचादेरिव योग्ये घटादावुक्तप्रतियोगित्वबद्भेदस्य प्रत्यक्षसभवेन मिथ्यात्वानुमित्यादौ बाधसामान्यावारणादिति चेत्, मैवम्, स्वप्रतियोग्युपलम्भापादकत्वयोग्यप्रतियोगिक एवाभावो योग्य इत्यस्य विवक्षितत्वात् । ससर्गपदं तु येन ससर्गेण यन्न यस्य प्रतियोगिन उपलम्भापादकत्व तेन ससर्गेण तस्याभाव प्रत्यक्ष इति ज्ञापनायम् । अत एव पिशाचभेद एव प्रत्यक्षो न तु पिशाचवद्भूद । पिशाचो यदि स्तम्भानुयोगिकतादात्म्यप्रतियोगी स्यात्तत्त्वेनोपलभ्येत, स्तम्भवदित्यापादनसभवेऽपि पिशाचवत्त्वेनोपलब्धेरापादयितुमशक्यत्वात् । *प्रतियाग्ययोग्यतया तत्सयागप्रत्यक्षस्याप्रसिद्धे* । ततश्चात्यन्ताभावप्रतियोगित्वात्यन्ताभाववत्तद्भेदोऽपि न प्रत्यक्ष । अत एव "तदभावो नाध्यक्ष इति दीधितिवाक्यस्य तादृशाभावप्रतियोगितावच्छेदकत्ववद्भूदस्याप्यनध्यक्षत्वे तात्पयम् । अन्यथा तस्यैव लौकिकप्रत्यक्षसभवे विरोधस्फुरणवशाद्धूमत्वादौ गृह्यमाणो धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्यादया गृह्यते इत्यस्य वैयर्थ्यापत्त । अत एव "मूर्तसामान्यतद्वतोरिवोपाधिसामान्यतद्वतोरप्यत्यन्तान्योन्याभावो न योग्यो" इति व्याप्तिग्रहोपायदीधित्यादावुक्तम् । मूर्त्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्येव मूर्त्तवद्भूदस्यापि निरुक्तयोग्यताविशिष्टस्य प्रतियोग्यनुपलम्भस्यासत्त्वात् । यदि त्वयोग्यघमानवच्छिन्नयोग्यमात्रवृत्तिप्रतियोगिताक एवाभावो योग्यो बाधादौ तादृशरूपाद्यभावस्तु न प्रत्यक्ष, किन्त्वनुमेय इति मतमाश्रीयते, तदा यथाश्रुतेऽपि न दोष इति ।

एतावत्पुनरिहानुसधेयम् । किञ्चिद्देशकालनिष्ठात्यन्ताभावप्रतियोगित्वाभावप्रयुक्त एव सर्वदेशकालनिष्ठात्यन्ताभावप्रतियोगित्वाभाव । तद्देशकालनिष्ठात्यन्ताभावप्रतियोगित्वाभावग्रहकाल एव लौकिकप्रत्यक्षेण गृह्यताम् । एकदेशनिष्ठात्यन्ताभावप्रतियागित्वाभावग्रह सति यावद्देशनिष्ठात्यन्ताभावप्रतियोगित्व नास्तीति बुद्धौ बाधकाभावात् । निरूपकीभूतानामभावानामयोग्यत्वेऽपि तदशे योग्यत्वादेरनपेक्षितत्वेन तस्याकिञ्चित्करत्वात् ।

अत एव "द्रव्यनिष्ठमूर्त्तत्वाभावस्यायोग्यत्वेऽपि गुणादौ तदभावो योग्य एवेत्यन्ये" इति कुसुमाञ्जलिप्रकाशे उक्तम्। केषाञ्चिन्मूर्तानामयोग्यत्वेऽपि योग्यमूर्तभावप्रत्यक्षे जायमाने बाधवशादयोग्यमूर्तभावोऽपि गृह्यत इति मूर्त्तसामान्याभावो गुणे प्रत्यक्षः, न तु द्रव्ये। तत्र संयोगो नायोग्यमूर्त्तस्यापि संभवेन बाधाभावादिति तदभिप्रायः। एवमेव महाबायौ योग्यायोग्योद्भूतरूपसामान्याभावप्रत्यक्षवादिनोऽप्याशयः। अत एव घटेऽपि समवायसम्बन्धावच्छिन्नप्रतियोगिताकमूर्त्तसामान्याभावप्रत्यक्षं सुलभमेव। अन्त्यावयवित्वनिश्चयेन द्रव्यसामान्यसमवायित्वस्य घटे बाधावधारणात्। एवमेतद्देशनिष्ठात्यन्ताभावप्रतियोगित्वाभावे सिद्धे सति यावद्देशनिष्ठात्यन्ताभावप्रतियोगित्वाभावोऽप्येकदेशबाधद्वारेण लौकिकप्रत्यक्षविषयः स्यादेव। देशान्तरीयात्यन्ताभावप्रतियोगित्वाभावज्ञानं प्रकृतानुपयुक्तं पुनरुक्तमेवेति सुधीभिर्विभावनीयम्।

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले।
अन्यैरगम्यमिथ्यात्वं विरुद्धमिदमीरितम् ॥ ८ ॥

नवमोऽशः

सन्घट इत्यादिप्रत्यक्षविषयस्तु सत्ताजाति, अनुगतत्वात्। न च सामान्यादौ त्वयापि जात्यनङ्गीकारात् सत्सामान्यमित्यादि प्रतीत्यनुपपत्तिरिति वाच्यम्, सामानाधिकरण्येनोपपत्ते। न चैव गुणकर्मणोरपि तथैवास्त्विति वाच्यम् द्रव्यत्वेन तुल्यव्यक्तिकत्वापत्ते, बाधकाभावाच्च। यत्तु सर्वत्रैकजातीयसबन्धेन सत्ताप्रकारकत्वेन मानसिद्धप्रतीते सम्बन्धभेदेन सत्ताप्रकारकत्वोपपादनमनुपपन्नम्। न च सदाकारप्रतीतेरेकसबन्धेन सत्ताप्रकारकत्वमसिद्धमेवेति वाच्यम् द्रव्यगुणकर्मसु सत्ताया साक्षात्सबन्धोऽन्यत्र परम्परेयति हि वशेषिकादिशास्त्रकल्पना, न तु लोकानुभवोऽन्यथा तच्छास्त्रानभिज्ञस्य द्रव्यादित्रयमेव सदितिधीकाले नयान्यत्सामान्यादि सदिति परम्परासबन्धेन धी स्यात्। न च नयान्यत्र सत्तावतो भेदस्त्रयमेवेत्यत्र प्रकार इति परम्परासम्बन्धेन सत्ताधीर्न जायत इति वाच्यम्, येन सम्बन्धेन त्रये सत्ताप्रकारस्त्रयान्यत्र तत्सम्बन्धेन सत्तावतो भेदस्यैवंवकारेण बोधनात्। एव परम्परासबन्धेन सामान्यादिक न सदितिधीकाले सामान्यादि सदितिधीभ्रंम स्यात्। विशेष्यतावच्छेदकावच्छेदेनैकसबन्धेन सत्ताप्रकारकत्वादिति। तस्माद् द्रव्यादित्रये साक्षात्सबन्ध, अन्यत्र तु परम्परा, उत सामान्यादावेव साक्षात्सबन्धो द्रव्यादित्रये तु परम्परेत्यत्र विनिगमकाभावात्सवत्राधिष्ठानभूतब्रह्मसत्तैव सदाकारकप्रतीतिविषय। अत एव भ्रमाधिष्ठानत्वेन ब्रह्मवच्छुक्तिकादेरपि सत्त्व स्यादित्यपास्तम्, ब्रह्मण एवाधिष्ठानत्वेन शुक्तिकादेरधिष्ठानतावच्छेदकमात्रत्वेन तदसिद्धे।

अयन्तु विशेष –रजतादिभ्रमोपादानाज्ञानविषयत्व शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठ, वियदाद्युपादानज्ञानविषयत्व त्वनवच्छिन्नचैतन्यनिष्ठमिति, तत्रेद वक्तव्यम्, द्रव्यादित्रयमेव सदितिधीर्द्रव्यादित्रये साक्षात्सबन्धेन सत्ताप्रकारिका परम्परासम्बन्धेन वाभिमता ? नाद्य, तदानी सामान्यादौ परम्परया सत्तावगाहिबुद्ध्यापत्तेरिष्टत्वात्। नान्त्य, त्रयान्यत्र परम्परासबन्धेन सत्तावद्भेदस्यैवकारगम्यतया बाधघोसत्त्वात्। विशेष्यतावच्छेदकावच्छिन्ने येन सबन्धेन विशेषणान्वयस्तत्सबन्धावच्छिन्नप्रतियोगिताक एव विशेषणाभावो यथोक्तसबन्धावच्छिन्नप्रतियोगितावच्छेदकतासमविशेषणवद्भेदो वा, विशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदाश्रयत्वावच्छेदेनैवकारेण बोध्यत इति व्युत्पत्ते। येन सबन्धेनेत्यादिना स्वयमपि तदुक्तेश्च।

यदप्येव परम्परासबन्धेनेत्यादि, तदपि चिन्त्यम्; परम्परासबन्धेन सत्तावतो भेदस्य सामान्यादौ ग्रहकाले परम्परासबन्धेन सामान्यादिक सदिति ज्ञानासभवेन साक्षात्सबन्धनैव सत्ताप्रकारकत्वस्यावश्यकतया तद्भ्रमत्वस्येष्टत्वात्। न च मन्मते तत्रापि प्रमात्वरक्षणाद् विशेष इति वाच्यम्, प्रत्युत्तरयिष्यमाणत्वात्। यदपि द्रव्यादिसप्तक सदेवेत्यादि, तदपि चिन्त्यम्, समवायसामानाधिकरण्यान्यतरसबन्धेनैवावच्छेदकावच्छेदेन सत्ताप्रकारकत्वात्, न चैवकारसमभिव्याहृतविशेषणस्यैकसबन्धेनैव विशेष्यतावच्छेदकावच्छेदेनान्वयबोधजनकत्वनियम, स्फटिकजवाकुसुमे लोहिते एवेत्यादौ व्यभिचारात्, तद्वदत्रापि विशेष्यतावच्छेदकभेदाच्च।

ननु परम्परासबन्धेनापि स्फटिकावच्छेदेन लौहित्यायोगव्यवच्छेदो नास्तीति चेत्, किं तत, अशतस्तद्बोधस्य भ्रमत्वेऽपि व्यभिचारस्य सपन्नत्वात्। अन्यथा "पार्थ एव धनुर्धर" इत्यादावसगतिप्रसगात्। न हि तत्र व्यवच्छेद प्रामाणिक, श्रीकृष्णशिवादीना तत पार्थभिन्ने धनुर्धरत्व नास्तीत्येतादृशबुद्धावप्रामाण्यप्रसजकज्ञानविषयत्वस्य सुलभत्वात्। तत्रान्ययोगव्यवच्छेदोऽत्र त्वयोगव्यवच्छेद इति पर विशेष। यत्तु ब्रह्मसत्त्वमेवेत्यादि तदत्यन्तमसत्, घटादिनिष्ठत्वेनैव सत्त्वप्रतीतेः। अहोऽनुभवस्वारस्यानुरोधयत्सबन्धावशेऽपि प्रतीतिवैषम्यमसहमानैरेव प्रकाराशस्यैव विशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वमानीय सदनुभवमात्रस्यैव भ्रमत्व मापादितमिति। अत एव दीधितिकारादिभिर्विद्यमानत्वस्यैव सदाकारधीविषयत्वमुक्तम्। एतेनैकस्याश्चैतन्यव्यक्ते सर्वभ्रमाधिष्ठानत्वसभवेन सद्रूपतासभवे तदन्यत्र तत्कल्पने गौरवम्, "नेह नानास्ति किञ्चन" इत्यादिश्रुतिस्मृतिविरोधश्चेति परास्तम्। श्रुत्यादेरद्वैतपरतायाः प्रबन्धेनापहस्तितत्वात्। घट सन्नित्यादिज्ञानाना भ्रमत्वसिद्धौ तदधिष्ठानस्य सद्रूपत्वकल्पन तत्सिद्धौ च तेषा भ्रमत्वसिद्धिरित्यन्योन्याश्रयाच्च। सत्ताजातेरेकस्या एव तद्विषयत्वात्। तत्समवायस्याप्येकत्वात्। विशेष्याणा च मतद्वयेऽप्यनन्तत्वात्। कपालावच्छिन्नचैतन्यापेक्षया लघो कपालादेरेव घटाद्युपादानत्वात्। कपालादीनामुपादानतावच्छेदकत्वे कपालत्वादीना चोपादानतावच्छेदकतावच्छेदकत्वे गौरवात्। ये धर्मा. स्वरूपतो न भासन्ते तन्निष्ठावच्छेदकताया किञ्चिद्धर्मावच्छिन्नत्वनियमात्। इत्यास्ता विस्तर। तस्मात्—

द्रव्यादौ समवायेन जात्यादावाश्रयैक्यत।
प्रतिपत्तौ सदित्यस्या सत्ताजातिर्विशेषणम्॥

अपि च परमते सद्ब्रह्म, सन्घट, सच्छुक्तिरूप्यमित्यादौ पारमार्थिक-व्यावहारिकप्रातिभासिकभेदेन त्रिविधसत्ताया भासमानत्वात्कथ विशेषणम्? सोऽप्यनुगतविषयकत्व प्रत्ययानाम्। आद्या शुद्धचिदेकरूपा। द्वितीया मूलाविद्याप्रयुक्तदृश्यतादात्म्यापन्नचिद्रूपा। प्रयुक्तत्व च तदुच्छेदज्ञानजन्यो-च्छेदप्रतियोगित्वमनादिदृश्यसाधारणम्। तृतीया पल्लवाविद्योच्छेदकज्ञानो-च्छेद्यदृश्यतादात्म्यापन्नचिद्रूपा। पल्लवाज्ञानानङ्गीकारे तु सर्वदृश्यमिथ्यात्व-निश्चयपूर्वकालीननिश्चयविषयमिथ्यात्वकदृश्यतादात्म्यापन्नचिद्रूपा प्रातिभा-सिकी। तादृशनिश्चयविषयान्यमिथ्यात्वकदृश्यतादात्म्यापन्नचिद्रूपा तु व्यावहा-रिकीति तेषा सिद्धान्तात्। न च चिदशमादायानुगतत्वमिति वाच्यम्, वस्तुतो यत्र विशेषणत्व पर्याप्त तद्भेदस्य तथाप्यनिषेधात्। अन्यथा ब्रह्मघटादीना भिन्नसत्ताकत्वव्यवहारस्य भवदीयस्य विलयापत्ते। न च सत्तात्वेनानुगम इति वाच्यम्, घटपटयोरपि द्रव्यत्वेनानुगतत्वात्, तज्ज्ञानयोरपि समानविषय-त्वप्रसगात्। कथ वोक्तरूपा सत्ता द्रव्य सदित्यादिप्रतीतिविषय, सत्प्रतीते. सत्ताशेऽन्याप्रकारकत्वानुभवात्। तस्मात्परेषा विशेषणानुगमो दुरुद्धर एव।

ननु उक्तत्रैविध्य विभागमात्रार्थं सदाकारप्रतीतौ तु त्रितयानुगतभि-न्नैव सत्ताप्रकार। तथाहि यथा प्रातिभासिके रजते ज्ञातैकसद्रजतत्वम-कम्, व्यावहारिकसाधारणजातेर्दोषादिजन्यतावच्छेदकत्वासभवात्। प्रमाण-व्यापार विना प्रातिभासिकरजते तद्ज्ञानासभवात्। व्यावहारिकरजतसब-न्धित्वेन रजतत्वस्य प्रमाणवृत्तिवेद्यत्वम्, प्रातिभासिकरजतसबन्धित्वेन चाविद्यावृत्तिवेद्यत्वमिति कल्पने गौरवात्। तद्व्यक्तित्वादिनाप्युभया-नुगतजाते प्रमाणवेद्यत्वनियमाच्च तदावश्यकत्वात्। व्यावहारिकरजते चाज्ञातसदपरम्। साक्षिमात्रवेद्यस्य प्रातिभासिकस्य रजतत्वादे प्रमाणवेद्य-त्वानुभूयमानत्वानुपपत्त। प्रातिभासिकव्यावहारिकयोरेकरूपेण हेतुत्वे प्रातिभासिकादपि व्यावहारिकरजतकार्योत्पत्तेरुक्तकार्यहेतुत्वावच्छेदकस्य साक्षिमात्रवेद्यभिन्नस्य रजतत्वादेरावश्यकत्वात्। उभयसाधारणं च रजत-त्वमपरम्। उभयत्रैव रजतशब्दप्रयोगात्। पूर्वोक्तजातिद्वयस्य प्रवृत्तिनिमि-त्तत्वे नानार्थत्वापत्त रजताकारानुगतप्रत्ययाच्च। रूपविशेषादौ जातिद्वयस्य हेतुतावच्छेदकत्वे गौरवाच्च। न चैकसामान्यस्य प्रातिभासिकव्यावहारिक-सबन्धो विरुद्ध इति वाच्यम्, बीजाभावात्। एवम् वाध्यत्वरूप सामान्य-मारोपितानारोपितसाधारणम्। अन्यदा वाध्येऽपि स्वकालावाध्यत्वमात्रेणा-रोपितेऽपि तत्सभवात्। आरोपतानारोपितयोरेकसामान्याभावे प्रवृत्त्याद्य-नुपपत्ते। तदुक्तम्—

आकाशादौ सत्यता तावदेका
प्रत्यङ्माने सत्यता काचिदन्या।
तत्सम्पर्कात् सत्यता तत्र चान्या
व्युत्पत्तोऽयं सत्यशब्दस्तु तत्र ॥इति।

तस्मादाकाशादावारोपिता सत्यतैका, चिदात्मनि चानारोपितापरा, तदुभयानुगता चान्या व्यावहारिकीति, सैव सत्यादिपदप्रयोगनिमित्तमिति। न सद्बुद्धेर्विशेषणाशे विषयभेद इति चेत्, अत्रोच्यते, उक्तोभयसाधारणानारोपितसत्तायास्सदाकारधीविषयत्वे सदित्यनुप्रानानुवेद्य इति भवत्सिद्धान्तभङ्गापत्ते। अवान्तरसत्ताद्वय सत्प्रतीतौ न भासत इत्यस्य शपथनिर्णयत्वाच्च। ब्रह्मप्रपञ्चसाधारण्यैकयैव सत्तयोपपत्तौ परस्परव्यावृत्ततदवान्तरसत्ताद्वयकल्पने मानाभावात्, रजतत्वदृष्टान्तेऽप्यत्र वक्तव्यमित्यास्ता तावत्।

यत्तु वेदान्तिमतेऽपि सत्स्वरूपस्य नैक तादात्म्य समवायैकत्वोक्तदोषात्। न च तादात्म्यत्वेन सबन्धानुगम इति वाच्यम्, तादात्म्य सदित्यत्र तदभावात्। एकरूपेण सबन्धत्वानुयोगित्वयोरयोगादित्याशङ्क्योक्तम्—समवाय सन्नित्यत्र समवायत्वेनैव रूपेण समवायस्य सबन्धत्वानुयोगित्वयोस्त्वयाप्यङ्गीकारात्, तथैव ममापि समाधि। तत्र रूपभेदेन तदुभयाङ्गीकारे च मयापि तादात्म्यत्वेन सबन्धत्वम्, तदनुरूपेणानुयोगित्वमिति वक्तु शक्य वात्। यद्वा सबन्धनिरूपितयो प्रतियोगित्वानुयोगित्वयोरेकरूपावच्छेदकत्वमेव मया नाङ्गीक्रियते। तेन तादात्म्यत्वेन सबन्धत्व तदनुयोगित्व चोपपन्नम्। अत एव सद्ब्रह्मेत्येव व्यवहारो न तु सत्सदित्यपीति, तत्रेद वाच्यम्—घटाभावो घटाभाववानित्यादौ प्रतियोगित्वानुयोगित्वयोरेकयर्मावच्छिन्नवादुक्तनियमोऽप्यनुपपन्न एव, सत्सदित्यपि प्रत्ययो दुरुपपादो घटो घट इतिवत्। विस्तरस्तु भेदाभेदवादनिरासे प्रकाशनीय।

यदप्युक्त सत्स्वरूपप्रतियोगिक तादात्म्यमेव सत्तास्वरूपसबन्धेन सदाकारधीविषय। तादात्म्य सदित्यत्रापि केवलोपहिततादात्म्ययो स्वरूप सबन्ध, तादात्म्ये तादात्म्यान्तरास्वीकारात्। तादात्म्यभिन्नयोरेव केवलोपहितयोस्तादात्म्यस्वीकारात्। अत सदाकारबुद्धौ नानुगतसबन्धहानि। सत्ता

सतीति तु न मे व्यवहार इति, तदप्यसत्, सत्तायाः प्रकारत्वेनानुभूयमानायाः समगकोटौ निवेशः। तत्स्वरूपप्रतियोगिकतादात्म्यस्य चानुभवविरुद्धस्य प्रकारत्वमिति कल्पनस्य सर्वप्रत्ययबाधितत्वात्, सत्ता सतीति व्यवहारस्येष्टत्वात्, नञ्वादद्दीधितिव्याख्यानादिसमतत्वाच्च, शपथमात्रेण दुर्वारत्वात्।

यत्तु प्रसगादुक्तम् "प्राभाकरादिमते व्याप्तिविशिष्टवैशिष्टयबुद्धेरिव मन्मतेऽनुमितौ व्याप्तिस्मृतेरप्यनावश्यकत्वम्, व्याप्तिसस्कारत्वेनैव हेतुत्वसभवात्। पर्वत धूमज्ञानोत्तर व्याप्तिविशिष्टवैशिष्टयज्ञानाकल्पन इवात्रापि व्याप्तिज्ञानाकल्पने लाघवात्" इति, तन्न, सस्कारस्य स्वजनकज्ञानविषयविषयकबुद्धावेव हेतुत्वात्, सस्कारत्वावच्छिन्नकारणतानिरूपितकार्यताया स्मृतित्वव्याप्यत्वाच्च। अनुद्बुद्धसस्कारादनुमितिवारणाय नानाविधोद्बोधकाना हेतुत्वे गौरवाच्च। व्याप्तिसस्कारेण व्याप्तिस्मृतिस्थले त्वयापि तस्यावश्य वाच्यत्वादनुमितौ तद्धेतुत्वस्यातिरिक्तत्वादव्याप्तिस्मृतिरेव न कल्प्या, इत्युच्यते तु तन्न सस्कारोत्पत्तावेव मानाभावात्। सर्वविशिष्टानुमितौ व्याप्तिज्ञानतत्सस्कारयोर्हेतुत्वे च गौरवात्। धूमपरामर्शादौ त्वगत्या तत्स्वीकाराच्च।

यत्तु उद्बोधकानामपि स्मृताविवानुमितावप्यन्वयव्यतिरेकाभ्या हेतुत्वमस्तु मा वा, लिङ्गज्ञानमेव वस्तुगत्यानुमित्यव्यवहितपूर्ववर्त्युद्बुद्धसस्कारसहित जातिविशेषेण शक्तिविशेषेण वा हेतुर्लाघवादिति, तदप्यसत्, लिङ्गज्ञान हि स्वरूपमात्रेण व्याप्तिविशिष्टत्वेन वा? नाद्यः, तादृशादनुमिते. सर्वथानुपपन्नत्वात्। नान्त्य, अत एवानुमित्युपपत्तायुद्बुद्धसस्कारादेरनुमितिहेतुताया मानाभावात्। न च वस्तुगत्येत्यादिना निर्वाह, वस्तुगत्यानुमित्यव्यवहितपूर्ववर्तित्वस्यानुमित्युत्पत्त्यधीनत्वात्। अनुमितौ रूपान्तरेण हेतुत्वस्यावश्यकत्वात्। अन्यथा वस्तुत फलाव्यवहितपूर्ववर्तित्वेन कारणत्वोक्तौ बहुतरकारणताविलयप्रसगात्। अन्वयव्यतिरेकिणा लिङ्गज्ञानसमानयोगक्षेमाणा बहिर्भावे बीजाभावाच्च। वस्तुगत्यानुमित्यव्यवहितपूर्ववर्त्तिमनोयोगत्वेनविशेषादेरेव हेतुत्वापत्तेश्च। अत एव जातिविशेष. शक्तिविशेषो वा कारणतावच्छेदकत्वेन व्याप्तिज्ञानादावेव मन्तव्यो व्याप्तिज्ञानादेव यत्रानुमितिस्तत्रावश्यकत्वात्। नतूक्तलिङ्गज्ञाने कल्पकाभावात्। किञ्चैव सति व्याप्यादौ भ्रमत्वधीविषयाद्वह्निव्याप्यधूमवत्ताज्ञानादनुमित्यापत्तिः, व्याप्त्यादिविषयकत्वस्य कारणतावच्छेदकत्वेन तदशे भ्रमत्वज्ञानस्याकिञ्चित्करत्वात्। एव व्यभिचारज्ञानादिरात्त्वेऽपि।

यत्तु ज्ञानद्वयहेतुतामते वह्निव्याप्यधूमवन्निष्ठत्वांशे भ्रमत्वग्रहकालेऽप्यनुमितिर्यथा स्वीक्रियते तथोक्तस्थले ममापीति, तन्न, कदाचित्पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कदाचिच्च पक्षतावच्छेदकावच्छेदेनानुमितिरिति नियमस्य तयापि दुरुपपादत्वात् । मन्मते तु यदा शुद्धसयोगेन व्याप्तिज्ञान तदा सामानाधिकरण्यमात्रेण, यदा त्ववच्छिन्नसयोगेन तदावच्छेदकावच्छेदेनेति नियमोपपत्ते । न च यत्रावच्छिन्नसयोगेन व्याप्तिज्ञानजन्य सस्कारस्तत्रावच्छेदकावच्छेदेन, यत्र शुद्धसयोगेन व्याप्तिज्ञानजन्यस्तत्र सामानाधिकरण्यमात्रेणानुमितिरिति नियम इति वाच्यम्, उभयविधसस्कारसत्त्वे गत्यभावात्, तद्भेदादुद्बोधकभेदकल्पने मानाभावात्, हेतुतायामप्रामाण्यज्ञानस्यानुत्तेजकत्वात् । एतेन व्याप्त्यादिविषयकज्ञानत्वेनाहेतुत्वेऽप्युक्तभ्रमत्वज्ञानाभावाना हेतुज्ञाननिष्ठहेतुतायामेवावच्छेदकत्वम्, यद्वा स्वातन्त्र्येणैव हेतुत्वमस्तु, इत्यपास्तम् । जनकज्ञानविघटकत्वेनैव ज्ञानस्य प्रतिबन्धकत्वाच्च । मण्यादिवत्स्वातन्त्र्येण तत्त्वे मानाभावाद् गौरवाच्च । हेतुज्ञा निष्ठहेतुतायामवच्छेदकत्वे व्याप्यत्वाभाववति व्याप्यत्वप्रकारकत्वधूमाभाववति धूमप्रकारकत्वरूपद्विविधभ्रमत्वज्ञानाभावाना विशेष्यविशेषणभावे विनिगमकाभावात् । मन्मते तु व्याप्यत्वप्रकारकत्वरूपभ्रमत्वज्ञानाभावाना व्याप्तिविषयकज्ञानाशे धूमीयभ्रमत्वज्ञानाभावाना च लिङ्गज्ञानाशे हेतुतावच्छेदकत्वेनोक्तभ्रमत्वज्ञानाभावाना तदप्रसक्ते । न च जातिविशेष शक्तिविशेष वा स्वीकृत्य तदेवावच्छेदक कल्प्यते । अतोऽवच्छेदकैक्यात्कारणानैक्यमिति नोक्तविनिगमकाभावो दोष इति वाच्यम्, तयापि बहुषु शक्तिविशेषसबन्धस्वीकार एव गौरवावतारात् ।

यत्तु यस्य हेतुज्ञानस्योक्तभ्रमत्वधीविषयत्व तत्रानुमितिजनकतावच्छेदको जातिविशेष एव नास्तीति, तदपि चिन्त्यम्, लिङ्गस्यापि ज्ञानहेतुताया विषयतयावच्छेदकाङ्गीकारस्य वैयर्थ्यापत्ते । यज्ज्ञानव्यक्तिविशेषादनुमितिस्तत्रैव जनकतावच्छेदकस्वीकारेणातिप्रसगवारणासभवात् । अथ यादृशविषयकत्वेन ज्ञानस्यानुमितिजनकत्वमनुभवसिद्ध तादृशविषयकत्वविशिष्ट एवानुगमायावच्छेदकविशेष कल्प्यते, तर्हि व्याप्तिविषयकत्वानिर्मुक्ते ज्ञानेऽनुमितिजनकत्व नास्तीति कथ तत्र शक्तिविशेषादेरवच्छेदकस्य स्वीकार' । एतेन ज्ञानद्वयहेतुतामते वह्निव्याप्याभाववानयमिति धीसत्त्व इव व्यभिचारादिधीसत्त्वे कारणसपत्त्याऽनुमितेर्मन्मतेऽनापत्तेश्च सस्कारद्वारानुमितिप्रयोजकव्याप्तिप्रतिबन्धकधीविषयत्वादेव व्यभिचारादेर्हेत्वाभासत्वसभवात् । कारणीभूतसस्कारा यथार्थत्वज्ञापकव्यभिचारादिज्ञापनायैं सत्प्रतिपक्षा-

द्युत्थापनार्थं वा। विपरीतनिश्चयस्य संस्कारनाशकत्वमते व्यभिचारादिज्ञानस्य व्याप्तिसंस्कारनाशकत्वेन तादृशव्यभिचारज्ञानार्थं वोपाध्युपन्यासंभवात्। कारणतावच्छेदकीभूतजात्यादेर्व्यभिचारज्ञानोत्तरकालीनज्ञाने सत्त्वे भानाभावेनाखिलदोषपरीहाराच्चेत्यपि परास्तम्। व्याप्तिज्ञानेन द्वारीभूतसंस्कारस्य जनितत्वेन पाश्चात्यव्यभिचारज्ञानस्याकिंचित्करत्वात्। नहि भाव्यप्रामाण्यज्ञानाभावविशिष्टव्याप्तिज्ञानजन्य संस्कारो हेतुरिति वक्तुं शक्यम्, तत्पूर्वमप्यनुमित्यनुदयापत्तेः। विशेष्यत्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताकस्याप्रामाण्याग्रहाभावस्य व्यापारजननकालेऽपेक्षणीयस्य संस्कारजनकव्याप्तिज्ञाने सुस्थत्वात्।

कारणीभूतेत्यादिकमपि चिन्त्यम्, ज्ञानहेतुतायामेवाप्रामाण्यज्ञानाभावस्योपयोगेन संस्कारहेतुताया तस्यानपेक्षितत्वात् अत एव तन्निवेशे बीजाभावात्। अप्रामाण्यज्ञानास्कन्दितज्ञानजन्यसंस्कारस्यापि स्मृतिहेतुत्वस्य सर्वसम्मतत्वाच्च। व्यभिचारज्ञानस्य ग्राह्याभावग्रहविधयैवानुमितिकरणविघटकत्वाच्च। अनुमितिकरणविघटकत्वेन स्वत एवानुमितिप्रतिबन्धकत्वेन वा विना हेत्वाभासत्वायोगात्।

विपरीतेत्यादिकमप्ययुक्तम्। व्यभिचारज्ञानाव्यवहितोत्तरक्षणेऽनुमित्यापत्तेः। संस्कारस्यापि कार्यसहभावेनानुमितिहेतुत्वे मानाभावादनुमितेः संस्कारनाशस्य च योगपद्यऽपि क्षतिविरहात्। न चैवं विपरीतनिश्चयाव्यवहितोत्तरक्षणे स्मृतेरप्यापत्तिः, इष्टापत्तेः, संशयात्मकस्मरणस्य तथाप्यनापत्तेः। तत्क्षणे विपरीतसंस्कारानुत्पत्तेः। उत्तरक्षणे च पूर्वमन्यसंस्काराभावात्। न च घटाभावज्ञानोत्तरं घटस्मृतिघटसंस्कारनाशघटाभावसंस्कारोत्पादा एकक्षणे तदुत्तरं घटाभावस्मरणमिति पूर्वोत्पन्नविनश्यदवस्थघटस्मृतिमादाय संशयात्मकस्मरणं स्यादिति वाच्यम्, विनश्यदवस्थमेव ज्ञानं संस्कारजनकमितिपक्षे घटाभावज्ञानाव्यवहितोत्तरं घटाभावसंस्कारानुत्पत्तेः। घटस्मृत्यनुव्यवसायस्यैव तदुत्तरक्षणे उत्पत्त्या घटाभावस्मृत्यनुत्पत्तेश्च। स्मृतिसामग्र्या अनुभवसामग्र्यपेक्षया दुर्बलत्वस्य मिथ्यादिसमतत्वात्। व्याप्तिविशिष्टवैशिष्ट्यानुभवादेव यत्रानुमितिप्रसंगस्तत्र व्यभिचारादेरुपयोगस्य तार्किकैरेव परैरभ्युपगम्यत्वाच्चेत्यलमुच्छृङ्खलत्वेन।

यद्यपि तमोभावान्तरमेव नत्वालोकाभावश्च रूपम्, नीलं तमश्चलतीति प्रत्ययात्। न चासौ भ्रान्तिः, बाधकाभावात्। नापि पृथिव्यामन्तर्भूतम्,

गन्धशीतोष्णस्पर्शाभावेन रूपादिमत्त्वेन च नवद्रव्यवैधर्म्यात् । रूपादिमत्त्वादेव च न गुणान्तर्भूतम्, तदुक्तम्—

नाभावो भाववैधर्म्यान्नारोपो बाधहानित ।
द्रव्यादिषट्कवैधर्म्याज्ज्ञेय मेमान्तर तम ॥ इति ॥

द्रव्यचाक्षुषत्वावच्छिन्ने च तमोरूपजात्या तमसस्तादात्म्येन प्रतिबन्धकत्वम्। कपालादौ घटादिरिव घटादौ तदवच्छिन्नचैतन्यगतमूलाविद्यापरिणामश्च तम'। तत्र तत्र तत्तादात्म्यात्तत्काले न चाक्षुषम्, प्रभादौ च तदभावाच्चाक्षुषम्। न च ध्वसकल्पगे गौरवमालोकसयोगस्यैव तद्ध्वसरूपत्वादिति, तच्चिन्त्यम्, सयोगस्य व्यासज्यवृत्तितया ध्वसरूपत्वानुपपत्तेश्च । न च सयोगप्रागभावध्वसस्य सयोगरूपत्ववदुपपत्ति, तथापि सयोगध्वसे तम सत्त्वापत्ते । न च तस्यापि तद्रूपत्व प्रतियोगिध्वसस्य तत्प्रागभावध्वसत्ववदिति वाच्यम्; तथापि ध्वसस्य प्रतियोगिदेशमात्रवृत्तित्वस्वाभाव्येनालोकवृत्तावालोकसयोगे तमोध्वंसरूपत्वकल्पनानुपपत्ते । आलोके तम प्रतीते केनाप्यनङ्गीकारात्। तमसस्तादात्म्येन प्रतिबन्धकत्वापेक्षया तम समये आलोकसयोगरूपकारणाभावादेव चाक्षुषानुत्पाद इत्यस्य लघुत्वात्, आलोकसयोगोत्कर्षेण प्रत्यक्षोत्कर्षत्वाच्चालोकसयोगस्य हेतुत्वावश्यकत्वात् । तमोऽभावत्वेन चाक्षुषहेतुत्वे गौरवात्तद्धेतुत्वेन द्रव्यान्तरसिद्धिप्रसगाच्च ।

यत्तु तमोऽभावत्वेन न कारणत्वम्, प्रतिबन्धकाभावस्यास्मत्सिद्धान्ते हेतुत्वानभ्युपगमात्। प्रतिबन्धकस्य कार्याभाव प्रति क्षेमसाधारणजनकत्वमात्राभ्युपगमात्। प्रतिबन्धकाभावाधिकरण य प्रतिबन्धकाभावसहितकारणकूटक्षणोत्तरक्षणस्तत्त्वस्यैव कार्यव्याप्यतया प्रतिबन्धककाले कार्योत्पत्तिवारणात्। अथवा स्वावच्छिन्नप्रतियोगितानिरूपकत्वेन स्वनिरूपकत्वेन वा सबन्धेन तमस्त्वमभावनिष्ठकारणतावच्छेदकम्। प्रतियोगितायाः स्वावच्छेदकधर्मरूपत्वेनाभावेऽपि तमस्त्वाभिन्नप्रतियोगितानिरूपकत्वसभवात्। यद्वा तमस्त्वावच्छिन्नाभावव्यक्तिहेतुताया तद्व्यक्तित्वमेवावच्छेदकम्। तद्व्यक्तित्वञ्च सैव व्यक्तिस्तन्निष्ठो विशेषविषयत्व वेत्यन्यदेतत्। न च तद्व्यक्ते स्वरूपतो भानाभावान्नावच्छेदकत्वमिति वाच्यम्; तथात्वेऽप्यवच्छेदकत्वे बाधकाभावादिति, तच्चिन्त्यम्; प्रतिबन्धकस्य कार्याभाव प्रति क्षेमसाधारणजनकत्वापेक्षया तदभावस्य कार्य प्रति हेतुताया एव युक्तत्वात्, क्षेमसाधारणजनकत्वस्य गुरुत्वात्। कारणकूटे प्रतिबन्धकाभावसाहित्य-

निवेशेऽपि गौरवात् । सिद्धचादे प्रतिबन्धकत्वस्थले उक्तकार्यव्याप्त्यभावाच्च । अनुमित्यधिकरणक्षणाव्यवहितपूर्वक्षणस्य सिद्धयभावाधिकरणत्वेऽप्यनुमितिरूपकार्याधिकरणक्षणस्य सिद्धिरूपप्रतिबन्धकाभावानधिकरणत्वात् । न च यत्र त्वया प्रतिबन्धकाभावस्य कार्यसहभावेन हेतुत्वमभ्युपेयते तत्रैव प्रतिबन्धकाभावाधिकरणत्व क्षणद्वये निवेश्यते । यत्र तु पूर्ववर्तिनामात्रेण तत्र पूर्वक्षण एव तन्निवेशो न तु उत्तरक्षणेऽपीति न दोष इति वाच्यम्, तथापि कारणकूटाधिकरणक्षणोत्तरक्षणमात्रस्य कार्यव्याप्यत्वे लाघवात् । अकिंचित्करस्य प्रतिबन्धकत्वानुपपत्तेश्च । मन्मते तु प्रतिबन्धकेन स्वभावरूपकारणस्यैव विघटनात् । "प्रतिबन्धोऽपि सामग्री तद्धेतुः प्रतिबन्धकः" इत्याचार्योक्ते । मीमासकैरपि शक्तिनाशकत्वस्वीकारात् । अथवा स्वावच्छिन्नप्रतियोगितेत्यादिकमप्ययुक्तम्, एककार्यतावच्छेदकावच्छिन्ने प्रतिबन्धकतावच्छेदककारणतावच्छेदकधर्मैक्यापत्ते । न चेष्टापत्ति, तमस्त्वं चाक्षुषत्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकमितिव्यवहारविरहात् । एतेन कारणीभूतप्रतिबन्धकीभूतव्यक्त्यभेद एव दोषो न तु कारणतावच्छेदकप्रतिबन्धकतावच्छेदकधर्मभेदाऽपीत्याशङ्कापि निरस्ता ।

यद्वा तमस्त्वावच्छिन्नेऽप्ययुक्तम्, अभावनिष्ठतद्व्यक्तित्वस्यान्यथासिद्धिनिरूपकत्वमिति सकलप्रामाणिकसिद्धत्वात् । तस्याभावनिष्ठहेतुतायामवच्छेदकत्वायोगात् । न च तन्नादरणीयम्, गौरवादेरपि विलयापत्ते । तमस्त्वघटत्वान्यतरावच्छिन्नाभावस्यापि तद्व्यक्तित्वेन हेतुत्वापत्तेश्च । तद्व्यक्तित्वस्य स्वरूपतो भानाभावेऽप्यवच्छेदकत्व स्वरूपेणैवेन्यपि न युक्तम्, ये धर्मा स्वरूपतो न भासन्ते तन्निष्ठावच्छेदकत्वस्य किंचिद्धर्मावच्छिन्नत्वनियमात् । अत एव घटादेरवच्छेदकत्व घटत्वाद्यवच्छिन्न घटत्वादेस्त्वनवच्छिन्नमेवान्यथा बहुविप्लवापत्ति । यदप्युक्तम चाक्षुषहेतुत्वेन भावान्तरसिद्धौ तद्भावेन नील तम इत्यादि प्रतीतेरनिर्वाहात्तमसोभावावश्यकत्वेन तद्भावस्यैवोक्तकारणत्वसभवे चाक्षुषहेतुत्वेन भावान्तर न कल्प्यते, गौरवादिति, तदपि चिन्त्यम्, आलोकस्य चाक्षुषहेतुताया आवश्यकत्वेन तदभावेनैवान्धकारयाले आवश्यकेन तम प्रतीत्युपपत्तौ तस्य भावत्वकल्पनानौचित्यात् । आलोकाभावतमसोर्भेदकल्पने गौरवादनन्तानियवध्वसप्रागभावादिकल्पनाच्च । आलोकाभावे तमाविषयकशाब्द प्रति चाक्षुषसामग्र्या प्रतिबन्धकत्वकल्पनप्रसङ्गाच्च । न च त्वन्मतेऽपि तदविशेष. । समानविषयेऽपि प्रत्यक्षसामग्र्या

शाब्दसामग्रीतो बलवत्त्वादिति वाच्यम्, तथापि मन्मते तम शाब्द जायतामित्येतादृशेच्छाविरहविशिष्टचाक्षुपसामग्रया तद्विषयकशाब्द प्रत्येकमेव प्रतिबन्धकत्वम्, भवन्मते तु तमश्चाक्षुपेच्छाविरहविशिष्टशाब्देच्छाविशिष्टालोकाभावशाब्दसामग्रयास्तमश्चाक्षुपे उभयेच्छाकाले चाक्षुपोपपत्तये च चाक्षुपेच्छाविशिष्टचाक्षुपसामग्र्या आलोकाभावशाब्दे प्रतिबन्धकत्वमिति गौरवम्। चाक्षुपेच्छाविरहशाब्देच्छयोर्विशेष्यविशेषणभावे विनिगमकाभावेन गौरव चेत्यादिक याज्यम्।

ननु सर्वमिद प्रामाणिकत्वाददोप । अन्यथा घटपटादेरपि भेदो न स्यादिति चेत्, न, तद्भेदस्य लोकप्रत्यक्षादिबहुप्रमाणसिद्धत्वात्। न च प्रतीतेर्भ्रमत्वेनाप्युपपादने वस्त्वसिद्धितादवस्थ्यमिति वाच्यम्, अनन्यथासिद्धप्रतीतेरेव वस्तुसाधकत्वात्। अन्यथा नील नभो लोहित स्फटिक इत्यादि प्रतीतातिप्रसगात्। क्वचिद् वस्त्वनङ्गीकारे भ्रमत्वेनाप्युपपादनासभवाच्च। भ्रान्तेरभ्रान्तिपूर्वकत्वनियमात्। अत एव "निषेधस्य यदा कदाचित् प्रतियोगिप्रमापूर्वकत्वनियमाद् द्वैतनिषेधोऽप्रामाणिक एव" इति वृद्धाः।

नीलत्वबलभ्रमत्वप्रकारस्वीकारे स्पष्ट। 'किञ्च नीलरूपवत्ताप्रतीतिर्यथार्था, अयथार्था वा ? नाद्य, पृथिव्यामेवान्तर्भावापत्ते। नान्त्य, आलोकाभावस्यैव भ्रमविशेष्यत्वौचित्यात्" इति लीलावत्युपाये स्पष्टमुक्तत्वात्।

ननु कथ पृथिवीत्वापत्तिस्तमस इति चेत्, न, अत्र द्रव्यकिरणावल्युपायस्थमिश्राभिप्रायाभिधायिङ्कुरुपक्विकाभिप्रायस्य वाच्यत्वात्। तथा हि, 'मिथास्तु नीलरूपसमवायिकारणतावच्छेदक पृथिवीत्व लाघवादिति, वस्तुतो नीलरूपवत्त्वे तम पृथिव्येव म्यान्न द्रव्यान्तरम्, तदनुरोधेन परस्पर्शानुद्भवो विकल्प्यताम्। तदपेक्षया द्रव्यान्तरकल्पनाया गुरुत्वात्। 'धर्मिकल्पनात' इति न्यायात्। अनुद्भवकल्पनायाश्चोदीच्यत्वेन फलमुखगौरवम्यादोपत्वात्। तस्माद् वस्तुतो नीलरूपवत्त्वेऽपि न द्रव्यान्तरमिति तदभावस्योभयस्वीकारे आवश्यकत्वादभाव एव तम, इति वदन्ति"।

नन्वेवमनुष्णाशीतस्पर्शसमवायिकारणतावच्छेदक लाघवात्पृथिवीत्वमिति वायुरपि पृथिवीविशेष स्यात्। तथा च तदनुरोधेन रूपाद्यनुद्भवोऽपि-वल्प्यताम्। यदि स्पर्शविशेषसमवायितावच्छेदक पृथिवीत्व तदा नीलविशेषसमवायितावच्छेदक तदिति तुल्यमिति चेत्, न, वायौ पृथिवीत्वे उद्भूतरूपापत्ते। उद्भूतस्पर्शजनकाग्निसयोगस्योद्भूतरूप-

जनकत्वनियमात् । न च तमसोऽपि पृथिवीत्वे उद्भूतस्पर्शापत्तिरुद्भूतरूपजनकाग्निसंयोगस्योद्भूतस्पर्शजनकत्वनियमादिति तुल्यमेवेति वाच्यम्; तन्नियमस्य त्रसरेणुरूपजनकाग्निसंयोगे व्यभिचारात् । तदीयस्पर्शस्यानुद्भूतत्वात् । निमित्तभेदसंसर्गादित्यादिमतेनैव पूर्वपक्षव्याप्यवतारितत्वेन सिद्धान्तेऽपि तन्मतावलम्बनात् । अस्तु वा त्रसरेणुस्पर्शोऽप्युद्भूतस्तमसोऽप्युद्भूतस्पर्शवत्वे इष्टापत्ति । न च तथा सति तस्य स्पार्शनापत्तिः । त्रसरेणोरिवाश्रयविशेषस्यैव तादृशप्रत्यक्षप्रतिबन्धकत्वात् । अन्यथा त्रसरेणुस्पार्शनस्य दुर्वारत्वापत्ते । न च त्रसरेणुरपि स्पार्शन एव विविच्य परं न गृह्यते, सजातीयसवलनरूपदोषादिति वाच्यम्, तमस्यपि तुल्यत्वात् । न च वायोरप्युद्भूतमेव रूप चक्षुषा तु न गृह्यते, आश्रयविशेषप्रतिबन्धात् । गृह्यत एव वा विविच्य पर न गृह्यते त्वचा तमोवदिति वाच्यम्, पार्थिवोद्भूतरूपस्य महत्तत्वभानाधिकरणस्य विविच्य ग्रहनियमात् । न च पार्थिवस्पर्शेऽप्यय नियमः, त्रसरेणुस्पर्शे व्यभिचारात् । तथा च सम्यगुक्तं "नीलरूपत्वे तमसः पृथिवीत्वापत्तिरिति दिग्"इति । अत एव "यत् कृष्णं तदन्नस्य" इतिश्रुतिरपि-सगच्छते, नीलरूपमात्रस्य पृथिवीसम्बन्धित्व तदर्थ इत्यस्य परैरप्यङ्गीकारात् । अत एव तदुत्तरमेव श्रूयते "यदुत्कृष्टमिवाभूदित्यस्य रूपमिति तद्विदाचक्षु" इत्यादि । विवृत चैतत्पुरस्तात् । तस्मात् स्थितमेतन्नीलरूपप्रतीतेः प्रमात्वे वा भ्रमत्वे वा न तमो द्रव्यान्तरमिति । उक्तञ्च लीलावत्याम्-"अय रूपाश्रयत्वबुद्धिस्तमसि तदा बाधाबाधाभ्या न पदार्थान्तरत्वम्" इति । इदमप्यत्रानुसधेयम्—कपालाद्यवच्छिन्नचैतन्यनिष्ठमूलाविद्याया समवायस्थानीयतादात्म्येन घटादाविव घटाद्यवच्छिन्नचैतन्यनिष्ठमूलाविद्यायास्तादात्म्येन तमसि हेतुत्वे घटकाले कपालस्य सत्तायास्त्वयानङ्गीकारेण तमःकाले. घटादेरप्यभावापत्ति । नचेष्टापत्ति.; घटादिस्पार्शनस्य तदा सर्वसिद्धत्वात् वैषम्येण बीजाभावात् । न च द्रव्ययोरेव तथाङ्गीकार., तमसोऽपि द्रव्यत्वात् । अन्यथा तन गुणक्रियाबुद्धिरयथार्था स्यादिति मूलनाशापत्तेः । न च द्रव्यान्यत्वादि तदङ्गीकर्तुं शक्यम्, अभाव एवान्तर्भावस्यापत्तेः । दशम द्रव्यमिति किरणावल्यादिदर्शनाच्च ।

तम खलु चल नील परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेतुमर्हति ॥

इति परोक्तेश्च । नाप्यवयवावयविभावमन्तरेण द्रव्यस्य द्रव्य प्रति समवायेन तादात्म्येन वा हेतुत्वम्, अनन्तद्रव्याणा तादात्म्येन हेतुत्वकल्पने

गौरव च । एकजातीयद्रव्ये विजातीयद्रव्ययो समवायित्वानुपपत्त्या ज्वलस्यान्धकारे चाक्षुषप्रत्यक्षापत्तेश्च तादात्म्येन तत्र तमसोऽभावात् । नचा-लोकाभावादेव तद्धारणम् तस्य त्वया चाक्षुपहेतुत्वानभ्युपगमात् । तादात्म्या-वच्छिन्नप्रतियोगिताकतमस्त्वावच्छिन्नाभावस्यैव चाक्षुपहेतुत्वोपगमात् । आलोकसत्वे तादात्म्येन तमोविरहादेव चाक्षुपोपपादनात् । न च तमसि वैजात्य कल्प्यम्, मानाभावात् । अपि च तिमिराद् घटस्यालोकदेशनयने पूर्वघटदेशावच्छेदेन तमोऽनुभवो न स्यात् । घट्व्यतिरेकेण तस्य तत्रानुत्थानानुपपत्त । किञ्च तादात्म्येनैव प्रतिबन्धकत्वे चलतीति प्रतीते-र्भ्रमत्वम्भौव्यम् । यत्र यत्र तमस्तत्र तादात्म्येनैव तमस उत्पत्त्यान्यदेशस्यस्या-न्यत्र गमन नास्तीत्यस्यैव पर्यवसानात् । अन्यथा तम सयुक्तद्रव्यस्य चाक्षुपा-पत्ते । सयोगेनापि प्रतिबन्धकत्वे गौरवम् ।

किञ्च द्रव्यजनकतावच्छेदके वैजात्य कर्मनिष्ठमेवेति भवदुक्तनिष्कर्षरीत्या नि क्रिये घटादौ कथ तमस उत्पत्ति ? सयोगहेतुत्वेऽपि तादृशद्रव्यान्तरसयो-गस्य दुर्वचत्वात् । अथ तमोद्रव्यमवयवान्तरारम्भमेव सयोगेन च तस्य द्रव्य-चाक्षुपत्वावच्छिन्ने विरोधित्वमिति कल्प्यते, तदा प्राक्तरोक्त दोषा एव दुर्वारा । अथ तमो नित्यमेव, आलोकाभावश्च तद्व्यञ्जक इति कल्प्यते । तदानव-च्छिन्नपरिमाणमेव वक्तव्यम्, अणुत्वस्य प्रत्यक्षविरुद्धत्वात् । तथात्वस्वीकारे सर्वदा तदनुत्पत्ति स्यात्, अनभिव्यक्तिदशायामपि तत्सत्त्वात् । तमोविषयक-चाक्षुपे आलोकाभावहेतुत्वे गौरवञ्च विषयविधया हेतुत्वञ्चोभाभ्या कल्प्यमिति गौरवम् । एवमालोकान्यत्व प्रतिबध्यतावच्छेदके निवेश्यम्, अन्यथा तत्रापि समवायेन तत्सयोगसत्त्वाच्चाक्षुप न स्यात् । आलोकाभावकालीनतम सयो-गस्य चाक्षुपविरोधित्वादन्यदा चाक्षुपोपपत्तिरिति चेत्, तर्हि सुतरा गौरवम् । किञ्च द्रव्यचाक्षुपत्वस्य प्रतिबध्यतावच्छेदकत्वेऽन्धकारे केवलगुणादिचाक्षु-षापत्ति ।

ननु आलोकसयोगस्य हेतुत्वपक्षेऽपि तमसि रूपादिचाक्षुपवारणाय द्रव्यान्यसमवेतचाक्षुपत्वावच्छिन्ने स्वविषयसमवेतत्वसबन्धेन चाक्षुपस्य हेतु वकल्पनस्यावश्यकत्वात् तत एव मन्मतेऽपि नोक्तानुपपत्तिरिति चेत्, नैवम्, तथापि तवोक्तहेतुत्व, तमस प्रतिबन्धकत्व, तमोऽभावस्य हेतुत्व चेति त्रयम् । मम तु द्रव्यचाक्षुपत्वावच्छिन्ने आलोकसयोगस्योक्तचाक्षुपस्य च उक्तधर्मा-वच्छिन्ने हेतुत्वमिति द्वयमेव । चक्षु सयोगादेस्तूभयत्रापि साम्यम् । वस्तुत आलोकस्य त्वसयुक्तसमवेतसमवायसबन्धेनैव चाक्षुपत्वावच्छिन्ने हेतुत्व

कल्प्यते । तत एव तर्मसि रूपादिचाक्षुषवारणात् कपालिकाकपालघटादिकमादाय घटरूपरूपत्वेषु तत्समन्वय । एवञ्च सत्यालोकचाक्षुषमप्यनायासादुपपादयितु शक्यम्, सयुक्तालोकावयवद्वयसमवेतसमवायस्यालोकमात्रे सुलभत्वात् । एव चान्धकारे रूपादिचाक्षुषानापत्त्या द्रव्यान्यसमवेतचाक्षुषत्वावच्छिन्ने स्वविषयसमवेतत्वसम्बन्धेन चाक्षुषम्प्रति हेतुत्व न कल्प्यते, इति त्वन्मते हेतुताकल्पने गौरवम् । अत एव त्रुटिचाक्षुषानुरोधेन परमाणुद्वयणुकयो सिद्धि । चक्षु सयुक्तसमवेतसमवायस्य हेतुताया द्वयणुकघटितसन्निकर्षाद्रूपत्वादिचाक्षुषापत्त्या समवेताशे चाक्षुषवत्वनिवेशस्यावश्यकतया तेन त्रुटिप्रत्यक्षनिर्वाहात् । द्रव्यचाक्षुषत्वावच्छिन्ने चक्षु सयोगस्य हेतुत्वावश्यकत्वान्न तेन परमाणुद्वयणुकसिद्धिरित्यादेरभिधानेऽप्यालोकसयुक्तसमवेतसमवायहेतुताया तन्निवेशे प्रयोजनाभावात् । न च तत्र रूपत्वादिचाक्षुषानुरोधेन चक्षु सयुक्तसमवेतसमवायस्येन्द्रियार्थसन्निकर्षत्वेन वक्तुम इति वाच्यम्, उक्तलाघवेनैव तत्कल्पनसभवात् । एवञ्च त्रसरेणु सावयवश्चाक्षुषद्रव्यत्वाद् घटवत् । तदवयव सावयव, चाक्षुषद्रव्यावयवत्वात्कपालवत्, इत्यनुमानमुक्तलाघवतर्कसहकारेण तत्साधकम् । एतेन परमाणु सावयव. चाक्षुषद्रव्यावयवावयवत्वात्कपालिकादिरपि स्यादित्युच्छृङ्खलोक्त परास्तम् । तदुत्तरमनुकूलतर्कभावेन वैषम्यात् । एव "त्रसरेणुस्तु विज्ञेयो ह्यष्टौ ये परमाणव" इत्यादित्यपुराणादिवचनानामप्यत्रानुकूलत्व बोध्यम् । त्रसरेणो सावयवत्व विना तेषामर्थान्तरस्य दुरुपपादत्वात् । न चैव—

"जालसूर्यमरीचिस्थ यत् सूक्ष्म दृश्यते रज ।
प्रथम तत्प्रमाणाना [परमाणूना] त्रसरेणु प्रचक्षते ॥

इति याज्ञवल्क्योक्तो त्रसरेणो प्राथम्याभिधानमसगत स्यादिति वाच्यम्, प्रत्यक्षाभिप्रायत्वात् । एतेन "नातीन्द्रियत्वादणूनाम्" इति सूत्रे जालान्तर्गतसूर्यरश्मिमन्तरेति शेष इति कल्पनमप्यनादेयम् । इत्यास्तामप्रकृतमेतत् ॥

भेदाभेदवादोऽपि प्रमाणशून्य ॥ ननु गुणादिक गुण्यादिभिन्न समानाधिकृतत्वादिति चेत्, मैवम्, समानाधिकृतत्वादिति हेतोर्हि गुणादौ गुण्यादिभेदधीप्रतिबन्धकप्रमाविषयत्वादित्यर्थ. । तथा च स्वरूपासिद्धि । घटो नील इत्यादौ नीलविशिष्टाभेदस्यैव विषयतया नीलगुणभेदस्य विषयत्वे मानाभावात् । न च विनिगमकाभाव तन्मते,नीले,घटप्रतियोगिको भेदाभेदो घटे च नीलप्रतियोगिको भेदाभेदौ, नीले भेदासमानाधिकरणो नीलभेदाभाव , घटे च तादृशो घटाभेद.

स्वीकार्यं इति षट्। मम तु घटे नीलप्रतियोगिको नीले च घटप्रतियोगिको भेद इति द्वौ, घटे घटाभेदो नीले नीलाभेदश्चेति चत्वार एवेति लाघवात्। न च स्वस्मिन् स्वाभेदो न स्वीक्रियत इति वाच्यम्, अत्यन्ताभेदस्यावश्यमभ्युपगम्यत्वात्। अत्यन्ताभेदे विशेष्यविशेषणभावो नास्तीति वाक्यादेव तथावगमात्। अत एव घटो न घट इति प्रतीतेर्भ्रमत्वं घटे घटाभेद विना घटभेदप्रत्ययस्य भ्रमत्वे बीजाभावात्। न च शब्दस्थल लक्षणामा गौरवम्, निरूढत्वेन तस्या अदोषत्वात्। गुणवचनाना मनुपा तुगिष्ठ इत्यनुशासनाग्रहात्। अत एव तदुपगृहीत "गुणे शुक्लादय पुंसि गुणिलिङ्गास्तु तद्वति' इति नामानुशासनमपि प्रमाणम्। यद्यपीद विशेषणस्य विशेष्यसमानलिङ्गवचनलिङ्गत्वमित्युत्सर्गसिद्धार्थस्यैवानुवादो न तु गुणविशिष्टपरत्व एव शुक्लादीना तत्समानलिङ्गत्व न तु गुणमात्रपरत्वेऽपीत्येतदर्थम्। शुक्ल रूपमित्यादावतिप्रसङ्गात्। उक्तञ्च तत्र मणिकारादिभिः। तथापि शुक्ल रूपमित्यादावेतद्वाक्येऽपि गुणविशिष्टपरत्वे विशेष्यसमानलिङ्गत्वमित्यस्मिन्नशेऽनुवादत्वेऽपि च प्रत्ययस्य गुणविशिष्टभेदमित्यत्र प्रमाणत्वे नैतदुपन्यासेन काप्यनुपपत्तिः। तद्वार्तिकव्याख्याया फैयटेऽप्युक्तम् "शुक्लादय एवाभिन्नरूपा गुणे तद्वति च द्रव्ये वर्तमाना गृह्यन्ते न तु, रूपादय सर्वदा गुणमात्रवाचिन" इति। एतेन नामान्तरविशेषण शुक्लादिपद पुंसि, नामान्तरविशेषण तु तल्लिङ्गमित्येव तद्वतीत्यादेरर्थो न तु शुक्लादिगुणविशिष्टवाचकशुक्लादिपदाना तत्समानलिङ्गत्वमित्यपीत्यपास्तम्। नियमरूपत्वाभावेऽप्युक्तोत्सर्गसिद्धार्थानुवादत्वे बाधकाभावात्। गुणविशिष्टवाचकविशेष्यसमानलिङ्गका एवेति नियमे बाधकाभावाच्च। गुणविशिष्टवाचका एव पुंलिङ्गान्यलिङ्गभाज इति नियमे तु बाधकमस्तीति वैषम्यम्। अत एवानुवादोऽपि सार्थक.। विशेषणपदाना विशेष्यपदसमानलिङ्गकत्वमिति ह्युत्सर्ग एव न तु नियम.। अजहल्लिङ्गवचनेषु व्यभिचारात्। उक्तञ्च मणिकृता "भिन्नविभक्तिकयोरिव भिन्नलिङ्गयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावाभावात्। अजहल्लिङ्गे तु लिङ्गनियमानुशासनान्न तथा" इति। एवञ्च "दर्शपूर्णमासाभ्या स्वर्गकामो यजेत"इत्यधिकारविधिवाक्यापेक्षिनम्य समुदायगते द्वित्वस्योपपादकम्। "य एव विद्वान् पौर्णमासी यजते यावद्वयेनोपाप्नोति तावदुपाप्नोति य एव विद्वानमावास्या यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति" इति वाक्य पौर्णमासीयोगिना त्रयाणा पौर्णमासी सज्ञा, अमावास्यायोगिना च त्रयाणा दर्शसज्ञेति प्रधानयागाना सज्ञाद्वयविधानेन सार्थकम्। तथा उक्तोत्सर्गस्य तु गुणवि-

शिष्टपरशुक्लादिशब्दाशे बाधाभावपर तद्धतीत्यादिवाक्य स्वार्थे प्रमाणमेव। अत एव घटादिपर्यायेऽप्येव नोक्तम्। घटादिविशिष्टपरत्वे घटादिपदाना लक्षणाया साप्रतिकत्वेन तदनुरोधेनानुशासनप्रवृत्त्यनुपपत्ते। मतुवाद्यन्ता-नाञ्च बाधकाभावादेव विशेष्यसमानलिङ्गत्वसिद्धे।

ननु तथापि नैतत्सार्थक्यम्, गुणविशिष्टपरत्वेऽपि बाधकाभावादेवोत्सर्ग-प्रवृत्तिसिद्धे। न ह्युत्सर्गस्यापि बाधकप्रमाणव्यतिरेके त्याग इति चेत्, सत्यम्, अन्यविशेषणत्वस्य मतुबादिसमभिव्याहारेण झटिति प्रत्ययात्, शुक्लादिप-दाना तु घटवदादिपदाना मतुब्लोपाद्यनुशासनविरह तथात्वाभावात्। मतु-पश्च लोपावश्यकतया श्रूयमाणत्वाभावात्। तदुक्तार्थेऽपि वैयर्थ्यप्रसाग-सत्वाच्च। एतेन "गुणवचनेभ्यो मतुपो लुगिष्ट" इत्यनुशासनमपि द्रव्यविशेष-णम्। शुक्लादिपद विशेष्यसमानलिङ्गकमित्येतन्मात्रपरमित्यप्यपास्तम्। द्रव्याविशेषण तु पुल्लिङ्गमेवेत्यत्र तात्पर्यस्य वाच्यतया शुक्ल रूपमित्यत्राति-प्रसगात्। न च यथाश्रुत एवेत्येव तात्पर्यम्, वैयर्थ्यस्योक्तत्वात्। न च गुण-विशेषणतायामेव पुस्त्वमित्यत्र तात्पर्यम्, शुक्ला घट इत्यादावप्रसगात् मतुब्लोपविधानवैयर्थ्यापत्ते। शब्दानुशासनस्य क्वचिदर्थेऽपि तात्पर्यस्यैव बलव-द्बाधकेनान्यथाकरणस्य सर्वसम्मतत्वात्। "अर्थानादेशनात्" इति समर्थसूत्रे वार्तिकदर्शनात्। उष्ट्रमुख इत्यादे प्रथममुखपदलोपाशे तात्पर्याभावेऽपि लक्षणाया तादृशार्थपरत्वस्य कैयटादावुक्तत्वाच्च। तस्मात्—

कूटज्ञदुर्ढुलढस्य धार्ष्ट्यं मार्ष्ट्यनुशासनम्।
इति वाचाभवाचार्यं सध्या वन्द्यास्तु ते पठन्॥ इति।

यत्तु स्वरविशेषार्थो मतुपो लोपानुशासनमिति, तदसत्, भाष्यादिविरो-धात्। अव्यतिरेकात् सिद्धमित्यनेन गुणगुणिनो सोऽयमित्यभेदाध्यवसाया-दुत्पत्तिरेव मतुपो नास्तीति लोपवैयर्थ्यमभिधाय दूष्यते व्यतिरेक। तद्यथा वस्त्रस्य शुक्ल इति ग्रन्थेन तन्निरासात्। तथा च कैयटः "गुणा पुनरुपायिन-श्चापायिनश्चेति द्रव्याद् भेदेन प्रतीयन्ते शब्देन चाभिधीयन्त" इति। तथा च लिङ्गवचनसिद्धिरित्यपि व्याख्यातम्। यस्माद्द्रव्ये वर्तमाना शुक्लादयो यौगिका न तु पच्चालादिवद्रूढशब्दास्ततो द्रव्यगतलिङ्गसख्योपादायिनो रूढित्वे तु नियतलिङ्गसख्यत्व सर्वत्र वा सर्वलिङ्गसख्यत्व प्रसज्येतेति, स्वरे तु न विशेषणान्तेत्यत्र "घृतादीनाञ्च" इत्यन्तोदात्तस्यैव लिखितत्वात्। "एकादेश उदात्तेनोदात्त" इति वचनात्। एव स्थिते नीलाभेदस्य घटो नील इत्यादौ विषयताया किं मानम्?

यत्तु तन्मतप्रस्तावे भेदाभेदयो कथमेकनिष्ठत्वेन प्रतीतिरित्याशङ्क्य वाचस्पत्ये उक्तम्"विरुद्धमिति न । क्व सप्रत्ययो यन्न प्रामाणिकम् । प्रकृते च प्रामाणसत्वान्न विरोधप्रत्यय.। सामानाधिकरण्यप्रत्यये हि भेदाभेदौ भासेते" इति, तच्चिन्त्यम्, नीलाभेदप्रत्यये स्वानुभवस्यैव मानत्वेनोपन्यासानर्हत्वात् । मया चाभियुक्तान्तरानुभवस्य गुणविशिष्टाभेदप्रत्यये मानत्वोक्त्या वैषम्यात् । अत एव घटे नील इत्यादिकमाश्रयाश्रयिभावावगाहिज्ञान वैशेषिकशास्त्र-वासनामात्रमूलम्, न तु लोकाना स्वरसवाहीति परास्तम् । वैपरीत्यस्यैवोक्तत्वात् । नीलाभेदावगाहिप्रत्यये मानस्य तरेवानुक्तत्वात् । नहि व्याकरणकारा अपि तद्वासनामात्रेण कार्यं विदधति । अत एव मोक्षधर्मे नारदासितसंवादे—

उपपत्त्या गुणान्विद्धि पञ्चपञ्चसु पञ्चधा ।
रूप शब्दो रस स्पर्श शब्दश्चैवाय तद्गुणा ॥

तत्रैव यान्नवल्क्यजनकसंवादेऽपि—

शब्द स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु ॥ इति ।

भवदीयाना कारिकापि—

द्रवत्वमुदके वह्नावौष्ण्य काठिन्यमश्मनि ।
मायाया दुर्घटत्वञ्च स्वत सिद्ध्यति नान्यतः ॥ इति ।

एव वादिप्रतिवादितटस्थानामनुभवसिद्धेऽर्थे वासनामात्रमूलत्वम्, स्वकल्पितार्थे च प्रामाणिकत्वमिति । अहो महत्साहसम् । अत एव घटो रूपवानित्यादिरेव प्रत्यय. प्रयोगश्च । रूपत्वरसत्वादिव्याप्यजात्याक्रान्तगुण-वाचकपदोत्तरमतुप एव लोपविधानात् । रूप घट इत्यादि प्रयोगाभावात् ।अत एव तादृशलक्षणाप्रयुक्तलक्षणेति सर्वसम्मतम् । उक्त चाभियुक्तै: 'काश्चि-त्तैवाप्रयोगत:" इति । न च तादृशप्रयोगस्यासाधुत्वेऽपि रूपघटयोरभेदधी-र्जायत एवेति वाच्यम्, मानाभावात् । अत एव 'रसादिभ्यश्च" इतिसूत्रे रसवान् रूपवानित्यादौ मतुब्विधान तल्लूनस्य नियमार्थत्वनिरासार्थम् । "उर्वशी वै रूपिण्यस्मरसास्पर्शिको वायु." इति च भाष्येऽप्युदाहृतम् । अत एव वामनपुराणे—

"पृथ्वी सगन्धा सरसास्तथाप:, स्पर्शी च वायुर्ज्वलितश्च तेज. ।" इति,

एतेन नीलत्वादिनैव घटादेस्तदभेदो न तु रूपत्वादिनेत्यपि निरस्तम् ।

व्यापकधर्मस्य केवलभेदप्रतियोगितावच्छेदकत्वे व्याप्यधर्मस्य तदभेदप्रतियोगितावच्छेदकत्वानुपपत्ते । एतेनाधारतावच्छेदकतानवच्छेदकरूपावच्छिन्नसंबन्धेन गुणाद्यंशे प्रमाप्रकारकत्वादिति हेत्वर्थव्याख्यानमप्यपास्तम्. समवायस्य आधारतावच्छेदकतायास्तदवच्छेदकरूपेणोक्तस्थले संबन्धस्य सिद्धे, प्रमाणस्य चोक्तत्वात् । सामानाधिकरण्यमान हि घर्मद्वयस्य एकाधिकरणनिष्ठत्वेन प्रतीति । तत्र च गुणनिष्ठप्रकारतायां संसर्गविधया भासमानस्य संबन्धस्याधारतावच्छेदकतानवच्छेदकरूपावच्छिन्नत्वमित्युक्तेर्व्याहतत्वात् ।

वस्तुतस्तु नीलो घट इत्यत्राभेदस्य संसर्गत्वमुभयसिद्धमेव । प्रकारता तु गुणस्य तद्विशिष्टस्य वेत्यत्र पर विवाद । तत्र भेदस्य विषयतया मानाभाव प्रकारत्वविशेष्यत्वाभ्यां तस्याननुभवात् । न च भेदसामानाधिकरण्याभेद एव संसर्ग, अनुभवविरोधात् । अत एव नीलभिन्नो नीलाभिन्नश्चेति द्वयो पृथक् सांसर्गिकविषयतयापि न निर्वाह । तादृशशाब्दस्थले बोधावृत्ते स्वीकर्तुमशक्यत्वाच्च ।

यत्तु विशिष्टबुद्धिमात्रे विशेषणस्य विशेष्ये भेदसमानाधिकरणः संबन्धो विषय इति कल्पनमावश्यकम्, अन्यथा तद्घटविशेष्यकसंयोगसांसर्गिकतद्घटप्रकारकज्ञानस्य प्रमात्वापत्ते । उक्तरीत्या तु न प्रमात्वम्, तद्घटे तद्घटसंयोगसत्त्वेऽपि तस्य भेदसमानाधिकरण्याभावात् । न च तद्घटसंयोगप्रतियोगिन पटादिमादाय संयोगस्य भेदसामानाधिकरण्यमस्त्येव, उभयवृत्ते संयोगस्यैक्यादिति वाच्यम्, घटभेदोपलक्षिताधिकरणावृत्तित्वविशिष्टत्वं हि संयोगस्य भेदोपलक्षितत्वम्, तत्राधिकरणांशे भेद उपलक्षणतयैव न विशेषणतया, उक्तवृत्तित्व तु संयोगांशे विशेषणतयैव । न च घटभेदोपलक्षितपटवृत्तित्वविशिष्टसंयोगो घटे भवितुमर्हति, बाधितत्वात् । अतो न तद्विषय प्रमात्वमिति, तच्चिन्त्यम्, विशेष्ये स्वरूपसत एव विशेषणभेदस्य नियामकत्वोपपत्त्या तद्भानकल्पनस्य प्रमात्वघटकत्वस्य चायुक्तत्वात् ।

यत्त्वेव सति प्रमात्व पारिभाषिकमेव स्यात् । प्रमापदस्य प्रवृत्तिज्ञान मुख्यार्थं, प्रकर्षश्चाज्ञाताबाधितविषयकत्वम्, तच्च वस्तुत उक्तज्ञानेऽप्यस्तीति तस्य प्रमात्वमेव स्यात् । भ्रमपदस्यापि प्रमापदार्थविपरीतार्थकतया बाधितविषयकज्ञानार्थकत्वाद् भ्रमत्वमपि मुख्य न स्यात् । भेदस्य विषयत्वे तु तद्भेदस्य तत्र बाधितत्वात्तद्ग्राहिन उक्तज्ञानस्य भ्रमत्वोपपत्तेरिति, तदसत्, तद्वति तत्प्रकारकत्वमेव हि न्यायमते मुख्य प्रमापदार्थ । स्वत प्रामाण्यवादेऽपि तस्यैव स्वतोग्राह्यत्वस्वीकाराच्च । विशेष्यावृत्त्यप्रकारकत्वादेर्व्यवसा-

यानुल्लिखितार्थघटितत्वेन स्वतोग्राह्यत्वविप्रतिपत्तिविषयत्व नास्तीति तत्र मणिकारादिभिर्निरूपितत्वात्। एवमज्ञाताबाधितार्थविषयकत्वमपि न प्रमापदमुख्यार्थं, न्यायसाम्यात्। स्वतोग्राह्यत्वविप्रतिपत्ति विशेष्यस्यैव तत्त्वेन मीमांसकैरप्यवश्यमभ्युपगम्यत्वात्। तथा च तद्घटस्य यत्र विशेष्यतया विशेषणतया च भान सयोगस्य च सर्गतया तत्र न प्रमात्वापत्ति विशेषणाभाववद्विशेष्यकत्वात्। यत्र तु तद्घटस्य विशेष्यत्व तद्घटसयोगस्य च प्रकारत्व समवायस्य च ससर्गत्वम्, तस्य प्रमात्वमिष्टमेव। तद्घटनिरूपितसयोगस्य तद्घटे सत्त्वात्। अन्यथा सयोगस्य व्यासज्यवृत्तित्व एव प्रमाणस्य दौर्लभ्यापत्तेः। अत एवालोकनिरूपितसयोगस्यालोकेऽपि सत्त्वाच्चाक्षुषत्वावच्छिन्ने तत्सयोगहेतुताया न व्यभिचार इति प्राञ्चः। नहि ज्ञानस्य भ्रमत्वेनापादनेऽपि तत्सयोगस्य तदवृत्तित्वे उक्तहेतुत्व सुसाधम्। वस्तुगर्भत्वात्।

इदञ्च वस्तुगतिमनुसृत्योक्तम्। अज्ञानाबाधितार्थविषयकत्वस्य प्रमापदमुख्यार्थत्वेऽपि वस्तुत एव बाधाभावो विवक्षितो न तु बाधाभावत्वादेरपि प्रकारत्वेन भानम्। न वा भ्रमे बाधितत्वेन ज्ञान सर्वानुभवविरोधात्। एवञ्च भेदस्याविषयत्वेऽपि सयोगेन स्वस्य स्वस्मिन् बाधितत्वात्तादृशज्ञानस्य बाधितविषयकत्वमुपपन्नमेव। न च भेदाभाववति भेदप्रकारकत्वमेवोक्तज्ञानस्य भ्रमत्वम्, तच्च भेदज्ञान विना नेति वाच्यम्, भेदस्य प्रकारतया भानन्यप्रकृते तैरप्यनङ्गीकारात्। सयोगसबन्धावच्छिन्नप्रतियोगिताक तद्घटाभावत्वद्विशेष्यकत्वादवच्छिन्नसयोगावच्छिन्नतद्घटप्रकारताशालिनयोक्तज्ञानस्य भ्रमत्वसौलभ्यात्। सयोगादिसबन्धश्च भेदनियत इत्यन्यदेतत्। न तु विशिष्टबुद्धौ भेदस्य विषयत्वमावश्यकम्, भानाभावात्। अत एव तादात्म्यसबन्धेन तद्घटे तद्घटप्रकारक ज्ञान प्रमैव। येन सबन्धेन यत्र यन्नास्ति तेन सबन्धेन तत्र तत्प्रकारकस्य तत्र तत्ससर्गप्रकारकस्यापि वा ज्ञानस्यैव भ्रमत्वात्।

यत्तु न ह्यत्यन्ताभेदे सबद्धता सभवति, घटो घट इत्यादि प्रत्ययाभावादिति, तन्न, घटे घटात्यन्ताभेद इत्युक्त्वा तत्र तत्तादात्म्य नास्तीत्युक्तेर्व्याहतत्वात्। भेदनियतसबन्धस्यैवात्यन्ताभेदेऽनुपपत्ते। घटो घट इति प्रत्ययस्य च सयोगादिससर्गकस्यैव प्रमात्वानभ्युपगमात्। न चैव घटो घट इति शाब्दबोधोऽपि स्यादिति वाच्यम्; उद्देश्यतावच्छेदकरूपेण विधेयत्वे निराकाङ्क्षत्वात्। विरूपोपस्थितयोरेवाभेदान्वयनियमात्। अत एव घटो घटभिन्नो नेति शब्दादभेदप्रकारको बोधो भवत्येव। उद्देश्यतावच्छेदक-

भिन्नरूपेण विधेयावगाहित्वात् । न हि घटो घट इति तादात्म्यसंसर्गक-ज्ञानस्य भ्रमत्व स्वीकृत्याप्युक्तशाब्दापत्तिर्वारयितु शक्यत, प्रमात्वाभावेऽपि शाब्दमानस्य दुर्वारत्वात् । शाब्दत्वस्य प्रमात्वव्याप्यभावादिति न किंचिदेतत् ।

यत्तु त्वन्मते घटो घट इति शाब्दाभाव आकाङ्क्षाव्यतिरेकप्रयुक्त । मन्मते योग्यताज्ञानव्यतिरेकप्रयुक्त इति लाघवमिति, तदत्यन्तमसत्, आकाङ्क्षाया हि त्रयो भागा । एकवाक्यतात्पर्यावधारणोऽननुभावकत्व चेति । तत्रात्यन्तप्रतिबन्धकाभावतया स्वरूपसदेव प्राचे । द्वयन्तु ज्ञान कारणमिति निष्कर्ष । तत्र फलन तद्घटपदस्य तद्घटपद व्यतिरेक-प्रयुक्तान्वयाननुभावकत्वाभावप्रयुक्त शाब्दाभाव इति प्रकृतपर्यवसानान्न गौरवम् । योग्यता तु ज्ञातैव कारणम् । स्वय बहुविधा गुरुशरीरा चेति तद-भावस्य प्रयोजकत्व एव गौरवम् । अयोग्यताज्ञान प्रतिबन्धकम् । तदभावश्च स्वरूपसन्नेव प्रतिबन्धकाभावविधया हेतुरिति पक्षेऽपि तथैव । ज्ञानाशस्यापि प्रतियोगिकोटौ निवेशाधिक्याच्च येन रूपेण प्रतिबन्धकता तद्धर्मावच्छिन-प्रतियोगिताकत्वेनैव प्रतिबन्धकाभावस्य हेतुत्वात् ।

किञ्च अयोग्यताज्ञानमात्रस्य सशयसाधारणस्य ग्राह्यसन्देहपर्यवसितस्य प्रतिबन्धकत्वाभावादयोग्यतानिर्णयस्यैव बाधविषयाविरोधित्वम् । तन्न योग्यताघटकनानापदार्थानामभावाशे प्रतियोगितावच्छेदकतया निवेश । तादृशभावाभावप्रकारकत्वे सति तादृशाभावप्रकारकत्वरूपनिर्णयस्य पुनर-भावाशे प्रतियोगितया तद्घटकपदार्थानाञ्च प्रतियोगितावच्छेदकतया निवेश इति विपरीतमेव गौरवमिति यत्किञ्चिदेतत् । अपि च स्वस्मिन् स्वाभेद-ज्ञानस्य भ्रमत्वे स्वस्मिन् स्वाभेद एव प्रमाण दुर्लभ स्यात् । नचेष्टापत्ति, सबन्धाभावसिद्धयर्थं स्वस्मिन् स्वाभदस्य स्वयमेवोक्तत्वात् । नापि यद्विशेष्यक-यत्प्रकारकयत्ससर्गकशाब्दबोधो न भवति, तादृश ज्ञानान्तरमपि न भवत्येवेति, भ्रम एवेति वा नियम प्रामाणिक । पुरुषविशेष्यकदण्डप्रकारकसयोगससर्गक-शाब्दबोधस्य बाधितत्वेऽपि तादृशचाक्षुषादेर्जायमानत्वात् प्रमात्वेन सर्वानु-मतत्वाच्च । दण्ड पुरुष इति शब्दस्य सयोगससर्गकशाब्दे स्वरूपायोग्यत्वात् रामानविभक्तिकनामार्थयोरभेदससर्गकशाब्दत्वमेव कार्यतावच्छेदकमिति नियमात् । दण्डपदस्य तत्सयोगलक्षणाया दण्डी पुरुष इति मत्वर्थप्रत्ययान्तत्वे दण्डसयोगवानिति सयोगस्यापि पदोपस्थितत्वे वा सयोगस्य प्रकारत्वेनैव भासमानत्वात् । तत् किं घटो घट इति शाब्दस्य भावाभावचिन्तया प्रकृता-

नुपयागात् ? प्रासगिकत्वे तत्तरमुक्त एव। तस्माद्भेदसमानाधिकरणत्वेनैव सवन्धा विशिष्टबुद्धिमाने भातीति नियमो व्यर्थो व्यभिचारी चेति सिद्धम्। अत एव केवलान्वयिस्थले प्रमेयत्वं प्रमयत्वमित्यादौ.....भूतलवृत्तिघटाभाववृत्तिघटाभावयोरैक्यपक्ष घटाभावे घटो नास्तीत्यादौ तदन्यस्थलेऽपि च क्वचिदभेदेऽपि विशिष्टबुद्धि । तत्र भेदभाने भेदाभावबुद्धिशेष्यकत्वेनाभ्रमत्वापत्ते.।

यत्तु घटप्रतियोगिकाभावत्वस्य विशेष्यतावच्छेदकत्वे घटविरोध्यभावत्व विशेषणतावच्छेदकम्, एकरूपेण विशेष्यत्वयोरसभवादिति, तच्चिन्त्यम्. एकरूपेणोभयानुभवविरोधात्। अत एव प्रमेयत्वस्य प्रमाभेदेन नानाविषयतया एकविधप्रमेयत्वविशेष्यकमन्यविधप्रमेयत्वप्रकारक च ज्ञानमित्यपास्तम्। ईश्वरज्ञानविषयत्वे ईश्वरज्ञानविषयत्वमित्यत्र तदसभवात्। ईश्वरज्ञानस्य भेदाभावात्, अनङ्गीकारे च सर्वज्ञत्वविरोधात्। प्रमेयत्वस्यापीश्वरज्ञानविषयत्वात्मकत्वात्। अस्मदादिप्रमाविषयत्वस्य केवलान्वयित्वानुपपत्ते.। प्रमाया विषयभेदभिन्नत्वात्।

किञ्च उभयाभावस्यापि घटप्रतियोगितया घटत्वावच्छिन्नप्रतियोगितात्यन्ताभावस्य च तद्विरोधितयोक्तरूपेण विषयत्वे तज्ज्ञानस्याभ्रमत्वापत्ति.। घटविरोध्यभावत्वाभाववद्विशेष्यकघटविरोध्यभावप्रकारकज्ञानत्वात्। उभयाभावस्य घटविरोधित्वाभावात्। उभयाभावेऽपि हि घटात्यन्ताभाव स्वीकार्यो युक्तिसाम्यात। अत एव तत्र घटविरोध्यभावत्व न विशेष्यतावच्छेदकम्, विशेष्यावृत्तित्वात्। एतेन घटाभावस्तद्वानिति शाब्दबोधस्थले यद्रूपेण घटाभावपदाद् घटाभावोपस्थितिस्तेनैव तत्पदात्प्रतीतावपि सुवर्णत्वादिविशेषितरूपेणैव विशेष्यतेत्यपास्तम्। एकत्वविशिष्टघटाभावत्वस्य घटाभावपदादुपस्थितत्वे तत्पदेनाप्येकत्वाशमपहायैव घटाभावत्वेनैव तत्परामर्शे इत्यत्र मानाभावात्। तच्छब्देन एकत्वावच्छिन्नघटाभावत्वेनैव तदुपस्थितौ बाधकाभावात्। न चान्यूनानतिरिक्तरूपेण विशेषणविशेष्यत्वानुपपत्तिरेव बाधिका, प्रकृतव्यभिचारेण तन्नियमस्यैव निरस्यमानत्वात्। नह्युक्तनियमो वेदबोधितो येन व्यभिचारस्थलेऽपि तद्बोधित कारण कल्पयित्वापि तत्परिहार: क्रियेत। यथा मङ्गलाभावस्थलीयशास्त्रे जन्मान्तरीयमङ्गलकल्पनया व्यभिचारनिरास: । तत्र तद्धेतुत्वस्य वेदबोधितत्वात्। उक्तञ्च विसूत्रीनिबन्धे "व्यभिचारस्तु आगमेतरप्रमाणगम्य कारणत्वमपवदति" इति। प्रकृते तु तच्छब्देन एकत्वावच्छिन्नघटाभावत्वेन तदुपस्थापने बाधकान्तरमेव

वक्तव्यम्। तच्च नास्त्येव। घटाभावत्वावदेकत्वस्यापि धर्मितावच्छेदकत्वेन तत्पदजन्यायां घटाभावोपस्थितौ भानसभवात्। पूर्वमुपस्थितेश्च साधकत्वात्। व्यभिचारस्थलेऽपि स्वकल्पितनियमानुरोधेन तत्परिहारस्य वक्तुं शक्यत्वे च व्यभिचारस्थैवोच्छिन्ना स्यात्। एतेन तद्घटज्ञानस्य प्रमात्वमयोगसंसर्गीयातद्घटनिष्ठा या प्रतियोगिता तन्निरूपितानुयोगितावद्विशेष्यकसंयोगसंसर्गकतद्घटप्रकारकत्वम्। सा चानुयोगिता घटभिन्न एव स्वीक्रियते न तु घटे, साधकाभावात्। घटाभावस्थले तु विशेषणतासंबन्धीया घटाभावनिष्ठा या प्रतियोगिता तन्निरूपितानुयोगिता घटाभावेऽपि स्वीक्रियते। अनुभवस्य साधकत्वादिति समाधानाभास परास्त। उक्तरीत्यैव प्रमात्ववारणादनुयोगितावैलक्षण्ये मानाभावात्। न चोक्तवैलक्षण्यानङ्गीकारे तद्घट संयोगसंबन्धेन तद्घटे कुतो नास्तीति वाच्यम्, संयोगसंबन्धावच्छिन्नवृत्तेर्भेदनियतत्वात्। भूतल घटवदित्यादिज्ञाने तत्कल्पकस्य भेदस्य सर्वसिद्धत्वेन विनिगमकसत्त्वाच्च। अनुयोगितविशेषकल्पनेऽपि भेदस्यैवोपजीव्यत्वाच्चेति दिक्।

स्यादेतत्। संयोगेन घटो घट इति लोकानामननुभवात्तद्बलादेव नीलो घट इत्यादौ भेदसिद्धि। न च तथापि विशेषणविशेष्ययोस्तद्व्यक्तित्वेनैव भेदापेक्षा नतु विशेष्यतानिरूपितावच्छेदकान्तर्भावेन, एकघटविशेष्यकघटान्तरप्रकारकसंयोगसंसर्गकघटो घटवानिति ज्ञानस्यानुभवसिद्धत्वात्। तथा च नीलत्वघटत्वाभ्यां भेदेन भानमिति वाच्यम्, घटो द्रव्यमित्यत्र तद्व्यक्तित्वेनापि भेदाभावात्। विशेष्यविशेषणतावच्छेदकरूपाभ्यामेव भेदस्यापेक्षितत्वात्। घटो घटवानित्यत्रापि पूर्वक्षणवृत्तित्वादिविशिष्टत्वेन कथंचिद् भेदकल्पनादिति चेत्, मैवम्, अभेदान्यसंसर्गकबुद्धौ तद्व्यक्तित्वाभ्यामुभाभ्यां धर्माभ्यामेकधर्मिबोधकत्वरूपसामानाधिकरण्यसंसर्गकबुद्धौ च विशेष्यविशेषणतावच्छेदकयोर्भेदो भेदाभावरूपाभेदसंसर्गकबुद्धौ च विशेष्यविशेषणतावच्छेदकयोरैक्यमपेक्षितमिति नियमात्। भूतल घटवदित्यादाववच्छेदकभेदसत्त्वेऽपि तद्व्यक्तित्वाभ्यामपि भेदसत्त्वात्। घटो घटवानित्यादाववच्छेदकभेदाभावात्तस्य तदनियामकत्वात्। उक्तसामानाधिकरण्यं च गुणगुण्यादिस्थल एव। तत्र च नीलत्वघटत्वयोर्भेदसत्त्वात्। द्रव्यं घट इत्यत्रापि द्रव्यत्वघटत्वयोर्भेदात्। घटो घट इत्येकविशेष्यविशेषणकज्ञाने च न संयोगादिर्न वा उक्तरूप सामानाधिकरण्य संसर्गः किन्तु अभेदमात्रम्। तच्च विशेष्यविशेषणतावच्छेदकभेदाभावादेवान्याभेद इति गीयते। तथा च अभेद[द]संसर्गकज्ञान

द्वेधा विशेष्यविशेषणतयोभिन्नधर्मावच्छिन्नत्वे एकधर्मावच्छिन्नत्वे च । आद्य सामानाधिकरण्यप्रत्यय, अन्यथा भेदप्रत्यय इति विभागः । य सबन्धो यादृशयो सम्बन्धिनो प्रमाणसिद्धस्तेन तादृशावेव सबन्धिनावपेक्षितावितिनु रहस्यम् । तथाहि-सयोगे प्रतियोग्यनुयोगिनोरवच्छेदकभेदस्तदभेदो वा नियमेन नापेक्षित: किन्तु व्यक्तिभेदमात्रम्, सामानाधिकरण्यसबन्धे च प्रतियोग्यनुयोगितावच्छेदकभेद, अन्यथाभेदसबन्धे च तद्व्यक्तेर्विशेष्यविशेषणतावच्छेदकयोश्च भेदाभाव इति ।

यत्तु प्रतियोग्यनुयोगिनोर्भेदाग्रहे ससर्गाग्रहाद् भेदभ्रमे ससर्गभ्रमाच्च ससर्गज्ञाने भेदज्ञान कारणम्। स्वरूपसत्कारणस्य स्वभ्रमेण कार्यानुपधायकत्वात् । अत एव योग्यताभ्रमेण शाब्दभ्रमोत्पत्त्या योग्यताज्ञानमेव शाब्दे हेतुरङ्गीक्रियते। तया च घटो द्रव्यमित्यादौ भेदज्ञान प्रथममवश्य वाच्यम्। तस्य लाघवात् प्रमात्वमेव युक्तम् । भ्रमत्वस्य गुरुत्वात्तत्कारर्दोषादिकल्पनापत्तेश्च। अभ्यकल्पनेऽपि सिद्धान्ते प्रातिभासिकभेदसिद्धेश्च ससर्गप्रतियोग्यनुयोगिनोस्तत्त्वावच्छेदकरूपाभ्या भेदस्यावश्यकत्वादिति, तदसत्, यत्रभेदज्ञान ससर्गज्ञानेऽपेक्षित तद्भेदस्य सत्त्वात्, यथा द्रव्य घट इत्यत्र द्रव्यत्वघटत्वयो । तदवच्छिन्नभेदस्य त्वनुपयुक्तत्वात्। न त्वस्य ससर्ग प्रत्युत विशेष्यैक्ये विशेषणतावच्छेदकभेदस्यैव नापेक्षितत्वात्, प्रतियोग्यनुयोगिभेदज्ञानकार्यतावच्छेदकत्वकल्पने मानाभावात् । तद्घटस्तद्घट इत्यादावुक्तरीत्या व्यभिचारात् । नाप्यत्यन्ताभेदान्यससर्गज्ञानत्व तत्कार्यतावच्छेदकम्, द्रव्य घट इत्यादौ व्यभिचारात् । एव च घटो द्रव्यमित्यत्र द्रव्यत्वघटत्वाभ्या घटभेदज्ञानस्यैवानपेक्षित वे कुतस्तस्य प्रमात्वादिकल्पने चर्चा ।

यत्तु प्रातिभासिकभेदसिद्धिरिति, तत्रापि वक्ष्याम ।

यत्तु द्रव्यप्रतियोगिकघटानुयोगिकत्वेनाभाभेदभानात्, द्रव्यघटयोश्च स्वद्रव्यत्वभेदाभावादतिरिक्तप्रतियोगित्वानुयोगित्वकल्पनायत्ति । मन्मते त्वौपाधिकभेदस्यैव तद्रूपत्वान्न तथेति, तदसत्, विशेषणविशेष्यतावच्छेदकभेदस्यैव प्रतियोगित्वानुयोगित्वकल्पनया निर्वाहात् । न च तयोर्विशेषणविशेष्यवृत्तित्वनियमादुक्तभेदस्य च तत्त्वावच्छेदकवृत्तित्वेन तन्निष्ठप्रतियोगित्वानुयोगित्वानुपपादकत्वात्तथेति वाच्यम्, तथापि घटवृत्तेर्द्रव्यत्वभेदस्य प्रतियोगित्व घटत्वभेदस्य चानुयोगित्वमिति कल्पनोपपत्ते । वस्तुते तूपहितभेदकल्पनित्वा तस्य प्रतियोगित्वानुयोगित्वकल्पने गौरवात् । उक्तन्यवस्थान्यायानुपपत्तस्यप्रमाणेन द्रव्यत्वघटत्वाभ्या घटभेदस्यासिद्धत्वात् ।

यत्तु विशेष्यताविशेषणतावच्छेदकयोर्यो भेद उभयसिद्ध स एव तदुपहित भेद, अत एव द्रव्यत्व भेदस्य द्रव्यत्व इव स्वोपहिते द्रव्येऽप्यभावान द्रव्य द्रव्यमिति विशिष्टबु० । एव घटत्वादेरपि योज्यम् । भेदप्रतियोगितापि तत्तदुपहितयोरेकैव लाघवात्, एव भेदानुयोगितापि । तथा च द्रव्यत्व न घस्त्वमित्यत्र भासमानस्य भेदस्यैव द्रव्य घट इत्यनुभवे द्रव्यत्वानुयोगिकतया घटत्वतदुपहितप्रतियोगिकतया च भानम् । औपाधिकभेदस्थले तथानुभवादिति नातिरिक्तभेदकल्पनमिति, तदप्यसत्, मन्मतेऽपि विशेष्यताविशेषणतावच्छेदकयोर्भेदस्यैव स्वावच्छिन्नाभेदबोधे प्रतियोग्यनुयोगित्वरूपत्वोपपत्ते । घस्त्व न द्रव्यत्वमितिवद् घटो न द्रव्यमित्यस्याप्यापत्तेश्च ।

यत्तु नञ्भेदादिपदाभिलप्यमाने ज्ञाने तादात्म्यविरोधित्वविशिष्टभेदस्यैव विषयत्वम्, उपहितभेदस्य तु न तादात्म्यविरोधित्वम् । अत एव वृक्षे कृष्णसयोगो नास्तीत्यादिज्ञानेऽपि कृष्णसयोगविरोध्यत्यन्ताभावस्यैव विषयत्वम् । नञादिपदस्य विरोध्यभावबोधकत्वेन तादृशाभावज्ञानस्यैव तेनाभिलापात् । अत एवोक्तज्ञानानन्तर घटो द्रव्यमिति न धी । प्रतियोगिसामानाधिकरण्यरूपाव्याप्यवृत्तित्वविशिष्टसयोगादिविशिष्टबोधविरोधित्वम् । अत एव मूले वृक्षे न कृष्णसयोग इति धीरपि मूलवृक्षे कृष्णसयोग इति ज्ञाने नियमेन विरोधिनी । एतेन विशिष्टकेवलयोर्भेदे विशिष्टसत्ता सत्ता नेति प्रमा स्यादिति शिरोमण्युक्तमपि परास्तमिति तदप्यसत्, द्रव्यत्वघटत्वयोर्भेदस्य यथा तयोरभेदे तदभेदबुद्धेश्च तदभेदबुद्धौ विरोधित्वम् तथा तदुपहितभेदस्यापि स्यादेव । उपहितभेदस्य प्रतियोगिनोस्तादात्म्ये विरोधित्व नास्त्युपाधिभेदस्य त्वस्तीत्यभिधाने च उपाधिभेदान्योपहितभेदकल्पना स्वहस्तितैव स्यात् । विरुद्धस्वभावयोरैक्ययोगात् । तदुक्तम्—अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यास कारणभेदश्चेति । नापि प्रतियोग्यनुयोग्यतयो प्रकृते ऐक्यसभव । प्रतियोगितावच्छेदकभेदेन प्रतियोगिताभेदस्यावच्छेदकलक्षणे दोषित्यादिमर्वसम्मतत्वात् । घटत्वभेदस्य हि प्रतियोगिता घटेनराकृतित्वे घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे च सति समवेतत्वरूपघटत्वस्वावच्छिन्नाघटभेदस्य प्रतियोगिता तु घटत्वेन स्वरूपत एवावच्छिन्नेति भेदात् । अत एव द्रव्य घट इत्यत्र द्रव्यत्वत्वघटत्वत्वाभ्या द्रव्यत्वघटत्वयोरनुपस्थितत्वाद्द्रव्यत्वानुयोगिकतया घटत्वतदुपहितप्रतियोगिकतया च भेदभानमप्यसभवदुक्तिकमेव ।

यत्तु इतरविशेषणीभूते प्रतियोग्यादाववच्छेदकमानस्यानावश्यकत्वादिति, तन्न, प्रतियोगितावच्छेदकरूपेण प्रतियोग्यनवगाह्यभावत्वप्रकारकप्रत्यक्षानुपपत्तेः । प्रतियोगिमिश्रितामावशाब्दादेरपि प्रतियोगितावच्छेदकावगाहित्वनियमाच्च । इतरविशेषणीभूत इत्यस्य च कोऽर्थः? किं भेद विशेषणीभूत इति, अद्रव्यविशेषणीभूत इतिवा । नाद्य, तत्रैवावच्छेदकावगाहनस्यावश्यकत्वात् । नान्त्य, द्रव्यांशे जातेर्निरवच्छिन्नप्रकारतात्वनवेऽपि भेदांशे प्रतियोगितासम्बन्धावच्छिन्नप्रकारतायाः निरवच्छिन्नत्वानुपपत्तेः । तथाचोक्त शब्दपरिच्छेदे "समवायत्वाश्रयतादात्म्याभ्यामेव जात्यंशे निरवच्छिन्नप्रकारत्वमनेर्मिथ्यादिनम्मतत्वाद्" इति । अन्यथा पटे घटो नेत्यादौ घटनिष्ठविशेष्यतानिरूपितसमवायसंसर्गकघटत्वांशे निरवच्छिन्नप्रकारतावघटत्वोपस्थितेः, अत्यन्ताभावांशेऽपि प्रतियोगितासम्बन्धेन निरवच्छिन्नयैव प्रकारतया घटत्वस्य भान स्यात् । न चेष्टापत्तिः; घटस्यैव पटवृत्तित्वाभावबोधात् । घटत्वे पटवृत्तित्वाभावस्य पटे घटत्वात्यन्ताभावस्य वा तत्राविषयत्वात् । द्रव्य घट इत्यादि शाब्दस्थले च इतरविशेषणत्वेनोपस्थितस्य द्रव्यत्वघटत्वादेरनुपयोगित्वप्रतियोगित्वाभ्या भेदान्वयस्यैवानुपपत्तेः । भेदस्यैव पदानुपस्थितत्वेन तदन्वयशङ्काया एवानुपपत्तिः ।

ननु 'यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्व वा वक्तव्यम्" इति दीधितिवाक्ये भेदप्रतियोगितावच्छेदकीभूतानुभवत्वघटकत्वेनानुभवान्यासमवेतत्वस्योपस्थित्या अनुभवान्यासमवेतत्वाद्यस्य च वैयर्थ्येन प्रतियोगितावच्छेदककोटावप्रवेशादनुभवत्वान्येत्यस्य सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकान्योन्याभावाश्रयेत्यर्थपर्यवसानात्तत एव ज्ञानत्वादिवारणेऽनुभवान्यासमवेतेति पृथगुपादानवैयर्थ्यमित्याशङ्क्य "भेदोपरि स्वरूपत एवप्रतियोगितासम्बन्धेनानुभवत्व प्रकारः" इति व्याख्यानम् । तथा चापि भेदप्रतियोगित्वानुयोगित्वे निरवच्छिन्नयोरेव द्रव्यत्वघटत्वयोः संभवाद् एवेति चेत्, सत्यम; तत्रानुभवत्वजातेः पदोपस्थितत्वेन कथंचित्सम्भवेऽपि प्रत्यक्षादौ तदसम्भवात् । जन्यत्वस्यापि न तथा प्रमाणम् । अत एव तत्र केश्चिट्टीकाकारैः "अनुभवान्यासमवेतत्वे सति सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्य सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्य न भिन्नत्वात्, सत्यन्तविशिष्टावच्छिन्नप्रतियोगिताकभेदस्य च ज्ञानत्वेऽपि सत्त्वात् तद्वारणाय विशेषणा-

•तरसायक्यम्। अखण्डाभावतया च न वैयथ्यमित्युक्तम्। अन्यैस्त्वनुभव-शक्यतावच्छेदकत्वेनवानुभवत्वीया प्रतियोगितावच्छिद्यते" इत्युक्तम्।

ननु तथाप्यत्र समवायसम्बन्धावच्छिन्नद्रव्यत्वघटत्वनिष्ठविशेष्यतानिरूपिताया निरवच्छिन्नत्वमुभयसिद्धम्। तस्या एव प्रतियोगित्वानुयोगित्वे प्रत्यपि तादृग विषयत्व सभव येव। अत एव पवतो वह्निमानित्यत्र पक्षतावच्छेदकावच्छेदेनानुमिताववच्छिन्नत्वसाव धेन साध्यनिष्ठविशेष्यतानिरूपिता समवायेन पक्षनिष्ठविशेष्यतानिरूपिता च पक्षतावच्छेदकनिष्ठा प्रकारता एकैव स्वीक्रियते। अत एव पवत पवतत्वीयवह्निमानित्यनुमितेराकार। पवतत्वीयवह्निव्याप्यधूमवान्पवत इत्यादिपरामशजन्यानुमितावुभयविशेष्यता-निरूपितप्रकारतयोर्भेद एव तथात्वादिति चेत् मैवम्, तत्रापि विवादात्। अनुमितेरवच्छेदक बावगाहित्वस्य प्रकारान्तरेणोपपादितत्वात्। अत एव कमधारयोत्तरभावप्रत्ययस्य पदाथतावच्छेदकद्वयसामानाधिकरण्यवचन-त्वमित्यस्य व्याख्याने सामानाधिकरण्यमानस्य भावप्रत्ययाथत्वे इतरविशे-षणत्वेनोपस्थितयोर्नीलत्वोत्पलत्वयो प्रत्ययार्थान्वयो न स्यादित्यादिक शङ्क-न्ते। वस्तुतस्तु द्रव्यत्व न घटत्वमित्यत्र भेदप्रकारतानिरूपिताद्रव्यत्वविशे-ष्यताद्रव्यत्वत्वावच्छिना तत्र द्रव्यतानिरूपिता घटत्वप्रकारता च घटत्व बाव च्छिना। तत्र द्रव्य घट इत्यत्र द्रव्यत्वानुयागिकतयाभान भेदस्य न सभवति। जातिनिष्ठाविशेष्यत्वस्य निरवच्छिन्नस्यास्वीकारात्।

नन्वत्र रजतत्वमिद रजतमिति ज्ञानयो कारणतावच्छेदकैक्यनिवचनार्थम्, स्वरूपत प्रकारत्वस्येव स्वरूपतो विशेष्यत्वस्यापि सभवादिति केचिच्छुद्धा लोकव्याख्यातभिक्तत्वाज्जातेरपि विशेष्यत्व निरवच्छिन्न स्वीक्रियत एवेति चेत् न तस्यापि सर्वानाभमतत्वात्। अतएवानुमानदीधितौ ०यापकताज्ञानस्य यभिचारबुद्धिविरोधित्वाभावप्रदशनायमुक्तम् वह्निभाववद्वृत्तिधूम इति ज्ञाने हि वह्नि व स्वरूपेण प्रतियागित्व तदनवच्छेदकत्व च ससगमर्यादया भासत धूमसामानाधिकरण्याभावप्रतियोगितानवच्छदकवह्नित्वमित्यत्र वह्नित्वत्वेन वह्नि व प्रतियोगितात्वविशिष्टनदवच्छदकत्वविशिष्टभाव इति विषयविरोधि विरहात् इति। आस्ता वा तथा कथ तथापि द्रव्यत्वत्वस्य प्रकृते विशेष्य तावच्छदकत्वमावश्यकम्। तथा सति यैव द्रव्यत्व न घटत्वमित्यत्रानुयोगिता सैव घटत्व न द्रव्यत्वमित्यत्र प्रतियोगितेति तयोरैक्यकल्पनेन लाघवात्। न च भेदविशेष्यतानिरूपितप्रतियोगितासबन्धावच्छिन्नजातिप्रकारताया उभयत्राप्यनवच्छिन्नत्वमेव स्वीक्रियते। तथा च द्रव्यत्वविशेष्यताया निरव-

च्छिन्नत्वेऽपि घटत्वेन द्रव्यत्वमित्यत्र प्रतियोगितायाप्तदैक्य सम्भवत्येवेति वाच्यम्, तथा सति द्रव्यत्व घटत्वमित्यादिज्ञानस्य द्रव्यत्व न घटत्वमित्यादि ज्ञाननिवृत्त्यनुपपत्ते । घटत्वप्रतियोगिकभेदप्रकारकत्वस्योभयत्वावच्छिन्न-भेदज्ञानसाधारण्येन तदभेदज्ञानप्रतिबन्धकतावच्छेदकानानात्वात् ।

द्रव्य घट इत्यत्र द्रव्यत्वेनानुपस्थितद्रव्यत्वानुयोगिकतया घटत्वत्वे-नानुपस्थितघटत्वप्रतियोगिकतया घटत्वोपहितप्रतियोगिकतया च द्रव्यत्व न घटत्वमित्यत्र भासमानो भेद एव प्रतीयत इति वक्तुमयुक्तम्, भानसाम-ग्रीवैषम्यात् । अनुभवस्यापि शपथमात्रमूलकत्वात् । एव तयारैक्यमपि नास्ति, अवच्छेदकभेदेनावच्छेद्यसम्बन्धिकपदार्थस्य भेदोपगमात् । अन्यथा घट-पटादीनामप्यभावैक्ये सर्वविप्लवापत्त । एवमत्रापि पूर्वोक्तरीत्या प्रतियोगि-तावच्छेदकभेदात्, समवायस्वरूपसम्बन्धरूपप्रतियोगितावच्छेदकसम्बन्ध-भेदाच्च द्रव्य घट इत्यत्र भासमानभेदस्य द्रव्यत्व न घटत्वमित्यत्र भासमान-भेदादभेद एवेत्यत्यन्तमेवायुक्तम् । तथा च उपाधिभेदेनैव कल्पनानिर्वाहे स्वीकार्यव्यवस्थान्यथानुपपत्त्योपहितभेदस्त्वयानिरुक्त एवावश्यकल्पनीय । तस्य च प्रतियोगित्वानुयोगित्वरूपत्व कल्प्यमिति गौरवम् । तदपेक्षया च पूर्वोक्तरीत्या शङ्कितोऽनुयोगितावशेषोऽपि स्वव्यावृत्त कल्पयितुं शक्यो लाघवात् । द्रव्यत्वादिघटभेदयोरेव तद्रूपत्वे तु सुतरामेव लाघवम् । एतेन यत्रास्माभिरौपाधिको भेद उच्यते तत्र प्रतियोगित्वानुयोगित्वे तार्किकैरतिरिक्त एव कल्प्ये । न च तयापि निर्वाह, तद्घटादिप्रमात्व तद्घटभिन्नावृत्तित्वयोगा-दिघटित द्रव्य घट इत्यादेश्च प्रतियोगित्वानुयोगित्वघटितमिति वैरूप्यापत्ते । तत्प्रतियोगिकभेदेति नाम विहाय तत्प्रतियोगिकसम्बन्धानुयोगीतिनामान्तर-करणमात्रे पर्यवसानाच्चेति परास्तम् । तत्प्रतियोगिकभेदस्य त्वयातिरिक्त-स्यैव स्वीकार्यत्वाद् गौरवस्य दुर्वारत्वात् । प्रमात्वस्य भेदघटितत्वे माना-भावस्योक्तत्वाच्च । प्रतियोगित्वानुयोगित्वयोर्विशेष्यविशेषणतावच्छेदकभेद-रूपत्वस्य व्यवस्थापितत्वाच्च ।

न च भूतल घटवदित्यादौ विशेष्यविशेषणयोरेव भेदस्य प्रतियोगित्वानु-योगित्वरूपत्वम्, द्रव्य घट इत्यादौ च विशेष्यविशेषणतावच्छेदकयोर्भेदस्येति, वैषम्यमिति वाच्यम्, भवन्मतेऽपि तत्तदौपाधिकभेदस्य प्रतियोगित्वानुयोगि-त्वरूपत्वम्, द्रव्य घट इत्यादौ त्वौपाधिकभेदस्येति वैषम्यस्य जागरूकत्वात् । प्रतियोगिविरोधित्वविशिष्टस्यैवाभावस्य सम्बन्धेनाभिलाप इति नियमेऽपि न किञ्चिन्नान घटवति घटपटौ न स्त इति शब्देन घटविरोधिरहितस्याप्युभया-

भावस्य सर्वैर्ग्रन्थकारैरभिलप्यमानत्वात्, घटत्वेन पटो नास्तीति शब्देन प्रतियोग्यविरोधिनोऽपि व्यधिकरणधर्मावच्छिन्नाभावस्योल्लेखाच्च । एतेन विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणसायोगादिरूपस्य तद्घटसबन्धस्याश्रये सायोगादिरावन्धेन तद्घटप्रकारकज्ञानत्व तद्-घटप्रमात्व निर्वाच्यम् । न चैव तद्घटस्तद्घटीय इत्यपि प्रमा स्याद्, द्रव्यत्वा-दिविशिष्टतद्घटत्वावच्छिन्नाभेदस्य त्वद्रीत्या सत्त्वादिति वाच्यम्, द्रव्यत्वा-दिविशिष्टस्य तद्घटत्वोपहितादन्यत्वेनोक्तज्ञाने तस्य विशेष्यत्वाभावात् । विशेष्यविशेषणतावच्छेदकयो भेदस्तु न प्रमात्वघटक । घट इत्यादिविशिष्ट-बुद्धावेकत्र द्वयमिति रीत्या घटभूतलत्वोभयप्रकारिकाया भतल घटवदिति विशिष्टवैशिष्ट्यबुद्धौ च विशेष्यताया अनवच्छिन्नत्वेन तदसभवात् । यद्यपि निरवच्छिन्नविशेषणताकाया विशेष्ये विशेषण तत्र च विशेषणान्तरमिति रीत्या प्रमाया विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकभेदेत्यादिकमपि न सभवति, तथापि विशेष्यविशेषणीभूतव्यक्त्योस्तद्व्यक्तित्वावच्छिन्नप्रतियोगि-तानुयोगिताकभेदघटित तद्व्यक्तिप्रमात्वमित्येकोक्ति सभवत्येव । प्रमामात्रे एकजातीयप्रमात्वव्यवहारादित्यादिकमप्यपास्तम् । येन सबन्धेन यत्र यदस्ति तेन सबन्धेन तदवगाहित्वमित्यादे शब्दानुगमस्य प्रत्यक्षेऽपि सभवात् । तस्मादुपाधिभेदादुपहितस्यापि भेदस्वीकारो निष्कन्न एवेति सिद्धम् । एवञ्च—

अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टयोर्द्वयो ।
घटते न यदैकता तदा गुतरा तद्विपरीतरूपयो ॥

अविरुद्ध परम्परात्यन्ताभावासमानाधिकरण द्रव्यत्वघटत्वादि, तत्प्रभ-वत्व तदुपहितत्व विशिष्टयोर्द्रव्यघटयो एकतात्यन्ताभेद, इत्यादिकमपि चिन्त्यमेवेत्यास्ता प्रपञ्च ।

एतेन अवयवावयव्यादीनामपि भेदाभेदश्चिन्त्य । हेमकुण्डलमित्यत्र सुवर्णत्वजातेरवयवावयिवृत्तित्वात् सुवर्णत्वावच्छिन्नप्रतियोगिताकभेदा-भावस्यैव विषयत्वात् । कपाल घट इत्यादेश्चाभेदप्रत्ययस्याभावात्कपालत्व-जातेर्घटत्वविरुद्धत्वात् । कपालत्वावच्छिन्नप्रतियोगिताकभेदस्यैव घटे सत्त्वा-त्तदाभेदप्रमाया बाधादित्युभयत्रापि भेदाभेदभाने मानाभावात् । एतेन कपाल घट इत्येव स्वारसिकी बुद्धिर्न तु कपाले घट. इति । किन्तु काणाद-मतवासनामात्रमित्यपास्तम् । कपाले घट इति प्रतीतेरेव सर्वानुभव-सिद्धत्वात् ।

यत्तु भामत्युदाहृतकारिकायाम्—

"कार्यात्मना तु नानात्वं न भेद कारणात्मना ।

हि [हे]मात्मना यथाभेद कुण्डलाद्यात्मना मिदा" ॥ इति;

तद्व्याचक्षते । कारणतावच्छेदकरूपेणाभेद एव कार्यतावच्छेदकरूपेण भेद एवेति नार्थं । अवच्छेदकभेदनिरपेक्षयोरेव भेदाभेदयोस्तन्मते वाच्यत्वात् । वृक्षे कपिसंयोग तद्भेद च स्वीकृत्य न चैव भेदाभेद इति, भेदाभेदमतमाश्रित्यावच्छेदकभेदो न तन्मत्वाभ्युपगमादिति तदापत्तेश्चिन्तामणिकारेण परिहृतत्वात् । भेदाभेदवादिभिरप्यवच्छेदकभेदेनैव तदङ्गीकारे च तेन तदापत्ते । परिहारानुपपत्तेरवच्छेदकभेदनिरपेक्षमेव भेदाभेदमनमित्युभयमतात् । न च मणिकारोक्तौ भेदाभेद इत्यनन्तरं दोष इति शेष दत्त्वावच्छेदकभेदस्वीकारे भेदाभेदो न दोष इत्येवार्थो वाच्य इति वाच्यम्, अवच्छेदकभेदेन गुणगुण्यादिषु भेदाभेदानुमाने तार्किकादीन्प्रति क्रियमाणे सिद्धसाधनापत्ते । कुण्डलादौ हेमत्वावच्छिन्नभेदस्य तार्किकैरप्युपगमात् । अभेदावच्छेदकरूपेणैव भेदस्य वाच्यत्वाच्च । रूपान्तरेण भेदसत्वे रूपान्तरेणाभेदप्रत्ययानुदयात् । द्रव्यत्वसत्त्वाभ्यां भेदेऽपि घटः कलश इति प्रत्ययाभावात् द्रव्यं घट इत्येव प्रत्ययाच्च । तस्मात् कार्यात्मना कटकत्वकुण्डलत्वादिभिः कार्यमात्रवृत्तिधर्मैरेषामियं भेद एव कटकः कुण्डलमित्यप्रतीतेः । कारणात्मनेत्यत्र कार्यात्मनेत्यस्यानुषङ्गः । कारणगतेन कार्यमात्रगतेन च धर्मेणेति तदर्थः । अभेद इत्यत्र नानात्वमित्यस्यानुषङ्गः । अभेदो भेदोऽपीति तदुभयार्थः । ततश्च हेमत्वकुण्डलत्वादिभ्यां भेदोऽभेदश्चेत्यर्थ इति । तथापीद विचार्यं द्रव्यं घट इत्यत्रोक्तन्यायेनैव सामानाधिकरण्यनिर्वाहे हेमत्वावच्छिन्नभेदस्वीकार कुण्डलादौ न्याय्य एव । कटकादीना हाटकत्वादिरूपेण कुण्डलाभेदस्वीकारे तु नास्माकमपि, अनुयोग्यवृत्तिधर्मत्वेन भेदप्रतियोगितावच्छेदकतया कटकादिप्रतियोगिकहाटकत्वावच्छिन्नप्रतियोगिताकभेदस्य तत्रानभ्युपगमात् । कटकत्वावच्छिन्नप्रतियोगिताकभेदस्यापि कुण्डले उभाभ्यामेवाभ्युपगमात् । अपि च एकस्यावच्छिन्नप्रतियोगितानुयोगितान्योर्भेदयो क्यमेकत्र धर्मिणि सामवो विरोधात् ।

यत्तु सामान्यतो विरोधेऽप्यव्याप्यवृतेः संयोगादेरभावेन सामानाधिकरण्य स्वीक्रियते तयात्रापि । एतावान् पर विशेष, तत्रावच्छेदकभेदेनैव तत्प्रतीतेया सोऽपि कल्प्यते । अत तु तद्भेदानपेक्षप्रतीतिबलान्नावच्छेदकभेदकल्पनमिति, तत्, दौर्बल्यस्य निरस्तत्वात् । नियमेन भेदभाने मानाभावात् ।

यत्तु घटो न नील इति ज्ञान प्रति घटो नील इति बुद्धेर्घटविशेष्यकाभेदसंसर्गकनीलगुणप्रकारकज्ञानत्व मन्मते प्रतिबन्धकतावच्छेदकम्, तव तु तादृशनीलविशिष्टप्रकारकज्ञानत्वमिति गौरवमिति, तन्न, समवायसंसर्गकघटविशेष्यकनीलगुणप्रकारकज्ञानत्वस्यैव मन्मते प्रतिबन्धकतावच्छेदकतया प्रकाशांशे नीलवैशिष्ट्यस्यासनिवेशात् ।

नच घटो नील इति शाब्दस्थले शक्त्या लक्षणया वा नीलविशिष्टस्यैव नीलपदार्थत्वात् तज्ज्ञानस्य यथोक्तप्रतिबन्धकतावच्छेदकाक्रान्ततया घटविशेष्यकाभेदसंसर्गकनीलविशिष्टप्रकारकज्ञानत्वेन भिन्नापि प्रतिबन्धकता त्वया वाच्येति वाच्यम्, अनुशासनस्य त्वयाप्यवश्य प्रामाण्याभ्युपगमात् । उक्तलक्षणया तत्र नीलपदस्य नीलविशिष्टतरनायास्त्वयापि वाच्यत्वात् । अयन्तु विशेष-मन्मते नीलगुणसमवायवान्नन नीलपदार्थ, त्वन्मते तु नीलगुणाभेद । तथा च तत्प्रकारकज्ञानस्य तत्संसर्गकज्ञानेनानुपसंग्रहात् । घटत्वावच्छिन्नविशेष्यताकनीलसमवायत्वावच्छिन्नप्रकारताकस्वरूपावच्छिन्नसांसर्गिकविषयताकत्वेन प्रतिबन्धकत्व मया वाच्यम् । त्वया तु नीलाभेदत्वावच्छिन्नत्व नीलसमवायत्वावच्छिन्नस्थाने प्रकारताकत्वे निवेशनीयमित्येव भेद । अन्यत्तुल्यदेव । अथाभेदस्य संसर्गत्वप्रकारत्वे विषयतात्वेनानुगमस्य प्रकारकरत्वपक्षीय च संसर्गमनिवेश्य एकमेव प्रतिबन्धकत्व कल्प्यम् तदा ममापि समवायस्य संसर्गत्वप्रकारत्वे तथैव निवेश्ये इत्यादि समानमेव । अप्रामाण्यज्ञानाद्युत्तेजकत्वानुरोधादिना पृथगेव प्रतिबन्धकतेत्यादिकमपि तुल्यमेवेत्येषा दिक् ।

इदमप्यत्र विचारणीयम् । भेदाभेदमतमप्यवच्छेदकसापेक्षमेव प्रत्यक्षखण्डीयमण्यादिग्रन्थपर्यालोचनया तथैव लाभात् । तथा हि अन्योन्यत्वाभावत्व स्वकालावच्छिन्नस्वात्यन्ताभावसमानाधिकरणवृत्तिरनित्यागावृत्त्यभावविशेषाधित्वात् । अत्यन्ताभावत्वादिति भेदाभेदवाद्यनुमानदूषणपरायां, श्यामावच्छिन्नस्य तस्यैवान्योन्याभावस्तत्रैव रक्तावच्छिन्ने तदन्योन्याभावाभावश्च श्यामावच्छेदेनेति मणिकारफक्किकायाः सिद्धसाधनोपदर्शनार्थकत्वेन पृथगवच्छेदकावच्छिन्नमात्रवृत्तिवृत्तित्वरूपोपाधिदर्शनपरत्वेन व्याख्यान कृत्वा नीलस्यान्योन्याभावो घटत्वावच्छेदेनेति नीलाद् घटस्याभेदोक्त, अभेदस्तु नीलान्योन्याभावाभावरूपो न घटे घटत्वावच्छेदेनैव विरोधात् । एकावच्छेदेन भावाभावयोरेकत्रावृत्तेरज्ञानाच्च । नाप्यवच्छेदकान्तरेण. घटत्वावच्छिन्ने घटे तदभावात्, तदज्ञानेऽपि नीलो घट इत्यनुभवाच्च,

न चान्योन्याभावरूपो भेदोऽस्तु, अभेदस्तु न भेदाभाव किन्त्वन्य एवेति वाच्यम् ; "अभेदव्यवहारे तस्याहेतुत्वाद्' इति ग्रन्थमभिसधाय पक्षधरमिश्रैरुक्तम् 'भेदाभेदवादिमतेऽभेदस्य विरोध एव नास्ति क्वचिदप्यसमावेशाभावादिति नाशङ्कनीयम् गवाश्वभेदे तदभेदासमावेशस्य तैरपि स्वीकारात्। न चोभयोर्ब्रह्माभिन्नत्वेन तदभिन्नमाभेदसत्त्वात्तत्राप्युभयसमावेश एवेति वाच्यम्, तरपि गोत्वादिना भेदो ब्रह्मत्वेनाभेद इत्यवच्छेदकभेदेनैव तदुभयसमावेशस्वीकारात् । तदुक्तमवच्छेदकभेदेनेति । प्रतियोगितावच्छेदकभेदेनाधिकरणतावच्छेदकभेदेन च" इति। तत्र टीकाकृत— "न च गोत्वाद्यवच्छिन्नप्रतियोगिताकावेव भेदाभेदौ तन्मते स्वीकार्यौ इति वाच्यम्, अप्रसिद्धान्तात् । ब्रह्ममीमांसाद्वितीयाध्यायप्रथमचरणे हि परिणामवादाभिप्राय सूत्र पठ्यते "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति", तदर्थस्तूपादानोपादेयभावसामर्थ्यरूपनकेण ब्रह्मजगतोरभेदे सिद्धे भोग्यस्य भोक्तृजीवाभिन्नब्रह्माभिन्नतया भोक्तृजीवादप्यभेदापत्तिः। तथा च भोक्तृभोग्यभेदव्यवहारोच्छेद स्यात्, इत्यन्तेन पूर्वपक्ष, सिद्धान्तस्तु "स्याल्लोकवद्" इति पूर्वसूत्रस्थम्। व्याख्याता इतिपदमन्नैकवचनान्तत्वेन परिणमव्यानुषङ्गनीयम्। लोकवदेव भेदो व्याख्यात । यथा समुद्रत्वावच्छिन्नप्रतियोगिताकभेदविरहिणोरपि फेनबुद्बुदयोः परस्परमानवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्तथा ब्रह्मत्वावच्छिन्नप्रतियोगिताकभेदाभाववतोरपि भोक्तृभोग्ययो परम्परवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदवत्त्व नानुपपन्नम्। ब्रह्मत्वावच्छिन्नप्रतियोगिताकभेदाभावापादने त्विष्टापत्तिरेवेति।

ननु यदि तन्मतमवच्छेदकभेदनिरपेक्ष न स्यात्तदावच्छेदकभेदाभावेन तद्दूषण मणिकृतोरप्यनुचित स्यात्, निरनुयोज्यानुयोगत्वापत्तेः। न चावच्छेदकभेदेऽपि भेदाभेदयो समावेशस्य भेदस्य व्याप्यवृत्तित्ववादिभिर्नैयायिकैरनुपगमात्तद्भेदसत्वऽपि भेदाभेदयो समावेशो नेति दूषणग्रन्थार्थ इति वाच्यम्, सयोगभेदीयाव्याप्यवृत्तित्वस्यावच्छेदकभेदपुरस्कारेणैव मणिकारेणाङ्गीकारात्। न च प्राचीननैयायिकमताभिप्रायेणैवायत्यो ग्रन्थ.। अत एव सम्प्रदाय मत इदम्। मणिकृन्मते तु "यद्यान्योन्याभावस्याव्याप्यवृत्तित्व तथा व्याप्तिवादे सुव्यक्तम्" इति ग्रगल्भेन कण्ठत एव व्याख्यातमिति वाच्यम्, अवच्छेदकभेदमङ्गीकृत्य भेदाभेदसमावेशस्य परसमतत्वे तस्यैव तथाभावोऽवच्छेदकभेदेन वर्तने ज्ञायते चेति दूषणग्रन्थानुपपत्तिनादवस्थादिति चेत्, मैवम्, उक्तग्रन्थस्यावच्छेदकभेदेन स्थलविशेषे भेदाभेदयो समावेश

उभयसिद्ध इति प्रदर्शनार्थकत्वेन प्रवृत्ते तदभिमतस्यावच्छेदकभेदस्योत्तरफक्किकाद्वयेनैव प्रत्याख्यानात्। तथाहि घटत्वस्य भेदाधिकरणतावच्छेदकत्वेन तदभावाधिकरणतावच्छेदक घटत्वविरुद्धमेव वाच्यम्, परस्परात्यन्ताभावावच्छेदकत्वरूपविरुद्धाधिकरणतावच्छेदकवत्तदवच्छेदेन विरुद्धप्रतियोगितावच्छेदकावच्छेदेन च तदुभयप्रतीतिनियमात्।

न च घटत्वावच्छिन्ने घटे घटत्वात्यन्ताभावावच्छेदक कश्चिद्धर्मोऽस्तीति घटत्वावच्छिन्ने घटे तदभावादिति फक्किकार्थ। घटनिष्ठो किंचित्सयोगतदभावावेव घटे नीलभदाभेदयोरवच्छेदेको स्यातामिति तु नाशङ्कनीयम्, सयागतदभावप्रतीत्यापि नीलो घट इति प्रत्ययात्। अस्याभयावगाहित्वे च यथोक्तावच्छेदकभदप्रतीतिव्यतिरेकेण भेदाभदावगाहित्वानुपपत्त्या तद्विरोधादिति च तदज्ञानेऽपीति द्वितीयफक्किकार्य इति पूर्वोक्तदोषानवतारात्। अन्ययात्तग्रन्थेन भदाभेदमते दापस्य दुर्वचत्वात्। परमतस्यावच्छेदकभेदनिरपक्षत्वे हि तस्यैव तत्रेत्यादेरुत्तरस्या सङ्गते स्पष्टत्वात्।

किञ्च पूर्वोक्तानुमानखण्डोयमणिकारव्याख्यानमयुक्तम्। तत्प्रकरण एव कुसुमाञ्जलिप्रकाशे मूल वृक्ष र्कापसयागवान्नत्यवाधितानुभवादवच्छदभदन सयागवदन्योन्याभावस्याप्यव्याप्यवृत्तित्वात्' इत्यवच्छदकभद पुरस्कृत्यव भदार्वाभधाय 'न चव भदाभदपात इति शङ्कमानर्वर्द्धमानोपाध्यायैरवच्छदकभदगर्भस्यव भदाभदवादस्य सूचितत्वात्। न चावच्छदकभदन भदाभदस्वीकारान भदाभेदापात्तरिति पूवाक्तावच्छदकभदप्रयाजन वयनमवदम्,नत्वापत्तिपरमिति वाच्यम्, अनतिप्रयाजनत्वात्। स्पष्टीकरणाथत्वापेक्षयाधिकाशङ्कापरत्वस्याभ्यहितत्वात्। न च तादृशस्यावच्छदकभदमादाय तदुपगमादिति न तदुत्तारफक्किकयाक्तदापपरिहारा न स्यात्, अवच्छदकभेदऽपि प्रसक्तशङ्कायास्तनैव समाधानानुपपत्तरिति वाच्यम्, प्रतियोगितावच्छेदकभेदेनाधिकरणतावच्छेदकभदेन च भेदाभदौ मणिकारैरभ्युपगम्यत, आद्यभदमानण तु भदाभदवादिभिरिति हि वस्तुगति। *अत एव 'गात्वावच्छिन्नप्रतियोगिताक एव भदा स्वीक्रियत' इति परमतमुपन्यस्य तदुक्तमित्यादिना मिश्रैरवावच्छेदकभदनेति मूलवाक्य तत्रोपष्टम्भकत्वनोपन्यस्तम्। प्रतियोगिताभेदेनेत्यशमादाय तत्सम्मत्यभिधानमिति न तत्र टीकाकारैर्व्याख्यानम्। अन्यथा प्रतियोगितावच्छेदकभेदस्यापि नयायिकमात्रसामतत्वे भेदाभेदवादिमते तद्वयसमत्याभिधानस्यासगति-

प्रसगात् । एव च प्रकृतेऽपि प्रतियोगितावच्छेदकभेदेऽप्येकाधिकरणतावच्छेदकावच्छेदेन भेदाभेदस्वीकारे परमतापत्तौ शङ्कितायां बाधकरणतावच्छेदकभेदपुरस्कारेणैव तदुपगमान्न तथेति समाधानपूर्वकं कार्यं । अत एव मूल वृक्ष कपिसयोगवान्नेति वाक्य सयोगात्यन्ताभावावच्छेदक मूलरूपावच्छेदकपुरस्कारेणैव सयोगवदन्यान्याभावो न तु वृक्षत्वरूपावच्छेदकपुरस्कारेणेवेत्यतदर्थक सगच्छत । अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यसत्त्वेनेति दीधितिवाक्यस्यापि सयोगतद्वद्भेदयोरेकाधिकरण्य शाखामूलरूपाधिकरणतावच्छेदकभेदगर्भतयेत्यत्रैव तात्पर्यम् । अत एव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरप्युपाधि तदभावाभ्यामवच्छेदकाभ्यामुपपत्तिरित्यादिक तत्र व्यक्तम् । अत एव भेदप्रतियोगितावच्छेदकमपि तत्र सयोगवत्त्वम्, अभावप्रतियोगिभेदप्रतियोगितावच्छेदक तु वृक्षत्वमित्यपि ग्रन्थेषु तत्राग्रे स्पष्टम् । एव स्थितेऽवयवावयविस्थले प्रतियोगितावच्छेदकभेदमात्रपुरस्कारेण भेदाभेदौ परेषामभिमताविति पूर्वोक्तकारिकाया हेमत्वावच्छिन्नप्रतियोगिताको भेदाभाव एव । कुण्डलत्वाद्यवच्छिन्नप्रतियोगिताकस्तु भेद एवेत्यर्थ. । स चोत्तरार्द्धे इति स्पष्ट । अत एव तन्मतोपक्रमे "कटकादय इवाभिन्ना हाटकाद्यात्मना भिन्नाश्च कटकाद्यात्मना" इति भामत्यामुक्तम् । तथा पश्चादपि "अय हाटकत्वेनैवाभेदो न कटकत्वेन, तेन तु भेद एव कुण्डलादे" इति तन्मतमाशङ्कितम् । 'कटकस्य हि द्वे रूपे स्तो हाटकत्व कटकत्वञ्च । तत्र हाटकरूपेणास्य कुण्डलादिभिरभेद इष्ट एव, न कटकरूपेण । व्यावृत्तत्वात्तस्येति स्वप्रक्रियया शङ्कते" इति च कल्पतरुकारैरवतारितमिति द्रष्टव्यम् । नचावयवावयविस्थले भेदाभेदानुमानस्य तार्किकान्प्रति सिद्धसाधनापत्ति, अवच्छेदकावच्छेदेनानुमितौ तदनवकाशात । कपालत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभावस्य घटादौ तार्किकैरप्यङ्गीकारात् । अवयवावयविवृत्तिजातिस्थल एव तथात्वात् । न च घट. कलश इति प्रत्ययाभावादभेदावच्छेदकरूपेणाभेदो वाच्य इति वाच्यम्; तादृशस्थले वस्तुत प्रतियोग्यनुयोगित्वावच्छेदकयोर्भेदापेक्षयैव प्रसगादित्यास्तामितिविस्तरः ।

यदप्याकाशादीना ध्वसप्रागभावप्रतियोगित्वमिवात्यन्ताभावप्रतियोगित्वमपि नास्ति, मानाभावात्, इहाकाशो नास्तीति प्रत्यक्षासभवात्, अनुमाने चानुकूलतर्काभावात् सामान्यतो दृष्टमानेन ध्वस प्रागभप्रतियोगिवा-

त्वस्यापि सिद्धिप्रसगात्तद्व्यतिरेकेण कस्यचित्कार्यस्यानुपपत्तेरभावाच्चेति. तच्चिन्त्यम् भूतलादिवृत्तित्व तच्चिन्नान्यन्ताभावप्रतियोगित्व च विना तृतीय-प्रकाराभावाद् वृत्तित्वबाधेन तदत्यन्ताभावस्य तद्वृत्तित्वसिद्धे । घटादा-वुक्तान्यतरव्याप्तेर्निरुपाधिकत्वादत एव च ध्वसादिप्रतियोगित्वसिद्धयनव-काशात् । अन्यथा आकाशवान् घटादित्यादौ घटस्य साध्याभाववद्वृत्तित्व-रूपव्यभिचारित्व न स्यात् । न च तत्र बाध एव विरोधीति वाच्यम्, दोष-साकर्यस्याभ्युपगतत्वादत्यन्ताभावप्रतियोगित्व विना बाधविरहेण घटकुट्या प्रभातमित्यस्य प्रसङ्गाच्च । यत्त्वभावप्रतियोगितायां सम्बन्धत्वावच्छिन्नत्वे मानाभावः, सबन्धभेदेनाभावभेदकल्पने गौरवात् । मन्मते घटात्य-न्ताभावत्वेनैव घटविरोधित्वकल्पनात् । तज्ज्ञानत्वेनैव तज्ज्ञानविरो-धित्वकल्पनाच्च । तथा हि सहानवस्थानरूपो विरोधो द्विधा—साक्षाद् ज्ञान-द्वारा च । तत्राद्यो यद्देशकालावच्छेदेन येन सम्बन्धेन यद्रूपावच्छिन्नस्य प्रतियोगिनो वृत्तिस्तदवच्छेदेन तत्सबन्धतद्रूपावच्छिन्नप्रतियोगिताकाभावस्या-वृत्तिरिति त्वया वाच्य । मया तु घटवति देशे घटात्यन्ताभावो नास्तीत्येव, एकसबन्धेन घटवति सबन्धान्तरेणापि तदभावानभ्युपगमात् । द्वितीयोऽपि यद्धर्मावच्छिन्नविशेष्यताकसंसर्गकयद्रूपावच्छिन्नप्रकारताकज्ञानकाले तद्ध-र्मावच्छिन्नविशेष्यताकसंसर्गतद्रूपावच्छिन्नप्रतियोगिताकाभावस्य ज्ञानाभाव । ज्ञाने तत्पुरुषीयत्व तु बोध्यम् । तत्र प्रतियोगितानिरूपकतायां सबन्धावच्छि-न्नत्वघटत्वावच्छिन्नत्वयोर्निवेशे विनिगमनाविरहाद् गौरवम्।

न च प्रतियोग्यंशे प्रकारीभूतधर्मस्यैवाभावांशे प्रतियोगितावच्छेदक-त्वेन भानात् प्रतियोगित्वांशे घटत्वावच्छिन्नत्वविषयत्व प्रतिबन्धकतावच्छेदके न देयम्, किन्त्वभावांशे घटत्वावच्छिन्नप्रकारतैवेति वाच्यम्, व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमे तदसंभवात् । संयोगाद्यवच्छिन्न-प्रकारतायां अप्यभाव एव निवेशौचित्यात् । मया तु घटत्वावच्छिन्नत्व-विषयत्वप्रतियोगितांशे निवेश्यमिति लाघवम्, सबन्धावच्छिन्नत्वनिवेश-प्रयोजनाभावात् इति, तच्चिन्त्यम्, घटसंयोगिन्यपि समवायेन घटो नास्तीति प्रतीतेरभावप्रतियोगितायां सबन्धावच्छिन्नत्वावश्यकत्वात् । संयोगेन घटाभाववुद्धेरपि समवायेन घटोऽस्तीति बुद्धिविरोधित्वा-पत्तिश्च । न च प्रतियोगितांशे सबन्धावच्छिन्नत्वावगाहिबुद्धिर्न विरोधि-नीति वाच्यम्, समवायेन घटो नास्तीति बुद्धेरप्यविरोधित्वापत्तावनुभव-विरोधात् । न च घटसमवायत्वावच्छिन्नप्रतियोगिताकाभाव एव समवायेन

घटो भूतले नास्तीति प्रतीतिविषयः, तादृशाभावत्वावच्छिन्नप्रकारतानिरूपितभूतलादिविशेष्यताकत्वेन रूपेणैव च तस्याप्रतिबन्धकतेति प्रतियोगितायाः सबन्धावच्छिन्नत्व व्यर्थमिति वाच्यम्; घटादे. प्रतियोगित्वानुभवविरोधात्।

न च शिखो चैत्रो नष्ट इत्यादौ शिखादिनिष्ठं नाशप्रतियोगित्वं यथा चैत्रे भाति तथा घटसमवायादिनिष्ठमेव प्रतियोगित्व घटादिनिष्ठतयान्न भातीति वाच्यम्, सविशेषणे हीति न्यायेन विशेष्यनाशवावात्, विशेषणे नाशस्वीकारात्, प्रकृते च बाधकाभावात्। न च प्रतियोगितायाः सबन्धावच्छिन्नत्वापत्तिरेव बाधिका, तद्बलेन प्रतीतेरनपवादादन्यथा सर्वविप्लवापत्तेः। किञ्चैवं समवायस्य प्रतियोगित्व समवायत्वस्य घटस्य च प्रतियोगितावच्छेदकत्व घटत्वस्य च प्रतियोगितावच्छेदकतावच्छेदकत्व वाच्यम्। तत्र समवायनिष्ठप्रतियोगितायाः सबन्धावच्छिन्नत्वे विवादेऽपि समवायत्वस्यावच्छेदकतायाः स्वरूपसबन्धस्य घटीयोक्तावच्छेदकतायाः च समवायस्यावच्छेदकत्व कल्प्यमिति महदेव गौरवम्। तद्धर घटस्य प्रतियोगित्वं घटत्वस्य च तदवच्छेदकत्व समवायस्य च स्वरूपेणैव तदवच्छेदकत्वमेव कल्प्यताम्, पूर्वोक्तरीत्या प्रतिबन्धकतावच्छेदके विनिगमकाभावेऽपि तदपेक्षया गौरवाभावात्। व्यासज्यवृत्त्यवच्छेदकत्वमाश्रित्य तत्परिहारस्य सुलभत्वाच्च शरीरगौरवस्य च दुर्वारत्वात्। वस्तुतस्तु, अभावज्ञाने प्रतियोगितायाः समवायघटत्वाश्रयावच्छिन्नत्वयोश्च ससर्गमर्यादयैव भानमानत्वात्ससर्गकोटिनिविष्टविशेषणाना चैकत्र द्वयमिति रीत्यैव भानोपगमात्प्रतिबन्धकतायामपि तादृशत्वेनैव निवेशान्नोक्तविनिगमनाविरहशङ्कापीति तत्त्वम्।

न च घटसमवायाभावज्ञानस्य प्रतिबन्धकत्व त्वयापि कल्प्यत एव, परन्तु समवायावच्छिन्नप्रतियोगिताकघटाभावज्ञानस्य तत्कल्पन तवाधिकमिति वाच्यम्; समवायेन घटविशिष्टबुद्धौ तद्विरोधितायाः नव्यैरनङ्गीकारात्।

न च घटसमवायप्रकारकबुद्धौ तदाश्रयकत्वं प्रतिबध्यतावच्छेदकभेदेन प्रतिबन्धकताद्वयावश्यकत्वे तदोभयत्र प्रतिबन्धकतावच्छेदकशरीरगौरवम्, मम त्वेकत्रैवेति, विशेषसत्त्वात्। न च घटप्रकारत्वावच्छिन्नसमवायविषयनाशालिङ्गानत्वेन प्रतिबध्यतावच्छेदकैक्य कल्प्यमिति वाच्यम्; तादृशबावकाले कालिकादिसबन्धेन समवायविशिष्टबुद्धेरप्यनुत्पत्तिप्रसंगात्। एवञ्च घटसमवायाभावज्ञानकालेऽपि समवायेन घटविशिष्टबुद्ध्यनुदयस्यानुभविकत्वात्तत्रावच्छेदकधर्मदर्शनविधया घटसमवायाभावज्ञानस्याप्रतिबन्धकत्वं

कल्प्यम्। तदपेक्षया एकप्रतिबन्धकत्वकल्पनमेव युक्तमित्यादि पर्यालोचनेऽपि न क्षति। अपि च घटसमवायाभाववद्वृद्ध स्वरूपसम्बन्धावच्छिन्ना समवायेन घटाभाववद्वृद्ध समवायावच्छिन्ना च प्रतियोगितामन्तर्भाव्य विरोधित्व मया-कल्प्यत तत्र प्रतियोगित्वतदवच्छेदकसम्बन्धत्वाभ्या मदभिमतयोरथयो प्रतियोगितावच्छेदकत्व प्रतियोगित्वञ्च कल्पयित्वा लाघवीत्वेन विरो-धित्व त्वया कल्प्यम्। प्रतियोगितावच्छेदकत्वेन मदभिमतसम्बन्धस्य ज्ञान बहिर्भावेऽनुभवविरोधापत्त। तथा च प्रथमाया घटसमवायस्वरूपसम्बन्धा-भावविषयकत्वेन द्वितीयस्याश्च घटसमवायाभावविषयकत्वेन विरोधित्व वत्र लाघवतेशस्याप्यवकाश। एवञ्च घटे समवायस्वरूपसम्बन्धत्वघट समवायत्वरूपप्रतियोगितावच्छेदकभेदेन तदवच्छिन्नाभावभदापत्तिरपि दुर्वारेति योज्यम्। एव कपाले घटो नास्तीति शब्दात्मयोगावच्छिन्नघटत्वा वच्छिन्नप्रतियोगिताकाभावस्य भूतल घटो नास्तीति शब्दाच्च समवाया-वच्छिन्नतादृशाभावस्य च ज्ञान सर्वसिद्धम्। सयागससर्गिकाया समवाय-ससर्गिकायाश्च घत्प्रकारकबुद्धे नदुत्तरमनुदयात्। तत्र घत्सयोगाभावा घत्समवायाभावो वा सयोगवद्घटाभाव समवायवद्घटाभावो वा विषय इति न शक्य वक्तुम् पदादनुपस्थितस्यार्थस्य शाब्दबोध सासर्गिकान्य विषयत्वनाभाननियमात्। मन्मत तु सम्बन्धावच्छिन्नत्वस्य ससर्गतयव भानान पदजन्यापस्थितिरपेक्ष्येति वपम्यम्। अपि च वह्निमान् वह्न्यभाववानित्या कारकपराक्षताज्ञानवारणाय वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वीया याभावत्वावच्छिन्नावच्छेदकता तन्निरूपिता या प्रतियोगिता ससर्गा-वच्छिन्नावच्छेदकतदवच्छेदकत्वससर्गेण परामर्शतज्ञानत्वावच्छिन्न प्रति वह्नित्व-भेदस्य हेतुत्व कल्प्यते। अत्र प्रतियोगिताया सयोगावच्छिन्नत्वस्यव निवेश। वह्नियोगाभावस्य तद्विषयत्वे तु अभावत्वावच्छिन्नावच्छेदकतानिरू पिता प्रतियोगितासमर्गावच्छिन्ना या सयोगत्वावच्छिन्नावच्छेदकता तन्निरू पितप्रतियोगितासम्बन्धावच्छिन्नावच्छेदकत्वसमर्गेणेति वक्तव्यवा-पत्त्या मध्येऽवच्छेदक वान्तरनिवेश गौरवम्। न च सयोगत्वभेदस्यैव हेतुत्वमिति वाच्यम्। वह्निमान् घत्सयोगाभाववानित्यव्याप्यनुपपत्ति। नापि वह्निसयोगत्वभेदस्य हेतुत्वम्, तदपेक्षया वह्नित्वसयोगत्वभेदस्य हेतुताया लाघवात्। सयोगविशिष्टवह्न्यभावस्य विषयत्वेऽपि सयोगावच्छिन्नत्वाश परित्यज्य प्रत्यक्षोक्तावच्छेदकतामात्रनिवेशे सयोगससर्गावच्छिन्नवह्निविश-ष्टावच्छेदकसमवायविशिष्टवह्न्यभाववानिति ज्ञानव्याप्यनुपपत्ति स्यात्।

तत्समर्गेण तज्ज्ञानत्वावच्छिन्नस्य वह्नित्वेऽपि सत्त्वात्, वह्नित्वभेदस्य च तत्रासत्त्वेन इष्टापत्तेरसभवात् । अतश्च अभावत्वावच्छिन्नावच्छेदकतानिरूपिता सयोगत्वावच्छिन्नप्रकारतानिरूपिता विशेष्यत्वीया च यावच्छेदकता तदवच्छेदकत्वससर्गेणेति वक्तव्यत्वादतीव गौरवम्। एव समवायस्यैव प्रकारताप्रतियोगितोभयावच्छेदकत्वस्थलेऽपि द्रष्टव्यम्।

किञ्च वह्नित्वादिधर्मोऽपि प्रतियोगितायामवच्छेदको मास्तु, तादृशावच्छिन्नत्वेन पराभ्युपगता या प्रतियोगिताव्यक्तिस्तत्सबन्धेन प्रतियोगिविशिष्टाभावस्य प्रतियोगिविरोधित्वम् । तत्सबन्धावच्छिन्नप्रतियोगिताप्रकारतायाश्च तद्ज्ञानविरोधिनावच्छेदकत्वमित्यस्यै वक्तु शक्यत्वात्, अनुभवस्य च सबन्धावच्छिन्नत्वेऽपि सत्त्वादित्याशङ्क्य स्वयमेवोक्त जले वह्निर्नास्तीतिवज्जले द्रव्य नास्तीत्यपि ज्ञान प्रमा स्यात्। तत्प्रतियोगिताव्यक्तिविशेषणसबन्धेन वह्निविशिष्टो योऽभावस्तस्य तत्सबन्धेन द्रव्यात्मकवह्निविशिष्टत्वात् । न च सा प्रतियोगिता वह्नित्वावच्छिन्नप्रतियोगिताकैव न तु द्रव्यत्वावच्छिन्नप्रतियोगिताकेति वाच्यम्, अभावप्रतियोगित्वीयप्रतियोगितायां वह्नित्वावच्छिन्नत्वकल्पनापेक्षयाभावप्रतियोगितायामेव तत्कल्पनस्य युक्तत्वात्। यद्वा विशिष्टस्य वैशिष्ट्यमिति ज्ञाने विशेषणतावच्छेदकस्यापि विशेषणान्विते विशेष्ये भानम्। दण्डिमदिदमित्यादौ साक्षात्सबन्धेन दण्डादेरिदमशे बाधेऽपि स्वाश्रयसयोगादिरूपपरम्परासबन्धेन तदशे भानात् । "अभावज्ञानस्यापि प्रतियोगिविशेषितामावज्ञान तु विशिष्टवैशिष्ट्य[बोध]मर्यादा नातिशेते" इत्यभियुक्तोक्तरीत्या विशिष्टस्य वैशिष्ट्यमित्यात्मकत्वात् । वह्नित्वस्य वह्नाविव तदभावेऽपि भान वक्तव्यम् । तच्च न स्वनिष्ठप्रतियोगितानिरूपितानुयोगित्वसबन्धेन वह्न्यभावे वह्नित्वप्रतियोगितानिरूपितानुयोगित्वस्य बाधितत्वात्। नापि स्वाश्रयप्रतियोगितानिरूपितानुयोगित्वेन तेन सबन्धेन वह्नित्वस्याभावे विशेषणत्वोक्तौ जले द्रव्य नास्तीत्यस्यापि प्रमात्वापत्तौ । द्रव्यत्वाश्रयवह्निनिष्ठप्रतियोगितानिरूपितानुयोगित्वसबन्धेन द्रव्यत्ववैशिष्ट्यस्य वह्न्यभावे सत्त्वात् । अतो वह्नित्वस्य स्वावच्छिन्नप्रतियोगितानिरूपितानुयोगित्वसबन्धेनैव भान वाच्यमन्यस्यैकजातीयसबन्धस्य दुर्वचत्वादिति सिद्ध प्रतियोगितायां वह्नित्वावच्छिन्नत्वमिति। न चैतावतापि निर्वाह । सयोगेन वह्निर्नास्तीति ज्ञाने वह्निसयोगत्वस्य प्रतियोगितावच्छेदकत्वेन भानस्वीकारे वह्नित्वावच्छिन्नेत्यादिसबन्ध-

स्याप्रसिद्धे । न चात्र वह्निसयोगत्वस्यैव स्वावच्छिन्नेत्यादि सबन्धेनाभावांशे भानम्, वह्निर्नास्तीति ज्ञानाभिप्रायेण तु वह्नित्वावच्छिन्नेत्यादिसबन्धोक्तिरिति वाच्यम्, प्रतियोगितावच्छेदकसबन्धाविषयकाभावप्रतीतेर्मयानङ्गीकारेण सर्वत्रैव प्रतियोगिन विशेषणीकृत्य सबन्धस्य प्रतियोगितास्वया वाच्यतया वह्नित्वस्य प्रतियोगितावच्छेदकत्वस्थलस्य दौर्लभ्यात् । प्रतियोगितावच्छेदकत्वेन मदभिमतसबन्धस्याभाववुद्धौ कथमप्यनन्तर्भावत्प्रतीत्यनुपपादनापत्ते ।

किञ्च स्वव्यापकप्रतियोगितानिरूपितानुयोगितैव घटत्वस्य घटाभावे एकजातीय सबन्ध । जले द्रव्य नास्तीत्यत्र प्रतियोगिताया द्रव्यत्ववत्पृथिव्यादिनिष्ठात्यन्ताभावप्रतियोगित्वेन तद्भानस्य प्रमात्ववारणात् । न च व्यापकत्वरूपमेवावच्छेदकत्व तथा च घटकुट्या प्रभातमिति वाच्यम्, अभावप्रयोगिताया भासमानस्यावच्छेदस्य स्वरूपसबन्धविशेषात्मकत्वेन व्यापकत्वरूपत्वाभावात् । कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादिमन्निष्ठात्यन्ताभावाप्रतियोगितायां सत्त्वेऽपि तस्या कम्बुग्रीवादिमत्त्वावच्छेदकत्वाङ्गीकारात् । व्यधिकरणधर्मावच्छिन्नाभावस्थले प्रतियोगितायास्तदवच्छेदकाभाववृत्तित्वेऽपि तदवच्छेदकत्वव्यवहाराच्च । अत एव "धर्मावच्छिन्नत्वेऽप्यनुभव एव प्रमाणम्" इत्युक्त दीधितिकृता । "यदि पुनरानुभविको लोकाना स्वरसवाही घटत्वेन घटो नास्तीत्यादिरनुभवो न तदा तादृशाभावनिवारण गीर्वाणगुरूणामपि शक्यम्" इति चक्रवर्तिलक्षणे तद्व्याख्यातृभिरप्युक्तम् । व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितायां सबन्धानवच्छेद्यत्वे व्यधिकरणसबन्धावच्छिन्नप्रतियोगितायां प्रकारानवच्छेद्यत्वापत्ति । तस्मात्प्रतीतिरेव प्रकारस्याप्यवच्छेदकताया मानम्" इति । न हि व्यधिकरणधर्मस्य नियमेन प्रतियोगिनि वैशिष्ट्य गृहीत्वैव यदवच्छिन्नाभावा बुद्धिरुदेति । घटो वह्नित्वाभाववानिति ज्ञानकाले ऽपि वह्नित्वेन घटो नास्तीति प्रतीते । नापि प्रतियोग्यंशे विशेषणतया भासमानस्य स्वावच्छिन्नप्रतियोगितावच्छेदकत्वसबन्धेनाभावांशे भाननियम । उक्ताभावप्रतीतौ घटत्वे व्यभिचारात् ।

न च तदपि प्रतियोगितावच्छेदकमेवेति वाच्यम्, सर्वानुभवविरोधात् । साध्याभाववति यद्धृतौ प्रकृतानुमितिविरोधित्व नास्तीत्यादितद्घटितव्याप्तिलक्षणविलयापत्ते । नहि घटत्वेन वह्न्यभाववति पर्वतादौ धूमस्य वृत्तित्वज्ञाने वह्नित्वावच्छिन्नप्रतियोगितात्वेन वह्न्यभावभाने च वह्न्यनुमितिर्भवितुमर्हति, व्यभिचारज्ञानस्य सम्पन्नत्वात् । प्रमेयघटो नास्तीत्यादौ

प्रमेयत्वस्यातदनवच्छेदकस्यापि घटांशे भानात्, शृङ्गत्वस्य सामग्रीबलाद् भानेऽपि शशीयत्वमेव तदभावप्रतियोगितावच्छेदकमिति स्वीकाराच्च। "नेह नानास्ति" इति श्रुतौ नानापदोपात्त वृत्तिविषयत्व निषेधप्रतियोगितावच्छेदकम्। किंचनपदोपात्त मूढधीविषयत्व प्रतियो यशविशेषणमात्रमिति भवदुक्तेश्च। एव च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावज्ञानसाधारण वह्नित्वावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वावच्छिन्नप्रकारताकज्ञानत्व वह्नित्वावच्छिन्न प्रकारताकविशिष्टबुद्धिनिष्ठप्रतिबध्यतानिरूपिताया प्रतिबन्धकताया नावच्छेदकमिति, तन्निर्वाहाय प्रतियोगिताया सबन्धावच्छिन्नत्वमावश्यकम्। वह्नित्वेन घटाभावीयप्रतियोगिताया सबन्धत्वावच्छिन्नत्वे मानाभावेन तद्वृत्तिसिद्धे। अत एव दीधितिव्याख्यातृभिरुक्तम् "एकसम्बन्धेन घटत्वावच्छिन्नवति सम्बन्धान्तरेण तदवच्छिन्नभावसत्त्वात् तेन तेन तदवच्छिन्नवति तेन तेन तदवच्छिन्नभावविरोधकल्पनात्। सबन्धानवच्छिन्नप्रतियोगिताकाभाववृत्तौ बाधकाभावाद्" इति।

यदप्युक्तम्। विशिष्टस्य वैशिष्ट्यमिति ज्ञानस्य विशेष्ये विशेषणम्, तच्च विशेषणान्तरमिति ज्ञानाद्वैलक्षण्यार्थं तन विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन विशेषणसबन्धो भातीति कल्प्यते। घटवदित्यादौ घटत्वावच्छिन्नप्रतियोगिताकत्वेन सयोगभानात्। एवमनुमितेरपि विशिष्टस्य वैशिष्ट्यमित्यात्मकत्वनियमात् तत्रापि घटादेरनुयोगित्वरूपोऽभावसबन्धो घटत्वावच्छिन्नप्रतियोगिताकत्वेन भासत इति, तदपि चिन्त्यम्; व्यापकतावच्छेदकसबन्धेनैव व्यापकभानस्यानुमितौ सर्वसिद्धत्वात्तत्र वह्नित्वावच्छिन्नप्रतियोगिताकत्वेन तत्सयोगस्य भानानुपपत्तेः तस्य व्यापकतावच्छेदकसबन्धत्वे मानाभावात्। यत्सबन्धावच्छिन्नाया हेतुसामानाधिकरण्यात्यन्ताभावप्रतियोगितायामनवच्छेदक साध्यतावच्छेदक तस्यैव व्यापकतावच्छेदकसबन्धत्वात्। धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसामानाधिकरण्यविशिष्टधूमवत्ताज्ञाने सयोगस्य सामानाधिकरण्यघटकत्वेऽपि सयोगससर्गकवह्निप्रकारकत्वस्य तत्रासत्त्वाद्धूमवदुत्तबीजस्य वक्तुमशक्यत्वात्। एतेन सयोगेन रूप नास्तीत्यादौ रूपसयोगादेरसिद्धावपि रूपीयत्वेन सयोगाभावो भासते। प्रतियोगिविशेषणतानापन्नस्यैव व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वोपगनान्न भ्रमत्वम्। प्रतियोगिवृत्तित्वेन भासमानस्यैव प्रतियोगितावच्छेदकत्वनियमे तु व्यधिकरणधर्मावच्छिन्नाभावधीमात्रस्य प्रतियोग्यशे तादृशधर्मप्रकारकत्वरूपभ्रमत्वस्वीका-

रादत्रापि तदंशे भ्रमत्वे इष्टापत्तेरिति निरस्तम्। संयोगस्य प्रतियोगिता-वच्छेदकत्वं स्वीकृत्य सर्वांशप्रमात्वसंभवे आंशिकभ्रमत्वकल्पनस्याप्यनुपपत्ते। संयोगे रूपीयत्ववावदंशायामुक्तबोधापलापापत्तेश्च। बाधसत्त्वे भ्रमस्याप्य-नुपपत्ते संयोगसंसर्गकरूपविशिष्टबुद्धौ तद्धीविरोधित्वानुपपत्तेश्च। संयोगेन संयोगो नास्तीत्यत्र संयोगे संयोगनिष्ठप्रतियोगितानिरूपकत्वसत्त्वाच्च तदधिकस्य रूपीयत्वेन संयोगाभावज्ञाने रूपीयपदार्थत्वेऽपि मानाभावात्, इत्यास्ताम्।

एतेन समवायविशिष्टघटत्वावच्छिन्ना च या प्रकारता तन्निरूपिताभाव प्रकारताकज्ञानत्वेन समवायेन घटाभाववदित्यस्य समवायेन घटवदिति बुद्धौ विरोधित्वम्। एवञ्च प्रतियोगितायां धर्मसंबन्धयोरवच्छेदकत्व नास्त्येव, प्रयोजनाभावात्, इत्यादि परास्तम्।

समवायविशिष्ट घटत्वस्य प्रकारत्व विरोधितावच्छेदके निवेश्यते उतैकत्र द्वयमिति रीत्या समवायघटत्वयोस्तद् ? इति विनिगमनाविरहेण विरोधिताभेदात्। न च घटत्वांशे निर्धर्मितावच्छेदकज्ञानस्यैव विरोधित्वेना भयसम्मतत्वान्न समवायविशिष्टे घटत्वस्य प्रकारत्वेन निवेश इति वाच्यम्, तथापि घटत्वविशिष्टे समवायस्य प्रकारत्वसंभवात्। अथ घटो न समवायीति ज्ञानकालेऽपि यथोक्तविरोधिधीसम्पत्तये एकत्र द्वयमिति रीत्या प्रकारीभव द्भ्यां समवायघटत्वाभ्यामवच्छिन्नैवाभावांशे प्रकारताविरोधितावच्छे दिका। घटत्वधर्मितावच्छेदकस्योक्तसमवायाभावज्ञानस्य घटत्वावच्छिन्न-धर्मिताके शुद्धघटविशेष्यकघटत्वसमवायोभयप्रकारकज्ञाने विरोधित्वा-भावेनोक्तबाधधीकालेऽप्युक्तधीसंभवादिति चेत्, मैवम्, घटत्वधर्मिता-वच्छेदकसमवायाभावज्ञानस्यैव समवायेन घटवदिति ज्ञानविरोधित्व-संभवादुक्तबाधधीकाले एकत्र द्वयमिति रीत्या भवदभिमतसमवाय-घटत्वाभयप्रकारकज्ञानावश्यादेरपि [ज्ञानानुत्पादेऽपि] क्षतिविरहात्। ग्राह्याभावावगाहित्वेनैव ज्ञानस्य प्रतिबन्धकत्वमित्यस्येदानी-मनङ्गीकारात्। अन्यथा घटसमवायाभावज्ञानस्य समवायसंसर्गकघट-प्रकारकज्ञानविरोधित्वोक्त्यादेरनुपपत्ते, एकत्र द्वयमिति रीत्या घटत्वसम-वायाभयावच्छिन्नप्रकारताकाभावज्ञानस्यापि तद्विरोधित्वानुपपत्तेश्च। एतेन घटत्वावच्छिन्नप्रतियोगितावादिमते तदन्तर्भावेनैव विरोधित्वाद् घटसमवाया-भावज्ञानीयप्रतिबन्धकताया समवायत्वावच्छिन्नत्वस्वरूपसंबन्धावच्छिन्न-त्वयो समवायेन घटाभावज्ञानीयप्रतिबन्धकताया च समवायावच्छिन्नत्व-

घटत्वावच्छिन्नत्वयो प्रतियोगितायां निवेशे विशेषणविशेष्यभाव विनिगमकाभावात् प्रत्येक प्रतिबन्धकताद्वयेन प्रतिबन्धकताचतुष्टयम्, मम तु आद्य ाग्समवायाभावधीत्वेन द्वितीये च समवायविशिष्टघटाभावधीत्वेन तदिति त्रयमेवेति लाघवमित्यप्यपास्तम्।

यद्यपि समवायविशिष्टघटाभावो घटसामान्याभाव एव तत्समनियतत्वादिति तद्धी कथं घटसयुक्तादौ प्रतियोगिनासमवायस्य न सबन्ध किन्तु स्वाश्रयसमवेतत्वम्, तया च घटसामान्याभावरहितेऽपि घटसयुक्ते उक्तसबन्धेन समवायविशिष्टघटाभावोऽस्तीति चेतर्हि तद्विषयताया विरोधितावच्छेदकोटिनिवेशे गौरवमित्याशङ्क्योक्तम्—यत्प्रतियोगिताव्यक्तौ यत्सबन्धयद्धर्माभ्यामवच्छिन्नत्व त्वयोच्यते तस्या एव मया ताभ्यामवच्छिन्न प्रतियोगिन प्रति सबन्धत्वस्वीकारात्। तस्या एव प्रतियोगितायास्तदुभयात्मकत्वस्वीकाराच्च। समवायवद् घटात्यन्ताभावस्य न घटसामान्याभावत्वम्, अत एव समवायवद् घटाभावस्यैव नीलघटाभावस्यापि घौ समवायेन घटवदिति घीविरोधित्वमस्तीत्यपास्तम्। तत्र प्रतियोगितावच्छेदकयोरेव मम प्रकारतावच्छेदकतया निवेशादिति, तदपि चिन्त्यम्, तथापि यस्या प्रतियोगितायां समवायेन घटत्वेन चावच्छिन्नत्वमित्यभिमत तत्प्रतियोगिताव्यक्तिप्रकारतास्वरूपसमर्गावच्छिन्नामादाय प्रतियोगितावशिष्टघटाभावज्ञानत्वेन समवायविशिष्टघटाभावज्ञानत्वेन वा प्रतिबन्धकत्वमिति विनिगमनाविरहस्य मुलभत्वात्, अन्यादृशप्रतियोगिताया के प्रकारतावच्छेदकत्वेन न निवेश इत्यस्य सुवचत्वात्। अभावनिष्ठविशेष्यतानिरूपितप्रतियोगिनिष्ठप्रकारतायाश्च प्रतियोगितासामान्यस्यैव समर्गताया वाच्यत्वात्। प्रतियोगितावच्छेदकयोरेव प्रकारतावच्छेदकतया निवेश इत्यस्य प्रतियोगितावच्छेदकत्वाभिमतसमवायस्य ज्ञातवह्निभावे इत्यस्य चाप्रयोजकत्वात्। एव कम्बुग्रीवादिमानित्यादौ घटत्वस्यैव प्रतियोगितावच्छेदकतया तत्र घटत्वावच्छिन्नप्रकारतानिवेशो वाच्य। यत्र च सयोगसबन्धावच्छिन्नैव प्रतियोगिता समवायावच्छिन्नत्वेन भासते तस्या मया समवायावच्छिन्नत्वानभ्युपगमात्तादृशज्ञानस्य समवायेन घटत्वदिति घीविरोधित्व न स्यात्। अथ यद्धर्मावच्छिन्नसबन्धाग्रामवच्छिन्नत्वेन प्रतियोगिताया भान त्वयोच्यते तयोरेव प्रकारतावच्छेदकत्वेन मया निवेश कार्य इति चेत्, न, प्रमेयघटो नास्तीत्यत्र घटत्वस्यैव प्रतियोगितावच्छेदकतया तत्र समवायविशिष्टघटत्वावच्छिन्नप्रकारतानिवेशे बाधात्।

अथ प्रकारतायां घटत्वावच्छिन्नत्व घटत्ववृत्त्यवच्छेदकताकत्वमात्र न

तु तत्पर्याप्त्यधिकरणावच्छेदकताकत्वमपीति चेत्, न, तथापि नीलघटवा-
नितिज्ञानस्य घटाभाववान्नीलघटाभाववानितिज्ञानसाधारण्ये नीलत्वान्यघट-
त्वान्यधर्मानवच्छिन्नप्रतियोगिताकाभावप्रकारकज्ञानत्व प्रतिबध्यतावच्छेदकम्,
त्वया तु समवायान्नीलत्वाद् घटत्वाद्यन्येन धर्मेणानवच्छिन्नप्रकारताका-
भावज्ञानत्व यदि तथात्वेन वाच्यम्, तदा प्रमेयन्नीलघटो नास्तीति ज्ञानस्य
तद्बहिर्भावापत्ति । प्रमेयत्वान्यत्वस्यापि निवेशेऽभिधेयत्वप्रकारकतज्ज्ञानस्य
प्रमेयत्वप्रकारतानिरूपितघटविशेष्यताशालित्व न स्यात् । न च तत्र प्रमेयो
घट इत्याकारकज्ञानसाधारणो प्रमेयत्वप्रकारतानिरूपितघटविशेष्यता तिष्ठु-
त्येव । अभावनिष्ठविशेष्यतानिरूपतघटत्वावच्छिन्नप्रकारतारूपा विशेष्यता
तु प्रमेयत्वप्रकारतानिरूपिता नास्त्येव । अतो घटत्वाद्यन्यधर्मानवच्छिन्नत्व-
मभावनिष्ठविशेष्यतानिरूपितघटप्रकारतायामक्षतमेवेति वाच्यम्, प्रमेयत्व-
प्रकारतानिरूपितविशेष्यताया एव अभावनिष्ठविशेष्यतानिरूपितप्रकारता—
रूपत्वसभवेन तद्भेदे मानाभावात् । एव ' हेतुसमानाधिकरणात्यन्ताभावज्ञाने
प्रकारतानवच्छेदक यत् साध्यतावच्छेदक तदवच्छिन्नसाध्यसामानाधिक-
रण्य व्याप्ति ' इति त्वया वाच्यम् । तथा च वह्निमान् धूमादित्यादाव-
व्याप्ति । पर्वतो वह्नयभाववानिति भ्रमे वह्नित्वस्य प्रकारतावच्छेदकत्वात् ।

न च भ्रमायामिति ज्ञानस्थले वाच्यम्, ततोऽपि गौरवप्रसगात्, व्याप्ते-
प्रत्यक्षत्वापत्तेश्च, मन्मते तूक्ताभावप्रतियोगितानवच्छेदकमित्यादेर्वस्तुगभंस्य
वाच्यत्वान्न काप्यनुपपत्तिरिति, तिष्ठतु विस्तर ।

यत्तु सयोगतदभावयोर्नैकाधिकरण्यम्, अग्रे वृक्ष. कपिसयोगी मूले नेति
प्रतीतेरग्रमूलयोरेव सयोगतदभाववत्तयोपपत्तेरिति तच्चिन्त्यम्, मूले कपि-
सयोगी नेति प्रत्ययस्यान्योन्याभावविषयकतया सयोगनिष्ठावच्छेदकतानिरू
पित सयोगिनिष्ठप्रतियोगित्वावगाहितया च सयोगप्रतियोगिकात्यन्ताभाव-
विषयकत्वेनोपपादयितुमशक्यत्वात् । शिखी नष्ट इत्यादौ तु विशेषण प्रति-
योगिकत्वेऽपि ध्वसस्य प्रतियोगित्व क्षणार्द्धेपम्यम् । तादृशशाब्दस्थले सयोग-
स्य प्रतियोगित्वे नात्यन्ताभावस्यान्वयानुपपत्तेश्च । अत एव "मूलावच्छेदेन
कपिसयोगवद्भेदज्ञानस्य कपिसयोगात्यन्ताभावविषयकत्वेनैवोपपत्तावन्यो
न्याभावस्याव्याप्यवृत्तित्व न कल्प्यत ' इति प्राचीनमतमप्युक्तविषयैव दीधि
तिकृता निरस्तम् । नच यत्र सयोगात्यन्ताभाव एव विषयस्तदभिप्रायेणैवा-
वयवनिष्ठ सयोगात्यन्ताभावविषयकत्वोक्ति । उक्तस्थले च सयोगवद्भेद
एवावयवनिष्ठत्वेन भासतामिति वाच्यम्, अन्योन्याभावग्रहे प्रतियोग्यनु-

योगिनो. समानविभक्तिकत्वस्यापेक्षितत्वात् । यदपि सयोगेन रूप नास्तीत्यादौ रूपादौ सयोगाद्यभावः प्रतीयते घटत्वेन पटो नास्तीत्यादौ पटे घटत्वाभाववदिति, तन्न, रूपे सयोगो नास्तीति प्रत्ययापेक्षया संयोगेन रूप नास्तीति प्रत्यये वैलक्षण्यस्य सर्वानुभवसिद्धस्य शपथमात्रेण वारयितुमशक्यत्वात् । घटत्वेन पटो नास्तीति शब्दाच्चोक्तबोधानुपपत्तिरेव । नामार्थात्यन्ताभावप्रकारकबोधे प्रतियोगिनो विशेष्यतया प्रथमान्तपदजन्योपस्थितेरनुयोगिनश्च सप्तम्यन्तपदजन्योपस्थितेरपेक्षितत्वात् ।

यत्तु तृतीयार्थस्य वैशिष्ट्यस्याभावस्तत्र भाति, तत्र प्रतियोगिनो नामार्थत्वाभावेन तदभावबोधे प्रथमान्तपदजन्योपस्थितेरनपेक्षित्वादिति, तन्न; कालिकादेर्घटत्ववैशिष्ट्यस्य पटेऽपि सत्त्वेन निषेधानर्हत्वात् । सुबर्थप्रकारकबोध प्रति नञ्पदजन्योपस्थितिहेतुत्वकल्पनापत्तेश्च ।

न च भूतले न घट इत्यादौ भूतलवृत्तित्वाभाववान्घट इति बोधस्यापि तात्पर्यसत्त्वे स्वीकारान्न दोष इति वाच्यम्, तत्र भूतलवृत्तिर्घटो न वेति संशयनिवृत्त्याद्यनुरोधेन तथा स्वीकारेऽपि पटो घटत्ववैशिष्ट्यवान्न वेति संशयनिवृत्त्यादेरनुभवानारोहेण तथा कल्पने मानाभावात् । वस्तुतो वैशिष्ट्यमत्र न तृतीयार्थः । यद्यपि तत्र विशेषणोपलक्षणसाधारणे वैशिष्ट्ये इत्थंभूतलक्षणा तृतीयेत्युच्यते तथापि घटत्वेन पट इत्यत्र नञनुपसदाने तृतीयायाः प्रसक्तिरेव नास्ति । प्रत्याय्य व्यावृत्य समानाधिकरणस्य तदुभयायोगात् । कालिकादिवैशिष्ट्यसम्बेऽपि तन्निषेधस्यानभिमतत्वात् । तदर्थ एव तृतीयां कृत्वा नञ्समभिव्याहारे समवायादिलक्षणाया च मानाभावात् ।

न चाभाव प्रति प्रतियोगिन उपलक्षणत्वाङ्गीकारात्तद्व्यावृत्यपेक्षयैव तृतीया स्यादिति वाच्यम् ; त्वद्रीत्या घटत्वस्य प्रतियोगित्वाभावात् । न चाभावबुद्धौ प्रतियोगिविशेषणतापन्नप्रतियोगितावच्छेदकस्य स्वावच्छिन्नप्रतियोगितानिरूपितानुयोगितासम्बन्धेनाभावांशे प्रकारत्वोपगमादभावापेक्षया घटत्वस्य विशेषणतया तत्पदे तृतीयेति वाच्यम् ; प्रतियोगितायां धर्मावच्छिन्नत्वाङ्गीकारापत्तेः । मन्मते स्वावच्छेदकत्वरूपे वैशिष्ट्ये तृतीयोपपत्तेः । एव घटत्वेन घटो नास्तीत्यादौ परमतोक्तबोधानुपपत्तिरिति प्रतियोगित्वस्यावच्छिन्नत्वमावश्यकमिति दिक् ।

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले ।
पुरस्तादुपयुक्तेन परोक्तार्थैकदर्थनम् ॥ ६ ॥

दशमोऽशः

ननु विमत मिथ्याद्दश्यत्वाज्जडत्वात्परिच्छिन्नत्वाद्वा, शुक्तिरूप्यवदिति चेत्, मैवम् विमतपदस्य विप्रतिपत्तिविषयतावच्छेदकावच्छिन्नपरतया विप्रतिपत्तेरेवात्र दुष्टत्वात्। अथ ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं विद्भिन्नमिति पक्षतार्थवसानम्। अत्र द्वितीयविशेषणं तुच्छे बाधवारणाय, तृतीय ब्रह्मण्यसिद्धिवारणाय तयो पक्षबहिर्भावार्थम्, पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितेरुद्देश्यत्वे भास्करादिमते शुक्तिरूप्ये सिद्धसाधनवारणाय सत्यन्तमवच्छेदकावच्छेदेनानुमितेरुद्देश्यत्वे तु तत्र देयमेव, तत्र सामानाधिकरण्येन सिद्धेऽपि विरोधित्वात्। किन्तु ननोत्तरद्वयमेव पक्षतावच्छेदकम्, तयोरन्यतरस्यैव तथात्वे ब्रह्मतुच्छयो साध्यहेत्वभावधियो विरोधित्वेन बाधासिद्धयोरापत्ते। अवच्छेदकावच्छेदेन विशिष्टबुद्धौ सामानाधिकरण्येनापि बाधबुद्धेर्विरोधित्वात्। पक्षतावच्छेदकसामानाधिकरण्येन बुद्धेर्विरोधित्वात्। पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावज्ञानस्य च भागासिद्धिविघयावच्छेदकावच्छेदेनानुमितौ विरुद्धत्वादिति चेन्न, अस्य नैयायिकसाधारण्याभावात्। उभयवादिसिद्धस्यैव धर्मिण पक्षत्वमिति सर्वतन्त्रसमतत्वात्। अबाध्यत्व हि यदि प्रतिवध्यज्ञानाविषयत्व तदाप्रसिद्धि। न च सविलासाज्ञाननिवृत्तिरूपबाधयोग्यत्व, तच्च पल्लवाज्ञानतत्कार्यान्यतरत्वम्। तेन ब्रह्मज्ञानपूर्वमबाधिते प्रातिभासिकविशेषे न सिद्धसाधनम्। पल्लवाज्ञानानङ्गीकारे तु प्रातिभासिकान्यत्वमेव सत्यन्तार्थ इति वाच्यम्, ज्ञानेन वस्तुनिवृत्तेरज्ञानस्य च नैयायिकासिद्धत्वात्। प्रातिभासिकत्वस्य त्वद्रीत्या ब्रह्मज्ञानात्पूर्वमेव निश्चितमिथ्यात्वकोटिदृश्यतादात्म्यापन्नचिरस्वरूपस्य मिथ्यात्वघटितत्वात्, पक्षतावच्छेदककोटिप्रवेशानर्हत्वाच्च। न चैकमिथ्यात्वकोटिकविप्रतिपत्त्यादावपरविधमिथ्यात्व निवेश्यमिति वाच्यम्, मिथ्यात्वमात्रे विवादेन तथा वक्तुमशक्यत्वात्। अत्र पदार्थे न विवाद किन्तु धर्मिविशेषस्य तद्वत्तायामेव नत्रैव तादृशरीते सभवात्। नापि तथापि त्वदिष्टसिद्धि, उक्तस्थले सिद्धसाधनतादवस्थ्यात्। यस्य प्रातिभासिकस्य ब्रह्मज्ञानात्पूर्वं मिथ्यात्वनिश्चयो न जात तस्यापि ब्रह्मज्ञानात्पूर्वमेव निश्चितमिथ्यात्वक यद्दृश्य प्रातिभासिकान्तर तदन्यत्वसत्त्वात्। पल्लवाज्ञातानङ्गीकारपक्ष एव यथोक्तप्रातिभासिकत्वाङ्गी-

कारात् । चिद्भिन्नपदेन च न ब्रह्मव्यावृत्ति , मया ज्ञानब्रह्मणोराश्रयाश्रयि-भावस्वीकारात् । त्वयापि श्रुत्यादिसिद्धधर्मधर्मितानिर्वाहार्थं कल्पितभेदोप-गमात् । उक्तं हि औपनिषदवृद्धैः —"आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इति । न च मन्मते वृत्त्यवच्छिन्नचैतन्यस्यैव ज्ञानत्वा चित्पद न तदर्थकमिति वाच्यम् , तथा-प्युपहितचिद्भेदस्यापि शुद्धचिदि त्वयाभ्युपगमात्, पक्षान्तर्वि बाधादेर्दुर्वार-त्वात् । न च शुद्धचिदेव भेदप्रतियोगित्वेन निवेश्या, तस्याः प्रतियोगित्वा-दिधर्मरहितत्वेन तन्निष्ठप्रतियोगिताकभेदस्याप्रसिद्धे ।

न च कल्पितभेदप्रतियोगित्वादिसत्त्वान्निर्वाह , शुद्धचिद्भेदस्यापि कल्पितत्वेन ब्रह्मणि तदावश्यकत्वात् । कल्पितमात्र ब्रह्माधिष्ठानकमिति त्वयोपगमात् । न च चित्त्वावच्छिन्नप्रतियोगिताक एव भेदो निवेश्य , स च न ब्रह्मणि तद् व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदेनैव धर्मतानिर्वाहादिति वाच्यम् , धर्मतान्निर्वाहकान्यभेदे मानाभावात् । न च प्रतियोगिताव्यधि-करणभेदनिवेशान्निस्तार , तस्यापि त्वन्मतेऽप्रसिद्धे प्रतियोगिताधिकरणे ब्रह्मणि भेदमात्रस्य स्वीकार्यत्वात् ।

यत्तु चित्प्रतियोगिकत्वविशिष्टभेदस्य चिद्वृत्तित्वे मानाभावात् स एव पक्षतावच्छेदक , अत एव महाकालभेदविशिष्टघटादीना महाकालादिवृत्तित्व नास्तीति तार्किकाभ्युपगम इति , तन्न , तस्य मिथ्यात्वासिद्धिप्रसगात् । अत एव प्रतियोगिताव्यधिकरणत्वविशिष्टभेदस्य पक्षतावच्छेदकत्वमप्यना-शङ्कयम् । दृष्टान्तस्तु विषम । न्यायमते हि सामानाधिकरण्यघटकसबन्धाभ्या यस्य विशेषणविशेष्योभयवत्त्व तत्तादृश विशिष्टाधिकरणत्वम् यथा गुणकर्मान्यत्वविशिष्टसत्ता द्रव्य एवास्ति । वैशिष्ट्यघटकविशेषणतासम-वायसबन्धाभ्या द्रव्ये गुणकर्मान्यत्वस्य सत्तायाश्च सत्वात् । गुणे तु ताद्दश-विशेषणतया गुणान्यत्वाभावान्नोक्तविशिष्टसत्ता । एवञ्च दैशिकविशेषणता-विशेषेण महाकालभेदो महाकाले नास्तीति महाकालभेदविशिष्टघटादि-र्महाकाले नास्ति । महाकालभेदविशिष्टघटादिर्महाकालेऽस्तीति प्रतीतिस्तु यदि प्रामाणिकी तदा कालिकविशेषणतामेव भेदांशेऽप्याश्रित्य समर्थनी-येति सिद्धान्त । त्वन्मते तु चित्प्रतियोगिकत्वं सामानाधिकरण्यसबन्धेन भेदेन विशेषणम् , ब्रह्मण एव पक्षत्वापत्ते । किन्तु स्वरूपसबन्धेनैवेति क्व चित्प्रतियोगिकत्वविशिष्टभेदश्चेति न स्यात् । न च यथा तत्प्रतियोगिकत्व-विशिष्टसयोगस्तन्निष्ठाभ्नि तद्वदनापि ब्रह्मभेदे ब्रह्मप्रतियोगिकत्वस्याभावा-

दिति वाच्यम्, स्वप्रतियोगिकभेदस्यापि स्ववृत्तित्वात् तस्यैव मिथ्यात्वाभावप्रसगाच्च। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपरोधप्रसगे भवत्सर्वस्वविलयापत्तेश्च। एतेनोपहितवृत्तेः शुद्धवृत्तित्वनियमेऽपि चित्प्रतियोगिकत्वविशिष्टभेदस्य न चिद्वृत्तित्वम्, तदन्यस्थल एव तन्नियमादित्यपि निरस्त वैपम्ये बीजाभावाच्चेति दिक्।

नापि द्वितीयविशेषणेन तुच्छव्यावृत्ति, तत्साधारण्यात्। बाधोविधुराणा शशशृङ्ग सदिति प्रत्ययदर्शनात्। सदसतो सबन्धानुपपत्तिरिति बौद्धाधिकारवाक्य तु वस्तुगत्यभिप्रायम्। अत एव "भ्रमस्थले ससर्गोऽसन्नेव भासते" इति टीकाकृता पक्ष। न चैवम्"असत्ख्यातिनिरासात्"इति दीधितिफक्किकाया सत्त्वस्य ख्यातिविषयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वनिरासादित्यर्थकथनमनुपपन्नम्, असतोऽपि ख्यातिविषयकत्वे सत्त्वस्य तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वम्यावश्यकत्वापत्त्या तन्निरासस्य बाधितत्वादिति वाच्यम्, ख्यातिपदस्य तत्र प्रमापरत्वात्। "यदसत्तन्न प्रमेति, यथा व्योमकमलम्, असच्च पुरोवर्त्ति रजततादात्म्यमित्यनुमाने गगनकमलस्यापि शब्दाभामप्रतिभासत्वेन दृष्टान्तस्य साध्यविकलत्वात्"इति लीलावत्यामुक्तत्वात्।

न चात्रापि प्रतीतिपदेन प्रमव ग्राह्येति वाच्यम्, सत्त्वप्रकारक प्रमाविशेष्यत्वेनोपस्थितौ तत्र मिथ्यात्वासिद्धौ बाधापत्ते। न च व्यावहारिकप्रमापरम्, तद्भेदस्येदानीमसिद्धे व्यावहारिकतात्त्विकोभयसाधारणप्रमात्वस्य त्वयानङ्गीकाराच्च। अत एव "तदैक आहुरसदेवेदमग्र आसीत्'इति छान्दोग्योपनिषदि श्रुत सत्त्वेन प्रतीतिरनूद्यत। नास्तिकमतविशेषानुवादार्थत्वात्। 'नानुपमृद्य प्रादुर्भावात्" इत्यत्र न्यायवार्त्तिकतात्पर्यटीकादौ तन्मतस्यापि दर्शनात्। तथा च तत्रोक्तम् 'तत्र तावदेके आहुरभावाद् भावोत्पत्ति, कुत नानुपमृद्य प्रादुर्भावा यस्तस्मादित्यर्थं। विश्व हि शून्यतादा एव जायत। एव किल श्रूयते असदेवेदमग्र आसीत्" इत्यादि।

यत्तु सगतिग्रहणाभावाच्छशशृङ्गादिपदानामबोधकतेति बौद्धाधिकारवाक्य तदखण्डशक्त्या बोधकत्वाभावपरम्। तथा च 'पञ्चमेन सता पदार्थो व्यभिचरति" इति महाभाष्यमुपादाय कैयटेनोक्तम् 'अत्यन्तासतोऽपि वह्नि. शशविषाणादीनर्थान् बुद्धया विषयीकृत्य शशविषाणादिप्रयोगा। तस्माद् बुद्धयारूढोपचरिता सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचारे-

त्यर्थः । सैव तु सत्ता प्रयोक्तृप्रतिपत्तृणा बहीरूपतया भासते" इत्यादि। तन्मतोपन्यासश्चोक्त "तस्मादसदुपादान विश्वमिति सिद्धम्' इति। अत एव 'अभावात्पुनर्नाचेतनत्वादेव कार्यानुपपत्तिरपि तु निरुपाख्यत्वात्" इति पञ्चपादीविवरणेऽपि "न च निरुपाख्यादुपादानता जगतः सदन्वयात्" इति विवरणाचार्य-वाक्य "निरुपाख्यकारणवादिन प्रति निरुपाख्यत्वादिति हेत्वसभवादाह" इति तत्त्वदीपनकारैरवतारितम्। एतेन" यदि निरुपाख्य कारण वदेत्तदोक्तहेत्वसभव " इति तदभिप्रायवर्णनमपास्तम्, यथाश्रुतस्यैव सम्यक्त्वात्। पश्चादप्युक्तम् अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुन सदातनत्वापत्ते "इति। 'अनुपाख्यस्यार्थक्रियाजनकत्वाभावेऽप्यनिष्टप्रसगान्तरमाह—अनुपाख्यस्येति । एतत् पटानुत्पत्तिक्षणे यद्येतत् पटोत्पादकानुपाख्योत्तरक्षण स्यादेतत् घटाधिकरण स्यात्" इति तत्र वर्द्धमानोपाध्याया ।

अत एव न्यायकुसुमाञ्जलावप्यकस्मादेव भवतीति वाक्यस्यार्थविकल्पेऽनुपाख्यहेतुत्वमपि शङ्कितम्।

"हेतुभूतनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभावकथनान्नैवमवधेर्नियतत्वत." ॥ इति तत्रोक्तत्वात्।

यत्तु "अस्थिरात् कार्यमिच्छतोऽर्थक्रियाभावाद्भावोत्पत्तिमाहुः"इति भामतीपञ्जिकाव्याख्यायाम् "अभावस्यार्थक्रियाकारित्वानभ्युपगमात्, कथमभावाद्भावोत्पत्तिस्तत्सिद्धान्तत्वेनानूद्यते, तत्राह अस्थिरादिति। आपाद्यानुवादोऽयमिति वक्ष्यन् क्षणिकस्य कारणत्वासभवमाह युक्तमेतत्"इति कल्पतरुकारैरुक्तम्, तच्चिन्त्यम्, तद्वादिना अभावस्यैव कारणत्वाभ्युपगमात्। तन्मतानुवादत्वे बाधकाभावेनापाद्यानुवादत्वे प्रमाणाभावात्। उक्तश्रुत्यर्थस्तु पूर्वपरिच्छेद एव परीक्षित इत्यल पल्लवेन। एव साध्यमपि दुर्वचम्।

ननु मिथ्याशब्दोऽनिर्वचनीयतावचन इति ग्रन्थदर्शनात् सदसत्त्वानधिकरणत्वमेव मिथ्यात्वम्। यद्यप्यसत्त्वविशिष्टसत्त्वाभावसाधने सिद्धसाधनमसत्त्वमात्राश्रये जगत्यसत्त्वविशिष्टसत्त्वाभावस्य परेषामिष्टापत्तिग्रस्तत्वात्, तथापि सत्त्वात्यन्ताभाववत्त्वे सत्यसत्त्वात्यन्ताभावः साध्य। यद्वा सत्त्वात्यन्ताभावोऽसत्त्वात्यन्ताभावश्चेति द्वयं मिलितत्वेन साध्यम्। न च व्याघात। सत्त्वाभावो ह्यत्र त्रिकालाबाध्यत्वरूपसत्त्वव्यतिरेक, असत्त्वाभावश्च क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वरूपासत्त्वव्यतिरेकः। न चैतौ

परस्परविग्रहरूपौ,परस्पराप्रतियोगिकत्वात् । तथा च त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्व पर्यवसित साध्यमिति चेत्, मवम्, आत्मभिन्न वे सति सत्त्वेन प्रतीयमानत्वरूपस्यास्यास्मदिष्टत्वात् । न हीद स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपस्यास्मत्सिद्धसत्त्वस्याभावमवगाहते । अथ वैलक्षण्य बाध्यत्व तथा च ज्ञानजन्योच्छेदप्रतियोगित्वमय, स च न त्वदिष्ट इति चेत्, विशेषभागवैयर्थ्यात् । तुच्छस्य त्वन्मतेऽपि ज्ञानजन्योच्छेदप्रतियोगित्वविरहात्तृतीयमिथ्यात्वाविशेषापत्तेश्च । तस्माद्यादृश सत्त्व घटादेर्यादृशमसत्त्व च शशशृङ्गादेर्मया स्वीक्रियते तदुभयाभाव एव मा प्रति साधनीय । तत्र च व्याघात स्पष्ट एव । परस्परविरोधे तु तत्प्रकारान्तरस्थितिरिति न्यायात् । एतेन सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वय वा साध्यम् । तथा चोभयात्मकत्वेऽन्यतरात्मकत्वे वा तादृग्भेदासभवेन ताभ्या नार्थान्तरम् । न चासत्त्वव्यतिरेकाशस्यासद्भेदस्य च सिद्धत्वादशत सिद्धसाधनमिति वाच्यम्, मिलितप्रतीतेरुद्यस्यत्वात् । अत एव गुणादिक गुण्यादिभिन्नाभिन्न समानाधिकृतत्वादिति भेदाभेदवादि प्रयोगे भेदाशस्य तार्किकादिसिद्धत्वेऽपि न दोष इति परास्तम्, पूर्वोक्तदोषसाम्यात् । नित्यभेदोऽनित्यभेदश्च यदि साध्य तदा स्वव्यतिरिक्तानित्यानित्यव्यक्तिभेदमादाय सर्वत्र सिद्धसाधनम् । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकभेदद्वयस्य साध्यत्वे तु व्याघात । आत्मभिन्नत्वे नित्यनित्यत्वावच्छिन्नप्रतियोगिताकभेदस्य स्वाकाशादौ सिद्धसाधनम् । अवच्छेदकावच्छेदेनानुमितेरुद्देश्यत्वेऽपि तत्र बाध, ज्ञाननिवर्त्यत्वस्य तथात्वेऽप्यसद्भेदसाधनवयर्थ्यात्, इत्यादि स्वयमूह्यम् ।

किञ्च ब्रह्मणो निर्धर्मकत्वात्त्वन्मते सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वेनोक्तमिथ्यात्वस्य तत्रातिव्याप्ति । ननु अबाध्यत्वोपलक्षित तत्स्वरूपमेव ब्रह्मण सत्त्वम्, तस्य ब्रह्मभिन्नत्वे मिथ्यात्वापत्त्या ब्रह्मणो वस्तुगत्या सत्त्वानुपपत्ते । 'प्राणा वै सत्त्व तेषामेष सत्त्व ।' "नित्यो नित्याना चेतनश्चेतनानाम्' "अणोरणीयान् महतो महीयान्" इत्यादिश्रुतिभिर्व्यवहारकालाबाध्यत्वरूपप्रपञ्चसत्यत्वापवादाबाध्यत्वोपलक्षितब्रह्मस्वरूपात्मकत्वेन ब्रह्मसत्त्वस्योत्कर्षोक्ते । तथा च सत्त्व ब्रह्मणो न धर्म इति चेत्, सत्यम्, तथापि कल्पितस्य धर्मधर्मिभावस्यावश्यकत्वात् । अन्यथा 'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य" इति भाष्योक्तस्य देहादौ ब्रह्मधर्माध्यासस्यानुपपत्ते । अत एव पूर्वोक्तोपनिषद्वाक्ये चकार सत्त्वशुद्धत्वविमुक्तत्वादिपर, तथा च सत्त्वादि-

सम्बन्धस्योपहित एव वृत्ते। शुद्धे तदभाव मूलभ एव। न चैव शुद्धस्य सत्त्वादिधर्मकत्वव्यवहारानापत्तिः, उपहितनादात्म्येन शुद्धे तत्सम्भवात्। न चैवमभावोऽपि स्वोपहित एव न शुद्ध इति वाच्यम्, भावाभावयोरन्यतरस्यावश्यकत्वात्। अन्यथा धर्मभावत्वस्वरूपनिर्द्धर्मकत्वव्याप्यनुपपत्ते।

यत्तु निर्धर्मकमिन्न एव भावाभावयोरन्यतरनियम, तुच्छे तदन्यतरादर्शनात्। न चैव शुद्धब्रह्मणो निधर्मकत्वानुपपत्ति, धर्मभावाश्रयोपहितादात्म्यादेव तत्सम्भवात्। अतो न निर्धर्मकत्वश्रुतिविरोध। तथा च शुद्धे नातिव्याप्तिरिति, तदसत्, उपहितताद्रात्म्यस्यापि तत्रानुपपत्ते। कल्पितस्य धर्माश्रयतादात्म्यस्य सम्भवे तु तादृशस्य धर्मस्यापि सत्त्व बाधकाभावात्। निर्धर्मकत्वग्राहकप्रमाणस्यैवाभावरूपधर्माश्रयत्वग्राहकत्वेनोपजीव्यविरोधाच्च। तुच्छस्य च धर्माभावानाश्रयत्वे निर्धर्मकत्वव्यवहारविरोधात्। अमुनव्यावृत्तेर्वन्ध्यासुतवृत्तित्वेन बोद्धाधिकारादौ व्यवहृतत्वात्। "अभावस्य विकल्पविषयत्वरूपस्य च धर्मस्य तुच्छेऽपि स्वीकारात्"इति लघुचन्द्रिकायां स्वयमेव लिखितत्वाच्च निर्धर्मकतादात्म्याङ्गीकारेऽपि व्याघात।

यत्तु सत्त्वसम्बन्धवत्प्रतियोगिकतादात्म्याभाव एव साध्यत्वेन निवेश्यो न तु सत्त्वाभाव, उक्ततादात्म्य चोपहितवृत्त्यपि शुद्धेऽस्त्येव। शुद्धोपहितयोस्तादात्म्याङ्गीकारात्। अन्यथा शुद्धस्याशुद्धोपरागेण भानानुपपत्त्या संसारकाले स्वप्रकाशत्व न स्यात्, तदा शुद्धस्य पृथग्भानाभावात्। तथा च "तमेव भान्तमनुभाति सर्वम्" इति शुद्धप्रतिपादिका श्रुति "अनुकृतेस्तस्य च" इति सूत्र चानुपपन्न स्यात्, ब्रह्मण स्वान्यसर्वभासकत्व स्वान्याभास्यत्व चोक्तश्रुत्यर्थ इत्यस्य तदधिकरणे स्थापितत्वात्। न च तयाप्युक्तादात्म्यस्य कल्पितत्वेन शुद्धे तदभावोऽप्यस्तीत्यतिव्याप्तिरेवेति वाच्यम्, प्रतियोगिव्यधिकरणस्योक्ताभावस्य निवेशादिति, तदप्यसत्, सत्त्वसम्बन्धवत् प्रतियोगिकतादात्म्यस्य प्रपञ्चेऽपि सत्त्वादव्याप्ते। सत्त्वसम्बन्धापहितस्यैव ब्रह्मण आकाशाद्युपादानत्वात्। सत्त्वोपहितकपालादेर्घटाद्युपादानत्वाच्च। प्रपञ्चभानस्य सत्त्वप्रतीतेस्तनोक्ततादात्म्यमेव विषय इति सिद्धान्तात्।

ननु स्वाभाविकसत्त्वसम्बन्धवत्त्वमुपहितकेवलभावेन तादात्म्यञ्च निवेश्यम्, तच्च प्रपञ्चे नास्ति सत्त्वोपहितब्रह्मतादात्म्यस्य प्रपञ्चे सत्त्वेऽपि तस्य केवलब्रह्मरूपत्वाभावादिति चेत्, नैवम्, स्वाभाविकत्व हि सत्त्वे विशेषण सम्बन्धे वा ? नाद्यः, तत्सम्बन्धस्य शुद्धे विरहादतिव्याप्तेः। नान्त्यः, अप्रसिद्धेः। सम्बन्धस्य त्वन्मते कल्पितत्वात्। यदपि शुद्धब्रह्मणि

धर्माङ्गीकारपक्षे सत्त्वमबाध्यस्वरूपत्व तदभावश्च प्रतियोगिव्यधिकरणे ग्राह्य । बाध्यवृत्ति सत्त्वाभाव इति यावत् । तेन प्रपञ्चे सत्त्वाभावस्योपाधिवासत्त्वसामानाधिकरण्येऽपि नाव्याप्ति । बाध्यत्वे च ज्ञानजन्यो ज्ञानात्मको वा यो ध्वसस्तत्प्रतियोगित्वम् तेन मिथ्यात्वरूपबाध्यत्वघटिततयात्माश्रयानवकाश इति तदपि चिन्त्यम्, बाध्यवृत्त्यभावस्यैव लक्षणत्वे भागान्तरवैयर्थ्यात् । न च ज्ञानप्रागभावे सिद्धसाधनम् अवच्छेदकावच्छेदेनानुमितेरुद्देश्यत्वात् । एतदनुमानात्प्राग्ब्रह्मान्यस्य ज्ञानजन्यत्व ध्वसप्रतियोगित्वासिद्धेश्च । न च ब्रह्मान्यत्वमेव बाध्यत्वमिति वाच्यम् ब्रह्मान्यत्वस्योक्तरीत्या ब्रह्मवृत्तित्वात् । यदपि धर्मिसमानसत्ताकस्य सत्त्वाभावस्याश्रयत्वमेवात्र वाच्यम्, धर्मिसमानसत्ताकस्यासत्त्वाभावस्याश्रयत्व तु लक्षणान्तरम्, तादृशाभावश्च प्रपञ्च एवास्ति न तु ब्रह्मणि । सत्त्वाभावस्य व्यवहारिको सत्ता ब्रह्मणस्तु पारमार्थिकीति सत्तावैषम्यादिति, तदप्यसत्, सत्ताभेदस्य मप्रत्यसिद्धे ।

यत्तु वदन्ति यद्यपि सत्यवत्प्रतियोगिकतादात्म्याभावस्य प्रपञ्चे सिद्धसाधनम्, ब्रह्ममात्रविषयकतद्धीविषयत्वावच्छिन्नप्रतियोगिताकस्योक्त तादात्म्याभावस्य च प्रपञ्चे सत्त्वात् । उक्तज्ञानविशेष्यत्वाभावस्य प्रपञ्चे मयापि स्वीकारात् । न ह्युक्ततादात्म्यावच्छिन्नाभाव एव साध्य मन्मते तादृशतादात्म्यस्य ब्रह्ममात्रवृत्तितया लाघवेन तत्तादात्म्यव्यक्तिमात्रविषयकधिय एव तद्व्यक्तित्वेन विषयतासबन्धेन प्रतियोगितावच्छेदकतया गुरुभूततादात्म्यत्वावच्छिन्नाभावस्याप्रसिद्धे । तथाप्युक्ततादात्म्यत्वव्यापकविषयताकमुक्ततादात्म्यत्वव्यापक यद्विषयत्व वा ? तद्वृत्युभयावृत्तिधर्मनिष्ठतावच्छिन्ना च प्रतियोगितावच्छेदकता यस्य तादृशाभाव साध्य तादृशविषयता चास्माक शुद्धिचित्तादात्म्यमित्याकारकज्ञानीया, परेषामुक्ततादात्म्य सर्वं प्रमेयमित्याकारकज्ञानीया । द्वितीयेऽप्युक्तबाध्यत्वव्यापकविषयताकम बाध्यत्वव्यापक यद्विषयत्व वा तद्वृत्युभयावृत्तिधर्मनिष्ठेत्यादि वाच्यम् । तादृशविषयता चास्माक बाध्य इत्याकारकज्ञानीया परेषामबाध्यस्वरूप सर्वं मेयमित्याकारकज्ञानीया च । अत्र च न सिद्धसाधनम् । उक्ततादात्म्यत्वव्यापकम्योक्तधीविषयत्वस्य मेयमात्रे तै स्वीकारात् । ब्रह्मणीव प्रपञ्चेऽपि तादृशमिथ्यात्वविरोधिभ्रमाविषयत्वाद्बाध्यत्वसत्यत्वप्रकारकोक्तज्ञानप्रतियोगिकस्य विशेष्यतासबन्धावच्छिन्नतद्धीव्यक्तित्वावच्छिन्नप्रतियोगिताकाभावस्यानङ्गीकारात् । न चव प्रपञ्च तादृशज्ञानविषयत्ववादितार्किकादीन् प्रति तादृशन्यायप्रयोगवैयर्थ्यम्, बाधेन तेषामनुमित्यनुदयादिति

वाच्यम्, विप्रतिपत्त्यधीनात्पक्षे साध्यसंशयात्, वादिनोर्बाधनिश्चयसंशयात्। न चेत्थं ज्ञानविशेषतात्पर्युपगमे प्रपञ्चे परेषामस्तीति पूर्वोक्तयुक्त्यापत्तिः अनिश्चितप्रामाण्यमेव तादृशविषयमादाय सिद्धसाधनभ्रमकत्या तन्निषेधात्। अन्यथा शब्दो नित्यो न वेत्यादावपि न्यायप्रयोगो न स्यात्, विप्रतिपत्त्या वादिनोरपि बाधनिश्चये भ्रमत्वमशयादनुमितिमंध्यस्थादीना तु स्वरसेनेत्यस्य प्रकृतेऽपि साम्यात्। यत्र तत्तद्धीव्यक्तित्वनिष्ठप्रतियोगितावच्छेदकवता घटादिनादार्म्यविषयकवृत्तिधर्मत्वेनावच्छिन्ना तादृशाभावमादाय पटादौ सिद्धसाधनवारणायानवच्छिन्नेति। ननु तथापि ज्ञानाना ज्ञानाविषयत्ववादिप्रामाकरमतेऽपि सिद्धसाधनम्, पक्षतावच्छेदकावच्छेदनानुमितेरुद्देश्यत्वेऽपि प्रपञ्चस्य सत्त्वेऽपि ज्ञानस्वरूपत्वसिद्धयार्थान्तरम्। भवति हि प्रपञ्चस्य ज्ञानरूपत्वे 'वाच्य सर्वं मेयमि'याकारकज्ञानविषयत्वाभावस्य पक्षे उपसंहार इति चेत्, मैवम्, ज्ञानरूपतया स्वीकार्ये प्रपञ्चे उक्तव्यापकमाव्यत्वादिव्यापकस्येच्छादिविषयत्वस्यावश्य स्वीकारात्। ज्ञानेषु ज्ञानाविषयत्ववादिनापीच्छाविषयत्वस्य स्वीकारात्। तथा च ज्ञानाविशेषितस्योक्तरूपविषयत्वस्याभावो ज्ञानात्मके प्रपञ्चे बाधानोपसहर्तुं शक्य इति ज्ञानरूपत्वसिद्धेरा नार्थान्तरमिति।

न च तद्वन्निष्ठात्यन्ताभावप्रतियोगित्वरूपव्यापकत्व त्वन्मते नास्ति, त्वया तद्वत्यपि तदभावस्वीकारादिति वाच्यम्, लौकिकव्यवहारोपयुक्ताभावस्य विशेषणतासबन्धानामन्यतमत्वादिरूपेण निवेशात्। साध्यसामानाधिकरण्यावच्छेदकरूपव्याप्तिनिरूपकत्वस्य वा व्यापकत्वस्य वाच्यत्वात्, अवच्छेदकत्वमखण्डमेवेति मिश्रादिमतत्वात्तस्याभावाघटितत्वाच्चेति। अत्रेद वक्तव्यम्—एवमप्यर्थान्तर तदवस्थमेव, उक्तविषयत्वावच्छिन्नाभावस्येच्छाविषयेष्वपि ज्ञानेषु सिद्धिसभवात्। अबाध्य सर्वं मेयम्, मे भवित्रीच्छाया अनुभवविरुद्धत्वात्। अबाध्य सर्वं मेयम्, घटो मे भवित्रीच्छाविषयश्च नाबाध्यत्वव्यापकम्। अबाध्यत्वप्रकारतानिरूपितविशेष्यत्व हि तयात्वेन वाच्यम्। अन्यथा बाध्य सर्वं मेय भूतल घटवदिति समूहालम्बनमादाय तत्प्रकारकज्ञानाविषयत्वस्य प्रपञ्चे सिद्धसाधनापत्ते। अबाध्य सर्वं मेमित्येव च नच्छान्तर्गतम्, उक्त्युक्ते। किन्तु तदशो ज्ञानस्वरूपान्तर्गत एव ज्ञानेच्छाविषयतायाश्च परस्पर निरूप्यनिरूपकभावविरहादित्यवधेयम्।

किञ्च बाधोऽपि निराबाध एव। न हि शुक्तौ रजतत्वाभाव व्यवस्थाप-

यता बाधकसहस्रेणापि तस्या इद रजतमिति ज्ञानविषयत्वाभाव साधयितु शक्य । एवञ्च प्रपञ्चे तादृशधीविशेष्यतास्वीकारिणा तार्किकादीना न कथचिदपि तदभावानुमितिसभव । किं बहुना, औपनिषदस्यापि न तादृशानुमिति सभवति । नहि चनीय रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकज्ञान जानतोऽपि मनस्य शुक्तिविशेष्यकरजतत्वाभावज्ञान जातु समुदेति, चनीयतादृशज्ञानस्वरूपबाधकसत्त्वात् । शब्दो नित्यो न वेत्यादौ तु नैयायिकेन नित्यत्वाभावो मीमासकेन नित्यत्व च न्यायेन प्रतिपाद्यते ।

ननु नित्यत्वानित्यत्वान्यतरप्रकारकज्ञानविषयत्वाभावे नित्यत्वादिप्रकारकज्ञानविषयत्वज्ञान चानित्यत्वाद्यनुमितौ न बाधकम्, अनित्यत्वऽपि शब्दस्य भ्रमात्मकनित्यत्वप्रकारकज्ञानविषयत्वसभवादिति वैषम्यम् । एतेन भेदगर्भद्वितायसाध्ये ज्ञानानिवत्यरूपसद्भुदस्य निवेशपक्षेऽस्मन्मते ब्रह्ममात्रविषयक तद्धीविषयत्वस्वरूपस्यैव लाघवेनोक्तभेदप्रतियोगितावच्छेदकत्वेन ज्ञानानिवत्यत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्धरुक्तधीविषयत्वावच्छिन्नप्रतियोगिताकभेदनिवेशे सिद्धसाधनापत्ति । किंतु सत्य सन्न बाध्यमित्याकारकपराभ्युपगतस्य कस्यचिज्ज्ञानस्य यद्विषयत्व तद्व्यवच्छिन्नप्रतियोगिताकत्वेन सद्भुदस्य निवेश । तादृशज्ञाने चास्मदभ्युपगतबाध्यत्वविरोधिसत्यत्वप्रकारकत्व परं स्वीक्रियते तदीयमुख्यविशेष्यताश्रयतेर्भेदादिसाधने सिद्धसाधन तैर्वक्तु मशक्यम् । ब्रह्मणीव प्रपञ्चेऽपि तेस्तस्या स्वीकारादित्यादिकमप्यपास्तम् । अन्यथा ब्रह्म पक्षीकृत्य मयापि त्वा प्रत्युक्तभेदात्यन्ताभावयो साधनापत्ति । बाधान्यबाधकस्य तत्रापि वक्तुमशक्यत्वात् । वस्तुतो यादृग घटत्वाद्यवच्छिन्नप्रकारताकमुक्तज्ञानीय प्रपञ्चनिष्ठविषयत्व तदभावो घटत्वादितत्तदसाधारणधर्माश निरवच्छिन्नप्रकारताकघट सत्य इत्यादिरूपज्ञानदशाया घटादौ मयापि स्वीक्रियत इति सिद्धसाधन दुर्वारम् । वस्तुतस्तु, अभावीयविशेषणताविशेषसबन्धेनोक्तविषयत्वाभावस्य केवलान्वयित्वात् सिद्धसाधनम्, विषयत्वस्य भावरूपतयात्तसबन्धेन तस्य कुत्राप्यवृत्ते ।

न च स्वरूपसबन्ध एव प्रतियोगितावच्छेदकतया निवेश्य इति वाच्यम्, तथापि विषयत्वस्य समवेतत्वसिद्धयार्थान्तर नहि समवायसबन्धावच्छिन्नप्रतियोगिताक उक्ताभाव साधयितु शक्यम, सिद्धसाधनापत्ते । न च विषयत्वस्यापि पक्षकोटिप्रविष्टतया स्वरूपान्यसबन्धराहित्य विशेषण वाच्यस्यारणार्थं देयमिति वाच्यम्, पक्षतावच्छेदकस्य पदार्थानतरसाधारण्यानुपपत्त ।

विशिष्टविषयत्व एव तद्विशेषणस्य दातुमशक्यत्वात् । न च नैयायिकाभिमतसम्बन्धान्यसम्बन्धनावृत्तित्व विशेषण देयमिति वाच्यम्, गगनादीनामवृत्तीना पक्षबहिर्भावापत्तें । न च यस्य येन सम्बन्धेन वृत्तिमत्त्व तत्सम्मत तदन्यसम्बन्धनावृत्तित्व तदर्थ इति वाच्यम्, स्वात्यन्ताभावनामानाधिकरण्य-[ण्या]भावविशिष्टसयोगादिनैव घटादीना वृत्तिमत्त्वस्य नैयायिकाभिमततया तदभावसिद्धौ बाधस्यैवापत्त्यास्माक कृतार्थत्वात् । वह्निमानित्यादिज्ञाने वह्नयभावाधिकरणावृत्तित्वरूपो विरोध सासर्गतया भासत इत्यभ्युपगमस्याप्यत्रानुकूलत्वात् । तया च विषयत्वैक्यान्तिरवारणार्थं प्रवृत्तेन पक्षतावच्छेदकावच्छेदेनैव बाध समानीत इति महद्भवतामनिष्टम् । तदेतदुच्यते वृश्चिकभिया पलायमानस्याशीविषमुखनिपात इति । न च नैयायिकस्थाने वेदान्तिपद देयमिति वाच्यम्, व्यावहारिकभावाभावयोर्विरोधस्य तैरपि तावदभ्युपगमात्, मिथ्यात्वस्य चेतदनुमानात्पूर्वमसिद्धत्वात्, बाधपर्यवसानस्यावश्यकत्वात् ।

वेदाविरुद्धयुक्तीनामर्कें तर्ककुतूहले ।
टीकाकथितमिथ्यात्वं मथितं पथि तत्त्वगे ॥१०॥

एकादशोंऽशः

यत्तु "प्रतियोग्युपाधौ त्रैकालिकात्यन्ताभावप्रतियोगित्वं तत्। लक्षणत्वपक्षे तुच्छे व्यभिचारवारणाय विशेष्यान्तम्। ध्वंसप्रागभावकाले तदधिकरणेऽपि तदत्यन्ताभावस्य सिद्धत्वात् त्रैकालिकेति। अत्यन्ताभावपदञ्च स्वान्यूनसत्ताकत्वरूपं यदात्यन्तिकत्वं तद्विशिष्टसंसर्गाभावपरम्, अन्यथा कपाले घटो नास्तीति भ्रमसिद्ध प्रातिभासिकात्यन्ताभावमादाय सिद्धसाधनापत्तेः, व्यापकान्तेनैव ध्वंसादिवारणेऽत्यन्तपदार्थघटकसदातनत्ववैयर्थ्यापत्तेश्च, भेदस्य सत्त्वव्यापकत्वसिद्धयार्थान्तरवारणाय संसर्गपदम्"इति, तदप्यसत्, आकाशादौ स्वप्रकारकधीविशेष्योगावेरप्रसिद्धेः। न च ब्रह्मैव तादृक्, निराकरिष्यमाणत्वादेतदनुमानात्पूर्वं तदसिद्धेश्च। न च "आत्मन आकाश संभूतः" इति श्रुत्यैव तत्सिद्धिः नहि घटादेर्जन्यत्वमपि मिथ्या"वानुमानात्पूर्वं न गृह्यत इति वाच्यम्, तस्या उक्तार्थकत्वनिरासात्, व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकप्रभावमादाय सर्वत्र सिद्धसाधनाच्च। तस्योक्तसत्त्वनिष्ठात्यन्ताभावाप्रतियोगित्वाद् व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावस्य केवलान्वयित्वमिति मणिकारोक्ते प्रातिभासिकस्य व्यावहारिकापेक्षयान्यूनसत्ताकत्वमित्यादिभेदस्येदानीमसिद्धत्वाच्चेत्, न, प्रातिभासिकाभावे व्यावहारिकपारमार्थिकान्यतरप्रतियोगिकत्वं व्यावहारिकाभावे पारमार्थिकप्रतियोगिकत्वं चेत्यन्यतरवत्त्वमेव प्रातिभासिके स्वन्यूनसत्तायाः परमतेऽप्रसिद्धया प्रतियोग्यपेक्षया न्यूनसत्ताकत्वस्यादुर्ग्रहतया दृष्टान्तस्य साध्यवैकल्याच्च। एतेनाभावस्य स्वप्रतियोगिन्यूनसत्ताकत्वं ततश्च व्यावहारिकपारमार्थिकान्यतरनिष्ठं यत्प्रातिभासिकाभावप्रतियोगित्वं पारमार्थिकनिष्ठं च यद् व्यावहारिकाभावप्रतियोगित्वं तद्भिन्नत्वे सति स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति फलितार्थः। व्यावहारिकं पारमार्थिकं वा यं घटं स्वसमानाधिकरणप्रातिभासिकात्यन्ताभावप्रतियोगीति ज्ञानकालेऽप्येतद्घटे मिथ्यात्वव्यवहारविरहात्। पारमार्थिकमिदं पारमार्थिकान्यस्य स्वसमानाधिकरणस्यात्यन्ताभावस्य प्रतियोगीति ज्ञानकाले इदं मिथ्येति व्यवहाराभावाच्च यथोक्तप्रतियोगित्वद्वयस्य क्रमेण भेदं प्रति योगितया निवेशः, इत्यपि परास्तम्। वस्तुतः परमतेऽपि पारमार्थिकत्वस्य

मिथ्याभिन्नत्वरूपत्वादात्माश्रय । न च ज्ञाननिवर्त्यत्वाभावरूपपारमार्थिकत्वमेव घटक, तादृशपारमार्थिकत्वघटितस्यास्यैव मिथ्यात्वलक्षणत्वानुपपत्ते. । ज्ञाननिवर्त्यत्वस्यैव लक्षणत्वसभवादन्याशवैयर्थ्यात् ।

यत्तु ज्ञाननिवर्त्यत्वस्य पूर्वोक्तप्रतियोगित्व विशेषणतया तदभावस्य लक्षणत्वान्न वैयर्थ्यं घूम प्रागभाववदखण्डाभावत्वादिति, तच्चिन्त्यम्, तथा हि समानाधिकरणव्याप्यतावच्छेदकान्तरघटितत्वमेव व्यर्थविशेषणत्वम्, यथा नीलधूमे नीलस्य । घूमप्रागभावस्य तु धूमत्वरूपव्याप्यतावच्छेदकान्तरघटितत्वऽपि घूमप्रागभावत्वरूपव्याप्यतावच्छेदकस्य घूमत्वरूपव्याप्यतावच्छेदकसामानाधिकरण्याभावाद् व्याप्यत्वमस्त्येव । अत एव प्रामाण्यवादे मिश्रैरुक्तम् "लघ्ववच्छेदकव्याप्यस्येव गुरुवच्छेदकस्य व्यर्थविशेषणतावीजत्वात्" इति । द्रव्योपाधिपरीक्षायामतीन्द्रियलक्षणे तरुक्तम् "अत्र तु न नानाधर्मिणि व्याप्तिग्रहः किन्तु तादृशसंयोगाश्रयत्वरूपे धर्मे एकस्मिन्" इति । अत एवेन्द्रियलक्षणे "धर्मिभेदसंपादनाय ज्ञानकारणमनःसंयोगसमानाधिकरणशब्देतरोद्भूतविशेषगुणाश्रयत्वाभावो लक्षणम्" इति व्याचक्षते ।

ननु नीलधूमेऽपि कथं व्याप्तिग्रहः, अन्यभिचरितसामानाधिकरण्यस्य तत्र सत्त्वादिति चेत्, अत्रोपाध्यायाः "साध्यसामानाधिकरण्यावच्छेदकं हेतुतावच्छेदकमेव व्याप्ति, सैवानुमितिहेतुः, अत एव यो धूमवान् स वह्निमान् इत्युदाहरणेन साधनवदवच्छेदेन साध्यसत्त्व दर्शयता इयमेव व्याप्तिर्दर्श्यते । एतदभावश्च व्याप्यत्वासिद्धिनीलधूमत्वादौ गौरवेण तस्यानवच्छेदकत्वात् । व्याप्तित्वप्रकारकव्याप्तिज्ञानस्यानुमितिहेतुतया तदवच्छेदकत्वस्यापि परामर्शविषयत्वात् । तादृशावच्छेदकत्वाभावस्य परामर्शविषयाभावत्वरूपासिद्धिलक्षणाक्रान्तत्वात्" इति । मिश्रास्तु "अनधिकरणत्वरूपमवच्छेदकं च नीलधूमत्वेऽप्यस्ति, न चान्यूनवृत्तित्व तदिति वाच्यम्, वह्निसामानाधिकरण्यवदालोकावृत्तितया धूमत्वस्याप्यवच्छेदकत्वापत्तेः । न च तत्तावच्छेदकान्तराघटितत्वमपि विशेषणम्, तथात्वे व्याप्यन्तरापेक्षया गुरुत्वेनैव व्याप्तिज्ञानस्यानुमितिहेतुत्वानुपपत्त्या तत्प्रतिबन्धकस्यावच्छेदकत्वाभावज्ञानस्य हेत्वाभासत्वानुपपत्ते । अवच्छेदकान्तराघटितत्वगर्भव्याप्तेरुदाहरणादवगमस्य शङ्कितुमप्यशक्यत्वाच्च । न च स्वरूपसत एवावच्छेदकान्तराघटितत्वविशेषणस्यागावादत्र व्याप्त्यभाव, अनुमितिजनक तु तद्रहितव्याप्तिज्ञानमेवेति वाच्यम्; पारिभाषिकव्याप्तिविरहेऽपि हेत्वाभासत्वानुपपत्तेरनुमितिहेतुज्ञानविरोधिज्ञानविषयस्यैव तथात्वात् । अतो नीलधूमत्वाव-

च्छिन्नव्याप्त्यभाव एव व्याप्यत्वासिद्धि । सा च तदवच्छिन्नलिङ्गकानुमिति प्रतिबन्धकत्वेन हेत्वाभास । न च प्रतियोग्यप्रसिद्धि, कस्तूरिकादहनत्वावच्छिन्नप्रतियोगिकाया व्याप्ते प्रसिद्धे । न च तादृशव्याप्तिर्नीलधूमेऽस्त्येव वह्नित्वावच्छिन्नप्रतियोगिकनीलधूमत्वावच्छिन्नव्याप्तिश्च प्रसिद्धैवेति वाच्यम्, प्रकृते वह्नित्वनिष्ठस्य नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगितावच्छेदकत्वाभावस्यैवासिद्धत्वात्" इति वदन्ति । इत्यल बहुना ।

प्रकृतमनुसराम । दूषणोद्धारकृतस्तु "समानाधिकरणत्वविशेषणम्, अप्रामाणिकत्वात्, धूमप्रागभावा न हेतुप्रागभावादीना व्यर्थत्वादिति मणिकृतैव लिखितत्वात् । अतो नियतोपस्थितिकयोर्लघुगुरुधर्मयोर्मध्ये लघोरेवावच्छेदकत्व कल्प्यते न गुरोरित्येव नियम । सत्तावच्छेदकान्तरघटित ममानभिन्नाधिकरणधर्मसाधारण एव" इत्याहु । अत एव अद्वैतचन्द्रिकायामपि "विश्वसत्त्वानुमानभङ्गे व्याप्यताया कारणत्वादिव स्वरूपसबन्धरूपेणातिरिक्ते वावच्छेदकत्वेन घटितत्वाद्, व्याप्तेश्च स्वविशिष्टव्यापकसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकरूपतया तादृशावच्छेदकत्वस्य गुरुधर्मऽनभ्युपगमात् । उक्तावच्छेदकत्वशून्यहेतुतावच्छेदकरूपव्यर्थविशेषणत्वस्य व्याप्यत्वासिद्धिविधया हेत्वाभागत्वम्, अतो नीलधूमादिवद्धूमप्रागभावस्यापि वैयर्थ्यमेव । समानाधिकरणविशेषणस्य दीधित्यादौ दत्तस्य निर्मूलत्वात्' इत्युक्तम् । अथ व्यर्थविशेषणेऽपि व्याप्तिरस्त्येव । दोषत्व तु तस्य विशेषणनिर्मुक्तावस्यैव साधकत्वे परार्थानुमानेऽधिकोपादाने प्रयोक्तृनिग्रहसपादकत्वेनैवेति आकर एव स्पष्टत्वात् । अत एव शब्दप्रामाण्यविचारे निराकाङ्क्षवाक्यस्थले पदार्थससर्गसिद्धिवारणाय घटपदादिनिरूपिताकाङ्क्षादिमत्पदास्मारितत्वादिति हेतौ देयम । न च योग्यतानिवेशस्यावश्यकतया तत एव व्यभिचारवारणे तद्वैयर्थ्यं स्वार्थानुमाने व्यर्थविशेषणत्वस्य हेतावदोषत्वादित्युपगते इत्यालोच्यते, तदपि व्याप्तिग्रहानोपयिकमात्रेऽभियुक्तसमतमिति धूमप्रागभावेऽपि तुल्यमेव । अत एव सूत्रमुक्तावल्यामपि 'जन्माद्यस्य यत "इति सूत्रे 'विवर्तोपादानत्वे सति निमित्तत्वम् इति ज्ञानलक्षणे 'धूमप्रागभाववन्न वैयर्थ्यम्" इत्युक्त्वा वस्तुतस्तु इत्यादिना प्रकारान्तरेण तेरेव समाहित तत्कथमनोक्तरीत्या सार्थक्य स्यात् । वस्तुतस्तु धूमप्रागभावत्व व्याप्यतावच्छेदकमित्यस्यापि मूलग्रन्थेषु बहुशो दर्शनात् । तत्पक्षेऽपि ज्ञाननिवृत्तित्वाभावरूप पारमार्थिकत्वे नेतन्मिथात्वलक्षणघटक ज्ञाननिवर्त्यत्वरूप मिथ्यात्वस्यापि विवादग्रस्तत्वात् तदभावरूपपारमार्थिकत्वस्यात्र निवे-

शयितुमशक्यत्वात् । तार्किकाभिमतस्य ज्ञानप्रागभावादिवृत्तिज्ञाननिवर्त्य-त्वमात्रस्य निवेशे तु घटादीनामपि तदभावरूपपारमार्थिकत्वाश्रयत्वात् । यदपि अविनाशित्वरूप पारमार्थिकत्व निवेश्यमिति, तदपि न, गगनादिसा-धारण्यात् । एतेन प्रातिभासिकनिष्ठ यत् स्वसमानाधिकरणात्यन्ताभाव प्रतियोगित्व विनाशिनिष्ठ यदप्रातिभासिकस्य स्वसमानाधिकरणस्यात्यन्ता-भावस्य प्रतियोगित्व तयोरन्यतरवत्त्व मिथ्यात्वमपि निष्कर्षोऽपि निरस्त. । ब्रह्मज्ञानात्पूर्वमेव निश्चितमिथ्यात्वकदृश्यतादात्म्यापन्नचिद्रूपस्य प्रातिभा-सिकत्वस्य मिथ्यात्वघटितत्वाच्च, गगनादिसाधारण्याभावाच्च ।

किञ्च प्रातिभासिकस्य स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपम्, विनाशिगस्त्वप्रातिभासिको य स्वसमानाधिकरणोऽत्यन्ताभावस्तत्प्रतियोगि त्वरूप मिथ्यात्वमिति मिथ्यात्वद्वयस्य भिन्नरूपत्वात् पक्षदृष्टान्तसाधारणसाध्य दुर्लभमेव । न च तदन्यतरवत्त्वेन द्वयोरैक्यसपादनमिति वाच्यम्, प्रातिभा-सिकनिष्ठत्वेन विनाशिनिष्ठत्वेन च यथोक्तप्रतियोगित्वस्य पूर्ववाक्यादेव लाभे प्रातिभासिकविनाशिनोस्तादृशप्रतियोगित्ववत्त्वस्यापि समानवृत्तिवै-धर्म्यन्यायेन ज्ञातत्वात् । निराकाङ्क्षतया तदन्यतरवत्त्वाशस्य शाब्दबोधा-जनकत्वाल्लक्षणत्वाराभवात् । न च प्रातिभासिकनिष्ठत्व विनाशिनिष्ठत्वञ्चा-पहायैव लक्षण वक्तु शक्यम्, व्यावहारिकात्यन्ताभावप्रतियोगिनि ब्रह्मण्य-तिव्याप्ते । एव विनाशिपदेन ब्रह्मान्यस्यैव त्वया वाच्यतया पक्षीकृते तस्मिन् विनाशिनिष्ठ यदप्रातिभासिकस्वसमानाधिकरणात्यन्ताभावप्रतियो-गित्वं तदशस्य भानपर्यवसाने अनुमितेरेवानुपपत्ति । विनाशिनिष्ठत्वेनोक्त-प्रतियोगित्वबोधस्य साध्यस्वरूपज्ञानेनैव सिद्धत्वात् । न चाविनाशिनि यथोक्तप्रतियोगित्वस्य साध्यज्ञानदशाया ज्ञातत्वेऽपि तावन्मात्रस्य ब्रह्मसाधारण्य-त्वेनोद्दश्यासिद्धचा विनाशिनिष्ठत्वविशिष्टमुक्तप्रतियोगित्व पक्षे साध्यत इति वाच्यम्, उक्तप्रतियोगित्वस्याविशिष्टतया तस्य विनाशिनिष्ठस्य मिथ्यात्वरूपत्व न तु ब्रह्मनिष्ठस्येत्यत्र बीजाभावेन पारिभाषिकमिथ्यात्वमात्रे पर्यवसानात् । अस्माक तत्रापि क्षतिविरहादित्यास्ता विस्तर । किञ्च सयोगेन रूपाद्यभावमादाय रूपादौ सिद्धसाधनम्, एव व्यधिकरणसबन्धेन ततदधिकरणसत्त्वव्यापकत्वादन्यत्रापि बोध्यम् ।

यत्तु स्वावच्छिन्नप्रकारकधीविशेष्यसत्त्वव्यापकात्यन्ताभावप्रतियोगिना-स्वरूपेणाप्यधिकरणधर्मवत्त्वमुक्तलक्षणार्थं, तथा च न सिद्धसाधनम्, सयोगेन रूप नास्तीति ज्ञाने सयोगरूपत्वोभयधर्मावच्छिन्नाभावस्य

विषयत्वाद व्यधिकरणस्य संयोगरूपत्वोभयस्य प्रतियोगितास्वरूपत्वेन यथोक्तप्रतियोगितात्वपर्याप्त्यधिकरणस्य संयोगरूपत्वोभयस्यैकाधिकरणाप्रसिद्ध । एव पटत्वेन पटाभावमादायापि न तत्, तत्रापि घटत्वपटत्वोभयावच्छिन्नप्रतियोगिताकाभावभानोपगमेन तादृशप्रतियोगितात्वपर्याप्त्यधिकरणस्य घटत्वपटत्वोभयस्यैवाधिकरणाप्रसिद्धेरिति, तदपि चिन्त्यम्, उक्तरीत्या बोधस्य निराकृतत्वात् ।

यत्तु, अस्या अभावव्यक्ते सद्वृत्तिभेदप्रतियोगितावच्छेदकत्वमनवच्छिन्न नास्ति तत्प्रतियोगित्वमेव मिथ्यात्वम्, एव च घटसयुक्तादौ समवायादिना घटादेरभावसत्वेऽपि न तदभावव्यक्तिमादाय सिद्धसाधनम्। पटसमवायिनि तद्व्यक्तरवृत्त्या तन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्य तदभावव्यक्तिनिष्ठस्य निरवच्छिन्तस्यैव सभवात्, केवलान्वय्यत्यन्ताभावव्यक्तिं विना साध्यापयवसानादिति, तदपि चिन्त्यम, कालिकातिरिक्तसबन्धेन विरुद्धधर्मद्वयावच्छिन्नप्रतियोगिताकप्रमेयमात्रे सत्वेन सिद्धसाधनात् । अभावीयविशेषणतासबन्धेन घटाद्यभावव्यक्तिकेवलान्वयिनीमादाय सिद्धसाधनाच्च । इद चात्र विचारणीयम्-मिथ्यात्वघटकात्यन्ताभावस्तात्त्विकोऽतात्त्विको वा ? नाद्य, अद्वैतभङ्गापत्ते । नान्त्य, अत्यन्ताभावनिषेधे प्रतियोगिसत्त्वापत्ते ।

यत्तु प्रपञ्चात्यन्ताभावत्वविशिष्टरूपेण निषेधस्य मिथ्यात्व केवलरूपेण च ब्रह्मापत्तस्यात्यन्ताभिन्नत्वमतो नाद्वैतहानि ,भावस्य स्वाश्रयब्रह्मरूपत्वात्। न चैवमभावस्य तात्त्विकत्वे प्रतियोगिनोऽपि तात्त्विकत्वापत्ति, निरूप्यनिरूपकयो समानसत्ताकत्वनियमादिति वाच्यम्, तात्त्विकस्वरूपकाभावप्रतियोगी तात्त्विक इति व्याप्त । तात्त्विकाभावप्रतियोगिनिरूपितनिरूप्ये तात्त्विकत्वाभावेन व्यभिचारात्। निरूपक निरूप्यतावच्छेदकविशिष्टसमान सत्ताकमेवेति व्याप्तेस्त्वस्माभिरभ्युपगमे क्षतिविरहात् । विशिष्टोक्तरूपेण प्रपञ्चतदत्यन्ताभावयोर्मिथ्यात्वादिति, तच्चिन्त्यम्, येन रूपेण यद्योनिरूप्यनिरूपकभावस्तद्रूपेणैव भिन्नसत्ताकत्वमपेक्षितम । अत्यन्ताभावस्यात्यन्ताभावत्वरूपेणैव प्रतियोगिनिरूप्यत्वात्तेनैव च प्रतियोगिविरोधित्वात् । केवलब्रह्मरूपेण भिन्नसत्ताकत्वस्वीकारस्य व्यर्थत्वादिति, तेनैव दूषितत्वात् ।

यत्तु व्यावहारिक एवायमत्यन्ताभाव , न चाभावस्य पारमार्थिकत्व एव प्रतियोगिन पारमार्थिकत्वाभाव , एवाधिकरणे भावाभावयो परस्पर-

[पार]मार्थिकत्वाभावात् । निषेधसत्तायां व्यावहारिकत्वे तस्य प्रतियोगिनिष्ठस्वा-धिकसत्तायामविघातकत्वात् । तथा च प्रतियोगिन प्रपञ्चस्य पारमार्थिकत्वा-पत्ति । अत एव स्वसमानाधिकरणस्वाधिकसत्ताकात्यन्ताभावप्रतियोगित्वमेव मिथ्यात्व न तु स्वाधिकसत्त्वनिर्मुक्तम् । स्वसमानाधिकरणप्रातिभासिका-त्यन्ताभावप्रतियोगित्वेन ज्ञानेऽपि शुक्त्यादौ मिथ्यात्वव्यवहारविरहादिति वाच्यम्, न हि प्रातिभासिकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमप्राति-भासिकत्वस्य व्यावहारिकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वम-व्यावहारिकत्वस्य वा व्याप्यम्, स्वप्ने आरोपितस्य रजतादे स्वप्न एवारोपित तदभावमादाय तस्य मिथ्यात्वव्यवहारदर्शनात् । किन्त्वप्रातिभासिकनिष्ठ स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमप्रातिभासिकत्वस्य पारमार्थिक-निष्ठ स्वसमानाधिकरणव्यावहारिकात्यन्ताभावप्रतियोगित्व पारमार्थिक-त्वस्य च व्याप्यम् । प्रकृते च स्वसमानाधिकरणव्यावहारिकात्यन्ताभाव-प्रतियोगित्वस्य ब्रह्मावृत्ते प्रपञ्चनिष्ठस्य पारमार्थिकत्वव्याप्यत्वाभावेन व्यावहारिकात्यन्ताभावप्रतियोगिनाऽपि प्रपञ्चस्य पारमार्थिक-त्वानापत्ते । अप्रातिभासिकत्वस्य चास्माभिरभ्युपगमात् । तथा च प्रातिभासिकनिष्ठ यत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्व यच्च ब्रह्मावृत्तिस्वसमानाधिकरणप्रातिभासिकान्यात्यन्ताभावप्रतियोगित्व तयोरन्य-तरत्व मिथ्यात्वमिति निष्कर्ष । पूर्णानन्दसवन्धिनो मन आदि-निष्ठात्यन्ताभावस्य प्रतियोगिनि ब्रह्मणि मिथ्यात्वा-भावाद् ब्रह्मावृत्तीति । न चव शुक्तिरूप्यादिप्रतियोगिताक-व्यावहारिकात्यन्ताभावस्य मिथ्यात्व न स्यात्तस्य स्वसमानाधिकरण प्रातिभासिकात्यन्ताभावस्यैव च प्रतियोगित्वादिति वाच्यम्, तदत्यन्ताभावस्य व्यावहारिकमत्यन्ताभावान्तर स्वीकृत्यैव तन्मिथ्यात्वसिद्धेरिति, तच्चिन्त्यम्, सत्ताभेदस्य मिथ्यात्वानुमानात् पूर्वमसिद्धे, तदङ्गीकारेण भावाभावयो-रधिकरण्यविरोधस्य परिहर्तुमशक्यत्वाच्च । तथा हि शुद्धचिदैक्यरूपा पारमार्थिकी सत्ता, मूलाविद्याप्रयुक्त यद्दृश्य तत्तादात्म्यापन्ना चिद्रूपा व्यावहारिकी । न चैवमनादिदृश्येष्वव्याप्ति, तेषा मूलाविद्याप्रयुक्तत्वा-भावादिति वाच्यम्, तदुच्छेदकज्ञानजन्योच्छेदप्रतियोगित्वस्यैव तत्प्रयुक्तत्वात् । अस्मिंश्चेदमनादिष्वपि दृश्येषु मूलाविद्याच्छेदकब्रह्मसाक्षात्कारेणोपशान्ते तेषामप्युच्छेदापगमात् । पल्लवज्ञानोच्छेदकज्ञानोच्छेद्य यद्दृश्य शुक्तिरूप्यादि तत्तादात्म्यापन्नचिद्रूपा प्रातिभासिकी, पल्लवाज्ञानानङ्गीकारे तु सर्वदृश्य-

मिथ्यात्वनिश्चयात्पूर्वं निश्चितमिथ्यात्वक यद् दृश्य तदात्मकचिद्रूपा-प्रातिभासिकीति परेषा सिद्धान्त । न चेद मिथ्यात्वसिद्धे पूर्वं प्रवर्तितु-महतीति स्पष्टम् ।

यत्तु सत्ताभेदस्यानुमिते पूर्वमसिद्धावपि मिथ्यात्वविप्रतिपत्त्या भावाभावविरोधस्यापि विप्रतिपत्तिविषयत्वात् सशयात्मकविरोधज्ञानस्या नुमिता च विरोधान्मिथ्यात्वानुमिता तु सत्ताया पश्चात्तन्नाप्रामाण्यशङ्कैव सत्ताभेदकल्पनया निरस्यन इति, तदसत्, मिथ्यात्वस्योक्तरीत्या सत्ताभेद-घटितत्वेन तज्ज्ञानस्यैव भावाभावविरोधनिश्चयादनुपपत्ते । अत एवोक्तसत्ता-भेदघटितमिथ्यात्वस्य विप्रतिपत्तिरपि दुर्लभा, अन्योन्याश्रयात्साध्यतावच्छेदक-रूपेणैव कोटिप्रसिद्धस्तत्रापेक्षितत्वात् ।

किञ्च स्वाधिकसत्ताकात्यन्ताभावस्य मिथ्यात्वघटकत्वपक्षे भावाभाव याश्चाविरोधे बाध्यबाधकभावो न स्यादित्याशङ्क्य भिन्नसत्ताकयोर-विरोधेऽपि समानसत्ताकयोर्विरोध एवैकस्मिन्नधिकरणे व्यावहारिकयो-र्घटतदत्यन्ताभावयोरभावनियमात् ।

न च शुक्तिरियं न रजतमिति ज्ञानविषयस्याभावस्य व्यावहारिकत्वेन प्रातीतिकरजते कल्पितस्य व्यावहारिकत्वस्योच्छेदेऽपि भिन्नसत्ताभावस्या-विरोधित्वेन तद्रजतस्य प्रातीतिकसत्त्वानपहारे चायोत्तरमपीद रजतमिति प्रतीति स्यात् । अत समानसत्ताकमन्तर्भाव्य प्रातिभासिकान्यात्यन्ता-भावस्यैव भावविरोधित्व स्वीकृत्य तत्र बाध्यबाधकभावो वाच्य । ततश्च स्वाधिकसत्ताकात्यन्ताभावस्यापि भावविरोधात् कथ तद्घटितमिथ्यात्व-मिति वाच्यम्, तत्राधिष्ठानभ्रमया प्रातीतिकरजतोपादानस्याज्ञानस्यैव निवृत्त्या प्रातीतिकसत्त्वापहारात् । उपादाने निवृत्ते कार्यसत्तानुपपत्ते । अत एवातिरिक्तो गुड इत्यादि परोक्षाधिष्ठानभ्रमया भ्रमोपादानाज्ञानस्या निवृत्त्यातिरिक्तत्वस्य प्रातीतिकत्वानपहारादुक्तभ्रमानिवृत्तिरत समानसत्ताक-भावेनैव विरोधान्नाधिकसत्ताकाभावघटितमिथ्यात्वानुपपत्तिरिति स्वोक्तिविरोध ।

यत्तु किमिद नामकत्व न तावत्प्रतिबन्धकत्वम्, एकभ्रमासत्त्वेऽविद्यादिरूप-दोषादिविरहादेवापरभ्रमानुदयात् । एकभ्रमसत्त्वे च तज्जनकदोषादिनवा-परभ्रमानुदयात् । वस्तुत प्रतिबन्धकतापक्षेऽपि प्रतियोगिसामानाधिकरण्य-ज्ञानाभावविशिष्टभावज्ञान न प्रतिबन्धक किन्त्वव्याप्यवृत्तित्वज्ञानाभाव-

विशिष्टमेव, तावतैव समुच्चयोत्तर समुच्चयोत्पत्तिसभवादिति । अथैकज्ञानस्या-परज्ञाने भ्रमत्वज्ञापकत्वरूप बाधकत्वम्, तत्रापि स्वान्यूनसत्ताकसम्भान-निष्ठाभावप्रतियोगित्वविशिष्टविषयकज्ञानत्वमेव भ्रमत्वम् ।

ननु स्वविरोधिस्वाभाववति स्वप्रकारकधीत्व शुक्तिरूप्यादिज्ञानस्य तदभावादव्याप्ते । अत एव समसत्ताकयोरविरुद्धयोरपि स्वाप्नभावाभावयो-र्व्याप्यव्यापकधीविषयत्व प्रागुक्तमिति तत्रापि न विरोधापेक्षा । यदि च तयोरेकज्ञानस्य परोपादानाज्ञाननिवर्तकत्व तत् तत्रापि न विरोधापेक्षा प्रत्युताविरोध एव, एकाश्रये परस्य कल्पितत्वात् । अत एव व्यावहारिक-रजनाभावज्ञानस्य रजतव्यावहारिकत्वापहारकत्वमुक्तम् । तद्विशेष्यता-सबन्धावच्छिन्नप्रतियोगिताकविश्वमिथ्यात्वनिश्चयपूर्ववर्तिमिथ्यात्वनिश्चया-भाववत्त्व तदपहारश्च विशेष्यतया यथोक्तनिश्चयवत्त्वमेव । ततश्चोक्तरजता-भावज्ञानेन रजतज्ञाननिष्ठ मिथ्याविषयकत्वरूप प्रमात्व ज्ञापितमेवेति, तदपि चिन्त्यम्, समुच्चयोत्तर समुच्चये व्यभिचारवारणाय विरोधविषयतया एव प्रतिबन्धकतावच्छेदककोटौ निवेशो न स्वव्याप्यवृत्तित्वज्ञानाभावस्या-व्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वपक्षेऽप्रामाण्यज्ञानाभावादिभिर्विशेषणविशेष्यभावे विनिगमकाभावेन प्रतिबध्यप्रतिबन्धकभावबाहुल्यप्रसगात् ।

न च वह्निमानित्यादिज्ञाने विरोधस्य विषयत्वाभावात्तस्य विरोधित्वानु-पपत्तिः, प्रत्युत सशयस्यैव विरोधित्वापत्तिरिति वाच्यम्, निर्णयेऽपि व्याप्य-भाववदवृत्तिसयोगादीनामेव ससर्गतया भानोपगमात् । सयोगादिघटितव्या-पकत्वावगाहिपरामर्शादिजन्यानुमित्यादावपि बाधाभावादेर्विरोधविषयत्व-नियामकत्वात् । विरोधावच्छिन्नसयोगादिससर्गकानुमितौ तत्सबन्धेन व्यापक-त्वावगाहिपरामर्षस्य च स्वाव्यवह्निनोत्तरानुमितावेव हेतुत्वात् । तदभावेऽपि बाधाभावाद्विरोधभानसभवात् । अन्याद्दशसबन्धभानस्य च तत्सबन्ध-घटितव्यापकत्वावगाहि परामर्षप्रतिबन्धकत्वे बाधाभावादे स्वीकृत्यैव वारणात् । समुच्चये च विरोधाविषयकज्ञानेऽव्याप्यवृत्तित्वज्ञानस्य हेतुत्वकल्पनात्, विरोधा-भानाभावादिति पक्षस्योपगमात् । भ्रमत्वज्ञापकत्वपक्षेऽपि विरोधोऽवश्यम-पेक्षणीय । बाधितविषयकत्व विना भ्रमत्वस्यानुपपत्तेः सर्वसम्मतत्वात् । बाधज्ञानस्य च विरोधज्ञान विनानुदयात् । शुक्तिरूप्यादिकमतिरिक्त लौकिक वेति स्वन्यदेतत् । एकज्ञानस्येत्यादिकन्तु नैयायिकादीन्प्रत्यसिद्ध-मेवेति कृतमिदानी तदुद्भावनेन । एव तयोरेकज्ञानस्य स्वविषयापेक्षया न्यूनसत्ताकविषयकत्वज्ञापकत्वमेवापरज्ञानस्य बाधकत्वमिति पक्षेऽपि तत्पर-

त्वादिप्राबल्यसापेक्षत्वमेव तस्य, न तु तद्विरोधापेक्षेत्यसावप्युक्तैव गतिरिति वोध्यम्। एतेन यदुक्त भिन्नसत्तेत्यादिना प्रतिवादिनो लालनमेव कृत न तु मत्सिद्धान्ते भावाभावयोर्विरोधो निष्प्रयोजनत्वादिति. तदपास्तम्, युक्त्यनुभवसिद्धार्थस्य शपथमात्रेणापह्नोतुमशक्यत्वादन्याप्यन्योन्याश्रयादि दोषाच्च। तथा हि मिथ्यात्वानुमानसिद्धौ सत्ताभेदसिद्धया स्वान्यूनसत्ताकेत्यादिरूपभ्रमत्वसिद्धौ विरोधज्ञानानावश्यकत्वम्, विरोधानावश्यकत्वे च बाधकाभावान्मिथ्यात्वानुमितिसिद्धिरिति। अहो असिद्धघटितमेऽसर्वं भवदीयम्। अतो न द्वैतवादिना किञ्चिदपि भेयम्। तथा च—

"तृणवाणास्तृणधन्वा तृणघटित कपटपुरुषोऽयम्।
कथमिह कुरङ्गशावक केदारे कलममञ्जरी त्यजसि॥"

इति न्यायोऽप्यत्र सुलभ इति।

यदप्युक्त कुत्रापि मन्मते प्रतिबन्धकत्व न स्वीक्रियते मण्यादिसमवहितवह्न्यादावप्यव्याप्यवृत्तिशक्तिस्वीकारादिति, तदप्यसत्, शक्तेरव्याप्यवृत्तित्वस्य धर्मिग्राहकमानाविषयत्वात्।

किञ्च अव्याप्यवृत्ति व दैशिक कालिक वा? नाद्य, मणिसहितपुरुषस्य यदवच्छेदेन वह्निसयोगेऽपि दाहो नोत्पद्यते तदवच्छेदेनैव वह्ने सयोगेन पुरुषान्तरस्य दाहदर्शनात्। नान्त्य, अनि यस्य तदयोगात् 'नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुता' इति न्यायात्। एतेन प्रतिबन्धकाभावस्यैव शक्तेर्नित्यत्वेऽप्यव्याप्यवृत्तित्वमभव इत्यपास्तम्।

किञ्चाकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्त्या प्रतिबन्धकत्वोपपत्त्यर्थमेव शक्ति स्वीकृत्य शक्तेरव्याप्यवृत्तित्वेन प्रतिबन्धकत्वनिरासे उपजीव्यविरोध। किञ्च प्रतिबन्धकत्व न कुत्रापीत्यपसिद्धान्त, उपासनयाविद्यानिवृत्तिरूप एव ब्रह्मण सस्कारोऽस्तु प्रतिबोधापनयने न नर्तक्या इव नरेण" इति वाचस्पत्यादावुक्ते। "अनृतेन हि प्रत्यूढा" "न त विदाथ य इमा जजनान्यद्युष्माकमन्तर बभूव" इत्यादौ ब्रह्मसाक्षात्कारप्रतिबन्धकत्वेनाविद्याप्रतिपादनात इति भवद्भिरुपगमाच्च। घटो घटान्य इत्यनाहार्यप्रत्यक्षवारणाय घटत्वावच्छिन्नप्रतियोगिताकभेदनिष्ठविशेष्यताकप्रकारतानिरूपितविशेष्यतावच्छेदकतासबन्धेन प्रत्यक्ष प्रति तदिच्छाविरहविशिष्टज्ञानत्वेन घटत्वनिष्ठेनानवच्छिन्नविषयतासबन्धेन प्रतिबन्धकत्व तार्किकै स्वीक्रियते। एव पूर्णानन्दरूपतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदविशिष्टनिष्ठप्रकारता-

निरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन प्रत्यक्षे तदिच्छाविरहविशिष्टज्ञानत्वेन पूर्णनिन्दनिष्ठेनानवच्छिन्नविषयतासम्बन्धेन विरोधित्वमिति स्वयमेव स्वोक्तत्वाच्च । पूर्णानिन्देत्यादेर्नैयायिकैरनभ्युपगमात् । न च व्यवहारदशायामेतदुक्तमिति वाच्यम् शब्दादेरपि नाट्यदशायामेवान्तर्भावात्, इति दिक् ।

यत्तु मिथ्यादृष्टिपेय प्रपञ्चस्यत्यन्ताभावमाशङ्क्योक्तम् "यत्र निषेधस्य निषेधबुद्धया प्रतियोगिसत्त्वमेव व्याप्यते नत्वेव निषेधनिषेधे प्रतियोगिसत्त्वसामानि यथा नद्द रजतमिति भ्रमानन्तरमिद न रजतमिति ज्ञानेन रजतत्वस्य व्यवस्थापनात् । अत्र तु प्रतियोगिनि निषेधयारभ्यारि निषेधस्तन न प्रतियोगिसत्त्वम् यथा ध्वसनमये प्रागभावाप्रतियोगिनोऽभावनिषेधे प्रकृते च निषेधबोधकेन नेह नानत्यादि श्रुत्यादिरूपप्रमाणेन प्रतियोगिन प्रपञ्चस्य तन्निषेधस्य चाभावबाधनान्न प्रपञ्चस्य सत्त्वापत्ति । निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तदुभयसाधारणत्वात्"इति । यच्च व्याख्यात "यद्यप्यत्यन्ताभावात्मकनिषेधस्य निषेधे प्रतियोगिसत्त्वापत्तौ कृतायां प्रागभावात्मकनिषेधनिषेधे प्रतियोग्यसत्त्वदृष्टान्तेन तत्खण्डनमसबद्ध तथापि प्राचीनतार्किकादिमते ध्वसप्रागभावाधिकरणेऽत्यन्ताभावानभ्युपगमात् । ध्वसादिकाले इद पटाल घटवन्न वेति घटतदत्यन्ताभावोभयकोटिकसशयरूपारोपोत्तरमत्र घटतदत्यन्ताभावौ न स्त इति निषेधे यथा घटस्य सत्त्व नायानीति तदयं "इति, तदुभयमपि चिन्त्यम्, तत्रारोपितात्यन्ताभावस्य प्रातिभासिक इत्यस्यापि तार्किक प्रत्यभिज्ञत्वात्, नव्यमत ध्वसाद्यधिकरणेऽपि तदत्यन्ताभावोपगमाच्च । व्यावहारिकस्यात्यन्ताभावस्य निषेधे प्रतियोगिसत्त्वमित्युक्तौ तद्दोष्यापि समाधानासभवाच्च । निषेध्यतावच्छेदक दृश्यत्वादिक प्रपञ्चतदत्यन्ताभावसाधारणमिति तु आकाशपुष्पभक्षणाशाप्रतीकाश श्रुतेस्तात्पर्यैकत्वस्य प्रबन्धेन प्रागेव जराकृतत्वात् । एतेन, आदिपदात् प्रकृतानुमानोपयुक्तावच्छेदकस्यापि ग्रहणम् । न चास्य निषेधप्रतियोगितावच्छेदकत्वेनाभावात् कथ निषेध्यतावच्छेदकसाम्यनिषेध इति विशेष्यतावच्छेदकत्वस्यापि तदर्थत्वात् । वस्तुतो निषेध्यतावच्छेदकपद यथाश्रुतमेव । न चोक्तानुपपत्ति सामान्यानुमानेऽपि स्वावच्छिन्नवनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वमर्थवत्त्वादे साध्यत्वादित्यादिकमप्यपास्तम् । दृश्यत्वस्यैव निषेधप्रतियोगितावच्छेदकत्वनिरासे आदिपदसग्राह्यगवेषणस्य दूरपराहतत्वादिति । एतेन श्रुतेरतात्त्विकावेदकत्वेनाप्रामाण्यमाशङ्क्य, अतात्त्विकमेवानात्त्विकत्वेन बोधयन्त्याः श्रुतेर्नाप्रामाण्यप्रसङ्ग । "स्वर्गकामो-

यजेत" इत्यादिश्रुतिवदस्या अपि श्रुतेर्व्यवहारिकमेव प्रामाण्यम्। तत्त्ववेदकत्वरूपप्रामाण्य तु 'तत्त्वमसि" इत्यादिश्रुतेरेवेत्यपि निरस्तम्। प्रपञ्चस्यातात्त्विकताया मानान्तरसिद्धत्वेनातात्त्विकत्वविशेष्यकातात्त्विकत्वप्रकारकज्ञानजनकत्वस्य श्रुतेरवधारयितुमशक्यत्वात्। तत एव तदवधारणस्य पूर्वं निरासात्। अपि च मिथ्यात्वानुमिते प्राक् "तत्त्वमसि" इत्यादिवेदसमकक्षे दृष्टान्तो नहि कल्पः, कल्याणे साध्यवैकल्यात्, इत्यलं पल्लवेन।

इदमप्यत्रापर विभावनीयम्, किं पारमार्थिकत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्व साध्यते, उत सकलाभावप्रतियोगिसाधारणेन दृश्यत्वादिनावच्छिन्नप्रतियोगिताको योऽभावस्तत्प्रतियोगित्वम्, किं वा तादृशविशेषधर्मेणाकाशत्वघटत्वादिनावच्छिन्नप्रतियोगिताको योऽभावस्तत्प्रतियोगितात्वम्? नाद्य, तेरेव दूषितत्वात्। तथा ह्यबाधकत्व पारमर्थिकत्व बाध्यत्वञ्च मिथ्यात्वमेवेति मिथ्यात्वस्य भेदप्रतियोगित्वेन पूर्वोक्तात्यन्ताभावप्रतियोगितावच्छेदककोटिनिविष्टतया व्यक्तमितरेतराश्रयत्वम्। अथ पारमार्थिकत्व नाम नैकमुभयवादिसिद्ध किन्त्वबाध्य सत्व मेयमित्याकारकमबाध्यत्वव्यापकविषयताक ज्ञानमेव, तस्य च तद्व्यक्तित्वेन प्रतियोगितायामवच्छेदकत्वम्, न तु तादृशधीत्वेन तस्य गुरुतराभावीयप्रतियोगितानवच्छेदकत्वात्। एवञ्च मिथ्यात्वविरोधित्वज्ञान विनापि यथोक्तपारमार्थिकत्वस्य तद्व्यक्तित्वेनावच्छेदकत्व सुग्रहमेवेति कुतान्योन्याश्रय इति चेत्, मैवम्, तद्धीव्यक्तौ प्रपञ्चविषयकत्वशङ्काया सत्या तद्विषयस्तद्व्यक्तित्वेन विशेष्यतासबन्धेन प्रपञ्चनिष्ठायामभावप्रतियोगितायामवच्छेदकत्वस्य दुग्रहत्वात् घटत्वादिस्वरूपवत्। उक्तधिय प्रपञ्चाविषयत्वरूपविरोधनिर्णयस्यावश्यमपेक्षिततया तदर्थं पूर्वं प्रपञ्चमिथ्यात्वनिश्चयस्यापेक्षितत्वेनान्योन्याश्रयस्य दुर्वारत्वात्। तद्व्यतिरेकेण तद्धियः प्रपञ्चाविषयत्वशङ्काया दुर्लभत्वात्। तद्धीविषयत्वस्याबाध्यत्वव्यापकत्वात्, स्यादेतत्; यथा घटत्वादिस्वरूपाणामवच्छेदकत्वपक्षे स्वावच्छेदकावच्छिन्नवन्निष्ठात्यन्ताभावप्रतियोगित्वमित्याद्युच्यते तथा पारमार्थिकत्वीयावच्छेदकत्वपक्षेऽपि स्वसमनियतधर्मावच्छिन्नवन्निष्ठात्यन्ताभावेत्यादिक सुवचम्। स्वपद प्रतियोगितापरम्। स्वव्यापकधर्मावच्छिन्नवदित्यादिमात्रोक्तौ प्रतियोगित्वव्यापकप्रमेयत्वाद्यवच्छिन्नपटादिमन्निष्ठात्यन्ताभावप्रतियोगित्वम्। स्वव्याप्यधर्मावच्छिन्नवदित्यादिमात्रोक्तौ च घटाभावीयप्रतियोगिनोव्याप्यतद्घटत्वा-

वच्छिन्नवनिष्ठस्यैतद्घटत्वावच्छिन्नप्रतियोगिताकघटाभावस्य प्रतियोगित्व घटादौ सिद्धसाधनग्रस्त स्यात्, अत एवमनियतेत्युक्तम्। ततश्च प्रमेयत्वादेः घटाद्यभावप्रतियोगिताव्याप्यत्वाभावादेव दृष्टत्वस्य च घटाभावप्रतियोगिताव्यापकत्वाभावाद्वारणम्। एव च पारमार्थिकत्वनिष्ठमवच्छेदकत्वं लक्षणेन प्रवेश्यते, प्रयोजनाभावादिति चत्, सत्यम्, पटत्वेन घटाभावप्रतियोगितायां घटपटोभयत्वाद्यवच्छिन्नप्रतियोगितायाश्च स्वसमनियत यदन्यतरत्व तदवच्छिन्नघटपटादिनिष्ठाभावीयायाः घटादौ सत्त्वासिद्धसाधनात्, लाघवाच्च स्वाश्रयसमानाधिकरणाभावीया पारमार्थिकत्वावच्छिन्ना प्रतियोगिता निवेश्यत्यन्याश्रयसत्त्वात्। तच्च विषयतासबन्धेनावच्छेदक वाच्यम्, अन्यथा कालिकसबन्धेन पारमार्थिकत्वावच्छिन्नप्रतियोगिताकघटाद्यभावमादाय घटत्वादौ सिद्धसाधनात्। न चाधिकरणान्तर्भावयर्थ्यम्, स्वानधिकरणे विषयतासबन्धावच्छिन्नपारमार्थिकत्वनिष्ठप्रतियोगितावच्छेदकताकाभावस्य तद्घटादौ सिद्धत्वात्। न च सामान्यावच्छिन्नप्रतियोगितात्वस्य विशेषाभावेऽनभ्युपगमान्न तदिति वाच्यम्, तथापि तमादायार्थान्तरापत्तेः।

किञ्च तादृशधियोऽपि पक्षकोटिनिविष्टतया तस्या अभावः केन रूपेण वाच्यः, घटाद्यभावे घटत्वादेरिवोक्तधियोऽप्यभावे स्वरूपस्य प्रतियोगितावच्छेदकत्वानुपपत्तेः। एकस्या अभावे अन्या तद्धी- प्रतियोगितावच्छेदिका, तस्या अप्यभावेऽन्येत्यादिरीत्या चानवस्थापत्तेः, स्यादेतत्; एकस्यैव धिया स्वमिन्नदृश्यमात्रस्य स्वस्य चाभावो निवेश्य इति नानवस्थेति चेन्न; ज्ञानमात्रस्य स्वविषयकत्ववादिमते वाच्य मच मेयमिति ज्ञानस्य विषयतासबन्धेन स्वविशिष्टत्वात्। तादृशज्ञानीयतद्व्यक्तित्वावच्छिन्नविशेष्यतासबन्धावच्छिन्नप्रतियोगिताकाभावसिद्धौ तज्ज्ञानस्य तज्ज्ञानविषयत्व नास्तीत्यनेनार्थान्तरापत्ते, मिथ्यात्वपर्यवसानस्य दुर्लभत्वात्। मयैवया तद्धीव्यक्त्या स्वभिन्नदृश्यमात्राभावस्य तदविषयिकया चान्यया तादृशधिया पूर्वधीव्यक्त्यभावस्य प्रतियोगित्वमवच्छिद्यतामिति चेत्, न; प्रतियोगितावच्छेदकद्वयनिवेशे पक्षतावच्छेदकावच्छेदेनैकत्वमविच्छिन्नमावरूपसाध्यस्यापनिवृत्तापत्तेः। न त्वबाध्यत्वव्यापकविषयतानिरूपितवृत्तिधर्मनिष्ठानवच्छिन्ना च प्रतियोगितावच्छेदकता यस्य तादृशाभावो वाच्य इति चेत्, न; प्रपञ्चनिष्ठाया प्रतियोगितायाः विषयतासबन्धेन घटत्वादीनामे-

वावच्छेदकत्वसभवात्तद्धीव्यक्तीना गुरुत्वेन तत्रानवच्छेदकत्वाद्बाध्यत्वस्य परमतेऽप्रसिद्धत्वाच्चोक्ताभावस्याप्रसिद्धया साधयितुमशक्यत्वात् ।

वस्तुतस्तु, अबाध्य मर्वं मेयमितिधीर्न लौकिकानुभवसिद्धा येन तम इत्यादिधीवत् किंविषयेति विचार सहेत, किन्तु शाखीयानुभवमूलेव । तत्र च सत्यत्वमेव प्रकार इति न्यायिकमते निर्णीतमेव । अतस्तदवच्छिन-प्रतियोगिताकाभावप्रतियोगित्वानुमितिस्तेषा नोदेत्येव, पूर्वोक्तरीत्या बाधनिर्णयस्य प्रतिबन्धकत्वात् । यत्तु, न च प्रपञ्चस्य मिथ्यात्वसशयकाले प्रकृतानुमानस्यावतारस्तथा च तत्काले तादृशधिय प्रपञ्चविशेष्यकत्वस्य सदिग्धतया प्रपञ्चवति ब्रह्मणि तादृशधीरूपेण प्रपञ्चस्याभावो ज्ञातुमशक्य इति वाच्यम्, उक्तधीरूपेण प्रपञ्चवत्त्व यत्र निर्णीत तत्रैव तद्रूपेण प्रपञ्च-भावस्य ज्ञातुमशक्यत्वात्, प्रपञ्चे तादृशधीविशेष्यत्वसशयप्रयुक्ते ब्रह्मवि-शेष्यके तादृशधीरूपेण प्रपञ्चसशये सत्यपि तद्रूपेण तस्य तत्ताभावज्ञाने बाधकाभावात्, ग्राह्यसशयस्य कदाचित्प्रत्यक्ष एव प्रतिबन्धकत्वादनुमि-तावविरोधित्वात् । अत्युत 'सदिग्धे न्याय प्रवर्तते" इति तदनुगुणत्वादिति, तच्चिन्त्यम्, मिथ्यात्वसशयसत्त्वेऽपि यादृशस्य बाधनिर्णयो नास्ति तस्यैव साधयितु शक्यत्वात् । तदुक्तधीविशेष्यत्वेन निर्णीति प्रपञ्चविशे-ष्यतासबन्धेन तद्धीव्यक्तित्वावच्छिन्नाभावस्य दुर्ग्रहत्वात् । बाधनिर्णय-स्यानुमितिविरोधितायाः सर्वसिद्धत्वात् । एतेन घटत्वाद्यपेक्षया तादृश-धीत्वस्य गुरुत्वेऽपि न क्षति, तदुपलक्षितज्ञाननिष्ठावच्छेदकत्वस्यैव लक्षणे निवेशात् । यद्वा गुरुधर्मोऽपि प्रतियोगितावच्छेदक एवेत्यादि-कुचोद्योद्भावनेनापि न परेषा निर्वाह., उक्तविधया प्रतिवादिन्यनुमि-त्यनुदयेन न्यायप्रयोगवैयर्थ्यात् ।

यदपि ज्ञाननिवर्त्यत्वरूपेण स्वस्वेतरसर्वदृश्याना निषेधप्रतियोगित्व सभवति तस्याभावीयविशेषणतासबन्धेन स्वस्मिन्नसत्त्वादिति लाघ-वात्तदेव निवेश्यत इति नानवस्थेति, तदपि चिन्त्यम्, ज्ञानेच्छादीना ज्ञाननिवर्त्यत्वस्य न्यायमतेऽपि सिद्धतया तत्प्रतियोगितायास्तदभावेना-वच्छेत्तुमशक्यत्वात् ।

न चावच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्यमानेणासिद्धेरवि-रोधित्वान्न दोष इति वाच्यम, तथापि नैयायिकेनाभावस्यापि विशेष-णताविशेषसबन्धनाभाववृत्तित्वाभ्युपगमात्, तन्निष्ठप्रतियोगितायाः स्वस्य व्यधिकरणधर्मत्वाभावेनैकरूपेणावच्छेदकत्वानिर्वाहात् । प्रथममिथ्यात्व-

लक्षणे ज्ञानानिवर्त्यत्वरूपसत्त्वाभावत्वेन निवेशेऽसत्त्वाभावदृष्टतदन्याश्रयवैयर्थ्यमाशङ्क्य न तद्रूपेण निवेश, ज्ञानोच्छेद्यत्वरूपज्ञाननिवर्त्यत्वस्य वक्ष्यमाणस्य सर्ववादिसमतस्यैकस्याभावेन तदभावस्यैक्यत्वाभावात् इत्यादिस्तैरेवोक्तत्वेन प्रकृतेऽपि तदेकरूप्यस्य दुर्वचनैकत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वस्य पक्षतावच्छेदकावच्छेदेन न्याय्यत्वात्। अपि च ज्ञानानिवर्त्यत्वं किं यथाश्रुत ज्ञानजन्यनिवृत्तिप्रतियोगित्वाभावरूप प्रकृतेऽवच्छेदकमुत भवद्विवक्षित वक्ष्यमाणम्? नाद्य घटादौ [त्व]त्याभ्युपगतस्य सत्त्वाविरोधित्वात्। नान्त्य सम्य मिथ्यात्वरूपत्वेन ज्ञाननिवर्त्यत्वरूपसद्भेदीयप्रतियोगितायामिव प्रकृताद्यन्ताभावप्रतियोगितायामपि तदभावस्यावच्छेदकानुपपत्तेश्च। व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकतायामेव गौरव न वायन्मिथ्यत्व दुर्वचनत्वात्तन्त्रभवदीयरीत्या ब्रह्ममात्रविषयकत्वद्वीविषयत्वस्यैव लाघवेनोक्तात्यन्ताभावप्रतियोगितायामवच्छेदकत्वस्य प्रयुक्तत्वाच्च न्योन्याश्रयस्य दुर्वारत्वादित्यास्ताविस्तर। नापि द्वितीय, दृश्यत्वस्य हेतुनिरासे दूषयित्वमारात्वात्। नापि तृतीय, अधिष्ठानसाक्षात्कारानन्तर नेद रजतमिति प्रत्ययस्य स्वप्नेऽपि व्यावहारिकरजनात्यन्ताभावावगाहितया शुक्तिरूप्यस्य स्वरूपावच्छिन्नाभावप्रतियोगित्वे प्रमाणाभावेन दृष्टान्तस्य साध्यहीनत्वात्। अत एव नेह नानेति श्रुत्या प्रपञ्चस्य स्वरूपेणैव निषेध इत्यप्यनाशङ्क्यम, स्वरूपेण तदभावबोधनपर्यन्त श्रुतेरसाक्षित्वादन्यथैव तदर्थस्य व्यवस्थापितत्वाच्च।

ननु नैकालिकनिषेध प्रति स्वरूपेणापणस्य रूप्य पारमार्थिकत्वाकारेण प्रातिभासिक वा प्रतियोगित्व गन्धर्व नगराश्व एवार्थ, अबाधयोर्भिन्नविषयकत्वापत्ते। पक्षे व्यावहारिकरूप्यस्य तादात्म्येन ज्ञानत्वस्यापि प्रसक्तेरभावेन तन्निषेधस्याप्रसक्तप्रतियोगिकत्वापत्तेश्चानुभवविरोधात्। किन्तु व्यावहारिकरजनतादात्म्येन प्रतीतप्रातिभासिकरजतनिषेधस्तन्निषेधो नेत्येव तदर्थः। इदञ्चापुरोवर्तिदात्म्येनैव रजतप्रतीतिरितिमतनिरासार्थम्। न च व्यावहारिकप्रातिभासिकरजनयोस्तादात्म्यभावेन मायाभाव, तद्व्यतिरेकेण व्यावहारिकरूप्यादिन प्रातिभासिकरूप्ये प्रवृत्त्यनुपपत्ते। न च व्यावहारिकनिष्ठत्वोपलक्षितरजनत्वस्य प्रातिभासिकेऽपि सत्त्वात्तदुपपत्ति, व्यावहारिकनिष्ठ्य रजनत्वादे प्रातिभासि-

केऽनभ्युपगमात्। अन्यथा प्रातिभासिकादपि व्यावहारिकरजतादिकार्यापत्त ।
प्रातीतिकस्यव रजतत्वादेस्तन सबन्धस्वीकारात्।

यदि तु व्यावहारिकत्वविशिष्टस्यैव कारणस्य कार्यप्रयोजकत्वदर्शनेन तदन्तर्भावेनैव कारणकूटस्य फलव्याप्यत्व स्वीकृत्य व्यावहारिकनिषु-रजतत्वादे प्रातिभासिकसबन्धेऽपि प्रातिभासिकव्यावहारिककार्यापत्तिनिषेद्धु शक्यया। प्रातिभासिक तु न कुत्रापि कारण किन्तु तज्ज्ञानमेव चिद्रूपम्। अत एवोभयविषयकज्ञानाभ्यामेकजातीयप्रवृत्त्यादिकार्योत्पत्तिरेक रूपावच्छिन्नहेतुत्वादिति नव्यमतमालम्ब्यते, तदापि का[दा]चित्कत्वमेव व्यावहारिकप्रातिभासिकरजततादात्म्यारोपतन्निषेधौ प्राचीनोक्तावुपपादनीयाविति चेत्, अत्राहु, प्रातीतिकव्यावहारिकरजतयोस्तादात्म्यधीन युक्ता तयोरेकस्यापराज्ञानाकार्यत्वात्, प्रातीतिकस्य स्वोपादानाज्ञानाश्रयतावच्छेदकेन सममेव तादात्म्यानुभवाच्च। न हि प्रातीतिकरजतोपादानस्य शक्त्यवच्छिन्नविद्विषयकस्याज्ञानस्य व्यावहारिकरजताश्रयतावच्छेदक किन्तु शक्तिरेव तत्साक्षात्कारादेव प्रातिभासिकरजतनिवृत्तिदर्शनात्। शुक्ल पट इत्यादौ तु द्वयोरेकाज्ञानकार्यत्वादेकचिद्रूपसत्तायामेव तदुभयाध्यासाच्च तादात्म्यारोप। न चैव घटपटयोरपि तदात्म्यबुद्ध्यापत्ति, बुद्धौ सत्या तस्य निमित्तत्वकल्पनात्। आरोपे सति निमित्तानुसरण न तु निमित्तमस्तीत्यारोप इति न्यायाद्व्यावहारिकरजतभासकसन्निकर्षादिविरहाच्च। तस्माद् व्यावहारिकरजतमेव स्वरूपेण शुक्तौ निषिध्यत इत्येव वेदान्तिबुद्धवास्याभिप्राय इति प्रातिभासिकरूपस्य स्वरूपेण निषेधस्वीकारेऽपसिद्धान्तो दुर्वार इति।

यत्तु यद्यदज्ञानाकार्यं तत्तत्तादात्म्यवन्नेति न नियम, रजताज्ञानाकार्ये इदमर्थे रजततादात्म्यस्वीकारात्। ययोरेकमपि नापराज्ञानकार्यं तयोन तादात्म्यमित्यपि न, इद त्वद्रव्यत्वादीना रजतस्य च मिथोऽज्ञानाकार्यत्वेऽपि तादात्म्यारोपात्। जवाकुसुमलौहित्यस्य स्फटिकस्य च मिथो ज्ञानाकार्यत्वेऽपि तादात्म्याध्यासात्। पूर्वसिद्धधर्मिसबन्धिनो धर्मस्य समृष्टतयैवाध्यासात्। लौहित्यस्येन्द्रियसन्निकृष्टत्वेन प्रत्यक्षतासभवात्तदानी तदुत्पत्ति स्वीकारे प्रयोजनाभावात्। दूरस्थवृक्षयोराच्छादितमिथ सयुक्तप्रान्तयोर्वंशखण्डयोश्च परस्पराज्ञानकार्ययोरपि तादात्म्याध्यासाच्च। तत्र भावरूपतादात्म्य नाध्यस्यते, किन्तु भेदाभाव इत्यस्य प्रकृतेऽपि तुल्यत्वात्, स्वप्नादौ भेदाभावत्वेन ज्ञानमानयोरपि तादात्म्यानुभवाच्च। न च तत्रैका-

प्रातीतिकार्यत्वात्तादात्म्यमिति वाच्यम् ; भेदधीकालेऽपि तदापत्तेः । तज्जातीय-तादात्म्यसंस्कारात्तज्जातीययोस्तादात्म्यमित्यभ्यापि तुल्यत्वादिद व्यावहारिकरजतमिति संस्कारस्य प्रयोजकत्वात् । अत एव प्रातीतिकस्येत्याद्ययुक्त प्रातीतिकयोरपि पश्चाद्वर्त्यत्वादिना तादात्म्यानुभवात्,प्रातीतिके सन्निहित-व्यावहारिकरजनादेरपि दोषात्तादात्म्यानुभवाच्च । बुद्धौ सत्यामित्याद्य-प्युक्तम्, यद्धर्मावच्छिन्नयोस्तादात्म्यधीरनुभवसिद्धा तद्रूपावच्छिन्नयोस्ता-दात्म्ये संस्कारदोषविशेषादिक नियामकतया कल्प्यमिति प्रकृत तदय । व्यावहारिकप्रातीतिकयोरपि रजतयोस्तादात्म्यानुभवसिद्धतया संस्कारदोष-विशेषादेरपि तत्तादात्म्योपपत्तौ विकल्पेन नियामकत्व न तु तदवच्छिन्न-त्वप्रकारकज्ञानकार्यत्वमात्रस्येति स्फुट एव तेष्ववान्तरयार्थबाध इति, तदेव वक्तव्यम् ; प्रथमव्यभिचारोपयुक्तवन्मते इदमादेरपि रजताज्ञानकार्यत्वात् । उक्त हि संक्षेपशारीरके—

"अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत्कथचन परिस्फुरति भ्रमेषु" इति । तथा च तेरेवोक्तम् "विशेषणसंसर्गयोरिव प्रतियोगित्वोपहितविशेष्य-स्यापि भ्रमकालोत्पत्त्या बाधकालोच्छेदेन चाध्यस्तत्वात् । न च भ्रम-पूर्वमेवेदमादेः सिद्धत्वेनोत्पत्त्यसंभव इति वाच्यम्, उक्तोपहितस्येदमादेः पूर्वसिद्धेदमादितो भिन्नत्वात्" इत्यादि । उक्तोपहितान्यस्येदमादेर्भ्रमे भाने मानाभावात् । उपहितवृत्ते शुद्धवृत्तित्वनियमेऽपि शुद्धस्य सृत्याभावा-न्नभ्युपगमाद्व बुद्धौ सत्यामित्याद्यपि युक्तमेव । प्रातीतिकव्यावहारिक-रजतयोस्तादात्म्यानुभवस्य विवादग्रस्तत्वेन तयोर्बलाभावात् । अन्यथा-मवद्युक्तनव्यमतस्यानुत्थानापत्ते । तथा च "देहादिसंघातत्वेनात्मनो न प्रत्यक्ष वादिविप्रतिपत्तिदर्शनात्" इति अद्वैतसिद्धावेवोक्तम् । अत एव कादाचित्कारोपनिषेधाम्या प्राचीनोक्तिमर्यनमप्युपास्तम् । तुल्याकार-भ्रमे एकस्थले तद्विषयनाविरहेऽपि तत्कार्यद्युपपत्तिस्वीकारे स्थला-न्तरेऽपि तत्सत्त्वे मानस्य दुर्वचत्वादित्यादिकमनुसंधेयमिति दिक् ।

ननु प्रतियोगिविशिष्टावच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगित्वासिद्धावे-त्यसत्त्वेनार्थान्तरम् । न चान्योन्याधिनिष्ठात्यन्ताभावप्रतियोगित्वासिद्धेर्न-तदिति वाच्यम्, सर्वस्यापि प्रतियोगेमिथ्यात्वे निवेशस्यत्वादन्यथा किंचित्प्रतियोगिमात्रनिष्ठानवच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगित्वमादाया-न्योन्याश्रयात् । तथा चोक्तमुपनिषद्ब्रह्मयोगे "नहि तेषामन्यत्र सत्ता समवेतानि [भवन्ति] । तथा चान्वयासत्वनिश्चयसहकृतेनोक्तानुमानेन

सर्वदेशवृत्तेरवच्छिन्नवृत्तिकान्यस्यात्यन्ताभावस्य प्रतियोगित्वरूप शशशृङ्गादिसाधारणमत्यन्तासत्त्व दुर्वारम् । न च शब्दवृत्त्यविषयत्वरूप निरुपाख्यत्वमेवात्यन्तासत्त्व न तूक्तप्रतियोगित्वरूपमिति वाच्यम्, निरुपाख्यत्वपदेनैव वृत्तिसबन्धेन तस्य सबध्यमानत्वात् । नचासनिरुपाख्यादिपदानामनुभावकत्वकल्पाया अलीकविषयिण्या शक्तेरयोगात्कथ तदिति वाच्यम्, तेषामननुभवरूपमलीकविषयक विकल्प प्रतियोगेन लक्षणया सकेतविशेषण वानुपस्थापकत्वोपगमात् । 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति पातञ्जलसूत्रे सद्वस्तुविषयकस्य विकल्पस्य शब्दज्ञानजन्यत्वोक्ते । अत एव 'वृत्तय पचतय्य प्रमाणविपर्ययविकल्पनिद्रास्मृतय" इति पातञ्जलसूत्र एव सद्रूपाधिष्ठानविषयकभ्रमरूपाद्विपर्ययात्पृथगेव विकल्पाख्या वृत्तिरुक्ता । निद्रा सौषुप्तो वृत्ति । न चालीकस्य निर्धर्मिकत्वात्तत्पदाना योगादिवृत्त्यसभव इति वाच्यम्, अभावरूपस्य विकल्पविषयत्वरूपस्य च धर्मस्य तत्र स्वीकारेण योगेन वाचकशब्दरूपोपाध्यविरहस्यालीके प्रसिद्धस्योपस्थित्योक्तविरहाश्रयालीकोपस्थितिसभवेन लक्षणासभवात्' अनेन पदेनालीक बोध्यमिति वृत्तिसभवाच्चेति, अलीकस्य पदवृत्त्यविषयत्व नास्तीति पूर्वोक्तिप्रतियोगित्वमेवात्यन्तासत्त्वमिति स्थितम् । प्राप्यप्रतीयमानत्वमेवासत्त्वम्, असत प्रतीत्यनङ्गीकारेऽसद्वैलक्षण्यज्ञानस्यासत्प्रतीतिनिरासस्यासत्पदप्रयोगस्य चानापत्ते । असच्चेन प्रतीयेतेत्यनेनानिर्वाच्यख्यातिवादे वक्ष्यमाणस्यासत्त्वप्रतीयमानत्वयोरापाद्यापादकभावस्य भेदनिबन्धनस्यासगतिप्रसगाच्च । नापि प्रमाणजन्यप्रत्यक्षाविषयत्व नित्यातीन्द्रियेष्वतिव्याप्तिरिति चेत्, अत्राहु , प्रतिपन्नपदस्य स्वतादात्म्यधीविशेष्यार्थकतयोपाधिपदार्थे सद्वस्तुनि प्रपञ्चरूपस्वतादात्म्यधीविशेष्यत्वे शब्दाद् भासमाने प्रपञ्चे सत्तादात्म्येन प्रतीयमानत्वस्यार्थतो लाभान्नात्यन्तासत्त्वेनार्थान्तरम्, तस्य क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वात् ।

न च माध्यमिकेन क्षणिकत्वभावनानिवर्त्यस्य स्थिरत्वादेरिव शून्यत्वभावनानिवर्त्यस्याबाध्यत्वस्यापि व्यावहारिकस्य स्वीकारादबाध्यत्वोपहितप्रपञ्चे प्रपञ्चतादात्म्यधीविशेष्यत्वस्वीकारात्, तथाप्यर्थान्तर दुर्वारमिति वाच्यम्, अवश्यकल्पेनार्थक्रियाकारित्वनैवालीकव्यावृत्तेन सन् घट इत्यादि प्रत्ययोपपत्त्या माध्यमिकमतानुयायिभिरबाध्यत्वोपहितस्य कस्यचिद्वस्तुनोऽनङ्गीकारेण बाध्यत्वोपहितविशेष्यकभ्रमानभ्युपगमात् । क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वस्य शुक्तिरूप्ये प्रपञ्च वानङ्गीकारात् । शून्यत्वभावनायाश्च

वैराग्यहेतुत्वेनात्मज्ञानरूपमोक्षसंपादकत्वेन च तन्मते स्वीकारात् । न च वक्ष्यमाणविशेषानुमानेषु प्रतियन्नोपाधिविशेषणानुपादानात्तनार्थान्तरमिति वाच्यम्, अवाच्योपस्थितास्वीकारेणेत्यनेन सामान्यानुमानेऽव्याप्यत्वोपहित-विशेष्यकभ्रमानङ्गीकारेणेत्यनेन च विशेषानुमानेऽर्थान्तरवारणोपायस्योक्त-त्वादिति, तच्चिन्त्यम्, सवृत्तिसत्त्वस्य तैरप्यङ्गीकारेणार्थान्तरस्य दुर्वार-त्वात् । उक्तञ्च—

"द्वे सत्ये समुपाश्रित्य बुद्धाना धर्मदेशना ।
लोकसंवृतिसत्त्वञ्च सत्यञ्च परमार्थतः ॥" इति ।

खण्डनटीकायां तथा चोक्तम् "तदेतत् संवृत सत्त्वमिति गीयते" इति वाक्यस्यापातनिकायाम् "संवृत सत्त्वमसद्वादिभिर्व्यवहारो पपादकमिष्टमिति । अत एव कल्पनया त्ववस्तु सत्या सन्त इव भासन्ते" इति । पूर्वोक्तवाचस्पत्यवाक्येऽपि तथैवार्थ श्रुत्वा "सन्त इवेत्यस्य त्वर्थक्रिया-कारित्वविशिष्टा इवेति नार्थ, तत्र विप्रतिपत्त्यभावात् । किन्त्ववाध्यत्वरूप-सत्त्वप्रकारकप्रतीतिविषया इत्येव । तच्च सत्त्व व्यावहारिकमेव" इति तन्मतरहस्यम् ।

यत्तु ज्ञाननिवर्त्यत्वमिथ्यात्व तच्च ज्ञानप्रयुक्तावस्थितिसामान्यविरह-प्रतियोगित्वम् । अतो मुद्गरपातादिना घटादे स्वरूपावस्थानिवृत्तावपि कारणात्मनावस्थितेर्ब्रह्मज्ञानेनैव निवृत्त्यातीतघटादौ नाव्याप्ति, उत्तरज्ञान-निवृत्तस्यापि पूर्वज्ञानस्य कारणात्मना मुक्त्यवस्थायामवस्थितेरवाधालोकेऽवस्थिति-सामान्यविरहस्य ज्ञानप्रयुक्तत्वाभावान्नातिव्याप्ति । उक्तञ्च वार्तिककारैः—

"तत्त्वमस्यादिवाक्योत्थसम्बन्धो जन्ममानत ।
अविद्यासहकार्येण नासीदस्ति भविष्यति ॥" इति ।

द्वे हि कार्यस्यावस्थे स्वरूपात्मका संसारात्मका च । न चान्त्याया मानाभाव, कार्येण पूर्वं पश्चाच्च कारणगतसूक्ष्मावस्थाभ्युपगमस्यावश्य-कत्वात्, तद्धेदं तेह्यव्याकृतमासीदिति श्रुत्वा प्रलयकाले कार्यमात्रस्यान-भिव्यक्तरूपेण स्थितिवाधनात्, घटो नाशत्वमापन्न, कटकमेवमुकुट जातमिति पूर्वावस्थाया उत्तरावस्थातादात्म्यानुभवाच्च । नाशस्य पूर्वावस्थातादात्म्या-पन्नोत्तरावस्थारूपत्वात् । तदवस्थाया एवात्र संस्कारशब्देनाभिधानात् । तस्याश्च तत्त्वज्ञानेनैव निवृत्ते । न च भिन्नकालीनयोः पूर्वोत्तरयोरवस्थयो कथ तादात्म्यमिति वाच्यम्, भावाभावयो प्रतियोगित्वानुयोगित्वसम्बन्धस्येव तस्यापि संभवात् । अनुभवस्याविशेषात् । अयमेव साङ्ख्यानां सत्कार्य-

वाद । पर त्वन्मनमे मिथ्येति विशेष इति, तच्चिन्त्यम् ; घटादौ मूलावस्थाया मानाभावाद् गौरवाच्च । श्रुतेश्च पूर्वप्रकरण एव व्याख्यानत्वात् ।

यत्तु पराङ्गीकृतध्वंसप्रागभावयोरेव तद्रूपत्वोपगमान्न गौरवम्, एकस्मिन् कनके जायमानकटकमुकुटयोर्मध्ये कटके मुकुटप्रागभावत्वस्य मुकुटे च कटकध्वंसत्वस्य स्वीकारादनिरुक्तकल्पने मानाभावात् । अन्यथा पूर्वापरकालावच्छिन्नध्वंसमवायिनिष्ठत्वात्यन्ताभावविषयकत्वेनैव ध्वंसप्रागभावविषयकत्वादिनिगमनप्रतीत्युपपत्तेरिति, तन्न, मुकुटकटकयोर्यत्र कनके विपरीतक्रमेणोत्पत्तिस्तत्र ध्वंसप्रागभावयोर्वैपरीत्येनैव वाच्यतया ध्वंसप्रागभावविषयकप्रतीतेरनुगतविषयकत्वापत्तेः । प्रतियोग्यंशेऽननुगमस्योभयत्र साम्येऽपि मन्मते ध्वंसप्रागभावांशे विषयानुगमसत्त्वात् । पूर्वापरेत्यप्युक्तम् ; तत्प्रागभावाधिकरणकालवृत्तित्वनदधिकरणक्षणध्वंसानधिकरणसमयवृत्तित्वान्यतरत्वस्य पूर्वत्वस्य तदधिकरणक्षणध्वंसाधिकरणसमयवृत्तित्वरूपस्य तदुत्तरत्वस्य च ध्वंसप्रागभावानङ्गीकारे दुर्वचत्वात् ।

न च पूर्वत्वादिकमखण्डमेव सप्रतियोगिकं स्वीकार्यम् । ध्वंसप्रागभावकल्पने तत्र ध्वंसत्वप्रागभावत्वरूपधर्मद्वयस्यापि कल्पने गौरवादिति वाच्यम्, ध्वंसप्रागभाववदखण्डयोः पूर्वत्वोत्तरत्वयोरपि प्रतियोगिभेदेन भेदस्यावश्यकतया तत्रापि पूर्वत्वत्वोत्तरत्वत्वरूपधर्मद्वयकल्पनाया आवश्यकत्वात् । धर्मकल्पनबीजस्य तदंशे प्रतीतेरनुगतविषयकत्वानुपपत्त्यादिरूपस्यानन्यसाधारण्यात् । एवं मुकुटनाशानन्तरं कटकध्वंसप्रत्ययानुपपत्तिः कटकोत्पत्त्यनापत्तिश्च । ध्वंसप्रागभावानधिकरणसमयस्य प्रतियोग्यधिकरणत्वनियमात् । न च मुकुटनूतनावस्थैव कटकध्वंस इति वाच्यम्, तस्यैव विवादात् । तस्मात्त्वन्मतेऽनादितया कटकोत्पत्तिपूर्वं कटककलेऽपि च कटकध्वंसप्रत्ययापत्तेश्च ।

न च मुकुटध्वंसात्मकावस्थाया मुकुटध्वंसत्वमिव कटकध्वंसत्वमपि कल्प्यते, यथा त्वन्मते प्रतियोगिध्वंसप्रागभावयो प्रागभावध्वंसध्वंसप्रागभावत्वमिति वाच्यम्, तद्ध्वंसप्रागभावयोरेकरूपत्वात् । त्वन्मते तूत्तरावस्थानामानन्त्येन तावतोऽवस्थासु पूर्वपूर्वानेकध्वंसत्वकल्पने गौरवात्, प्रत्ययस्याननुगतत्वापत्तेश्च । एवं पूर्वावस्थाया प्रागभावरूपत्वेऽपि योज्यम् ।

वस्तुतस्तु, अनुत्पन्नमुकुटेऽपि कनके कटकध्वंसप्रत्ययस्य सर्वानुभवसिद्धत्वान्नैतद्वक्तुमर्हं कटकावस्थाप्रध्वंसोत्तरमुकुटोत्पत्तिपूर्वं च कटकध्वंसप्रत्ययस्य मुकुटविषयकत्वेनोपपादयितुमशक्यत्वादवस्थाद्वयमध्ये व्यवधान नास्ती-

त्यस्य वक्तुमशक्यत्वात् । न च तत्र कनकावस्थैव ध्वस इति वाच्यम् ; तस्याः पूर्वमपि सत्त्वेनातिप्रसगस्योक्तत्वात् । न च कटकोत्तरकालीनकनकावस्थैव तथेति वाच्यम् ; उत्तरत्वस्य ध्वसानङ्गीकारे दुर्वचत्वस्योक्तत्वात् । अत एव कटक नाशयित्वा मुकुट कृतमिति स्वरसवाही व्यवहार । अत एव परिणाम-भेदविध्यदर्शन[न]प्रस्तावे "सुवर्णकारो वर्द्धमानक भङ्क्त्वा कुचकमा रचयति इति तात्पर्यटीकायामुक्तम् । कटकमेव मुकुटमित्यादिस्तु तत्स-मानविषयक एव यद्यनुभवसिद्धकार्यमात्रवृत्तिधर्मविच्छिन्नप्रतियोगित्वानु-योगित्वकतादात्म्यप्रत्ययो नास्तीत्यस्य भेदाभेदवादे कारिकाव्याख्यायां स्वयमेव व्यवस्थापितत्वात् ।

यदप्याहुः "एतेनेहेदानी घटप्रागभाव इति लोकाननुभवादिहेदानी घटो नेति बुद्धेः सामयिकात्यन्ताभावविषयकत्वान्न प्रागभावेऽत्यन्ता-भावातिरिक्ते मानमिति दीधितिर्युक्तमपास्तम्" इति, मृदि घटो नेति बुद्धे. प्रागभावावगाहित्वात् । न चेयमत्यन्ताभावविषया, कपालादेर्घटा-दितादात्म्येन घटात्यन्ताभावरूपत्वाभावात् । कपालतादात्म्यापन्नघटप्राग-भावत्वस्यैव तत्र युक्तत्वादिति, तदपि चिन्त्यम् , इह पटले घटो नेति प्रतीतिविषयेणेवेह मृदि घटो नेत्येतत्प्रत्ययोपपत्यातिरिक्तविषयत्वे मानाभावात्, कपालघटयोस्तादात्म्ये मानाभावाच्च । प्रागभावाद्यतिरिक्तो न वेत्यन्यदेतत् । किं च पूर्वोत्तरावस्थयोरेव प्रागभावध्वसरूपत्वे इह कपाले घटप्रागभाव इह ध्वस इत्याधाराधेयभावावगाही प्रत्ययो न स्यात् । कथचिदेतदुपपत्तावपि तदवस्थयोर्घटादितादात्म्ये मानाभाव एव । न हि घटः स्वप्रागभावः स्वध्वसो वेत्यादि कस्याप्यनुभवोऽस्ति, प्रत्युत घटः स्वध्वसाद्भिन्न इत्यादेरेवानुभूयमानत्वात् । अत एवेह घटस्य ध्वस इह घटस्य प्रागभाव इति व्यवहारे घटतादात्म्यविशिष्टयो प्रागभाव-ध्वसयोर्भानमित्यपास्तम् । अत्यन्तभेदावगाहिन्या प्रतीतेस्तादात्म्याव-गाहित्वोक्तौ भेदस्यानोच्छेदापत्ते ।

यदपि नश्यतीत्यादौ प्रतियोगित्वादावाख्यातस्य तत्तत्क्षणास्वीकारे परेषा गौरवम्, अस्मन्मते तु सयुज्यते चलति भातीत्यादिसाधारण्येन तादात्म्ये कृतशक्तेरेवोपपत्तेर्लाघवमिति, तदप्यसत्, दृष्टान्तेऽपि तादात्म्यार्थक-त्वस्यासिद्धत्वाद् भेदाभेदवादस्य निरस्तत्वात् । किञ्च भवतामपि नाख्यातमात्रस्य तादात्म्ये शक्तिः, पचतीत्यादौ तदभावात् । नापि स्थल-विशेषे तन लक्षणा संयुज्यते, नश्यतीत्यादिसाधारणस्य जानातीच्छतीत्यादौ

सविषयार्थकत्वात्तत्त्वस्येवानुगतधर्मस्याभावात् प्रतियोगित्वस्य भवताप्यभ्युपगमाच्च तादात्म्यस्य भेदघटितत्वनियमात्। एतेन पूर्वावस्थान्तरतन्नाशौ यथा कपालद्वयाद् घटस्तद्विभागाच्च तन्नाशस्तथा तत्कालादिविशिष्टावस्थैव तत्प्रागभावध्वंसौ। वस्तुतस्तु तत्र घट. कपालनाश पश्चादुत्पन्नकपालान्तर च घटनाश इति निरस्तम्, तत्कालस्य विशिष्टातिरिक्तध्वंसप्रागभावानङ्गीकारे दुर्वचतायां उक्तत्वात्। घट एव कपालनाश इति त्वत्यन्तमेवायुक्तम्, घटकाले कपालनाशस्य केनाप्यननुभूयमानत्वात्। असमवायिकारणसंयोगनाशजन्यघटनाशानन्तर कपालान्तरोत्पत्तिस्वीकारे गौरवाच्च। कपालत्वावच्छिन्नकार्यतानिरूपितकारणतायां कपालिकातदवयवसंयोगादिनिष्ठाया व्यभिचारप्रसगाच्च। अव्यवहितोत्तरत्वनिवेशे विजातीयकपालत्वस्य कार्यतावच्छेदकत्वाभ्युपगमे वा गौरवाच्च। एकशक्तिमत्त्वेन हेतुत्वस्य च तत्र तच्छक्तितत्सबन्धकल्पनादिगौरवग्रस्तत्वात्। तृणादातु [शु]त्पत्येवगर्भकारणान्तरघटितस्तोमाद्दह्यादुत्पत्तेः सर्वसम्मतत्वाद् वैजात्यादेरिव कारणतावच्छेदकशक्तेरपि स्वीकर्त्तुं शक्यत्वेन वैषम्यात्। अत्र च कपालान्तरोत्पत्तौ हेत्वन्तरे चोभयसंप्रतिपत्तेरभावात्। कपालादेर्घटादिकालीनानन्तसंयोगादिकल्पनगौरवस्य च फलमुखत्वाद् गौरवतारतम्यस्यापि चोक्तत्वात्। पूर्वोत्तरकालीनकपालयोर्भेदे तत्प्रागभावध्वंसभेदस्वीकारे गौरवाच्च।

यदपि कपालनाशस्थले कपालिकाद्यवस्थैव कपालघटयोर्नाशस्तत्रैव लोकैतत्त्वानुभवादिति, तदप्यसत्, तत्र कपालनाशस्यासमवायिकारणनाशजन्यत्वेन प्रत्यक्षत्वे न तु घटनाशस्य समवायिनाशजन्यनाशस्य संयुक्तविशेषणतासंसर्गविरहेण प्रत्यक्षाभावादित्यनुभवविरोधात्, भवदनुभवस्यापि शपथमूलकत्वात्। कुत्रचित्कपालस्य क्वचिच्च कपालिकारूपो घटनाश इत्यननुगमाच्च। कपालिकानाशस्थले पूर्वपूर्वावस्थाया उत्तरोत्तरानेकनाशत्वेऽत्यन्तानुगमाच्च। यतु—

"मृद् घटत्वं न घट कपाल कपालिका चूर्णरजस्ततोऽणुः।
जलं स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र तत्त्वम्॥"

इति विष्णुपुराणे घटकपालकपालिकाचूर्णत्रुटीनामेव क्रमिकाणामतत्त्वता प्रतिपत्त्यर्थमनुवादात्तदतिरिक्तध्वंसे मानाभाव। अन्यथा घटकपालावस्थातिरिक्तध्वंसस्य मध्यवर्तिनस्तत्त्वत्वानभिधानाद्न्यूनता स्यादिति, तदसत्, मध्यवर्तिसर्वावस्थानामत्रानुक्तयोपलक्षणमात्रार्थत्वात्। कपालि-

कायाश्च त्रुटेश्च मध्ये बह्वीनामवस्थाना प्रत्यक्षसिद्धत्वे नापलपितुमशक्यत्वादणुपदस्य त्रुटिपरतायां स्वमभेवाभिहितत्वात्परमाणुद्व्यणुकयो रजतत्वस्यात्रानुक्तत्वात्तयोर्न मानमित्यप्ययुक्तम्, आलक्ष्यन इत्युक्त्या दृश्यानामेवात्रोपादानमित्यस्यापि सुवचत्वात्, तत्सद्भावासद्भावयो प्रकृतानुपयुक्तत्वाच्च। वस्तुतस्तु घटत्वमित्यस्य घटार्थकत्व तैरपि कण्ठत एवोक्तम्। घटत इत्यस्य तु घटध्वस एवार्थ। 'तनु उपक्षये इत्यस्य दिवादिगणे पठ्यमानस्य भावार्थके क्विप्प्रत्यये घटशब्देन षष्ठीसमासे च तथैव रूपसिद्धेः। एतेन पूर्वावस्थैवोत्तरावस्था प्रति परिणामितया कारणमत एव तयोस्तादात्म्यमित्यावेदयितुमेकपदासभवयोरपि तसित्वप्रथमयोर्भिन्नपदगतत्वेनोक्तिरिति निरस्तम्।

यदपि दण्डाद्यभिघातजक्रियया स्वाश्रयघटाद्यवयवकपालादिक विना विनाश्यस्वोपादानाविद्याया स्वनाशोत्पत्तिक्षणे त्रुटेरनुत्पादन चाक्तविष्णुपुराणवाक्यानुसारादिति, तदत्यन्तमसत्, अणुपदार्थस्य नित्यतया तदुत्पत्तेरसभवात्। एतद्विषये च प्रथमपरिच्छेद एव विचारस्य पल्लवितत्वात्। विष्णुपुराणवाक्यस्य अणारनुत्पत्तौ प्रमाणत्वाभावात्। पदार्थत्वेन तात्पर्यविषयत्वेन वा तदा स्पृष्टऽर्थे शब्दस्य प्रामाण्योपन्यासानौचित्यात्। अन्योन्मत्तकलहापत्ते, इति दिक्।

अत एव घटादिकालेऽपि त्रुटे स्वीकारे तदीयपूर्वसयोगतनाशक्रियाविभागादिकल्पने गौरवमित्यपास्तम्। प्रमाणविरोधे गौरवादेरप्रयोजकत्वात्। अन्यथा ब्रह्मादेरप्यनङ्गीकारापत्ते। नद्वियकाविद्यादिकल्पने गौरवापत्त। अनन्तत्रुटीना नाशादिकल्पने तावत् त्रुटिव्यक्त्यपेक्षयैकैकव्यक्तिस्थाने पर परार्द्धत्रुटिव्यक्तितद्ध्वसप्रागभावादिकल्पने गौरवातिशयस्य जागरूकत्वाच्च।

यत्तु, ननु क्रियारूपा समवायिकारणनाशेन द्वितीयत्रुटेर्नाशापत्त्या क्षणिकत्व स्यात्, कपालादिक्रियया कपालादीना च नाशो न स्यात्, न क्रियायास्तन्नाससमवायिकारणत्वाभावादसमवायिकारणनाशस्यैव कार्यनाशकत्वादिति चेत्, न, अस्माभिर्द्रव्यनाशकतावच्छेदकवैजात्यस्य क्रियायामेव स्वीकारेणासमवायिकारणनाशस्य द्रव्यनाशकत्वानभ्युपगमात्। अत एव नीलादिव्यक्तीना जातिवदखण्डनित्यैकत्वेऽपि पाकस्थले तेजोऽभिघातजत्रुटिक्रियया स्वाश्रयत्रुटि विनाश्य त्रुटयन्तर जन्यते। तत्र यथानुभवरूपाद्यन्तरस्यव

सबन्ध इति स्वीक्रियते, घटे घटत्वस्येव सबन्धो न पटत्वादेरितिवत्। उक्त क्रियाया पूर्वरूपनाशकत्वरूपान्तरोत्पादकत्वोपगमे तु रूपादीना बहूनामुत्पत्तिविनाशयोस्तत्र नानाविधकारणानाञ्च कल्पनापत्त्या गौरवात्। पूर्वद्रव्यनाशकतावच्छेदकतया द्रव्यान्तरजनकतावच्छेदकतया च क्रियायामेकस्यैव वजात्यस्योपगमे लाघवात्। न च पूर्वद्रव्यनाशोत्पत्तिक्षणे तत्क्रियाया विनश्यदवस्थत्वात्कथ तदुत्तरक्षणे ततो द्रव्यान्तरोत्पत्तिरिति वाच्यम्, क्रियाया कार्यसहभावेन द्रव्यान्तरहेतुत्वे मानाभावेन विनश्यदवस्थयैव तया द्रव्यान्तरोत्पादे वाधकाभावात्। न च पूर्वद्रव्यनाशद्रव्यान्तरोत्पत्त्योरेकक्षणे सभवेन स्वाश्रयपूर्वद्रव्यनाशाभावेन तत्क्षणे तत्क्रियाया अपि नाशाभावात्तयैव स्वजनितद्रव्यस्य नाशापत्त्या क्षणिकत्वापत्तिरिति वाच्यम्, स्वोपादानत्वसबन्धस्य नाशकतावच्छेदकतया तत्सबन्धेन तद्द्रव्ये क्रियाविरहात्। न चैवमविद्याया अपि नाशापत्ति, असाधारणस्योपादानत्वस्य निवेशात्। न च क्रियायास्तादात्म्येन द्रव्यजनकत्वे स्वनाश्यद्रव्यासयुक्तदेशावच्छेदेनाप्यविद्याया द्रव्योत्पादकत्वापत्ति, स्वनाश्यद्रव्यसबन्धित्वोपलक्षितदेशनिष्ठस्य स्वजन्यनाशवत्त्वस्य कारणतावच्छेदकसबन्धत्वात्। तादृशदेशश्च त्रुट्यवयवो भूतलादिर्वैत्यन्यत्।

एवञ्च पूर्वद्रव्यनाशोत्पत्तिक्षणे द्रव्यान्तरोत्पत्तेर्न भावनापि तत्पूर्वक्षणे पूर्वद्रव्यनाशाभावेन तद्घटितात्तत्सबन्धेन क्रियाया अभावादिति सूत्रमुक्तं लाघव्यं प्रतिपादितम्, तन्नेद वक्तव्यम्—क्रियाया द्रव्यजनकत्वे मानाभाव, आवश्यकसयोगस्यैव तदौचित्यात्। न च त्वन्मते कपाले सयोगाद्यत्र घटोत्पत्तिस्तत्रापि सयोगस्य द्रव्यजनकत्व नाङ्गीक्रियत इति वाच्यम्, प्रत्यक्षविरोधादपसिद्धान्ताच्च। उक्त हि भगवद्भाष्यकारै "कार्यारम्भोऽपि नावयवसयोगेनैव केवलेन" इति। सयोगहेतुतायां वाधकाभावाच्च।

यत्तु पटादिकार्यं प्रति सयोगस्य नानुगतमेक कारणत्वम्, एकस्मिन्नेव कपाले तत्तत्प्रदेशावच्छिन्नसयोगेभ्यस्तत्र द्रव्योत्पत्तेर्नियन्तुमशक्यत्वात्, किन्तु घटत्वाद्यवच्छिन्न प्रति जनकतया नानाजात्यान्यवयवसयोगनिष्ठानि कल्प्यानीति गौरवमिति, तन्न, यादृशविजातीयसयोगाद्द्रव्योत्पत्तिर्यत्रोपगम्यते तादृशजात्यावच्छिन्नसयोगनियामक भवतापि किञ्चिदवश्य कल्प्यम्, द्रव्यहेतुत्वानभ्युपगमेऽपि प्रत्यक्षसिद्धस्य तस्यापह्नोतुमशक्यत्वात्। तथा च कार्यतावच्छेदकनियामकावश्यकल्प्यस्य सयोगनिष्ठजात्यस्यैव द्रव्यजनकतावच्छेदकत्वस्वीकारान गौरवम्। त्वयापि द्रव्यत्वव्याप्यकार्यतावच्छेदक-

धर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया तत्तन्मानसंख्याकानां वैजात्यानां क्रियानिष्ठानां स्वीकार्यत्वात्। क्रियात्वसामान्यस्यैव नाशकतावच्छेदकत्वे प्रायेण प्रत्यक्षादिविरोधात्। असाधारण स्वोपादानत्वं नाशकतावच्छेदकसबन्ध इत्यप्ययुक्तम्, तद्धि भवद्भोत्याविद्यादिपडन्यत्वावच्छिन्नकार्यताप्रतियोगिकोपादानताशालित्व वाच्यम्। तया चाविद्यादिपडन्यत्वावच्छिन्नतादात्म्यसबन्धावच्छिन्ना च या कार्यता तत्प्रतियोगिकतादात्म्यसंबन्धावच्छिन्नकारणत्वरूपसबन्धस्य नाशकतावच्छेदकत्वपर्यवसानादविद्याव्याप्तावपि ब्रह्मणो नाशापत्ति। "एतस्माद्वा आत्मनः" इत्यादि श्रुत्या वायुत्वादेरप्यात्मकार्यतावच्छेदकत्वस्यावश्यकत्वात्। अथ कारणसमसत्ताकत्वस्यापि कार्यताया निवेशेनोक्तसंबन्धस्य परिणाम्युपादानमात्रवृत्तित्वान्न विवर्त्तोपादानब्रह्मसाधारण्यम्। यद्वा, उक्तश्रुत्यादिना कार्यत्ववायुत्वादीनां सामानाधिकरण्यमात्रमेव वोध्यते। अवच्छेदकन्तु "यतो वा इमानि भूतानि जायन्ते" इत्यादि पर्यालोचनया लाघवेन चाविद्यादिपडन्यत्वमेवेति चेत्, सत्यम्; तयाप्येतदपेक्षया प्रतियोगितासंबन्धेन द्रव्यनाशं प्रति स्वप्रतियोगिसमवायिसमवेतत्वसबन्धेनासमवायिकारणनाशहेतुतायाः युक्तत्वात्।

किंच स्वोपादानत्वसबन्धेन क्रियाया द्रव्यनाशकत्वं स्वीकृत्य तदुत्पन्नद्रव्यस्य क्षणिकत्ववारणेऽपि तत्क्रियायाः क्षणिकत्व दुर्वारम्, क्रमोत्पत्तिद्वितीयक्षणे पूर्वद्रव्यनाशवत्कर्मनाशस्यापि संभवात्तदानीमेव द्रव्यान्तरोत्पत्तेः संभवात्। कार्यसहभावेन हेतुतायाः भवतानभ्युपगमात्। अन्यथा पूर्वद्रव्यनाशोत्तरक्षणे कर्मणो द्रव्यान्तरजनकत्वानुपपत्तेः। न च कर्मनाशे द्रव्यनाशस्य हेतुत्वाद् द्रव्यनाशानन्तरक्षणे एव कर्मनाश इति वाच्यम्; समवेतनाशं प्रति त्वया समवायिनाशहेतुत्वानभ्युपगमात्। न चासमवायिनाशस्यैव तत्र न हेतुत्वम्, समवायिनाशस्य त्वस्त्येवेति वाच्यम्; समवेतनाशत्वस्य तत्कार्यतावच्छेदत्वे प्रकृतस्थले व्यभिचारात्। न च कर्मनाशत्वम्, तथा सत्यपि घटादावुक्ताकार्यतावच्छेदकावच्छिन्नोत्पत्त्या व्यभिचारात्। समवायिनाशजन्यतावच्छेदके द्रव्यजनकतावच्छेदकवैजात्यस्य कर्मविशेषणतया निवेशे तु कर्मान्तरनाशे उत्तरसंयोगादेः कारणत्वान्तरस्य कल्पनापत्तिः। तथा च द्रव्यनाशत्वेन विजातीयकर्मत्वेनैकः कार्यकारणभावः, विजातीयकर्मनाशत्वेन द्रव्यनाशत्वेन चेत्यपरः, तदन्यकर्मनाशत्वेनोत्तरसंयोगत्वादिना चापर इति त्रयं कल्प्यम्। लघुरं द्रव्यनाशत्वावच्छिन्नेऽसमवायिनाशत्वेन हेतुत्वम्। न च समवायिनाशजन्यनाशे व्यभिचारः, नव्यमते द्वयणुक-

नाशानुरोधेनावश्यकल्पेनासमवायिनाशहेतुत्वेनैव निर्वाहे घटादिनाशेऽपि समवायिनाशहेतुत्वानभ्युपगमात्। प्राचीनमतेऽपि गुणकर्मसाधारण्येन स्वप्रतियोगिसमवेतत्व कालिकविशेषणत्व चेत्येतदुभयसबन्धेन नाश प्रति समवायिनाशस्य हेतुत्वेन द्रव्यनाशस्याप्युपसग्रहाच्चेति द्वयमेव कल्प्यताम। पूर्वोक्तगुरुतरसबन्धेन कर्मणो द्रव्यहेतुत्वमपेक्ष्य स्वसमवायिसमवेतत्व-सबन्धेन द्रव्योत्पत्तौ समवायेन सयोगस्यैव हेतुतायामयुक्तत्वाच्च। द्रव्यजनक-तावच्छेदकवैजात्यस्य सयोगनिष्ठस्यैव कल्पयितु युक्तत्वाच्च। न च द्रव्यजनकतावच्छेदकवैजात्यावच्छिन्नसयोगनिष्ठजन्यत्वप्रतियोगितावच्छेदकत्वेन त्वयापि कल्प्यस्य कर्मनिष्ठवैजात्यस्यैव मया द्रव्यजनकतावच्छेदक त्वस्वीकारालाघवमिति वाच्यम्, त्वयापि सयोगनिष्ठवैजात्यस्या वश्याभ्युपगम्यतया तस्यैव मया द्रव्यजनकतावच्छेदकत्वोपगमात्। न च मया द्रव्यनाशकतावच्छेदकमपि तदेव कल्प्यते इति लाघवमिति-वाच्यम्, द्रव्यनाशकतावच्छेदकत्वेन जात्यन्तरस्य मयाप्यनङ्गीकारात्, प्रकारस्य चाक्तत्वात्। सर्गाद्यकालीनद्रव्योत्पत्तौ कर्मणस्तत्सबन्धस्य च हेतुत्वतदवच्छेदकत्वयोर्व्यभिचाराच्च। नहि तदा तत्कर्मणा शपथेन निर्णयेऽपि तत्कर्मजन्यद्रव्यनाशघटितोक्तसबन्धेन कर्मणस्तादृशद्रव्यो-त्पादकत्व वक्तु शक्यम्, मम तु परमाणुद्वयसयोगस्येश्वरेच्छाधीनकर्म-वशादुत्पत्त्या द्व्यणुकोत्पत्तिरविरुद्धा, पूर्वद्रव्यनाशादे कारणतावच्छेदक-सबन्धाघटकत्वेनानपेक्षितत्वात्।

यत्तु "उभयथापि न कर्मातस्तदभाव' इति वेदान्तसूत्रे उक्तम्। परमाणुकर्मणि न दृष्टं निमित्तम्, प्रलये प्रयत्नाद्यभावात्। नाप्यदृष्टं तत्सहकारिणश्चेतनाधिष्ठितत्वस्य परमाणावभावात्। प्रलये जीवाना चैतन्याभावादीश्वराधिष्ठानस्य चेश्वरसाधकश्रुत्यनुसारेण मायायामेवा ज्ञीक्तुं युक्तत्वात्। एव चोभयथा दृष्टमदृष्टं वा परमाणुकर्मणो निमित्तं न सभवति यस्मादत परमाणोरारम्भकसयोगाभावादुपादानत्व-मनुपपन्नम्। किं च परमाणौ सयोगो न प्रत्यक्ष, सयोगप्रत्यक्षे आश्रय-प्रत्यक्षस्य हेतुत्वात्। किन्त्वनुमेय, तेन च दृष्टानुसारिणावयवावच्छिन्नो वाच्यस्तथा च परमाणो सावयवत्वापत्तिरिति, तदसत्, सयोगस्य हि नावच्छिन्नत्व कुलधर्म किन्त्ववयविद्रव्यवृत्तित्वप्रयुक्तम्। तदुक्त लीलावत्याम् "तस्मादवयववर्तिना सयोगाभावेनावयविनि सयोगस्य सादेशव्यपदेशविषय त्वमेवाव्याप्यवृत्तित्वम्" इति। मतान्तरेऽपि स्वसमवाय्यवयवावच्छिन्नत्व-

नियमे घटाकाशसयोगे यत्किचित् स्वसमवाय्यवयवावच्छिन्नत्वनियमे चात्माकाशसयोगे परमाण्वाकाशसयोगे त्रुटितत्सयोगे व्यभिचारात् । तथा च परमाणो सयोगानुमाने कथमवच्छिन्नत्व विषय स्यात्, अन्यथा कपालादिप्रतियोगिकत्वादेरपि तत्र सिद्धिप्रसगात् । तदुक्त दृष्टान्ते—ईश्वरेच्छावशादृष्टस्य वृत्तिलाभात् तद्वदात्मसयोगेन परमाणषु कर्मोत्पत्तौ नाधकाभावाच्च मायामेव प्रमाणाभावेन तत्रेश्वराधिष्ठितत्वकल्पनानवकाशात् । एतेन पूर्वोक्तकारणतावच्छेदकसबन्धोऽप्यपास्त अविद्यायामेव मानाभावे तदुपादानहेतुत्वस्य दूरापास्तत्वात् । एतेन 'उपादानीभूतमायाया तादात्म्येन प्रत्यासत्तस्येक्षणादेरसमवायिकारणत्वमेव श्रुत्योच्यते इत्यपि परास्तम् ।

यदपि 'समवायाभ्युपगमाच्च साम्यादनवस्थिते" इति सूत्रे उक्तम् कारणे कार्यसमवायाभ्युपगमादपि परमाणुवादो न युक्त । तथाहि समवाय सबद्धोऽसबद्धो वा ? नान्त्य, असबद्धस्य सबन्धत्वासभवात् । नाद्य, स हि समवाय, स्वरूप वा ? नाद्य, अनवस्थानात् । नान्त्य, कार्यस्यैव स्वरूपसबन्धसभवेन समवायवैयर्थ्यात् । किञ्च समवायस्यैकत्व न युक्तम्, वायावपि रूपवत्ताबुद्धिप्रसगात् । न च रूपप्रतियोगिकत्वविशिष्टसमवायस्तत्र नास्तीति वाच्यम्, तदतिरेककल्पनापेक्षया समवायनानात्वस्यैव युक्तत्वात् । रूपादिसमवायस्यापि नाशोत्पत्त्यनुभवात्तस्य नित्यत्वमप्यनुपपन्नम् । कपालद्वय घट इति प्रत्ययानिर्वाहकत्वञ्च । अत एव सिद्धान्ते तादृश एव तादात्म्यनामासबन्धोऽनवस्थादिदोषैरनिर्वचनीय समवायस्थानीयोऽभ्युपेयत इति" तत्रापीद वाच्यम्, ब्रह्मण प्रपञ्चोपादानत्वे प्रमाणाभाव । तथाहि ब्रह्म न प्रपञ्चोपादान तन्निमित्तत्वात्, यद्यस्य निमित्त तत्तस्यानुपादान यथा घटस्य कुलाल । न च हेत्वसिद्धि । ब्रह्म जगतो निमित्तम्, इच्छापूवकजगत्कर्तृकत्वात्, कुम्भकर्तृकुलालवदिति तदसिद्ध ।

यत्तु ईश्वरासिद्धराश्रयासिद्धोऽय हेतु, न चागमात् तत्सिद्धिरिति वाच्यम्, तेनोपादानत्वनिमित्तत्वाभ्यामेवेश्वरस्य बोधितत्वेनानुपादानत्वस्य धर्मिग्राहकमानबाधितत्वात् । तदभिन्नस्य च निमित्तस्य स्वीकारे "कस्मिन्नु भगवो विज्ञाते सर्वमिद विज्ञात भवति" इत्यादि प्रतिज्ञाया 'यथा सोम्यैकेन ज्ञातेन सर्वं कठा ज्ञाता भवन्ति"इति गौणत्वेन तन्निवहि इति वाच्यम्, अगतिकगतित्वात् । तदुक्तम्—

"न मुख्ये सभवत्यर्थे जघन्या वृत्तिरिष्यते ।
न चानुमानिक युक्तमागमेनापबाधितम् ॥"

'सर्वे हि तावद्वेदान्ता पौर्वापर्येण वीक्षिता ।
एकान्तिकाद्वैतपरा द्वैतमात्रनिषेधत ।' इति,

तदसत्, तद्वाक्यानामद्वैतपरत्वस्य पूर्वपरिच्छेद एव निराकृतत्वात्। उत्पादनत्वबोधकश्रुतेश्च दुर्लभत्वात्। तदैक्षतेत्यादीना च व्याख्यातत्वात्।

यत्तु यतो वा इमानि भूतानि जायन्ते इत्यनेन प्रकृतावुपादान पञ्चमी विधानाद् ब्रह्मण उपादानत्वमिति, तत्र वदाम, समवायनानात्व त्विष्टमेव। रूपसमवायो नष्ट इति तु न स्वारसिकोऽनुभव अन्यथा समवायस्य नित्यत्वेऽपि तत्सिद्धरावश्यकत्वात्। कपालद्वय घट इत्यप कल्पितव प्रतीति, अतस्तदनिर्वाहेऽपीष्टापत्ति। समवायस्यान तादात्म्य कल्पत इति तु नास्ति विवादो न तु वस्तुनीत्यत्र पर्यवसन। भेदावगाहि-प्रत्ययस्य तेनानिर्वाहाच्च। किंच भवन्मत तादात्म्य द्वेधा—ब्रह्मणा सहाध्यासिकविषयतासबन्धस्थानीयम्, अविद्यया सह समवायस्थानीयम्। तत्राद्येन जन्यसत्त्वावच्छिन्न प्रति द्रव्यत्वेन कारणता, अविद्याया अपि द्रव्यत्वात्। तत्साधारणजात्यन्तरस्यावच्छेदकत्वकल्पनाद्वा। तथा च ब्रह्मणो नोपादानत्वम्। समवायस्थानीयतादात्म्येन कार्यानधिकरणत्वात्।

यत्तु समवायस्थानीयतादात्म्यवदाध्यासिकविषयतासबन्धोऽपि तादात्म्यमेव। तथा च तादात्म्यसबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसबन्धावच्छिन-कारणत्वमुपादानत्वमविद्यायामिव ब्रह्मण्यप्यक्षतमेवति न पारिभाषिकमात्र तदुपादानत्वमिति, तन्न, सबन्धद्वयस्य वस्तुनो भिन्नत्वेन तयोनामक्यकरणेऽपि पारिभाषिकत्वानपायात्। एवञ्च ब्रह्मसत्ताया कार्यस्य समवायस्थानीय-तादात्म्यानङ्गीकारे घट सन्निति सामानाधिकरण्येन धीर न स्यादित्याशङ्काया-माध्यासिकविषयतासबन्धस्थानीयतादात्म्यस्यापि तन्नियामकत्वादिति समाधानमप्यपास्तम्, सदाकारबुद्धविषयक्यरक्षणानुपपत्ति। सबन्धविकल्प-स्त्वग्र निरसनीय इत्यास्ता तावत्।

वेदाविरुद्धयुक्तीनामर्कः तर्ककुतूहले।
प्रकाशात्मोक्तवाक्यत्वे अप्रकाशात्मता गते ॥११॥

द्वादशोंऽशः

यत्तु चित्सुखाचार्यैः "अय पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अशिवादितराशिवत् । न च कन्यचित्पटन्य संयोगेनैतत्तन्तुषु सत्वाद्व्यभिचार, पक्षसमत्वात् । समवेतस्येव सयुक्तस्यापि तन्निष्ठात्यन्ताभावप्रतियोगित्वसभवात्" इति तत्र सयोगसबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावमादाय सिद्धसाधनात् । न च समवायावच्छिन्नत्व तद्विशेषण सयोगसमवायोभयसबन्धावच्छिन्नाभावेन सिद्धसाधनात् । नापि समवायान्यसबन्धावच्छिन्नत्व निवेश्यम्, समवायेन द्रव्यस्याप्यव्याप्यवृत्तित्वपक्षे किंचिदवच्छेदेन तदभावेन सिद्धसाधनात् । यत्त्वव्याप्यवृत्तित्वे नायान्तिरमाशङ्क्याह पटतदभावयोरेकाधिकरणे जगति विरोधविलयापत्तिरिति, तन, स्वानुमानप्रतिकूलस्यैव प्रत्युत दर्शितत्वात् । यदपीह तन्तुषु पट इति प्रत्यक्षमाशङ्क्याह चन्द्रप्रादेशिकत्वप्रत्यक्षवत्तस्यार्किंचित्करत्वादुक्तद्रव्यत्वस्य त्वादृशेरिव चन्द्रप्रादेशिकत्वप्रत्यक्षस्यापि बहुभिः परीक्षितत्वाद्विचारशूरपरीक्षितत्वस्य दार्ष्टान्तिकेऽप्यभावादिति, तन्न, प्रत्यक्षस्यानन्यथासिद्धतया प्राबल्यमिति यस्य व्यवस्थापितत्वात् । प्रमाणानादरे च विचारशूरत्वस्य दुर्लभत्वादिह पटाभावो नास्तीति प्रत्यक्षाच्च । एतत्तत्व वृत्तिध्वसप्रतियोगित्वस्यापायित्वाच्च । पटान्तरादीनामेतत्तन्तुवृत्तिध्वसप्रतियोगित्वस्य परैरप्यनङ्गीकारात् । एमवय पटा नैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगो एतत्तन्त्वारब्धत्वात्, यनैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्व तत्रैतत्तन्त्वारब्धत्वाभावो यथा पटान्तरे, इति व्यतिरेकेण प्रतिरोधोऽपि व्येय । न चाप्रसिद्धविशेषणत्व समवायसबन्धावच्छिन्नप्रतियोगितात्यन्ताभावप्रतियोगित्वस्य स्वरूपसबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावो हि प्रकृत साध्य. । स च सयोगसबन्धावच्छिन्नप्रतियोगिताकैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिन्येव प्रसिद्धो विशेषणाभावप्रयुक्तत्वादिति प्रसिद्धिसौलभ्यात् । पक्ष एव प्रसिद्धेरनपेक्षितत्वात् प्रत्युत प्रतिकूलत्वात् । उक्त चाचार्यैः "प्रसिद्धो हि धर्मो धर्मिणमन्वेति न तु धर्मिण्येव तत्प्रसिद्धिर्मृग्यते" इति । नचैतनिष्ठप्रागभावप्रतियोगित्वाभाव उपाधि, एतत्तन्त्वारब्धत्वाभावव्यापकस्यैतत्तन्तुनिष्ठप्रागभावप्रतियोगित्वस्य पक्षावृत्तो, पक्षवृत्तितया सदिह्यमानैतत्तन्तु-

निष्ठात्यन्ताभावप्रतियोगित्वाव्यापकत्वादिति वाच्यम्, साध्यहेत्वोर्व्याप्तिग्राहकतर्कसत्त्वा सन्दिग्धोपाधित्वस्याप्ययोगात् । एतेन प्रागभावानङ्गीकारे एतदुपादानकत्वाभाव एवोपाधिरित्यप्यपास्तम् । उक्त हि मणौ 'यत्र साध्यहेत्वो साध्योपाध्योर्वा व्याप्तिग्राहकसामान्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सदिग्धोपाधित्वम् । यत्र त्वेकत्र तर्कावतारस्तत्र हेतुत्वमुपाधित्व वा निश्चितमत एव पचेतरत्व न सदिग्धोपाधि इति । प्रकृते च प्रत्यक्षादेरनुकूलतर्कस्य प्रतिस्थापनायामेव सत्त्वात् ।

वेदाविरुद्धयुक्तीनामर्कं तर्ककुतूहले ।
सुचित्सुखीयकुसुम चित्सुखीयाद्वय कृतम् ॥१२॥

त्रयोदशोंऽशः

यत्तु आनन्दबोधाचार्यैः 'विमत ज्ञानव्यतिरेकेणासत्, ज्ञानव्यतिरेकेणानुपलभ्यमानत्वात्, स्वप्नादिवद्' इति तन्न, ज्ञानव्यतिरेकेणासत्त्व हि ज्ञानभिन्नत्वाज्ज्ञानकालमात्रस्थितिकत्व वा ? हेतुरपि किं ज्ञानोद्देदेनानुपलभ्यमानत्वमुत ज्ञानाभावप्रयुक्तविरहप्रतियोग्युपलब्धिकत्वम् ? नाद्य, बौद्धोक्तसहोपलम्भनियमहेतोरस्य "नाभाव उपलब्धे" इत्यादिसूत्रेष्वेव निरस्तत्वात् । पटस्य ज्ञान न तु पट इति प्रत्ययात् स्वरूपसिद्धे । नान्त्य, अभेदे प्रयोज्यप्रयोजकभावविरहात् । दृष्टान्तोऽपि स्वप्नज्ञान तद्विषयो वा ? नाद्य उक्तदिशा साधनवैकल्यात् । नान्त्य अत एव जाग्रत्प्रत्ययविषयाणामेवार्थाना तद्विषयत्वोपगमेन साध्यवैकल्याच्च । यत्तु तस्य तात्पर्यमुक्तम्—

उक्तमिथ्यान्तरत्व साध्य स्वावच्छिन्नचिद्विषयत्व हेतु । जडानामेव चिदवच्छेदकत्वान्न ब्रह्मणि हेतु । यद्वा सत्तादात्म्याविषयकबुद्ध्यविषयत्व हेतु सदविषयकबुद्धिविषयकत्वस्य ब्रह्मसाधारण्यात्तादात्म्यनिवेश । वेदान्तिमते तादात्म्यस्य भेदनियतत्वादत्यन्ताभेदे तदनङ्गीकारात्" इति तदसत्, स्वरूपसिद्धे । चैत्र पचतीत्यादिज्ञानस्य सत्तादात्म्यविषयकत्वे मानाभावात् । घट सन्नित्यादावपि सत्तादात्म्यस्य नियमेन मानाभावात् । सत्ताया आश्रयत्वसबन्धेनापि भानसभवात् । सत्ताया ब्रह्मधर्मत्वनिरासाच्च ।

वेदाविरुद्धयुक्तीनामर्कं तर्ककुतूहले ।
मानन्दमितमानन्दबोधमिथ्यात्वगोचरम् ॥ १३ ॥

चतुर्दशोंऽशः

यत्तु कौमुदी—विमत मिथ्याधीकाल एवान्यथा प्रमितत्वात् चित्रनिम्नोन्नतादिवत् । भारूपवस्तु सलग्नत्वात्, सवितृच्छिद्रादिवदिति । न चासिद्धि स्वधीकाल एव । "इद सर्वं यदयमात्मा इति श्रुत्या सर्वानात्मन आत्मत्वेन प्रमिते घटादि स्फुरतीतिभारूपमलग्नत्वाच्चेति, तदप्यसत् , सर्वेषा प्रपञ्चधीकाल इद सर्वमिति श्रुतिजन्यात्मत्वधीनियमाभावेन स्वरूपासिद्धे , तदर्थंस्यान्यथैव व्यवस्थापितत्वाच्च । अत एव दृष्टान्तोऽपि साध्यविकल चित्रनिम्नोन्नतस्यापि स्वाभावविषयकत्वनियतज्ञानविषयत्वाभावात । भारूपस्याप्युभयसाधारणस्य दुर्वचत्वात् । ज्ञानविषयत्वातिरिक्तस्य ज्ञानसलग्नत्वस्य पटादावभावाच्च ।

यत्तु प्रपञ्चविलक्षणाखण्डानन्दरूपेण प्रमितत्वादिति हेत्वर्थं, तच्च कल्पित ब्रह्मण्यपीति स्वधीकाले इत्युक्तम्। ब्रह्मधीकाले च ब्रह्मणि न तत् , ब्रह्मधिय स्वेतरकल्पितध्वसरूपत्वात् । तथा च ब्रह्मवृत्तिस्तद्धीविषयत्वावच्छिन्नप्रतियोगिताको वा भेदो हेतुरिति वदयमाणे जडत्वहेतौ तात्पर्यम्। भारूप स्वप्रकाशरूप तत्र सम्यग्लग्नत्वात्। यावत्स्वरूप सबद्धत्वात्। ब्रह्मण स्वस्मिन् सबन्धस्तु यथोक्त शुक्तिरजतादि वति न विशेष इति तदपि चिन्त्यम्, उक्तहेतोरप्यसिद्धे ब्रह्मभेदस्यापि ब्रह्मणि सत्त्वेन सम्मते व्यभिचाराच्च ।

वेदाविरुद्धयुक्तीनामकें तर्कचुतूहलि ।
हत बहुलयोगेन कोमुद्यद्वयमुद्यतम् ॥ १४ ॥

पञ्चदशोंऽशः

यन्तु "एतत्पटात्यन्ताभाव एतत्तन्तुनिष्ठ एतत्पटभावत्वान्नाद्य, एतत्पटात्यन्ताभाववत् । तन्तुनाशजन्यपटनाशे तन्तुवृत्तित्वस्य बाधितत्वात्। तन्न व्यभिचारवारणायानादीति । असमवायिकारणनाशजन्यनाश प्रतियोगिपटात्यन्ताभावस्य पक्षत्वे तु स्वरूपासिद्धिवारणाय हेतावपि तत्परस्य निवेशयत्वादनादिपद न देयमेव, व्यर्थत्वात् । न च व्यधिकरणसबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावे सिद्धसाधन पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादिति, तन्न, पटप्रतियोगिकत्वविशिष्टात्यन्ताभावत्वस्य पक्षतावच्छेदकत्वे पटसयोगस्यापि घटप्रतियोगिकत्वेन स्वात्यन्ताभावाभावत्वेन च पक्षतावच्छेदकावच्छिन्नतया तत्र बाधापत्ते । नहि परैरपि समवायिनि कार्यसयोग स्वीक्रियते । समवायसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वविवक्षायामप्येतद्घटध्वसस्य स्वात्यन्ताभावात्यन्ताभावत्वस्वरूपपक्षतावच्छेदकाक्रान्तत्वेन तत्रोक्तेर्हेतोर्भागासिद्धिप्रसगात् । घटनिष्ठप्रतियोगितानिरूपितानुयोगित्वावदत्यन्ताभावत्व पक्षतावच्छेदकम् । घ्वसस्यात्यन्ताभावत्व तु अत्यन्ताभावनिष्ठप्रतियोगितानिरूपितमेवेत्युक्तावप्येतत्तन्तुनिष्ठत्व पटकालावच्छेदेन साध्य चेत् तदा प्रागभावे व्यभिचार । अन्यथा तु पटपूर्वकालावच्छेदेन तन्तुनिष्ठत्वमादाय सिद्धसाधनम्। अनवच्छिन्नविशेषणतया एव तन्तुनिष्ठत्वस्य साध्यत्वे प्रागभाव एव व्यभिचार । एतेन तत्पटप्रागभावस्तन्त्ववच्छिन्नचैतन्येऽविद्यायाश्च वर्तते न तु तत्तन्ता, वेदान्तिमत तत्तदवच्छिन्नचैतन्यस्य विवर्तोपादानतया विद्यायाश्च परिणाम्युपादानतया तन्तास्तत्पटानुपादानत्वात् । अतो व्यभिचारवारणाय तन्तुपद तत्पटोपादानपरम्। तत्पर तन्तुरन्येषा चैतन्यमस्माकमित्यन्यदेतत्। एतत्पटप्रागभावश्च तत्रास्त्येवेति न दाष इत्यपि परास्तम् । तत्पक्षेऽपि पटोत्पत्त्यनन्तर चैतन्ये विद्याया वा तत्पटप्रागभावाभावेनाक्रान्यतरदोषावश्यकत्वात्। साधनावच्छिन्नसाध्यव्यापकस्य समवायानवच्छिन्नप्रतियोगिताकत्वस्योपाधित्वाच्च । सबन्धान्तरावच्छिन्नप्रतियोगिताकतत्पटाभावे साधनाव्यापकत्वाच्च । एतेन समवायसबन्धावच्छिन्न एतत्परत्वान्यधर्मानवच्छिन्नश्चायमेतत्पटात्यन्ताभाव एतत्तन्तुनिष्ठ एतत्पटात्यन्ताभावत्वात् । सबन्धान्तरावच्छिन्नैतत्पटात्यन्ताभाववदित्यपि निरस्तम् ।

यदपि पटत्व स्वप्रतियोगितावच्छेदकत्व स्वाश्रयनिष्ठाधिकरणतानिरूप-

कतावच्छेदकत्व चेत्युभयसंबन्धेनात्यन्ताभाववदनात्मत्वात् संयोगत्व-वदिति,तदपि न,समवायिनि संयोगसबन्धेनात्यन्ताभावमादाय सिद्धसाधनात्। न च समवायावच्छिन्नत्व प्रतियोगितायां विशेषणम्, अत्यन्ताभावस्यापि तन्मते मिथ्यात्वेनात्यन्ताभावत्वस्य हेतुमतोऽपि समवायसबन्धावच्छिन्ना या-त्यन्ताभावप्रतियोगिता तदवच्छेदकत्वसबन्धेनात्यन्ताभावरूपसाध्यविरहेण व्यभिचारात्। तन्मते आत्मभेदस्यात्मन्यपि सत्त्वेन तत्रोक्तसाध्याभावेन व्यभि-चाराच्च। अत्यन्ताभावत्व स्वाश्रयप्रतियोगितावच्छेदकत्व स्वाश्रयसामानाधि-करण्यनिरूपकतावच्छेदकत्व चेत्युभयसबन्धेन पटत्वाभाववत्, ससर्गाभाव-विभाजकोपाधित्वाद्ध्वसत्ववदिति फलत प्रतिरोधाच्च। स्वपदमत्यन्ता-भावत्वपर सबन्धेनेत्यन्त पटत्वाभावप्रतियोगितावच्छेदकसबन्धप्रदर्शनम्।

यदपि नित्यद्रव्यान्यद्रव्याप्यवृत्तित्वानधिकरण सामान्यानुमानोक्तपक्षता-वच्छेदकवत् केवलान्वय्यत्यन्ताभावप्रतियोगि पदार्थत्वान्नित्यद्रव्यवत्। न्यायमते गगनाद्यत्यन्ताभावस्यापि गगनाद्यात्मकात्यन्ताभावप्रतियोगिकत्वा-त्केवलान्वयित्व वृत्तिमदत्यन्ताभावप्रतियोगित्व वाच्यम्। अतो न दृष्टान्ते साध्यवैकल्यम्। गगनादे. स्वाभावाभावात्मकत्वस्य दीधितिकारोक्त-रीत्या प्रमाणाभावादस्वीकारे तु वृत्तिमत्वद न देयमेव। अधिष्ठानचिद्रू-पात्यन्ताभावस्यात्यन्ताभावप्रतियोगित्वाभावात्तादृशचिद्रूपोऽत्यन्ताभावप्रति-योगी योऽत्यन्ताभावस्तत्प्रतियोगित्वमनात्ममानेऽस्ति। न च ब्रह्मणि व्यभि-चार, ब्रह्मविषयकविषयस्य हेतुत्वात्। स्वमते शुक्तिरूपमेव दृष्टान्त। न च स्वन्मतेऽत्यन्ताभावस्याधिष्ठानात्मकत्वाच्छुक्तिरूप्यात्यन्ताभावस्य शुक्त्य-वच्छिन्नचिद्रूपतया तस्याश्च घटादिनिष्ठात्यन्ताभावप्रतियोगित्वात्कथ केवला-न्वयित्वमिति वाच्यम्; अवच्छिन्नशुद्धयोरैक्यस्वीकारेण शुद्धचितोऽपि तद-त्यन्ताभावत्वात्, तस्याश्चात्यन्ताभावप्रतियोगित्वानभ्युपगमादिति, तदप्य-सत्, तन्मते ज्ञानमात्रस्य ब्रह्मविषयकत्वेन स्वरूपासिद्धे. "सर्वप्रत्ययवेद्यंव ब्रह्मरूपे व्यवस्थिते" इति सिद्धान्तात्। नन्व्यत्यासेन ब्रह्मान्यविषयकविषय-त्वस्य हेतुत्वेऽपि शुद्ध ब्रह्म न विषय इति मते विशेषणवैयर्थ्यात्।

किञ्च शुद्धचितोऽपि कपालाद्यवच्छिन्नचिद्रूपतया तदात्मककेवला-न्वय्यत्यन्ताभावप्रतियोगित्वेन पटादौ सिद्धसाधनम्। न चावच्छिन्नचितो न केवलान्वयित्व मिति वाच्यम्; तथापि हि घटस्य द्वावत्यन्ताभावौ–अवच्छिन्न-चिच्छुद्धचिच्चेति परिभाषास्तु नाम तावत्, तथाप्यत्यन्ताभावत्वेनैव रूपेण केवलान्वयितत्प्रतियोगित्व साध्यम्। तद्रूपेणैव चितः प्रतियोगिनिरूप्यत्वात्।

त्किञ्चित केवलान्वयित्वेनान्यथा चिद्रूपात्यन्ताभावप्रतियोगित्वस्य सार्वत्रिकत्वेन तदभावरूपकेवलान्वयित्वस्यैवाप्रसिद्धयापत्ते । तथा च मुक्त्यवच्छिन्नचिद्रूपस्य प्रतियोगिसापेक्षात्यन्ताभावत्वरूपेण घटादिनिष्ठात्यन्ताभावप्रतियोगित्वाद्दृष्टान्तस्य साध्यवैकल्य दुर्वारम् रूपान्तरेण केवलान्वयित्वस्यानुपयुक्तत्वात् ।

किञ्च अत्यन्ताभावस्यापि पक्षतावच्छेदकावलीढतयात्यन्ताभावप्रतियोगित्वात्यन्ताभाववदत्यन्ताभावप्रतियोगित्वरूपसाध्यस्य बाध । यत्रात्यन्ताभावेऽत्यन्ताभावप्रतियोगित्वात्य ताभावो बाध्यस्तस्य सा[धन] वैकल्यापत्त । अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येनापि बाधस्य विरोधित्वात् । पक्षतावच्छेदकीभूतावान्तरधर्मभूतात्यन्ताभावत्वावच्छेदेनानुमितौ यत्किञ्चिदत्यन्ताभावे उक्तरीत्या बाधस्य वृत्तत्वात्, अत्यन्ताभावत्वावच्छेदेनाप्यत्यन्ताभावप्रतियोगित्वसिद्धौ घटादीना नाद्दशात्यन्ताभावप्रतियोगित्वमिद्धरसभवाच्च । परार्थत्वादिहेतुस्त्वप्रयोजक । अन्यथा आकाशादिक वृत्तिमत्, द्रव्यत्वादित्यादिकमपि स्यात् । किंच केवलान्वयित्व सबन्धविशेषगर्भम् । उक्त हि दीधितौ यत्सबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्व यस्य तस्य तेन सबन्धेन केवलान्वयित्वम् । अत एव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयत्वादेश्च व्यधिकरणेन समवायादिना सबन्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासबन्धेन स्वरूपसबन्धेन च केवलान्वयित्वम्' इति । एवमत्यताभावस्यापि सबन्धविशेषावच्छिन्नप्रतियोगिताकस्यैव तत् अन्ययाकाशादेरपि कालिकादिना घटादिवृत्तित्वात् तदवच्छिन्नाभावोऽपि तथा स्यात् । एवञ्च तत्सबन्धविशेषगर्भाभावस्य केवलान्वयित्व प्रवेशे यथामव व्यभिचारादि अत्यन्ताभावप्रतियोगित्वाभावमात्रनिवेशे त्व प्रसिद्धि । यत्किञ्चित्सबन्धेन सत्त्वस्यैवात्यताभावस्य सार्वत्रिकत्वात् सिद्धसाधनञ्च । घटात्यन्ताभावो न केवलान्वयी, पटाभावत्वात् पटध्वसवदिति प्रतिबाधाच्च । पक्षतावच्छेदकैक्यस्याप्रयोजकत्वादेकदेशबाधसत्तश्च ।

यदपि आत्मत्वावच्छिन्नधर्मिका भेदा न परमार्थसत्प्रतियोगिक आत्मप्रतियोगिकत्वाच्छुक्तिरूप्यभेदवदिति तन्न ईदृशभेद परमार्थसत्प्रतियोगिक, भेदत्वात् परनिष्ठात्मभेदवदिति प्रतिरोधात् । न च शुक्तिरूप्यभेदे व्यभिचार । अप्रातिभासिकत्वस्य भेदविशेषणात्, मन्मते भेदमात्रमपि साध्यसम धाच्च ।

एतेन परमायंसत्व स्वसमानाधिकरणान्योन्याभावप्रतियोग्यवृत्तिसदितरावृत्तित्वात् ब्रह्मत्ववत् । ब्रह्मत्वमेकत्व वा सत्वव्यापक सत्वसमानाधिकरणत्वादसद्वैलक्षण्यवदिति परास्तम्, हेतो साध्याविशिष्टत्वात् सदितरस्य प्रसिद्धेश्च । ब्रह्मत्व न सत्वव्यापक सत्वनिष्ठात्यन्ताभावप्रतियोगित्वात् घटत्ववदिति प्रतिरोधाच्च । न च साध्याविशेष, अखण्डावच्छेदकघटितव्याप्तिनिरूपकत्वरूपव्यापकत्वाभावस्य साध्यत्वात् । पटनिष्ठात्यन्ताभावप्रतियोगित्वस्य वा हेतुत्वात् ।

यदपि व्याप्यवृत्तिर्घटादिर्जन्याभावातिरिक्तसमानाधिकरणाभावमात्रप्रतियोगी, अभावप्रतियोगित्वादभिधेयत्ववत्, तद्धि परमते केवलान्वयित्वात् स्वसमानाधिकरणभेदमात्रप्रतियोगि । अस्मन्मते तु मिथ्यात्वात्स्वसामानाधिकरण्यात्यन्ताभावप्रतियोग्यपीत्युभयथा न साध्यवैकल्यम् । अगवीयप्रतियोगिताना सबन्धावच्छिननया सयोगादिप्रतियोगिताना च तदनवच्छिननया परस्परवैलक्षण्येन तासु प्रतियोगितात्वस्यैकत्याभावेन सयोगादिप्रतियोगितास्वरूपेण हेतुत्वे गुणादौ भागासिद्धि स्यादतोऽभावीयप्रतियोगितायां हेतुबलाभाय हेतावभावपद प्रतियोगितात्वस्यैक्ये तु प्रतियोगितासबन्धेनाभावो हेतु । अव्याप्यवृत्तित्वेनार्थान्तरवारणाय व्याप्यवृत्तिपदं बाधस्फोरणायेति, तन्न, मात्रपदस्य साकल्यार्थत्वे दृष्टान्तस्य साध्यवैकल्यात् । अयाजन्यस्वसमानाधिकरणान्यध्वाप्रतियोगीति साध्यम् । कपालादिनाशनाश्ये पटादौ समानाधिकरणान्यस्य ध्वसस्य प्रतियोगित्वसत्त्वाद्बाधवारणाय अजन्यति । अधिकरणान्तरनिष्ठात्यन्ताभावप्रतियोगित्वस्य घटादौ सर्वसिद्धत्वादत्यन्ताभावस्य पटसामानाधिकरण्याभावे च तस्याप्यजन्यत्वे सति घटसमानाधिकरणान्यत्वापत्या तत्प्रतियोगित्वव्यवच्छेद पक्षे बाधित स्यादिति पक्षधर्मतावलादत्यन्ताभावस्य पर[पूर्व]सामानाधिकरण्यसिद्धिरिति चेत्, न, स्वकालावच्छेदेन सामानाधिकरण्य भेदप्रतियोगितावच्छेदकत्वेन निवेशन उक्तैककालानन्तर्भावेन ? नाद्य, उक्तसमानाधिकरणान्यस्याजन्यस्य च प्रागभावस्य प्रतियोगित्वेन बाधात् । न द्वितीय, घटपूर्वापरकालीनतत्सामानाधिकरण्यन तदत्यन्ताभावस्य सिद्धसाधनात्, अवृत्तिषु व्यभिचाराच्च । तदधिकरणाप्रसिद्धया समानाधिकरणान्यत्वस्याप्यप्रसिद्धे । न च तदनधिकरणाधिकरणत्वरूपसमानाधिकरणान्यत्व तत्रापीति वाच्यम्, दृष्टान्तस्य साध्यवैकल्यापत्ते, प्रमेयत्वानधिकरणस्याप्रसिद्धे । अधिकरणभेदेनाभावभेदपक्षे बाधाच्च । यदप्यत्यन्ताभाव प्रतियोग्यवच्छेदकावच्छिननवृत्ति नित्याभावत्वादन्योन्याभाववदवच्छेदकावच्छेदेना-

नुमितेरुद्देश्यत्वात् कुत्रचित् सिद्धसाधनेऽपि न दोष इति, तन्न; आकाशादौ भागबाधाच्च प्रागभावप्रतियोगित्वात्यन्ताभावे बाधाच्च। न च तत्रापि प्रतियोगिसामानाधिकरण्यमस्त्येवेति वाच्यम्, प्रागभावप्रतियोगित्वाभाववत्त्वे सति ध्वसप्रतियोगित्वाभाववदभावत्वहेतोर्ध्वंससाधारण्यापत्तेः। न च सत्यन्तस्य नित्यपदार्थघटकस्यापि प्रकृते व्यर्थत्वान्निवेशो नेति वाच्यम्; ध्वसे व्यभिचारस्योद्भटत्वात् समवायिनाशजन्यघटनाशे प्रतियोगिसामानाधिकरण्यविरहात्। अत्यन्ताभावो न प्रतियोग्यवच्छेदकावच्छिन्नवृत्ति ससर्गाभावत्वात् ध्वसवदिति सत्प्रतिपक्षाच्च। अत्यन्ताभावप्रतियोगिकात्यन्ताभावे बाधाच्च। नवीनमते तस्याभावरूपत्वादत्यन्ताभावरूपतत्प्रतियोग्यवच्छेदकाप्रसिद्धे। घटात्यन्ताभावस्यापि परैरनवच्छिन्नवृत्तिकत्वस्योपगमात्। यदप्यत्यन्ताभावत्व स्वावच्छेदकविशिष्टतदवृत्तिध्वसनिरूपकत्व चेत्युभयसबन्धेन प्रतियोगितावैशिष्ट्य यत्तदवृत्तिनित्याभाववृत्तित्वादन्योन्याभावत्ववदिति, तदप्यसत्; अत्यन्ताभावत्वमुक्तोभयसबन्धेन प्रतियोगितावैशिष्ट्य यत्तदवृत्तिससर्गाभावविभाजकोपाधित्वात् ध्वसत्ववदिति प्रतिरोधात्। तद्घटत्वादिरूपप्रतियोगितावच्छेदकस्य तत्रापि सुलभत्वात्। एतेनावच्छिन्नवृत्तिकावृत्तित्वसाध्यमपि प्रतिरुद्ध बोद्धव्यम्। यदपि घटाभावत्वं स्वप्रतियोगिजनकाभावसमानाधिकरणवृत्त्येतद्घटसमानकालीनतद्घटाभाववृत्तित्वात्, प्रमेयत्ववत्। स्वमत्यन्ताभाव', तत्प्रतियोगिजनकाभाव. प्रागभाव, तत्सामानाधिकरण्य चानवच्छिन्न निवेश्यम्। तेन तादृशाभावानवच्छेदकेन तद्घटध्वसकालेनावच्छिन्नप्रागभावसामानाधिकरण्य घटात्यन्ताभावमादाय तद्वृत्तित्वेन न सिद्धसाधनम्। तत्कपालनाशजन्यतद्घटध्वसत्वे व्यभिचारवारणाय कालीनान्त तत्कपालनाशानाश्यघटव्यक्तिप्रवेशे तु तत्र देयम। अनादिप्रतियोगिकाभावत्वे व्यभिचारात्। एतद्घटप्रतियोगिकेति, तद्घटसयोगादौ व्यभिचारादभावत्वेति, तदप्यसत्, नित्यप्रतियोगिकात्यन्ताभावे व्यभिचारात्। तन्न स्वप्रतियोगिजनकादेरप्रसिद्धेः।

यदप्येतत् कपालमेतद्घटात्यन्ताभावाधिकरणम्, आधारत्वात्, पटादिवदिति, तदप्यसत्; एतत्प्रागभावानाश्रयत्वस्योपाधित्वात्। यदपि ब्रह्मत्वेन परमार्थैरनिष्ठान्योन्याभावप्रतियोगितावच्छेदकम्, ब्रह्मवृत्तित्वात्, असद्वैलक्षण्यवदिति, तदप्यरमणीयम्, तन्मते ब्रह्मवृत्तेरपि घटस्य परमार्थसद्ब्रह्मनिष्ठान्योन्याभावप्रतियोगितावच्छेदकम्, भेदानुयोगितावच्छेदकत्वात्, घटत्ववदिति प्रतिरोधाच्च। यद्वा यावत्परमार्थसद्वृत्तित्वात् यद्यावद्भेदाश्रयावृत्ति

नत्तन्निष्ठभेदप्रतियोगितावच्छेदकम् यथा घटभेदाश्रयत्वावत्पटावृत्ति घटत्व घटनिष्ठभेदप्रतियोगितावच्छेदकमिति प्रतिहेतु । परमार्थसत्प्रतियोगिको भेदो न परमार्थसन्निष्ठ परमार्थसत्प्रतियोगिकत्वात्, परमार्थसत्त्वावच्छिन्नप्रतियोगिकाभाववदित्यादि न साधु, ब्रह्मभेदस्य ब्रह्मवृत्तितया स्वयमेव स्वीकारेण व्यभिचारात् । ब्रह्मप्रतियोगिको भेद प्रतियोगिसमानसत्ताकानुयोगिनिष्ठ, प्रातिभासिकानिष्प्यभेदत्वात्, घटनिष्ठपटभेदवदिति तद्रीत्या प्रतिरोधाच्च । एतेन परमार्थसन्निष्ठो भेदो न परमार्थसत्प्रतियोगिक, परमार्थसदधिकरणकत्वात्, शुक्तिरूप्याभाववदित्यपि तथैव वोध्यम्, दृष्टान्तेऽपि सद्विलक्षणत्वासिद्धे, ब्रह्मभेदस्यापि ब्रह्मवृत्तितया व्यभिचाराच्च । भेदत्वावच्छिन्न सन्मानप्रतियोग्यधिकरणक भेदत्वात्, ब्रह्मवृत्तिब्रह्मभेदवदिति प्रतिरोधाच्च । मिथ्यात्वत्व ब्रह्मानुच्छेदमयातिरिक्तत्वव्यापकतावच्छेदक सकलमिथ्यात्ववृत्तित्वादित्यादिक स्वाश्रयासिद्धयैव सावद्यम् । अन्यत् सूरिभिरूह्यम् ।

अपि च—

> ये वेदा अनुकूलतर्कपदवीं नीता परैरद्वये
> प्रागेवापरया तदर्थकथनाद्दाद्यक्तदूषणात् ।
> सामान्येन विशेषतोऽप्यभिहिता अद्वैतवैतण्डिकै-
> र्विज्ञेया ध्रुवमप्रयोजकतया हेत्वा हता हेतव ॥"

किञ्च—

> अद्वैतानुगितोना शतमपि बाधादितोन्नयन ।
> पत्तेनरोऽप्युपाधिर्बाधितुमन्ते कृतसमाधि ॥
>
> वेदाविरुद्धयुक्तीनामर्कै तर्ककुतूहले ।
> मिथ्यात्वस्यानुमानानां भानत्यमथमानितम् ॥१५॥

षोडशोंऽशः

एव स्थिते विश्वमत्त्वानुमानानि निर्बाध प्रवर्तन्ते । तथाहि प्रमेयत्वमेतत्पटतत्पटात्यन्ताभावोभयानधिकरणाकृत्ति धर्मत्वात् भूतलत्ववत् । न चसाध्याप्रसिद्धि एतत्पटात्यन्ताभाववत्त्वेनोभयसिद्धो भूतले यथोक्तोभयानधिकरणत्व स्य सत्त्वात् । मिथ्यात्ववादिनापि पटवत्ति पटान्यन्ताभावस्वीकारेऽपि पटात्यन्ताभावत पटवत्त्वनियमानभ्युपगमात् । अत्यन्ताभावत्व प्रतियोग्यधिकरणावृत्त्यन्योन्याभावभिन्नाभावमात्रवृत्तित्वात् ध्वसत्ववत् । मात्रवृत्तिपद तदितरावृत्तित्वपर न तु साकल्यार्थकम्, तेन न स्वरूपासिद्धि । अय पट स्वात्यन्ताभावाधिकरणवृत्तिर्द्रव्यत्वादाकाशवत्, एतत्पटात्यन्ताभाव प्रतियोग्यनधिकरणमात्रवृत्ति, द्रव्यात्यन्याभावत्वात्, आकाशात्यन्ताभाववत् । सयोगात्यन्ताभावे व्यभिचारवारणाय द्रव्यपदम् । न च दृष्टान्ते प्रतियोग्यनधिकरणेतरस्याप्रसिद्धि, साकल्यार्थकत्वे तु सिद्धसाधनमिति वाच्यम्, प्रतियोग्यनधिकरणवृत्तित्वव्याप्यतायां साध्यत्वात् । अय पट कपालावृत्तितन्तुवृत्त्यभावप्रतियोगी पटपटान्यतरत्वात् पटवत् । प्रागभावप्रतियोगित्वमादाय दृष्टान्ते साध्यप्रसिद्धि । पक्षे तु कपालावृत्तित्वस्य घटप्रागभावे भेदे च बाधितत्वात्तादृशात्यन्ताभावसिद्धि । एतत्कपालमेतद्घटनित्याभावानधिकरणम् एतत्समवायनिरूपकत्वात्, एतद्घटवत् । भेदमादाय दृष्टान्ते साध्यसत्त्वम् । पक्षे तु तदभावस्य बाधित्वात्तदत्यन्ताभावमादाय साध्यपर्यवसानम् । एव चान्योन्याभावातिरिक्ततद्घटसमानाधिकरणेतद्घटप्रतियोगिकाभावत्वमेतद् घटसमानकालीनावृत्त्यन्यो याभावातिरिक्तैतद्घटसमानाधिकरणेनद्घटप्रतियोगिकाभावमात्रवृत्तित्वादेतद्घटप्रागभावत्ववत् । व्यधिकरणधर्मावच्छिन्नत्वमपि तत्पक्षे वाच्यम् । अत्र स्वसमानकालीनस्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरूपसत्त्वसिद्धिरित्यपि साधोय ।

न च साधनावच्छिन्नसाध्यव्यापकमेतद्घन्प्रतियोगिकजन्यजनकान्यतरमात्रवृत्तित्वमुपाधि । भवति हि यत्रोक्तसाधनावच्छिन्नत्वमेतद्घटसमानकालीनत्वमेतद्घटप्रागभावत्वे तादृशध्वसत्वे च तत्रैतद्घटप्रतियोगिकजन्य जनकतद्घन्ध्वसप्रागभावरूपान्यतरमात्रवृत्तित्वमिति वाच्यम्, हेता पूर्वोक्तयुक्तया साध्यव्याप्यत्वेन तद्व्याप्यहेत्वव्याप्यत्वेनोक्तोपाधे साध्यव्यापकत्वा-

भावात् । न चात्यन्ताभावत्वे व्यभिचार., सयोगसबन्धेन घटवत्य भूतले समवायेन तदाभावसत्त्वात् साध्याभाववति तत्र हेतोर्वृत्तित्वाद्येन सबन्धेन यद्-घटाधिकरण तत्सबन्धावच्छिन्नप्रतियोगिताकाभावमात्रवृत्तित्वविवक्षाया च दृष्टान्तस्य साधनवैकल्यादिति वाच्यम् , येन सबन्धेन यद्घटाधिकरण तदन्य-सबन्धावच्छिन्नप्रतियोगिताकाभावमात्रवृत्तित्वस्य हेत्वर्थत्वात् । प्रागभावप्रति-योगितायाश्च भानाभावेन केनापि सबन्धेनानवच्छिन्नत्वान्न साधनवैकल्यम् । एवञ्च तत्र हेत्वभावादेव न व्यभिचार. । किञ्चात्यन्ताभावत्वम्, प्रतियोग्य-समानाधिकरणवृत्तिसंसर्गाभावविभाजकोपाधित्वात्,प्रागभावत्ववत् । अय घटो घटप्रागभावातिरिक्तकपालावृत्त्यन्याद्यभावप्रतियोगी, जन्यत्वात्, पटवत् । भेदेन सिद्धसाधनवारणाय कपालावृत्तीति । घटकालावच्छेदेन कपालावृत्तित्वस्य विवक्षितस्य प्रागभावेऽपि सत्त्वात्तेन सिद्धसाधनवारणायातिरिक्तान्तम् । कपालध्वंसजन्यध्वंसेन तद्वारणायानादीति । स्वप्रागभावप्रतियोगित्व-मादाय दृष्टान्ते साध्यप्रसिद्धिः । पक्षधर्मताबलादेतद्घटकालावच्छेदेनैत-त्कपालावृत्त्यत्यन्ताभावसिद्धि. । एतद्घटध्वस. घटान्याद्यभावानधिकरणा-वृत्ति, ध्वसत्वात्, पटध्वसवत् । प्रागभावरूपघटान्याद्यभावानधिकरणान्त तु वृत्तित्वाद् दृष्टान्ते साध्यसमन्वय. । कपालस्य तु घटप्रागभावानधिकरणत्व-बाधात्तादृशात्यन्ताभावपर्यवसानम् ।

न च कपालनाशजन्यघटनाशे व्यभिचारः, घटप्रागभावानधिकरण-वृत्तित्वेनैव तत्र साध्यसत्त्वात् । यद्वा सयोगनाशजन्यघटनाश एव पक्षः । तादृशध्वसत्वमेव हेतुः । एतद्घटात्यन्ताभाव एतत्कपालनिष्ठात्यन्ताभाव-प्रतियोगी, अनाद्येतद्घटससर्गाभावत्वात्, एतद्घटप्रागभाववत् । घटकाले तत्प्रागभावस्य कपाले सर्वैरप्यनभ्युपगमात्, ध्वसे व्यभिचारवारणायाना-दीति । भेदे तद्वारणाय ससर्गेति । एतद्घटध्वसः स्वाव्यवहितपूर्वक्षणावच्छे-देन स्वाधिकरणवृत्तिघटत्वानवच्छिन्नप्रतियोगिताकघटान्याद्यभावकः, एतद्घटप्रागभावध्वसत्वात्, एतद्घटवत् । एतद्घटप्रागभावस्य हि द्वौ ध्वंसौ, एतद्घट., एतद्घटध्वसश्च । उभयत्रापि घटप्रागभावो ध्वस्त इति व्यवहारात् । अत. साधनस्य पक्षदृष्टान्तस्य साधारण्यम् । घटत्वावच्छिन्न-प्रतियोगिताकाभावेन सिद्धसाधनवारणाय घटेति । न च तथापि व्यासज्य-वृत्तिना व्यधिकरणेन वा धर्मेणावच्छिन्नप्रतियोगिताक घटाभावमादाय तदिति वाच्यम्; तादृशाभावानभ्युपगमात् । अन्यथा तु घटत्वं घटवृत्ति-भेदप्रतियोगितावच्छेदकं चेदुभयधर्मानवच्छिन्नत्वेन प्रतियोगितया विशेष-

दोषत्वात्। वह्नित्वादेरभावत्वादेश्च घटवृत्तिभेदप्रतियोगितावच्छेदकत्वानोक्तदोषः। न च वैशिष्ट्यावच्छिन्नप्रतियोगिताका अन्योन्याभावसामानाधिकरण्यविरहविशिष्टा घटत्वावच्छिन्नप्रतियोगिताकाभावसाध्या निष्प्रत्यूह इति वाच्यम्, दृष्टान्तस्य साध्यवैकल्यापत्तेरित्यपि वाच्यम्, निष्प्रत्यूहघटत्वावच्छिन्नप्रतियोगिताकघटाभावस्य साध्यत्वात्। सामान्याभावाधिकरणे च विशेषाभावोऽप्रसिद्धो नेति सामान्येनाप्यवच्छेदकत्वमुपेत्योक्तसिद्धसाधनम्। सामान्यावच्छिन्नप्रतियोगिताकत्वस्य विशेषाभावसमुदाये व्यधिकरणवृत्तित्वेऽपि यथाकथञ्चित्सत्त्वात्।

अथ तथापि सामान्याभावत्वातिरिक्तस्य विशेषाभावीयप्रतियोगिता सामान्यावच्छिन्नतया विशेषाभावेनादाय सिद्धसाधनम्, प्राचीननयेनैव प्रवृत्तेः। तथा च पूर्वोक्तसामानाधिकरण्यविरहविशिष्टसत्वे नाव्याप्तिरिति। एतद्घटत्वन्ताभाव किञ्चिन्निष्ठात्यन्ताभावप्रतियोगी, अभावत्वादेतत्प्रतियोगितावत्त्वात्। अन्योन्याभावस्यापि प्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वान्न व्यभिचारः। एतद्घटरहितदेशनिष्ठात्यन्ताभावप्रतियोगित्वेनैतद्घटाभावानाभावे बाधितत्वादेतद्घटाधिकरणदेशनिष्ठात्यन्ताभावप्रतियोगित्वसिद्धिः। आकाशादेर्नवित्त्वाभावाभावत्वेन तदा साध्यसत्त्वेन। नो चेद्धेतुरेव नास्ति। उक्तं हि केवलान्वयिग्रन्थे दीधितिकृता "आकाशत्वं तदभावाभावत्वनिरुक्तमेव, भावत्वमपि तत्सत्त्वप्रतीत्या हि भावत्वं स्वभावाभावत्वं कल्प्यते। न चेह तथा" इति। न च तदाप्याकाशाभावाभावे केवलान्वयिनि व्यभिचार इति वाच्यम्, वृत्तिनियामकतावच्छेदकत्वस्य हेतुत्वात्।

न च तथापि घटाद्याकाशाभावे व्यभिचार इति वाच्यम्, घटादिसंयोगावच्छिन्नतत्त्वाभावस्य तत्त्वात्। तस्य प्रतियोग्यवच्छिन्नेऽप्यभावादिति केवलान्वयिग्रन्थे परिष्कारोक्तेः। यद्वा एतज्ज्ञानत्वादिकं हेतुः। न चाभा-

वीयविशेषणतावच्छिन्नप्रतियोगितार्कतद्घटाभावस्य केवलान्वयित्वात्र व्यभिचार, सयोगसम्बन्धावच्छिन्नप्रतियोगितार्काभावनिवेशे तु दृष्टान्तस्य साधनवैकल्यप्रसङ्ग इति वाच्यम्, सयोगान्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभावस्य निवेश्यत्वात्। भेदप्रतियोगितायामपि तादात्म्यसम्बन्धावच्छिन्नत्वस्य मानाभावेनानङ्गीकारात्। एतद्घटात्यन्ताभाव एतद्घटान्योन्याभावव्यभिचारी, एतद्घटसंसर्गाभावत्वात्, एतद्घटध्वसवत्। घटान्योन्याभाववति तन्तौ एतद्घटध्वसाभावादेतद्घटध्वसस्यैतद्घटान्योन्याभावव्यभिचारित्व व्यापकत्वाभावरूपम्। व्यभिचारित्वमत्र साध्यम्। पटवत्यपि घटात्यन्ताभाव सत्त्वनियमे चैतद्घटवदेतद्घटान्योन्याभाववत्त्वनियमादेनद्घटात्यन्ताभावस्यैनद्घटान्योन्याभावव्यापकत्वमेव स्यादित्यथवशादेतद्घटवत्यतद्घटात्यन्ताभावो नास्तीति पर्यवसानम्। एतत्कपालवृत्तिर्घटात्यन्ताभाव एतद्घटत्वानवच्छिन्नप्रतियोगिताक समवायावच्छिन्नप्रतियोगितार्कैनकपालवृत्त्यभावत्वात्, पटाभाववत्। घटसमवायिकपालवृत्तिसयोगसम्बन्धावच्छिन्नप्रतियोगितार्कैतद्घटात्यन्ताभावे व्यभिचारवारणाय समवायावच्छिन्नेति। एतन भेदेऽपि व्यभिचारवारणम्। अन्यवृत्त्येतद्घटाभावे व्यभिचारवारणायैनत्कपालवृत्तीति। समवायेन वृत्त्येतद्घटोभयाभावस्यापि साध्यसम्बन्धान दोष। न चैतद्घटत्वेन वह्न्याद्यभावे हेतुमति साध्याभावाद् व्यभिचार इति वाच्यम्, व्यधिकरणधर्मावच्छिन्नप्रतियोगितासम्बन्धानभ्युपगमात्। तत्पक्षेऽपि तदीयप्रतियोगितायां सम्बन्धानवच्छिन्नत्वानभ्युपगमन तत्र हेत्वभावादेव व्यभिचारानवकाशात्। एतत्कपाल कालिकान्यसम्बन्धेनैनद्घन्तदत्यन्ताभावोभयानधिकरणम्, आधारत्वात्, घटात्यन्ताभाववत्त्वेन सम्प्रतिपन्नभूतलवत्। एतत्कपालवृत्ति एतद्घन्योन्याभाव एनद्घनाद्यभावाभाववदवृत्तिर्भेदत्वात्तान्त्वादिवृत्तिभेदवत्। तत्कपालान्यवृत्तरेतद्घटभेदस्य प्रागभावरूपैतद्घटानाद्यभावाभाववद्वृत्तित्वात्।

न च पक्षेऽपि प्रागभावाभावमेवादाय दृष्टान्तवत् साध्यसत्त्व स्यादिति वाच्यम्; ध्वनाधिकरणे तदत्यन्ताभावो नास्तीति प्राचीनमतेन प्रयोगात्। एतद्घनात्यन्ताभाव एतद्घटे तद्घटात्यन्ताभावान्यतराधिकरणावृत्ति एतद्घटे तद्घटात्यन्ताभावान्यतरत्वात्, एतद्घटवत्। एतद्घटात्यन्ताभावाधिकरणत्वेनोभयसम्प्रतिपन्नदेशवृत्तित्वाभावस्यैनद्घटे सर्वसिद्धत्वात्। एतद्घटात्यन्ताभावे एतद्घटात्यन्ताभावाधिकरणदेशावृत्तित्वन्त्य वाधि-

तत्वादेतद् घटाधिकरणवृत्तित्वमादाय साध्यसिद्धि । एतद् घटात्यन्ताभाव एतद्घटवदवृत्तिरेतद्घटप्रतियोगिकात्यन्ताभावत्वात्, यो यदत्यन्ताभावः स तद्वदवृत्ति यथा घटात्यन्ताभावो घटो घटात्यन्ताभाववदवृत्ति.। एतत्कपालध्वस घटध्वसघटात्यन्ताभावोभयवत्त्वाद्यियतप्रतियोगिक ,ध्वसत्वात्तन्तुध्वसवत् । तन्तौ घटात्यन्ताभावसत्त्वेऽपि घटध्वसाभावात्तन्तुध्वसस्योक्तोभयानियतप्रतियोगिकत्वम्, पक्षे एतत्कपालपदस्य यस्मिन्समवायिकारणसयोगनाशाद् घटध्वसो वृत्तस्तत्परत्वात् । तादृशकपालस्य च घटध्वसाभावप्रयुक्तोभयवत्त्वानियमानुपपत्त्या घटात्यन्ताभावव्यतिरेकप्रयुक्तमेव तद्वाच्यम्, इति तत्कपाले घटात्यन्ताभावाभावसिद्धिः । एतत्कपाल घटध्वसघटात्यन्ताभावोभयानधिकरण कपालत्वात्, अन्यकपालवत् । घटनाशात्पूर्वनष्ट कपाल दृष्टान्त.। पक्षस्तु पूर्वानुमाने पक्षीकृतध्वसप्रतियोगित्वेनोक्तमेवकपालम्। दृष्टान्ते घटध्वसानधिकरणत्वप्रयुक्तमुभयानधिकरणत्वम्। पक्षे तु घटात्यन्ताभावानधिकरणत्वप्रयुक्तमेव । न च ध्वसोत्तर तदधिकरणे तदत्यन्ताभावस्योपगमाद् घटध्वसानधिकरणत्वस्य च तत्राभावाद्बाध इति वाच्यम्,एतदनुमानस्य प्राचीननयेन प्रवृत्ते.। कपाल घटत्वावच्छिन्नप्रतियोगिताकौ यावत्यन्तान्योन्याभावौ तदुभयानधिकरणम्, घटकपालान्यतरत्वात्, पटवत् । घटस्य पटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावाश्रयत्वेऽपि तादृशान्योन्याभावानाश्रयत्वात् । पक्षे तु घटत्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य सर्वसिद्धत्वात् । तादृशात्यन्ताभावानाश्रयत्वेनैव साध्यपर्यवसानम्। अत्यन्ताभावत्व कपालावृत्ति, वृत्तिपदार्थविभाजकोपाधित्वात्, आकाशत्ववत् । विभाजकत्वञ्च साक्षात्परम्परासाधारणम्। तेन पक्षदृष्टान्तयो. साक्षाद्विभाजकत्वाभावेऽपि न क्षति । न चाभावपदार्थस्य सौत्रविभागाभावात्तथापि स्वरूपासिद्धिरिति वाच्यम्, अभावत्वस्य पदार्थविभाजकत्वेन सूत्रतात्पर्यविषयत्वात्। उक्त हि द्रव्योपाये "सामान्यतो द्विविध पदार्थो भावोऽभावश्चेत्यार्थं. पदार्थविभाग, शाब्दश्च साधर्म्यविभाग " इति । एतत्कपाल युगपद्घटघटात्यन्ताभावोभयानधिकरण कपालत्वात्, अनारब्धघटकपालवत् । तत्र परैरपि घटानभ्युपगमात् । एतद् घटात्यन्ताभाव कदाचिदेतत्कपालनिष्ठात्यन्ताभावप्रतियोगी,एतद्घटससर्गाभावत्वात्, एतद्घटध्वसवत् । घटवत्कपाल घटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावानधिकरण घटत्वावच्छिन्नप्रतियोगितावच्छेदकताकान्योन्याभावानधिकरणत्वात् । यो यद्धर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावानाश्रयो न भवति स तद्धर्मावच्छिन्नप्र-

तियोगितावच्छेदकताकान्योन्याभावानाश्रयो न भवति, यथा वह्नित्वावच्छिन-प्रतियोगिताकात्यन्ताभावानधिकरणत्वाभाववान् जलह्रदादिर्वह्नित्वावच्छिन्नप्रतियोगितावच्छेदकताकवह्निमद्भेदानाश्रया न भवतीति व्यतिरेकी। भवति हि वह्न्यभाववति जलह्रद वह्निमान्न भवतीति प्रतीति. सर्वसिद्धा। घटवत्कपाले तु घटत्वान्न भवतीति प्रत्ययाभावाद् घटात्यन्ताभावोऽपि तत्र नास्तीत्यावश्यकम्। न च घटवद्भेदोऽपि तत्कपाले स्वीक्रियत इति वाच्यम्, अपसिद्धान्तात्। उक्त हि चन्द्रिकायाम्—'स्वाधिकरणनिष्ठभेदप्रतियोगितावच्छेदकत्व न मिथ्यात्वम्, पूर्वाचार्यैरनुक्तत्वात्। नह्यस्मन्मते घटादौ घटत्वादिना भेद स्वीक्रियते किन्तु घटत्वाद्यत्यन्ताभाव" इत्यादि। एव च यथोक्तव्यापक पटाद् व्यावर्तमान स्वव्याप्यमादायैव व्यावर्तत इति घटवति घटात्यन्ताभावोऽप्रामाणिक इति सिद्धम्।

अय घट' तादात्म्यसामानाधिकरण्य प्रतियोगित्व चेत्युभयसबन्धेनात्यन्ताभावहेतु. द्रव्यत्वात्, आकाशवत्। पटात्यन्ताभावो घटतदभावोभयसामानाधिकरण्यनियत, अभावत्वात्, कपालात्यन्ताभाववत्। कपालात्यन्ताभावस्य संमतघटात्यन्ताभावस्थले उक्तसाध्यसप्रतिपत्ति' । घटवत्कपालवृत्तेश्च घटात्यन्ताभावस्य घटसामानाधिकरण्यसत्त्वाद् घटात्यन्ताभावसामानाधिकरण्याभावादेव साध्यसबन्धो वाच्यः। घटवत्यपि घटाभावसत्त्वे तत्सामानाधिकरण्यनियमो न स्यादित्यर्थवशाद् घटवति तदत्यन्ताभावाभावः सिद्ध। एतत्तन्तुवृत्तिर्घटभेद एतत्पटानाद्यभावानधिकरणवृत्तिभेदत्वात्, पटभेदवत्। एतत्पटवृत्तिभेदभावस्य भेदरूपैतत्पटानाद्यभावानधिकरणैतत्पटवृत्तित्वात्। तदन्यवृत्तिभेदस्य प्रागभावरूपैतत्पटानाद्यभावानधिकरणवृत्तित्वात। पक्षीकृतभेदे एतत्पटप्रतियोगिकभेदप्रागभाववत्येतत्पटात्यन्ताभावानधिकरणवृत्तित्वमादायैव साध्यपर्यवसानम्। एतत्पटाभाव आकाशात्यन्ताभावव्यापकत्वरहित', एतत्पटसंसर्गाभावत्वात, एतत्पटध्वसवत्। पटत्वमपि पटात्यन्ताभावसत्त्वे त्वाकाशात्यन्ताभावव्यापकत्वमेव तस्य स्यात्। एतत्तन्तुवृत्तिराकाशात्यन्ताभाव एतत्पटसंसर्गाभावानाश्रयवृत्ति, आकाशात्यन्ताभावत्वात्, एतत्तन्तुभिन्नवृत्त्याकाशात्यन्ताभाववत्। एतत्तन्तुवृत्तिरत्यन्ताभाव' पटत्वानवच्छिन्नप्रतियोगिताक, एतद्वृत्तिसंसर्गाभावत्वात्, एतत्तन्तुवृत्तिध्वंसवत्। एतत्तन्तुवृत्यत्यन्ताभावीया पटत्वावच्छिन्ना प्रतियोगिता समवायसम्बन्धावच्छिन्ना,एतत्तन्तुवृत्तिसंसर्गाभावनिरूपितपटवृत्तिप्रतियोगितात्वात्, तादृशध्वंसप्रतियोगितावत्। मूलादिवृत्तिपटात्यन्ता-

भावीयाया प्रतियोगितायाः व्यभिचारादेतत्तन्तुवृत्तीति । संसर्गेति स्वरूपकथनमात्रम् । अभावमात्रं प्रविष्टम् भेदनिरूपितायामपि साध्यरत्वात । घटाद्यभावीयाया तस्या तद्धारणाय पटवृत्तीति । पटत्व स्वाश्रयसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदक यत्तद्भिन्नम्, द्रव्यत्व व्याप्यत्वात् आत्मत्ववत् । द्रव्यवृत्तित्वादिति वा, संयोगत्वस्य तावतव वारणात् । भेदस्याव्याप्यवृत्तित्वपक्षे तत्रव व्यभिचारवारणाय साध्येऽत्यन्तपदम् । अन्यथाभावमात्र वाच्यम्, तन्तुत्व पटसंसर्गाभावसामान्याभावानाश्रयवृत्तिधर्मत्वात घटत्ववत । तन्तुभिन्न घटात्यन्ताभावसत्त्वेऽपि ध्वंसप्रागभावयो कदाप्यसत्त्वात् साध्यप्रसिद्धि । ततो तु तदुभयसत्त्वात्सदात्यन्ताभावविरहप्रयुक्तमेव पटसंसर्गाभावसामान्याभावानाश्रयत्व पर्यवस्यति । एव तन्तुपक्षकमुक्तानाश्रयत्वसाध्यक वस्तुत्व हेतुकमप्यनुमान वाध्यम् । पूर्वापरकालयोरत्यन्ताभावाभ्युपगमेऽपि पटकाले तदनाश्रयत्व विना साध्यानुपसंहारादिष्टसिद्धि । एतत्तन्तुसयोग एतत्पटसंसर्गाभावानाश्रयप्रतियोगिक संयोगत्वात् घटभूतलसयोगवत । अत्यन्ताभावत्वंतत्तन्तुनिष्ठात्यन्ताभाव प्रतियोगिवृत्ति नित्याभावमात्रवृत्तित्वात् अन्योन्याभावत्ववत् । उक्तप्रतियोगितत्तन्तुनिष्ठात्य ताभावप्रतियोगित्व विना साध्यापर्यवसानात्तत्सिद्धि । अन्यदपि धीमद्भिरूह्यनीयमिति तिष्ठतु विस्तर ।

एव च—

हेतवोऽभीष्टसिद्धयेऽत्र सन्त्यल्पा बहवश्च न ।
स्वल्पा परस्य दुष्टाश्चेत्यत्र स्पष्टमुदीरितम् ॥

इति श्लोक परामृत्यैव पठनीय इति दिक् ।

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले ।
विश्वसत्त्वानुमितयस्तत्त्वानुगतय कृता ॥१६॥

सप्तदशोंऽशः

हेतुष्वपि तावत् किं नाम दृश्यत्वम्? यत्तु "वृत्तिव्याप्यत्वमेव तत्, व्याप्यत्वं हेतुतावच्छेदकसम्बन्ध, वृत्तित्वेन हेतुता। व्याप्यत्वं चापरोक्षवृत्ति स्वजनकेन्द्रियसंयोगादिरूपम्, परोक्षवृत्तिन्तु स्वप्रयोजकव्यापकतावच्छेदकादिरूपम्। भ्रमात्मकवृत्तिन्तु स्वजनकदोषजन्यत्वादिरूपम्। यद्वा वृत्तिमात्रस्य स्वावच्छिन्नचैतन्याभिन्नचैतन्यप्रतियोगिकं तत्तद्विषयनिष्ठं तादात्म्यमेव तत्, अनुमित्यादिवृत्तेरपि स्वावच्छिन्नचैतन्याभिन्नमहाचैतन्यव्यक्तिप्रतियोगिकब्रह्मादिनिष्ठतादात्म्यसत्त्वात्। अन्यथा मत्वर्थस्य स्वरूपत एवावच्छेदकसम्बन्धत्वानानुगमगौरवाच्च वृत्तित्वञ्च भीर्धीरित्यादि श्रूयमाण संस्कारेच्छादिजनकतावच्छेदकतया सिद्धो धीत्वरूपो जातिविशेष। तत्तद्विषयावच्छिन्नस्यानित्यत्वापादकज्ञानाभावस्य संस्कारादिहेतुत्वे गौरवात्। प्रमाऽप्रमान्यतरत्व वा तत्। ते च संस्कारेऽवघटे वा" इत्यादि, तन्न, भीर्धीरित्यादिश्रुतेरात्मगुणत्वेन ज्ञानादिप्रतिपादकत्वस्यैवोक्ततया तदाधारैकत्वे प्रमाणाभावात्, ज्ञानत्वातिरिक्तायाश्च धीत्वजातेरसिद्धे संस्कारादिजनकतायाश्च अपि तेनैवावच्छेदसंभवात्। चैतन्यप्रतियोगितानादात्म्यस्य च विषयेष्वव्याप्यसिद्धत्वात्। अन्यथा मिथ्यात्वसिद्धावनुमानवैयर्थ्यात् ब्रह्मणि व्यभिचारस्य दुर्वारत्वाच्च। न च तस्य वृत्तिविषयत्व नेति वाच्यम्, तत्परवेदान्तानां वैयर्थ्यप्रसंगात्।

यत्तु "शुद्ध ब्रह्म न दृश्यम्" "यत्तददृश्यम्" इति श्रुतेः। उपहितस्य तु दृश्यत्ववन्मिथ्यात्वमपीष्टमेव, वृत्त्युपहितस्य शुद्धत्वासंभवात्। सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थित इत्यस्याप्युपहितपरत्वात्, शुद्धस्य स्वप्रकाशत्वेन स्वत एव सिद्धत्वाच्च" इति, तदसत्, उपहितशुद्धयोरैक्यस्य तत्रापि हेतोः सत्त्वात्। अन्यथा शुद्धस्य संसारवानऽशुद्धापरोक्षेण भानानुपपत्त्या स्वप्रकाशत्व न स्यात्, शुद्धस्य पृथग्भानाभावात्। अन्यथा शुद्धत्वव्याघातात्। तथा च 'अनुकृतेस्तस्य च" इति सूत्रादिविरोधः. स्यादित्यादे स्वयमेवोक्तत्वात्। अपि च शुद्धे दृश्यत्वनिषेधार्थं तस्य ज्ञानमवश्य वाच्यम्, अज्ञाते धर्मिणि विधिनिषेधयोरप्ररोहात्। अथ स्वप्रकाशत्वेन स्वत सिद्धे तस्मिन् वृत्त्यदृश्यत्व निषिध्यत इति चेत्, न, शुद्ध स्वप्रकाशमिति शब्दजन्यविशिष्टवृत्तौ शुद्धप्रकाशे स्वप्रकाशत्वासिद्धे।

अथ तादृशवाक्यस्य लक्षणाया अशुद्धत्वमस्वप्रकाशत्वव्यापकमित्यर्थः । तथा चाशुद्धत्वव्यावृत्त्या शुद्ध स्वप्रकाशता पर्यवस्यति, भेदनिषेधाद्भेदवदिति चेत् न अशुद्धत्वस्य षष्ठ्यभिन्नत्वरूपतया वृत्तिविषयत्वव्यावृत्त्या शुद्ध स्वप्रकाशता पर्यवस्यतीत्यस्यापहितत्वशून्यब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन स्वप्रकाशत्व न ज्ञायत इत्यर्थः । अस्वप्रकाशत्वव्यापकाभावप्रतियोगित्वरूपाद्या स्वप्रकाशत्व याप्तेर्ज्ञानस्योद्बुद्धसंस्कारस्योपहितत्वाभावरूपशुद्धत्वे ग्रहसत्त्वसमये शुद्धत्वविशिष्टे स्वप्रकाशत्वाभावज्ञानानुदयात् । वह्न्यभावव्यापकाभावप्रतियोगित्वस्य धूमे ज्ञानादिकाले धूमवान् वह्न्यभाववान् इति ज्ञानाभाववदिति, तादृशज्ञानासभव एव स्वप्रकाशत्वसिद्धि । एतेन शुद्धत्वस्य हेतोर्ब्रह्मण्यज्ञाने कथ तस्य स्वप्रकाशत्वस्यानुमितिरूपासिद्धिरित्यपास्तमिति, शुद्धस्वरूपज्ञान विनापि शुद्धत्वस्योक्तप्रतियोगित्वधीसभवात् । उपहितत्वमस्वप्रकाशत्वव्यापकमिति ज्ञानकालेऽप्युपहितत्वाभावविशिष्टे स्वप्रकाशत्वाभावो न ज्ञायते, धूमव्यापको वह्निरिति ज्ञानकाल वह्न्यभाववान् धूमवानिति ज्ञानाभाववत् । अत उपहितत्वाभावरूपशुद्धत्वस्याज्ञातत्वेऽपिक्षत्यभावाच्च । न चोपहितत्वे स्वप्रकाशत्वाभावव्यापकताज्ञाने शुद्धत्वस्वप्रकाशत्वयो सहचारज्ञानमावश्यकमन्यथोपहितत्वाभाववदवृत्त्यस्वप्रकाशत्वमिति व्यभिचारज्ञानानुच्छेदेन तादृशव्यापकताज्ञानासभवात् । तथा चोक्तसहचारघटकतया शुद्धज्ञानमावश्यकमिति वाच्यम्, शुद्धस्य वृत्त्यविषयत्वेन तद्घटितोक्त व्यभिचारविषयवृत्त्यसभवात् । उपहिते तत्वाभावभ्रमकाले उक्तव्यापकत्वज्ञानासभवेऽपि तदभावकाले तत्सभवात् । उक्तसहचारभ्रमस्योपहितरूपाधिकरणमादाय सभवाच्च । न चैव शुद्धत्वोपहिते स्वप्रकाशत्वसिद्धावपि शुद्धे तदसिद्धिरिति वाच्यम्, शुद्धत्वस्यापहितत्वाभावरूपत्वेनाभावरूपे धर्मे शुद्धसबन्धस्योक्तवादुपहितत्वाद्यभावत्वापहितन ब्रह्मणा सह ब्रह्मणो भेदाभेदस्वीकारादभेदस्य धर्मधर्मिनानिश्रामकत्वादिति चेत्, अत्र ब्रूमः, वह्न्यभावव्यापकाभावप्रतियोगित्वस्य धूमे ज्ञानकाले हि धूम धर्मितावच्छेदकीकृत्य वह्न्यभाववत्ताज्ञान न जायत । न त्वन्यधूमधर्मितावच्छेदकमपि पर्वतो वह्न्यभाववानित्यादिज्ञानादयात् । इह तु स्वप्रकाशत्वाभावव्यापकाभावप्रतियोगित्वमुपहितत्वाभावरूपे शुद्धत्वे गृहीतम् । अत शुद्धत्वधर्मितावच्छेदक स्वप्रकाशत्वाभावप्रकारकज्ञान मास्तु, धर्मान्तरधर्मितावच्छेदक तु स्यादेव, बाधकाभावात् । तादृशधर्माणामपि व्यापकत्वज्ञानसभवेऽपि तदभावकाले स्वप्रकाशत्वाभावज्ञानापत्तश्च ।

वस्तुत शुद्धस्य स्वप्रकाशत्वसिद्धि कथं निर्व्यूढा, तदभावज्ञानाभावमात्रेण तत्सिद्धेरङ्गीकारे ब्रह्मभावज्ञानाभावमात्रेण वह्निज्ञानकार्यापत्ते । शुद्धस्वप्रकाशत्व न स्यादित्यस्यैव परेणापादितत्वात । भवदुक्तरीत्या च तदपरिहारात् । अपि चैव घटादीनामपि स्वप्रकाशत्वसिद्धि स्यात् उक्तज्ञानसत्त्वे वह्निधूमाभाववद्विशेष्यकस्यापि धूमधर्मिनावच्छेदकवह्नयभाववत्ताज्ञानस्याजायमानतया प्रकृतेऽपि शुद्धत्वाभाववद्विशेष्यकस्यापि शुद्धत्वावच्छिन्नधर्मिताकस्वप्रकाशत्वाभावज्ञानस्यात्तव्यापकत्वज्ञानकालेऽनुपपत्त्या घटादेरपि स्वप्रकाशत्वाभावप्रकारकज्ञानविशेष्यत्वविरहसाम्यात् । स्वप्रकाशत्वप्रमाविशेष्यत्वस्य च शुद्धेऽप्यनङ्गीकारात । न हि धूमवद्विशेष्यकधूमधर्मितावच्छेदकवह्नयभावप्रकारकज्ञानत्व तादृशव्यापकत्वज्ञानप्रतिबध्यतावच्छेदकमिति न किंचिदेतत् । एनेन उपहितत्वमस्वप्रकाशत्वव्यापकमित्याद्यपि निरस्तम् । तस्मात् स्वप्रकाशत्वशुद्धत्वयो सहचारज्ञानस्यावश्यमपेक्षणीयतया शुद्धत्वस्य च ब्रह्मनिष्ठत्वेन तदावश्यकतया शुद्धस्य ज्ञेयत्व दुर्निवारमेव ।

यत्तु शुद्धस्य वृत्तिविषयत्वेनेत्यादि, तन्न, स्वप्रकाशत्वसिद्धयर्थं बलादेववृत्तिविषयत्वस्यानीयमानत्वात् । उपहिताधिकरणे सहचारभ्रम इत्यप्युक्तम्; हेत्वभावाश्रये हेतुसाध्ययो सहचारभ्रमसभवेऽपि तस्यानुपयुक्तत्वात् । शुद्धत्ववति स्वप्रकाशत्वमित्येवरूपे सहचारज्ञाने वस्तुत शुद्धस्वविषयत्वसम्पर्कश्च । न हि सहचारज्ञानाधिकरणविशेषान्तर्भावेन व्याप्तिर्गृह्यते । एतेन शुद्धपदेनाभिधालक्षणान्यतरेणापि शुद्धाप्रतिपादने नष्टैयर्थ्यमित्याशङ्क्य शुद्धत्वविशिष्टे स्वप्रकाशत्वाभावज्ञानसभवरूपार्थमादाय तत्तार्थक्यमित्यपि निरस्तम् । परमार्थतस्तु स्वप्रकाशत्वाभावव्यापकाप्रतियोगी उपहितत्वाभाव इति ज्ञान एव शुद्धस्य ज्ञानसपन्नम्, अभावस्य तन्मनेऽधिकरणस्वरूपत्वात् । एव परप्रकाश्यत्वाभावस्वरूपस्य स्वप्रकाशत्वस्यापि शुद्धानतिरेक्तिया व्याप्याभावप्रतियोगितयैव शुद्धस्य ज्ञेयत्वमित्यवधेयम् ।

एव च शुद्ध स्वप्रकाशमिति वाक्यस्य पूर्वोक्तव्यतिरेकव्याप्तौ लक्षणापि निर्बीजा, वृत्तिरूपेण धर्मेण शुद्धत्वासभवादिति त्वयुक्तम्, आगन्तुकविशेषगुणाश्रयराहित्यस्यैव शुद्धपदार्थत्वेन भवदुक्तशुद्धत्वभावापत्तेरिष्टापादनत्वात् । तस्माद्ब्रह्मगत्यापि शुद्धस्य ज्ञेयत्वमनिवार्यम् । अत एवोक्तम्—

"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्माज्ञाननाशार्थं वृत्तिव्याप्ति प्रकल्पिता" ॥ इति

तदेतत्सर्व वस्तुगतिमभिसधायोक्तम्। वस्तुत शुद्धस्वप्रकाशत्वाभाव-प्रकारकज्ञानाविषय इत्येतादृशभवदीयज्ञानमेवादाय वृत्तिविषयत्व तत्र सुलभम्। तया च स्वप्रकाशत्वविरहज्ञान शुद्धे निषेध[-य]ना स्वमेव ज्ञानमादाय ज्ञेयत्व तत्रारोपितम्। एवविशिष्टस्य विषयत्वेऽपि विशेष्यस्य तदुर्वारम्, विशिष्ट-ज्ञाने विशेष्यस्यापि विषयत्वात्। न च विशिष्टस्यातिरिक्तत्वात् पर्याप्ति-सबन्धेन विषयत्वस्य वा हेतुत्वाद्विशेषमात्र न हेतुरिति वाच्यम्, विशेषणस्या-प्यविषयत्वापत्त्या भागासिद्धिप्रसङ्गात्। न तु विशेष्यतापन्नस्य विषयत्वेऽपि न क्षति, तस्य मिथ्यात्वाभ्युपगमात्। एतेनोपहितस्य विषयत्वेऽवधेयस्य तत्त्व दुर्वारमित्यपि परास्तम्। उपहितात्मना तस्य साध्यसबन्धात्। न च विशिष्टज्ञानेन शुद्धे ज्ञातत्वमज्ञाननिवृत्तिश्च न "यवद्धियेति वाच्यम्, इष्ट-त्वात्। 'अन्यवहार्यमलक्षणम्" इत्यादिश्रुते। उपहितविषयकतात्पर्यान्न र्णायकस्यैव श्रवणत्वसभवात्।

किञ्च उपहितब्रह्मभिन्नप्रपञ्चमात्रस्य मिथ्यात्वे उपहितत्वेन तत्र दृश्यत्व-सत्त्वात्। तेन निर्विकल्पकानङ्गीकारे घटादेस्तात्त्वीकारेऽपि नित्यातीन्द्रिय स्यापि विशिष्टरूपेणैव दृश्यत्वात्केवल तत्र भागासिद्धिरित्यपास्तम्। घटादिस्व रूपस्योपहितान्यस्वरूपाभावादसिद्धत्वनवकाशादुपहिततत्स्वरूपसिद्धयैव न कृतकृत्यत्वादिति चेत् उच्यते,एव तत्त्वमस्यादिवाक्याना तात्त्विकप्रामाण्यमिति प्रवादोच्छेद स्यात्। सामानविषयकत्वेनैव ज्ञानस्याज्ञाननिवर्तकत्वस्वीकाराच्चा-ज्ञानविषयतायाश्चाश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलमिति शुद्ध एवाभ्युपगमात्। अविद्यातत्प्रयुक्ताविषयकज्ञानस्यैव तथात्वात्। शुद्धतद्-व्यक्त्यवच्छिन्नविषयताकाज्ञानस्य शुद्धतद्व्यक्तिविषयकज्ञान शुद्धशुक्ति-त्वादिविशिष्टावच्छिन्नविषयताकाज्ञानस्य शुक्तित्वाशेऽन्याप्रकारकशुक्ति-स्वप्रकारकज्ञान जातित्वादिविशिष्टशुक्तित्वादिविशिष्टशुद्धयाद्यवच्छिन्नविषय-ताकाज्ञानस्य तादृशशुक्तित्वप्रकारक ज्ञान समानविषयकमित्यादेर्निरूपितत्वात्, श्रुत्याप्यव्यवहार्यत्वस्य शुद्धनिष्ठत्वेन वाच्यत्वाच्च।

यत्तु घटादेरुपहितान्यस्वरूप नास्तीति, तन्न, उपहितान्यस्वरूपस्याब्रह्म-णोऽपि सत्त्वे मानाभावात्। तथा च भागासिद्धिपरिहारप्रवृत्तेन व्यभिचार एवासीत, इत्येतावतास्माकमपि कृतार्थत्व स्यात्। तन्न प्रमाणोपन्यास च शुद्धस्यापि हेतुमत्ताप्रसगेन सुतरामेव व्यभिचारात्। तस्मात्—

ब्रह्मण्युपहितान्यस्मिन् मानस्य सदसत्त्वयो।
अनैकान्तिकताहेतारेकस्यैकान्तिकत्वभाक्॥

यत्तु ब्रह्मणः स्वप्रकाशत्वेन शुद्धरूपेण ज्ञानाविषयत्वेऽपि न क्षतिः, घटादेस्तु यदि शुद्धरूपं तदा ज्ञानाविषयत्वेऽलीकमेव स्यात्। स्वप्रकाशत्वं त्वनाशङ्क्यम् अनन्तानां तत्स्वीकारे गौरवाद् घटं न जानातीत्यनुभवाच्चेति, तदप्यसत्; ब्रह्म न जानातीत्यनुभवसामान्यात्। अन्यथा शास्त्रवैयर्थ्यात्। "एतद्वै तदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणः" इति बृहदारण्यकात्। 'स वै नूनं भगवस्त एतदवेदिषुः" इति छान्दोग्ये उद्दालकं प्रति श्वेतकेतूक्तेः। 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मविद्' इति तत्रैव सनत्कुमारं प्रति नारदोक्तेश्च।

न चान्य भावस्यज्ञानविषयकत्वं वक्तव्यम्, निराकरिष्यमाणत्वात्। प्रमाणविषयत्वस्य स्वप्रकाशत्वे शशशृङ्गादेरापत्त्यात्। स्वप्रकाशकत्वेऽपि प्रमाणान्तरवेद्यत्वाच्च। अत एव ज्ञानस्वप्रकाशत्वेऽप्यनवस्थासाम्यमाकरेऽप्युक्तम्। यद्यपि सोऽयं घट इत्यादि वाक्यादन्यन्मते शुद्धव्यक्तिर्वा-स्वन्मतेऽपि प्रमेयमित्यादिज्ञानाद्विशेष्यमात्रांशे उद्बुद्धनिरूपकादिविशेष्यमात्रस्मृतिरन्यथाननुभूतदृश्यत्वादिविशिष्टे न्त्वत्वादिज्ञानान्तमदादिति-तदप्यनत् प्रमेयत्वप्रकारकदृश्यत्वविशेषकसंस्कारादुक्तोद्बुद्धनिरूपकात्प्रमेयत्वांशे मोपपद्यते दृश्यत्वप्रकारकस्मरणस्यैवोपपत्त्या तत्रापि निर्विकल्पकस्मृत्यनङ्गीकारात्। दृश्यत्वांशेऽन्यप्रकारकदृश्यत्वप्रकारकस्मृतिं प्रति तादृशनिरूपकस्यैव हेतुत्वात्, कथं तदंशे प्रमेयत्वप्रकारकसंस्कारादुक्तस्मृतिरित्याशङ्क्याह दृश्यत्वादिनाऽन्वयेन यत्र भ्रमो जातस्तत्र संसर्गविषयतायां तज्ज्ञानस्यानपेक्षणीयतया तत एव दृश्यत्वादिज्ञानोपपत्त्यभ्युपगमात्।

यदप्युक्तम् आश्रयत्वेत्यादेर्न विरोधः, अज्ञानकार्यानुपहितस्याज्ञानविषयत्वाश्रयत्वयोर्लक्षणत्वेनोक्तेः। पूर्वसिद्धतमो हि पश्चिमो नाश्रयो भवति। नापि गौरवं हेत्वुक्तरज्ञानकार्योपहितस्य विषयत्वाश्रयत्वोभयाभावे पश्चादुत्पन्नत्वस्य हेतोरुक्तत्वात्। अज्ञानोपहितस्याप्यविषयत्वाश्रयत्वे तात्पर्ये तु हेत्वनुक्त्या न्यूनतापत्तेः" इति, तदप्यसत् अज्ञानकार्यानुपहितस्य तद्विषयत्वं तात्पर्यं हि तद्विशिष्टस्यैव शुद्धत्वापत्तौ जीवेशभेदादिविषयकज्ञानस्याप्यज्ञाननिवर्तकत्वं स्यात् शुद्धविषयकत्वतद्भावात्। तन्नात्कार्यपदं प्रयुक्तत्वपरम्, तच्च तदुच्छेदकज्ञानाच्छेद्यत्वमनादिनाधारण वाच्यनित्यज्ञानतत्कार्योभयानुपहितमेव, ब्रह्मज्ञानविषयत्वाश्रयत्ववदिति तत्तात्पर्यम्। तद्विषयत्वातिरिक्तस्य शुद्धत्वस्य कल्पने गौरवाच्च। न चात्र हेत्वनुक्तिः, एकरूपेण यथोक्तप्रयुक्तत्वेन

पश्चिमपदतात्पर्यविषयेण तदभिधानात्। अज्ञानोपहितस्यैवाज्ञानविषयत्वेऽन्योन्याश्रयाच्च।

यत्तु अज्ञानतदुपहितयोस्तद्गोचरसाक्षिणोश्चानादित्वेनोत्पत्तिज्ञप्त्योर्नान्योन्याश्रय इति तन्न तथाप्यज्ञानोपहितस्याज्ञानविषयत्वकल्पनाया प्रमाणाभावात्। अन्यथा आकाशविशिष्टे आत्मन्याकाश वर्तते अनादित्वादित्यादिकमपि स्यात्। किं च ब्रह्मण स्वप्रकाशतया प्रकाशावरणार्थमज्ञान कल्प्यते यदि त्वज्ञानोपहितमेवाज्ञानविषय तदा प्रकाशानापत्त्या तत्कल्पनमेव न स्यात्। न चाज्ञानोपहितसिद्धयर्थमज्ञान सिद्धमिति वाच्यम् अज्ञानासिद्धौ तदुपहितस्यापि दुर्लभत्वापत्त्या मूलोच्छेद एव पर्यवसानात् अज्ञानाभावे तदुपहितस्यापि वक्तुमशक्यत्वात्। तस्मादज्ञानानादित्वस्य धर्मिसिद्धयुत्तरकालिककल्पनाकत्वात् तत्कल्पकप्रमाणेन कल्पनीयाज्ञानानुपहितमेव ब्रह्म तद्विषयतया कल्पनीयमिति कल्पनायामन्योन्याश्रयस्य दुरुद्धरत्वमिति सिद्धम्। अत एव अहमज्ञ अय घट इत्यादि ज्ञानानामप्युपहितविषयत्वेनाज्ञाननिवर्तकत्वप्रसग इति अद्वैतसिद्धावुक्तम्। विशिष्टविषयकत्वेन तद्व्याख्याया कष्टकल्पनमात्रत्वात्।

यदप्युक्त विशिष्टविषयकज्ञानाविषयत्वे सति विषयत्व हेतुरतो न भागासिद्धिरिति तदप्यसत् विशिष्टविषयकज्ञानाविषयत्वस्यव सामर्थ्ये विशेष्य भागवयर्थ्यात्। न च तुच्छे व्यभिचारपरिहारस्तदय शाब्दवृत्तिविषयत्वस्य शुद्ध सत्वसिद्धतया तेनापि तस्य दुरुद्धरत्वात्। न चोक्तमात्रमेव हेतूकर्तव्यमिति वाच्यम् तुच्छसाधारण्यानुपपत्तेः निर्विकल्पकाङ्गीकारे स्वरूपासिद्धिप्रसगात् आकाशादिपदान्निर्विकल्पकोपगमे तत्र भागासिद्धश्च। न च तत्रापि सुवर्णत्वादिकमादाय विशिष्टविषयकत्वमेवेति वाच्यम् शाब्दबोधे तथात्वेऽपि पदजन्यपदार्थस्मृतौ तदविषयकत्वस्य निर्बाधत्वात्। तत्त्वमसीत्यादावुपाधिविशिष्टचैतन्यांश एव सस्कारोद्बोधात्। तन्मात्रस्मारकत्वं निर्विकल्पकबाध्यार्थानुकूलस्य पदजन्यस्मरणस्यापि निर्विकल्पकत्वस्यानुभवसिद्धत्वादिति भवदङ्गीकारेण जीवे भागासिद्धश्च। तुच्छस्थले त्वया विकल्पावृत्तरेव स्वीकारेण विशिष्टविषयकज्ञानाविषयत्वस्य तत्र सत्त्वात्। विकल्पस्य ज्ञानाद भेद इति भवदभ्युपगमात्। एतावान्भेद-तव ज्ञानत्वाभावात्र हेतुसत्त्वम् मम तु विशिष्टविषयकत्वाभावादिति।

न चतद्धोपानुरोधाच्छब्दाजन्यवृत्तिविषयत्वस्यासत्यातिमते तस्याप्यनुमित्यादिविषयत्वे तु सोपाख्यनिष्ठप्रकारताकवृत्तिविषयत्वस्य हेतुत्वमुपारया

चान्तीति प्रतीतिविषयत्वं तुच्छत्वव्याप्यत्वेन ज्ञानसाध्यकृतौ तु सत्तादात्म्यसम्बन्धावच्छिन्नत्वमेव सामान्यवत्त्वमिति ग्रन्थ एव दत्तजलाञ्जलित्वाभाव दोष इति वाच्यम्, तथापि सत्तादात्म्यस्य ब्रह्मण्यपि सत्त्वेन साध्याव्याप्तिदोषस्यतुल्यत्वात्। वस्तुतस्तु यत्सत्तादात्म्यस्य घटादौ सत्त्वे मानाभावसिद्धत्वात्च। अन्यथा साध्यविशेषणात्। एतेन सर्वानुमानेषु साध्यत्वमेव मिथ्यात्वलक्षणसाध्येन तुच्छत्वव्यावर्तकं सत्त्वेन प्रतीत्यर्हत्वादिकं साध्यं वक्तव्यम्। वस्तुतस्तु साध्यतावच्छेदके तन्न देयम्, प्रयोजनाभावात्। अतो हेतौ तुच्छत्वाभावविशेषणस्यानुपादेयमित्यपि निरस्तम्। तथापि दोषान्तराणां दुर्वारत्वादिति दिक्।

नापि स्वाकाराकारितत्वमिथ्यात्वविषयत्वरूप फलव्याप्यत्वं हेतुः, निर्मातीन्द्रियेषु शुक्तिरूप्यादौ च तदभावेन सामान्यसिद्धिसाधनवैकल्यात्। "अथ स्वाकारवृत्तिप्रतिबिम्बितचैतन्यविषयत्वरूपं तदस्तु। ईश्वरोपादित्सत्वप्रमाणमाया वर्तमानसर्वविषयाकारेण परिणमते। तस्मिंश्च परिणामे प्रतिबिम्बितचैतन्यं सर्वं पश्यत्यात्मिकमवस्थात्" इति तन्दीपनोक्तेः अतीन्द्रियेष्वपि तत्सौलभ्यात्।

न च चैतन्यत्वेनैव तादात्म्यरूपविषयत्वेन हेतुत्वसम्भवे विशेषणवैयर्थ्यम्, वृत्तिप्रतिबिम्बितत्वेनैव हेतुत्वम्, तादात्म्यं तदवच्छेदकमनवश्यं। न च तुच्छे व्यभिचारः, विद्यमानमात्रे तदुक्त्या तदौत्पत्तिकायावृत्तेरभावात्तादात्म्येन चैतन्यतादात्म्याभावाच्च। न च ब्रह्मण्यपि व्यभिचारः, इयं शुक्तिरज्ञानं रजतञ्चेयम्। अहं ब्रह्मज्ञानघटादिमेयमित्याकारकवृत्तौ ब्रह्माकारकत्वाभावात्। ब्रह्ममायाकारकवृत्तेस्तु मत्प्रकारकत्वस्य वृत्तिविशेषणत्वेन दारणीयत्वात्, ब्रह्माज्ञानिष्ठतादात्म्यस्यैवेह हेतुत्वाद्वा। सत्तादेरपि वर्तमानत्वादशायां तादृग्चित्तादात्म्यात्च तत्र सामान्यसिद्धिरिति चेत्, मैवम्, ब्रह्मणोऽपि ब्रह्मात्मत्वे दोषतादवस्थ्यात्, अतीतादिदतीन्द्रियेष्वपि तदवृत्त्याकारे प्रमात्वाभावात्, पश्यतीति श्रुत्यन्तरात्च। केचित्तु "वृत्तिविषयत्वेनैव सर्वत्यक्षानिर्वाहात्तदतिरिक्तचिद्विषयत्वानुपपत्तेश्च यत्तत्चिद्विषयत्वं न तत्सामान्यसिद्धौ हेतुः, साक्षात्कारान्तरीन्द्रियजन्यवृत्तिविशेषनिष्ठत्वेन कल्पनानिष्प्रयोजनत्वात्, घटादिनिष्ठस्य सत्त्वात्, ज्ञात्वार्थयोर्मूलवृत्तिविषयत्वस्यज्ञातत्ववत्। न च सुखादौ वृत्तिज्ञाने च तद्व्यवहारो न स्यात्, तत्रिमित्तवृत्त्यनङ्गीकारात्, कल्पने च गौरवादिति वाच्यम्; लाघवादवृत्तिविषयत्वस्य ज्ञातत्वादिव्यवहारप्रयोजकत्वे कल्पनुदत्वात्।

अन्यथा वृत्त्यकल्पनलाघवेन घटादेरपि सुखादिसमकक्षत्वप्रसंगात। सुखाद्यवच्छिन्नचितीय[व] घटाद्यवच्छिन्नचित्यपि स्वत एवाज्ञानविरोधित्वस्य कल्पयितु शक्यत्वात्। न च वृत्तिविषयत्वस्येच्छा[दि]व्यवहारविषयत्वाप्रयोजकत्वादसत्त्वापादकाज्ञानविषयतावच्छेदकत्वस्य तत्प्रयोजकत्वोक्तौ च इच्छादिविरहे प्रयोजकत्व तादृशाज्ञानविषयतावच्छेदकत्वस्य-वाच्यम् तथा चावच्छेद्या याज्ञानविषयता तदधिकरणे चिति असबद्धस्य घटादेरवच्छेदकत्वानुपपत्त्या तादृशचित्तादात्म्य घटादेरङ्गीकार्यम्। तच्चाध्यासिकविषयत्वरूपमेवेति तेषा चिद्विषयत्व सिद्धमिति वाच्यम्। तावतापि स्वरूपसबन्धविशेषरूपतादात्म्यस्यैव सभवे विषयत्वरूपतदङ्गीकारे मानाभावात्, घटादेरज्ञानविषयतावच्छेदकत्वकल्पनापेक्षया तद्विषयत्वस्यैव लाघवेन कल्पयितुमुचितत्वाच्च। न चैकनैव चिति तत्तदवच्छिन्नरूपेणाज्ञानविषयत्वकल्पनेन तदवच्छेदकघटाद्यनन्तधर्माणामप्रकाश निर्वाहे तावतामज्ञानविषयत्वकल्पने गौरवमिति वाच्यम्, अनन्तधर्माणामवच्छेदकत्वकल्पनमपेक्ष्य विषयत्वकल्पनायामेव लाघवात्, विषयत्वस्याज्ञानस्वरूपत्वकल्पनया लाघवाच्च। अवच्छेदकत्वस्य तु घटादिभेदेनानन्त्यात्' इत्यादिकमाहु। अपि च—इय शुक्तिरज्ञान रजतञ्च मेयमह ब्रह्मज्ञानघटादि मेयमित्यादिज्ञानानामधिकविषयकत्वेऽप्यज्ञान प्रति समानविषयकत्वेन तन्निवर्तकत्व स्यादेव, अवस्थाज्ञानतत्कार्यरजतादिज्ञानानामविद्यावृत्तित्वेन शुक्त्याद्यविषयकत्वेऽपि शुद्धब्रह्मज्ञानस्य मूलाज्ञानकार्यघटादिविषयकत्वसभवात्। भ्रमप्रमात्मकसमूहालम्बनस्याबाधितविषयकत्वमादाय प्रमात्वराभवाच्चेत्याशङ्क्य यदुक्तम् 'तार्किकादिमते घटाभाववदिद घटवदिति ज्ञानस्येव शुद्धब्रह्मविषयकज्ञानस्यातदन्यविषयकत्वमनुपपन्नम्, यादृशविषयतयोर्विरोधस्तादृशविषयतयोरेकज्ञानासबन्धनियमस्य तुल्यत्वात्। विरोधश्च तन्मते प्रतिबध्यप्रतिबन्धकतावच्छेदकत्वमस्मन्मते नाश्यनाशकतावच्छेदकत्व नाशतत्प्रतियोगितावच्छेदक वेत्यन्यत्। वह्निव्याप्यो धूम इत्याकारोद्बुद्धसस्कारकाले धूमवान् वह्न्यभाववानिति ज्ञानस्येव ह्रदो वह्न्यभाववानित्युद्बुद्धसस्कारकाले ह्रदो वह्निमानिति ज्ञानस्याप्यनुत्पत्तेरानुभविकत्वात्। दृश्याभाववद्ब्रह्मेत्याकारकोदबुद्धसस्कारकालीनब्रह्मज्ञानकाले दृश्यानुविद्धतया भाननियमात्। ब्रह्मज्ञानात्पूर्व घटत्वाद्युपस्थितयावद्धर्मावच्छिन्नाभावस्य मिथ्यात्वघटकतया ब्रह्मणि निश्चयात्तस्योद्बुद्धसस्कारसत्त्वात् सर्वदा मुमुक्षुणा प्रपञ्चमिथ्यात्वस्य चिन्त्यमानत्वात्। अत एव

विरुद्धौ "ननु तत्प्रागलानुमदनुमदर्शनयो कुत स्मृतिरिति" इत्यागङ्क्य "सर्वं स्मृतिरूपं किन्तु कदाचिदनुमानादनुमदर्शनेन कदाचिदाभ्यक्षिकोपाधिदोषनिर्णयेन दृष्टदर्शनं च" इत्युक्तम् । तत्तत्सम्बन्धुलालौकिकयो-रपि हेत्वाहेत्वोर्यो विरोध इति तद्व्युदासाय शङ्कुल्याख्यानम् "अनयजात प्रभृतीनामिति लालनम्" इति । अत्रेदं वक्तव्यम्—पूर्वोक्तसामान्यानुमानीय-निश्चयत्वे पारम्पर्यिकत्वं दुरन्तं वा भावप्रतियोगितावच्छेदकत्वेन यदि निविष्टं तदा तदवच्छिन्नप्रतियोगिताकाभावज्ञानादिच्छेदादि यथोक्त-मूलालम्बनोत्तरी व्यवकाशाभावः । घटाभावत्वात् घटत्वादिति ज्ञानस्यु-पगमेऽपि जातिविशेषवदभावत्वाभावत्वात् जातिविशेषवद्भावत्वा-दिति ज्ञानस्य सर्वजन्यत्वात् प्रकारतावच्छेदकत्वप्रतियोगिता-वच्छेदकत्वयोर्निरवच्छिन्नत्वेनैव तत्तज्जातिविषयक-लौकिकज्ञानविषय-त्वेनैव हेतात् । पारम्पर्यिकत्वादवच्छिन्नप्रतियोगिताकाभावज्ञानेऽपि रू-लौकिकविषयकज्ञानोत्तरं तत्त्वात् ।

अथ यदवच्छिन्नप्रतियोगिताको दृष्टाभावो मिथ्यात्वपदकान्तर्निवे-शनीयो भावप्रतियोगितावच्छेदकत्वेनैकपुरुषस्य यावत्समयं दृष्टा यदव-च्छिन्नप्रतियोगिताकाभावज्ञानं नास्ति तदा तदवच्छिन्नविषयकशुक्तित्व-निश्चयस्य दुरन्तत्वात् । इदं चाभ्युदाभ्योक्तम्—यदवच्छिन्नप्रकारतानिरू-पितविशेष्यतावान् घटत्वावच्छिन्नावच्छेकतानिरूपितप्रतियोगितासमानाधि-करणावच्छेदकतावच्छेदकत्वे यत्र घटत्वे पर्यवस्यति तद्ज्ञानत्वेन वानभ्युप-गमात् । मूलत्व घटत्वादौ घटाभावत्वादिनूतनत्वस्य सर्वानुग-त्वात् । तत्तज्जातिवारणाय तु यथोक्तत्वेन लक्षणे घटत्वभेदस्य हेतुतावच्छे-दकत्वेनैव । एवं च जन्यत्वे तादृशाभावनिरूप्यत्वेऽपि व्यक्तयेण घट-त्वादेर्न विषयत्वसम्भवात् । एतेन धूमत्वात् वह्नयभावत्वादित्यादिकमपि निर-स्तम् । तत्रापि विषयतायाः पक्षतः निरूप्यनिरूपकभावस्यैव तत्र शङ्का-त्वात् । धूमत्वस्य वह्नयभावत्वस्य वा पक्षनिरूपितत्वाभावे तादृशज्ञानस्यादि मूलत्वेनस्यैवत्वात् । दृश्यत्वादिवदत्र दृश्यत्वादिप्रकारकज्ञानानन्तरमेवापि यत्किञ्चिदवच्छेदकत्वावच्छिन्नप्रतियोगिताकाभावज्ञानस्य सम्भवात् । इदमपि वस्तुतो वक्तुं युक्तम्, वैशेषिका मिथ्यात्वनिर्वचनेऽपि नदन्यत्व तादृशज्ञानोत्तरी व्यवकाशाभावात् । तत्र तुच्छत्वादेरा ज्ञानविषयकत्वसम्भवात् । नहि ज्ञानोत्पत्तिमात्रविशेषानु-पपत्तिः किन्तु तत्प्रतिक्रियाया विषयविशेषे वा दर्शनाना विवाद इत्यलम् । वस्तुतस्तु धूमज्ञानप्रतिबन्धादिकं सर्वत्रैव निरूपणीयमिति सदेवः ।

अथ वृत्तिव्याप्यफलव्याप्यया साधारण व्यवहारप्रयोजकविषयत्व हेतु-रिति चेत्, न ब्रह्मण्यप्यस्तीत्यादि व्यवहारप्रयोजकविषयत्वसत्त्वादभावादि व्यवहारप्रयोजकशब्दविषयत्वस्य तुच्छेऽपि गतत्वादधिकस्य पूर्ववदनुसधयत्वाच्च।

यत्तु दृश्यत्व चिद्विषयत्वम्, तच्च यथाकथचिच्चित्सबन्धित्वम्। अत्र तानावृतसाधारण चित्तादात्म्यत्व हेतुतावच्छेदकमिति यावत्। तच्च न चैतन्य ययोर्भेदस्तयोरेव सबन्धस्य भेदाभेदानुमाने विवक्षितत्वात्। यद्यपि कल्पितश्चित्सबन्धश्चैतन्येऽप्यस्ति, सत्यत्वादिरूपस्य तस्य धर्मतास्वीकारात्, तथापि स्वजन्यतानावाच्यचित्सबन्धवत्त्व वाच्यमिति, तदसत्, तनैवोक्त-नियमस्य निरस्तत्वात, चित्सबन्धस्य चिदात्मकत्वेन स्वज्ञानावाच्यत्वाच्च। एतेन भेदघटित चित्सबन्धवत्त्व हेतु। तथा च चिदन्यनिष्ठचित्सबन्धस्तये-त्यपि परास्तम् चिताऽपि चिदन्यत्वस्योक्तत्वात्।

अथ स्वगतमेव यावद्व्यवहारे स्वातिरिक्तसविदपेक्षत्व दृश्यत्वम्। सवि-त्तदेन विषयावच्छिन्नतानावारणेन शून्य वृत्तिबिम्बित वा शुद्ध वा चैतन्यमात्र ग्राह्यम्। तथा च घटादौ नित्यातीन्द्रिये साक्षिभाव्ये च सर्वोऽपि स्फुरणाभिव-दनादिसाधारण। अविद्यादे स्वावच्छिन्नचिद्रूप स्फुरणमनाद्यप्यनवच्छिन्न-चित्सापेक्षम् तदाश्रितत्वात्। प्रयुक्तत्वरूपसापेक्षत्वस्यानादावपि सभवात्। ब्रह्मणो व्यवहारान्तरे स्वातिरिक्तसवित्सापेक्षत्वेन व्यभिचारवारणाय व्यवहारे यावदिति। ब्रह्मण स्फुरणरूपे व्यवहारे स्वविलक्षणसविदनपेक्षत्वात्। न च ब्रह्मण स्वस्मिन् स्वात्मकस यत्वादिधर्मतानियामककल्पितभेदसत्त्वात्-थापि व्यभिचार इति वाच्यम्, स्ववृत्तितावच्छेदक यद्विनाशप्रतियोगितात्वादि तद्विशिष्टानाश्रयत्वस्य विलक्षणपदार्थत्वात्, इति चेत्, नैवम्, अविद्यादेरिव ब्रह्मणोऽप्याश्रयत्वेन तत्सापेक्षत्वापत्त्या व्यभिचारात्। विशिष्टचितोऽपि विनाशित्वेन तदभ्युपगमात्स्वरूपासिद्ध। उक्त हि चन्द्रिकायाम् 'येषा तु नाशप्रतियोगित्वदृश्यत्वादीना न केवलचिन्निष्ठतासभवस्तेषामप्यविद्याद्यु-पाधिनिष्ठानामेव तदुपहितचिन्निष्ठता, न चैवमुपहितघटत्वादिज्ञानात् केवलघटत्वादिज्ञानकार्यस्य जायमानस्यापलापापत्तिरिति वाच्यम्, केवल-स्याप्युपहितधीविषयत्वात्। न चैवमुपहितनिष्ठसयोगादीना केवलनिष्ठत्वानु-रोधेनोपहितकार्यजनकस्य केवलेऽपि तत्त्वादुपहितनाशकेन केवलस्यापि नाशा-पत्तिरिति वाच्यम्, येन सबन्धेन यदुपहिते जायते तेन तस्य केवलेऽप्युत्पत्ति-रिति नियमाभावात्। कार्यतावच्छेदकेन विषयतासबन्धेन ज्ञानस्येव प्रतियो-

निरासवन्धेनोपहिते जायमानस्य नाशस्य तेन सवन्धेन केवलेऽनापत्तेः। जातिविषयकज्ञानस्य व्यक्तिविषयकत्वनियमवदुपहितविषयकज्ञानस्य केवलविषयकत्वमुपहितसंयोगादिजनकस्यैव केवले संयोगादिजनकत्वमिति यथानुभव नियमकल्पनात्। उपाध्युत्पत्तिनाशसामग्र्योरेवोपहितोत्पत्तिनाशसामग्रीत्वेनाप्युत्पत्तिनाशयोरनुपहितोत्पत्तिनाशत्वेऽपि केवलात्पत्तिनाशत्वावच्छेदकोपहितनाशस्य केवलनाशत्वाभावात्' इति, वृत्तिनाशेन तद्विशिष्टचितोऽपि नाशस्य तुल्यत्वादेव दुर्वारत्वात्। अन्यथा तन्मिथ्यात्वासिद्धेः। अत एव जडत्वहानौ तदलम्, जीवगतभेदादेरनादित्वेऽपि तदवच्छिन्ना चिदावरणभङ्गवृत्तिविशिष्टतमा गुरुजन्यैव" इत्यादि।

किञ्च अज्ञानोपहितस्याज्ञानविषयत्वमेवेऽविद्यावच्छिन्नचिद्रूपा स्फुरणमपि स्ववृत्तितावच्छेदकविनाशप्रतियोगित्वविशिष्ट यद्विनाशप्रतियोगित्व तदाश्रयसमदिदपेक्षमेवेति भागासिद्धि, अज्ञाननाशस्योपहितनाशत्वावश्यकत्वात्। तत्स्फुरणस्यापि शुद्धचिद्रूपत्वे मानाभावात्। अध्यस्तत्वेनोपहितचिदपेक्षत्वस्यैव तत्रावश्य वाच्यत्वात्। एतेन स्वातिरिक्तचिदप्रयुक्तस्फुरणकत्वमप्यपास्तम्।

यत्तु सापेक्षस्फुरणस्वरूपत्व हेतुरिति, तन्न, अनाद्यविद्यादाविव स्वस्मिन्नपि स्वसापेक्षत्वसभवेन व्यभिचारात्। भिन्नसापेक्षत्वमिवाने तूक्तदोषापाच्चवेयत्वादित्यास्तां विस्तर।

यत्तु स्वापरोक्षत्वस्वातिरिक्तानपेक्षत्वरूप यत् स्वप्रकाशत्व तद्भिन्नत्वरूपमस्वप्रकाशत्वमेव दृश्यत्वम्। अपरोक्षत्वमज्ञानसामान्यविरोधि चैतन्यम्, स्वातिरिक्तत्व स्वविलक्षणचित्त्वम्, तेनाज्ञानविरोधित्वेन रूपेण वृत्त्यपेक्षायामपि न दोष। शुद्धचैतन्यापरोक्षतायै तु स्वातिरिक्तेति न देयम्, अनपेक्षापरोक्षतात्वस्य तत्रैव सत्वात्। तदभिन्नत्वञ्च तदवच्छेदानुयोगिनाकभेदप्रतियोगित्वम्, न तु तदवच्छेदप्रतियोगिताकभेदानुयोगित्वम्। ब्रह्म स्वप्रकाश नेति बुद्धया स्वप्रकाशत्वावच्छिन्नप्रतियोगिताकभेदानुयोगित्वस्य घटादि मतेन व्यभिचारात्। अज्ञानयोनापरोक्षत्वस्य ब्रह्मनिष्ठस्य ब्रह्मणि नेदमिदाद्यधीनत्वेनावश्यकत्वात्। ब्रह्मस्वरूपत्वे तु तस्य घटादिनिष्ठभेदप्रतियोगित्वेऽपि पटाद्यनिष्ठतया घटादिनिष्ठप्रतियोगितानवच्छेदकत्वात् पटादावसिद्धिप्रसङ्गात्। न च तथापि स्वप्रकाश ब्रह्म नेति बुद्धया स्वप्रकाशत्वावच्छिन्नानुयोगिताकभेदप्रतियोगित्व ब्रह्मण्यप्यस्त्येवेति वाच्यम्;

ईश्वरत्वादिधर्मोपहितप्रतियोगिकत्वेनैव तत्र भेदभानात् । तन्न शुद्धब्रह्मप्रतियोगिकत्वाभावात् । अभावप्रत्यक्षे प्रतियोगितावच्छेदकमिश्रितप्रतियोगिविषयकत्वानभ्युपगमात् । जीवत्वाद्युपहितब्रह्मण शुद्धब्रह्मानुयोगिकभेदस्य च स्वप्रकाशत्वानवच्छिन्नानुयोगितारूपत्वात् । न च स्वप्रकाशो न जीव इति प्रत्यक्षसिद्धभेदप्रतियोगित्व ब्रह्मण्यपीति वाच्यम्, तादृशभेदप्रतियोगित्वस्य स्वावच्छेदकधर्मसामानाधिकरण्यनियमादुपहितस्य च शुद्धभिन्नत्वादुपहितवृत्ते शुद्धवृत्तित्वे मानाभावाच्छुद्धे हेत्वभावादिति, तन्न, प्रत्यक्षे प्रतियोगितावच्छेदकधर्मभाननियमेऽपि स्वप्रकाशत्वावच्छिन्नानुयोगिताकभेदप्रतियोगित्वस्य ब्रह्मणि दुर्वारत्वात् । प्रतियोगित्वस्य प्रतियोगितावच्छेदकधर्मसामानाधिकरण्यनियमोऽपि निर्मूल, व्यधिकरणधर्मावच्छिन्नाभावस्थले व्यभिचारात् । नापि भेदप्रतियोगित्वस्य तथा, संयोगेन गगनवान् यस्तद्भिन्नमित्यत्र व्यभिचारात् । संयोगेनाकाशस्य तन्नावृत्तित्वात् । न च संयोगावच्छिन्नप्रकारतायां वृत्तित्वनैयत्यम् । भूतलीयो घट इत्यादौ व्यभिचारात् । घटात्यन्ताभाववद्भिन्न इत्यादौ च व्यभिचारस्य स्फुटत्वात् । प्रतियोगित्वस्य वृत्त्यनियामकत्वात् । अभावे घट इत्याद्यप्रत्ययात् । घटत्वात्यन्ताभावघटभेदयो समनियतत्वेनैक्यात् । घटत्वस्यापि तत्प्रतियोगितावच्छेदकतया घटावृत्तेस्तस्य घटत्वे भेदप्रतियोगित्वसामानाधिकरण्यभावाच्च । अत एव सत्यवादिष्टब्रह्मण स्वधर्मतानिर्वाहाय कल्पितभेदस्वीकारे शुद्धब्रह्म जगदुपादानमिति मते उपादानत्वान्यथानुपपत्त्या कल्पितभेदस्य च परोक्षबुद्धेर्विषयत्वेनानवच्छिन्नप्रतियोगिताकस्य प्रतियोगित्वमादाय शुद्धे व्यभिचाराद्भेदप्रतियोगित्वमात्र न हेतुकृतमिति स्वयमेवोक्तम् । न च सति प्रतियोगितावच्छेदके तस्य प्रतियोगित्वसामानाधिकरण्यमिति वाच्यम्; अपरोक्षमात्रविषयभेदीयप्रतियोगितायाऽप्यवच्छिन्नत्वे बाधकाभावात् । अन्यथा पिशाचभेदादिप्रतियोगितायाऽप्यनवच्छिन्नत्वापत्ते । एतेन स्वप्रकाशत्वविशिष्टे केवलब्रह्मण्यपाम्या कल्पितभेदसत्त्वात् स्वप्रकाशत्वावच्छिन्नानुयोगिताकभेदप्रतियोगित्व केवलब्रह्मण्यपीति व्यभिचारमाशङ्क्य यदुक्तम्, जीवत्वादिकमेव तादृशभेदप्रतियोगितावच्छेदकम्, तथा चोक्तभेदो यदि स्वप्रकाशत्वावच्छिन्नानुयोगिताकस्तदा जीवत्वाद्यवच्छिन्नप्रतियोगितात्वाज्जीवत्वाद्युपहितप्रतियोगिनि एव स्यान्तु शुद्धब्रह्मप्रतियोगिनि, उक्तभेदस्य प्रत्यक्षत्वात् । तत्र च शुद्धस्य प्रतियोगित्वभानाभावनियमात् । अत शुद्धानुयोगिकस्वप्रकाशत्वावच्छिन्नानुयोगिताका वाच्यः । तथा च शुद्धब्रह्मण्युक्तहेतुरेव

नास्तीति, तत्सर्वं चिन्त्यम् , प्रतियोगितावच्छेदकानवगाहिभेदप्रत्यक्षस्तदभावेऽपि तत्प्रतियोगित्वस्य शुद्धे सुलभत्वादुपहितवृत्तौ शुद्धवृत्तित्वनियमस्य च भवत्सम्मतत्वादत्रैव तदनङ्गीकारे मूलाभावादस्य हेतोर्मिथ्यात्वासिद्धिप्रसंगाच्च । किं च स्वप्रकाशत्वं यदि शुद्धब्रह्ममात्रनिष्ठं तदा तस्य भेदानुयोगित्वमनवच्छिन्नमेव सम्भवति अवच्छेदककल्पने फलाभावादिति स्वप्रकाशत्वावच्छिन्नानुयोगिताकभेदप्रतियोगित्वमप्रसिद्धम् । अथ जीवादिमावारणं तदा तेषु भागासिद्धि , स्ववृत्तिधर्मावच्छिन्नानुयोगिताकभेदप्रतियोगित्वस्य स्वस्मिन्नसत्त्वात् । एतेनोक्तास्वप्रकाशत्वरूपो जडस्य हेतुरपि निरस्त , इति दिक् ।

यदपि मूलाज्ञानविषयत्वावच्छिन्नप्रतियोगिताक एकाज्ञानपक्षे तु चिन्मात्रविषयकधीविषयत्वावच्छिन्नप्रतियोगिताको भेदो हेतुरिति तदपि न, स्वरूपासिद्ध वादज्ञानोपहितस्याज्ञानविषयत्वे भागासिद्धेश्च । शुद्धचितोऽविषयत्वे द्वितीयस्याप्यसिद्ध । उपहितस्य वेदान्तजन्याखण्डवृत्तिविषयत्वेऽपि ज्ञानस्याज्ञानस्वेतरतत्कार्योभयनाशत्वमते मुख्यमानाद्यभावकालीनज्ञानकाले स्वभिन्नोपाध्यसम्भवात् । शब्दवृत्तेरेवोपाधित्वेन वाच्यत्वात् । उपहितविषयत्वे चोपाधेर्विषयत्वघ्रौव्य चिन्मात्रविषयकधियोऽप्रसिद्धे । मुख्यमानाद्यभावकालीनज्ञानेऽप्युपाधित्वाविशेषेण विनिगमकाभावेन तस्या अप्युपाधित्वोपपत्ते । ज्ञानमेव ध्वस इतिमतेऽप्यज्ञानस्योपाधित्वासम्भवेन तत्कार्यस्य चैकजातीयस्यासार्वत्रिकतयाखण्डाकारवृत्तित्वेन तस्या एव सर्वत्रोपाधित्वस्य युक्तत्वात् । न च शब्दानुपस्थितस्य कथ शाब्दविषयत्वम ? अगत्या शाब्दस्य स्वाभिन्नशब्दानुपस्थितविषयकत्वनियमस्य वाच्यत्वात् । न चैवमज्ञानतत्कार्यविषयक यन तस्या अज्ञाननिवर्तकत्वानुपपत्ति , अज्ञानवृत्त्यन्यतत्कार्यविषयकज्ञानत्वेन निवर्तकत्वसम्भवाद्गौरवस्य प्रामाणिकत्वात् ।

यत्तु शाब्दविषयत्वानापन्नाया एव वृत्तेरुपाधित्वम्, तदुक्त कल्पतरुकृद्भि शुद्ध ब्रह्मेति विषयीकुर्वाणा वृत्ति स्वस्वेतरोपाधिनिवृत्तिहेतुरुच्यते, स्वस्याप्युपाधित्वाविशेषात् । एव च वृत्त्युपरागोऽत्र सत्तयोपयुज्यते, न भाव्यतया विषयकोक्तिप्रवेशेन 'इति । तत्रज्ञानोपहितस्य साक्षित्वेऽपि जडत्वेनाज्ञानस्य साक्षिकोटावप्रवेशवत् । वृत्त्युपहितस्य विषयत्वेऽपि स्वविषयत्वानुपपत्त्या वृत्तर्न विषयकोटौ प्रवेश, किन्तु स्वयमविषय एवाविषयाच्छब्दात्स्वविषय विद्यमाना सती व्यावर्त्तयति । तथा च ब्रह्मान्वित स्वविषयत्व प्रत्यन्वितत्वे विद्यमानत्वे च सति व्यावर्त्तकत्वाद् वृत्ते स्वविषयता प्रत्युपाधित्व दण्डत्व-

स्येव घटकारणत्वे यदनन्वितत्वे सति यद्विशिष्टभ्येतरस्माद्व्यावर्तय यद्द विद्यमान तत्र तदुपाधिरिति लक्षणात्" इति, तच्चिन्त्यम्, स्वविषयत्व प्रयुक्तरीत्या वृत्तेरुपाधित्वोपपादनेऽपि विषयीभूतब्रह्मनिष्ठोपहितत्वनिरूपकयोपाधेरनिर्वाहात्। अन्यदीयोपाधिनाप्यन्यस्योपहितत्वोक्तौ च दण्डत्वेन चक्रत्वादेरप्युपहितत्वापत्ते।

अथ स्वविषयत्व प्रति ब्रह्मण एवोपाधिर्वृत्ति यथा घटकारणत्व प्रति दण्डस्य दण्डत्वमिति चेत् स त्यम्, तर्हि यथा घटकारणत्वविशिष्टस्य दण्डस्य दण्डभिन्नाद् व्यावर्तक दण्डत्व समवायेन दण्डवृत्तिसम्बन्ध विना व्यावर्तकायोगात्। तथव स्वविषयत्वविशिष्टस्य ब्रह्मण शुद्धाद्व्यावर्तिका वृत्तिर्ब्रह्मसवद्धा वाच्या। न च विषयतासम्बन्धेन सा ब्रह्मवृत्तिरिति वाच्यम्, यन्निरूपितमुपधेयञ्च तद्भिन्नस्यैव व्यावर्तकतावच्छेदकसम्बन्धस्यापेक्षित्वात् ब्रह्मण उपहितत्वसिद्धौ वृत्तेस्तद्विषयत्वम्, तद्विषयतया च वृत्तेस्तदुपधायकत्वमित्यन्योन्याश्रयात्। अथ तद्विषयकवृत्युत्पत्तौ ब्रह्मण उपहितत्व नापेक्ष्यते, अन्यथावृत्ते स्वविषयकत्वाभ्युपगमऽप्यनिस्तारात्। निर्विषयतावृत्तेरनुत्पत्तेः स्वोपधायस्य च स्वोत्पत्त्यनन्तरकालीनत्वात्। किन्तु यदा ब्रह्मविषयकवृत्युत्पत्तिस्तदा वस्तुतो ब्रह्मण उपहितत्वमात्रमपेक्ष्यम्। तच्च स्वरूपसत्यैव वृत्या निर्वहतीति चेत्, तर्हि, वृत्युत्पत्तिकाले तस्या कथ तदुपधायकत्व, उपाध्युपधानयोस्तुल्यकालत्वायोगात्। अथोत्पत्तिक्षणे तदनुपपत्तावपि द्वितीयक्षणे तदस्तु, यदोक्तवृत्तिस्थितिस्तदा ब्रह्मण उपहितत्वमित्येव वाच्यमिति चेत्, तर्हि उत्पत्तिक्षणे वृत्तिर्निर्विषया[सविषया]वा? नाद्य, स्वभावविरोधात्। नान्त्य तत्र हि शुद्धब्रह्मविषया वा, उपहितब्रह्मविषया वा? नाद्य, क्षणभेदेन ज्ञानस्य विषयभेदानुपपत्ते, शुद्धस्य विषयत्वापत्तेश्च। नान्त्य, दोषस्य प्रागेवोक्तत्वात्।

नन्वेव पक्षद्वयेऽप्यनुपपत्ति स्यादिति चेत्, अस्तु अत्यन्तमेवास्माकमिष्टसिद्धेः। भवदाशङ्कानुसारेणैव स्वविषयत्वपक्षस्याद्भावितत्वात्। अथैव शुद्धस्य विषयत्वपर्यवसाने उक्तहेतौ व्यभिचारो नायातीति चेत्, सत्यम्, चिद्भेदस्यैव हेतुत्वराभवेन व्यर्थविशेषणतया व्याप्यत्वासिद्धेर्दोषवत्त्वभवात्। तस्यैव हेतूकरणे तु वक्ष्यमाणजडत्वहेतावेवान्तर्भावापत्ते। तत्र च दोषाणा वक्ष्यमाणत्वादिति दिक्।

वेदाविरुद्धयुक्तीनामर्कं तर्ककुतूहले।
दोषश्चेतोहरो हेतोर्दृश्यत्वस्य विमृश्यताम्॥ १७॥

अष्टादशोंऽशः

नाप्यज्ञानत्वरूप जडत्व हेतु, ज्ञानभिन्नत्वस्य ब्रह्मणि व्यभिचारात्। न च ब्रह्मणो ज्ञानस्वरूपत्वम् अर्थोपलब्धिप्रकाशस्यैव ज्ञानपदार्थत्वाच्छुद्धचिद्व्यक्तौ निरवच्छिन्नाया एव ज्ञानपदशक्यताया स्वीकारादिति वाच्यम्, "द्रष्टुर्दृष्टे" इति बृहदारण्यकव्याख्यानसमये प्रथमपरिच्छेद एवैतदर्थविच्छेदस्य कृतत्वात्। अन्यथा नि प्रतियोगिकाभावस्यैव निर्विषयकज्ञानस्यालोकत्वान्मोक्षे निर्विषयकज्ञानरूपस्यात्मनोऽनुपपत्ते'

यत्तु किमिदं सज्ञेयत्वम्, ज्ञेयजन्यत्व वा ?नाद्य', परोक्षज्ञाने ईश्वरज्ञाने वाभावात्। नान्त्य, यदा ज्ञान तदार्थं इति कालिकव्याप्तावुक्तरीत्या व्यभिचारात्। यत्र ज्ञान तत्रार्थं इति दैशिकव्याप्ते शङ्कितुमप्यशक्यत्वात्। परमते ज्ञानस्यात्मनिष्ठत्वात्, अस्मन्मते चान्तःकरणनिष्ठत्वात्। तत्र च साक्षाद्घटादिविषयाणामभावात्। न च यदा अपरोक्षज्ञान तदार्थं इति व्याप्ति। आत्मा च "यत्साक्षादपरोक्षात्" इति श्रुत्या तादृशज्ञानरूप एव त्वया वाच्य इति वाच्यम्, ईश्वरयोगिज्ञानयोर्व्यभिचारात्। यदा यदर्थेन्द्रिययोर्लौकिकसन्निकर्षजन्य ज्ञान तदा तदर्थं इति व्याप्तेश्चास्माकमपीष्टत्वात्। आत्मरूपज्ञानस्येन्द्रियादिजन्यत्वाभावादिति, तदसत्, यत्र ज्ञानत्व तत्सविषयकत्वमिति व्याप्ते। सविषयकत्व च विषयतासबन्धेन विषयसाधारणम्। एव चेश्वरज्ञानादावपि न व्यभिचार, उक्त निरूप्यत्वस्य तत्सत्त्वात्।

यत्तु ज्ञानस्य विषयसबन्धो न तात्त्विक, वक्ष्यमाणरीत्या तात्त्विकस्य विषयतासबन्धस्य निरूपयितुमशक्यत्वात्। किन्त्वाध्यासिक। अतो न तस्य स्वाभाविकत्वमिति, तन्न, स हि प्रपञ्चमिथ्यात्वसिद्धया वा न तात्त्विक, निरूपयितुमशक्यतया वा ? नाद्य, इदानी मिथ्यात्वासिद्धेस्तदनुमानहेतोरेव निरूप्यमाणत्वात्। नान्त्यः निर्वक्तुमसामर्थ्ये गुरव उपास्यन्ता येभ्यो निरुक्तिवचनानि शिक्ष्यन्त इत्येतत् पूर्वाचार्यैरुक्तोत्तरत्वात्। अविद्यायाश्च निरस्यत्वात्।

यदपि ज्ञाने विषयसबन्ध स्वाभाविक, एवमिच्छायामप्युपाध्यनुल्लेखेऽपि घटमिच्छामीत्यनुभवादित्यत्र दूषणमुक्तम् 'प्रकारतयाज्ञानरूपोपाधि-

सबन्धानुल्लेखेऽपि सबन्धतया तदुल्लेखानपायाद्"इति, तदपि न, सबन्धतया ज्ञानस्यैव भानमित्यत्र बीजाभावात्। अन्ये तु "व्यक्ति विना प्रलये जातिस-त्त्वेऽपि व्यक्त्युपरक्तधीविषयत्वमन्यदास्त्येवेति जातौ व्यक्त्यनुपरक्तबुद्ध्य-विषयत्वस्य वा ज्ञाने नियम" इति वदन्ति, अत्राहु—नैतद् युक्तम्, व्यक्त्य-विषयकजात्याद्यनुमितिसंभवाद् ध्वंसो घटत्वाद्यप्रतियोगिक इत्यनुमित्याद सवसम्मतत्वादाद्यनियम व्यभिचारात्। घटाद्यविषयकघटत्वादिभ्रम दापवि-द्रापजन्यतया शङ्ख पात इत्यादि यल्लौकिकप्रत्यक्ष द्वितीयेऽपि व्यभिचारात्। साक्षात्करोमीत्यनुव्यवसायानुरोधेन लौकिकसन्निकर्षस्यव दोषविशेषस्यापि तादृशविषयतानियामकत्वापगमात्, कालिकसबन्धेन पटे घटत्वप्रत्यक्ष भव-त्वितीच्छाजन्य वह्नयनुमित्यादिसामग्रीकालीने घटाविषयके घटत्वप्रत्यक्षे व्यभिचाराच्च। तत्तेच्छानुरोधेन घटत्वादिभानेऽपि भिन्नविषयकानुमितिसा-मग्र्या प्रतिबन्धेन घटाभानात्। घटत्वे लौकिकसन्निकर्षत्वेन तस्य लौकिक-प्रत्यक्षत्वसंभवात्। समवायेन जातिप्रत्यक्षप्रमाया व्यक्तिविषयकत्वनियम च ज्ञानविषयोभयवाशिष्ट्यावगाहिज्ञानस्य विषयविषयकत्वनियमस्य युक्तत्वा-दित्यादि, तत्तेद चिन्त्यम्, घटत्वप्रतियोगिकत्वाभावानुमितौ न व्यभिचार, समवायातिरिक्तसबन्धावच्छिन्नजातिप्रकारतायां निरवच्छिन्नायां अनभ्यु-पगमात्। घटेतरावृत्तित्वादिघटितघटत्वेने घटत्वस्य प्रकारतायां प्रतियोगि-त्वोपयवश्यवाच्यतया व्यक्तिविषयकत्वसंभवात्। व्यक्तिविशेष्यकत्वपर्यन्तस्य व्याप्तावनिवेशात्। घटाद्यविषयकघटत्वादिभ्रमेऽपि घटस्य विशेष्यत्वावर-च्छेदकव्यक्त्यन्तरविशेषणत्वेन तद्भानात्। न च समवायेनैव स्वाश्रयतादात्म्य-सबन्धेनापि जातिप्रकारतायां निरवच्छिन्नत्वोपगमात्। घटत्वस्य ससर्गरोपे निरवच्छिन्नप्रकारतयैव व्यक्त्यन्तरे भानात्तत्र घटत्वत्वोपस्थितौ मानाभावात् कथ घटविषयकत्वनियम इति वाच्यम्, व्यक्तिमात्रविषयकत्वनियमस्य तथापि भङ्गाभावात्। स्वसमवायिव्यक्त्यन्तर्भावेन व्याप्तेरकल्पनात्। घट-त्वमुख्यविशेष्यकसाक्षात्कारिभ्रमस्य संभवात् संयुक्तसमवायप्रत्यासत्तिं विना तत्प्रत्यक्षायोगात्। अन्यथा तु विशेष्यभानसामग्र्यन्तर्गतत्वेन तदभावेऽपि ज्ञानसन्निकर्षेण तद्धीरभवात्। अभेदारोपस्थले च घटत्वस्य घटनिष्ठतयैव भानात्। एव कालिकसबन्धेनेत्यादिकमपि तथैव, कालिकसबन्धेन घटत्वप्र-कारकपटविशेष्यकप्रत्यक्षस्य घटत्वाशेऽन्याप्रकारकस्यासंभवाद्घटत्वत्वेन तत्रापि घटत्वभानस्यावश्यकत्वात्। अत एव कालो रजतत्ववानिति रजत-त्वाशेऽन्यप्रकारक एव प्रत्ययो न तु कालो रजतमिति रजतत्वाशे

निरवच्छिन्नप्रकारताक । तया कलो रजतत्ववानित्येव शब्दः साधु । न तु कालो रजतमित्यपि । तच्छक्तौ समवायस्यैव ससर्गताघटकत्वनियमादिति सिद्धान्त. । न च भिन्नविषयकानुमितिसामग्रीसत्त्वे इच्छाविषयानिरिक्तस्य कथ भानमिति वाच्यम्, भावता विना तदिच्छाविषयसिद्धेरनिर्वाह्यतावतो मानाभ्युपगमात् । भिन्न विषयकानुमितिसामग्रीकालीने वह्नित्वादेरपि विषयत्वात् । ज्ञानविषयाभयवैशिष्ट्यावगाहिज्ञानस्य विषयविषयकत्वनियमस्तु नैयायिकेन कल्प्य, अनुव्यवसायमानवृत्तित्वात् । व्यवसाये विशेष्ये प्रकारवैशिष्ट्यभानऽपि ज्ञाननिष्ठविषयवैशिष्ट्यस्यानवभासात्स्वनाग्राह्यत्वानभ्युपगमात् । स्वत प्रामाण्यविप्रतिपत्तौ तु ज्ञानादिपदे बाधवारणाय तथोक्तत्वात् ।

प्रकृतमनुसराम । शुद्धचिद्व्यक्तिभेदस्य हेतुत्वे स्वकीयविशिष्टरूप कल्पितत्तादात्म्यसत्त्वेऽपि शुद्धरूपे तदभावन तद्भदस्य तन्मत सत्वाद् व्यभिचार. । न च परार्थानुमानतया परसिद्धन शुद्धव्यक्तौ तद्व्यक्तेरैक्यसबन्धेन तदव्यक्तिविशिष्टप्रतियोगिकभेदस्य हेतुत्वमिति वाच्यम्, परेण शुद्धचिद्व्यक्तयनङ्गीकारेण प्रतियोग्यप्रसिद्धे । प्रसाध्याङ्गकत्वाभिप्रायेणैवास्य हेतो. प्रवृत्त्या स्वरीत्यैव निर्दोषीकर्तुमुचितत्वात् ।

न च शुद्धब्रह्मनिष्ठाया शाब्दपदजन्यधीविशेष्यताव्यक्तिस्तदवच्छिन्नप्रतियोगिताकभेदो हेतु, तेन घटादेरपि लक्षणया तद्धीविशेष्यत्वेऽपि नासिद्धि, ब्रह्मविषयकत्वेनैवावच्छेदकत्वनियमात् । न वा गुरोरनवच्छेदकत्वपक्षेऽपि क्षति., ज्ञानपद जन्यधाविशेष्यत्वस्य प्रतियोगितावच्छेदकानङ्गीकारेण शुद्धचिन्निष्ठभेदप्रतियोगिताया विशेष्यताविशेषप्रकारतेरनवच्छेदकसबन्धतयैव निवेशादिति वाच्यम्, शुद्धस्याविषयत्वमते प्रतियोगितावच्छेदकसबन्धस्याप्रसिद्धे. ।

अथ सत्यत्वादिरूपस्वधर्मतानिर्वाहकभेदस्य शुद्धब्रह्मणि स्वीकारमतेऽपि तस्याप्रत्यक्षतया तत्प्रतियोगितामा निरवच्छिन्नत्वात्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्य तद्व्यक्तावस्वीकारान्न दोष इति चेत्, न, अप्रत्यक्षभेदप्रतियोगितामा अप्यवच्छिन्नत्वे बाधकाभावात् । अन्यथा पिशाचवद्भेदादिप्रतियोगितायाः पिशाचाद्यनवच्छिन्नत्वप्रसगात् । प्रतियोगिनावच्छेदकानवगाहिभेदप्रत्यक्षमात्रस्य परमताङ्गीकारात् । भेदप्रत्यक्षेऽवकण नियामकत्वेन ब्रह्मण इदानीमावृतत्वेन तद्भेदस्याप्रत्यक्षत्वेऽपि जीवन्मुक्ति-

दशाया तत्प्रत्यक्षेण तत्प्रतियोगितायाः अवच्छिनत्वधीव्यमिति स्वयमेव वक्ष्यमाणत्वाच्च ।

अथ तदव्यक्तिवृत्तिभेदभिन्नभेदो हेतुरिति चेत्, न, तद्भेदेऽपि तदव्यक्तिवृत्तिभेदघटोभयभेदसत्त्वात् । न च तदव्यक्तिवृत्तिभेदत्वावच्छिन्नप्रतियोगिताकभेदाश्रयभेदो हेतुरिति वाच्यम्, घटादिभेदस्यापि ब्रह्मवृत्तितयोक्तभेदाप्रसिद्धया घटादावसिद्धिप्रसङ्गात् । न च विशेषणनयोक्तभेदो हेतुर्न तु प्रतियोगितयेति न दोष इति वाच्यम्, तथापि शुद्धचिद्व्यक्तिभेदस्य तद्व्यक्तिवृत्तितया घटादिवृत्तितद्भेदस्यापि तदव्यक्तिवृत्तिभेदभिन्नत्वाभावादसिद्धितादवस्थ्यात् । एतेन स्वप्रतियोगिकवृत्तिभिन्नशुद्धब्रह्मप्रतियोगिकभेदो हेतुरपि निरस्तः । न चोक्तवृत्तित्वविशिष्टत्व घटादिवृत्तिशुद्धचिद्भेदे नास्तीति वाच्यम्, तथापि हि उक्तभेद पक्षान्तर्गतो न वा ? नाद्य, तस्यमिथ्यात्वासिद्धिप्रसङ्गात् । नाद्य, तदभागासिद्धेः ।

वेदाविरुद्धयुक्तीनामर्कः तर्कंकुतूहले ।
जडत्वहेतावन्येषां जडत्व विशदीकृतम् ॥१८॥

एकोनविंशोंऽशः

विशेषणत्वसम्बन्धेन शुद्धचिद्भवति शुद्धचिद्भेदे शुद्धचिद्वृत्तिभिन्नत्व-स्य तत्सम्बन्धेन विरहात्परिच्छिन्नत्वमपि हेतु । तद्धि दर्शन कालतो वस्तु-तश्च नेया, न्मेरात्यन्ताभावव्यवस्थानान्यानामत्रनियोगित्वभेदात् । तथाच-न्ययोरात्मनि व्यभिचार । मध्यस्थ त्वाकाशादावसिद्धि ।' आकाश सम्भूत, मनोऽन्यदात्मन्' इत्यादिश्रुतीना आकाशादेर्जन्यत्वबोधकतया प्रबन्धेन निरा-कृतत्वात् । तेन जन्यमानत्वाविद्योपादानक वाराभाशनानन्दवादविद्यासम्बन्धा-देरप्यज्ञानप्रयुक्तत्वेनाज्ञाननाशकनारमत्वात् । शुक्त्यज्ञानसम्बन्धादौ नलृप्त-त्वादेकाज्ञानपक्षे तन्याक्लृप्त वेऽपि 'विद्वानामरुणाद्विमुक्तः" इत्यादिश्रुतेर्ला-घवादनात्मत्वावच्छेदेनैवाज्ञानविरोधित्वकल्पनादनात्ममात्र विनाशि । अविद्यानाशस्यैवानात्ममात्रनाशत्वकल्पनालाघवादिनाश-नत्तिकल्पनागौरव-मित्यादि निरस्तम् । बाधकसत्त्वेऽपि लाघवमानानुरोधेनोत्तार्थकल्पने वस्तुत्वस्यैव नाशप्रतियोगितावच्छेदकत्वकल्पनापत्त्या शून्यवादप्रसङ्गात् ।

अथात्यन्ताभावान्योन्याभावयो स्वसमानसत्ताक विशेषणान्नात्मनि व्यभिचार । यन हेतु स्याप्य त स्वपदार्थ, तयात्मात्यन्ताभावयोर्विषमस-त्ताकत्वान्न व्यभिचार, अनाकाशादौ चात्यन्ताभावस्वसमानसत्ताकत्वान्ना-सिद्धिः । न च व्यावहारिकप्रतियोगिकाभावस्य पारमार्थिकपक्षेऽसिद्धि, स्वा-न्यूनसत्ताकेति वाच्यत्वात् । अत एव प्रातिभासिकस्य शुक्तिरूप्यादेर्व्यावहा-रिकात्यन्ताभावप्रतियोगित्वेऽपि न क्षति । न च स्वत्वानुगम, प्राचीननये तन्यादोषवादात्मावृत्तिप्रतियोगितायाः हेतुतावच्छेदकसम्बन्धत्वाद्वेति चेत्, मैवम्, सत्ताभेदस्य मिथ्यात्वमिद्व्युत्पत्तिकल्पतया तस्य हेतुघटकत्वानुपपत्ते., आकाशाद्यत्यन्ताभावयोरात्मावृत्तिप्रतियोगितायाः सदन्वये मानाभावाच्च । जीवादौ भागासिद्धिप्रसङ्गाच्च । केवलान्वयनिरूपणाभावे भागासिद्धावारय-कत्वाच्च । प्रमेये भागासिद्धेश्च । न च प्रमेयस्य घटादिरूपतया तत्र प्रत्येक-रूपावच्छेदेन प्रतियोगितयाभेदसत्त्वान्न दोष इति वाच्यम्, येन रूपेण हेतु-स्तेन रूपेण मिथ्यात्वसिद्धावपि प्रमेयत्वरूपेण तदसिद्धे । न चैकरूपेण मिथ्या-त्वसिद्धौ रूपान्तरेणापि तत्सिद्धिरिति वाच्यम्; उपहितरूपेण ब्रह्मणो मिथ्या-

त्वसिद्धया शुद्धस्यापि तदापत्ते । प्रमेयस्य घटादिस्वरूपान्यरूपत्वाभावाद्धर्म-पन्यमिति चेत्, न, ब्रह्मण्यपि तुल्यत्वादित्यादे पूर्वमेवोक्तत्वात् ।

यत्तु आनन्दबोधाचार्या—'घटादय स्वानुगतप्रतिभासे वस्तुनि कल्पिता', विभक्तत्वाद यथा सर्पमालादिक स्वानुगतप्रतिभासे रज्ज्वा इदमशे विभज्यते, एव ब्रह्मण्यनुगच्छति घटादिक विभज्यते सन्घट सन्पट इत्यादि । यच्च व्याचक्षते 'स्वानुगतप्रतिभासे स्वतादात्म्येन स्वरूपतो भानयोग्ये स्वतादात्म्यविषयतानिरूपितानवच्छिनप्रकारतावतीति यावत् । सप्तम्या व्यापकत्व मर्थो व्यापकतानिरूपकत्व तादात्म्येन । तथा च यदुक्तप्रकारतावत्तत्तत्कल्पितमिति व्यापकता लभ्यते । कल्पितत्व ज्ञाननिवर्त्यत्वम् । तादृशप्रकारता व्यापकस्वनिवर्तकधीविषयताकत्व साध्यमुक्तप्रकारताया सामानाधिकरण्य-मात्रनिवेशे घटस्य स्वतादात्म्यभ्रमविषयघटत्वादौ कल्पितत्वमादाय परैरर्थान्तर वाच्यमतस्तद्व्यापकत्वनिवेश । तादृशप्रकारतावति द्रव्यगुणकर्मादौ स्वनिवर्तकधीविषयत्वाभावादनवच्छिनेति । द्रव्यगुणादौ च नानवच्छिनप्रकारत्वम् । प्रतियोगितादेरखण्डत्वस्वीकारे तादृशप्रकारतावति तत्र घटादे स्वनिवर्तकधीविषयत्वाभावानिरूपितान्तस्थले स्वतादात्म्यसमानाधिकरणेति वाच्यम् । यथा सन्निवेशे व्यापकत्व न व्यर्थम् । सामानाधिकरण्य वा तत्स्थाने निवेश्यम । प्रतियोगित्वादेरपि घटत्वाद् घटादौ तादात्म्यस्वीकारे तु वक्ष्यमाणरीत्या सामान्यवत्तस्य ब्रह्मरूपत्वाद् घटादिनिवर्तकधीविषयत्वान व्यभिचारात् इति निरूपितान्तमपि निर्दोषम् । तच्च यथोक्तरूपेण नाम्नसिद्धय थ प्रकारताविशेषणम् 'इत्यादि, तन्नेद वाच्यम्, ज्ञाननिवर्त्यत्वरूप मिथ्यात्व निरस्तमेव । सन्घट इत्यादौ समदायन सत्ताया एव भानमित्यस्य व्यवस्थापितत्या घटत्वावच्छिनघटनिष्ठविशेष्यतानिरूपितसमवायनिष्ठससर्गतानिरूपिता नवच्छिनप्रकारताया एव सत्ताया सत्त्वात् । घटतादात्म्यविषयतानिरूपितानवच्छिनप्रकारताया सद्रूपे सत्त्वेऽपि न किंचिद्बीजम् सत्त्वरूपप्रतियोगिकतादात्म्यस्यैव सत्तास्वरूपसबन्धेन सदाकारधीविषय इति भवदुक्तपक्षे यथोक्तप्रकारताया दुर्लभत्वाच्च । द्रव्यगुणादीनामपि घटतादात्म्यविषयतानिरूपितप्रकारतावत्त्व निरस्तमेव । घटनिष्ठविशेष्यतानिरूपितसमवायससर्गतानिरूपितप्रकारतायास्तादृशाभेदससर्गतानिरूपिताश्रयनिष्ठविषयतानिरूपितप्रकारताया वा गुणादौ स्वीकारात् । प्रतियोगितत्वादिकमपि न युक्तम् , अखण्डत्वेऽपि सासर्गिकविषयतास्थल एव तेषा स्वरूपेण भानोपगमात् । प्रकारतास्थले प्रतियोगितत्वादिरूपेणैव भानोपगमात् , घटत्ववानित्यादौ घटत्वत्वेन

घटत्वादिमानवत् । "धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र वह्नित्वेन वह्नित्वे प्रतियोगितात्वविशिष्टानवच्छेदकत्वविशिष्टाभावो बुध्यते" इति दीधितिस्वारस्याच्च । गोत्वादिसामान्यवत्त्वेऽपि द्रव्यत्वकर्मत्वादिमति तु निरवर्तव्यम् । एतेन घटादिकं सद्रूपं कल्पितम्, प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात् । "प्रत्येकं चन्द्रानुविद्धजलनरङ्गचन्द्रवद्" इति ब्रह्मसिद्धिकारोक्तम् । स्वतादात्म्यविषयकप्रतीतिविषयत्वं हेत्वर्थः । यद्यतादात्म्यविषयकप्रतीतिविषयस्तत्तत्र कल्पितमिति सामान्यतो व्याप्तिरत एव दृष्टान्ते चन्द्रानुविद्धेत्युक्तं चन्द्रानुविद्धप्रतीतिविषये इति तदर्थः । कल्पितत्वं स्वाभाववति प्रतीयमानत्वम् । स्वत्वव्यापकत्वाद्यन्नाभावकत्वमिति यावत् । स्वानधिकरणकालादिवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगित्वमादाय पटादौ परापरभावनिरासाय व्यापकत्वनिवेश" इति तदाशयवर्णनञ्च निरस्तम्, हेतावसिद्धत्वात् द्वितीयमिथ्यात्वोक्तौ च सिद्धसाधनादेर्दुर्वारत्वाच्च । सत्तायोगीमुण्डो गौरित्यादिज्ञानानुगते गोत्वादौ व्यक्त्यादेरकल्पितत्वेन व्यभिचाराच्च ।

यत्तु गोत्वादिसामान्ये मानाभाव, सत्तासामान्येनैव तत्कार्यनिर्वाहात् । तथाहि यदा गोत्वाद्यभ्युपगमेऽपि तद्व्यञ्जकतावच्छेदकसामान्यान्तराभ्युपगमाज्जातिवृत्तिलौकिकविषयतया, लौकिकप्रत्यक्षं प्रति स्वविषयसमवेतत्वसम्बन्धेन प्रत्यक्षस्य हेतुतया, प्रत्यक्षविषयव्यक्तीना गोत्वाद्यविशेषिताना मेव सम्बन्धविषया जातिप्रत्यक्षोत्पत्तिप्रयोजकत्वरूप व्यञ्जकत्व, शाबलेयावच्छिन्नसन्निकर्षादिर्गोत्वादिव्यञ्जकत्वेऽपि सत्ताद्यवच्छिन्नसन्निकर्षस्यापतनाव्यक्तीना व्यञ्जकत्वं, तथा गोत्वादिनाभिमतव्यक्तीनामन्यतमनिष्ठतादात्म्यनिष्ठवैशिष्ट्येन सत्तासामान्यस्यैव गोत्वादिप्रयोज्यत्वाभिमतकार्यप्रयोजकत्वमुपपन्नम् । न च सत्तान्वयानुगम, स्वरूपसम्बन्धेन कारणत्वादिस्थले तत्सम्बन्धेऽपि गमादन्यतमत्वेनानुगमनत्वाच्च । न च तादात्म्यानामनन्तत्वात् तद्घटितान्यतमत्वनिवेशे गौरवम्, तावद्व्यक्तीनामेव स्वरूपत एव निवेशदनुगतत्वादान्तरसत्व एव तेन रूपेणान्वयाभिधित्वीकारात् । अत एव स्वरूपसम्बन्धेनाभावादौ कारणत्वादिस्थले तादात्म्यघटितान्यतमत्वमेव स्वरूपतोऽवच्छेदकमस्त्वयाननुगतसम्बन्धे कारणत्वादेर्दुर्वचत्वात् । एवञ्च तादृशान्यतमसम्बन्धेन सद्रूपमेव गौरित्वादिव्यवहारविषयः । गोत्वाद्यवच्छिन्नत्वेनाभिमतकारणत्वादिघटकसम्बन्धेन सद्रूपेणैवावच्छेदने । न च गोव्यक्तीनामन्यतमत्वेनापि कारणत्वादिसम्बन्धत्वात्तत्सामान्यमेव तत्तथमिति वाच्यम्;

गोत्वाद्यभ्युपगमेऽपि तादृशविनिगमनाविरहात्तेन रूपेणान्यथा सिद्धेरुभाभ्यां स्वीकार्यत्वादिति,

अत्रेदं वाच्यम्, गौरित्यत्र सद्रूपस्य विषयत्वे गौ सन्निति प्रत्ययो न स्यात् सम्बन्धनिरूपितयो प्रतियोगित्वानुयोगित्वयोरेकरूपावच्छेद्यत्वस्य भवतान्युपगमात् अन्यथा सत्सदिति प्रत्ययापत्ते । न चेष्टापत्ति, स्वयमेव तदभावस्याभ्युपगतत्वात् । न चोक्तान्यतमसम्बन्धेन सद्रूपस्य गौरित्यत्र विषयत्वात् सन्नित्यंशे च तादात्म्येन विषयत्वान्न दोष इति वाच्यम्, व्यक्त्युपरि सद्रूपस्यान्यतमसम्बन्धेन भानेऽपि सद्रूपव्यक्तिनिरूपितसद्रूपप्रकारतायास्तादात्म्यस्यैव संसर्गतया दोषस्य दुर्वारत्वात् । न च विशेष्यताया सद्रूप गोत्वरूपेण भासते । प्रकारताया त्वनवच्छिन्नतयैवेति न दोष इति वाच्यम् , गोत्वस्य स्वरूपतो भानाभ्युपगमावश्यकत्वे गोत्वस्य सद्रूपस्वरूपने बीजाभावात् । एकस्यैव वस्तुन प्रकारत्वमनवच्छिन्न विशेष्यत्वं त्ववच्छिन्नमिति वैषम्यस्य च निर्बीजत्वात् । अन्यथा सत्सदित्यत्रापि विशेष्यताया अवच्छिन्नत्वस्य दुर्वारत्वापत्ते । स्वतादात्म्यविषयतानिरूपितानवच्छिन्नप्रकारताशालिनि सद्रूपे स्वनिवर्तकधीविषयत्वाभावेन यदुक्तप्रकारतावत्स्वनिवर्तकधीविषय इति व्यापकत्वभावेन तद्गर्भसाध्यस्यानुपपत्तश्च । मया तु गोत्वस्य स्वरूपतो भानस्यानुभवसिद्धतया तत्प्रकारतायां निरवच्छिन्नत्वस्वीकारात् । गोत्वेनानुभवानङ्गीकारे च लोकबाह्यत्वापत्ते । एवं गोनिष्ठकारणतायां सद्रूपस्यावच्छेदकत्वमप्यनुपपन्नम्, अवच्छेद्यानाश्रयसाधारण्यात् । असाधारण्यावृत्तस्यैव धर्मस्य कारणतावच्छेदकत्वात् ।

अथोक्तसम्बन्धेन सद्रूपमप्यसाधारण्यावृत्तमेव कारणतावच्छेदकसम्बन्धेनावसाधारण्यावृत्तत्वस्यावच्छेदकत्वोपयोगित्वात् । अन्यथा कालिकादिनातिप्रसक्ततया गोत्वादिवदप्यवच्छेदक न स्यादिति चेत्, न, कारणतावच्छेदकसम्बन्धेनानतिप्रसक्तत्वस्यैव वस्तुतोऽवच्छेदकधर्मवृत्तिधर्मेणाप्यनतिप्रसक्तत्वस्यापेक्षितत्वात् । गवेतरासमवेतत्वादिरूपगोत्वत्वेन गोत्वस्य स्वरूपतोऽप्यनतिप्रसक्तत्वात् । कारणत्वमिव तदवच्छेदकत्वमप्यवच्छिन्न नाङ्गीक्रियत इति त्वन्यदेतत् । अन्यथा गोत्वादिमत्त्वेऽपि लाघवेनाप्यसाधारण्यावृत्तित्वसम्बन्धेन द्रव्यत्वस्य कारणतावच्छेदकत्वमादाय विनिगमनाविरहापत्ते । तदपेक्षया समवायस्यावच्छेदकत्वाया लाघवस्येवात्रापि कारणतावच्छेदकसम्बन्धलाघवस्य गोत्वमेवावच्छेदक न तु सद्रूपमित्यत्र कल्पकताया युक्तत्वात् । अन्यथा तावद्व्यक्तिवृत्तिभेदव्यक्तेरेवावच्छेदकत्वसम्भवाच्चित्र बाह्यं ।

यत्तु तेन रूपेणान्वयानिर्देरभयसिद्धत्वादिति तन्न मन्मते क्लृप्तसामान्य कन्यस्य विनिगमनाविरहासभवात् भवन्मते तूभयो क्लृप्तत्वेन तद्रूपेणा-न्वयासिद्धौ बीजाभावात् । कारणतायां अन्दयादिनाव्यतया गोत्वाद्यवच्छेद नैव ग्रहणाच्च । अन्वयव्यतिरेकिम्नोमघत्वावच्छेदकरूपे तद्रूपज्ञानस्य मानतया गोत्वादिनव गृह्यमाणेन तथात्वात् । अत एव दण्डत्व पटत्वावच्छिन्नकार्यता-निरूपितकारणतानवच्छेदकमिति व्यवहार । दण्डत्वन्य कालिकादिनाति-प्रसगेऽपि दण्डत्व घटत्वावच्छिन्नकार्यतानिरूपितकारणतानवच्छेदकमिति व्यवहाराभावात् । एतेन गवादिपदाना शक्यताया गोत्वाद्यवच्छेदकत्वमपि व्याख्यातम् ।

यत्तु सद्रूपविशिष्टगाव्यक्ति वेद शक्यतावच्छेदकस्य स्वीकार इति, तन्न, सद्रूपविशिष्टत्वस्यापि वैयर्थ्यापत्ते । एतेन कम्बुग्रीवादिमत्त्वा-दिना शाब्दस्यापि घटपदशक्तिज्ञानजन्य वापत्तिरित्याशङ्क्य यदुक्तम् घटत्व-प्रकारकघटबोधानुकूला शक्तिरव घटपद शक्ति । नाकिमत तु घटत्वेन घटो बोध्यतामिति विशेष्यत्वमेव ना, सद्रूपेण यत्किञ्चिद्व्यक्तौ शक्य-ताग्रहस्यैवान्वयव्यतिरेकाभ्या सद्रूपेण गाव्यक्तिस्मृतिशाब्दहेतुत्वमनवच्छिन्न मेव । दण्डत्वविशिष्टादावप्यनवच्छिन्नमेव कारणत्वादि गृह्यते । न च घटत्वा-दिजाति विना घटादिकारणत्वमेक दुर्वचमिति वाच्यम्, शक्तिविशेषत्व-स्यातिरिक्तस्याऽप्टरूपस्य वा कारणत्वस्याऽऽनन्तजाति विनाप्यैक्यसभवात्" इत्यादि, तत्सर्वमपास्तम्, शक्तिज्ञाने गोव्यक्तिविशेषणतया सद्रूपभानोप-गमेऽनुभवविरोधात् । अन्यथा तु तद्रूपेण शक्तिज्ञानस्य तद्रूपेण व्यक्ति-स्मृतिहेतुत्वमित्यादेर्दुर्घटत्वात् . दण्डत्वविशिष्टस्यैव कारणत्वग्रहस्वीकार दण्डत्वस्यावच्छेदकत्वभ्रौत्यात्, एतदनिरूपितस्यावच्छेदकत्वस्य मयाप्यनङ्गी-कारात् । अत एव यमादायैव यस्यान्वयव्यतिरेकौ गृह्येते इत्यन्ययासिद्धि-स्तस्य सगच्छते, शक्तिविशेषरूपाभियावादिमीमासकमतेऽपि शक्तेः पर-निष्ठत्वस्यैव स्वीकाराच्छक्यतायामयं नियमोऽवच्छेदकावश्यकत्वात् । कारणत्वस्यापि शक्तिविशेषरूपस्य दण्डत्वाद्यवच्छेदेनैव ग्रहात् । अनिरुक्ता-ऽण्डरूपकारणत्ववादिनव्यमतेऽपि तदवच्छेदकग्रहस्यापेक्षितत्वात् । अवच्छेद-कस्य कारणत्ववादिना मते तु दण्डत्वादेरत्यावश्यकत्वात् । न चाभेदेऽवच्छे-द्यावच्छेदकभावानुपपत्ति., रूपभेदेन तत्सभवात् ।

एतेन कार्यकारणव्यक्तीनामन्यतमव्यक्तयोरेव साक्षात्कारणताघटकत्व-

सभव इत्यपि चिन्त्यम्, घटाव्यवहितपूर्वकालनिष्ठात्यन्ताभावप्रतियोगित्वाभावस्य रासभसाधारण्यात्। तादृशप्रतियोगितानवच्छेदकधर्मवत्त्वे चास्माकमिष्टसिद्धे । प्रतिव्यक्तिकार्यकारणभावग्रहोक्तौ च प्रवृत्याद्यनुपपत्ति । कारणत्व सखण्डमखण्ड वातिरिक्तमवच्छेदकरूप वेत्याद्यन्यदेतत् । दण्डत्वाद्यवच्छेदे च तद्ग्रह इत्यस्यावश्यमङ्गीकार्यत्वात्सामान्याभ्युपगमो यथानुभवमावश्यक एवेति, तिष्ठतु तावत् ।

एतेन रूपादिहीनतया ब्रह्मण कथ चाक्षुषादिविषयत्वमित्याशङ्क्य प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षानियत्यम्, ब्रह्म तु कालसत्तादिवत्सर्वेन्द्रियग्राह्यम्, अतो नानुपपत्तिरित्यपि निरस्तम् । सदाकारबुद्धौ ब्रह्मभानस्य एवमेव निरस्ततया कालादिवत् सामान्यसामग्रीमयदियापि तद्भानानुपपत्ते । तेन—

अतोऽनुभव एवैको विषयो ज्ञातलक्षण ।
अज्ञादीना स्वत सिद्धो यत्र तेषा प्रमाणता ॥ इति चातिकम् ।

अनुभव सद्रूपम्, तस्यैव विषयत्वे हेतुरज्ञातलक्षण इति सद्रूपभिन्न विषयीभूतसद्रूपावच्छेदक न तु विषय स्वतः सिद्धो नारोपित । अथवाज्ञातो विषयोऽनुभव एव, जडेऽज्ञातत्वाभावात् । तथा च सद्रूपान्यस्य विषयत्वेऽपि न क्षति । अज्ञादीना चक्षुरादिप्रयोज्यज्ञानाना तेन भ्रमस्याप्यनुभवो विषय इति लभते । यत्र यद्विषयकत्वेन प्रमाणताभ्रमात्वव्यवहार । उक्तविषयकत्व विना ज्ञानमात्रे प्रमात्वव्यवहारो न स्यात् अज्ञाताबाधितविषयकत्वस्यैव प्रमात्वादिभ्रमेऽप्यधिष्ठानीभूतसद्रूपतादात्म्यापन्नरजतादिविषयकत्वेनैव बाधपूर्व प्रमात्वव्यवहार इति धीमात्रस्य सद्रूपविषयकत्वमावश्यकमित्यर्थकमपास्तम् । स्वसिद्धान्तमात्रमूलार्थकथनपरत्वेन साधकत्वाभावात् । ज्ञानविषयत्वाभावस्यवाज्ञातत्वस्य मयाभ्युपगमात् । अबाधितत्वस्यापि घटादिष्वेव साधनात् तद्विषयकत्वेनैव प्रमात्वोपपत्ते । तथा च घटादीना बाधितत्वसिद्धौ प्रमात्वान्यथानुपपत्त्यासद्रूपविषयकत्व धीमात्रस्य कल्प्यम् । तत्सिद्धौ चोक्तहेतुना तेषा मिथ्यात्वसिद्धिरित्यन्योन्याश्रयापत्ति, प्रत्यक्षेण सद्रूपब्रह्मविषयकत्वस्य बुद्धीनामसिद्धेः । एतेनावरणेन प्रतिरुद्धयोग्यताक ब्रह्म घटाद्याकारवृत्तिकाले घटाद्यवच्छिन्नसद्रूपेणानावरणाद्योग्य भवतीत्यपास्तम् । ब्रह्मणश्चक्षुरादिग्रह्ययोग्यताकल्पकमानस्याभावे । राहोस्तु उद्भूतरूपादिमद्द्रव्य-

त्वम्ब यद्यादिम्यो यावद्यावच्छेदकत्वेन कल्पनया आकाशे च अमविषयत्वेन मनोनामिहारात्, मापराशिम्यमणीगुटिकादेरिव पृथगसमवायेनापि चन्द्रावच्छेदेन चाक्षुषापत्ति वपन्यम् ।

अथ द्रव्यत्व सद्रूपमेव तत्त्व कल्पितत्वादात्म्येन स्वस्मिन्नप्यस्तीति कल्पितत्वाश्रय सद्रूपसम्बन्धावच्छिन्नत्वादात्म्यानि चैतन्यतत्समवायेन सद्रूपनिष्ठत्वेनाप्यस्तीत द्रव्यम । अतो रूपादिहीनत्व कथ चाक्षुषादि, तथापि सद्रूपसम्बन्धावच्छिन्नात्म्यानामन्यतमसम्बन्धेन सद्रूपविशिष्ट यत्तद्वृत्तिविषयतासम्बन्धेन प्रत्यक्ष प्रत्येव रूपादिहेतु । अतः कल्पितात्म्यस्योक्तकार्यतावच्छेदककोटौ समवायेनानिवेशाद् ब्रह्मचाक्षुषादौ न रूपाद्यपेक्षेति, तन्न सामान्यस्य सद्रूपतया एवाभिन्नत्वात् । उक्तविषयतया चाक्षुषादावुक्तादिदया समवायेन द्रव्यत्वादिशिष्टवृत्तिलौकिकविषयताया एव लाघवेन कार्यतावच्छेदकसम्बन्धत्व युक्तत्वात् । उक्तघटितत्वात्म्यानामन्यतमसम्बन्धेन सद्रूपविशिष्टत्वेव विषयतया हेतुतया निवेशे गौरवाच्च । आकाशादीनामपि चाक्षुषापत्तेश्च । सामान्यस्यापसारितत्वेऽपि त्वया ब्रह्मणि कार्योत्पत्तेः स्वीकारात् । न च विषयतासम्बन्धावच्छिन्नकारणतावैकल्पितत्वादात्म्यमेव निवेश्यत इति वाच्यम्, घटादीना चाक्षुषापत्तेः । न च तेषा विषयत्वेन हेतुतावच्छेदकत्वादिहेतुतवैव तदिति वाच्यम्, वायोरपि स्पार्शनापत्तेः । सद्रूपस्य तादात्म्येन चाक्षुषादिहेतुत्वकल्पने तु शुद्धस्यापि तदापत्ते । पूर्णानन्दरूपेण तस्य मूलाज्ञानावृतत्वादेव न प्रकाशः । घटाद्यवच्छिन्नसद्रूपेण तु तदनावृतत्वात् । चाक्षुषादिसद्रूपपूर्णानन्दत्वधर्मभेदत्वाविवक्षक इत्यादिरप्यमनोरथमात्रत्वादिदमल बहुना ।

यदपि द्रव्यग्रहे चक्षुषो रूपापेक्षा न त्वल्पग्रहे, अत्र तु न द्रव्यम्, अव्यूलमनणुह्रस्वमदीर्घमिति चतुर्विधपरिमाणनिषेधेन द्रव्यत्वनिषेधादिति, तदप्यसत्; द्रव्यत्वमत्रैतन्निष्ठचाक्षुषत्व तत्राप्यस्तीकित्वात् । द्रव्यभिन्नाना गुणकर्मसामान्याना द्रव्यसमवेतानामेव चाक्षुषत्वीकारात् । अव्यूलमित्यस्यावान्तरपरिमाणसामानाधिकरण्यात् ।

ननु परिमाणसामान्येन तत्र निषेध, सकोचे मानाभावात्, घटादिमाहत्परिमाणस्य ब्रह्मण्यसम्भवात्तत्समानत्वादिना अमहत्त्वसम्बन्धस्य परमहत्त्वस्यैव अमहत्त्वादि यदि, तन्न, रूपादिमत्त्वेऽपि चक्षुषः परमहत्त्वसम्बन्धस्यैव रूपादौ दर्शनेन सर्वमानकतोक्तरीत्या परमहत्त्वस्य

न्यभावात् । तत्संयुक्ततत्त्वस्यैव भासकत्वानुपयोगादणुत्वनिषेधस्य न्याय्यनुपपादनाच्च । "महतो महीयान्" इतिश्रुतिविरोधेन परिमाणमात्रनिषेधन्याशयत्वात् परिमाणशून्यत्वेन महत्त्वोपपादने च बीजाभावात्सङ्कोचस्योभयत्रापि साम्यात्, 'न चक्षुषा दृश्यते" इत्यादिश्रुतेर्मूलाज्ञानस्य वेदजन्यवृत्त्यैव निवृत्तिरित्यर्थस्यापि सङ्कोचरूपत्वात्, स्वकल्पितनियमानुरोधेन श्रुतिसङ्कोचापेक्षया श्रुत्यनुरोधेन श्रुतिसङ्कोचस्यैव युक्तत्वात्, दीधितिकारेण पदार्थखण्डने ईश्वरजीवत्व परिमाणानभ्युपगमेऽपि श्रुतिविरोधस्य तुल्यत्वात्, द्रव्यत्वस्य नैनापि स्वीकाराच्च ।

ये तु श्रुतिद्वयप्रामाण्यादात्मनि परिमाणद्वयमिच्छन्ति ते हृदयशून्या. । घटादौ महत्त्ववानणुत्ववानिति बाधवारणायाणुत्वनिरुप्रकारतानिरूपितविशेष्यत्वावच्छेदकनामबन्धनापरोक्षबोधत्वावच्छिन्ने महत्त्वभेदस्य हेतुत्वकल्पनात् परिमाणद्वयाभाववादितद्वयवादिनोः । अन्यथा शब्दस्य परमात्मगुणव्यवस्थापनविरोधात् । श्रुतियुक्तिविरोधेन निर्विशिष्टस्यैव हेयत्वात् ।

एवम् 'ईश्वरे जीवे च द्रव्यत्वादौ संयोगे च भानाभाव आत्ममनोयोगादेर्हेतुत्वेऽपि न भानम्" इत्यादि सार्वभौमोक्तेश्च उच्छृङ्खलतामानत्वात् । अन्यथा ज्ञानादिगुणानाश्रयत्वापत्ते । ज्ञानादीना गुणत्वानभ्युपगमे तु तेषामेवात्मत्वापत्त्या बाह्यमतप्रवेशापत्ते । न च ज्ञानस्य नित्यत्वमभ्युपगम्य वेदान्तिमतप्रवेशेनानिस्तारः, उत्पत्तिविनाशप्रत्यक्षविरोधात् । द्रव्यत्वाभावेऽप्यात्मचाक्षुषस्य तैरप्यनङ्गीकाराच्चे त्यास्तां विस्तरः ।

वेदाविरुद्धयुक्तीनामकैं तर्ककुतूहले ।
परिच्छिन्नत्वमुच्छिन्नमूहै साधुसमूहिभिः ॥१६॥

विशेषांशः

शुक्तिरूप्यादिकं तु न दृष्टान्तः । भ्रमस्थले प्रसिद्धस्यैव रजतस्य भानोपगमादयव्यातिरेव प्रमाणसिद्धत्वात् । 'बाध्यत्वयाऽसत्त्वमात्मनिष्ठमन्यथाख्यातिपक्षे" इत्यादि भ्रमानुवादस्यल दर्शनाच्च । न च रजतचाक्षुषत्वावच्छिन्ने रजतचक्षुःसंयोगस्य हेतुत्वकल्पना तद्व्यतिरेकेण तदनुपपत्तिरिति वाच्यम्, रजतविशेष्यकत्वस्यापि तत्र कार्यतावच्छेदके निवेशात् । दोषजन्यनिकर्षेण च तदुपस्थितिसम्भवात् । सुरभिचन्दनमित्याद्यनुरोधेन तत्सन्निकर्षस्यावश्यकत्वात् । सौरभमनुमितौ सौरभानुव्यवसायाभावेन तत्र चन्दनत्वेन सौरभानुमाननियमस्य वक्तुमशक्यत्वात् । एतेन पर्वतो वह्निमानित्यनापि विशेषणसन्निकर्षातिरिक्तविशिष्टप्रत्यक्षस्यावश्यकत्वादनुमित्युच्छेदापत्तिरिति निरस्तम् । भ्रमस्थले दोषस्यैवासिद्धतया लौकिकविषयतायामपि तस्यैव नियामकत्वाद्वा । लौकिकसन्निकर्षवद्दोषविशेषस्यापि लौकिकप्रत्यक्षहेतुत्वकल्पनात् । लौकिकसन्निकर्षजन्यत्वस्य अन्यथासिद्धौत्तरत्वस्य वा दोषजन्यतावच्छेदककोटौ निवेशात् । न च रजतादिलौकिकप्रकारतानिरूपितत्वादात्म्यादिनिष्ठप्रकारतानिरूपितविशेष्यतया प्रत्यक्षं प्रति विषयतादिगतदोषहेतुत्वकल्पनापेक्षया तादात्म्यादिसम्बन्धेन रजतादावेव हेतुत्वकल्पने लाघवादनिर्वाच्यरजतसिद्धिरिति वाच्यम्, लौकिकप्रकारतानवच्छेदेन रजतत्वेन दोषकार्यतावच्छेदकत्वस्वीकारात् वक्ष्यमाणगौरवाच्च तन्मते आधिक्याच्च । तथा हि न तावद्रजतत्वावच्छिन्नं प्रति दोषस्य हेतुत्वम्, व्यावहारिकरजते व्यभिचारात् । न च विजातीयरजतत्वावच्छिन्ने प्रमाणान्तरेण वैजात्यासिद्धेर्दोषजन्यतावच्छेदकतयैव तत्कल्पनेऽपि स्यलद्वये वैजात्यस्य कार्यतावच्छेदकत्वे गौरवात् । व्यावहारिकरजतायिनन्तभ्रमवृत्त्यनुपपत्तेश्च । एवं रजतत्वमेकमनुगतमावार्यमिति जातिरेव कल्प्यमिति महद्गौरवम् । न च व्यावहारिकप्रातिभासिकरजतयोर्भेदानवगाहीति वाच्यम्, तदैक्येन शुक्तिरजतयोर्भेदादन्यमानस्यैव स्वीकर्तुमर्हत्वात् । तदभेदादात्म्यमानेऽपि दोषस्यैव हेतुतावौचित्यात् । शुक्तिनिष्ठविशेष्यतानिरूपितविशेषणतया व्यावहारिकरजतभाने रजतचक्षुःसंयोगापेक्षा, न तु प्रातिभासिकरजतनिष्ठविशेष्यतानिरूपितविशेषणतया तद्भान इति ब्रह्मणापि दुर्वचत्वात् । रजतं साक्षात्करोमीति प्रत्यये प्रातिभासिकरजतमेव विषय इत्यपरेणापि शपथमानेनाङ्गीकर्तव्यत्वात् ।

एतेन व्यावहारिकरजते सन्निकर्षादिविरहेऽपि न क्षति । तादात्म्यप्रतीतेस्तदंशे स्मृतित्वात् । इद मुरभीति यावत् । तत्रैका प्रमाणवृत्तिरत्र प्रमाभ्रमवृत्त्यवच्छिन्नमेव चैतन्यमिति तु विशेष । इन्द्रियसंयुक्ततादात्म्यादेस्तत्र सन्निकर्षत्वसंभवाच्चेत्यपि निरस्तम् । तत्र सौरभ पश्यामीत्यनुव्यवसायाभावेन वैषम्यात् । रजतविशेष्यतानिरूपितरजतत्वातिरिक्तनिष्प्रकारतायाश्च प्रत्यक्षेऽननुभवात् । न च व्यावहारिकनिष्ठस्यैव रजतत्वस्य प्रातिभासिकेऽप्यभ्युपगमात्तत एव प्रवृत्त्याद्युपपत्ते प्रातीतिकव्यावहारिकरजतताद्रात्म्यभान स्वीकृतमत्र इति वाच्यम्, अप्रसिद्धान्तात् । प्रातिभासिकव्यावहारिककार्यापत्तिवारणाय व्यावहारिकत्वविशिष्टकारणस्यैव कार्यप्रयोजकत्वादिकल्पनापत्तेश्च । उभयसाधारणरजतत्वे प्रमाणाभावाच्च । अपि चैवमत्र परेषा सिद्धान्तनिष्कर्ष । तादात्म्यादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावेन तद्व्याप्यत्व च विशिष्ट यत्तदवच्छिन्न चिद्विषयताकाज्ञानावारतावच्छेदकत्व श्रुत्यादिनिष्ठम्, रजनाद रजत्वादिसमभिव्याहारस्य तादात्म्यस्य तदुपहितस्य चाप्रसिद्धौ हेतु । स्वप्रकारतावच्छिन्नसंसर्गविषयतावच्छिन्नविशेष्यतावत्तादात्म्यम्, रजतत्वादिप्रकारतावच्छिन्ना या स्वायसंसर्गविषयता तदवच्छिन्नविशेष्यतावत्तादात्म्यम् प्रतियोगित्व तादात्म्य चेति यथाक्रम कार्यतावच्छेदकसम्बन्धा । पक्षवाज्ञानतादात्म्याश्रयनिष्ठताकारत्वाभ्यविषयतासम्बन्धेन भ्रम प्रति स्वाव्यवहित पूर्वकालवृत्ति च स्वतादात्म्याश्रयवृत्तिविषयत्व वेत्युभयसम्बन्धेन विषयविशिष्ट पक्षवाज्ञान भ्रमभिन्न य स्वतादात्म्याश्रयस्तद्वृत्तिविषयतासम्बन्धेन हेतु । अज्ञाननिष्ठेन तादात्म्यसम्बन्धेन कार्यावच्छिन्न प्रत्यज्ञानमुपादानम् । व्यावहारिकघटजनन स्वज्ञानस्य नोक्तविशेषसामग्री किन्तु दण्डकपालादिरूपा श्रुत्यावच्छिन्नचिद्विषयताकाज्ञानाश्रयतावच्छेदकत्वस्य सत्वेऽपि कदाचिद्दोषाभावेन भ्रमानुत्पत्त्या तत्तद्दोषविशिष्टकार्यं प्रति तत्तद्दोषाणामपि हेतुत्वम् । 'अविद्यैव बाह्यदोषसहिता रजताद्याकारेण तत्तद्ज्ञानाभासाकारेण च परिणामभावा स्वकार्येण सह साक्षिणा विषय ' इति विवरणोक्ते । नेद रजतमित्यादिरिद रजतभेदप्रत्यक्षश्रुतित्वादित्यादेवानाहार्यभ्रमत्वज्ञानानाम्बन्धिनिर्णयस्य श्रुतित्व रजतभेदव्याप्यमित्यादि तादृशनिश्चयकालीनोदबुद्धाम्कारम्य वा सत्त्व इदमादावुक्तावच्छेदकत्व मानाभावात् "भ्रमपूर्वकारणसत्त्वे तत्त्वज्ञानानुदय इति विवरणोक्तश्च न रजतादेरुत्पत्ति । भ्रमत्व च प्रातिभासिकादिव्यावृत्तिपरा जातिविशेष आश्रयभेदेनोक्तकार्यतावच्छेदकत्वेन च सिद्ध । भ्रमजनकदोषाणामावृतत्वाच्च बाधात्पूर्वं तस्य

भ्रमेषु न गृह्यते प्रमात्वस्य चारोप । तादात्म्येन भ्रमोत्पत्तिपूर्वमज्ञाने तत्परिणामवैशिष्ट्याभावात् स्वतादात्म्योपलक्षितवृत्तिविषयतायां निवेश । तत्सम्बन्धेन च भाविकार्यस्याप्यज्ञाने सत्त्वम्, अतीतानागतघटादौ स्वसमवायिवृत्तिविषयत्वेन ज्ञायमानघटत्वादै सत्त्ववत् । तन्मात्रनिवेशे भ्रमपूर्वतूलीयादिक्षणेऽपि तत्सम्बन्धेनाज्ञाने तत्कार्यसत्त्वात्तदव्यवहितोत्तरक्षणे भ्रमोत्पत्ति स्यादतोऽव्यवहितपूर्वत्वनिवेश । तस्मादिद रजतमित्यादिभ्रमे एतावन्ति जायन्ते—इदमाद्यवच्छेदेन रजतादितद्धर्मससर्गौ, रजताद्यवच्छेदेनेदमादितादात्म्यतद्धर्मससर्गौ, इदमादिभ्रमावच्छेदेन तावद्विषयकभ्रमतादात्म्यतद्धर्मससर्गौ, उक्तभ्रमावच्छेदेन उक्तभ्रमातद्धर्मयोस्तादात्म्यससर्गौ, यदवच्छेदेन यदीयो यः सबन्धो जायते तदवच्छेदेन स तदुपहित इति परस्पराध्यासपरिच्छेद इति ।

अत्रेद वक्तव्यम्—एतावतामुत्पत्तिकल्पनापेक्षया दोषस्य लौकिकविषयतानियामकत्वमात्रकल्पनमेव लाघवाद्युक्तम्। एव रजतभेदरजतत्वात्यन्ताभावतद्व्याप्यादीना ग्रहकालेऽपि रजतोत्पत्तौ बाधकाभावात्तद्बोधापत्ति । न च तदानी यथोक्तमवच्छेदकत्वम् इदमादौ नास्ति, त्वन्मते भ्रमहेतोरुक्तनिश्चयावच्छिन्नाभावस्य निश्चयकालेऽसत्त्ववदिति वाच्यम्, प्रतियोग्यभावयोः परस्परविरुद्धत्वेन च तथात्वेऽप्युक्तावच्छेदकत्वोक्तिनिर्णययोर्विरोधे मानाभावात्, गौरवाच्च । उक्तनिश्चयत्वावच्छिन्नाभावस्य निश्चयकाले परैरप्यङ्गीकाराच्च । पुरुषान्तरस्योक्तनिर्णयसत्त्वे पुरुषान्तरस्यापि तच्छुक्त्यवच्छेदेन रजतभ्रमानुत्पत्तिप्रसगाच्च । उक्तनिश्चयत्वावच्छिन्नाभावस्य भ्रमप्रमासाधारण्येन हेतुत्वकल्पनया मन्मते गौरवविस्ताराच्च । न च प्रमायामपि नोक्तहेतुत्वम्, तत्सामग्रीप्रतिबन्धकतयैव निर्वाहात्, प्रतिबन्धकत्वाभिमतकालीनकारणे शक्त्यस्वीकारेणोपपत्त्या कुत्रापि कार्ये प्रतिबन्धकत्वास्वीकाराच्च । प्रतिबन्धकाभावस्येव शक्तेर्नित्यत्वेऽप्यव्याप्यवृत्तित्वसभवादिति वाच्यम् ; प्रतिबन्धकाभावहेतुतयैवोपपत्त्यशक्तावेव प्रथम प्रमाणाभावात् । ब्रह्मादिस्थले प्रतिबन्धकत्वेन मदभिमताना शक्तिनाशे उत्तेजकत्वाभिमतानां च शक्त्यन्तरोत्पत्तौ हेतुत्वस्य कल्पतया गौरवाधिक्याच्च । अनित्यस्य शक्तिनिष्ठशक्तिमन्नित्यत्वस्य च सिद्धान्तविरुद्धत्वात् । सामग्रीप्रतिबन्धकतया च निर्णयोत्पत्त्यनन्तरक्षणे कार्यानुत्पत्तेरनिर्वाहात् । अपि चोक्तरीत्या शुक्त्यवच्छेदेन रजतोत्पत्तावुक्तभेदादिनिर्णयवतोऽपि पुरुषान्तरस्य तद्रजतचाक्षुषापत्ति, चक्षुःसयोगादिसत्त्वात् । बाधनिर्णयप्रतिबन्धकतायाश्च भवतानभ्युपगमात् । उत्पत्तेश्च

पुरुषान्तरीयबाधाभावकालीनेनेदमादिनिघ्न यथात्तावच्छेदकत्वेनैव सम्पन्न त्वात् तत्पुरुषस्य बाधबुद्ध्यभावेन तदा तद्रजतस्य नाशाभावाच्च । न च पल्ल वाज्ञानतादात्म्याश्रयनिष्ठेत्यादि पूर्वोक्तकायकारणभावे पल्लवाज्ञानस्य पुरु षभेदेन भिन्नत्वान्न तदग्रहस्तदानी तत्पुरुषीयपल्लवाज्ञानयोभयसम्बन्धेन विषयविशिष्टत्वे मानाभावादिति वाच्यम् भ्रमत्वस्य तत्कायतावच्छेदकतया तदवच्छिन्नस्यापत्त्यसम्भवात्पि न चक्षुःसंयोगादिग्रलाज्ञानत्वादवच्छिन्ने आपाद्यमानेऽथत भ्रमापत्तेर्दुर्वारत्वात् । न च विषयतया प्रातिभासिकग्रहत्वविच्छिन्नवृत्तेस्तादात्म्येन हेतुत्वकल्पनाद् भ्रमभिन्नज्ञानविषयत्व तस्य नास्तीति वाच्यम् तथापि रजतचक्षुःसंयोगस्य रजतप्रत्यक्षहेतुतामा व्यभिचारापत्त । व्यावहारिकरजतप्रत्यक्षत्वस्य कायतावच्छेदकत्व च गौरवात् । वृत्तेर्ज्ञानत्वा भावेऽप्यमुख्यया परोक्षापरोक्षत्वयोस्तत्र पर स्वीकारात् । अन्यथा साक्षा-त्करोमीत्याकारकानुभवानुपपादनेन प्रयासवैयर्थ्यात् । न च रजतचक्षुःसंयोग कायतावच्छेदके मुख्यमव प्रत्यक्षत्व निवेश्यत इति वाच्यम्, मयापि भ्रम प्रमास्थलीयसाक्षात्कारद्वय वजात्यद्वयमभ्युपगम्य चक्षुःसंयोगादेर्दोषस्य च तदवच्छेदेन प्रत्येव हेतुत्वकल्पनसम्भवेन चक्षुःसंयोगव्यतिरेकेण कथ रजत लौकिकप्रत्यक्षमित्यादेभवदीयप्रत्यवस्थानस्य निरवकाशत्वापत्तेः ।

एतेन इन्द्रियजन्यवृत्तिं प्रति प्रातिभासिकस्य तादात्म्येन प्रतिबन्धकत्वकल्पन-मप्यनाशङ्कयम् मन्मते तूक्तबाधनिर्णयस्य तादृशविशिष्टबुद्धौ सामानाधिक रण्येन विरोधित्वान्न काप्यनुपपत्तिरिति वैषम्य शुक्तौ रूप्य नष्टमिति प्रत्य यापत्तिश्च । शुक्तेरनुपादानत्वेऽपि तदुपादानीभूताज्ञानविषयतावच्छेदकत्वात् । अन्यथाव्यावहारिकरजतावयवेष्वपि तन्नाशग्रहो न स्यात् ।

यत्तु उत्पत्तिनाशधीर्भ्रान्तिसमये आपाद्यते बाधसमये वा ? नाद्य, पूर्वोत्पन्नाविनष्टशुक्त्यभिन्नतया ग्रहस्यैव प्रतिबन्धकत्वात् विरोधिज्ञानानुदयेन तदा रूप्यनाशाभावाच्च । नान्त्य अत्यन्ताभावग्रहस्य प्रतियोगिवत्तदुत्पत्ति विनाशयोरपि ग्रहे विरोधित्वादत्यन्ताभावाधिकरणत्वेन गृहीते उत्पादविनाश बुद्धेरनुत्पत्तिरिति तन्न भेदग्रहापूर्व तदुत्पत्तिप्रत्ययविरोधित्वाविकल्पन गौरवात् । अत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सामानाधिकरण्यस्य नव्यैरभ्यु पगमादुक्तविरोधे बीजाभावात् । न चानेन तत्कल्पन इति युक्तम् दोषादिहेतु तयैव साक्षात्कारिभ्रमोपपत्त्या तयानुपपत्त्यभावात् । न च निनिगमकाभाव अनन्तगौरवस्य परमत एव रूप्यत्वादत्यन्ताभावत्वेन ज्ञानाभावकालेऽपि शुक्तौ रूप्यनाशानुभवाच्च । एतेन मिथ्यात्वादिवदुत्पत्त्यादिकमावृत्तत्वादेव रूप्यादौ

न गृह्यते । एव च तद्ग्राहकमानप्रचनवतारादेव न तद्ग्रह । सामायनवतार-कालीनात्यन्ताभावबुद्धेर्नाशादिबुद्धयनुत्पत्तिव्याप्यत्वे च प्रतिबन्धकत्वाभिधा-यिग्रन्थस्य तात्पर्यमित्यपि निरस्तम् । आवृत्तत्वादेव प्रत्यक्षानुत्पत्तिसमा-धानसभवे शशशृङ्गादेरपि स्वीकारापत्ते ।

किच शुक्तौ रजतसत्वे तस्य त्रैकालिकनिषेधप्रतियोगित्वरूपसाध्यवैक-ल्यम्, स्वसमये तस्य स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वस्य मिथ्यात्वमिनि पूर्वमसिद्धत्वात् । न चाविद्यानसाक्षात्कारानन्तर शुक्तौ रूप्य नास्ति नासीन्न-भविष्यतीति प्रतीत्या तत्सिद्धिरिति वाच्यम्, विशुद्धप्रतीतिद्वयेऽन्यतरस्याप्रिय-मापहारप्रौव्यात् । न च पारमार्थिकत्वेन रूपेण तदापि तदभाव इति वाच्यम्, स हि पारमार्थिकत्वनिष्ठावच्छेदकताकप्रतियोगिताया नेद रजतमित्यादिज्ञान-विषयत्वाद्वा युक्तिवशाद्वा ? नाद्य, सर्वानुभवविरोधात् । नान्त्य, घटादिभ्यो विशेषनिरुक्ते । नेद रजतमिति ज्ञानस्य व्यावहारिकरजताभावविषयत्वेन पूर्वं व्यवस्थापितत्वाच्च । व्यावहारिकस्य प्रतियोगित्वेऽन्यथाख्यातेर्दुर्वार-त्वाच्च । एतेन पारमार्थिकत्वेन रूप्य नास्तीति बाधस्य रूप्याभावाविषयक-त्वेन पारमार्थिकत्वाभावविषयकत्वं वाच्यम् । तथा चासगति । पारमार्थिक-त्वस्यापि त्रिकालमये प्रतीतत्वेन त्रैकालिकनिषेधप्रतियोगित्वानुपपत्तेः । रूप्यस्य प्रतियोगित्वानुभावे बोधाच्चेत्याशङ्क्य यदुक्तम्"प्रतीतिकालप्रतीत पारमार्थि-कत्वमपि प्रातीतिकमेव" इति. न तन्निषिध्यते, किन्वत्यन्त वर्तमानमेव, नष्ट विषयत्व वाभाववुद्धौ न निषेध्यत्वेन किन्तु तदवच्छेदकत्वेनेति नोक्तदोष. । न च स्मृतिरूपाया पारमार्थिकत्वप्रसक्तेः सत्वेऽपि निषेध्यत्वप्रयोजिका पार-मार्थिकत्वाकारेण प्रातिभासिकस्य प्रसक्तिर्नास्त्येवेति वाच्यम्;यद्रूपविशिष्टस्य प्रतियोगित्वधीस्तद्विशिष्टस्यैव प्रसक्तेरपेक्षितत्वात् । व्यधिकरणधर्मविशिष्टस्य च प्रतियोगित्वाननुभवात् । व्यधिकरणधर्मावच्छिन्नाभावप्रत्ययस्य प्रत्येकप्र-सिद्धत्वेनोपपत्ते । प्रतियोग्यशे तस्याविशिष्टस्य वैशिष्ट्यमित्याकारकत्वानभ्यु-पगमात् । विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वे मानाभावात् समानाधिकर-णधर्मावच्छिन्नाभावबुद्धेरपि निर्विकल्पकोत्तर स्वीकारात् । तद्धेतुत्वस्य प्रामा-णिकत्वे तु व्यधिकरणधर्मावच्छिन्नाभावधियस्तदुत्तर स्वीकारे बाधकाभा-वादित्यादिकं परास्तम् । पारमार्थिकत्वस्याबाध्य सर्वं मेयमित्यादिधीरूपस्य विषयतासबन्धेन रूप्ये सत्त्वे बाधकाभावात्तस्योक्तनिषेधप्रतियोगिताव्य-धिकरणधर्मत्वे मानाभावात् । रूप्ये पारमार्थिकत्वाभावस्य मानान्तरानधि-गतत्वात् ।

यत्तु धर्मिप्रतियोगिनोरेकविभक्त्यन्तपदोपस्थाप्यत्वे नञोऽन्योन्याभावबोधकत्वव्युत्पत्तघट पटो नेत्यादौ वस्तुत्वादिद रजत न भवतीति वाक्यस्य भेदबोधकत्वात्तदभिलप्यमानप्रतीतेरपि भेदविषयकत्वम्, अभिलप्यमानप्रतीतेरभिलापजन्यप्रतीतिसमानविषयकत्वात् । तथा चेदशब्दनिर्दिष्टे पुरोवर्त्तिनि प्रातीतिकरजत रजतशब्दनिर्दिष्टव्यावहारिकरजतान्योन्याभावप्रत्ययादार्थिक मिथ्यात्वम् । नात्र रजतमिति वाक्यमलिप्या तु प्रतीतिरत्यन्ताभावविषया, धर्मिप्रतियोगिनोर्भिन्नविभक्त्यन्तपदोपस्थाप्यत्वात् । सा च पुरोवर्तिप्रातीतिकरजतस्यैव व्यावहारिकमत्यन्ताभाव विषयीकरोतीति कण्ठोक्तमेव मिथ्यात्वम् । स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य विना मिथ्यात्वमनुपपत्तेरिति, तच्चिन्त्यम्, इद रजतमिति ज्ञाने इदन्त्वेन शुक्तेरेव भानात्, शुक्तिरजतयोरभेदस्यैव तादृशभ्रमविषयत्वात्, नेद रजतमित्यनेनापि तयोरेव भेदग्रहात्, इदमित्यस्य शुक्त्यनवगाहि व शुक्तरुक्तरजतोपादानाज्ञानविषयतावच्छेदकत्वादावेव भानाभावात् । शुक्त्यभिन्नत्वेन रजतज्ञानस्य तदुत्पत्तिज्ञानादिविरोधित्वस्य पररप्युक्तत्वात् । न चेदमित्यस्य शुक्त्यभेदेन प्रातीतिकरजतविषयत्वम्' रजतमित्यस्य च नत्र व्यावहारिकरजताभेदावगाहित्वमिति वाच्यम्, मानाभावाद्रजत साक्षात्करोमीत्यस्यानुपपत्तेश्च । इदमशे विशेषणस्यैव रजतस्य तादृशधीविषयत्वात् । एतेन चाक्षुषेदवृत्त्यवच्छिन्नचैतन्यस्याविद्यापरिणामत्वेन शुक्तिज्ञानस्य चाक्षुषत्वोपचार इति निरस्तम् । उपचारेण यथोक्तविषयत्वनिर्वाहे चाक्षुषविषयीभूतेदमशनिष्ठाभेदप्रतियोगित्वज्ञानेन रजताशेऽपि साक्षात्करोमीति प्रत्यय इत्यस्य मयापि वक्तु शक्यत्वात् ।

यत्तु इदमशो न करणवृत्त्या रजताशश्चाविद्यावृत्त्या गृह्यते, रजतभ्रममूलाज्ञानस्यैव रजताकारज्ञानत्वेन परिणामात् । न चैव भ्रमे ज्ञानक्रियानुभवविरोध विषययोरभेदाध्यासे ज्ञानयोरप्यभेदाध्यासात् । यद्वा इदमशावच्छिन्नचैतन्यगताविद्यापरिणामत्वाद्यथारूप्यमिदन्त्वेन भाति तथेदमाराकान्तकरणवृत्त्यवच्छिन्नचैतन्यगताविद्यापरिणामत्वेन रूप्यज्ञानमिदज्ञानत्वेन भाति । यद्वा अविद्यावृत्तर्न ज्ञानत्वम्, अतो ज्ञानक्रियायो ज्ञानत्वस्याज्ञाननिवर्त्तकमात्रवृत्तित्वादविद्यावृत्तरतथात्वात् । 'द्वारावहनस्थले तत्तत्कालकलाविशिष्टग्राहकत्वेनागृहीतग्राहितयाज्ञाननिवर्तकत्वात् । ज्ञानभेदेनाज्ञानभेदापगमात् । तन्निवर्त्यज्ञानाना तत्तज्ज्ञानशक्त्या निवृत्तिसभवाच्च । परोक्षस्थले विषयगताज्ञाननिवृत्त्यभावेऽपि प्रमातृगताज्ञाननिवृत्त्या तत्र ज्ञानत्वसौलभ्यात् । तदभेदग्रहात्परोक्षभ्रमोऽपि जानामीति प्रत्ययात् । अन्त करणपरिणामे ज्ञानत्वोपचारात्'

इति विवरणोक्तेश्च प्रकाशकत्वनिबन्धनज्ञानपदप्रयोगौपचारिकत्वपरतया अज्ञाननिवर्तकत्वनिबन्धनज्ञानपदप्रयोगस्यात्-करणवृत्तावौपचारिकत्वे तात्पर्यविरहात् । यद्वा वृत्तिभेदेऽपि इदरूप्ययोरिदमंशावच्छिन्नचैतन्यप्रकाशत्वेन फलैक्याज्ज्ञानैक्यधी, अन्यस्य तदाकारतासंपत्तिरिति सिद्धान्तात् । प्रातिभासिकस्यास्वच्छत्वादेव तदवच्छिन्नचित प्रकाशानापत्त्या तत्रावृतत्वानङ्गीकाराच्। अविद्यावृत्त्यैव चैते तत्रावरणनाशरूपफलविशिष्टत्वेनेदमंशावच्छिन्नचित एव फलत्व न तु रूप्यावच्छिन्नचित । ततश्चोक्तफलैक्यात्तदवच्छिन्नयोर्वृत्तिज्ञानयोरैक्यव्यवहारसंभवात् । परोक्षभ्रमेऽपरोक्षकरसचैतन्यरूपफलैक्याभावेऽपि फलैक्यमप्युपचर्य ज्ञानैक्योपचारात्, इत्यादि, तत्सर्वं चिन्त्यम्, जानामीत्यस्य कुत्रचिदौपचारिकत्व क्वचिच्च नेत्यत्र बीजाभावात् । तावत्स्थले तु तावदुक्ताभेदज्ञानस्य विनानुभव कल्पनस्य चायुक्तत्वात् । रूप्यावच्छिन्नचित आवरणनाशरूपफलाविशिष्टत्वेऽविद्यावृत्तेरावरणनाशफलकत्वाभावाद् वृत्तिद्वयस्य फलैक्यासंभवात् । तदजन्यस्य तन्निरूपितफलत्वानुपपत्ते. । एतेन इदमाकारान्तःकरणवृत्त्यभिव्यक्तचैतन्यस्यैव रूप्याभिव्यञ्जकत्वात्फलैक्यमित्यपि परास्तम् । अज्ञाननाशस्यैवाभिव्यक्तित्वात्तस्य च रजताकाराविद्यावृत्त्यसाध्यत्वात् । एतेन ख्यातिवादान्यथानुपपत्त्यानिर्वाच्यख्यातिसिद्धिरपास्ता । ख्यातेर्देशान्तरीयरजतपरतयैवोपपत्ते. । बाधस्य च भ्रमविशेष्यकभ्रमत्वप्रकारकज्ञानातिरिक्तस्यानभ्युपगमात् । तदुक्तमाकरे 'बाधकेन भ्रमस्य भ्रमत्वबुद्धिरेव बाधः" इति । रजतनाशस्य च नेद रजतमिति ज्ञानानन्तरमुत्पत्तौ मानाभावात् । एव मिथ्यैव रजतमभादित्यनुभवस्यानिर्वाच्यख्यातौ भानत्वमप्यनाशङ्क्यम् ; अय हि न शाब्दः, प्रत्यक्षस्य प्रमाणत्वेनोपन्यासोपक्रमविरोधात् ।

अथोक्तशब्दोल्लेख्यप्रत्यक्षस्य तत्सामानविषयकत्वात्तदत्र विवक्षितमिति चेत्; तर्हि मिथ्याशब्दस्यानिर्वाच्य शक्यमितिव्याकरणकोशादिषु क्वचिदप्य भवतोपलब्ध येनैव स्यात् । असदेव रजतमभादित्यत्रापि सज्ज्ञानविशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वरूपमेवासत्त्व विषय, तेनानिर्वाच्यैकदेशसत्त्वव्यतिरेकविषयकवेन तद्वर्णनमनुपादेयम् । अन्यथैवकारेण सत्त्वव्यतिरेकान्यभागस्य तत्र निषेधादसत्ख्यातावेव तस्य प्रामाण्य स्यात् । एतेन मिथ्यात्वमपि व्याख्यातम् ।

यद्वा मिथ्येति भानक्रियाविशेषणम्। मिथ्यात्वं च ज्ञाने व्यधिकरणप्रकारकत्वमेव। तथा च तदभिन्नातीतानुभवविषयो रजतमित्यर्थः। व्यावहारिकरजतस्यापि प्रातिभासिकरजतविशेषणतया भाने मिथ्यैव रजतमभादित्यप्रातिभासिकान्यरजतस्य तद्धीविषयत्वव्यवच्छेदबोधकतया तत्पक्षप्रतिकूलत्वाच्च। तस्माद्विषयत्वविशेषशालिबुद्धेर्जनको लौकिकसन्निकर्षदोषो। रजतादिषु दोषकारणत्वं परमासाभवदुक्तिकं गरीयः।

वेदाविरुद्धयुक्तीनामकें तर्ककुतूहले।
वाच्यैर्निर्वासिताख्यातिरनिर्वाच्या सयुक्तिकैः॥ २०॥

एकविंशोंऽशः

भावरूपे स्वनादावज्ञाने मानाभाव। नन्वहमज्ञ इति प्रत्यक्षं तत्र मानम्। तथाहि अस्य ज्ञानाभावविषयकत्वपक्षे यावद्विशेषाभावातिरिक्तसामान्याभावविषयकत्वम्, सामान्यावच्छिन्नप्रतियोगिताकयावद्विशेषाभावविषयकत्वं वा वाच्यम्, तथा च व्याघातः। प्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रकारकाभावप्रत्यक्षबुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतिक्षेपमपेक्षितत्वात्, योगिज्ञानस्य स्वातन्त्र्येण विशेषणतावच्छेदकप्रकारकनिर्णयविधया वा अवज्ञानाभावप्रत्यक्षे विशेष्यभूताहमर्थज्ञानस्याप्यावश्यकत्वाच्च। न ह्येवं सति ज्ञानत्वावच्छिन्नप्रतियोगिताकाभाव आत्मनि संभवति, उक्तज्ञानयोरपि ज्ञानत्वावच्छिन्नत्वादतिरिक्तसामान्याभावे विशेषाभावसमुदाये

वा यत्किञ्चित्प्रतियोगिरूपत्वस्यैव विरोधित्वात्। धर्मिप्रतियोगिज्ञानाभावे च सामग्र्यभावादेव ज्ञानाभावप्रत्यक्षानुपपत्तेरिति तस्य भावरूपाज्ञानविषयकत्व कल्प्यते इति चेत्, उच्यत, अहमज्ञ इति प्रत्यक्ष प्रमैवंरूप ज्ञानाभाव। अतो ज्ञानत्वावच्छिन्नप्रतियोगिज्ञाभावविषयकदैर्घ्यनुपपत्तिर्नास्त्येव। घट वत्यपि घटो नास्तीत्यादि प्रत्ययानामप्रमात्वापत्तेः।

अथ तु विशेष —घटादिसामान्यज्ञान [ज्ञान सामान्य चत्येवा]नयरूपम्, ज्ञानसामान्याभावज्ञान तु भ्रम एवति। न च प्रमात्वरक्षार्थमिति वाच्यम्, तन्मानानुरोधेन सर्वज्ञातिरिक्तविषयकल्पने भ्रमस्यैवोच्छेदापत्ते। यदि प्रमात्व एवाग्रहस्तर्हि ज्ञानविशेष एव तत्र प्रतियोगित्वेनाभावांशे प्रकारतया भासि। प्रतियोगिता पुनर्विजातीयज्ञानत्वादिनैव तत्रावच्छेद्यत इति कल्प्यताम्।

एव शाब्देऽपि बोध्यम्। अभावज्ञाने प्रतियोगितासम्बन्धेनाभावांशे प्रकारीभूय भासमानेऽर्थे प्रकारतया भासमानस्यैव धर्मस्य प्रतियोगितावच्छेदकत्वमित्युत्सर्गस्य प्रकृते बाधेन त्यागादन्यनिवृत्तिप्रतियोगितायामेव नियमोपगमात्। अत एव स्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य ज्योतिष्टोमत्वे माने विजातीयस्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वमेव प्रतियोगितावच्छेदकत्वेन भासत। अन्यथा गङ्गास्नानादिजन्यस्वर्गस्थले स्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य ज्योतिष्टोमत्वेन स्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकस्य स्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य ज्योतिष्टोमत्वे बाधादित्यभियुक्ता। अत एवोक्तप्रत्यक्षस्य न जानामीत्यभावबोधकशब्देनैवोल्लेखो दृश्यते। अन्यथा त्वन्नापि लक्षणया भावरूपाज्ञानपरत्वकल्पनबलेन स्यात्। न च त्वयाप्यत्र ज्ञायानो साक्षात्कारादौ लक्षणैव वाच्यति साम्यमेवेति वाच्यम्, शक्यतावच्छेदकधर्मानुप्रवेशेन तत्र्यशब्दे स्वार्थपरत्वरक्षणेन च तारतम्यस्य जागरूकत्वात्। पुष्करिण्या जल नास्तीत्यादौ प्रत्यक्षे शाब्दबोधेन यथोक्तप्रकारस्य सर्वैरभ्युपगम्यत्वाच्च। प्रत्यक्षे प्रकृष्टजलत्वावच्छिन्नप्रतियोगितासर्ग। शाब्दे च प्रकृष्टजले जलपदस्य लक्षणेति। अत एव 'अत्र ज्ञान नास्ति' इत्यादौ प्रकृष्टज्ञान लक्षणा"इति नव्यादीयदीधितिव्याख्याताभिरुक्तम्। अन्यथा प्रजलपदार्थस्यापि कल्प्तानिरुक्तस्य स्वीकारापत्ते। अत एवाह यत्र न जानामीति प्रत्ययस्य स्वाभिन्नश्रवणमननादिप्रयोज्यज्ञानशून्यविशिष्टसमवायसम्बन्धावच्छिन्नप्रतियोगिताकतया वा

ज्ञानाभावो विषय, सबन्धविषयताशालिबुद्धौ सबन्धज्ञानस्यानपेक्षिततया श्रवणमननादिप्रयोज्यत्वज्ञानशून्यकाले ऽपि तादृशसंसर्गताशालिबोधसभवादिति शङ्कन्ते ।

ननु यत्किञ्चिद् विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वे घटवत्यपि भूतले निर्घटमिति प्रतीति स्यात्, वायौ रूप नास्ति पुरोदेशे रजत नास्तीत्याप्तवाक्यजन्यप्रतीत्यनन्तरमपि सशयनिवृत्तिर्न स्यात्, एकविशेषाभावबोधेऽपि विशेषान्तरमादाय सशयोपपत्तरितिचेत्, न, निर्घटमिति प्रतीतिरयथार्था यथार्था वा आपाद्या ? नाद्य, इष्टापत्तेः । नान्त्य, घटत्वावच्छिन्नप्रतियोगिताकत्वेनाभावग्रहे वा बाधसत्त्वात् । तादृशत्वेन यत्किंचित् घटाभावग्रहे त्विष्टापत्ते । तात्पर्यग्राहकत्वे तस्य दुर्वारत्वात्, वायो रूप नास्तीत्यादौ तु नानुपपत्ति, बाधकाभावात् । नह्येकत्रान्यथाकल्पनेत्यत्रापि तथैव स्यात्, बाधके सत्येवोत्सर्गत्यागात् । सामान्याभावश्च नव्यानामतिरिक्त प्राचा तु विशेषाभावसमुदाय एव । तत्प्रतियोगितावच्छेदक सामान्यमिति विशेष इति अन्यदेतत् ।

किञ्च ज्ञानप्रागभावविषयैवाहमल ङनि धीरस्तु । न च विशेषगता प्रतियोगिता सामान्यरूपेण कथ गृह्यतामिति वाच्यम्, इदमभिधेयवत्प्रमेयादित्यनुमाने यत्र प्रमेय तत्राभिधेयमिति व्याप्तिग्रहसमये सामानाधिकरण्यरूपाया व्याप्तेर्वृत्तिमत्प्रमेयत्वावच्छेदेनैव सत्त्वेऽपि प्रमेयत्वमेव व्याप्यतावच्छेदकतया गृह्यते न तु वृत्तिमत्प्रमेयत्वम्, गौरवाद्वैयर्थ्याच्च । अवृत्तिस्तु साध्यसामानाधिकरण्यरूपव्याप्यभावबत्साध्याभावसामानाधिकरण्यरूपव्यभिचाररस्याप्यभावात् । व्यर्थविशेषणत्वरहितत्वे सति व्यभिचारिव्यावृत्तत्वमात्रेण व्याप्यतावच्छेदकत्वसभवाच्च । एव च वृत्तिमत्प्रमेयगता व्याप्तिर्यथा प्रमेयत्वेन गृह्यते तथा ज्ञानविशेषगतापि प्रतियोगिताज्ञानत्वेनेति न दोष. ।

यत्तु उदाहृतव्याप्तिस्थले बाधकाभावात्तत्रापि प्रकृते न तथेति, तन्न, सामान्याभावभान भ्रमत्वापत्तेरन्यापि बाधकसत्त्वात् । वस्तुत "इहेदानी घटो नास्तीति" बुद्धि प्रदर्श्य यदुक्त दीधितिकारै—"नहीय घटप्रतियोगिकाभावविषयमवगाहते, यत्किंचिद्घटवत्यपि तथा बुद्धापत्ते, किन्तु घटत्वावच्छिन्नप्रतियोगिताकम् । न च ध्वसप्रागभावौ तयासभवतो वा तदा तन्न कपाले बहूनामुत्पद्यमानत्वान्नष्टत्वाच्च । अत सामयिकोऽत्यन्ताभावस्तत्र विषय । सामयिकत्वञ्च समये विशेषावच्छेदेन वर्तमानत्वम् । कपिसयोगा-

त्यन्ताभावस्य देशविशेषावच्छेदेन वर्तमानत्ववदविरुद्धम्" इत्यादि। तत्सर्वं तत्र घटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्याबाधितत्वात्तद्विषयकत्वेनैव-प्रतीत्युपपत्तौ घटत्वावच्छिन्नप्रतियोगिताकत्वानुभवमपलप्यमानान्तरासिद्ध-प्रागभावविषयकत्वकल्पनस्यानौचित्यादित्यभिप्रायेण। यत्तु सामान्याव-च्छिन्नप्रतियोगिताकत्वं बाधितं तत्र बुद्धेर्भ्रमत्वमुक्तरीतिर्वेत्यन्यतरदवश्यमा-श्रयणीयम्। भवति हि घटो ध्वस्त इति प्रतीतिः, सर्वसिद्धात्यन्ताभावाविषयक-त्वेन समता च। तत्र न घटत्वावच्छिन्नप्रतियोगिताकत्वम्, चरमध्वसाति-रिक्तध्वंसे सामान्यावच्छिन्नप्रतियोगितायाः अप्रसिद्धेः। न च तत्र तद्घटत्वा-दिना विशेषरूपेण प्रतियोग्युपस्थितिरिति सुवचम्, सर्वानुभवविरोधात्। अतस्तद्घटनिष्ठैव प्रतियोगिता घटत्वेन गृह्यत इत्यावश्यकम्। अत एवान्तरा-ध्वामे रक्तरूप नास्तीति प्रत्ययस्य पूर्वापररक्तिमध्वसप्रागभावावगाहित्व दीधितावाशङ्कितम्। अत एवात्यन्ताभावनिष्ठेन्द्रियसबद्धविशेषणतायां एव प्रतियोगितावच्छेदकावच्छिन्नाभावप्रत्यक्षत्वं कार्यतावच्छेदकमतः तेजस्त्वा-दिप्रकारकज्ञानात्प्रागभावध्वंसप्रत्यक्षम्। अत एव इहेदानीं घटध्वंस इत्यति-प्रसक्तघटत्वाद्यवच्छेदेनैव ध्वंसप्रत्यक्षं सर्वानुभवसिद्धमिति सामान्यलक्षण-ग्रन्थे व्याख्यातृभिरुक्तम्। एवमिहापि ज्ञानसामान्याभावस्य बाधितत्वात्। उक्तरीत्या ज्ञानप्रागभावस्वदनङ्गीकारे तु ज्ञानध्वंस एव विषय इत्यभ्युपगम्य-तान्, इह घटो नेत्यत्र तु वैषम्य पूर्वमेवोक्तम्। अतो ज्ञाननिष्ठध्वंसविषय-त्वेनैवाहमज्ञ इति प्रतीतेरुपपत्त्या न तस्या अज्ञानाभावरूपाज्ञानविषयकत्व-कल्पन युक्तम्। किं च ज्ञानत्वावच्छिन्नप्रतियोगिताकत्वं तत्रानुभविकं न वा? नाद्यः, उक्तरीतीनामन्यतमस्यावश्यकत्वादतिरिक्तविषयकत्वासिद्धेः। नान्त्यः, ज्ञानप्रतियोगिकाभावविषयकत्वेनैवोपपत्तेः। अत इहेदानीं घटो नास्तीतिवन्नानुभवस्यात्र प्रावल्यप्रसरः, इति स्पष्टमेव वैषम्यम्।

अथ यदीयमत्यन्ताभावविषयिणी स्याज्ज्ञानत्वावच्छिन्नप्रतियोगिताकत्व-विषयिणी स्यादित्यापाद्यत इति चेत्तर्हि; ध्वंसविषयकत्वपक्षे आपादक स्वरूपासिद्धम्। अथ यदि ध्वंसविषयिणी स्यात्तदा ज्ञानत्वावच्छिन्नप्रतियो-गिताकत्वविषयिणी न स्यादिति चेत्; तर्हि इष्टापत्तिः। उभाभ्यामेव तद-नङ्गीकारात्। अथ यत्किंचिज्ज्ञानसत्त्वेऽपि ध्वंसविषया उक्तप्रतीतिः स्या-दिति चेत्; इष्टापत्तिः। ध्वंसप्रतियोगिघर्मिज्ञानसत्त्वेऽप्युक्तप्रतीतेर्जायमान-त्वात्। इहेदानीं घटो नास्तीत्यपि प्रतीतिर्यत्किंचिद्घटसत्त्वे स्यादिति चेन्न;

तत्र ध्वंसविषयत्वानङ्गीकारात्। सामान्याविच्छिन्नप्रतियोगिताकत्वानुभवान्यथाचेष्टाणदनादिति दिक्।

अहमज्ञ इति धीर्ज्ञानसामान्याभावावगाहिन्यपि भ्रमैव। सुषुप्तिकाले तस्यात्मनि सत्त्वात्। अहमिदानीमज्ञ इति धीस्तु यदानुभवसिद्धा तदा यद्येतत्कालावच्छेदेनात्मनि ज्ञानसामान्याभावमवगाहते तदा भ्रम एव। यदि तु एतत्कालीनत्वबत्यात्मनि ज्ञानसामान्याभावमवगाहते तदा प्रमैव। गन्धप्रागभावकालीनो घटो गन्धवानित्यादावुभयस्य कल्पितत्वात्। वायौ रूपसामान्याभावप्रतीतिस्तु प्रमैव। तत्र समवायेन कदापि रूपस्याभावादिति वैषम्यम्। अत एव घटो रूपाभाववानिति सामान्याभावज्ञान प्रमैव। उक्तं हि दीधितौ—"रूपादिसामान्याभावसाध्ये पृथिवीत्वादिक सद्धेतुरेव। प्रलये परमाणावुत्पत्तिकाले चावयविनि तत्सत्त्वात्" इत्यादि। न चातीतानागतकालानवगाहिज्ञानसामग्या ज्ञानोत्पत्तिक्षणविशिष्टार्थविषयकज्ञानजनकत्वस्वाभाव्यात्सुषुप्तिकालानवगाहिनोऽहमज्ञ इति प्रत्ययस्य स्वोत्पत्तिक्षणावच्छिन्नज्ञानसामान्याभावविषयकत्वमेव वक्तव्यम्। अतो भ्रमत्वापत्तिर्दुःपरिहरैवेति वाच्यम्, तदंशे भ्रमत्वेऽपि क्षतिविरहात्। किं च जानामीत्यत्र वर्तमानत्वेन स्थूल काल एव भासने, न तु क्षणेऽतीन्द्रियत्वादिति स्पष्टमाकरे। एव च सामान्याभावाधिकरणक्षणोत्तरोत्पन्नज्ञानरूपप्रतियोगिज्ञानेन तृतीयक्षणे ज्ञानाभावग्रह। चतुथ चानुव्यवसायः। तावद्गर्भवर्तमानत्वान्तर्भावेनाहमज्ञ इति धिय प्रमात्वमुपपाद्यम्, इदानीमित्यस्य क्षणमात्रविषयकत्वे प्रमाणाभावात्। एतेन त्वदुक्तमर्थं न जानामीत्यस्यापि तत्र प्रामाण्यत्वमुक्तार्थज्ञानज्ञाने त्वदुक्तार्थस्यापि विषयत्वात्। ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात्। प्रतियोगिज्ञानस्यैव त्वदुक्तार्थज्ञानत्वात्तदभावस्य तत्र बाधितत्वादित्यप्यपास्तम्। त्वदुक्तार्थज्ञाने जातेऽपि वादिवचनत्वादिनाप्रामाण्यज्ञानस्यावश्यकतया तस्य त्वदुक्तार्थज्ञानाभावाज्ञान प्रत्यविरोधित्वात्। सामानाधिकरण्य विशेष्यत्व चेत्युभयसबन्धेनाप्रामाण्यग्रहाभाववत एव ज्ञानस्य विरोधित्वात्। अभावज्ञानोपजीव्यप्रतियोगिज्ञाने च तदप्रामाण्यज्ञानाभावनिवेशे प्रयोजनाभावात्। त्वदुक्तार्थज्ञानज्ञानरूपस्य तस्य भ्रान्तिज्ञानस्येव प्रामाण्यस्यापि सत्त्वाच्च।

वस्तुतस्तु त्वदुक्तार्थज्ञानेऽप्रामाण्यग्रहे जाते तदुत्तरकालीनत्वदुक्तार्थज्ञानज्ञाने त्वदुक्तार्थविषयकत्वमेव नास्ति, भ्रमाप्रामाण्यज्ञानेन तदभाववद्विशेष्यकत्वा-

वगाहनात् । तद्रूपावज्ञानस्येव प्रतिबन्धकत्वात् । ज्ञानज्ञानस्य यावद्विषयविषयकत्वनियमे बाधकाभावस्यापि निविष्टत्वात् । अन्यथा भ्रान्तिभ्रान्तिज्ञसकरापत्ते , ईश्वरस्य भ्रान्तत्वापत्तेश्च । एतेन विषयबाधाऽपि निरस्त , पूर्वोत्पन्नत्वदुक्तार्थज्ञानस्य नष्टत्वात् । त्वदुक्तार्थज्ञानज्ञानस्य चाक्षुषबाधकेन त्वदुक्तार्थविषयकत्वाभावात् । त्वदुक्तार्थज्ञानाभावस्य तत्र सत्त्वात् । ज्ञानसत्त्वमात्रेण तद्विषयस्यापि तत्र स्वीकारे वातिप्रसगस्य स्पष्टत्वात् ।

यदप्युक्तम् , एतावन्त काल न किंचिदवेदिषमिति स्मर्यमिद्ध सौषुप्रत्यक्षमपि भावरूपाज्ञानविषयकमेव । न च तत्रानुल्लेखान्न स्मरणम्, तन तदुल्लेखनियमाभावात् । अन्त करणोपरागकालीनानुभवजन्यत्वाभावेन च तत्रानुल्लेखसभवात् । न च त्वन्मतेऽनाद्यविद्योपरक्तसाक्षिचतन्यरूपस्य सौषुप्तज्ञानस्यानित्यतया स्वरूपत उपाधितो वा नाशासभवान्कथ तेन सस्कारोत्पत्ति , विनष्टयदवस्थ स्यव ज्ञानस्य सस्कारजनकत्वात् , तदभावे च कथ स्मरणमिति वाच्यम् , अज्ञान स्याज्ञानवृत्तिप्रतिबिम्बिततयव तस्य विषयत्वात् । अज्ञानवृत्तिप्रतिबिम्बितचैतन्यस्यैव साक्षिपदार्थत्वादज्ञानचैतन्ययोरनादित्वेन तदा नाशाभावेऽपि वृत्तिनाशादेव सस्कारोपपत्ते । न चाज्ञानवृत्तिप्रतिबिम्बितचैतन्यरूपस्याज्ञानानुभवस्य जाग्रद्दशायामपि सत्त्वात्कथमुक्तस्थलेऽज्ञानस्मरणम् , सामग्रीसाम्ये एकत्रानुभवत्वमन्यत्र स्मृतित्वमिति वक्तुमशक्यत्वात् । अन्यथा धाराबाहिकबुद्धिषु स्मरणत्वव्यवहारापत्तेरिति वाच्यम् , सुषुप्त्याख्यतामसवृत्तेरज्ञानसबन्धिन्या नाशेन जाग्रदवस्याया तद्विशिष्टाज्ञानस्याननुभवात् । सस्कारजन्याविद्यावृत्त्यैवाज्ञानस्य विशिष्टस्वरूपमात्रस्य विषयीकरणात् स्मृतित्वोपपत्ते । विशिष्टस्वरूपान्याज्ञानस्वरूपाशे तु सामग्रीसाम्याद्धारावाहित्वस्यवोपगम त् । तथा चैकैव निर्विकल्पकवृत्तिरुक्तविशिष्ट केवल वा अज्ञानस्वरूप विषयीकरोति विशिष्टाशे स्मृति , केवलाशे त्वनुभव इत्यादि, तच्चिन्त्यम् ,एतादृशप्रक्रियाया अज्ञानसिद्ध्युत्तरकल्पतया तदनुसारेण प्रथम नावेदिषमिति प्रत्ययस्याज्ञानविषयकत्वेन व्यवस्थापयितुमशक्यत्वात् । उक्तप्रत्ययस्य त्वनुभवात्मकत्वेनैवोपपत्ते ।

अथ कोदृश्यनुमिति । तत्कालावच्छिन्नोऽह तदानी ज्ञानाभाववान्, प्रकारविशेषवत्त्वादित्यत्र ज्ञानाभावातिरिक्तविशेषस्य दुर्वचत्वम् । तस्य च पूर्वमसिद्धिरेव । न च ज्ञानसामग्रीविरहो हेतु , तस्य ज्ञानाभावमात्रानुमेयत्वात् । न च ज्ञानवत्त्वेनास्मर्यमाणत्व, तथा यो यत्कालीनयद्विषयकज्ञान-

वत्त्वेन न स्मर्यते, स तत्कालीनतद्विषयकज्ञानाभाववान्, यथाऽह प्रातर्घटज्ञानवत्त्वेनास्मर्यमाणस्तदानीन्तनघटज्ञानाभाववानिति सामान्य व्याप्तेरेव वाच्यत्वात् । विशेषव्याप्तौ दृष्टान्ताभावात् । तथाचापेक्षणीयज्ञानस्यैव निवेशे तदभावसिद्धावप्युपेक्षाज्ञानाभावो न सिद्ध्येत्, तस्य स्मरणानाधायकतया तदभावेन तदभावानुमित्यनुपपत्ते । न च ज्ञानसामान्य निवेश्यम्, उपेक्षाज्ञान एव व्यभिचारापत्तेरिति चेत्, उच्यते, नावेदिषमिति प्रत्ययमात्र ह्युपपाद्यम्, तच्चोक्तरीत्या सिद्धमेव । उपेक्षाज्ञानाभावस्तु प्रमाणाभावादेव, ज्ञानमात्रनिवेशेऽप्यदोषाच्च । न च व्यभिचार, स्वार्थानुमाने तदभावात् । न चानुमितेर्भ्रमत्वापत्तिः, साध्यवति व्यभिचारिलिङ्गजन्यानुमितेरपि प्रमात्वात् । न च साध्यवत्त्व केन सिद्ध्यतीति वाच्यम्, अनुमानश्रुत्यादितस्तत्सभवात् । न ह्युक्तज्ञानमेव सुषुप्त्यवस्थाया प्रमाणमिति केनाप्युच्यते । अनुमान तु मदीयजागराद्यज्ञानप्रागभावो मदीयप्रत्यक्षविशेषगुणानधिकरणकार्यद्रव्याधिकरणवृत्ति, प्रागभावत्वात्, घटप्रागभाववत् ।

न च पूर्वस्मरणकालमादायार्थान्तर कार्यद्रव्यपदस्य मदीयजीवशरीरपरत्वात्, शरीरप्रागभावस्य दृष्टान्तत्वसभवात्, मदीयजागराद्यज्ञानाव्यवहितपूर्वकालवृत्तित्वेन कार्यद्रव्याधिकरणविशेषणाद्वा । न चाप्रयोजकत्व प्रत्यक्षविशेषगुणमत्त्वे तदनुभवध्वंस्येण स्मरणापत्तेर्बाधकत्वात् । यद्वा मदीयजागरान्त्यज्ञानध्वसो मदीय[-प्रज्ञान]विशेषगुणानधिकरणमदीयजीवशरीराधिकरणवृत्तिध्वसित्वात्, शरीरध्वसवत् । पूर्ववदन्यत् । श्रुत्यादिक चानुकूलतर्क । एव मदीयजीवच्छरीर प्रत्यक्षविशेषगुणानवच्छेदक शरीरत्वाच्च शरीरवदित्यादिकमपि बोध्यम्, "न वाऽरे किंचन वेदनान्तरम्" इत्यादिश्रुतय पूर्वमेव व्याख्याता । केचित्तु "सुषुप्तोऽहं न किंचिदज्ञासिषमिति प्रत्यक्षेण मनसबद्धविशेषणतया तदानीन्तन सुखाद्यत्यन्ताभावो विषयीक्रियते" इत्याहु ॥

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले ।
अविद्याया अचद्यानामपरोक्षे परीक्षणम् ॥ २१ ॥

द्वाविंशोंऽशः

यत्तु जन्यसविकल्पकाजन्यघटचाक्षुषप्रमा स्वविषयावरणस्वनिवर्त्यवस्त्वन्तरपूर्विका, अप्रकाशिकार्यप्रकाशत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रमावत्। स्वविषयावरणत्व स्वजननायोग्यत्व स्वनिवर्त्यत्व स्वजन्यनाशप्रतियोगित्व वस्त्वन्तरत्व स्वभिन्नत्वम्। स्वप्रागभावपूर्वकत्वमादायार्थान्तरवारणाय आद्य विशेषणम्, इच्छाप्रागभावादिना तद्वारणाय द्वितीयम्, स्वपूर्ववर्तित्वेन तद्वारणाय तृतीयम्। यद्वा स्वप्रागभावान्यस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकत्व साध्य स्वसमानाधिकरणप्रागभावान्यार्थकमाद्यम्, इच्छाभ्रान्तिप्रागभावादिनार्थान्तरवारणाय आत्मत्वादिवारणाय द्वितीयम्, स्वसमानाधिकरणयोर्ग्यार्थकतया स्वजनकादृष्टादिवारक तृतीयमिति. तच्चिन्त्यम्; अन्धकारस्योद्भूतानभिभूतरूपवत्तैज सामान्याभावरूपतया प्रमाजन्यनाशप्रतियोगित्वाभावेन स्वनिवर्त्यवगर्भसाध्यानाश्रयत्वात्। स्वप्रयोज्याभावप्रतियोगित्वमाक्तौ च इच्छाप्रागभावादिनार्थान्तरतादवस्थ्यात्, कालोपाधिविषयोक्तचाक्षुषप्रमाया अपि इच्छाप्रागभावादिनाशकत्वाच्च। प्रतियोगिविषया स्वनाशत्वोक्तौ च साध्याभावात्। भवदभिमताज्ञानज्ञानयो प्रतियोग्यनुयोगिभावाभावात्। भ्रमसंशयोत्तरप्रमाया सिद्धसाधनाच्च। न च पटचाक्षुषोत्तरघटचाक्षुषप्रमाया घटचाक्षुषेच्छाजन्यत्वेन तस्या पटाविषयकत्वेन पटसविकल्पकाजन्यतया पक्षान्तर्गताया सिद्धसाधनवारणाय योग्यात्मगुणाव्यवहितोत्तरान्यत्वस्याजन्यान्तार्थत्वान्न दोष। परमते निर्विकल्पकाव्यवहितोत्तरत्वस्य पक्षे सत्त्वात् योग्येति। सविकल्पकमुखादेरपि योग्यत्वान्न सिद्धसाधनमिति वाच्यम्, तन्मतेऽज्ञानस्यापि योग्यात्मगुणत्वेन पक्षस्यैवानवासिप्रसंगादज्ञानसिद्धौ बाधप्रसंगावश्यकत्वाच्च। पक्षदृष्टान्तसाधारणप्रकाशपदार्थैक्याभावाच्च। प्रकाशपदवाच्यतावच्छेदकत्वेन ज्ञानत्वालोकत्वयोरनुगमस्याप्यकिंचित्करत्वात्। उभयत्र शक्तेः प्रामाणिकत्वेऽप्यवच्छेदकत्वस्य भिन्नत्वात्। प्रकाशपदयोर्भावे करणे च व्युत्पत्त्योभयत्र वृत्ते। पक्षीभूताया प्रमादृष्टान्तीभूतस्य च यत्किंचिदन्यतरत्व हेतुरित्यस्याप्याग्रहमात्रत्वात्।

यत्तु चैत्रप्रमा चैत्रप्रमाप्रागभावातिरिक्तानादिनिवर्त्तिका प्रमात्वान्मैत्रप्रमावदिति, तन्न, प्रागभावानभ्युपगमे साध्याप्रसिद्धे। प्रमात्यन्ताभावनिव-

नैकदेन सिद्धसाधनात्। प्रमात्वेन तदनाश्रयत्वान्निवृत्या तदनाश्रयनिवृत्तेः। न च निवृत्तिरूपेण नाश एव विवक्षित इति वाच्यम्; ज्ञाने सत्यनाश्यत्वं यत्र यस्मिन्नवोद्देश्याविशेषप्रत्ययो वा साधनवदप्रमाश्रयो वा कटकत्वजातिवा दिति पक्षयुपगमे। ईश्वरज्ञाने च व्यभिचारात्। न च तत्रापि दृष्टान्तबद्ध साध्यसन्धमिति वाच्यम्, ईश्वरज्ञानहेतुतायां दोषत्वस्यावच्छेदकतया तत्सामान्ये निवेशस्य साध्ये पक्षेऽपि कार्योपाधिविरहया मेयप्रमाप्रागभावनिवर्तकत्वेनैव सिद्धसाधनात्।

ननु तत्प्रमात्वं नाम्नि गुणजन्यतावच्छेदकस्य तस्य तस्मिन्नसम्भवात्, यदि प्रमात्वमागमनानाधिकरणध्वंसप्रतियोगित्वं तस्य न स्यादप्रमा स्यादिति दीधितिकारीया बल्लभस्वप्रमा स्यात् प्रमा न स्यादित्यर्थः। "ईश्वरज्ञानं तु तत्प्रमेति न व्यभिचार" इत्यपि मिश्रैरुक्तमाचेति, नच्चिन्त्यम्,' प्रमात्व ज्ञानावच्छिन्नकार्यध्वंसप्रतियोगित्वं ज्ञानसमानाधिकरणाप्रतियोगिकध्वंसनावच्छेदकं ज्ञानसमानाधिकरणप्रमात्वावच्छिन्नप्रमात्वस्य नित्यकूटस्थितया कार्यतानवच्छेदकत्वात्" इति मणिकृतापि च निरस्तत्वात्। सिद्धान्तेऽप्यस्तित्वप्रमा यत्र यज्ञानध्वंसावच्छिन्नकार्यतावच्छेदकप्रतियोगिकारणाप्रतियोगिकध्वंसनिरूपितज्ञानसमानाधिकरणाप्रमात्वावच्छेदकधर्मवदप्रमात्वादिकल्पनात्। "स्वाश्रयेण गृह्यत एवेति विप्रतिपत्तावीश्वरज्ञानग्राह्यत्वेन सिद्धसाधनवारणाय यादृशमेव पदम्" इति मिश्रोक्तञ्च। अन्यथा पर्वतीयवह्नित्वं घटत्वप्रकारकत्वरूपप्रमात्वाश्रयत्वाभावेन स्वाश्रयपदेनैव तद्व्यावृत्तिसिद्धे। "योगजधर्मादिजन्यत्वं पक्षविशेषणम्" इति पक्षं प्रक्षिप्य 'इदमुपलक्षणं ज्ञानत्वमपि विशेषणम्, ईश्वरज्ञानप्रामाण्यं सिद्धसाधनतादवस्थ्यात्" इति मिश्रैरुक्तत्वाच्च। दीधितावपि "तत्र जन्यपदोपादानात्। अत एव ज्ञानमादाय सिद्धसाधनतोपपादितत्वात्। इदन्तु विद्या यादिवा इति प्रायमिका वर्गविका विभाग" इति व्याख्यानमनूद्य "तच्चिन्त्यम्, तत्रान्त्य विद्यात्व्य निरवयवसाधारणस्य निरावृत्तेर्विशिष्टज्ञानमात्रवृत्तिनिरवयवसाधारणप्रमात्वादिकल्पनात्" इति दूषितम्। एव तद्दीधितिनवद्विशेषणजन्यत्वमात्रेश्वरज्ञानस्य प्रमाप्रमासमवेतत्वावच्छिन्नेऽपि तदोषत्वम्। अत एव "प्रमासामान्येव नानुगता गुण किन्तु तत्तत्प्रमाया यावत्तद्व्यक्तिसमवेतत्वसम्बन्धावच्छिन्नकार्यतानिरूपकत्वसम्बन्धेनानुगतानेकयथार्थ प्रत्येकमेव गुणत्वम्" इति मूले। "यद्यपि प्रमासामान्यनानुगता गुणेष्वन्वयव्यतिरेकसिद्धेस्तथापि प्रमाविशेषे गुणविशेषाणामन्वयव्यतिरेकाभ्या कार्यकारणभावे सिद्धे सामान्यत

एव बाधकाभावात्। तथात्व सेत्स्यतीत्यभिप्रायवान्तमावत्ते"इत्युक्त्वा किंत्वित्यादिप्रतीकमुपादाय "यस्य यस्य यादृशि यादृशि प्रमाविशेषेऽन्वयव्यतिरेकशालित्व विशिष्य तत्र तत्र तस्य हेतुत्वम्, एव च विशेषन सिद्धप्रमाकारणभावाना प्रमाकारणत्वेन जन्यप्रमासामान्ये कारणत्वमेतेन दोषो व्याख्यातः" इति तत्र व्याख्यातम्। प्रमाकारणत्वेन प्रमात्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वेनेत्यर्थः। 'सर्वं कार्यं प्रमासाधारणमीश्वरीयज्ञानमेव गुणः' इति मिश्रोक्तावपि जन्यप्रमात्वस्यैव गुणकार्यतावच्छेदकताया अभिमतत्वात्। अद्वैतसिद्धावप्युक्तम् "ननु दोष विना भ्रमस्वीकारे स्वादप्रामाण्यस्य स्वतस्त्वापत्ति, दोषजन्यत्वे तु दोषस्याप्यपसनीयत्वेनानवस्यापत्तिरिति चेन्न, अनादिविद्याव्यासस्य दोषानपेक्षत्वात्। साद्यविद्याव्यासस्य वाविद्याजन्यत्वाप्रामाण्यस्य स्वतस्त्वम्। नाप्यनवस्था, अन्यथा तार्किकाणामप्यनादिप्रमागुण विनापीति प्रामाण्यपरतस्त्व भज्येत। जन्यप्रमामात्रस्य गुणजन्यत्व जन्याध्यासमात्रस्य दोषजन्यत्वेन सम तदुत्तरमप्युक्तम्। "यया नित्यज्ञानत्वादिना ज्ञानत्वस्य न शरीरजन्यतावच्छेदकत्व न वा गुणजन्यत्वस्य प्रामाण्यप्रयोजकत्वं बाधकबलात् तज्जन्याध्यास प्रत्येव दोषादीना कारणत्व गुणाजन्यत्वेऽप्यबाधितविषयतया नित्यज्ञानप्रामाण्यवद्दोषाजन्यत्वेऽपि बाधितविषयतयानाद्यध्यासस्याप्रामाण्योपपत्ति" इति। अपि च—प्रमामात्र इति वाक्यमभ्युपगमवादत्वेन मिश्रैर्व्याख्यातम्। यद्यपि प्रमामात्रे नानुगतो गुणस्त्वन्मते तादृशवस्त्वप्रसिद्धेस्तथापि प्रत्येकप्रमितौ प्रत्येकस्य गुणत्व त्वन्नयेनैवास्त्विति अभिप्रेत्य सिद्धान्तमति—प्रमेति। अस्मन्मते त्वनुगत एव सर्वसाधारणोऽस्तीति वय वक्ष्याम" इत्युक्ते। पश्चादप्युक्तम् "अन्यस्त्वेव योजनीय। प्रमामात्रे नानुगतो गुण इत्यन्तरमस्तिवत्यध्याहार्यम्। प्रत्येकमेव गुणत्वमित्यत्र केन वारणीयमित्यध्याहार्यम्। तेनाभ्युपगमसिद्धान्तरीति स्फुटीभवति। तथा चेद पर्यवसितम्—अस्ति तावदनुगतमेव, यदि च तव रीत्यश्वरद्वेषान्न तथा सभवति तथापि प्रत्येकगुणत्वेऽपि सिद्ध नः समीहितम्, प्रमाया गुणजन्यत्वात्। तदनन्तरमनापत्त्येश्वरसिद्धिश्च" इत्यादि। तथा च मीमासकाभ्युपगतरीतितात्पर्यके मूले कथमनित्यत्वघटित प्रमात्व कार्यतावच्छेदकत्वेन तात्पर्यविषय स्यात्, व्यावर्त्याभावेन विशेषणवैयर्थ्यात्। अत एव चतुर्थस्तवकान्ते कुसुमाञ्जलावुपाये च मिलित्वोक्तम् "ननु च नेश्वरज्ञान प्रमा, नित्यत्वेन फलानात्मकत्वात्। प्रमायाश्च क्रियात्वेन जन्यत्वात्। नापि प्रमाणम्, निर्व्यापारत्वेनाकरणत्वात्। अत एव न तदाश्रयः प्रमाता, प्रमासमवायिकारणस्यैव प्रमातृत्वात्। उच्यते—

मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेद प्रामाण्य गौतमे मते ॥' इति ।

यथार्थानुभवत्वमेव प्रमात्व नित्यानित्यसाधारणम् । न च क्रियात्वविरोध, घात्वर्थमात्रस्यैव नित्यानित्यसाधारणस्य सत्तादेरिव क्रियात्वात् । अनित्यत्वेन तद्विशेषणस्य गौरवेण व्यर्थत्वात् । नित्यानुभवसिद्धौ तदव्यवच्छेदस्यानिष्टत्वादसिद्धौ च व्यवच्छेद्याभावात् । न चोक्तमनुमानमाश्रयासिद्धिबाधयोरन्यतरग्रस्तत्वात् । नापि प्रमाणमित्यत्र च सिद्धसाधनम्, स्वप्रमा प्रत्यकरणत्वात् । अस्मदादिप्रमा प्रति तु तत्करणत्व वर्तत एव, तस्य सव्यापारत्वात् । प्रमातृत्व च प्रमासमवायित्वमेव न तु कारणत्वगर्भम्, उक्तरीत्या वैयर्थ्यात् । यच्चैवमाप्तप्रामाण्यादिति सूत्रविरोध, तेन हीश्वरे प्रामाण्य प्रतिपाद्यते न तु प्रमातृत्वमिति चेत्, न, निमित्तसमावेशेन व्यवहारसमावेशाविरोधात् । प्रमासमवायो हि प्रमातृव्यवहारे निमित्तम् । प्रमया त्वयोगव्यवच्छेदेन सबन्ध । प्रमाणव्यवहारे चक्षुरादीनामपि चरमसहकारित्वणे प्रमयायोगव्यवच्छेदेन सबन्धस्य विद्यमानत्वात् । अस्ति च तदुभयमीश्वरे ह्यत्रापि कार्ये सोनि विशेषण पूर्ववद्व्यर्थं प्रमाणप्रमातृपदयो करणकर्तृकार्यकप्रत्ययान्तत्वेऽपि तस्य व्युत्पत्तिमात्रत्वात् । प्रमाकर्तृकत्वेन प्रमातृत्वेऽस्मदादीना तदभावापत्ते । तदनुकूलप्रयत्नवत्त्व हि स्वातन्त्र्यतत्कर्तृत्वम् । तच्च सर्वं प्रमायामस्मदादीनामपि नास्ति, अस्मदादिप्रयत्न विनाप्यस्मदादिप्रमोत्पत्ते । प्रमाणव्यवहारस्तु यद्यपि लोकेऽयोगव्यवच्छेदेन जनकत्वनिमित्तकोऽपि, तथापि कारकविशेषवाचिप्रमाण शब्दस्येश्वरे वृत्त्यभावेऽपि प्रमयायोगव्यवच्छेदेन सबन्धानिमित्तक एव सूत्रे इति साक्षात्कारिप्रमावत्तया चेश्वरस्य प्रत्यक्षप्रमाणेऽन्तर्भावात् । इन्द्रियार्थसन्निकर्षोत्पन्नमिति लक्षणस्य च लौकिकमात्रविषयत्वात्, ईश्वरप्रमायाश्च साक्षात्कारित्वस्य धर्मिग्राहकमानसिद्धत्वादिति दिक् ।

एतेन न्यायसूत्रे वेदार्थप्रमावत्त्वेनेश्वरस्य प्रामाण्य यदुक्तम्, तन्नित्यत्वरहितमेव प्रमात्वमुपयुज्यत इत्येव तदभिप्राय । जन्यत्वघटितमुख्यार्थैकदेशत्यागेनाजन्यज्ञाने सौम्यप्रमाशब्दस्य प्रवृत्तिसभव इत्याचार्याभिप्रायाच्च । अत एव प्रमाया अयोगव्यवच्छिन्नत्वे सति कारणत्वरूपस्य मुख्यार्थस्यैकदेशे वायोगव्यवच्छेदेनेश्वरे सौम्यप्रमाणशब्दवृत्ति । न चैतावता लक्षणा "शक्यसम्बन्धेन रूपेण ज्ञाने भवति लक्षणा' इत्यत्र शक्यपदस्य शक्यतावच्छेदकघटक-

मात्रपरत्वात् । "श्येनेन यजेत" इत्यादौ बलवदनिष्टाननुबन्धित्वस्य मानाधिकरणेष्टसाधनत्वशक्तस्य विधेः केवलेष्टसाधनत्वबोधकत्वेऽपि लक्षणाविरहादित्यादि निरस्तम् । प्रमाया अनित्यत्वघटितत्वे मानाभावस्योक्तत्वात् । उक्तन्यायवाक्ये ईश्वरज्ञानसाधारण्यवारणाय जन्यतावच्छेदककोटावनित्यत्वनिवेशेऽपि प्रमालक्षणे तदभावात् । शक्यपदस्य शक्तिविशेष्यपरतायां गोपदस्य गोः शक्य इत्यादिव्यवहारे दर्शनात् । "श्येनेन यजेत" इत्यत्र चेष्टसाधनत्वस्य विशेष्यत्वात् । विशेष्यतावच्छेदकरूपेण बोधने लक्षणाविरहेऽपि प्रकृतौ विशेषणमात्रपरत्वे लक्षणाया आवश्यकत्वात् । अन्यथा गौर्नित्य इत्यत्र लक्षणेति सिद्धान्तभङ्गापत्तेः । न च विशेषणविशेष्यभावे विनिगमकाभावात्, कारणत्वे सति प्रमायोग्यव्यवच्छिन्नत्वस्यैव प्रमाणलक्षणत्वसंभवान्न दोष इति वाच्यम् ; तथापि तस्य विशेष्यत्वव्यवस्थापनस्य दुष्करत्वात् । श्येनेन यजेतेत्यत्र तु विध्यन्यथानुपपत्तिरेवेष्टसाधनत्वस्य शक्तिविशेष्यत्वे मानमिति वैषम्यात् । अत एव वेदलक्षणेऽखण्डशक्तिपक्षेऽपि एकोच्चारणान्तर्भावेनैव शक्तेः स्वीकारात् प्रमाणशब्दमात्रपरत्वेन लक्षणातादवस्थ्यमित्युक्तं न्यायसूत्रमालायाम् ।

यत्तु "स्वाधिकरणक्षणे ध्वंसोत्पत्तिक्षणत्वव्यापकप्रमितिकत्वरूपप्रमायोगव्यवच्छेदः सौत्रप्रमाणशब्दार्थः । स चेश्वरे प्रमाचरमकारणे चास्ति" इति व्याख्यानमनूद्य दूषणमुक्तम् 'यद्यय प्रामाण्यपदमुख्यार्थस्तदा परमाण्वादावकारणेऽपि तत्वापत्तिरीश्वरप्रमामादाय तत्ताप्युक्तार्थसत्वादुक्तप्रमित्यधिकरणत्वोक्तावपि जन्यमात्रस्येश्वरप्रमामादाय तत्सत्त्वात् जन्यप्रमानधिकरणकालोत्पन्ने चरमक्रियादौ प्रमाणपदमुख्यार्थत्वापत्ति., यदिवाय गौरो व्यवहारस्तदा प्रवृत्तिनिमित्तन्तु यथोक्तमेवेत्युत्तरग्रन्थविरोध. । अय प्रमोपधायकत्वघटितमुक्तरूप मुख्यार्थः । उक्तग्रन्थस्य तु यथोक्तप्रवृत्तिनिमित्तमेव तद्घटकत्वादित्यर्थः । तदास्मदुक्तार्थपर्यवसानम् " इति, तदपि चिन्त्यम् ; करणकर्तृव्युत्पत्त्या तस्य व्युत्पत्तिमात्रत्वादित्युभयसाधारण्येनोक्तावपि प्रवृत्तिनिमित्तन्तु यथोक्तमेवेत्यस्य प्रमातृपदस्य प्रमासमवायित्वमेवार्थ इति तन्मात्रपरतयैवोपपत्तेः । प्रमाणव्यवहारस्त्वन्यत्र यद्यप्युक्तनिमित्तकोऽपीत्यादिना प्रमाणविषयस्य पृथगेवोक्तत्वात् । अपिशब्देन प्रमाया अयोगव्यवच्छेदेन जनकत्वस्य प्रवृत्तिनिमित्तनियमविरहस्य लाभात् । हेतुत्वसमवायान्यतरसबन्धेनोक्तव्यापकप्रभृतित्वस्य प्रमाणपदप्रवृत्तिनिमित्तत्वस्य विवक्षितत्वात् । द्रव्यत्वादेर्द्रव्यपदप्रवृत्तिनिमित्तस्यापि परैः व्यक्तिवृत्ति-

कल्पितताद्रात्म्यतदभिन्नद्रव्यव्यक्तिवृत्तिताद्रात्म्यानि चैत्यन्यतरसम्बन्धेन सद्रूपात्मकत्वोपगमात्। इत्यास्तामप्रकृतमेतत्।

यत्तु दीधितावुक्तम् प्रमात्वघटक यायार्थ्यमिच्छासाधारणमनित्यज्ञानत्वञ्च तत्राद्यमेव गुणजन्यतावच्छेदकमन्यत्तु सामान्यसामग्रीनिर्वाह्यम्' इति। तत्रानित्यत्व प्रमालक्षणान्नभूतमिति नार्थं, किन्तु गुणजन्यतावच्छेदकमनित्यत्वगर्भमित्येव। अत एव माधवमिश्रैरुक्तम्—'ननु प्रमात्व प्रत्यक्षप्रमत्व वाथसमाजसिद्ध कथमवच्छेदकम्, न चैव बहिद्रव्यप्रत्यक्षत्वमपि नावच्छेदक स्यात्, इष्टत्वात्। यदुपाध्यवच्छेदकत्वमन्तरेण प्रकृतोपाधेरेवाशयोरनवच्छेदकत्वेनार्थसमाजन्याय स एव परमुपाधिरवच्छेदक'। तथाहि द्रव्यविषयप्रत्यक्षत्व द्रव्यविषयत्वेन प्रत्यक्षत्वेन वावच्छेदकेनोपपन्नकार्यभावमार्थ स्यात्। द्रव्यविषयत्व तु न तथा। ननु तत्रापि द्रव्यसामग्र्या द्रव्यविषयकत्वसामग्र्या सविषयकत्वमस्तु। द्रव्यसामग्र्या अनुगताया अभावादिति, तन्न, अनित्यत्व प्रमात्वं तद्वत्व विशेष्यत्व च यद्यवच्छेदक स्यात्, स्यादपि तदा प्रकृतमार्थत्वम् नत्वेवमिति। किञ्च प्रमाया असाधारणकारणजन्यत्वे प्रमाजन्यत्वमुपाधि न च पक्षेतरत्वम्। तवेश्वरज्ञानस्य मम लक्षणस्य व्यावर्त्यत्वात्। उभयसिद्धव्यावर्त्तकत्व तन्त्रम्, न तु व्यावर्त्यस्योभयसिद्धिगौरवात्। व्यतिरेकस्यासाधारणत्वञ्च पक्षेतरस्यानुपाधित्वे बीजम्। तच्चात्र नास्ति भगवज्ज्ञानस्य स्वत्पक्षस्य सपक्षत्वादिति तावन्मीमासकोक्त दूषण मणावुपन्यस्तम्। तत्र ईश्वरज्ञानञ्च न पक्ष। जन्यप्रमामात्रस्य पक्षत्वादिति मिश्रव्याख्यातृभिर्व्याख्यातम्। दीधितावप्युक्तम् 'न चानित्यप्रमाया पक्षत्वे प्रमान्यत्वस्य न पक्षेतरत्वम्। नहि करकाया निस्नेहत्वे साध्ये जलन्यत्वस्य तथात्वम्। प्रमामात्रपक्षतायां चाशतो बाध इति वाच्यम्, पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धरुद्देश्यत्वात् इति चाक्षुषप्रमात्वम्। चाक्षुषाप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, चाक्षुषभ्रमावृत्तिकार्यतावच्छेदकत्वात्। घटत्वादिन्यनुमानेऽप्युक्तम्, प्रमात्वस्येश्वरज्ञानवृत्तितया बाधवारणाय चाक्षुषेति' इति दिक्।

प्रकृतमनुसराम। यत्तु विमता प्रमा प्रमाभावातिरिक्तस्यानादर्निवर्त्तिका, कार्यत्वात्, घटवत् ज्ञानत्वाद्वा भ्रमवत्। भ्रमानुत्तरप्रमास्वाभावातिरिक्तस्वविरोधिनिवर्तिका, प्रमात्वात् भ्रमोत्तरप्रमावदिति, तदसत्, पूर्ववत् सिद्धसाधनादे सुलभत्वात्।

वेदाविरुद्धयुक्तीनामकर्त्रे तर्ककुतूहले।
अज्ञानस्यानुमानानाममानत्व विभाषितम् ॥२२॥

त्रयोविंशोंऽशः

यत्तु छान्दोग्ये दशमे प्रपाठके "तद्यथा हिरण्यनिधिं निहितमक्षेत्रे तमानु-पर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्म-लोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः" इति श्रुतिः ब्रह्मज्ञानप्रतिबन्धकत्वेनावृतं ब्रुवाणा भावरूपेऽज्ञाने प्रमाणम्। न चात्रानृतपदस्य दुष्कर्मपरत्वम्, "ऋतं पिबन्तौ" इत्यादौ ऋतशब्दस्य सत्कर्मपरत्वदर्शनादिति वाच्यम्। उत्तरवाक्ये च आत्मापहतपाप्मेत्यादिना आत्मनोऽपहतपाप्मत्वप्रतिपादनेन दुष्कर्मप्रत्यू-ढत्वविरोधात्। सुषुप्तौ कार्यमात्रनाशे दुष्कर्मणोऽप्यभावात्। कारणात्म-नाविनाशेनाज्ञानस्यावश्यकत्वात्। ब्रह्मज्ञानप्रतिबन्धकस्यानादित्वावश्य-कतया कर्मणस्तदनुपपत्तेश्चेति, तदसत्; अपहतपाप्मत्वस्याज्ञानेऽपि बाध-कत्वात्। जीवनिष्ठत्वेनैव चैतन्यवाच्यत्वात्। सुषुप्तौ कार्यमात्रनाशस्य निर-सनीयत्वात्। जीवब्रह्मणोर्भेदस्य च व्यवस्थापितत्वात्।

'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः।
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि॥"

इति स्मृतेश्च। कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य तत्रैव लाभात्। प्रवाहानादित्वस्यापि पापे सम्भवात्। न च पापस्य मिथ्याज्ञानजन्य-संस्कारस्य वा प्रतिबन्धकत्वमित्यत्र विनिगमकाभावात्तद्भिन्नमेवानादिप्रति-बन्धकत्वेन कल्प्यत इति वाच्यम्; अनृतशब्दस्य मुख्यार्थः पापमेवेत्यस्यैव विनिगमकत्वात्। न च ऋतशब्दस्य सत्यवाचकस्य सत्यब्रह्म-प्रापकत्वेन पुण्ये गौणोऽर्थो न तु मुख्यस्तथा सत्यब्रह्मविरोधित्वेन पुण्यवास-नयोरप्यनृतशब्दगौणार्थत्व पापवत्सम्भवत्येवेति वाच्यम्; ब्रह्मैव सत्यमित्यस्य-मिथ्यात्ववादवासनामात्रमूलकत्वात्।

ननु तथापि अनृतशब्दस्य पाप न मुख्योऽर्थ, कोपादावदर्शनादिति चेत्, सत्यम्; "नानृतं वदेत्, प्रातः प्रातरनृतं ते वदन्ति" इत्यादौ कोपे चानृत-शब्दस्यासत्यवाक्यतदर्थान्यतरपरत्वादुभयथापि कारणे कार्यलक्षणया पापस्य शीघ्रोपस्थितिकतया सत्परत्वे लाघवस्यैव विनिगमकत्वात्। मुख्या-नादित्वस्य च प्रतिबन्धकतायामनुपयोगात्। प्रतिबन्धकालावस्थायित्वस्यैव

तन्न तन्नत्वात् । पुण्यस्य च ब्रह्मज्ञानविरोधित्वे मानाभावात् । 'सर्वकर्माखिल पार्थ ज्ञाने परिसमाप्यते' इति स्मृत्या ज्ञानानुकूलत्वस्यैव लाभात् । मिथ्याज्ञानवासनायाश्चात्मतत्त्वसाक्षात्कारनाश्यतया तत्र प्रतिबन्धकत्वानुपपत्त । परमतेऽपि शब्दजन्यशुद्धब्रह्मविषयकवृत्त्यात्मकसाक्षात्कारस्याविद्यानिवृत्त्युपधायकत्वाभ्युपगमेनोक्तसाक्षात्कारकारणीभूताभावप्रतियोगित्वस्याविद्यायामभावात् । 'ज्ञानेन तु तदज्ञान येषा नाशितमात्मन" इति च स्मृते । निधिप्राप्तावपि पापविशेषस्यैव विरोधित्वाच्च । भाग्यहीना न पश्यन्ति रत्नपूर्णां वसुन्धराम्" 'त इमे सत्या कामा अनृतापिधाना इति पूर्ववाक्येऽनृतपदार्थाविधेयस्य सत्यत्वोक्तेश्च । अज्ञानस्यानृतपदार्थत्वे तु विषयाणा मिथ्यात्वापत्त्या तद्विरोधात् । न चाज्ञानस्यात्ममात्रावरकतया तस्य सत्यतया न दोष , जडेष्वावरणकृत्याभावादिति वाच्यम्, त इमे इति [सर्वनाम्ना सत्यादि]पितृलोककामो भवतीत्यादिना प्रज्ञान्तानामेव विषयाणा परामर्शात् । त्वन्मते प्रति [वाक्य] तदापत्तेश्च ।

'न त विदाथ य इमा जजानान्यद्युष्माकमन्तर बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥'

इति मन्त्रोऽपि न तदुक्ताज्ञाने प्रामाण्यम् । हे नरा य इमा प्रजा जजान उत्पादयामास त यूय न जानीथ अन्यद्युष्माक अन्तरव्यवधान बभूव । नीहारेण तत्सदृशेनावरकेन प्रावृता यूय जल्प्या । मनुष्योऽहमित्यादि जल्पनशीला । असुतृप इन्द्रियतर्पणशीला विषयासक्ता उक्थशास-स्तोत्रविशेषवरणशीला कर्ममात्रानुष्ठायिन । तदत्र नाहारपद साध्यवसानलक्षणया त सदृशमात्रपर न तु विशिष्य धर्मिविशेषपरम् । अर्थगत्यैवतस्य कल्पत्वात् । अत एव "चमसवदविशेषात्' इति व्याससूत्रे ,

यथाऽर्वाग्बिलश्चमसमूर्ध्व उक्थास्मिन् यशो निहित विश्वरूपम् ।
तस्यासत ऋषय सप्त तीरे वागष्टमी ब्रह्मणा सविदाना ॥

इत्यत्र चमसशब्दो न धर्मिविशेषसमपक , किन्त्वर्वाग्बिलश्चमस ऊर्ध्व बुध्न [उक्था]इतीद तच्छिर इत्यादिव्याख्यानबलादेव तन्निर्णय । तथा 'अजामेका लोहितशुक्लकृष्णाम्" इत्यजाशब्दोऽपि । अतो न साख्यसमतप्रधानसिद्धिरित्युक्तम् ।

यत्तु अनृतनीहारादिशब्दाना दु कर्मपरत्वे 'अनीशया शोचति मुह्यमान" इति आर्थवणमन्त्रे अनीशया ईशत्वविरोधिना ईशभेदेन शोचति ससरतीत्य-

यंतया जीवेशभेदोपपादकत्व यदुक्त तद्विरोध, कर्मण आवरकत्वे मोहस्यापि तद्रूपत्वाद्भेदकत्व वाच्यम् । न च तत्तभवति, तस्य सादित्वाद्भेदस्य चानादित्वात्, अज्ञानपरत्वे तु तदानुकूल्यमिति, तन्न, अनीशयत्वेशभेदपरत्वे उक्तिसभवाभावात् । स्नोत्वस्य कथमप्यनुपपत्ते. । अघटइत्यादौ घटभिन्नस्यैव बोधात्, भेदमानपरत्वासभवाच्च । न च तत्रापि अघटपद घटभेदपरमेव, आश्रयत्व तु ससर्ग इति वाच्यम्, अभेदससर्गकबोधस्य सर्वसिद्धत्वात् । ' न कस्यचित्समर्थोऽहं दीन इति सभावनाऽनीशे" इति कल्पतरुवृद्भिर्विवृतत्वाच्च । जीवेशभेदस्यानौपाधिकत्वव्यवस्थापनाच्च ।

यत्तु "एवमेवंपा माया स्वाव्यतिरिक्ता परिपूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति" इति श्रुत्यन्तरम् । तदपि जीवशभेदस्याविद्यकत्वपरमविद्याया प्रपञ्चोपादानत्वपर वा आभासेन करोतीत्यन्वयात् । त्वन्मते मायाजीवशौ करोतीत्यस्यैव सामर्थ्यात् । नचाभासपदं भेदपरिमिति भेदवन्तौ करोतीत्यर्थ इति वाच्यम, अप्रसिद्धार्थकत्वात् । दर्शयित्वेति दर्शनानन्तर्यस्य भेदे विशुद्धत्वाच्च । भेदभ्रमादिताया एव परैः स्वीकृतत्वात् । तस्मादयमर्थ —मायादृष्ट स्वस्मादन्यतिरिक्तानि कारणत्वेन जन्यमानेऽननुगतत्वात् । न च व्यतिरिक्तशब्दस्य भिन्नार्थकतया स्वाभिन्नत्वस्य कार्यजाते लाभात् । निमित्तकारणतादात्म्यस्य च कार्यऽनङ्गीकारादुपादानत्वलाभ इति वाच्यम्, तदज्ञानविषयकज्ञानव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिज्ञानप्रकारो न वा । यस्य पदस्य समभिव्याहृतयत्तदव्यतिरेकप्रयुक्तयादृशान्वयाननुभावकत्व तादृशान्वयानुभवे समभिव्याहृततत्तदस्य तेन तादृशान्वयाननुभावकत्व तयाराद्धा अन्वयव्यतिरेकाभ्या व्याप्तिग्रह दृयादौ ससर्गाभावेऽपि व्यतिरेकपदप्रयोगदर्शनेन भेदमात्रवाचकत्वे मानाभावात् । परिपूर्णानि स्वस्वधर्मवन्ति क्षेत्राणि भोगसाधनानि दर्शयित्वा तन्निरूपितकारणाश्रयीभूय जीवस्य भोक्तृत्वनिर्वाहकतया ईश्वरस्य सहकारितया च करणे परैरपि जीवेशयोरनादित्वास्वीकारेण कराङ्गुल्यसंतामापरित्याज्यत्वात् । तदाह—आभासेनेति । तदिदमुक्तमाचार्यैः —

"इत्येषा सहकारिशक्तिरतुला माया दुरन्तेति सा
मूलत्वात्प्रकृतिः प्रबोधमयताऽविद्येति सर्वोदिता ।" इति ।

सहकारिणविनरहितम् । तस्याभिधानाय्याजनाशरवभावाद्भूयसामो विश्वमायानिवृत्तिरिति श्रुतेश्च श्रवणाद्यर्थानमादारेण विश्वमायानिवृत्तिरन्तो

प्रारब्धभोगसमाप्तौ तु भूयोऽवशिष्टदेहेन्द्रियादिरूपमायानिवृत्तिरित्यर्थोऽस्माकमप्यनुकूलः। मायापदमदृष्टपरमिति तु विशेषः, जीवन्मुक्ते सर्वसिद्धत्वात्। तत्त्वस्य सर्वाधिष्ठानस्य भावोऽविद्यानिवृत्तिरूपा प्राप्तिर्यस्मादिति तु नास्मत्सम्मतोऽर्थः। तत्त्वभावात्तत्त्वसाक्षात्कारादित्येव सम्भवात्। एवमन्यत्राप्यवधेयम्।

वेदाविरुद्धयुक्तीनामर्कः तर्ककुतूहले।
परोक्षार्थप्रातिकूल्यं श्रुतीनामवघातितम्॥ २३॥

चतुर्विंशोंऽशः

दृष्टिसृष्टिर्ज्ञानप्रामाणिकी। यत्तु "एवमस्मादात्मन सर्वेषाणि सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एव आत्मने व्युच्चरन्ति" इति श्रुतिः। सुषुप्तौ प्राणादिप्रपञ्चसत्त्वात् किमर्थं पुन सृष्टिरिति वाच्यम्; नतु तत्। द्वितीयमस्ति ततोऽन्यद्बिभवत यत्पश्येदित्यादिना सुषुप्तौ सकलकार्यप्रपञ्चलयश्रवणात्। हिता नाम नाड्य इति वा॥*

---

*अस्य ग्रन्थस्येयानेवांशोऽस्मत्सङ्ग्रहस्थग्रन्थे सरस्वतीभवनस्थग्रन्थे चोपलब्ध "एतत्तु दृष्टिसृष्टिनिरासे वदयाम" इति ग्रन्थकृता पूर्वमुक्तम्, एतेन ज्ञायते दृष्टिसृष्टिनिरासस्तु तेन कृत एव अन्येऽपि केचन सिद्धान्ता निराकृता स्युः, प्रचुरमन्वेषयद्भिरपि नास्माभिः पूर्णो ग्रन्थ उपलब्धः। भूयोऽप्यन्विष्यते, उपलब्धश्चेदग्रिमे संस्करणे दास्यते।

उद्धृतनामानुक्रमणी

अद्वैतचन्द्रिका २८, ३६८
अद्वैतसिद्धि १३, ५०, १०७, २०२, २०७, २६५, ४११, ४४४, ४८१
अभिमुक्त २६, ५३, ३५६, ३७६, ४७२
अमर (कोष) ७२, ६५, १०२, १२५, १४२, १५२, १६०, २२२, २७७, ३११, ३१६ ३२०
अमरव्याख्यातृ ७२
अयथवेदग्रन्थ ४६
आकर ५८, ३५३, ३६८, ४७१ ४७६
आचार्य ११५, १६४, १६६, १७०, १७२, २२७, २८३, २८४, २६५, ३११, ३५२, ४२३, ४८७
आचार्यवेदीय २७२
आत्मतत्त्वविवेक २७०
आथर्वणश्रुति ६२, १४०, १५१, १५२, १५७, २३६, २४३, २५१, २७५, ४८६
आदित्यपुराण ३५६
आनन्दगिरि १७६
आनन्दबोधाचार्य ३८, ४२४, ४५८
आरण्यपर्व (महा०) १६१
आश्मरथ्य २७२
ईशावास्यभाष्य २२२
ईशावास्योपनिषत् ७२
उत्तरब्राह्मण १६६
उदयनाचार्य ७२, १०६, ११६, २१६ ३५४
उद्धारकृत १०
उद्योगपर्व (महा०) २८८
उद्योगपर्वटीका २८७
उपाध्याय ३६७
उपाय (टीका) २०१, २०३, २०६, २७०, ४८०, ४८१
उपायकृत् १०६, २४१, २४६, २६४, २७२, २८७, ३११
ऋङ्मन्त्र ७०, १०२
ऐतरेयब्राह्मण ४१
ऐतरेयोपनिषत् १०५
औपनिषद ६३, २६५
औपनिषद (वृद्धा, आचार्य) ३८७, ४११
औपमन्यव २२७
कठवल्ली १३६, २७६
कठोपनिषत् २१२
कण्टकोद्धार २४
कण्टकोद्धारकृत २०२, २०३
कण्ठवल्ली २२५
कल्पतरु ६६, ६६, ११५, १२४, १२८, १६१, २०८, २५२, २५७
कल्पतरुकार (-कृत्) ४७, ७६, ८१ १४०, १४६, २२४, २५७ २७८, ३०५, ३८६, ४५१, ४८७
कल्पद्रुम ३१०
काठक १६६
काण्व २२०, २२१, २२७
कात्यायन २३२, १३१, २१०
कात्यायनवार्तिक २०३

कामधेनु ३१०
कारिकाव्याख्या ४१५
काव्यप्रकाश ७७, १०७, ३०७
काव्यप्रकाशटीकाकार २७८
काव्यमीमांसक २३५
काशकृत्स्न २७३
काशीखण्ड १०२
किरणावली १०६, ११५, १२०, २०१, २०३, २४०, २६७, २७२, २७८, २८७, ३०६, ३५४
(न्याय) कुसुमाञ्जलि ७०, १०८, १२८, १४८, १६८, १७७, १९१, ३८६, ४८१
कुसुमाञ्जलिप्रकाश २८१, ३४३, ३७४
कुसुमाञ्जलिप्रकाशकृत् २६७
केवलान्वयि ४३६
कैयट ११६ २३०, २६४, ३५७, ३५८, ३८८
कोष १६६, २६०, ४८५
कौमुदी ४२५
कौषीतकिब्राह्मण १७४
कौस्तुभ ४५, ४८, १५२
क्षीरस्वामी ७३, २३१, २६४
खण्डन (-खण्डखाद्य) १२, ५१, ६२, ३२८
खण्डनकार (-कृत्) ४४, ६५, ३२६
खण्डनटीका ४१३
खण्डनटीकाकार ६५, ६०
खण्डनोद्धारकृत् १०
गीताभाष्य (शाकर) ४०
गौतमसूत्र ३२१
चक्रवर्तिलक्षणव्याख्यातृ ३८७
चन्द्रिका २०३, २०७, ४३७, ४४८,
चन्द्रिकाकार (-कृत्) १४६, २१०
चाक्रायण ८०
चार्वाक १२, ६६, १६४
चित्सुखाचार्य २५६, २७५, ४२३,
(तत्त्व) चिन्तामणि २४१
छान्दोग्योपनिषत् ६, ८०, ६१, १०२, ११२, १२०, १५७, १७८, २१०, २४१, २५६, २७६, ३८८, ४४३, ४८५
जैमिनि २, १४, २६
जैमिनीयसूत्र २३६ २६०
टीकाकार (कृत) ६, ४७, ६२ २६७, ३६७, ३७३, ३७४, ३८८
ठक्कुर ३५३
तत्त्वदीपन ४४५, ४४७
तत्त्वदीपनकार ३८६
तात्पर्यपरिशुद्धि १०७, २७८
तापनीयोपनिषत् ३१२
तैत्तिरीयश्रुति ११२, ११३, १६७
तोटकाचार्य ३२८
त्रिसूत्रीनिबन्ध ३६३
दक्षिणात्यनिबन्धकार १६३
दानधर्म (महा०) २८६
दीधिति ५०, ५३, ३३४, ३४०, ३४१, ३४२, ३६७, ३७५ ३६६, ४१५, ४२८, ४५६, ४७४ ४७५, ४७६, ४८०, ४८४
दीधितिकार(कृत्) २७१, ३४५, ३८०, ३८४, ४१७, ४३४
दीधितिकारानुयायी २७१

दीधितिटीका ३३५
दीधितिटीकाकार ५४, १६७
दीधितिफक्किका २८८
दीधितिव्याख्यातृ २४०, २४१
३४७, ३८१, ४७३
दूषणोद्धारकृत् २६८
द्रव्योपाय(किरणा०) २३६, २४३, ४३६
द्रव्योपायटिप्पणी ३८७
द्रव्योपायविवरण २८, १८१
नयसारकार ११६
नामानुशासन ३५७
नारायणीयोपनिषत् ६४
नास्तिक ६६, १५६, २४२
निरुक्त २७७
निरुक्तकार १०२, १५६ २२७,
२७७, २७८
नृसिंहतापनीय ४०
न्यायपञ्चानन ३२८
न्यायभाष्य (न्यायसूत्रभाष्य) ४७, ३२२
न्यायभास्कर २८३
न्यायभास्करकार (-कृत) १०, २५४
न्यायवार्तिक २३५
न्यायवार्तिकतात्पर्यटीका २, १२,
११६, २०८, २१६, २२०,
२२२, ३८८, ४१५
न्यायसूत्र १०५, १०६, १६२, ४८२
न्यायसूत्रमाला ३२८, ४८३
न्यासकृत् ३२०
पक्षधर ७६, ३७३
पञ्चपादी ३८६
पञ्चशिख १५६
पञ्चपुराण १८२, १८६
पस्पशाह्निक (महाभाष्य) ७३
पाञ्चरात्रिक २७३
पाणिनि १३२
पाणिनीयसूत्र १६३
पातञ्जलसूत्र (योगसूत्र)६२, २३५,
२६५, २७२, ४१२
पार्थसारथिमिश्र ६६ १५७, १५६,
१६३, १६६, २००
२०२, २४८, ३२८
पूर्वमीमांसा १३
पूर्वाचार्य ५७, ४५८
पैङ्गिरहस्यब्राह्मण २७६,
पैङ्गोपनिषत् २७७
प्रारम्भ ३७३
प्रत्यक्षालोक ७८
प्रमाणनिबन्ध ५०
प्राचीनतार्किक ४०५
प्राञ्च २६६, ३६१
प्राभाकर २६४, ३४८, ३६३
प्रामाण्यवाद ३६७
बृहदारण्यक (उप०) ४२, ६६, ६२,
११८, १२५, १२७, १२६,
१३६, १४१, १४४, १४७,
१५७, १६१, २७६, ३०४
३०६, ४४३, ४५३
बृहदारण्यकव्याख्या २८८
बृहदारण्यकव्याख्यातृ ११८, १६७
बृहदारण्यकभाष्य ६६
बौद्ध ८६
बौद्धाधिकार (दीधिति) ६, १५०, २७८
३८८, ३६१

ब्रह्ममीमासा८६,११२,११३,३७२,३७३
ब्रह्मसिद्धिकार ४५६,
भगवत्पाद ३६,४०,६२,१०२ १२४,
१७६, २०१, ३१७, ४१८
भगवत्पादभाष्य ३८, १२४,
भगवद्गीता १०३, १३८, २८०,
२८५, ३२०
भट्ट (भट्टपाद) २३, ११६, ३१७
भागवत ३१६, ३२०
भामती ४६,६६,११४,१५७,२०३,
२२३,२३८,२५२,२७६,२७७
२८८, ३१७, ३७१, ३७५
भामतीव्याख्या ३८६,
(महा) भारत ११४, १२६, १४६,
१८०, २२१, २५६, २८७, ३१६
भाष्य ६४, ६७, १०३, २७६, ३५६
भाष्यकार २८, १५६, १६८ २७७
भास्कर २७७
मणि (चिन्तामणि, तत्त्वचिन्ता०,
न्यायचि०) १३०, १८३, ३४०,४८४
मणिकार (-कृत्) ११, २४, ५२, ५३
७८, १०७,२०१,२०२,२०३,
२०७,२०६,२४३,२६६,२८२,
३५७, ३६१, ३७१, ३७३,
३७४,३६६,३६७,४३४ ४८०
मणिकारव्याख्या ३७२
मतान्तर ४२०
मत्स्यपुराण ३०३
मन्वर्थमुक्तावली २५६
मन्वादिस्मृति ४७
महाभाष्य ६७, १०२, १०६, १०७,
१३२, १४०, १४७, १५२,
१६४, २०१, २१०, २३२,
३०३, ३२०, ३८८
महाभाष्यकार २२६
माधवमिश्र ४८४
माध्यन्दिन २२०, २३६
माध्यन्दिन (काण्व) २७५
माध्यमिक ७४, ३२३
मिताक्षरा ३२०
मिश्र ५, ४७, ५०, ७७, ७६, १०६,
१५६,१६१, १६४, २८४, ३३८,
३५०, ३५३,३६७, ३७४, ३६३,
३६७, ४८०, ४८१
मिश्रटीकाकार १७६
मिश्रव्याख्यातृ ६, १४, २५, ५३,४८४
मीमासक २०३, २४८
मीमासावार्तिक २४
मुण्डकोपनिषत् १४०, २७५, २७६
मैत्रायणीसहिता २४, २५
मैत्रायण्युपनिषत् ३१८
मैत्रेयीब्राह्मण १५३,१८८,१६६,
१६७,१६६, २८०
मैत्रेय्युपनिषत् २४२
मोक्षधर्म (महा०) ११२,१४२, १६६,
१८०, १८२, १८४, २१५,
२८३, २६२, ३५६
याज्ञवल्क्य ६६, ३५६
याज्ञवल्क्य (स्मृति) ३१४
योगवासिष्ठ ३१६
योगसूत्रभाष्य ६२
योगीश्वर २६८

रामायण २-८
लघुचन्द्रिका ६०, ३६१
लालावती २, २०१,२०६,२६६,
२५४, २८८, ४२०
लीलावत्युपाय ८० ३०३
वर्द्धमानोपाध्याय २०१,२०३ २४७,
२७८, ३७४, ३८६
वाक्यपदीय १४८
वाचस्पतिमिश्र ५ २१, २२, ३७
६५ ६६, २०८
२२०, २३८, २४०
वाचस्पत्यम् ७६, ८४, १०६, ७२६,
१४०,३१८,३२२,३२३,३२४,
३५६, ४०४, ४१३
वाचस्पत्यव्याख्या ३२२
वा.रामण २४१
वामन १३०
वामनपुराण ३५६
वार्तिक ४७, ७४, १६६,१६६,
१६२, २६७,३२५, ४६२
वार्तिककृत् (-कार) १६७,४१३
वार्तिकटीका ३२५
वार्षगिण १५६
विज्ञानवादि ६६, ८८
विज्ञानेश्वर २८३, ३१४
विद्यारण्य २६६
विद्यासागर १६६,२६०,३१६ २८६
विमलबोध २६२
विवरण २६, २६६, ३००,
३३३, ४४७ ४६६, ४७१
विवरणाचार्य २५१, ३८६
विश्वकोष ७४ १४० ३३०,
२७७, ३०३
विष्णुपुराण ७७ २४०, ३०१,
३१८ ४१६ ४१७
वृद्ध ६०, ६१ १२१ ३५३
वेणीसंहार २७८, ३२०
वेदभाष्य १३०
वेदव्यास २३६, २५६, २७७
वेदव्याससूत्र (वेदान्तसूत्र) १४५, २६७
२७५, २८२, ४४०, ४८६
वेदान्तसूत्रकृत् ६७
वैयाकरण ४१
वैयाकरणभूषण १४७
वैशेषिक ६६, ८०
वैशेषिकभाष्य ७२
वैशेषिकशास्त्र ३५६
व्याकरणकार ३५६
व्याख्यातार १६५
व्याप्तिग्रहोपाय ३४५
शबरस्वामी २२
शब्दकौस्तुभ ३२०
शब्दालोकव्याख्याकृ ३६८
शशधर २०२, २२५
शाकल्यब्राह्मण २४३
शाबरभाष्य २१
शाब्दिक १६०
शिक्षा ३२०
शिरोमणि ३६६
शून्यवादि १२
श्रीधर २०
श्रीनारायण सवन २८७

श्रीहर्ष ३१७
श्रुति २३६
श्वेताश्वतर (उप०) २६६
सत्प्रतिपक्ष ५३
सनत्सुजातीय १०२, २५६
सरस्वती ३२०
संक्षेपशारीरक ८३, २६८, ४२१
साङ्ख्य ४१३
साङ्ख्यसूत्र २९६
सामान्यलक्षणा ४७५
साम्प्रदायिक १६५
सार्वभौम ४६४
सिद्धान्तबिन्दु २०४
सूत्रमुक्तावली २८८, ३६८, ३१८
स्मृति १२, ७४, १४५, २१५, २४५, २६७, ३०८, ४८५, ४८६
स्मृतिकल्पतरु २६७, ३०२
हरि ११५, १३६
हरिवंश ३०३
हारीत २४०
हेमाद्रि १६१